THE

# TAITTIRĪYA UPANISHAD

## SHĪKSHĀVALLĪ -ĀNANDAVALLĪ -BHRIGUVALLĪ

WITH

**Sri Shankara's Commentary**

Edited with Notes and a new sub-commentary Bhāshyārtha Vimarshinī

By

**SRI SWAMI SATCHIDANANDENDRA SARASWATI**

# तैत्तिरीयोपनिषदि

## शीक्षावल्ली – आनन्दवल्ली – भृगुवल्ली च

श्रीशाङ्करभाष्यसंयुता

**श्री सच्चिदानन्देन्द्रसरस्वतीसंयमिभिः**

संशोधिता भाष्यटिप्पणेन भाष्यार्थविमर्शिनी नाम व्याख्यया च समलङ्कृता

क्रमाङ्कः: 106, 112 (combined)

**ADHYATMA PRAKASHA KARYALAYA**

Holenarasipura - 573211, Karnataka, INDIA

Tel : 08175 - 273820 www.adhyatmaprakasha.org

2011

THE

# TAITTIRĪYA UPANISHAD

*SHĪKSHĀVALLĪ - ĀNANDAVALLĪ - BHRIGUVALLĪ*

WITH

**Sri Shankara's Commentary**

Edited with Notes and a new sub-commentary
Bhāshyārtha Vimarshinī

By

SRI SWAMI SATCHIDANANDENDRA SARASWATI

# तैत्तिरीयोपनिषदि

**शीक्षावल्ली - आनन्दवल्ली - भृगुवल्ली च**

श्रीशाङ्करभाष्यसंयुता

**श्री सच्चिदानन्देन्द्रसरस्वतीसंयमिभिः**

संशोधिता भाष्यटिप्पणेन भाष्यार्थविमर्शिनी नाम व्याख्यया च समलङ्कृता

क्रमाङ्कः 106, 112 (combined)

ADHYATMA PRAKASHA KARYALAYA
Holenarasipura - 573211, Karnataka, INDIA
Tel : 08175 - 273820 www.adhyatmaprakasha.org

2011

**THE TAITTIRĪYA UPANISHAD,** ***SHĪKSHĀVALLĪ-ĀNANDAVALLĪ-BHRIGUVALLĪ*** WITH **Sri Shankara's Commentary** Edited with Notes and a new sub-commentary Bhāshyārtha Vimarshinī by **SRI SATCHIDANANDENDRA SARASWATI SWAMIJI**

Published by Adhyatma Prakasha Karyalaya, (Public Chariatable trust), Holenarasipura - 573211 ; Tel : 08175 - 273820; www.adhyatmaprakasha.org

| | Shīkshāvallī | Ānandavallī, Bhriguvallī |
|---|---|---|
| First Edition | : 1961 - 1000 Copies | 1962 - 1000 Copies |
| Second Edition | : 2011 (combined) - 500 Copies | |

Pages : (XXII + 78) + (XXXVII + 407) = LIX + 485 = 544

**Price : Rs. 150/- (Combined)**

All rights reserved by
The Adhyatma Prakasha Karyalaya

Type set :
**Meera Raghuram**
Cell : 94814 77334

*Printed by*
**Sri Rama Printers**
# 25, 15th Cross, 5th Main, Srinidhi Layout
Bangalore - 560 062 Cell : 98453 46197

# पूर्ववाणी

विजानन्तु विबुधाः यत् सोऽयमध्यात्मप्रकाशकार्यालयः परिशुद्धश्रीशङ्करभगवत्पादानां वेदान्तप्रक्रियायाः प्रसारणार्थमेव बद्धकङ्कणः। ईशकेनकठमुण्डकैतरेयोपनिषदां भाष्यं गैर्वाण्या भाषया श्री सच्चिदानन्देन्द्र-सरस्वतीस्वामिपादैः सटिप्पणीविस्तृतभूमिकाभिः मुद्रापितम्। तथैव तैत्तिरीयोपनिषदपि शीक्षावल्ली ब्रह्मभृगुवल्लीति भागद्वयात्मकतया मुद्रापिता। परमयं द्वितीयो भागः विस्तृतव्याख्यायुतत्वेन तैत्तिरीयभाष्यार्थविमर्शिनीति नाम्ना पूर्वं श्रीचरणैरेव मुद्रापितः। इदानीं तु अनेकेषां पाठकानां प्रार्थनानुरोधेन धनव्ययस्य न्यूनतरंअभिलक्ष्य चाहत्य वल्लीत्रयमपि एकपुस्तकरूपेणानीयतेऽस्माभिरिति विज्ञाप्यन्ते पाठकवर्याः । शीक्षावल्यास्तु भाष्यविभागेन युक्तशिरोनाम्नापेक्षितटिप्पणीसहितेन विस्तृतभूमिकया कठिनशब्दानुक्रमणिकया ईषाद्युपनिषदिव मुद्रापणं पूर्वमेव श्रीचरणैरेव कृतम् । आनन्दवल्लीभृगुवल्योस्तु विस्तृतव्याख्याकृता । यद्यपि आनन्दगिरिटीका शङ्करानन्ददीपिका वनमालाव्याख्यानादिकं बहु अस्ति व्याख्यानानि तथापि भाष्यस्थग्रन्थिभेदनेऽपर्याप्तमेव सञ्जातम्। श्रीमत्सुरेश्वराचार्याणां च वार्तिकमतिसंक्षेपेणैव वर्तते । श्री सायणाचार्याणां भाष्यमतिविस्तरेण वर्तते परमनेकत्रापेक्षितविषयस्य परित्यागोऽनपेक्षितानां संयोगश्च दरीदृश्यते । अतः इमामपेक्षितन्यूनतापरिपूरणकरीं विद्वज्जनचेतोहारिणीं मुमुक्षुजनचेतोहारिणीं तैत्तिरीयभाष्यार्थविमर्शिनीनाम्नीं व्याख्यां सर्वलोकानुग्रहरसिकतमाः श्रीस्वामिपादाः रचियित्वा लोकसमर्पणं कृतवन्तः ।

स्वीयव्याख्यानस्यापि विषयविभागकरणद्वारा युक्तशिरोनामानि प्रदर्श्य अन्ते मुख्यविषयस्य सूचना प्रत्ता । आङ्ग्लमय्यां भूमिकायामपि उपनिषद्विषयस्य चर्चा कृता । अन्यासामुपनिषदामिवात्रापि उपनिषत्सारमपि प्रदर्शितम् । विशिष्य च व्याख्यानप्रस्थाने यत्र यत्र भाष्यार्थः विपरिवर्तितः मूलाविद्यापिशाचिरपि संयोजितः तत्र तत्र श्रीचरणैः साग्रहेण भाष्यान्तरसवादेन सार्वत्रिकपरिपूर्णानुभवप्रदर्शनेन युक्त्यानयनेन च तत्तत्खण्डनपूर्वकं परिशुद्धशाङ्करभाष्याभिप्रायः प्रदर्शितः । अवश्यमेतत्पुस्तकं सर्वैः मुमुक्षुजनैः विद्वज्जनैरन्तेवासिभिश्च क्रेतव्यम् । भगवन्नारायणः सर्वात्मा सर्वान् सद्विद्याप्रदानेनानुगृण्हातु इति मुदा तं प्रार्थयामहे ॥

**अध्यात्मप्रकाशकार्यालये**

**खरनाम संवत्सरस्य आषाढबहुळत्रयोदशी** **ग्रन्थप्रकाशकाः**

**२८-०७-२०११**

# GENERAL PREFACE TO SECOND EDITION

Adhyatma Prakasha Karyalaya is committed to the propagation of the pristine pure advaita vedanta of Sri Shankara. In the year 1961 the Karyalaya had published two books on Taittirīya Upanishad. The first book contained Shīkshāvallī with Bhāshya and Sri Satchidanandendra Saraswathi Swamiji provided an elaborate introduction in Sanskrit and English and also foot notes. The second book contained both Ānandavallī and Bhriguvallī, along with Bhāshya. Sri Swamiji had blessed the readers with his invaluable new sub-commentary called Bhāshyārtha Vimarshinī in this book. Scholars, mumukshus and students alike, have been immensely benefited by this new sub-commentary which effectively brings out the heart of Sri Shankara and also points out the undesirable deviations from the Bhashya found in several other sub-commentaries.

The above two books (under serial numbers 106 and 112) have been reprinted now as a single, combined edition, for the convenience of the readers. Kindly note that no changes have been made in this combined edition, except for the correction of several errors remained in the first edition.

Pujya Swamiji had been a great creative thinker of very high order comparable to Sri Sankaracharya himself. Added to it is his faith in tradition. Thirdly he is not a dry intellectual philosopher and scholar, but a seeker of truth, contemplator and enlightened sage himself. Moreover, he used modern method of editing like dividing the Bhashya into paragraphs, giving meaningful headings to them etc.

His footnotes and bhumika, Sanskrit preface are really illuminating and show his depth of contemplation and understanding. He believed that a commentary or footnotes should only help a student to understand the depth of Bhashya but should not interfere and deviate from it, because Sri Shankara was a Rishi whose Bhashyas are equal to Upanishads. And Swamijis's notes really do justice to his belief.

We hope this reprint too will be received by the students of Shankara with the same love and faith as before.

The publishers convey their profound gratitude to all those who have rendered selfless service in bringing out this edition. May the blessings of the Sadguru shower always on them.

**28-7-2011** ***PUBLISHERS***

अध्यात्मग्रन्थावलिः

THE

# TAITTIRIYA UPANISHAD

## *SHĪKSHĀVALLĪ*

WITH

**Sri Shankara's Commentary**

Edited with Notes

By

**SRI SWAMI SATCHIDANANDENDRA SARASWATI**

# तैत्तिरीयोपनिषदि - शीक्षावल्ली

श्रीशाङ्करभाष्यसंयुता

**श्री सच्चिदानन्देन्द्रसरस्वतीसंयमिभिः**

संशोधिता भाष्यटिप्पणेन समलङ्कृता च

क्रमाङ्कः 106

होळेनरसीपुरे,
अध्यात्मप्रकाशकार्यालये
प्रकाश्यं नीता
शकाब्दाः 2011

THE TAITTIRĪYA UPANISHAD, *SHĪKSHĀVALLĪ* WITH **Sri Shankara's Commentary** Edited with Notes By **SRI SATCHIDANANDENDRA SARASWATI SWAMIJI**

Published by Adhyatma Prakasha Karyalaya, (Public Chariatable trust), Holenarasipura - 573211 ; Tel : 08175 - 273820; www.adhyatmaprakasha.org

Pages : xxii + 78

All rights reserved by
The Adhyatma Prakasha Karyalaya

Type set :
**Meera Raghuram**
Cell : 94814 77334

*Printed by*
**Sri Rama Printers**
# 25, 15th Cross
5th Main, Srinidhi Layout
Bangalore - 560 062

## GENERAL PREFACE TO FIRST EDITION

The present edition of Sri Shankaracharya's Upanishad-Bhashyas, is intended for readers who wish to have at a moderate price the plain text of Shankara's works unencumbered by commentaries and sub-commentaries but provided with such aids to study as a beginner is likely to need in appreciating the original.

Every volume of the series has been provided with an Introduction, Short Notes on points of special interest, References to parallel passages in the other works of the great Acharya, a Summary of the Upanishad and an Index.

It is hoped that the systematic division of the text into paragraphs with indication of important various readings, the tracing of quotations to their originals, and the close attention paid to typographical details with all combine to make this edition specially convenient for the earnest reader.

**1961** *PUBLISHERS*

# INTRODUCTION

## The Importance of the Upanishad

The Taittiriya occupies an important position among the Upanishads on which Sri Shankaracharya has choosen to write his famous commentaries, technically called Bhashyas in Sanskrit. While it is of medium size in extent, it contains all the important doctrines of Vedanta more succinctly, and perhaps, more systematically set forth than in any other Upanishad of similar or smaller size. It is also one of the very few Upanishads whose relation with the antecedent and subsequent portions of the recension of the particular Veda to which they pertain, can be determined without difficulty, so that the development of Vedic thought, can be traced from the samhita down to the Upanishad. Moreover it has a living interest for the numerous followers of the Taittiriya Recension[1] of the Krishna Yajurveda, as they can still find pious Brahmins in South India, reciting it with proper accent and intonation.

## The Teaching of the Upanishad

The central aim of the Upanishad, is to explain how every qualified student can, by the method of discriminating the five Koshas or sheaths enveloping the Atman, realize

---

1 This recension is so named most probably because Tittiri was the first Rishi to present it in its traditional form. The Puranas, however have a different story to tell in this connection. When sage Yagnavalkya vomitted out the Yajurveda at the bidding of his wrathful teacher, we are told, certain pious Rishis anxious to secure the text, assumed the form of Tittiri birds and sucked it up. Hence the name.

Brahman or Reality underlying all phenomena as his very self. As the revelation of this method, is covered by the next two chapters, to be expatiated on by the present writer in an elaborate commentary on the Bhashya, the first chapter alone, generally known as the Shikshavalli, is being separately presented now to the reader, as containing preparatory discipline necessary for a genuine aspirant wishing to enter upon that study.

## Special features of Shankara's Bhashya

1. As explained in the Bhashya, the three chapters of this Upanishad form one whole containing the doctrine of the Brahmavidya, which by dispelling Avidya or Nescience of the true nature of Atman, enables an aspirant to realize the rest for ever in his own Self. On account of the numerous Upasanas or Meditations taught in the first chapter, however, one is apt to lose sight of this main theme, and jump to the conclusion that the Upanishad solely treats of Meditation on Brahman, which is to fructify in the attainment of Brahman only after the practician has shuffled off this mortal coil of a body. Many Bhashyakaras, antecedent and subsequent to Shankara, have actually taken up this position and have argued that the frequent reference to Karma or ritual, is in their favour since meditation and not Jnana as advocated by Shankara, is compatible with the practice of Karma. And some followers of the Mimasa, have gone to the length of maintaining that Karma alone as taught in the previous Kanda of the Vedas, conduces to final liberation, the portion treating of Brahmavidya being, in their opinion, Arthavada or merely eulogistic statement to be explained somehow as being subservient to Karma.

Shankara has, in his Introduction and Supplement to his Bhashya on the Shikshavalli, considered all possible alternative interpretations of the Vedic Teaching with regard to the means to Moksha, and after a careful and thorough sifting of the various evidences, arrives at the irresistible conclusion that, Vidya or knowledge of Brahman as he conceives it is the sole means to final liberation, since all bondage is due to the ignorance of the true nature of the Self as Brahman. As the beginner is likely to miss the train of thought in the bhashya owing to certain repetitions and the double meaning assigned to the term Vidya, I have tried to restate the chief points of the argument in the Sanskrit Introduction. It is hoped that the usefulness of this analysis of the Bhashya will be appreciated by the critical student.

2. In the course of the aforesaid argument, Shankara has pointed out a forcible position that nothing produced by effort can be eternal, and hence Moksha being eternal, cannot be the effect of either Karma, or Upasana or both combined. At this stage the opponent urges that even what is produced might well be permanent on the strength of a Vedic statement to that effect. Shankara now brings forward the clinching argument (Para. 62) that a ***Vedic Text is only a revealer of an existent fact and not a creator of something that is not already there.*** **Indeed, not even a hundred texts can produce something eternal, nor make anything produced imperishable.** Here is a principle of exegesis unrecognised by any other Vedantic School. Even post-Shankara Vedantins of the Advaitic school appear to ignore this fundamental axiom when they appeal to Shruti as the highest tribunal on certain controverted postulates in the face of reason based on the universal experience.

3. Another important piece of argument in the Bhashya, though not of much interest to the lay reader, is seen in the exposure of the material fallacy of the scholastic, whose fantasy raises even non-existence to the rank of a positive entity, and attributes quality, number and causal relation to that figment. In the present Bhashya, the Karma-Mimamsaka takes shelter under this fallacy when he argues (Para. 8) that Moksha can well be a negative like the Pradhvamsa-Abhava or non-existence after destruction, and yet be produced like it. Shankara shatters this logic-chopping by pointing out that it is only a construction of imagination to believe that non-existence is produced since non-existence does not allow, like a positive entity, of any attribute or act being ascribed to it and hence is devoid of all distinctions-such as previous non-existence, mutual non-existence or non-existence after destruction. For if it were to have attributes, it would be a positive entity and no longer non-existence.

4. There are a few more features of the Bhashya to which full justice cannot be done before the study of the Upanishad as a whole is completed. They have therefore been held over for consideration in the Introduction to the Bhashya on the Anandavalli and the Bhriguvalli.

**Sources for Notes**

In the preparation of my Notes on the Bhashya, I have of course frequently consulted Anandagiri's Gloss, Sureshvara's Vartikas and Sayana's Bhashya as being the only authoritative writings available on the subject. I have depended, however more on Shankara's own statement in his other Bhashyas, whenever these sources seemed to be in

conflict with one another, or what is more serious, with Shankara himself. Anandagiri commonly but erroneously believed to be the direct disciple of Shankara, is, as has been shown in the Sanskrit Introduction, a very recent writer since he expressly refers to works like the Tattvaloka and the Prakatartha. He mixes up Post-Shankarite doctrines with genuine Shankara teachings so much so, that I have had to guard the student against some of his opinions unsupported or even rejected by the Bhashya. Sureshvara is very brief in his Vartika and seems to merely summarize the Bhashya on the Shikshavalli. Sayana, on the other hand, is so elaborate that the ordinary student scarcely sees the wood for the trees, and derives very little help in understanding some of Shankara's terse and pithy statements. In these circumstances, I have tried to clarify most of the difficult points in the Bhashya solely on the strength of the parallel passages elsewhere in Shankara's other Bhashyas. This accounts for the numerous citations from his other works interspersed throughout the Notes. How far I have succeeded in this attempt, the critical reader alone is to judge. For myself, I regard this editing work more as a piece of service and devotion to the holy feet of that revered Teacher.

My Narayana Smaranams to ***Pandita Pravara H. Anantha Murthy Sastrigal and Parakkaje Subrahmanya Bhatta, Vedanta Siromani and Visharad,*** who have looked through the manuscript and offered some useful suggestions.

Holenarasipur
20-1-1961 *EDITOR*

# भूमिका

## उपनिषदो वैदिकवाङ्मये स्थानम्

तैत्तिरीयोपनिषदियं कृष्णयजुर्वेदीयारण्यकस्य सप्तमप्रपाठकमारभ्य प्रवृत्तेतीयमप्यारण्यकत्वेनैव परिगणनीया । यथाहुः सायणाचार्याः स्वीयतैत्तिरीयारण्यकभाष्यारम्भे -

अरण्याध्ययनादेतदारण्यकमितीर्यते ।
अरण्ये तदधीयीतेत्येवं वाक्यं प्रवक्ष्यते ॥ ६ ॥

काण्डमारण्यकं सर्वं व्याख्यातव्यं प्रयत्नतः ।
आरण्यकविशेषास्तु पूर्वाचार्यैरुदीरिताः ॥ ७॥

होतॄन् प्रवर्ग्यकाण्डं च याश्चोपनिषदो विदुः ।
आरुणीयविधिश्चैव काठके परिकीर्तितः ॥८॥

रुद्रो नारायणश्चैव मेधो यश्चैव पित्रियः ।
एतदारण्यकं सर्वं नाव्रती श्रोतुमर्हति ॥९॥

इति । तदेवमियं श्रीमच्छङ्करभगवत्पादैर्भाष्यनिर्माणायोपात्तेषु सुप्रसिद्धासु दशसूपनिषत्सु - ईशावास्यैतरेयबृहदारण्यकवदेव - इदंवेदीयत्वेन सुखावधारणेति तोषस्थानमिदं वैदिकविचारप्रतानगवेषणरसिकानाम् । अपरं च प्रमोदकारणं तेषां यदेषा ग्रन्थतो नातिबृहति नापि स्वल्पगात्रा अर्थतश्च स्वासाधारणपञ्चकोशविवेक-प्रक्रियाविशेषेण वेदान्तामृतसारनिष्यन्दिनी मर्त्यसञ्जीविनीव स्रोतस्विनी सांप्रतमपि दक्षिणभारते नैकेषां तैत्तिरीयाणां सांप्रदायिकाध्येतॄणां जिह्वाग्रतः सस्वरं जेगीयमाना श्रोतृजनश्रवणमनोहारिणी निःसरतीति ॥

## तैत्तिरीयशब्दप्रवृत्तिनिमित्तम्

अथास्यां यजुर्वेदशाखायां तैत्तिरीयशब्दप्रवृत्तौ किं निमित्तमिति वीक्षायां पौराणिकेषु तावदत्रैकं कथानकं प्रचलति । एकदा किल वैशम्पायनेन स्वशिष्यं याज्ञवल्क्यं सतीर्थ्यब्राह्मणावमानकं प्रति क्रुद्धेन 'मुच्यतां मत्तोऽधीतम्' इत्युक्तम्। सोऽपि दैवरातिः सपदि रुधिराक्तानि यजूंषि चच्छर्द । अत मुनयो वेदलोलुपतया तित्तिरिपक्षिरूपमास्थाय तानि वान्तानि यजूंषि यज्जगृहुस्तेन तैत्तिरीयसंज्ञा लेभिरे इति। तत्र याज्ञवल्क्येनाधीतस्य यजुर्वेदस्य वमनं तु पुनरनुच्चारणप्रतिज्ञापूर्वकं परित्यागरूपमान्तरं सूक्ष्ममेव, न त्वन्नादिकमिव बाह्यं स्थूलं येन तद्वमितवेदस्य भक्षणार्थं वैशम्पायनशिष्याणां साक्षात्तित्तिरिपक्षिरूपग्रहणप्रसङ्गः समापद्येत । अतस्तेषां तित्तिरिभावो नाम वमितग्रहणलोलुपतारूप एव भवितुमर्हति । एवं तद्वमितवेदभक्षणमपि अन्यपरित्यक्तवेदस्वीकाररूपमेव - इत्यभिप्रयन्ति स्वाध्यायमण्डलप्रकाशिततैत्तिरीयसंहिताभूमिकानिबन्द्धारः श्रीगजाननशर्मणः । तत्रैव कल्पान्तरं तैरुपन्यस्तमस्ति 'वस्तुतस्तु, एतच्छाखाप्रवर्तकतित्तिरिनामकः कश्चिदाचार्य एव, येन तन्नाम्नैवैषा शाखा प्रसिद्धा । .... तथा च काण्डानुक्रमणिकायां तैत्तिरीयशाखाप्रवक्तारः प्रसिद्धाः - 'वैशम्पायनो यास्कायैतां शाखां प्राह पैङ्गये । यास्कः पैङ्गिस्तित्तिरये उखाय प्राह तित्तिरिः । उखाः शाखामिमां प्राह आत्रेयाय यशस्विने । तेन शाखा प्रणीतेयमात्रेयी इति प्रोच्यते ।' इतीति । अत्र ग्रन्थ-पुरावृत्ततत्त्वशोधका एव प्रमाणमित्यलं पल्लवितेन ॥

## उपनिषद्ग्रन्थविभागाभिधानानि

इयं च शीक्षावल्ली, आनन्दवल्ली, भृगुवल्लीति च प्रख्यातैस्त्रिभिरध्यायैः प्रविभक्तेति सुप्रसिद्धमेतत् । तत्र प्रथमोऽध्यायः सांहित्युपनिषदिति, द्वितीयतृतीयौ च मिलित्वा वारुण्युपनिषदिति च व्यपदिष्टौ सायणाचार्यैः । समनन्तरोत्तरः प्रपाठकस्तु भगवत्पादीयभाष्याविभूषितोऽपि सूत्रभाष्ये पुरुषविद्याधिकरणे समुदाहृतो याज्ञिक्युपनिषदिति व्यवहृतस्तैरारण्यकभाष्यकारैः । सोऽयं व्यपदेशविभागो यद्यपि भगवत्पादीयभाष्ये नोल्लिखितः, तथाप्यापस्तम्बीयाः सांप्रतमपि ब्रह्मयज्ञाङ्गदेवतार्पणे

'सांहितीर्देवता उपनिषदस्तर्पयामि' इत्यादिनामोल्लेखं कुर्वाणा दरिदृश्यन्त इत्यतः सांप्रदायिक एवायमपि व्यपदेशक्रम इत्यवगम्यते । अध्यायानां वल्लीत्वेन व्यपदेशोऽपि नाधुनातनः । यतो भृगुवल्लीभाष्यारम्भे 'इत्येवम् आनन्दवल्ल्यां विवक्षितोऽर्थः' इति वल्लीसंज्ञा समुपात्ता । एवं वार्तिकेपि 'अशेषानन्दवल्ल्यर्थसूत्रवाक्यमिदं वचः' । (तै.वा. २-४३) इति दृश्यत इति ॥

## उपनिषत्प्रतिपाद्यो विषयः

अस्याश्चोपनिषदः संबन्ध एवं संक्षेपत उपन्यस्तो भाष्ये - 'नित्यान्यधिगतानि कर्मण्युपात्तदुरितक्षयार्थानि, काम्यानि च फलार्थिनां पूर्वस्मिन् ग्रन्थे । इदानीं 'र्मोपादानहेतुपरिहाराय ब्रह्मविद्या प्रस्तूयते' इति । एतेन गम्यते यदुपनिषदि तात्पर्यतः प्रतिपाद्योऽर्थः सर्वविधकर्मबन्धभयप्रहाणफला ब्रह्मविद्या - इति । तथा च वारुण्यामुपनिषद्यानन्दवल्ल्याम् 'अभयं प्रतिष्ठां विन्दते' (२-७) इति, भृगुवल्ल्यां च 'सैषा भार्गवी वारुणी विद्या । परमे व्योमन् प्रतिष्ठिता । य एवं वेद प्रतितिष्ठति' (३-६) इति च निष्क्रियाद्वितीयानन्दस्वरूपप्रतिष्ठालक्षणं ब्रह्मविद्याफलं मुखतोऽभिहितमुपलभ्यत इति ॥

## भाष्ये जिज्ञासुभिरवधेया उपदेशाः

अथैवं स्थिते किमर्थमत्रोपासनानि भूरिशो विहितान्युपलभ्यन्ते कर्माणि चेति? तथा हि - शीक्षावल्ल्यां तावद् द्वादशानुवाकाः । तत्र प्रथमे तावद्देवताप्रार्थनं वायुप्रार्थनं च क्रियते । द्वितीये वर्णस्वरादिशिक्षितव्यार्थाः परिसंख्याताः । तृतीये संहितोपासनं विहितम् । चतुर्थे ओङ्कारमुद्दिश्य जपहोमौ मेधाकामानां श्रीकामानां च विहितौ । पञ्चमे षष्ठे च महोव्याहृतिद्वारेण ब्रह्मोपासनम् विहितम् । सप्तमे च पाङ्क्तब्रह्मोपासनम् । अष्टमे चोङ्कारोपासनम् । नवमे तु ऋतसत्यादिकर्तव्यान्युक्तानि। दशमे त्रिशङ्कोर्वेदानुवचनमुक्तम् । एकादशे शिष्याय गुरुकर्तव्योपदेशा निर्दिष्टाः कर्माणि नियमेन कर्तव्यानीति । द्वादशे पुनरपि देवताप्रार्थनारूपा शान्तिः पठिता। तदेवमुपासनानां कर्मणां चोपदेशप्राचुर्ये जाग्रति कथङ्कारं कर्मोपादानहेतुपरिहाराय ब्रह्मविद्या प्रस्तूयत इत्यध्यवस्येम ? कथश्चात्र विहितापि ब्रह्मविद्या न

वस्तुमात्रबोधनरूपा, किं तर्ह्युपासनारूपैवेति ब्रुवताम्, कर्मभ्य एव विद्याकर्मसमुच्चयाऽनुष्ठानादेव वा मोक्षोऽत्र विवक्षित इति ब्रुवतां वा पक्षः प्रतिक्षेपणीयः ? किञ्चान्यत्, कर्मकाण्डे कर्माणि विहितानि, विद्या तु सर्वकर्मोपमर्दनी ज्ञानकाण्डे-इति प्रतिजानानां कथं न कर्मकाण्डप्रामाण्यविरोधः ? भूरिशः कर्माणि विदधद्वेदः कर्मभ्य एव मोक्षमभिप्रैतीति वा कुतो न स्यात्, अन्यथा कर्मश्रुतीनां निर्विषयत्वाद् वैयर्थ्यापत्तेः ? इत्याद्या आक्षेपा अत्र समुत्तिष्ठन्ते । अत्र शीक्षावल्लीसम्बन्धभाष्ये तदुपसंहारभाष्ये चाचार्यैरनुगृहीतानि प्रतिसमाधानानि मुमुक्षूणां तत्त्वजिज्ञासूनां सावधानमननयोग्यानि सन्तीति तान्यत्र ग्रहणसौकर्यार्थं संक्षिप्योपस्थाप्यन्ते -

(१) तत्र ज्ञानकाण्ड एवोपासनानां विनिवेशे कारणमत्र भाष्ये न लिखितम्। छान्दोग्योपनिषत्संबन्धभाष्ये तूक्तम् - रहस्यसामान्यात् मनोवृत्तिसामान्याच्चाभ्युदय-साधनानि कैवल्यसंनिकृष्टफलानि चाद्वैतादीषद्विकृतब्रह्मविषयाण्युपासनान्यद्वैत-विद्याप्रकरणे एवोच्यन्त इति । तदिहाप्यनुसंधेयम् ॥

(२) कर्मकाण्डे विहितानामपि पुनरिहाप्युपदेशे आशयविशेषोऽत्र भाष्ये प्रदर्शितः - 'ऋतादीनां पूर्वत्र (नवमानुवाके) उपदेश आनर्थक्यपरिहारार्थः, इह (एकादशानुवाके) तु ज्ञानोत्पत्त्यर्थत्वात् कर्तव्यतानियमार्थः (भा भा. ५४)[१] इति । एतेनेदमुक्तं भवति यत् कर्मणां प्रकृतवल्ल्युपदिष्टोपासनासहकारित्वेन सार्थक्यात्, आगामिवल्लीद्वयोपदेक्ष्यमाणब्रह्मविद्योत्पत्त्युपायत्वेन मुमुक्षुभिरवश्यकर्तव्यत्वाच्च तेषामिहकाण्डे पुनरुपादानमिति ॥

(३) उपासनालक्षणैव विद्या न परमपुरुषार्थलाभायेति तु 'ब्रह्मविदाप्नोति परम्' इति पुनरारम्भसामर्थ्यादिवावगम्यते । द्विविधा हि विद्या वेदान्तोपदेश्या भवगत्पादीयमतेन । तत्रोपासनालक्षणा विद्या स्वाराज्यप्राप्त्यन्तफला शीक्षावल्ल्यां विहिता मानसक्रियारूपत्वात् पुरुषतन्त्रा चोदनातन्त्रा च । 'ब्रह्मविदाप्नोति परम्'

---

१. भूमिकायां भा.भा. इति संकेतपूर्वकं निर्दिष्टाः सङ्ख्यास्तत्तद्भाष्यभागं शीक्षावल्लीगतं सूचयन्तीति बोध्यम् ॥

इत्यारभ्याऽऽवारुण्युपनिषत्परिसमाप्तेर्निर्दिश्यमाना त्वन्या ब्रह्मविद्या प्रत्यस्तमितक्रियाकारकफलभेदब्रह्मात्मयाथात्म्याधिगमनी । सा च वस्तुतन्त्रेत्यवधारयिष्यते भाष्ये, इत्यतस्तद्व्याख्यानत एवावगन्तव्यं तद्गतमन्यद्विवरणम्। सा च विद्यात्र संबन्धभाष्योपक्रमोपसंहारयोः (भा.भा. १, १०) संग्रहेणोक्ता कृत्स्नोपनिषत्तात्पर्यदर्शनार्थमिति ज्ञेयम् । अत इहोपासनानां प्राचुर्येण विधानं कार्यब्रह्मप्राप्त्यन्तस्यापि साधनसाध्यस्यानित्यताध्रौव्यात् सर्वमेतत्संसारबीजभूताविद्याविषयानतिवर्तीति ज्ञापनार्थमिति श्लिष्यते । एवं हि सर्वस्मात् साध्यसाधनाद्विरक्तस्यैवागामिग्रन्थप्रतिपाद्यब्रह्मविद्यायामधिकार इति पूर्वापरसंगतिः प्रदर्शिताभवतीति ॥

(४) अत एवेदमपि सिद्धं भवति यद्भाष्योपसंहारचिन्तायामुपपादितम् उपासनारूपैव विद्या कर्मसमुच्चयेनानुष्ठानार्हा । स्वयमपि क्रियारूपत्वात् । तेन चानुष्ठानेन कार्यब्रह्मलोकप्राप्तिः सेत्स्यति । गत्यैश्वर्यादिश्रुतीनां तद्विषयत्वोपपत्तेरिति (भा.भा. ६३) । कारणं हि ब्रह्म सर्वगतत्वादाकाशादिकारणत्वाद्गन्त्रनन्यत्वाच्च नैव प्राप्यम् (भा.भा. ६३) । कर्मण उत्पत्तिसंस्कारविकाराप्त्यन्यतर फलत्वनियमात्। मोक्षस्य च नित्यस्य तादृशफलविपरीतत्वाच्च न समुच्चयफलं मोक्षः (भा.भा. ६३)। किञ्च प्रविलीनक्रियाकारकफलभेदत्वाच्च तद्विषयाया वस्तुतन्त्राया विद्याया आविद्यककारकफलभेदापेक्षेण कर्मणा विरुद्धस्वभावत्वात्, अङ्गाङ्गिभावेन समप्राधान्येन वा कथमपि न समुच्चयसंभवः (भा.भा. ६४) । अतो विद्याकर्मसमुच्चयान्मोक्ष इति वादः सर्वथा न संगच्छते । शान्तिसमृद्धममृतम् (अनु ६) इति श्रूयमाणं तु प्राप्यकार्यब्रह्मविषयकमेवेति नाडीद्वारेण गत्युल्लेखनात् (भा.भा. ३६) इत्यतो मुख्यामृतत्वस्य ज्ञानमात्रफलत्वोक्तिर्न विरुध्यते ॥

(५) न चैवं कर्मविधिश्रुतीनामविद्याविषयत्वे कर्मोपमर्दकज्ञानकाण्डेन कर्मकाण्डविरोधः; तथा च व्याहतवचनस्य शब्दस्याप्रामाण्यप्रसङ्गश्चेति शङ्क्यम्। ज्ञानकाण्डस्य संसारहेतुभूताविद्यानिवर्तकज्ञानप्रकाशनेन मोक्षहेतुत्वात् प्रामाण्योपपत्तेः। कर्मकाण्डस्य च लोकतः सिद्धकारकास्तित्वमादायैव कर्मविधानाज्ज्ञानकाण्डेनाविरोधात्, कामिनां मोक्षिणां च पुरुषार्थोपायोपदेशमात्रेण (भा.भा. ६५) प्रामाण्योपपत्तेश्च ॥

(६) न च कर्मणि श्रुतेरधिकं यत्न इत्येतावता कर्मण एव मुक्तिरिष्टा भगवत्या श्रुतेरित्यास्थातुं युज्यते । साध्यस्यानित्यताध्रौव्यमित्यस्य न्यायस्यात्रापि जागरूकत्वात् कर्मसाध्यस्य मुख्यमोक्षत्वानुपपत्तेः । न चैवं कर्मणां वैयर्थ्यम्। बहुसंख्यकानां कामिनां कामावाप्तिसाधनप्रदर्शनेन मोक्षिणां च पूर्वोपचितदुरितप्रतिबन्धापनयनेन विद्योत्पत्तिकारणत्वेन च सार्थक्यात् (भा.भा. ७०) । न च कर्मणां विद्योत्पत्तिहेतुत्वे गार्हस्थ्ये एवाग्निहोत्रादिकर्मविधाना-दैकाश्रम्यमेवेति वाच्यम् । ब्रह्मचर्यसत्यवदनादीनामपि कर्मत्वात् तेषामितराश्रम-प्रसिद्धानां विद्योत्पत्तिं प्रति साधकतरत्वात् (भा.भा. ६८), गार्हस्थ्येऽपि विद्यमानानां तेषां संकीर्णत्वादसंपन्नत्वात् (भा.भा. ६८, ध्यानधारणादीनां चेतराश्रमासाधारणत्वात्, जन्मान्तरकृतगार्हस्थ्यकर्मभ्योऽपि विद्योत्पत्तिसंभवात्, (भा.भा. ६८, ७०) मनुष्यपित्रादिलोकार्थत्वाच्च पुत्रकर्मादीनामात्मलोक-साधनत्वाभावे लोकान्तरे विरक्तानां कर्मणि प्रयोजनाभावदर्शनेन प्रतिपन्नगार्हस्थ्यानामपि विद्योत्पत्तौ सत्यां ज्ञानपरिपाकाङ्गत्वेन पारिव्राज्योपपत्तेः कर्मभ्यो निवृत्तेरेवेष्टव्यत्वाच्च (भा.भा. ६८)

(७) 'विद्वान् यजते' इत्यादिश्रुतिभ्यः समस्तवेदार्थज्ञानवत एव कर्माधिकारात्, कर्मार्थज्ञानादन्यज्ज्ञानं नास्त्येवेति केचित्कर्मजडा मेनिरे । तत्र वेदश्रवणव्यतिरेकेण मनननिदिध्यासनयोरपि विधानात्, तयोश्च कर्मार्थत्वाभावात् नैष युक्तो वाद (भा.भा. ६१) इति भाष्यकारैः प्रत्युक्तं तन्मतम् । 'ब्रह्मविदाप्नोति परम्' इत्येवमादिवचनैर्ब्रह्मविदः परप्राप्तिबोधकश्रुतिविरोधश्चास्मिन् पक्ष (भा.भा.१) इति च ॥

(८) तस्ताम् अनात्मकामानामेव कर्मोपादानहेतुत्वात् संसारबन्ध-कारणत्वम्, कामानां च प्रत्यगात्माभिन्नब्रह्माविद्यानिमित्तत्वात् । ब्रह्मविद्यया अविद्यानिवृत्तौ स्वात्मव्यतिरिक्तानां कामानामदर्शनात्, स्वात्मनि च कामानुपपत्तौ स्वात्मन्यवस्थानं परमपुरुषार्थप्राप्तिरित्यत उत्तरवल्ल्यां 'ब्रह्मविदाप्नोति परम्' इत्युपदिश्यते । तस्मात्केवलाया एव ब्रह्मविद्याया मोक्षः इत्युपनिषत्तात्पर्यम् इति प्रतिज्ञातं भाष्यकारैः (भा.भा. १-६६) । तत्र केचिन्मीमांसकाः स्वात्मन्यवस्थानमेव

मोक्ष इत्यभ्युपगम्यापि विनैव ब्रह्मविद्यां कर्मभ्य एव तादृशं निःश्रेयसम् इत्यास्थिषत; काम्यनिषिद्धयोः परित्यागादिष्टानिष्टफलनिष्पत्तिवारणात्, आरब्धफलानां च कर्मणामुपभोगेनैव क्षयात्, नित्यकर्मानुष्ठानाच्च प्रत्यवायानुत्पत्तेः, कर्मफलभेगार्थं संसरणानुपपत्तौ स्वात्मन्यवस्थानम् अयत्नसिद्धमिति वदन्तः । तदिदं तेषां मतं युक्तिविरुद्धम् । अनारब्धफलानामवशेषसंभवे कर्मणामत्यन्तं क्षयानुपपत्तेः (भा.भा. ३, ५) । नित्याकरणस्याभावरूपस्य प्रत्यवायजनकत्वानुपपत्तेश्च (भा.भा. ६.)। अविद्याकृतस्य संसारस्य विद्योत्पत्तिमन्तरेणात्यन्तिकनाशानुपपत्तेर्वक्ष्यमाणवल्लीभाष्ये प्रदर्शयिष्यमाणत्वाच्चेति भाष्यकारा निराकृतवन्त एतत्पक्षम् ॥

(९) अधस्तादुपदर्शितरीत्या मोक्षस्य ज्ञानेतरसाधनसाध्यत्वं न संभवतीत्येतत् नित्यस्यानारभ्यत्वमिति इति न्यायमवष्टभ्यैव सर्वत्र प्रसाध्यत इति स्पष्टम् । तत्र वाक्यैकशरणा वावदूकाः केचित् प्रत्यवतिष्ठन्ते - वचनप्रामाण्यादारभ्योऽपि नित्यः स्यादिति । अत्र भगवत्पादैरुपक्षिप्तं प्रत्युत्तरं जिज्ञासुभिर्विशेषतोलक्ष्यीकरणीयमस्ति वेदार्थनिर्धारणेप्सुभिः । **'वचनं नाम यथाभूतस्यार्थस्य ज्ञापनं नाविद्यमानस्य कर्तृ । न हि वचनशतेनापि नित्यमारभ्यते, आरब्धं वा अविनाशि भवेत् ।** (भा.भा. ६२) इति ह्युच्चैर्बाहुमुद्धृत्योद्घोषयन्त्याचार्याः । वेदान्तार्थजिज्ञासाया अनुभवावसानत्वात्, न केवलं वचनमित्येव वचनमुदाहरणीयमत्र । न हि यथावस्थितवस्तुबोधकत्वमन्तरेण कथञ्चिदपि प्रामाण्यं सिध्येद्वचनस्येत्याशयस्तेषाम् । अत एवात्रानुभवाङ्गत्वेन श्रुत्यर्थनिश्चायनानुकूलास्तर्कास्तत्र तत्रानीयन्ते भाष्यकारैरित्येतदपि न प्रस्मर्तव्यम्। न चैवं कर्मोपासनवाक्यान्यपि तर्कमाकाङ्क्षेयुरिति भेतव्यम् । प्रत्यक्षाद्यनवसेय-साधनफलसंबन्धमात्रस्य प्रतिपादकत्वात् तेषां ब्रह्मवाक्येष्विव तत्रानुभवापेक्षाभावात् । वाक्यैकगम्यत्वाद्धि तादृशसंबन्धस्य वाक्यार्थनिर्धारणपर्याप्तोपपत्तिभिरेव संतोष्टव्यं भवतीति ॥

(१०) यथैव वचनप्रामाण्यबिभीषिकया प्रतिवादिवाक्स्तम्भनायेहमानानां मीमांसकंमन्यमानानां दोष उद्घाटितः शब्दकृत्यस्मारणेन, तथैवात्र भाष्ये प्रमेय-विशेषगतबिभीषिकया प्रतिपदं प्रतिवादिमोहनायेहमानानां वावदूकानामपि दोष

आविष्कृतोऽस्ति । सेयं दुष्टवादसरणिरद्यापि कैश्चिदनुस्रियमाणा दरीदृश्यत इत्यवश्यं जिज्ञासुभिस्तत्परिहारोपायो धियां धारणीयः । नित्याकरणात्प्रत्यवायोत्पत्ति-मातिष्टमानानां मीमांसकानां दूरीकरणार्थम् अकरणस्याभावरूपस्य प्रत्यवायकारणत्वं न युक्तम्, 'अन्यथा अभावाद्भावोत्पत्तिरिति सर्वप्रमाणव्याकोपः', (भा.भा. ६) स्यादित्युक्तमाचार्यैः । तथा विद्यासंहतानां कर्मणां नित्यमोक्षारम्भसामर्थ्यं भवेदिति शङ्कमानानां वेदान्त्येकदेशिनां मते प्रागुक्तन्यायमेवावष्टभ्य 'नित्यं चारभ्यते चेति विरुद्धम्' इति परिहृते प्रतिवादिना प्रध्वंसाभाववन्नित्योऽप्यारभ्य एव - इति कुर्तकः समानीतः । तत्राचार्यैः प्रत्युक्तम् 'न । मोक्षस्य भावरूपत्वात् । **प्रध्वंसाभावोऽप्यारभ्यत इति न संभवति, अभावस्य विशेषाभावात् विकल्पमात्रमेतत्**' इति (भा.भा. ८) । अभावोऽपि भाववद् गुणक्रियायोगार्ह इति कृत्वा तस्मिन् प्रागभावादिविशेषकल्पनं कार्यत्वकारणत्वादिधर्मकल्पनं च विकल्पमात्रं न वस्त्वनुसारीतीदं तत्त्वमत्रोद्धाटितं पुरुषमतिकौशलशरण-तार्किकचालितान्तःकरणैः सर्वैरवधानमर्हति वस्तुसतत्त्वनिरूपणावसर इति न पृथगभिधानमर्हति ॥

तैत्तिरीयभाष्येऽन्येऽपि कतिचिदमूल्यविषयाः प्रतिपादिताः सन्ति, येषां विमर्शः समग्रोपनिषद्भाष्यावलोकनानन्तरमेव सम्यग् जिज्ञासूनां हृदयमागच्छेदितीहोपरम्यते तावत् ॥

## टिप्पणनिर्माणायावलोकिताः प्रमाणग्रन्थाः

भाष्यस्य **टीकाकार आनन्दगिरिरिति** लोके प्रसिद्धं गतः । अङ्गीकृता चेयं प्रसिद्धिरानन्दाश्रममुद्रितभाष्यपुस्तकसंपादकैः - 'आनन्दगिरिकृतटीकासंवलित शाङ्करभाष्योपेता' इत्युपनिषदं विशिंषद्भिः । अनुवाकसमाप्तिपुष्पिकायां 'श्रीमच्छङ्करभगवच्छिष्यानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छाङ्करभाष्यटीकायाम्' इति लिखितपुस्तकेषु क्वचिद् दृष्ट्वा तथैव संमुद्रापयद्भिस्तैरानन्दगिरिरित्यपरं नामानन्दज्ञानाख्यस्याचार्यशिष्यस्येति प्रथाप्यनुमता । आचार्यविजयाख्यस्य शङ्करभगवत्पादचरितस्य रचयित्रा अनन्तानन्दगिरिणा आत्मानमाचार्य-साक्षाच्छिष्यत्वेनोद्धोषयित्रा भ्रान्तिदर्शनं सम्यक्त्वेन गमिताः केचिद्वदन्ति

यदानन्दगिरिरिति कश्चिदन्तेवास्यासीद्भगवत्पादानामिति । तदनुयायिष्वन्यतमोऽयं पुष्पिकालेखक इति निश्चीयते, यतोऽत्रैव पुष्पिकान्तरे 'श्रीमच्छुद्धानन्दभगवत्पूज्यपादशिष्य श्रीमद्भगवदानन्दज्ञानविरचितायां तैत्तिरीयोपनिषच्छाङ्करभाष्यटीकायाम्' इति स्फुटोल्लेखः सञ्चकास्ति । अयं तु टीकाकृत् 'प्रागभावस्य नियतप्राग्भावित्वेन कारणत्वे प्राक्कालस्य स्ववृत्तित्वापातः । प्राग्भावित्वमपि चान्यथासिद्धमित्युक्तं तत्त्वालोके' इति तत्त्वालोकं नाम ग्रन्थं परामृशति । ''उपासनासाध्यस्य ब्रह्मसाक्षात्कारस्य पृथग्भावादित्याह-श्रुतज्ञानेति। श्रुताद् गुरुकुले विचारिताद्वाक्यात् कर्मानुष्टानोपयोगि यज्ज्ञानं, तावन्मात्रेण कर्मण्यधिक्रियते न ब्रह्मसाक्षात्कारफलम् उपासनमपेक्षत । व्यतिरेकभावादित्यर्थः। ... एतच्च कर्ममीमांसान्यायाङ्गीकारमात्रेणोक्तम् । वस्तुतश्च श्रोतव्यविधिप्रयुक्त एवोपनिषद्विचारारम्भो भिन्नाधिकारः । कर्मकाण्डोऽप्युत्तरविधिप्रयुक्त एवेति प्रकटार्थे प्रतिष्ठितम्'' (पृ. ३७-३८)[१] इति च तत्वालोकं प्रकटार्थं च परामृशन्नयं मुण्डककाठकोपनिषदोर्व्याख्यातुरनन्य इत्यनुमीयते। ब्रह्मसाक्षात्कारस्य ब्रह्मोपासनाकार्यत्वं वेदान्तविचारस्य श्रवणविधिप्रयुक्तत्वं चोपगच्छतां व्याख्यानप्रास्थानिकानामनुयायी चैष इति सुस्पष्टम्। अधिकं त्वत्र विषये आनन्दवल्लीभाष्यार्थविवेचनीतोऽधिगन्तव्यम् । एवमादिकारणादत्र टीकायां यद्यद्भाष्यविरुद्धतया तदननुगुणतया वा प्रतिभातं तदनादृतमस्मदीयटिप्पणे इति ज्ञेयम्॥

श्रीसुरेश्वराचार्या यद्यपि तैत्तिरीयभाष्यस्योपरि वार्तिकममूल्यं रचयामासुः, तथापि तेषां भाष्यवाक्यव्याख्यानं न तत्तादृशं विस्तीर्णमत्र यथा बृहदारण्यकभाष्यवार्तिके । विशिष्य च शीक्षावल्लीवार्तिकमतिसंक्षिप्तमिति न भाष्यार्थनिर्धारणे पर्याप्तं साधनं भवति मन्दमध्यमधियामधुनातनश्रोतॄणाम् इत्यतोऽल्पीयांस्येव वार्तिकवचनान्युदाहृतानि टिप्पणे ॥

तैत्तिरीयारण्यकभाष्यान्तर्गतं तु **सायणभाष्यमतिविस्तीर्णं** शारीरकन्यायविमर्शनादिप्रचुरतया विचारणीयार्थबहुलं क्वचित् क्वचित् भाष्यतो

---

१. अत्र निर्दिष्टा पृष्ठसङ्ख्या आनन्दाश्रमप्रकटित तैत्तिरीयभाष्यपुस्तकस्था ॥

भिन्नप्रस्थानं चेति मत्वा क्वचिदेव परामृष्टमत्र टिप्पणे संग्रहेण भाष्यार्थं जिघृक्षूणां वाक्यार्थाधिगमेऽनुपयोगीती हेतोः ॥

## उपसंहारः

तदेवं सत्स्वप्यमोघनिबन्धेषु भाष्यार्थविशदीकरणाय प्रस्थितेषु नाद्यापि सहायोऽस्ति कश्चिद्भाष्यस्यैव प्राधान्येनाध्येतॄणां वेदान्तप्रस्थानप्रविविक्षूणामिति तादृशामुपकाराय मुण्डकाद्युपनिषदामिवात्रापि विषमस्थलटिप्पणेन भाष्यान्तरस्थसमानाभिप्रायप्रकटनस्थलनिर्देशेन साकं यथामति संशोध्य संपादितं भाष्यमिदं ग्रन्थशरीरविभागतत्तद्भागार्थसूचकशिरोलेखनिवेशनभाष्योदाहृत-प्रमाणवाक्याकरस्थाननिर्देशनादिसौकर्ययुतम् । अनेन च भाष्यार्थजिज्ञासूनां कियानुपकारो भवेदित्यत्र त एव प्राड्विवाका भवितुमर्हन्ति । मदीययाऽनयाल्पसेवया सुप्रीता भगवद्भाष्यकाराः स्वीयचरणयुगलसततस्मरणमनुगृह्णन्त्वित्येतावत्त्वा-शास्ते ॥

**अध्यात्मप्रकाशकार्यालये**
**विकृतिनाम संवत्सरस्य माघशुक्ल सप्तम्यां**

**ग्रन्थसंपादकः**

# ग्रन्थविभागक्रमः

(अत्रत्यसङ्ख्या पृष्ठसूचिका)


| | | |
|---|---|---|
| १. | सामान्योपक्रमणिका आङ्ग्लभाषामयी | iii |
| २. | भूमिका आङ्ग्लभाषामयी | iv |
| ३. | भूमिका | ix |
| ४. | सङ्केताक्षरविवरणम् | xx |
| ५. | विषयानुक्रमणिका | xxi |
| ६. | तैत्तिरीयोपनिषत् - शीक्षावल्ली सभाष्या | 1 - 68 |
| ७. | शीक्षावल्लीसारः | 69 |
| ८. | अनुवाकानुक्रमणिका | 72 |
| ९. | भाष्यस्थमुख्यशब्दसूची | 73 |

# संकेताक्षरविवरणम्

| संङ्केतः | विवरणम् |
|---|---|
| अनु | अनुवाके |
| अव. | अवतरणिकायाम् |
| आ ॥ | आनन्दाश्रमः, पूना - इतिसंस्थया प्रकाशिते पुस्तके |
| ई., के., का.(अथवा क.) प्र., मुं., मां., ऐ, छां., श्वे., } - | एते आद्याक्षरकृतसङ्केतास्त-त्तदुपनिषद्बोधकाः |
| ई.भा, के. भा. | इत्यादयस्तु तत्तद्भाष्यबोधकाः |
| उप. | उपसंहारे |
| गी. | भगवद्गीतायाम् |
| गी.भा. | गीताभाष्ये |
| गौ.का.भा | गौडपादीयकारिकाभाष्ये |
| जै.सू. | जैमिनीयसूत्रे |
| गौ.ध. | गौतमीयधर्मसूत्रे |
| टि. | टिप्पणे |
| तै.सं. | तैत्तिरीयसंहितायाम् |
| तै. | तैत्तिरीयवार्तिके |
| द्र. | द्रष्टव्यम् |
| नै. | नैरुक्तम् |
| पा. अथवा पा.सू | पाणिनीयं सूत्रम् |
| बो.गृ | बोधायनकृतगृह्यसूत्रे |
| भा.भा. | भाष्यभागे |
| मनु. | मनुधर्मशास्त्रे |
| मां.का.भा. | माण्डूक्यकारिकाभाष्ये |
| रा.ध. | महाभारतान्तर्गतराजधर्मे |
| वे.सू | वेदान्तसूत्रम् |

सङ्केताक्षरं विना दत्ताः सङ्ख्याः शीक्षावल्लीगतभाष्यभागसूचकाः ॥

सङ्ख्ययोः प्रथमा पार्श्वम् ; द्वितीया च पत्रपङ्क्तिं सूचयति।
अ– इति अधरोत्तरं परिगणितायाः पङ्क्तेः सङ्केतः।
संयोजनीयम् अक्षरं पदं च कृष्णतराक्षरेण सूचितम् ।
टि – इति टिप्पणिः

## अशुद्धशोधनम्, संयोजनं च (शीक्षावल्ली)

| पार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| 2 | 1 | द्रविडाचार्यदयश्च | द्रविडाचार्यादयश्च |
| 11 | अ–8 | प्रथमानुवाकः | प्रथमोऽनुवाकः |
| 18 | 5 | संधीयेते | संधीयते |
| 22 | टि–2 | ...त्यस्माद्धतोरेवमर्थता | ...त्यस्माद्धातोरेवमर्थता |
| 23 | 7 | आचीरं | अचीरं |
| 24 | 4 | अमायन्त्विति | आमायन्त्विति |
| 28 | 5 | महःइतिव्याहृतेः | मह इति व्याहृतेः |
| 28 | टि–3 | इत्यत्रः | इत्यत्र |
| 28 | टि–4 | स्मं | स्म |
| 29 | टि–5 | आदित्याभिर्लोकादयो | आदित्यादिभिर्लोकादयो |
| 30 | 8 | वेदा | वेद |
| 34 | 5 | स्वरूप्रतिपत्तिद्वारम् | स्वरूपप्रतिपत्तिद्वारम् |
| 34 | 12 | स्वराङ्भावम् | स्वराड्भावम् |
| 35 | टि–6 | अविथतं | अवितथं |
| 40 | टि–2 | प्रति | इति |
| 41 | 13 | स्वाध्यायपवचने | स्वाध्यायप्रवचने |
| 42 | 7 | पतः | तपः |
| 44 | 10 | प्ररेयिता | प्रेरयिता |
| 45 | 1 | आत्मतत्वम् | आत्मतत्त्वम् |
| 48 | टि–1 | कर्मविधानस्यात्रप्रकृतत्वात् | कर्मविधानस्यात्राप्रकृतत्वात् |
| 50 | 3 | पुत्रमाम्यादिकर्मणा | पुत्रकाम्यादिकर्मणा |
| 51 | टि–1 | आचार्यदेवोभव | आचार्यदेवो भव |
| 51 | टि–3 | बद्ध्वा | बुद्ध्वा |
| 58 | टि–5 | गत्यैश्वर्यादीतिसंग्रहवाक्यं | गत्यैश्वर्यादीति संग्रहवाक्यं |
| 61 | 1 | कर्मणि | कर्माणि |
| 62 | 4 | तव्द्यतिरेकेण | तद्व्यतिरेकेण |
| 63 | टि–6 | पृथग्र्यहणम् | पृथग्ग्रहणम् |
| 67 | टि–1 | तोभ्यो | तेभ्यो |
| 70 | 6 | तव्द्यापकत्वात् | तद्व्यापकत्वात् |

| पार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| 2 | अ–2 | व्यख्या | व्याख्या |
| 3 | 1 | भगवान्आचार्यः | भगवान् आचार्यः |
| 3 | 7 | आवीद्वाक्तारम् | आवीद्वक्तारम् |
| 3 | 7 | विद्वषावहै | विद्विषावहै |
| 3 | 13 | व्यख्यातमेतत्पूर्वम् | व्याख्यातमेतत्पूर्वम |
| 3 | 15 | प्रकृतवल्लीप्ररम्भे | प्रकृतवल्लीप्रारम्भे |
| 3 | अ–2 | कल्पनातद्याख्यानरूपे | कल्पनातद्व्याख्यानरूपे |
| 4 | अ–5 | मुमोचशिषन्ति | मुमोचयिषन्ति |
| 5 | 11 | विद्वषावहै | विद्विषावहै |
| 5 | टि–1 | इत्याधिकं | इत्यधिकं |
| 6 | 4 | विद्वषावहै | विद्विषावहै |
| 6 | अ–7 | फलवद्यास्माच्छान्तान्तःकरणे | फलवद्यस्माच्छान्तान्तःकरणे |
| 7 | 11 | न्युपानानि | न्युपासनानि |
| 7 | 13 | संसरबीजस्य | संसारबीजस्य |
| 8 | 8 | यश्चन्दसामित्या.. | यश्छन्दसामित्या.. |
| 9 | 4 | भ्रान्न्या | भ्रान्त्या |
| 9 | अ–2 | संसारस्यान्तिकी | संसारस्यात्यन्तिकी |
| 11 | 9 | ...निरुपादिकब्रह्मविभागः | ...निरुपाधिकब्रह्मविभागः |
| 12 | अ–7 | प्रतिष्ठाप्रप्तिमिति | प्रतिष्ठाप्राप्तिमिति |
| 14 | 5 | इत्याभिप्रायः | इत्यभिप्रायः |
| 16 | 12 | प्राप्तोतीत्येव | प्राप्नोतीत्येव |
| 16 | टि–1 | वरीयानां | वरीयानयं |
| 17 | अ–7 | अविद्यनिवृत्तिः | अविद्यानिवृत्तिः |
| 17 | अ–1 | कालाकाशदेरपि | कालाकाशादेरपि |
| 18 | 11 | ...त्मभावप्रतिपत्या | ...त्मभावप्रतिपत्त्या |
| 20 | अ–2 | सूत्रावाक्योक्तानां | सूत्रवाक्योक्तानां |
| 21 | टि–1 | प्रधान्येन | प्राधान्येन |
| 22 | टि–1 | ति | इति |
| 24 | टि–2 | इत्याधिकावापः | इत्यधिकावापः |
| 25 | 4 | ...व्यावृत्त्यर्थम् | ...द्व्यावृत्त्यर्थम |
| 26 | अ–4 | भूम्रो | भूम्नो |
| 29 | 1 | सन्देहनिवृर्त्तिर्भवति | सन्देहनिवृत्तिर्भवति |

| पार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| 30 | 1 | भमू। | भूमा |
| 30 | 8 | स्फुटमुद्घोषणादपीति | स्फुटमुद्घोषणादपीति |
| 30 | अ–9 | इत्यभिप्रय: | इत्यभिप्राय: |
| 30 | अ–4 | भवस्तु | भावस्तु |
| 31 | 3 | ज्ञातृत्वाद्यार्थानुपपत्तिं | ज्ञातृत्वाद्यर्थानुपपत्तिं |
| 33 | अ–8 | तत्स्वूपं | तत्स्वरूपं |
| 35 | अ–8 | ज्ञानतत्वनिर्धारण... | ज्ञानतत्त्वनिर्धारण... |
| 36 | 11 | एतव्द्यतिरिक्त | एतद्व्यतिरिक्त |
| 37 | अ–4 | व्यप्ता | व्याप्ता |
| 38 | टि–1 | तदित्यनपक्षितम् | तदित्यनपेक्षितम् |
| 42 | अ–12 | उक्तर्थे | उक्तार्थे |
| 43 | अ–6 | ...ध्यासदाशायां | ...ध्यासदशायां |
| 45 | 9 | वेदतुर्बुद्धि: | वेदितुर्बुद्धि: |
| 45 | अ–13 | यद्वत्सषुप्तग: | यद्वत्सुषुप्तग: |
| 46 | 6 | दु:संभव्याऽत्त | दु:संभाव्याऽत्त |
| 47 | अ–2 | इत्दादि | इत्यादि |
| 48 | अ–8 | ब्रह्मानन्दमयास्यान्त..... | ब्रह्मानन्दमयस्यान्त..... |
| 49 | 9 | तदेतत्पूर्णमप्रवर्ति | तदेतत्पूर्णमप्रवर्ती |
| 49 | 11 | न्यय्यमिति | न्याय्यमिति |
| 50 | 11 | लक्षणान्नन्यद्धिय: | लक्षणान्नान्यद्धिय: |
| 50 | अ–6 | विज्ञानन् | विजानन् |
| 52 | 7 | ब्रह्मण | ब्रह्मणा |
| 54 | 5 | तत्वान्यत्वाभ्याम..... | तत्त्वान्यत्वाभ्याम..... |
| 55 | 4 | ....शास्त्रोक्ताहं | ....शास्त्रोक्तमहं |
| 59 | अ–13 | कार्यसतत्वमजानत: | कार्यसतत्त्वमजानत: |
| 59 | अ–5 | ...नृतत्वोद्धोषणपूर्वकं | ...नृतत्वोद्घोषणपूर्वकं |
| 64 | 1 | ...श्रुतेरैकार्थ्ययापि | ...श्रुतेरैकार्थ्यापि |
| 65 | 2 | भूतसृष्टिरेष्टया | भूतसृष्टिरेष्टव्या |
| 65 | 7 | प्रकियाणां | प्रक्रियाणां |
| 65 | अ–8 | चान्यर्थोऽपि | चान्यार्थोऽपि |
| 67 | अ–5 | क्वचिदश्रणं | क्वचिदश्रवणं |
| 67 | अ–1 | जदगुत्पिपादयिषया | जगदुत्पिपादयिषया |

| पार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| 68 | 12 | करणतत्वम् | करणतत्त्वम् |
| 68 | 15 | श्रद्धया: | श्रद्धाया: |
| 68 | अ–1 | विवक्षयेत्यदोश: | विवक्षयेत्यदोष: |
| 71 | 4 | तच्याान्नं | तच्चान्नं |
| 71 | 8 | संभवत्यीर्थ: | संभवतीत्यर्थ: |
| 71 | अ–10 | सर्वजातिष्विति | सर्वजातिष्विति |
| 73 | अ–12 | अपर्युदस्तत्वाच्चोति | अपर्युदस्तत्वाच्चेति |
| 73 | अ–2 | रसश्चितं | रसश्चित्तं |
| 74 | टि–2 | ‘आन्तर वा | ‘आन्तर’ वा |
| 76 | 9 | तात्पर्यमात्र | तात्पर्यमत्र |
| 76 | अ–4 | ...सौकार्यार्थमिति | ...सौकर्यार्थमिति |
| 79 | 10 | ...मण्डोत्पित्तिक्रमेण | ...मण्डोत्पत्तिक्रमेण |
| 80 | 11 | कारणात्मत्त्वमेवं | कारणात्मत्वमेवं |
| 80 | 13 | कारणात्मत्त्वं | कारणात्मत्वं |
| 80 | 13 | वारव्याद्यभिन्नत्त्व | वाय्वाद्यभिन्नत्व |
| 81 | अ–2 | ...तात्पर्येणोपासनानां | ...तात्पर्येणोपासनानां |
| 87 | 4 | अन्नरसमयत्वात् | अन्नरसमयात् |
| 88 | 1 | निश्श्वसितीव | निःश्वसितीव |
| 88 | अ–9 | ब्रह्मेवैकं | ब्रह्मैवैकं |
| 89 | अ–3 | शिरआद्यवयवत्त्वं | शिरआद्यवयवत्वं |
| 90 | 3 | कोशन्तीत्यत्र | क्रोशन्तीत्यत्र |
| 92 | अ–9 | फलतीत्येदाह | फलतीत्येतदाह |
| 92 | अ–7 | सोऽपि | सोऽपि |
| 92 | टि–1 | तदन्तर्गतप्राणमयोनापि | तदन्तर्गतप्राणमयेनापि |
| 93 | 6 | स्वरूमेव | स्वरूपमेव |
| 94 | अ–8 | कौषितकिवचनम् | कौषीतकिवचनम् |
| 94 | टि–1 | सर्वमायुरेति | १.–सर्वमायुरेति |
| 96 | 6 | तस्य | ‘तस्य’ |
| 96 | अ–12 | ...माश्रित्यारोपापवाद... | ...माश्रित्याध्यारोपापवाद... |
| 96 | अ–9 | संसरोऽस्त्वविवेकत: | संसारोऽस्त्वविवेकत: |

| पार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| 97 | 1 | ..द्वारेणोद्धाटनेना.... | ..द्वारेणोद्घाटनेना.... |
| 97 | 7 | ...वाय्वत्मना | ...वाय्वात्मना |
| 97 | 9 | प्रधान्येनोपदेशात् | प्राधान्येनोपदेशात् |
| 97 | अ–13 | प्रक्रियां रचयन्ति | प्रवदन्ति |
| 98 | 9 | ...परमार्थतत्व.... | ...परमार्थतत्त्व.... |
| 99 | अ–10 | युक्त्यनुभवाबाह्यमेव | युक्त्यनुभवबाह्यमेव |
| 101 | अ–8 | ...पदवाक्ययिषया | ...पदवाक्यविषया |
| 102 | अ–4 | ब्रुवति | ब्रुवती |
| 103 | 11 | जात्यभिप्रयम् | जात्यभिप्रायम् |
| 103 | अ–6 | मानसत्वोपादनम् | मानसत्वोपपादनम् |
| 106 | अ–5 | यथोरस्ति | ययोरस्ति |
| 106 | 4 | विभेति | बिभेति |
| 108 | heading | अनु.१ ख. | अनु.१ ख.११ |
| 108 | 10 | ...विज्ञानैर्निवृत्त | ...विज्ञानैर्निर्वृत्त |
| 110 | टि–1 | जिष्णुशंभुश्च | जिष्णुः शंभुश्च |
| 119 | 2 | ब्रह्मणोनिरवयवस्य | ब्रह्मणो निरवयवस्य |
| 120 | 4 | ...प्रात्यत्वं | ...प्राप्यत्वं |
| 121 | 6 | ....मयादस्य | ....मयादस्य (footnote-1) |
| 121 | 7 | हि | हि (footnote-2) |
| 125 | 7 | बोध्यम | बोध्यम् |
| 126 | 6 | सवेत्ति | संवेत्ति |
| 126 | 7 | यदग्रे | यदग्रे |
| 127 | अ–11 | ...शमोत्कर्षाक्षया | ...शमोत्कर्षापेक्षया |
| 127 | अ–3 | तत्तधारभूतं | तत्तदाधारभूतं |
| 130 | अ–1 | तस्मिन्नेतास्मिन्नप्यर्थे | तस्मिन्नेतस्मिन्नप्यर्थे |
| 131 | अ–8 | वाक्यज्जग्ध्वा | वाक्याज्जग्ध्वा |
| 131 | टि–1 | अकाररस्त्रुटित | अकारस्त्रुटित |
| 134 | 2 | असब्रह्मेति | असद्ब्रह्मेति |
| 134 | 9 | परमार्थसत्वं | परमार्थसत्त्वं |

| पार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| 134 | 12 | सत्वमस्ति | सत्त्वमस्ति |
| 134 | 14 | सत्वमृते | सत्त्वमृते |
| 134 | अ–4 | तत्वतः | तत्त्वतः |
| 136 | अ–4 | निःश्रयसहेतुभूतायाश्च | निःश्रेयसहेतुभूतायाश्च |
| 137 | 1 | असाधुरुच्ये | असाधुरुच्यते |
| 137 | 4 | ...प्रतिपत्यर्थत्वात् | ...प्रतिपत्त्यर्थत्वात् |
| 137 | अ–6 | श्रुतेरित्यर्थः | श्रुत्यन्तरात् इत्यर्थः |
| 137 | अ–7 | तत्वभावः | तत्त्वभावः |
| 140 | टि–1 | ...शब्दाव्यासज्य | ...शब्दाद्व्यासज्य |
| 143 | अ–5 | ज्ञानानमनन्तं | ज्ञानमनन्तं |
| 144 | 4 | सत्वं | सत्त्वं |
| 144 | 9 | सतोऽसत्वापत्तौ | सतोऽसत्त्वापत्तौ |
| 144 | अ–3 | सत्वमेव | सत्त्वमेव |
| 146 | अ–3 | ब्रह्मप्राप्त्युपादनत्वेन | ब्रह्मप्राप्त्युपपादनत्वेन |
| 148 | 6 | प्रासङ्गिककथया | प्रासङ्गिककथया |
| 152 | 3 | तमाहुरग्रयं | तमाहुरग्र्यं |
| 152 | अ–8 | व्यवह्वियते | व्यवह्रियते |
| 152 | अ–1 | भसमानस्य | भासमानस्य |
| 153 | अ–3 | तत्वान्यत्वाभ्याम.... | तत्त्वान्यत्वाभ्याम.... |
| 154 | अ–6 | स्पप्रक्रिया.... | स्वप्रक्रिया.... |
| 156 | अ–8 | बलादायतीति | बलादायातीति |
| 157 | 2 | विजृम्भमात्रम् | विजृम्भामात्रम् |
| 160 | 7 | उत्पद्येप | उत्पद्येय |
| 160 | अ–5 | व्याकृतवास्थायामपि | व्याकृतावस्थायामपि |
| 161 | 2 | निरवयस्य | निरवयवस्य |
| 162 | 6 | ...दशयामपि | ...दशायामपि |
| 162 | अ–8 | ज्ञप्तितत्वैकस्वभावमपि | ज्ञप्तितत्त्वैकस्वभावमपि |
| 162 | अ–6 | ....वृत्युपाधिना | ....वृत्त्युपाधिना |
| 164 | 1 | एवालेचनारूपं | एवालोचनारूपं |
| 165 | 3 | यस्मिश्च | यस्मिंश्च |
| 165 | अ–1 | ...चेदविशिष्टमिति | ...चेदमविशिष्टमिति |
| 166 | 6 | तत्रैतञ्चिन्त्यम् | तत्रैतच्चिन्त्यम् |

| पार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| 167 | 5 | सावयत्वाच्च | सावयवत्वाच्च |
| 167 | 8 | निरवयत्वाच्च | निरवयवत्वाच्च |
| 167 | टि–3 | अशून्यात्वात् | अशून्यत्वात् |
| 169 | 8 | तत्रैतञ्चिन्त्यम् | तत्रैतच्चिन्त्यम् |
| 169 | अ–6 | मायवी | मायावी |
| 171 | अ–11 | व्यधिरिति | व्याधिरिति |
| 172 | 5 | कार्यान्तरामेव | कार्यान्तरमेव |
| 172 | 7 | कार्यान्तरमेवापाद्यते | कार्यान्तरमेवापद्यते |
| 172 | अ–10 | मोक्षसंभवाच्च | मोक्षासंभवाच्च |
| 173 | अ–1 | वेदनमुपादिश्यमान.... | वेदनमुपदिश्यमान.... |
| 174 | अ–12 | माहत्मनः | महात्मनः |
| 177 | टि–2 | समस्तपाठद्वरमयमेव | समस्तपाठाद्वरमयमेव |
| 179 | 11 | ...प्रविशदित्युच्यते | ...प्राविशदित्युच्यते |
| 179 | अ–7 | बुद्धेरन्यात्रानुपलभ्यत्वे | बुद्धेरन्यत्रानुपलभ्यत्वे |
| 180 | 6 | .....दवाभासात्मक.... | .....दवभासात्मक.... |
| 181 | अ–3 | बुद्श्चैतन्यवती | बुद्धिश्चैतन्यवती |
| 186 | 14 | चेतनाचेनात्मना | चेतनाचेतनात्मना |
| 191 | अ–10 | पुरस्तद्यदिह | पुनस्तद्यदिह |
| 191 | अ–7 | इत्यवोचाम | इत्यवोचाम |
| 192 | 8 | यथाकमं | यथाकामं |
| 193 | 7 | सत्यदादि | सत्त्यदादि |
| 193 | अ–3 | द्रष्ट्रश्रोत्राद्यावभास.... | द्रष्टृश्रोत्राद्यावभास.... |
| 193 | अ–1 | इत्याभिप्रायः | इत्यभिप्रायः |
| 196 | अ–4 | तदसच्छब्दावाच्यं | तदसच्छब्दवाच्यं |
| 202 | 2 | तत्वजिज्ञासुभिः | तत्त्वजिज्ञासुभिः |
| 203 | अ–2 | ब्रह्मणोऽसत्वाशङ्की | ब्रह्मणोऽसत्त्वाशङ्की |
| 205 | 11 | समान्यतो | सामान्यतो |
| 205 | अ–6 | ..वरुद्धत्वात्ताप्राप्ते... | ..वरुद्धत्वात्तत्प्राप्ते... |
| 212 | अ–11 | ...स्पदत्वश्रणवात् | ...स्पदत्वश्रवणात् |
| 215 | 7 | कथमन्तरकाणम् | कथमन्तरकरणम् |
| 215 | 10 | अविद्यामानवस्तुनो | अविद्यमानवस्तुनो |
| 216 | 1 | इत्येवेहि | इत्यवेहि |

| पार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| 216 | 10 | नानुपन्नमित्यास्तां | नानुपपन्नमित्यास्तां |
| 218 | अ–7 | ब्रह्म इति | ब्रह्म' इति |
| 219 | अ–7 | देवानामनन्दाः | देवानामानन्दाः |
| 219 | अ–6 | देवानामनन्दः | देवानामानन्दः |
| 223 | अ–8 | तत्तसाधनोत्कर्षवशाच्च | तत्तत्साधनोत्कर्षवशाच्च |
| 225 | अ–4 | आशिष्टः | आशिष्ठः |
| 230 | 10 | देवागन्धर्वा | देवगन्धर्वा |
| 233 | 1 | कथमप्युपकाराकम् | कथमप्युपकारकम् |
| 233 | 6 | ध्रवं | ध्रुवं |
| 234 | अ–9 | प्रविलापित्वेष्वविद्या... | प्रविलापितेष्वविद्या... |
| 238 | अ–5 | विवक्षिति | विवक्षति |
| 238 | टि–1 | विपरीवर्त्य | विपरिवर्त्य |
| 241 | अ–11 | पर्यप्तकामस्य | पर्याप्तकामस्य |
| 242 | 3 | ...वस्तुतत्वज्ञान... | ...वस्तुतत्त्वज्ञान... |
| 242 | अ–8 | सच्चत्यच्चाभावात् | सच्चत्यच्चाभवत् |
| 244 | अ–3 | ...नोत्कर्षापलक्षण... | ...नोत्कर्षापकर्षलक्षण... |
| 244 | अ–1 | द्वैतसंसारेस्वयमन्तर्गत | द्वैतसंसारे स्वयमन्तर्गत |
| 245 | अ–13 | प्रात्यक्ष्यात्सोऽयमित्यः | प्रात्यक्ष्यात्सोऽयमित्यतः |
| 247 | 6 | वृत्तग्रन्थार्थनुद्रवणम् | वृत्तग्रन्थार्थानुद्रवणम् |
| 251 | 7 | विद्याङ्ग त्वन | विद्याङ्गत्वेन |
| 252 | 4 | तदननन्तरं | तदनन्तरं |
| 252 | अ–11 | प्राणमयात्माना | प्राणमयात्मना |
| 253 | 3 | परमात्मानमुभुङ्क्ते | परमात्मानमुपभुङ्क्ते |
| 253 | 8 | एतमन्नरमयमात्मा.... | एतमन्नमयमात्मा.... |
| 255 | 10 | ...दर्शितजगद्व्यापार... | ...दर्शितनयेन जगद्व्यापार... |
| 255 | अ–13 | शरीरत्वाभ्युपगमः | शरीरित्वाभ्युपगमः |
| 257 | 6 | ...पपादित्वात् | ...पपदितत्वात् |
| 259 | अ–8 | भवत्वेवं वित् | भवत्वेवंवित् |
| 260 | 12 | तस्ताम् | तस्मात् |
| 260 | अ–5 | सत्यमर्थवंती | सत्यमर्थवती |
| 260 | अ–1 | वेदब्राह्या | वेदबाह्या |

| पार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| 261 | 1 | वैदिकंमन्यां | वैदिकंमन्या |
| 261 | 3 | स्मृत्यो | स्मृतयो |
| 261 | 9 | दुरुद्धारान् | दुरुद्धरान् |
| 263 | अ–4 | स्वरूपसत्त्वज्ञानवद् | स्वरूपसत्त्वाज्ञानवद् |
| 267 | 8 | तत्त्वम् (footnote–2) | तत्त्वम् (footnote-1) |
| 267 | टि–1 | १. विद्याभावे.... | ३.विद्याभावे..(Previous page) |
| 267 | टि–2 | २. तत्तत्वम् | १. तत्तत्वम् |
| 269 | 1 | ....वस्थायमसौ | ....वस्थायामसौ |
| 269 | अ–10 | इत्युद्धोषणात् | इत्युद्घोषणात् |
| 271 | अ–13 | मृदस्तत्वम् | मृदस्तत्त्वम् |
| 271 | अ–1 | जागारितेऽपि | जागरितेऽपि |
| 272 | 12 | ...माराणप्रयासेन | ...मारणप्रयासेन |
| 275 | अ–12 | तस्मन्निमित्तस्य | तस्मान्निमित्तस्य |
| 277 | 6 | ... वै नाम(footnote-2) | ... वै नाम(footnote-1) |
| 279 | अ–8 | एवेत्यनुमन्तये | एवेत्यनुमन्यते |
| 282 | अ–5 | संकमणश्रुतेरर्थः | संक्रमणश्रुतेरर्थः |
| 284 | 7 | अन्नमयोऽदर्शनादिति | अन्नमयेऽदर्शनादिति |
| 285 | 1 | बहिर्निर्गतस्तः | बहिर्निर्गतस्ततः |
| 291 | अ–3 | स्वासामर्थ्याद्धीयन्ते | स्वसामर्थ्याद्धीयन्ते |
| 292 | अ–10 | अस्तित्वागमन... | अस्तित्वावगमन... |
| 292 | अ–9 | प्रतिष्ठा | प्रतिष्ठां |
| 292 | अ–8 | त्वस्तित्वागमे | त्वस्तित्वावगमे |
| 293 | 10 | सुंसवेद्यत्व.... | सुसंवेद्यत्व.... |
| 293 | 11 | प्रत्ययोविज्ञनमित्यादिना | प्रत्ययोविज्ञानमित्यादिना |
| 293 | 13 | ....परपर्यायाया | ....परपर्याया |
| 295 | 1 | ...नन्यत्वदित्यभिप्रायः | ...नन्यत्वादित्यभिप्रायः |
| 295 | अ–11 | ...ज्ञाननन्तस्वभावाद् | ....ज्ञानानन्तस्वभावाद् |
| 295 | अ–3 | ...त्मानमुपसंक्रमति | ...त्मानमुपसंक्रामति |
| 296 | अ–8 | अन्यद्वस्त्वरं | अन्यद्वस्त्वन्तरं |
| 300 | अ–3 | प्रतिज्ञामुपक्रमे | प्रतिज्ञातमुपक्रमे |
| 301 | अ–10 | ब्रह्मोति | ब्रह्मेति |
| 303 | 9 | तदेवकृतं | तदेव सुकृतं |

| पार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| 304 | अ–2 | ...सच्चिानन्देन्द्र... | ...सच्चिदानन्देन्द्र... |
| 306 | अ–12 | ...विकल्पास्वरूपमात्र... | ...विकल्पास्पदब्रह्मस्वरूपमात्र... |
| 311 | अ–6 | प्रवृत्तिरूपपद्यते | प्रवृत्तिरुपपद्यते |
| 312 | अ–3 | संकलमिदं | सकलमिदं |
| 317 | अ–12 | ...जिज्ञासुर्बह्म... | ...जिज्ञासुर्ब्रह्म... |
| 317 | अ–2 | ...मुपसंहरसि | ...मुपसंहरति |
| 318 | अ–12 | तत्वदिदृक्षया | तत्त्वदिदृक्षया |
| 319 | अ–1 | प्रणादीनां | प्राणादीनां |
| 320 | 8 | ...चामागोचरम् | ...चामगोचरम् |
| 324 | 8 | इत्युपदिक्षत् | इत्युपादिक्षत् |
| 325 | 5 | तत्तजिज्ञासुभिरित्यर्थः | तत्त्वजिज्ञासुभिरित्यर्थः |
| 326 | अ–9 | तटस्थक्षणं | तटस्थलक्षणं |
| 327 | अ–8 | कस्यचिपदप्यभावात् | कस्यचिदप्यभावात् |
| 328 | अ–1 | सूत्रभाष्यर्योर्वा | सूत्रभाष्ययोर्वा |
| 329 | 7 | इत्येतावान्मात्रा.... | इत्येतावन्मात्रा.... |
| 329 | अ–5 | ...मित्याचक्षतेख | ...मित्याचक्षते’ |
| 335 | अ–10 | आकाशवत्स्र्वगतः | आकाशवत्सर्वगतः |
| 337 | 5 | अन्नान्नादत्वादि कया | अन्नान्नादत्वादिकया |
| 338 | 9 | कृतकृतत्येनापि | कृतकृत्येनापि |
| 340 | अ–12 | प्रतितिष्ठत | प्रतिष्ठत |
| 340 | अ–4 | प्राणान्नातृ | प्राणान्नात्तृ |
| 344 | 6 | अध्यात्मिकं | आध्यात्मिकं |
| 344 | 9 | ग्राह्यः | ग्राह्याः |
| 344 | 11 | पञ्चभूतारब्धैःरात्मन | पञ्चभूतारब्धैरात्मन |
| 347 | 10 | उपनमेत् | उपनमते |
| 347 | टि–3 | इत्याधिकं | इत्यधिकं |
| 354 | 13 | क्षम | क्षेम |
| 357 | अ–9 | तावत्प्रमाणादीनाम... | तावत्प्राणादीनाम... |
| 357 | अ–5 | जनान् | जानन् |
| 358 | अ–11 | ...त्वाश्रुतिबलाच्च | ...त्वश्रुतिबलाच्च |
| 359 | अ–2 | तवदस्थसैव | तदवस्थसैव |
| 361 | अ–5 | सर्वधर्मभूतमुष्णं | स्वधर्मभूतमुष्णं |

| पार्श्वे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| 363 | अ–6 | ...त्वाच्छ्रौतदर्शनमेव | ...त्वाच्छ्रौतदर्शनमेव |
| 364 | अ–6 | ...पीदमभ्युगन्तव्यं | ...पीदमभ्युपगन्तव्यं |
| 366 | 2 | आकाशाद्वेतत्वं | आकाशाद्वैतत्वं |
| 366 | अ–5 | ...प्रत्ययिगम्यात्म... | ...प्रत्ययगम्यात्म... |
| 370 | अ–1 | पश्येत् | पश्येत् |
| 376 | 6 | ...भाक्तवात् | ...भाक्तत्वात् |
| 380 | 10 | विद्याकर्यम् | विद्याकार्यम् |
| 381 | अ–6 | यथा आदित्यो....दीर्घश्छान्दसः। | to be deleted. |
| 381 | अ–4 | कथाञ्चिदपि | कथञ्चिदपि |
| 381 | अ–1 | ..देदीप्यामानशरीरे | ...देदीप्यमानशरीरे |
| 385 | अ–13 | वस्तुतस्तु कोप्यु... | वस्तुतस्तु न कोप्यु... |
| 386 | 2 | अनुष्ठायस्व संवेद्यतामा... | अनुष्ठाय स्वसंवेद्यतामा... |
| 386 | अ–4 | ...भगच्चरण... | ...भगवच्चरण... |

पार्श्वः 371 अ–9 पङ्क्तौ – तस्मात् इत्यस्य पूर्वं योजनीयम् – **अविद्याध्यारोपितस्य शेषानुपपत्तेः । न हि तैमिरिकदृष्ट्याध्यारोपितस्य द्विचन्द्रादेस्तिमिरापगमे शेषोऽवतिष्ठते । (गी.भा.–18–48) इति च ।**

| | | |
|---|---|---|
| 9 | 12 | छां–७–३–१, |
| 9 | 17 | १–६ |
| 14 | अ–3 | बृ–२–४–५ |
| 42 | अ–4 | मुं–२–१–९ |
| 43 | 11 | उप.सा.–१८–५३ |
| 50 | 13 | तै.वा–२–१११,११२,११३ |
| 65 | 10 | तै.वा–२–१४५ |
| 67 | 8 | मुं–१–१–८ |
| 68 | 6 | बृ–१–४–७ |
| 68 | 10 | बृ–५–४–१ |
| 68 | अ–3 | तै.वा–२–१५५ |
| 91 | 13 | बृ–१–५–२२ |
| 102 | अ–1 | ऋ–१–१६४–३९ |
| 104 | 13 | ऐ.ब्रा–३–३–१३ |
| 104 | अ–6 | ऐ.ब्रा–३–३–१३ |
| 114 | अ–7 | बृ–५–५–१ |
| 114 | टि–1 | १–१–५ |
| 131 | अ–8 | तै.वा–२–२३६,२३८ |
| 131 | अ–6 | तै.वा–२–२४१,२४२ |
| 133 | 12 | ई–३ |
| 148 | 3 | गौ.का–३–७,२८ |
| 151 | 7 | ऋ–१०–१२९–७ |
| 176 | 8 | तै.सं–१–५–१–१ |
| 229 | 6 | गी–२–५५ |
| 231 | 1 | २–५ |
| 269 | 16 | छां–६–८–१ |
| 308 | 10 | मुं–१–२–१२ |
| 380 | अ–2 | तै.वा–३–८८ |

# विषयानुक्रमणिका

(धनुश्चिह्नान्तःस्थिताः सङ्ख्या भाष्यभागसूचकाः)

## भाष्यकारस्यावतरणिका


मङ्गलम् - ग्रन्थसम्बन्धः (१) - कर्ममात्रान्न मोक्षः (२-७) - विद्यासहित - कर्मभ्योऽपि न मोक्षः (८-९) - अविद्यानिवृत्यर्थमुपनिषदारम्भणीया (१०) - 1 - 9


## शीक्षावल्ली


१. **शान्तिपाठः** - देवताप्रार्थनम् (११) - अपरब्रह्मस्तुतिः (१२) - शान्त्यभिधानत्रयस्य प्रयोजनम् (१३) - 11-13

२. **शीक्षाध्यायः** - (१४) - 14

३. **संहितोपासना** - उपासनाफलाशीर्वचनम् (१५) - संहितोपासनाप्रकारः (१६) - उपासनाक्रमः (१७) - संहितोपासनाफलम् (१८) - 15-18

४. **विविधा जपहोममन्त्राः** - उत्तरग्रन्थसंबन्धः (१९) - मेधाप्रार्थना (२०) - कार्यकरणयोग्यताप्रार्थनम् (२१) - ज्ञानार्थं प्रार्थना (२२) - श्रीकामस्य होमार्थमन्त्राः (२३) - शिष्यागमनप्रार्थनामन्त्राः (२४) - ओङ्काराभिन्नपरमेश्वरसायुज्यप्रार्थना(२५) - बहुशिष्यागमनप्रार्थनोपसंहारः (२६) - अत्र श्रीकामोऽपि ज्ञानार्थ एव (२७) - 19-25

५. **व्याहृत्यात्मब्रह्मोपासना** - अनुवाकसंबन्धः (२८) - व्याहृति - परिगणनम् (२९) - मह इति व्याहृतेः प्राधान्यम् (३०) - चतसृणां व्याहृतीनां प्रत्येकं चतुष्प्रकारत्वम् (३१) - व्याहृत्युपासनं वक्ष्यमाणविशेषणसहितमेकमेव (३२) - अङ्गोपासनाफलम् (३३) - 26-30

६. **महोब्रह्मोपासने स्थानादि** - अनुवाकसंबन्धः (३४) - व्याहृत्यात्मकब्रह्मण उपलब्धिस्थानं विशेषणानि च (३५) - उपासकस्य

ब्रह्मप्राप्तये नाडीमार्गः (३६) - उपासनाफलम् (३७) - मनोमयात्मनो विशेषणान्तराणि (३८) - उपासनोपदेशोपसंहारः (३९) - 31-35

७. **ब्रह्मणः पाङ्क्तरूपेणोपासनम्** - अनुवाकविषयः (४०) - बाह्यपाङ्क्तत्रयम् (४१) - आध्यात्मिकपाङ्क्तत्रयम् (४२) - पाङ्क्तोपासनाफलम् (४३) - 36-38

८. **ओङ्कारोपासनम्** - अनुवाकविषयः (४४) - ओङ्कारोपासनविधिः (४५) ओङ्कारस्तुतिः (४६) - 39-40

९. **कर्मणां पुरुषार्थसाधनत्वम्** - अनुवाकविषयः (४७) - मुमुक्षुणा अवश्यानुष्ठेयानि कर्माणि (४८) - स्वाध्यायप्रवचनयोः प्रधान्यम् (४९) - 41-43

१०. **त्रिशङ्कोरार्षदर्शनम्** - मन्त्राम्नायो जपार्थः (५०) - मन्त्रार्थः (५१) कर्मणो ज्ञानहेतुत्वम् (५२) - 44-45

११. **विद्योत्पत्त्यर्थमनुष्ठेयानि कर्माणि** - सत्यादिकर्तव्योपदेशप्रयोजनम् (५३) द्विः कर्मोपदेशप्रयोजनम् (५४) - सत्यादीन्यनुष्ठेयानि (५५) - गुरुजनेषु कर्तव्यम् (५३) - दानस्यावश्यकर्तव्यता (५७) - अनुष्ठानविषयकसंशये शिष्टाचारः प्रमाणम् (५८) - उपसंहारः (५९) - 46-52

**परमपुरुषार्थसाधनविषये चिन्ता** - चिन्ताविषयः (६०) - केवलेभ्यः कर्मभ्यो न निःश्रेयसम् (६१) - विद्यासव्यपेक्षकर्मभ्योऽपि न मोक्षः (६२) - ज्ञानकर्मणोः समप्राधान्येन समुच्चितयोरपि न मोक्षहेतुता (६३) - ज्ञानकर्मसमुच्चय एवानुपपन्नः (६४) - निरस्तकारकब्रह्मोपदेशे न श्रुतिविरोधः (६५) - विद्यायाः स्वफलदाने न कर्मपेक्षा (६६) - स्वोत्पत्तौ त्वपेक्षते कर्माणि विद्या (६७) - विद्याया गार्हस्थ्यकर्माण्येवापेक्षितान्युत्पत्ताविति न नियमः (६८) - कर्मणि श्रुतेर्यत्नाधिक्ये कारणम् (६९) श्रवणादीनां साक्षाद्विद्यासाधनत्वम् (७०) - उपसंहारः (७१) - 53-66

१२. **शान्तिपाठः** - - 67-68

॥ ॐ ॥

श्रीमच्छाङ्करभाष्यसंयुता

# तैत्तिरीयोपनिषत्

## अथ भाष्यकारस्यावतरणिका

### मङ्गलम्

यस्माज्जातं जगत्सर्वं यस्मिन्नेव प्रलीयते ।
येनेदं धार्यते चैव तस्मै ज्ञानात्मने नमः ॥ ॥१॥
यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः ।
व्याख्याताः सर्ववेदान्तास्तान्नित्यं प्रणतोऽस्म्यहम् ॥ ॥२॥
तैत्तिरीयकसारस्य मयाऽऽचार्यप्रसादतः ।
विस्पष्टार्थरुचीनां हि व्याख्येयं संप्रणीयते ॥ ॥३॥

### अथ सच्चिदानन्देन्द्रसरस्वतीकृतं टिप्पणम्

सत्यं ज्ञानमनन्तं तं मनोवाचामगोचरम् ।
जगज्जन्मादिकाभासं सुखात्मानमुपास्महे ॥

१. सर्वाध्यक्षभूतचैतन्यस्वरूपः सन् परमात्मा जगज्जनिस्थितिप्रलयरूपेणाभासते स्वीयज्ञानस्वरूपापरित्यागेनैव । अत एवाऽऽत्मनः सत्यत्वमनन्तत्त्वं च श्रुतिप्रतिपादितं सङ्गच्छते इत्याशयेनाह 'ज्ञानात्मने नमः' इति॥

२. पदवाक्यप्रमाणत इति व्याकरणमीमांसान्यायाविरोधेनेत्यर्थः । आचार्यतः प्रागेव परिशुद्धाद्वैतसंप्रदायानुसारेण पूर्वैः कैश्चिदुपनिषदो व्याख्याता

इत्येतच्छ्लोकाभिप्रायबलादनुमीयते । **द्रविडाचार्यदयश्च** वेदान्तव्याख्यातार आसन्निति श्रुणुमः । कृतयस्तु तेषामिदानीं न लभ्यन्ते । 'गुरुभिः' इत्येतद्विशेषणं किं गुरुगोविन्दभगवत्पादपरामर्शकम् ? - इति तु विद्वद्भिरेव विमृश्य निर्णेयमेतत् ॥

३. श्लोकोऽयं तैत्तिरीयवार्तिकेऽपि दृश्यते । टीकाकारैरुभयत्रापि तत्तद्ग्रन्थानुगुण्येन व्याख्यातश्च । 'तैत्तिरीयकसारस्य वार्तिकामृतमुत्तमम्' इत्युपान्त्यवार्तिकात् सुरेश्वराचार्याणामेवायं स्यादिति तून्नीयते ॥

## ग्रन्थसम्बन्धः

१. नित्यान्यधिगतानि कर्माणि, उपात्तदुरितक्षयार्थानि [1]। काम्यानि च फलार्थिनां[2] पूर्वास्मिन् ग्रन्थे । इदानीं कर्मोपादानहेतुपरिहाराय ब्रह्मविद्या प्रस्तूयते ॥

कर्महेतुः कामः स्यात् । प्रवर्तकत्वात् । आप्तकामानां हि कामाभावे स्वात्मन्यवस्थानात्[3] प्रवृत्त्यनुपपत्तिः । आत्मकामत्वे च आप्तकामता[4] । आत्मा च[5] ब्रह्म । तद्विदो हि परप्राप्तिं वक्ष्यति[6] । अतः, अविद्यानिवृत्तौ[7] स्वात्मन्य-

---

१. नित्यानां कर्मणां फलाभावं ये प्राहुस्तन्मतनिरासार्थमाह - उपात्तदुरितक्षयार्थानीति। गी.भा. १८-६.

२. सामान्यत इष्टानिष्टप्राप्तिपरिहारेच्छूनां विहितानि नित्यानि, विशेषतः स्वर्गादिफलार्थिनां कामिनां विहितानि काम्यनीति विवेकः । रागादिदोषवतां विहितत्वं त्वविशिष्टमुभयत्र॥ बृ.भा. १-३-१.

३. स्वेन परमार्थरूपेणाऽऽत्मना अवस्थानमेव परः पुरुषार्थ इत्यभिप्रायः । मुं.भा. १-२-१, का.भा. २-१-२, के.भा. २-४

४. 'स यथाकामो भवति' (बृ.४-४-५) इति श्रुतिमाश्रित्य कामस्य प्रवर्तकत्वमुक्तम्। अथेदानीं 'योऽकामो निष्काम आप्तकाम आत्मकामः' (बृ. ४-४-६) इति श्रुतिमाश्रित्य आत्मकामानां कामाभावे प्रवृत्त्यनुपपत्तिमाह 'आप्तकामानां हि' इत्यादिना 'आप्तकामता' इत्यन्तेन ॥

५. 'आत्मा हि' इति आ ॥; चयुक्तो वा ॥ पाठः ॥

६. 'तस्माद्वा एतस्मादात्मनः' (२-१) इति श्रुतेरात्मन एव ब्रह्मत्वात्, आत्मविद एव ब्रह्मवित्त्वात्, ब्रह्मविदश्च 'आप्नोति परम्' (२-१) इति परप्राप्तेर्वक्ष्यमाणत्वात्, परप्राप्तौ च कामात्यन्ताभावात्, सुष्ठूक्तं कर्मोपादानहेतुपरिहाराय ब्रह्मविद्या प्रस्तूयत इतीति भावः ॥

७. यद्यपि काम एव प्रवर्तकः, तथाप्यद्वये ब्रह्मात्मनि शुभाशुभविभक्तविषयतत्कामित्वरूपद्वयकल्पनाया आत्मस्वरूपानभिज्ञतानिमित्ताविद्याहेतुकत्वम् । सा चाविद्या ब्रह्मात्मविद्यया हातव्या सर्वथा प्रवृत्तिनिरोधार्थमिति भावः । यदाहुर्वार्तिककाराः - 'अपविद्धद्वये तत्त्वे सर्वदैवाऽऽत्मरूपके । विपर्ययोऽनभिज्ञानात्ततः कामः क्रियास्ततः ॥ यदज्ञानात्प्रवृत्तिर्या तज्ज्ञानात्सा कुतो भवेत् । तस्मात्सर्वप्रवृत्तीनामलं विद्योपशान्तये ॥' (तै.वा. १-७, ८) इति ॥

वस्थानं[१] परप्राप्तिः। 'अभयं प्रतिष्ठां विन्दते'[२] (२-७), 'एतमानन्दमयमात्मानमुपसङ्क्रामति'[३] (२-८) इत्यादि[४] श्रुतेः ॥

## कर्ममात्रान्न मोक्षः

### कर्ममीमांसकानां पूर्वपक्षः -

२. काम्यप्रतिषिद्धयोरनारम्भात् आरब्धस्य च उपभोगेन क्षयात्, नित्यानुष्ठानेन च प्रत्यवायाभावात्, अयत्नत[५] एव स्वात्मन्यवस्थानं मोक्षः । अथवा निरतिशयायाः[६] प्रीतेः स्वर्गशब्दवाच्यायाः[७] कर्महेतुत्वात् कर्मभ्य एव मोक्षः इति चेत्॥

### सिद्धान्तः - अशेषकर्मक्षपणासम्भवः -

३. न; कर्मानेकत्वात् । अनेकानि हि आरब्धफलानि अनारब्धफलानि

---

१. एतदेव च 'स्वात्मप्रतिष्ठा' (मुं. भा. १-२-१), 'प्रत्यगात्मस्वरूपावस्थानम्' (का. २-१-२), 'स्वरूपावस्थानम्' (गी.भा. १८-६६), सू.भा. (४-३-१४), 'स्वस्थता' (मां.भा. अव.) - इत्यादिशब्दैर्व्यपदेश्यम् ॥

२. स्वात्मन्यवस्थानं प्रतिष्ठाशब्देनोक्तमिति भावः ॥

३. आनन्दमयं परमात्मानमादाय श्रुतिरुदाहृतेति केचित् । तदसत् । 'आनन्दमयाद्यात्मव्यतिरिक्तकर्तृकं ज्ञानमात्रं च संक्रमणम् (२-८) इति । 'अविद्याविभ्रमनाशे संक्रमणशब्द उपचर्यते' इति च भाष्यात् आनन्दमय सतत्त्व विज्ञानेनाऽऽत्माविद्याविभ्रमनाशपरत्वोपपत्तेः संक्रमणवचनस्य ॥

४. आदिशब्देन 'आनन्दं ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति' (२-९) इत्यादिसंग्रहः॥

५. अयत्नत इति । ब्रह्मविद्यारम्भे यत्नं विनैवेत्यर्थः । आत्मन्यवस्थानं साधनविशेषसाध्यमिति पूर्वपक्षिणोऽभिप्रायः । एवंप्रकारेण कर्मानुष्ठानेनैव मोक्ष इति वदतां मतं गीताभाष्ये (१८-६६) सूत्रभाष्ये च (४-३-१४) निराकृतमस्ति ॥

६. 'निरतिशयप्रीतेः' इति समस्तपाठः क्वचित् । भाष्ये चोत्तरत्र तथैवोपलभ्यते ॥

७. स्वर्गातिरिक्तो मोक्ष एव नास्तीत्यभिनिविष्टानां वीरमीमांसकानां मतमिदम् ॥ (जै.सू. ४-३-१५)

च [1] अनेकजन्मान्तरकृतानि विरुद्धफलानि [2] कर्माणि सम्भवन्ति । अतः तेष्वनारब्धफलानाम् एकस्मिन् जन्मन्युपभोगेन[3] क्षयासंभवात् शेषकर्मनिमित्तशरीरारम्भोपपत्तिः । कर्मशेषसद्भावसिद्धिश्च[4] । 'तद्य इह रमणीयचरणाः'[5] (छा. ५-१०-७), ''ततः शेषेण'[6] (गौ.ध. २-२९) इत्याधिश्रुतिस्मृतिशतेभ्यः ॥

## नित्यकर्मभिरनारब्धकर्मक्षपणम् -

४. इष्टानिष्टफलानां अनारब्धानां क्षयार्थानि नित्यानीति चेत् । न । अकरणे प्रत्यवायश्रवणात् (?) । प्रत्यवायशब्दो हि अनिष्टविषयः । नित्याकरणनिमित्तस्य प्रत्यवायस्य दुःखरूपस्य आगामिनः परिहारार्थानि नित्यानि इत्यभ्युपगमात्,[7] नानारब्धफलकर्मक्षयार्थानि । यदि नाम[8] अनारब्धकर्मक्षयार्थानि

---

१. चोदनादृष्ट्या नित्यनैमित्तिककाम्यनिषिद्धभेदेन चतुर्धा विभक्तानि कर्माणि । भोग्यफलदृष्ट्या तु सञ्चितारब्धागामिभेदेन त्रेधा ॥

२. ब्रह्महत्याश्वमेधयोर्विरुद्धफलयोरेकस्मिन् देहे भोगो नोपपद्यते । एवमनेकजन्मकृतानां नैकजन्मोपभोगेनैव क्षपणीयानां नैतज्जन्ममात्रकर्मणा क्षपणं संभवतीत्यभिप्रायः ॥

३. 'उपभोगक्षयासंभवात्' आ ॥

४. न केवलं संभावनायुक्तिगम्यः कर्मशेषसद्भावः, किन्तु शास्त्रगम्योऽपीत्याह - कर्मशेषसद्भावसिद्धिश्चेति ॥

५. एतद्वाक्यार्थनिर्णयः कृतात्ययाधिकरणे (वे.सू. ३-१-८...) द्रष्टव्यः॥

६. 'वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य स्वकर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते' इति पूर्णं सूत्रम्॥

७. पूर्वपक्षिणोऽभ्युपगमोऽयम् । स्वाभ्युपगमविरोधः प्रसज्यते यदि नित्यानामनारब्धक्षयहेतुत्वमपि स्वीक्रियते इत्यभिप्रायः । संग्रहवाक्ये 'अकरणे प्रत्यवायश्रवणात्' इत्येव मुद्रितपुस्तकेषु दृश्यते । विवरणे 'इत्यभ्युपगमात्' इत्यस्यानुरोधेन तत्रापि 'प्रत्यवायाभ्युपगमात्' इति तु भाव्यम् । श्रवणादिति पाठः कथमत्रायात इति न ज्ञायते । वार्तिके तु श्रुतिपरामर्शो नास्त्येव ॥

८. उक्तविरोधमविगणय्य यदि नित्यकर्मणाम् अनारब्धकर्मक्षपणहेतुत्वमङ्गीक्रियते, तदा दोषान्तरमपि प्रसजतीति भावः

नित्यानि कर्माणि, तथापि अशुद्धमेव क्षपयेयुः, न शुद्धम् । विरोधाभावात् । न हि इष्टफलस्य कर्मणः शुद्धरूपत्वात् नित्यैर्विरोध उपपद्यते । शुद्धाशुद्धयोर्हि विरोधो युक्तः।

## विद्यां विना कामक्षयासंभवाच्च न सर्वकर्मक्षयः

५. न च कर्महेतूनां कामानां ज्ञानाभावे निवृत्त्यसंभवात्[१], अशेषकर्मक्षयोपपत्तिः । अनात्मविदो हि कामः । अनात्मफलविषयत्वात् । स्वात्मनि च कामानुपपत्तिः । नित्यप्राप्तत्वात् । स्वयं आत्मा परं ब्रह्म इत्युक्तम् ॥

### नित्याकरणस्य प्रत्यवायजनकत्वमपि न तर्कसहम् -

६. नित्यानां च अकरणम् अभावः । ततः प्रत्यवायानुपपत्ति[२]रित्यतः पूर्वोपचितदुरितेभ्यः प्राप्यमाणायाः प्रत्यवायक्रियाया[३] नित्याकरणं लक्षणम्[४] इति 'अकुर्वन् विहितं कर्म' (मनु. ११-४४, शां.रा. ३२-२)[५] इति हि शतुर्नानुपपत्तिः[६]। अन्यथा[७] अभावाद्भावोत्पत्तिरिति सर्वप्रमाण-

---

१. उक्तमेवेदं ब्रह्मात्मज्ञानादेव कामानां निवृत्तिरिति । तदेव हेतूकृत्य कर्मशेषसद्भाव इह साध्यते ।

२. द्रष्टव्यम् - गी.भा. ३-अव.; सू.भा. ३-४-२०, ४-३-१४, यत्र नित्यानामकरणे प्रत्यवायोत्पत्तिर्निराकृता ॥

३. पूर्वोपचितदुरितेभ्यः प्रत्यवैति दुःखं प्राप्नोति ; नित्यकर्मकरणेन च दुरितक्षयो भवतीत्युक्तं प्राक् ॥

४. यस्मादयं नित्यं कर्म नाकार्षीदतो दुरितक्षयो न भवतीति नूनं प्रत्यवैति इति नित्याकरणं प्रत्यवायस्य लक्षणं ज्ञापकमित्यभिप्रायः ॥

५. 'अकुर्वन् विहितं कर्म निन्दितं च समाचरन् । प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः' (मनु. ११-४४) इति, 'अकुर्वन् विहितं कर्म प्रतिषिद्धानि चाऽऽचरन् । प्रायश्चित्तीयते ह्येवं नरो मिथ्याऽनुवर्तयन् ॥' (रा.ध.३४-२) इति वा पूर्णः श्लोकः ॥

६. लक्षणमिति शतृप्रत्ययस्य नानुपपत्तिः 'अकुर्वन् विहितं कर्म इति' - इति पाठान्तरम्। 'लक्षणहेत्वोः क्रियायाः' (पा.सू. ३-२-१२६) इति शतृप्रत्ययस्य लक्षणेऽपि विधानादिति भावः ॥ ७. 'अन्यथा हि' वा ॥

व्याकोप[१] इति । अत अयत्नतः[२] स्वात्मन्यवस्थानम् इत्यनुपपन्नम् ॥

## आरभ्यस्य स्वर्गस्य न मोक्षत्वम् -

७. यच्चोक्तं निरतिशयप्रीतेः स्वर्गशब्दवाच्यायाः कर्मनिमित्तत्वात्, कर्मारभ्य[३] एव मोक्ष इति । तन्न । नित्यत्वान्मोक्षस्य । न हि नित्यं किञ्चिदारभ्यते[४]। लोके यदारब्धं तदनित्यम् इति । अतो न कर्मारभ्यो मोक्षः ॥

# विद्यासहितकर्मभ्योऽऽपि न मोक्षः

## मोक्षस्य भावरूपत्वादभावदृष्टान्तो न युक्तः -

८. विद्यासहितानां कर्मणां नित्यारम्भसामर्थ्यम् इति चेत् । न । विरोधात्। नित्यं च आरभ्यते[५] च इति विरुद्धम् । यद्विनष्टं[६] तदेव नोत्पद्यते इति प्रध्वंसाभाववत् नित्योऽपि मोक्ष आरभ्य एवेति चेत् । न । मोक्षस्य भावरूपत्वात् । प्रध्वंसाभावोऽपि आरभ्यत इति[७] अभावस्य विशेषाभावात् विकल्पमात्रमेतत् । भावप्रतियोगी[८] ह्यभावः यथा हि अभिन्नोऽपि, भावो घटपटादिभिर्विशेष्यते भिन्न इव[९] 'घटभावः', 'पटभावः'

---

१. ननु हेतावपि शतृप्रत्ययो विहित एव । तत्किमिति हेतुत्वं त्यज्यते ? - इत्याशङ्क्याह - अन्यथेति । असतः सत्त्वापत्तौ सतश्चासत्त्वापत्तौ सर्वत्र प्रमाणप्रमेयव्यवहारे अविश्वासः स्यादिति भावः । असत्कार्यवादः खण्डितः सूत्राभाष्ये २-२-२६, २७

२. ज्ञानार्थं प्रयत्नमकुर्वतामपि ॥

३. 'कर्मारब्ध' इत्यतो वरीयानयं पाठः ॥

४. नित्यमारभ्यत इति वादोऽनुपदमेव परीक्षिष्यते ॥

५. 'इति च' इति व्युत्क्रमपाठापेक्षया एष एवादृतो वरम् । वा ॥ पाठे तु चस्त्यक्तः । पूर्वपक्षोक्तौ प्रथमतृतीयपूर्वपक्षौ वितत्य परीक्षिष्येते वल्ल्युपसंहारभाष्ये ॥

६. 'यद्धि नष्टं' इति पा ॥

७. अतः परं 'न संभवति' इत्यधिकं वा ॥

८. भावप्रतिद्वन्द्वी, भावप्रतिसंबन्धी ॥

९. वरमेष वा ॥ पाठो न तु, 'अभिन्न एव' इति आ ॥

इति, एवं निर्विशेषोऽपि[1] अभावः क्रियागुणयोगात् द्रव्यादिवत् विकल्प्यते[2]। न हि अभाव उत्पलादिवत् विशेषणसहभावी । विशेषणवत्त्वे भाव एव स्यात् ॥

## कर्तृनित्यत्वादपि न मोक्षनित्यत्वम् -

९. विद्याकर्मकर्तु[3]र्नित्यत्वात्, विद्याकर्मसन्तानजनितमोक्षनित्यत्वम् इति चेत् । न । गङ्गास्रोतोवत्कर्तृत्वस्य दुःखरूपत्वात्[4]। कर्तृत्वोपरमे च मोक्षविच्छेदात्[5]॥

## अविद्यानिवृत्त्यर्थम् उपनिषदारम्भणीया -

१०. तस्मात्[6], कर्मोपादानहेतुनिवृत्तौ[7] स्वात्मन्यवस्थानं मोक्ष इति[8] । स्वयं[9] चाऽऽत्मा ब्रह्म । तद्विज्ञानात् अविद्यानिवृत्तिर्मोक्षः[10] इति ब्रह्मविद्यार्था उपनिषत् आरभ्यते ॥

---

१. 'निर्विशेषो भावाभावः' (आ॥) इत्यस्मादयमेव (वा॥) साधीयान् पाठः ॥

२. घटपटादीनां लौकिकपरमार्थसत्यत्वात् तैर्भावो विशेष्यत इति युक्तम् ॥ अभावः पुनर्विशेषरहितः सन् उत्पद्यते, विनश्यति, नित्यः, अनित्यः - इत्येवं क्रियाभिर्गुणैश्च सहभावीव यद्विभाव्यते, तद्विकल्पमात्रम् न तु वस्तुवृत्तेनापि विशेषणवानभाव इत्यर्थः॥ गी.भा. १८-४८, (एकस्याभावः) सू.भा. २-२-२६;

३. 'विद्याकर्मकर्तृनित्यत्वात्' इति आ।; गृहीतस्तु वा ॥

४. अत एव विश्रान्तिमिच्छति सर्वोऽपि, न सातत्येन कर्तृत्वम् ॥ सू.भा. २-३-४०.

५. अथ विश्रान्त्यर्थं कर्तृत्वोपरमोऽपीष्यते, ततो मोक्षोऽपि विच्छिद्येत । ततश्चानिष्टापत्तिर्मोक्षनित्यत्ववादिनामिति भावः ॥

६. यस्मात्कथञ्चिदपि मोक्षो ब्रह्मज्ञानव्यतिरिक्तसाधनान्न लभ्यः, तस्मादित्युपसंहारः ॥

७. कर्मोपादानहेतुः कामः । तद्धेतोरविद्याया निवृत्तौ तस्याप्यात्यन्तिकनिवृत्तौ सत्यां स्वात्मन्यवस्थानमित्यर्थः । 'अविद्याकामकर्मोपादान ...' इति त्वपपाठः ॥

८. इति प्रतिज्ञाभाष्ये सुष्ठूक्तमिति शेषः । इतेर्लेखकप्रमादादधिकावापः कृत इति वा बोध्यम्॥

९. ब्रह्मेति स्वयमात्मैव नान्य इति नाप्रसिद्धत्वाद्ब्रह्मणोऽजिज्ञास्यत्वशङ्कासमुन्मिषतीति भावः॥

१०. 'अविद्यानिवृत्तेर्मोक्षः' इति पाठो यद्यस्ति तर्हि स एव ग्राह्यः । 'अविद्यानिवृत्तिरित्यतः ब्रह्म ...' इति तु वा ॥

'उपनिषत्' इति विद्या[१] उच्यते । तच्छीलिनां गर्भजन्मजरादिनिशातनात् तदवसादनाद्वा । ब्रह्मणो वा उपनिगमयितृत्वात् । उपनिषण्णं वा अस्यां परं श्रेय इति[२]। तदर्थत्वात् ग्रन्थोऽपि उपनिषत्[३] ॥

१. प्रत्यगात्माभिन्नब्रह्मविद्या ॥

२. एवमुपनिषच्छब्दव्युत्पत्त्यापि ब्रह्मविद्याया मोक्षसाधनत्वमवगतम् इति भावः । उपनिषच्छब्दनिर्वचनं का.भा.; मुं. भा.; बृ.भा. - इत्येतद्भाष्यत्रयावतरणिकासु द्रष्टव्यम् ॥

३. इति गौण्या वृत्त्या व्यपदिश्यत इति शेषः । अत एव ब्रह्मविद्यार्था उपनिषदारभ्यन्त इत्युक्तमिति भावः ॥

॥ ॐ ॥

# तैत्तिरीयोपनिषदि

## शी क्षा व ल्ली

### १. शान्तिपाठः

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्मवदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥१॥

ओं शान्तिः शान्तिः शान्तिः

इति प्रथमानुवाकः

**देवताप्रार्थनम् -**

११. शं सुखं प्राणवृत्तेः अह्नश्च अभिमानी देवतात्मा मित्रो नः अस्माकं भवतु । तथैव अपानवृत्तेः रात्रेश्च अभिमानी देवतात्मा वरुणः । चक्षुषि आदित्ये च अभिमानी अर्यमा । बले इन्द्रः । वाचि बुद्धौ च बृहस्पतिः । विष्णुः उरुक्रमः विस्तीर्णक्रमः । पादयोरभिमानी । एवम् अध्यात्मदेवताः[१] । शं नः । भवतु इति

---

१. 'एवमाद्या अध्यात्मदेवताः' वा ॥; अधिदैवताभिमानिन्य एव देवता चक्षुरादि-करणाधिष्ठात्र्योऽध्यात्मदेवता इति व्यपदिश्यन्ते । सू. भा. २-४-१४, बृ.भा. ४-४-१, २

सर्वत्र अनुषङ्गः । तासु हि सुखकृत्सु विद्या श्रवणधारणोपयोगा[१] अप्रतिबन्धेन भविष्यन्ति इति तत्सुखकृत्वं[२] प्रर्थ्यते 'शं नो भवतु' इति ॥

**अपरब्रह्मस्तुतिः -**

१२. ब्रह्मविविदिषुणा[३] नमस्कारब्रह्मवदनक्रिये[४] वायुविषये ब्रह्मविद्योपसर्गशान्त्यर्थं[५] क्रियेते । सर्वक्रियाफलानां तदधीनत्वात्[६] ब्रह्म वायुः । तस्मै ब्रह्मणे नमः प्रह्वीभावं 'करोमि' इति वाक्यशेषः । नमः ते तुभ्यं हे वायो, नमस्करोमि इति परोक्षप्रत्यक्षाभ्यां[७] वायुरेवाभिधीयते । किञ्च, त्वमेव चक्षुराद्यपेक्ष्य बाह्यं संनिकृष्टम्

---

१. श्रवणं यथातत्त्वं निश्चयपर्यन्तं ग्रहणम्, धारणमविस्मृतिः, उपयोगश्च स्वशिष्येशु स्थापनेन विनियोगो विद्यायाः ॥

२. अयं वा ॥ पाठः । 'सुखकर्तृत्वम्' इति तु आ ॥; तत्तत्करणस्य, अवैकल्येन श्रवणादियोग्यतापादनमेवात्र देवतानां सुखकर्तृत्वं विवक्षितम् ॥

३. 'ब्रह्मविद्याविविदिषुणा' इति (वा॥) पाठे अपरब्रह्मविद्यास्वरूपं विविदिषुणा इत्यर्थः। यथागृहीत (आ॥) पाठे तु ब्रह्मस्वरूपं विविदिषुणा उपासकेन इत्यध्याहार्य योजनीयम् ॥

४. 'ब्रह्मवन्दनक्रिये' इति त्वपपाठः । 'नमस्कारोक्तिकर्मणी' इति वार्तिके (तै.वा. १-४२) वदनक्रियाया एव परामर्शदर्शनात् ॥

५. विद्याप्राप्तिविघ्नपरिहारार्थम् । 'शान्त्यर्थे' इति वा ॥ पाठः ॥

६. वायुर्ब्रह्म, बृहत्तममित्युच्यते । तत्केनार्थयोगेनेत्याकाङ्क्षायामाह 'सर्वक्रियाफलानाम्' इति । वायोः सूत्रात्मनो (बृ. भा. ३-७-२) ज्ञानक्रियाशक्तिभ्यामधिष्ठितत्वात् सर्वक्रियाफलानां तदधीनत्वम् । एवं च सर्वकर्मकर्तॄणां तत्तत्क्रियानिर्वर्तनसामर्थ्याधानद्वारेण तत्तत्फलेन संयोजयितृत्वमेव ब्रह्मत्वं वायोरित्युक्तं भवति॥

७. 'नमो ब्रह्मणे' इति परोक्षाभिधानं कृतम् ; 'नमस्ते वायो' इति प्रत्यक्षाभिधातृयुष्मच्छब्दप्रयोगेणापि स एवाभिधीयते इत्यर्थः ॥

अव्यवहितं प्रत्यक्षं[१] ब्रह्म असि यस्मात्, तस्मात् त्वामेव[२] प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं यथाशास्त्रं यथा कर्तव्यं सुपरिनिश्चितमर्थं[३] त्वदधीनत्वात् त्वामेव वदिष्यामि। सत्यमिति स एव वाक्कायाभ्यां संपाद्यमानः[४] । सोऽपि त्वदधीन एव संपाद्य[५] इति त्वामेव सत्यं वदिष्यामि । तत् सर्वात्मकं[६] वाय्वाख्यं ब्रह्म मया एवं स्तुतं सत् मां विद्यार्थिनम्[७] अवतु विद्यासंयोजनेन । तदेव ब्रह्म वक्तारम् आचार्यं[८] वक्तृत्वसामर्थ्यसंयोजनेन । 'अवतु माम्,' 'अवतु वक्तारम्' इति पुनर्वचनम् आदरार्थम् ॥

## शान्त्यभिधानत्रयस्य प्रयोजनम् -

१३. 'ॐ शान्तिः शान्तिः शान्तिः' इति त्रिर्वचनम्

---

१. प्राणद्वारेण हि देहेन्द्रियाण्यप्यात्मीयतया विज्ञायन्ते । अतः प्राणात्मना स्थितो वायुर्बाह्यचक्षुराद्यपेक्षया अव्यवहितप्रत्यक्षः ॥

२. शान्तिपाठे यद्यपि 'त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि' इत्येव वैदिकपाठः, तथाप्यत्र भाष्ये सायणभाष्ये च 'त्वामेव' इत्येव धृतः । अन्तिमशान्तौ तु 'त्वामेव' इत्येवोपलभ्यते । तदनुरोधेन किमत्रापि 'त्वामेव' इति प्राचीनपाठ आसीदित्येतत्तु विचारणीयं विद्वद्भिः ॥

३. 'अर्थम्' इत्यस्यानन्तरं 'तदपि' इत्यधिकम् आ॥; शास्त्रार्थनिर्धारणानुष्ठानरूपे ऋतसत्ये अपि ज्ञानक्रियाशक्त्यधिष्ठितवाय्वधीने एवेति वायुं तदभिन्नतया स्तौति॥

४. निर्वर्त्यमानोऽर्थः ॥ ५. 'संपाद्यते' वा ॥

६. वायुः सर्वप्राणभृत्क्रियात्मकः, ई. ४-१७; का. भा. २-१-६; सर्वदेवतात्मकः, बृ.भा. ३-९-९; सर्वविधारकश्च बृ.भा. ३-७-२.

७. अपरब्रह्मविद्यां प्रार्थयमानम् । उपासनास्वरूपज्ञानतत्फलकाङ्क्षिणम् इति यावत्॥

८. 'आचार्यं च' इति वा ॥ पाठे चोऽधिकः ॥

आध्यात्मिकाधिभौतिकाधिदैविकानाम्[१] विद्याप्रप्त्युपसर्गाणां प्रशमार्थम्[२] ॥१॥

(इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पादपूज्यपादशिष्य श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषच्छीक्षाध्यायभाष्ये प्रथमोऽनुवाकः ॥)[३]

## २. शीक्षाध्यायः

**शीक्षां व्याख्यास्यामः । वर्णः स्वरः । मात्रा बलम् । साम सन्तानः । इत्युक्तः शीक्षाध्यायः ॥२॥**

१४. अर्थज्ञानप्रधानत्वात्[४] उपनिषदः, ग्रन्थपाठे यत्नोपरमो मा भूत् इति[५] शीक्षाध्याय आरभ्यते -

शीक्षा शिक्ष्यते अनया इति वर्णाद्युच्चारणलक्षणम् । शिक्ष्यन्त इति शिक्षाः वर्णादयः[६] । शिक्षैव शीक्षा । दैर्घ्यम् छान्दसम् । तां शीक्षां व्याख्यास्यामः । विस्पष्टम् आ समन्तात् प्रकथयिष्यामः । चक्षिङो वा[७] ख्याञादिष्टस्य व्याङ्पूर्वस्य

---

१. आध्यात्मिका उपसर्गाः शरीरगतरोगादिनिमित्ताः, आधिभौतिका व्याघ्रचोरादिनिमित्ताः, आधिदैविका अतिवृष्ट्यशन्यादिनिमित्ताः ॥

२. सर्वे ह्याध्यात्मिकादिविघ्नाः सर्वात्मकब्रह्मस्तुत्यादिना प्रशमं यान्ति । शान्त्यां हि सत्यां ब्रह्म ज्ञापयितुं ज्ञातुं च शक्यत इति तदर्थं त्रिः शान्तिरुच्यत इति भावः ॥

३. एवं सर्वत्रानुवाकपरिसमाप्तिपुष्पिका आनन्दाश्रममुद्रितपुस्तके दृश्यते । 'इति प्रथमानुवाकभाष्यम्' इत्येतावदेव तु वाणीविलासमुद्रणालयप्रकटिते । अत्र तु पुस्तके समनन्तरानुवाकसङ्ख्ययैव सर्वत्र समाप्तिर्बोध्या ॥

४. अर्थज्ञानप्रधाना वेदान्ताः न पुनर्मन्त्रवदुच्चारणप्रधानाः ॥

५. विवक्षितार्थसिद्ध्यर्थं सम्यग् ग्रन्थोच्चारणेऽपि यत्नः कार्य एवेति ॥

६. शिक्ष्यतेऽनया इति करणव्युत्पत्तौ लक्षणं गम्यते । शिक्ष्यन्ते इति कर्मव्युत्पत्तौ तु वर्णादय अनुपदमेव वक्ष्यमाणा गम्यन्ते । अत्र वर्णादिपूग एव शिक्षेत्याचार्याभिप्रायो गम्यते। 'शिक्षा यस्मिन्नध्याये' इत्युत्तरत्र दर्शनात् ॥

७. 'वा' इति नास्ति वा ॥

व्यक्तवाक्कर्मण एतद्रूपम्[1]। तत्र वर्णः अकारादिः । स्वरः उदात्तादिः[2]। मात्रा ह्रस्वाद्याः[3]। बलं प्रयत्नविशेषः[4]। साम वर्णानां मध्यमवृत्त्या[5] उच्चारणम्, समता । सन्तानः सन्ततिः। संहिता इत्यर्थः । एष हि[6] शिक्षितव्योऽर्थः[7]। शिक्षा यस्मिन् अध्याये सोऽयं शीक्षाध्यायः इति एवम् उदितः - इत्युपसंहार उत्तरार्धः[8]॥२॥

## ३. संहितोपासना

**सह नौ यशः । सह नौ ब्रह्मवर्चसम् । अथातः सँहिताया उपनिषदं व्याख्यास्यामः । पञ्चस्वधिकरणेषु । अधिलोकमधिज्योतिष-मधिविद्यमधिप्रजमध्यात्मम् । ता महासंहिता इत्याचक्षते । अथाधिलोकम् । पृथिवी पूर्वरूपम् । द्यौरुत्तररूपम् । आकाशः संधिः ।**

---

१. ख्या - प्रकथने - इत्यस्य धातोः सार्वधातुकमात्रविषयत्वमिति एतद्व्याख्यानेऽरुचेः स्यात् पक्षान्तरादानं 'चक्षिङो वा' इति । चक्षिङः ख्याञ् (पा. २-४-५४) इति हि ख्याञादिष्टः सः । अतश्चक्षिञ् व्यक्तायां वाचीत्यस्यैवैतद्रूपमित्यर्थः ॥

२. उदात्तानुदात्तस्वरिताः ॥ ३. ह्रस्वदीर्घप्लुताः ॥

४. बाह्याभ्यन्तरभेदभिन्नः संवृतादिविशेषप्रकारः प्रयत्नविशेषः ॥

५. अतिद्रुतातिविलम्बितत्वपरिहारपूर्वकम् ॥

६. 'एवं शिक्षितव्यो' इति (वा॥) पाठतो वरीयानयम् ॥

७. यद्यपि शीक्षादिशब्दानाम् एकश्रुत्या अधीयमानत्वात् व्याकरणोक्त-प्रकृतिप्रत्ययादिप्रयुक्तः स्वरो नोपलभ्यते, तथापि संप्रदायप्रसिद्धः स्वरस्तथैवाभ्यसनीयः, तेन चादृष्टं फलं भविष्यति, शीक्षाध्यायविहितत्वात् स्वरादीनाम् - इति सायणभाष्ये ॥

८. शीक्षाध्यायमुपसंहृत्य, अथ तदन्तर्गतसंहिताविषयोपासना प्रारप्स्यत इति सूचनार्थ इत्यर्थः । 'उक्त इत्युपसंहारार्थः, इत्येतावानेव तु वा ॥

**वायुः संधानम्। इत्यधिलोकम् । अथाधि-ज्यौतिषम् । अग्निः पूर्वरूपम् । आदित्य उत्तररूपम् । आपः संधिः । वैद्युतः संधानम् । इत्यधिज्यौतिषम्। अथाधिविद्यम्। आचार्यः पूर्वरूपम् । अन्तेवास्युत्तररूपम् । विद्या संधिः। प्रवचनँ संधानम् । इत्यधिविद्यम्। अथाधिप्रजम् । माता पूर्वरूपम्। पितोत्तररूपम्। प्रजा संधिः । प्रजननँ संधानम्। इत्यधिप्रजम् । अथाध्यात्मम् । अधरा हनुः पूर्वरूपम्। उत्तराहनुरुत्तररूपम् । वाक्संधिः । जिह्वा संधानम् । इत्यध्यात्मम् । इतीमा महासँहिताः। य एवमेता महासँहिता व्याख्याता वेद । संधीयते प्रजया पशुभिः । ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण[१] लोकेन ॥३॥**

**उपासनाफलाशीर्वचनम् -**

१५. अधुना संहितोपनिषत्[२] उच्यते । तत्र संहिताद्युपनिषत्परिज्ञाननिमित्तं[३]

---

१. 'सुवर्ग्येण', 'सुवर्गेण' इति द्वेधापि पाठोऽस्ति । कतरो युक्ततर इत्यत्र वैदिका एव शरणम् । भाष्ये त्वत्र किमपि नोक्तम् ॥

२. संहिताविषयमुपासनम् ॥

३. अन्नादिशब्देनोपासनान्तराण्यपि ग्रहीतव्यानीति भाति । वार्तिकेऽपि 'संहितादिनिमित्तम्' (तै.वा. ३-५५) इत्येव दृश्यते ॥

यद् यशः प्रार्थ्यते[1] तत् नौ आवयोः शिष्याचार्ययोः सहैव अस्तु । तन्निमित्तं च यद् ब्रह्मवर्चसं तेजः[2] तच्च सहैव अस्तु - इति शिष्यवचनम् आशीः । शिष्यस्य हि अकृतार्थत्वात् प्रार्थना उपपद्यते, नाऽऽचार्यस्य । कृतार्थत्वात् । कृतार्थो हि आचार्यो नाम भवति ॥

**संहितोपासनाप्रकाराः -**

१६. अथ अनन्तरम् अध्ययनलक्षणविधानस्य[3] । (अतः) यतोऽत्यर्थं ग्रन्थभाविता बुद्धिर्न शक्यते सहसा अर्थज्ञानविषये अवतारयितुम्[4] इत्यतः । संहितायाः उपनिषदं संहिताविषयं दर्शनम्[5] इत्येतत् । ग्रन्थसंनिकृष्टामेव[6] व्याख्यास्यामः। पञ्चसु अधिकरणेषु आश्रयेषु । ज्ञानविषयेषु इत्यर्थः । कानि तानीति? आह । अधिलोकम् लोकेष्वधि यद्दर्शनम्[7] तत् अधिलोकम् । तथा अधिज्यौतिषम्, अधिविद्यम्, अधिप्रजम्, अध्यात्मम् इति । ता एताः पञ्चविषयाः उपनिषदः लोकादिमहावस्तुविषयत्वात् संहिताविषयत्वाच्च, महत्यश्च ताः संहिताश्च महासंहिता[8] इति आचक्षते कथयन्ति वेदविदः ॥

---

१. 'प्राप्यते' इति वा ॥

२. शमदमज्ञानादिनिमित्तं तेजः । उत्तरत्र (३-६) तथा भाष्ये व्याख्यानात् ॥

३. 'पूर्ववृत्तस्य' इत्यधिकं वा ॥; अध्ययनलक्षणं ग्रन्थपाठेऽनुसर्तव्यः प्रकारविशेषः। तद्विधानं पूर्ववृत्तम् । तदनन्तरमिदं विधीयते इत्यर्थः ॥

४. शब्दप्रवणचित्तानामर्थज्ञाने तदपेक्षया सूक्ष्मे बुद्धिप्रवेशः सहसा न भवतीत्यर्थः । एतेन, अथशब्दस्य शीक्षाव्याख्यानानन्तर्यमर्थः, अतःशब्दस्य संहितोपासनाप्रारम्भे हेतुभूतः सुखेन बुद्धिप्रवेशोऽर्थ इत्युक्तं भवति ॥

५. उपासनम् ॥

६. वर्णादिविषयत्वात् ॥

७. लोकानधिकृत्य, लोकदृष्ट्या, यदुपासनम् ॥

८. महावस्तुदृष्ट्या करणीयाः संहिताविषयोपासना इति महासंहिता इत्युच्यन्त इत्यर्थः ॥

**उपासनाक्रमः -**

१७. अथ तासां यथोपन्यस्तानाम्[१] अधिलोकं दर्शनम् उच्यते । दर्शनक्रमविवक्षार्थोऽथशब्दः[२] सर्वत्र । पृथिवी पूर्वरूपम् । पूर्वो वर्णः पूर्वरूपम् । संहितायाः पूर्वे वर्णे[३] पृथिवीदृष्टिः कर्तव्या इत्युक्तं भवति । तथा द्यौः उत्तररूपम्[४] । आकाशः अन्तरिक्षलोकः सन्धिः, मध्यं पूर्वोत्तररूपयोः । सन्धीयेते अस्मिन् पूर्वोत्तररूपे इति[५] । वायुः सन्धानम् । सन्धीयते अनेन इति सन्धानम्[६] । इति अधिलोकं दर्शनम् उक्तम् । अथाधिज्यौतिषम् इत्यादि समानम्[७] । इतीमा इति उक्ता उपप्रदर्श्यन्ते[८] ॥

**संहितोपासनाफलम् -**

१८. यः कश्चित् एवम्[९] एताः महासंहिताः व्याख्याताः वेद उपास्ते ।

---

१. उपन्यस्तानाम् इत्यनन्तरं 'मध्ये' इत्यधिकं वा ॥

२. अधिलोकदर्शनं तावत् कर्तव्यम् । तदनन्तरम् अधिज्यौतिषम् इत्येवं क्रमेण उपासनानि कर्तव्यानीति विवक्षार्थः ॥

३. तद्यथा इषेत्वोर्जेत्वा इत्यत्र 'इषे त्वा ऊर्जे त्वा' इति संहितायाः पूर्वं स्थिते, पूर्वे वर्णे आकरे पृथिवीदृष्टिः कर्तव्या ॥

४. उत्तरे वर्णे ऊकाररूपे द्युलोकदृष्टिः कर्तव्येत्यर्थः । शालिग्रामे इव विष्णुदृष्टिः । एवंविधानि प्रतीकोपासनानीति व्यपदिश्यन्ते । सू.भा. ४-१-४.

५. त्वा ऊ इत्येतयोर्मध्यम् आकाशत्वेन चिन्तयेत् ॥

६. ओकारेण हि सन्धीयते इति सन्धानशब्दवाच्यः सः । सायणभाष्ये तु 'इषे त्वा' इत्यत्र एकारः पृथ्वी, तकारो द्युलोकः, तयोर्मध्य आकाशः, तस्मिन् देशे संहितानिमित्तो द्विर्भावेनापादितोऽन्यस्तकारो वायुरित्युपदिष्टम् ॥

७. यथोक्तमार्गेणैव व्याख्येयम् ॥

८. 'इतीमा महासंहिताः' इति वाक्येन यथोपवर्णिताः पञ्चोपनिषदः परामृश्यन्ते । विध्युपसंहारार्थम्, उत्तरवाक्येन फलसंकीर्तनार्थं चेति शेषः ॥

९. यथाविहितप्रकारेण ॥

'वेद' इति उपासनं[१] स्यात् । विज्ञानाधिकारात्[२]। 'इति प्राचीनयोग्योपास्स्व' (१-६) इति च वचनात्[३] । **उपासनं च यथाशास्त्रं तुल्यप्रत्ययसन्ततिः[४], असङ्कीर्णा च अतत्प्रत्ययैः[५], शास्त्रोक्तालम्बनविषया च[६] ।** प्रसिद्धश्चोपासनशब्दार्थो लोके 'गुरुम् उपास्ते,' 'राजानम् उपास्ते' इति यो हि गुर्वादीन्[७] सन्ततम् उपचरति स उपास्ते इत्युच्यते । स च[८] फलम् आप्नोति उपासनस्य । अतोऽत्रापि य एवं वेद[९] सन्धीयते प्रजादिभिः स्वर्गान्तैः । प्रजादि फलान्याप्नोति[१०] इत्यर्थः ॥

## ४. विविधा जपहोममन्त्राः

**यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्य-मृतात्संबभूव । स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम् । शरीरं मे**

---

१. न तु वस्तुतन्त्रं ज्ञानम् ॥

२. उपासनप्रकरणत्वादस्येत्यर्थः । अस्यां हि वल्ल्याम् उपासनमेव ध्यानापराभिधानं प्रपश्च्यते, न तु ज्ञानम् । विद्युपास्त्योश्च वेदान्तेष्वव्यतिरेकेण प्रयोगो दृश्यते ॥ सू.भा. ४-१-१; बृ.भा. १-४-७ (वेदोपासनशब्दयोरेकार्थता)

३. न केवलं प्रकरणात्, किन्तु 'उपास्स्व' इति कण्ठरवेणोक्तत्वाच्च वेदनमत्रोपासनमेव॥

४. समानप्रत्ययप्रवाहीकरणम् ॥

५. विजातीयप्रत्ययैरमिश्रिता । तद्यथा-अधिलोकसंहितोपासने प्रस्तुते उपासनान्तरं लौकिकविषयप्रत्ययं वा नाभ्यन्तरीकुर्यात् । एवमेवोपासनान्तरेऽपि बोध्यम् ॥

६. सर्वत्र हि शास्त्रविहितमेवोपास्यं नाशास्त्रोक्तं विद्यमानमपि । छां.भा. २-२-१; अविद्यमानं स्वयमेव चिन्तयति चेत् विपरीतप्रत्ययत्वात् ततोऽनर्थप्राप्तिरेव स्यात्। बृ.भा. १-३-१; द्रष्टव्यमुपासनशब्दनिर्वचनं प्र.भा. ५-१; छा.भा. अव.; गी.भा. १२-३.

७. अत्र यद्यपि द्वे एव उदाहरणे, तथापीदृशस्थलेषु ध्यानोपासनशब्दौ एवमर्थकावेव प्रयुज्येते इत्युपलक्षणार्थमुदाहरणमिति बहुवचनेन द्योतयति । द्रष्टव्ये बृ. १-५-२, वे. से. ४-१-१- भाष्ये ॥

८. य एवं सततध्यायी इत्यर्थः ॥ ९. निरन्तरमुपास्ते ॥

१०. 'प्रजादिफलं प्राप्नोति, इति वा ॥ अत्र प्रजादीनि दृष्टफलानि, स्वर्गोऽदृष्टं फलम् ॥

विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे गोपाय ॥ अवाहन्ती वितन्वाना । कुर्वाणा चीरमात्मनः । वासाँसि मम गावश्च । अन्नपाने च सर्वदा । ततो मे श्रियमावह । लोमशां पशुभिः सह स्वाहा । आ मा यन्तु ब्रह्मचारिणः स्वाहा। वि मायन्तु ब्रह्मचारिणः स्वाहा । प्रमायन्तु ब्रह्मचारिणः स्वाहा । दमायन्तु ब्रह्मचारिणः स्वाहा । शमायन्तु ब्रह्मचारिणः स्वाहा । यशो जनेऽसानि स्वाहा। श्रेयात् वस्यसोऽसानि स्वाहा । तं त्वा भग प्रविशानि स्वाहा । स मा भग प्रविश स्वाहा । तस्मिन् सहस्रशाखे । नि भगाहं त्वयि मृजे स्वाहा । यथापः प्रवता यन्ति। यथा मासा अहर्जरम् । एवं मां ब्रह्मचारिणः । धातरायन्तु सर्वतः स्वाहा । प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्य ॥४॥

## उत्तरग्रन्थसंबन्धः

१९. 'यश्छन्दसाम्' इति मेधाकामस्य श्रीकामस्य च[१] तत्प्राप्तिसाधनं

---

१. उपलक्षणमेतत्, आरोग्यादिकामस्येत्यपि द्रष्टव्यम् । तत्प्रार्थनाया अप्यत्र दर्शनात्। अथवा तस्या मेधार्थत्वादेवमुच्यते ॥

जपहोमौ उच्यते । 'स मेन्द्रो मेधया स्पृणोतु', 'ततो मे श्रियमावह' इति च लिङ्गदर्शनात् ॥

## मेधाप्रार्थना -

२०. यः छन्दसां वेदानाम् ऋषभ इव ऋषभः । प्राधान्यात् । विश्वरूपः सर्वरूपः । सर्ववाग्व्याप्तेः । 'तद्यथा शङ्कुना' (छा. २-२३-३) इत्यादिश्रुत्यन्तरात्[१]। अत एव ऋषभत्वम् ओंकारस्य । ओंकारो हि अत्र उपास्यः इति ऋषभादिशब्दैः स्तुतिर्न्याय्यैव[२] ओंकारस्य । छन्दोभ्यः वेदेभ्यः । (अमृतात्)[३] वेदा हि अमृतम् । तस्मात् अमृतात् अधिसंबभूव । लोक (देव) वेदव्याहृतिभ्यः सारिष्ठं जिघृक्षोः प्रजापतेस्तपस्यत ओंकारः सारिष्ठत्वेन प्रत्यभात्[४] - इत्यर्थः । न हि नित्यस्य[५] ओंकारस्य अञ्जसैव[६] उत्पत्तिः अवकल्पते[७] । स एवंभूत ओंकारः इन्द्रः सर्वकामेशः[८]

---

१. अत्र पूर्णमेव श्रुतिवाक्यमुदाहृतं वा ॥; यथा शङ्कुना पर्णनालेन सर्वाणि पर्णानि तदवयवजातानि व्याप्तानि, एवमोंकारेण सर्वा वाक् व्याप्ता । ओंकारव्यतिरिक्तशब्दाभिधेयविकाराणामनृतत्वादोंकारस्यैव सर्ववाचकत्वेन पर्यवसानात्-इति श्रुतेरर्थः ॥

२. उपास्यत्वेन विहितस्य स्तवने हि तदुपासनायां प्रवर्तेरन् अधिकारिणः ॥

३. इदं पदं न दृश्यते मुद्रितपुस्तकेषु; अपेक्षितं तु ॥

४. देवपदं सर्वत्र मुद्रितपुस्तकेषु स्थितमप्यधिकं भाति । लोकसारत्वेन त्रयीविद्या तत्सारत्वेन भूरादिव्याहृतयः, तत्सारत्वेन चोंकारः प्रत्यभादिति हि छान्दोग्ये (२-२३-२) उक्तम् ॥

५. वेदस्यामृतत्वात्, तत्सारस्योङ्कारस्यापि तथात्वमिति भावः ॥

६. मुख्यवृत्त्यैव ॥

७. ओंकारस्य परमेश्वरवाचकत्वेन तेन नित्यसंबद्धत्वात् तस्य मुख्यवृत्त्यैवोत्पत्तिर्नोपपद्यते । तस्मात् 'संबभूव' इति प्रजापतेरेवं प्रत्यभात् इति व्याख्यातमित्यभिप्रायः ॥

८. 'एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्' (का. १-२-१६) इति श्रुत्यन्तरात्॥

परमेश्वरः[१] मा मां मेधया प्रज्ञाया स्पृणोतु प्रीणयतु बलयतु वा[२]। प्रज्ञाबलं[३] हि प्रार्थ्यते। अमृतस्य अमृतत्वहेतुभूतस्य ब्रह्मज्ञानस्य[४] तदधिकारात्[५]। हे देव, धारणः धारयिता भूयासं भवेयम् ॥

## कार्यकरणयोग्यताप्रार्थनम् ॥

२१. किञ्च, शरीरं मे मम विचर्षणं विचक्षणम् योग्यम् इत्येतत्। 'भूयात्' इति प्रथमपुरुषविपरिणामः[६]। जिह्वा मे मम मधुमत्तमा मधुमती। अतिशयेन मधुरभाषिणी इत्यर्थः। कर्णाभ्यां श्रोत्राभ्यां भूरि बहु विश्रुवं व्यश्रवं (?)। श्रोता भूयासम् इत्यर्थः। आत्मज्ञानयोग्यः कार्यकरणसंघातोऽस्तु[७] इति वाक्यार्थः[८]। मेधा च तदर्थमेव हि प्रार्थ्यते[९]॥

## ज्ञानार्थं प्रार्थना -

२२. ब्रह्मणः परमात्मनः कोशः असि। असेरिव। उपलब्ध्यधिष्ठा-

---

१. परमेश्वरप्रतीकत्वात् तदभेदेन 'इन्द्रः' इत्युच्यते इति भावः ॥

२. स्पृ प्रीतिपालनयोरित्यस्माद्धतोरेवमर्थता हि अवगम्यते। पालयतु वा इत्येव मूले भाष्यकारैर्लिखितमेवं परिवर्तितं स्यादिति उन्नेतुं न शक्यते। 'पाङ्क्तं स्पृणोति' बलयति (१-७) स्पृणुते प्रीणयति बलयति वा (२-९) - इति सर्वत्र बलयतीत्येव दर्शनात्। पालनमेवाश्रित्य बलयतीतिलिखितं वा इत्येतत्तु वैयाकरणैरेव निर्धारणीयम् ॥

३. न केवलं धारणाक्षममेधाबलम्।

४. कार्यभूतममृतत्वम्। तद्वाचकेन शब्देन कारणभूतं ज्ञानं लक्ष्यते इत्यभिप्रायः ॥

५. कृत्स्नाया उपनिषदः ब्रह्मज्ञानप्रकरणत्वात्।

६. 'भूयासम्' इत्यस्योत्तमपुरुषस्य 'शरीरम्' इत्यनेनान्वयार्थं प्रथमपुरुषत्वेन विपरिणामः कर्तव्यः इति भावः ॥

७. 'कार्यकारण' इति आ ॥

८. जिह्वाकर्णग्रहणमुपलक्षणं करणान्तराणामिति भावः ॥

९. न मेधार्थमेव। विशेषकामसिद्ध्यर्थमनुष्ठेयानां काम्यकर्मणां कर्मकाण्डे एव विहितत्वात्, ज्ञानकाण्डेऽस्मिन् ज्ञानार्थमेव मेधादिप्रार्थना क्रियत इत्यवगम्यते ॥

नत्वात्[1]। त्वं हि ब्रह्मणः प्रतीकम् । त्वयि ब्रह्म उपलभ्यते । मेधया लौकिकप्रज्ञया पिहितः आच्छादितः । स त्वं सामान्यप्रज्ञै[2] रविदिततत्व इत्यर्थः । श्रुतं श्रवणपूर्वकम् आत्मज्ञानादिकं[3] मे गोपाय रक्ष । तत्प्राप्त्यविस्मरणादिकं[4] कुरु इत्यर्थः । जपार्था एते मन्त्रा मेधाकामस्य ॥

## श्रीकामस्य होमार्थमन्त्राः -

२३. होमार्थस्तु अधुना श्रीकामस्य मन्त्रा[5] उच्यन्ते । आवहन्ती आनयन्ती। वितन्वाना विस्तारयन्ती । तनोतेस्तत्कर्मत्वात्[6]। कुर्वाणा निर्वर्तयन्ती आचीरं अचिरं क्षिप्रमेव । छान्दसो दीर्घः । चिरं वा[7] कुर्वाणा । आत्मनः मम । किमिति ? आह । वासांसि वस्त्राणि मम गावश्च । गाश्च[8] इति यावत् । अन्नपाने च सर्वदा । एवमादीनि कुर्वाणा श्रीर्या तां ततः मेधानिर्वर्तनात् परम् आवह आनय । अमेधसो हि श्रीः अनर्थायैव इति[9] । किंविशिष्टाम्[10] ? लोमशाम् अजाव्यादियुक्ताम्, अन्यैश्च पशुभिः

---

१. एषणात्रयोत्थितास्त्वय्येव परमात्मानं पश्यन्तीत्यर्थः । परमात्मनोऽभिधानत्वात्, प्रतीकत्वाच्चेति वार्तिके (१-७५) । भाष्यमते तु प्रतीकत्वेनैव ग्राह्य ओंकार इति विवक्षितमिति समनन्तरोत्तरवाक्याद्गम्यते ॥

२. लौकिकप्रज्ञा बाह्यविषयाभिनिवेशः । अशास्त्रप्रज्ञैर्यस्मादमृतत्वप्राप्तिसाधनत्वेन न ज्ञातः, अत एव त्वं नोपासते ते, इत्यर्थः ॥

३. ज्ञानोपायोऽत्रादिशब्देन ग्राह्यः । 'आत्मज्ञानादिकं विज्ञानम्' वा ।; 'आत्मविज्ञानम्' इत्येतावदेव तु क्वचित्पाठः । येन रागद्वेषादिभ्यो रक्षितेन श्रुतेन त्वत्सायुज्यमेव प्राप्नुयाम् इत्यभिप्रायः ॥

४. आदिशब्देन शिष्येषु विनियोगो गृह्यते ॥

५. 'श्रीकामस्य होमार्थास्तु अधुना उच्यन्ते मन्त्राः' इति वा ॥

६. विस्तारार्थकत्वात् ॥

७. 'कुर्वाणा चीरम्' इति च्छेदे इदं व्याख्यानम् । चिरकालं यावदित्यर्थः ॥

८. 'गावश्च' इति प्रथमायाः द्वितीयात्वेन विपरिणामः, कर्तव्य इति भावः ॥

९. इति हेतोः शास्त्रज्ञाननिर्वर्तनादनन्तरमेव श्रियमावहेति प्रार्थ्यत इत्यर्थः ॥

१०. 'किंविशिष्टां च श्रियम्', 'किंविशिष्टां च' इति च पाठान्तरे ॥

सह युक्ताम्[१] । आवह इति अधिकारात् ओंकार एव अभिसंबध्यते[२]। स्वाहा ! स्वाहाकारो होमार्थमन्त्रान्तज्ञापनार्थः ॥

**शिष्यागमनाद्यर्थं मन्त्राः -**

२४. (अमायन्त्विति ।)[३] आयन्तु माम् इति व्यवहितेन संबन्धः । ब्रह्मचारिणो वि माऽऽयन्तु (?) प्र मायन्तु दमायन्तु शमायन्तु इत्यादि[४] । यशो यशस्वी जने जनसमूहे[५] असानि भवानि[६]। श्रेयान् प्रशस्यतरः वस्यसः वसीयसः[७] वसुतरात् वसुमत्तराद्वा[८] । असानि इत्यन्वयः[९] ॥

---

१. 'पशुभिः संयुक्ताम्' इति आ ॥ अत्र गृहीतस्तु वा ॥ 'दैवेन मानुषेणैव वित्तेनाऽऽमुत्रिकैहिकम् । कर्म कर्तुमलं यस्मात् प्रार्थ्यते तेन तद्द्वयम् ॥ (१-८१) इति वार्तिकम् । तत्र दैवं वित्तं मेधा, मानुषं तु पश्वादियुक्ता श्रीः ॥

२. ओंकार एव हि उपास्यत्वेन प्रकृतः । अतः स एव श्रियमावह इति प्रार्थ्यते ॥

३. कोष्टकस्थः, 'आमायन्त्विति' इति क्वाचित्कः पाठो गृहीतः वा ॥

४. अत्र 'विमायन्तु' इत्यादयो मन्त्राः शाखान्तरगतत्वाभिप्रायेण केषुचिद्देशेषु नाऽऽम्नायन्ते इति सायणः । वार्तिके तु आ मा यन्तु प्र मा यन्तु इत्येतौ व्याख्यातौ दृश्येते । 'संभूय कोटिशश्चैव मामेवायन्तु सत्वराः' इति श्लोकार्धे को मन्त्रो व्याख्यात इति तु दुर्निर्धारणम् ॥ भाष्यस्थेन 'इत्यादि' इत्यनेन किमभिप्रेतमिति नावगम्यते। दमायन्तु इति वाक्यद्वयं नैव व्याख्यातमित्यतो भाष्यकारैः स्वीकृतं वा न वेति विचारणीयमेतद्विमर्शकैर्विद्वद्भिः ॥

५. यशो जने यशस्विजनेषु इति वा ॥

६. बहुब्रह्मचार्यागमनप्रयोजनमिदं यद्यशआदि ॥

७. वस्यस इतीदं वसीयसः इत्यस्य छान्दसं रूपम् । ईकारलोपश्छान्दसः ॥

८. वसुतरात् अतिशयेन वसोः, वसनशीलस्येत्यर्थः । वासगृहादिमत इति यावत् । अथवा वसुरिति वसुमान् उच्यते । वसीयसः अतिशयेन वसुमतोऽपि सकाशात् अहं श्रेयान् भवानीति प्रार्थना । 'वसुमत्तराद्वा' इत्यनन्तरम् 'अनेकार्थत्वाद्धातूनां तुल्यजातीयानां विशेषवान् धनवत्स्वजातीयपुरुषाद्विशेषवान् असानि' इत्यधिकं क्वचित्, वा ॥ पाठे तु धनवज्जतीयेत्यादि 'असानि' इत्यन्तम् अधिकम् । तदनपेक्षितमिति भाति ॥

९. 'इत्यर्थः' इति वा ॥

## ओंकाराभिन्नपरमेश्वरसायुज्यप्रार्थना -

२५. किञ्च, त ब्रह्मणः कोशभूतं त्वा त्वां हे भग भगवन् पूजावन्[१], प्रविशानि। प्रविश्य च अनन्यस्त्वदात्मैव भवानि इत्यर्थः[२]। स त्वमपि मा मां भग भवगन् पूजावन्[३], प्रविश। अवयोः एकत्वमेवास्तु[४]। तस्मिन् त्वयि सहस्रशाखे बहुभेदे[५] निमृजे शोधयामि अहं पापकृत्याम्[६]॥

## बहुशिष्यागमनप्रार्थनोपसंहारः -

२६. यथा लोके आपः प्रवता प्रवणवता निम्नवता देशेन यन्ति गच्छन्ति[७]। यथा च मासा अहर्जरम्। संवत्सरोऽहर्जरः। अहोभिः परिवर्तमानो लोकान् जरयति[८], अहानि वा अस्मिन् जीर्यन्ति अन्तर्भवन्तीति अहर्जरः। तं च यथा मासा यन्ति[९], एवं मां ब्रह्मचारिणः हे धातः सर्वस्य[१०] विधातः, माम् आयन्तु आगच्छन्तु सर्वतः सर्वदिग्भ्यः। प्रतिवेशः श्रमापनयनं स्थानम्। आसन्नगृहम्[११] इत्यर्थः। एवं त्वं प्रतिवेश इव प्रतिवेशः। त्वच्छीलिनां[१२] सर्वपापदुःखापनयनस्थानमसि। अतो मा मां प्रति

---

१. 'पूजार्ह' वा ॥

२. यद्यपि ओंकारस्य प्रतीकस्य उपासनाकाले उपासकात्मभावो न संभवति (सू.भा. ४-१-४), तथाप्युपासनाफलरूपेण ओंकाराभिन्नपरमेश्वरस्यात्मभावोऽस्तु इति प्रार्थना न विरुध्यते ॥

३. नास्त्येतत् वा ॥ ४. 'एकात्मत्वमेव' वा ॥

५. ओंकारस्यैकस्यैव वेदशाखाभेदेन बहुभेदवत्त्वम्, अथवा परमेश्वरस्यैव बहुमूर्तिभेदेन बहुभेदत्वम्। 'बहुशाखाभेदे हे भगवन्' इति वा ॥ पाठे तु द्वितीयोऽर्थो न संगच्छते॥

६. सर्वदुरितक्षयोऽस्तु त्वदात्मताप्राप्तिफलक इत्यर्थः ॥

७. त्वरांशे निदर्शनमिदम् ॥ ८. 'जरयतीति' वा ॥

९. अनुक्रमेण सातत्येन च यथा संवत्सरमेत्य तत्रान्तर्भवन्तीत्यर्थः ॥

१०. कर्मफलस्येति शेषः ॥

११. 'आसन्नं गृहम्' इति वा ॥ 'प्रतिप्राणिप्रवेशाद्वा प्रतिवेशोऽसि कीर्त्यसे।' (१-९१) इत्यर्थान्तरमपि वार्तिके दृश्यते ॥

१२. त्वदुपासकानाम् ॥

प्रभाहि प्रकाशय आत्मानम् । प्र मा पद्यस्व[1] प्रपद्यस्व च माम् । रसविद्धमिव लोहं त्वन्मयं त्वदात्मानं कुरु[2] इत्यर्थः ॥

**अत्र श्रीकामोऽपि ज्ञानार्थ एव -**

२७. श्रीकामोऽस्मिन् विद्याप्रकरणे अभिधीयमानो धनार्थः । धनं च कर्मार्थम्[3] । कर्म च उपात्तदुरितक्षयार्थम्[4]। तत्क्षये हि विद्या प्रकाशते । तथा च स्मृतिः - 'ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः । यथादर्शतले प्रख्ये पश्यत्यात्मानमात्मनि ॥' (मो.ध. २०४-८)[5] इति ॥

## ५. व्याहृत्यात्मब्रह्मोपासना

**भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः । तासामु ह स्मैतां चतुर्थीम् । माहाचमस्यः प्रवेदयते । मह इति । तद्ब्रह्म । स आत्मा । अङ्गान्यन्या देवताः । भूरिति वा अयं लोकः । भुव इत्यन्तरिक्षम् । सुवरित्यसौ लोकः । मह इत्यादित्यः । आदित्येन वाव सर्वे**

---

१. 'प्र मा पद्यस्व' इत्येतत् त्रुटितम् आ ॥ पाठे; गृहीतं तु वा ॥ पाठे ॥

२. त्वत्साक्षात्कारम् अनुगृह्णीष्वेति यावत् ॥

३. गृहस्थानामपि मुमुक्षूणां ज्ञानमात्रेऽधिकारः इत्येतत्प्रकृतप्रणवोपासन-वाक्यगतश्रीकामादिलिङ्गाद्गम्यते ॥

४. 'क्षयाय' आ ॥

५. 'यथादर्शतलप्रख्ये' इत्यतो वरीयानयं पाठः । यथा आदर्शतले निघर्षणादिना स्वच्छतां गमिते आत्मानं प्रतिबिम्बितं पश्यति, एवम् आत्मन्यन्तःकरणेऽपि दुरितक्षयात् शुद्धिं गते स्वात्मानं पश्यतीत्यर्थः । 'पश्यन्त्यात्मानम्' इति आ ॥; वा पाठे मुद्रितमहाभारते च 'पश्यत्यात्मानम्' इत्येवास्ति ॥

लोका महीयन्ते । भूरिति वा अग्निः । भुव इति वायुः । सुवरित्यादित्यः । मह इति चन्द्रमाः । चन्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्ते। भूरिति वा ऋचः । भुव इति सामानि। सुवरिति यजूंषि । मह इति ब्रह्म । ब्रह्मणा वाव सर्वे वेदा महीयन्ते । भूरिति वै प्राणः । भुव इत्यपानः । सुवरिति व्यानः । मह इत्यन्नम् । अन्नेन वाव सर्वे प्राणा महीयन्ते। ता वा एताश्चतस्रश्चतुर्धा । चतस्रश्चतस्रो व्याहृतयः । ता यो वेद । स वेद ब्रह्म । सर्वेऽस्मै देवा बलिमावहन्ति ॥५॥

**अनुवाकसंबन्धः -**

२८. संहिताविषयम् उपासनम् उक्तम् । तदनु मेधाकामस्य श्रीकामस्य च मन्त्रा अनुक्रान्ताः । ते च पारम्पर्येण विद्योपयोगार्था एव । अनन्तरं व्याहृत्यात्मनो ब्रह्मणः, अन्तरुपासनम् स्वाराज्यफलं प्रस्तूयते ॥

२९. भूः, भुवः, सुवः - इति । इतीत्युक्तोपप्रदर्शनार्थः[१] । 'एतास्तिस्रः' इति प्रदर्शितानां परामर्शार्थः । परामृष्टाः स्मार्यन्ते[२] वै[३] इत्यनेन । तिस्र एताः प्रसिद्धा

---

१. 'भूर्भुवःसुवरित्युक्तोपप्रदर्शनार्थः' इति (आ॥) पाठस्तु न समीचीनः । अत्र गृहीतस्तु वा ॥ पाठो यथापरिशोधितः । 'इतिरुक्तोपप्रदर्शनार्थः' इत्यपि पाठः सुकल्पनः ॥

२. 'स्मर्यन्ते' इति (वा॥) पाठो न श्लिष्टः ॥

३. 'वेत्यनेन' इति आ ॥ पाठोऽशुद्धः ॥

व्याहृतयः स्मार्यन्ते[१] तावत्[२]। तासाम् इयं चतुर्थी व्याहृतिः 'मह' इति । ताम् एतां चतुर्थीं महाचमसस्य अपत्यं[३] माहाचमस्यः प्रवेदयते । 'उ, ह, स्म' इत्येतेषां वृत्तानुकथनार्थत्वात् विदितवान् ददर्श - इत्यर्थः[४] । माहाचमस्यग्रहणम् आर्षानुस्मरणार्थम् । ऋष्यनुस्मरणमपि[५] उपासनाङ्गमिति गम्यते । इहोपदेशात्[६] ॥

**महइतिव्याहृतेः प्राधान्यम् -**

३०. येयं माहाचमस्येन दृष्टा व्याहृतिर्मह इति, तद् ब्रह्म । महद् हि ब्रह्म। महश्च व्याहृतिः[७] । किं पुनस्तत् ? स आत्मा । आप्नोतेर्व्याप्तिकर्मणः[८] आत्मा। इतराश्च व्याहृतयो लोकाः, देवाः, वेदाः, प्राणाश्च मह इत्यनेन व्याहृत्यात्मना आदित्यचन्द्रबह्मान्नभूतेन व्याप्यन्ते यतः । अतः अङ्गानि अवयवाः अन्या देवताः। देवताग्रहणम् उपलक्षणार्थं लोकादीनाम्[९]। महः इत्येतस्य[१०] व्याहृत्यात्मनो देवलोकादयः[११] सर्वे अवयवभूताः । यत[१२] आह आदित्यादिभिः लोकादयो महीयन्त

---

१. वै इति प्रसिद्धार्थकेन स्मार्यन्ते, अनूद्य चतुर्थव्याहृतिनिर्देशार्थम् इत्यर्थः ॥

२. 'इति यावत्' इति (वा॥) पाठोऽनपेक्षितः ॥

३. 'माहाचमस्यः' इत्यत्रः तद्धितार्थ अपत्यमिति ॥

४. प्रवेदयते स्म ह इति ददर्शेत्यर्थक इत्यभिप्रायः ॥

५. ऋषिस्मरणम् आ ॥

६. ऋषिस्मृतिमिश्रितमेवोपासनं कर्तव्यमित्यर्थः । माहाचमस्य इत्युपदेशफलमिदम् । अतीतानन्तरानुवाके प्रोक्तानां मन्त्राणां तु ब्राह्मणोत्पन्नत्वात्, तत्र ऋष्याद्युपदेशाभावात्, यथोपदेशमेव विनियोगः ॥

७. ब्रह्मशब्दस्य वृद्ध्यर्थक बृहिधातोरुत्पन्नत्वान्महत्ववक्तृत्वम्; व्याहृतेर्मह इत्यभिधानादेव च महत्त्वम् । एतत्सामान्येन महद्ब्रह्मेति ध्यायेत् ॥

८. आप्लृ व्याप्तौ इति धातोर्व्युत्पन्नत्वादात्मशब्दस्य, व्यापकत्वादात्मा मह इत्यर्थः॥

९. लोकदेववेदप्राणानामित्यर्थः । १०. 'इत्यस्य' वा ॥

११. 'देवा लोकादयश्च' (वा॥) इत्यतो वरमयमेव गृहीतः पाठः ॥

१२. 'यतः अत आह' वा ॥

इति । आत्मना हि अङ्गानि[1] महीयन्ते । महनं वृद्धिः उपचयः । महीयन्ते, वर्धन्ते इत्यर्थः[2] ।

## चतसृणां व्याहृतीनां प्रत्येकं चतुष्प्रकारत्वम् -

३१. अयं लोकः, अग्निः, ऋग्वेदः, प्राणः - इति प्रथमा व्याहृतिः 'भूः' इति । एवम् उत्तरोत्तरा एकैका चतुर्धा भवति[3] । मह इति ब्रह्म । ब्रह्म इत्योङ्कारः । शब्दाधिकारे अन्यस्य असंभवात्[4] । उक्तार्थम् अन्यत्[5]।

'ता वा एताश्चतस्रश्चतुर्धा' इति । ता वा एताः भूः, भुवः, सुवः, महः - इति चतस्रः एकैकशः चतुर्धा चतुष्प्रकाराः । धाशब्दः प्रकारवचनः । चतस्रश्चतस्रः सत्यः चतुर्धा भवन्ति इत्यर्थः[6] । तासां यथाक्लृप्तानां पुनरुपदेशः तथैवोपासनानियमार्थः[7]॥

---

१. 'महोव्याहृतिर्हिरण्यगर्भस्य ब्रह्मणो मध्यभाग आत्मेति कल्प्यते । इतराश्च व्याहृतयः पादाद्यवयवत्वेन कल्प्यन्ते । प्रथमा व्याहृतिः पादौ, द्वितीया बाहू, तृतीया शिर इत्यर्थः' इति टीकाकृत् । अत्र गमकं न पश्यामः । बृहदारण्यके तु व्यत्यस्तक्रमेणैवाङ्गान्यनुक्रान्तानि ॥ बृ. ५-५-३.

२. आत्मना हि सर्वव्यापकेन तदङ्गानि वर्धन्ते ॥

३. 'भूः' इत्यस्यानन्तरं 'अन्तरिक्षं, वायुः, सामानि, अपानः - इति द्वितीया व्याहृति भुवः । असौ लोकः, आदित्यः, यजूंषि व्यानः - इति तृतीया व्याहृतिः सुवः । आदित्यः, चन्द्रमाः,ब्रह्म, अन्नम् - इति चतुर्थी व्याहृतिः महः । इत्येवम् एकैकाश्चतुर्धा भवन्ति' इति वा ॥; एतत्तु गृहीतपाठमनुसृत्य केनचिदनुक्रान्तमित्यवसीयते। 'तथैवान्या यथाक्रमम्' (१-१०१) इति वार्तिकदर्शनात् ॥

४. अभिधेयस्य ब्रह्मण असंभवात् ॥

५. अन्यत् उक्तार्थम् । 'आदित्याभिर्लोकादयो महीयन्ते' इत्यादिनेति शेषः ॥

६. एकैका व्याहृतिश्चतुर्धा भवतीति व्याहृतिचतुष्टयात्मकस्य ब्रह्मणः षोडशविधत्वम् इत्यर्थः॥

७. उक्तप्रकारेण षोडशधैव उपास्याः इति नियमनविधिरयम् इति 'चतस्रश्चतस्रश्चतुर्धा' इति पुनरुपदेशाद् गम्यते । अन्यथा चतुर्धा कल्पनम् उपासनास्तुत्यर्थम् इति मन्येतेति भावः । अत्राऽऽदित्यचन्द्रादिभूतेन महोव्याहृत्यात्मना तदितरमहनं तु ब्राह्मणप्रसिद्ध्या विज्ञेयम् इति 'वाव' इत्यनेन द्योत्यते ॥

**व्याहृत्युपासनं वक्ष्यमाणविशेषणसहितमेकमेव -**

३२. ता यथोक्तव्याहृतीः[१] यो वेद, स वेद विजानाति । किम् ?[२] ब्रह्म । ननु 'तद्ब्रह्म स आत्मा' इति ज्ञाते ब्रह्मणि न वक्तव्यम् अविज्ञातवत् 'स वेद ब्रह्म' इति । न तद्विशेषविवक्षुत्वाददोषः । सत्यम्, विज्ञातं चतुर्थव्याहृत्यात्मा ब्रह्म इति। न तु तद्विशेषः, हृदयान्तरुपलभ्यत्वं मनोमयत्वादिश्च 'शान्तिसमृद्धम्' इत्येवमन्तो विशेषणविशेषरूपो[३] धर्मपूगो विज्ञायत इति तद्विवक्षु हि शास्त्रम् अविज्ञातमिव ब्रह्म मत्वा 'स वेद ब्रह्म' इत्याह । अतो न दोषः । यो हि वक्ष्यमाणेन धर्मपूगेन विशिष्टं ब्रह्म वेद, स वेदा ब्रह्म इत्यभिप्रायः ॥

अतो वक्ष्यमाणानुवाकेन एकवाक्यता अस्य[४] । उभयोर्हि अनुवाकयोः एकम् उपासनम् । लिङ्गाच्च । 'भूरित्यग्नौ प्रतितिष्ठति' इत्यादिकं लिङ्गम् उपासनैकत्वे[५]। विधायका-भावाच्च । न हि 'वेद, उपासितव्यः' इति[६] विधायकः कश्चित् शब्दोऽस्ति व्याहृत्यनुवाके[७]। 'ता यो वेद' इति च[८] वक्ष्यमाणार्थत्वात् नोपासनाभेदकः[९] । वक्ष्यमाणार्थत्वं च 'तद्विशेषविवक्षुत्वात्' इत्यादिना उक्तम् ॥

---

१. 'यथोक्ता' वा ॥

२. 'किं तत्' इति वा ॥ पाठे 'तत्' इत्यधिकम् ॥

३. 'विशेषणविशेष्य' इति आ ॥ पाठो न युक्तः ॥

४. न तूपासनद्वयविधानमत्र शङ्कितव्यम् । 'स य एषोऽन्तर्हृदये आकाशः' इत्याद्यनुवाके यद्गुणकं ब्रह्म निर्दिश्यते तदेवेहोपास्यम् न तु केवलव्याहृतिचतुष्टयरूपमिति बोधनार्थं 'स वेद' इति कथनमित्यभिप्रायः ॥

५. वक्ष्यमाणानुवाके एतदुच्यते । न तु तत्र 'भूरिति वा अग्निः' इति यथात्र । यथोपासनं च फलम् इति न्याय्यम् । तदेतल्लिङ्गमुभयोरनुवाकयोरेकमेवोपासनं विधीयत इत्यत्र ॥

६. 'उपासीत वा इति' इति (वा ॥) पाठे उपासीत इति वा इति क्रमभेदोऽपेक्ष्यते ॥

७. उत्तरानुवाके तु 'इति प्राचीनयोग्योपास्स्व' इति विधिरस्ति ॥

८. चशब्दस्त्वर्थे । 'इति तु' इत्येव वा ॥

९. 'ता यो वेद स वेद ब्रह्म' इति न विधिः, किन्तु वक्ष्यमाणगुणकब्रह्मपरामर्शकः । न चात्रान्यो विधायकः शब्दोऽस्ति ॥

**अङ्गोपासनाफलम् -**

३३. सर्वे देवा अस्मै एवंविदुषे अङ्गभूता आवहन्ति आनयन्ति बलिं स्वाराज्यप्राप्तौ[१] सत्याम् इत्यर्थः ॥५॥

## ६. महोब्रह्मोपासने स्थानादि

**स य एषोऽन्तर्हृदय आकाशः । तस्मिन्नयं पुरुषो मनोमयः । अमृतो हिरण्मयः । अन्तरेण तालुके । य एष स्तन इवावलम्बते । सेन्द्रयोनिः । यत्रासौ केशान्तो विवर्तते । व्यपोह्य शीर्षकपाले । भूरित्यग्नौ प्रतितिष्ठति । भुव इति वायौ । सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम् । आप्नोति मनसस्पतिम् । वाक्पतिश्चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिः । एतत्ततो भवति । आकाशशरीरं ब्रह्म । सत्यात्म प्राणारामं मनआनन्दम् । शान्तिसमृद्धममृतम् । इति प्राचीनयोग्योपास्स्व ॥६॥**

---

१. 'आप्नोति स्वाराज्यम्' इत्युत्तरत्र पठिष्यते । अहमस्मि मह इति व्याहृत्यात्मकं ब्रह्म, मदङ्गानि देवादयः - इति यो वेद तस्यैतत्फलमित्यर्थः । अत्र 'लोकदेवादयः' इति वार्तिकेऽस्ति । सर्वाण्यङ्गान्यस्य अनुकूलानि भवन्तीत्येतदर्थकं तत् ॥

**अनुवाकसंबन्धः -**

३४. भूर्भुवःसुवःस्वरूपा मह इत्येतस्य[१] व्याहृत्यात्मनो ब्रह्मणः अङ्गानि अन्या देवता[२] इत्युक्तम् । यस्य ता अङ्गभूताः, तस्यैतस्य ब्रह्मणः साक्षात् उपलब्ध्यर्थम्[३], उपासनार्थं च हृदयाकाशः स्थानमुच्यते शालग्राम इव विष्णोः । तस्मिन् हि तद्ब्रह्म, उपास्यमानं मनोमयत्वादिधर्मविशिष्टं साक्षात् उपलभ्यते पाणाविव आमलकम्। मार्गश्च[४] सर्वात्मभावप्रतिपत्तये[५] वक्तव्यः इत्यनुवाकः आरभ्यते ॥

**व्याहृत्यात्मकब्रह्मण उपलब्धिस्थानं विशेषणानि च -**

३५. 'सः' इति व्युत्क्रम्य 'अयं पुरुषः' इत्यनेन संबध्यते । य एषः अन्तर्हृदये हृदयस्यान्तः । हृदयम् इति पुण्डरीकाकारो मांसपिण्डः प्राणायतनः, अनेकनाडीसुषिरः, ऊर्ध्वनालः अधोमुखः, विशस्यमाने पशौ प्रसिद्ध उपलभ्यते। तस्यान्तः, य एषः प्रसिद्ध एव करकाकाशवत्[६], तस्मिन् सोऽयं[७] पुरुषः । पुरि

---

१. एतदनन्तरं 'हिरण्यगर्भस्य' इत्यधिकं वा ॥

२. देवलोकादय इत्यर्थः ॥

३. साक्षात्करणार्थम् इत्यर्थः ॥ अहमयमेवेति तद्भावापन्नस्य हि उपासनाफलम् । सू.भा. ३-३-५९.

४. उपसनास्थानवत् उपास्यविशेषणवच्च मार्गश्च वक्तव्यः, यस्मात् तदनुशीलनेन तेनैव मार्गेण प्रतिष्ठते, उपास्यदेवताप्राप्तये । सू.भा.४-२-१७.

५. सर्वात्मभावोऽत्र मनोमयत्वादिगुणकब्रह्मभावः । तस्याः प्रतिपत्तिः प्राप्तिः । अयं च भावो हिरण्यगर्भसाधर्म्यमिति व्याख्यातव्यम् । पश्यन्तूत्तरत्र 'आप्नोति मनसस्पतिम्' इत्यस्य टिप्पणम् ॥

६. सर्वगतस्यापि हृदयान्तःस्थत्ववचनं तदुपहितत्वाभिप्रायेण कमण्डल्ववच्छिन्नाकाशवत् । तस्मात् 'य एषः' इति प्रसिद्ध एव भूताकाशः परामृष्ट इत्यभिप्रायः ॥

७. 'सः' इति व्युत्क्रम्य संबन्धः - इति यदुक्तं, तस्योपप्रदर्शनमिदम् । योऽयं परोक्षत्वेनोपदिष्टो महोव्याहृत्यात्मकः, सोऽयं हृदयाकाशे द्रष्टव्य इत्यर्थः ॥

शयनात्[१]। पूर्णा वा भूरादयो लोकाः येन[२], इति पुरुषः । मनोमयः । मनः विज्ञानम्। मनुतेर्ज्ञानकर्मणः[३]। तन्मयः तत्प्रायः । तदुपलभ्यत्वात्[४]। मनुते अनेन इति वा मनः, अन्तःकरणम् । तदभिमानी तन्मयः[५]। तल्लिङ्गो वा[६] । अमृतः अमरणधर्मा[७]। हिरण्मयो ज्योतिर्मयः[८]॥

**उपासकस्य ब्रह्मप्राप्तये नाडीमार्गः-**

३६. तस्यैवंलक्षणस्य हृदयाकाशे साक्षात्कृतस्य विदुष आत्मभूतस्य[९] ईदृशस्वरूपप्रतिपत्तये[१०] *मार्गः अभिधीयते* । हृदयात् ऊर्ध्वं प्रवृत्ता **सुषुम्ना**[११] नाम नाडी, **योगशास्त्रेषु** च प्रसिद्धा । सा च अन्तरेण मध्ये प्रसिद्धे तालुके तालुकयोः[१२]

---

१. हृदये स्थितत्वात्, तत्रोपलभ्यमानत्वात् ॥

२. भूरादिलोकात्मका व्याहृतयो मह इत्यनेन व्याप्ता इति ह्युक्तम् ॥

३. मन ज्ञाने, मनु अवबोधने - इति धातुद्वयमस्ति । अत्र यद्याद्यो धातुर्विवक्षितः तदा 'मन्यतेः' इति निर्देशः स्यात् इत्यतः मनु अवबोधने-इत्यस्यैवोपादानम् इति भाति। 'मनुते' इत्येव वार्तिकेऽपि (१-११४) दृश्यते । 'मनो मनोतेः' (नै. ४-१-५) इति निरुक्तम् । अत्र वैयाकरणैरेव निर्धारणीयं तत्त्वम् ॥

४. मनसा उपलभ्यत्वमेव तत्प्रायत्वम् इत्युक्तं भवति ॥

५. समष्टिज्ञानशक्त्युपाधित्वात् । छां. भा. ३-१४-२.

६. मनसा हि लिङ्ग्यतेऽयं पुरुषः । समष्टिमनउपाधिकत्वात् ॥

७. हिरण्यगर्भरूपेण कल्पान्तःस्थायित्वात् । वस्तुतः परमेश्वराव्यतिरेकाच्च ॥

८. न हि वस्तुत एव हिरण्यविकारत्वं संभवति तस्येत्यर्थः ॥

९. इन्द्रस्येत्यधिकम् आ ॥

१०. ईदृशेति, उक्तविशेषणविशिष्टेत्यर्थः । 'ईश्वररूपस्य प्रतिपत्तये' इति वा ॥

११. इयं नाडी का. २-६-१६, प्र. ३-७, छां. ८-६-६ एतासूपनिषत्सु परामृष्टा ॥

१२. 'अन्तरान्तरेण युक्ते' (पा. २-३-४) इति द्वितीया मूले । भाष्ये तु 'तालुकयोर्मध्ये' इति तदर्थकथनमिति भाति ॥

गता। यश्चैष तालुकयोर्मध्ये स्तन इवावलम्बते मांसखण्डः । तस्य च अन्तरेण इत्येतत्। यत्र च[१] केशान्तः । केशानाम् अन्तः, अवसानं[२] मूलं केशान्तः । विवर्तते विभागेन वर्तते । मूर्धप्रदेश इत्यर्थः[३] । तं देशं प्राप्य तत्र विनिःसृता[४] । व्यपोह्य विभज्य विदार्य शीर्षकपाले शिरःकपाले विनिर्गता या सा इन्द्रयोनिः । इन्द्रस्य ब्रह्मणो योनिः मार्गः। स्वरूपप्रतिपत्तिद्वारम् इत्यर्थः[५] ॥

## उपासनाफलम् -

३७. तया एवं विद्वान् मनोमयात्मदर्शी मूर्ध्नो विनिष्क्रम्य अस्य लोकस्य अधिष्ठाता भूरिति व्याहृतिरूपो योऽग्निर्महतो ब्रह्मणोऽङ्गभूतः, तस्मिन् अग्नौ प्रतितिष्ठति। अग्न्यात्मना इमं लोकं व्याप्नोति इत्यर्थः । तथा भुव इति द्वितीयव्याहृत्यात्मनि वायौ । 'प्रतितिष्ठति' इत्यनुवर्तते । सुवरिति तृतीयव्याहृत्यात्मनि आदित्ये । मह इत्यङ्गिनि चतुर्थव्याहृत्यात्मनि ब्रह्मणि प्रतितिष्ठति[६]। तेष्वात्मभावेन स्थित्वा, आप्नोति ब्रह्मभूतःस्वाराज्यं स्वराड्भावम्[७]।

१. एतदनन्तरम् 'असौ' इत्यधिकं वा ॥

२. त्यक्तमिदं वा ॥; मूलस्याप्यन्तशब्दवाच्यत्वं तदधः केशानामभावात् इत्यभिप्रायेण 'अवसानम्' इत्युक्तिः ॥

३. एतयैव द्वारा परमात्मा कार्यकरणसङ्घातं प्रविष्टवान् इति ऐतरेयिणः समामनन्ति । ऐ.भा. १-३-१२.

४. नास्त्येतत्पदं वा ॥; 'तेनान्तरेण' इत्यधिकं तु तत्र ॥

५. एतया नाड्या उदानवायुपूरितया रेचकप्राणायामबलेन उपासको व्रजेत् - इति वार्तिके (१-११६, ११७) विशेष उक्तः ॥

६. मह इत्यङ्गिनि चतुर्थव्याहृत्यात्मनि ब्रह्मणि प्रतितिष्ठतीति वा ॥; मह इति व्याहृत्यात्मैवात्र प्राधान्येनोपास्यः । अङ्गोपासनाफलम् अग्न्यादिभावं प्राप्य क्रमेणाङ्गिनि प्रतितिष्ठतीत्यर्थः ॥

७. अत्र स्वाराज्यम् आदित्यमण्डलस्थेश्वरायत्तमेव, न तु निरङ्कुशम् । अत एवात्र 'आप्नोति मनसस्पतिम्' यः सर्वेषां मनसां पतिः पूर्वसिद्ध ईश्वरः तं प्राप्नोतीत्युक्तम्। अतो जगदुत्पत्त्यादिव्यापारवर्जम् अणिमाद्यैश्वर्यं प्राप्नोतीत्येव स्वाराज्य-प्राप्तिवाचोयुक्तेरर्थः - इति शारीरकभाष्ये (४-४-१७, १८).

स्वयमेव राजा अधिपतिः भवति; अङ्गभूतानां देवानां यथा ब्रह्म । देवाश्च सर्वे अस्मै[१] बलिमावहन्ति अङ्गभूताः, यथा ब्रह्मणे[२] । आप्नोति मनसस्पतिम् । सर्वेषां हि मनसां पतिः । सर्वात्मकत्वाद् ब्रह्मणः । सर्वैर्हि मनोभिस्तन्मनुते । तदाप्नोत्येवं विद्वान् । किञ्च वाक्पतिः सर्वासां वाचां पतिर्भवति । तथैव चक्षुष्पतिः चक्षुषां पतिः । श्रोत्रपतिः श्रोत्राणां पतिः । विज्ञानपतिः विज्ञानानां च पतिः । सर्वात्मकत्वात् सर्वप्राणिनां करणैस्तद्वान् भवतीत्यर्थः ॥

## मनोमयात्मनो विशेषणान्तराणि -

३८. किञ्च ततोऽपि अधिकतरम् एतद्भवति । किं तत् ? उच्यते । आकाशशरीरम् । आकाशः शरीरम् अस्य[३], आकाशवद् वा सूक्ष्मं शरीरम् अस्य[४] इत्याकाशशरीरम् । किं तत् ? प्रकृतं ब्रह्म । सत्यात्म । सत्यं मूर्तामूर्तम्[५]; अवितथस्वरूपं वा[६] आत्मा स्वभावः अस्य तदिदं सत्यात्म । प्राणारामम् । प्राणेषु

---

१. एतदनन्तरम् 'अङ्गिने' इत्यधिकं वा ॥

२. तस्मै देवा बलिमावहन्तीत्युक्तानुवाद एषः ॥

३. आकाशोपाधिकम्, सर्वात्मकत्वात् ॥

४. मनोमयत्वात् सूक्ष्मं शरीरम् इत्यर्थः । पूर्वत्र व्याख्याने वैराजं रूपमभिप्रेतम्, इदानीं तु हैरण्यगर्भम् । अत एव वाक्यशेषे प्रकृतं मनोमयत्वादिगुणकं ब्रह्मेत्याह । उभयथापि उपहितस्यैकत्वे सति तत्सदृशैश्वर्यप्राप्तिमात्रस्य स्वाराज्यत्वेन विवक्षितत्वादविरोधः ॥

५. पृथिव्यादिभूतत्रयं मूर्तम्, वाय्वाकाशौ चामूर्तम् - इति द्वैराश्येन पञ्चभूतानि विभज्य. तत्र मूर्तं सत्, अमूर्तं च त्यत् - इति श्रुतिनिर्देशात् सत्यशब्दवाच्यं मूर्तामूर्तम् । यद्यपि श्रुत्यन्तरे निर्विशेषब्रह्मणः स्वरूपनिर्दिदिक्षया मूर्तामूर्ते निह्नोतव्यत्वेनैवानूदिते, तथाप्यत्रापरब्रह्मप्रकरणत्वात् तयोर्बह्मस्वभावत्वोक्तिर्न विरुध्यत इति बोध्यम् ॥

६. 'अविथतं स्वरूपं च' इति आ ॥ 'अवितथस्वरूपं वा' इति वा ॥ गृहीतपाठस्त्वस्माभिरेव कल्पितः प्रकृतसंगत्यर्थम् । यावत्कल्पान्तस्थायित्वात् सत्यम्, अवितथमस्य स्वरूपमिति ह्यर्थोऽत्र संगतः । अत्रापि व्याख्यानद्वयं यथाक्रमं वैराजं हैरण्यगर्भं च स्वरूपमादाय योजनीयं पूर्ववत् ॥

आरामः आरमणम् आक्रीडा यस्य तत् प्राणारामम्[१]; प्राणानां वा आरामो यस्मिन् तत् प्राणारामम्[२]। मनआनन्दम् । आनन्दभूतं सुखकृदेव[३] यस्य मनः तत् मनआनन्दम्। शान्तिसमृद्धम् । शान्तिः उपशमः । शान्तिश्च तत् समृद्धं च शान्तिसमृद्धम्[४]; शान्त्या वा समृद्धम् तत् उपलभ्यते इति शान्तिसमृद्धम्। अमृतम् अमरणधर्मि[५]। एतच्च अधिकतरं विशेषणं तत्रैव 'मनोमयः' इत्यादौ द्रष्टव्यम्[६] ॥

**उपासनोपदेशोपसंहारः -**

३९. इति एवं मनोमयत्वादिधर्मैर्विशिष्टं यथोक्तं ब्रह्म हे प्राचीनयोग्य, उपास्स्व इत्याचार्यवचनोक्तिः आदरार्था[७] ॥६॥

## ७. ब्रह्मणः पाङ्क्तरूपेणोपासनम्

# पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशाः[८]। अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि । आप

---

१. सर्वप्राणव्यापकत्वेन तेषामात्मत्वात् इति भावः ॥

२. तदायत्तत्वात्प्राणानां व्यापारस्य ॥

३. दुःखासंमिश्रितम् । सत्त्वप्रचुरत्वात् ॥

४. धर्मज्ञानवैराग्यादेः सहसिद्धत्वस्मृतेः ज्ञानक्रियासमष्ट्युपाधिकत्वाच्च प्रजापतेः शान्तिसमृद्धत्वम् ॥ बृ.भा. १-४-२

५. कार्यब्रह्मलोकप्रलयपर्यन्तमवस्थायित्वात् ॥

६. मनोमयः, अमृतः, हिरण्मयः - इत्युक्तविशेषणैः सहोपसंहर्तव्यमिति, अत्र फलसंकीर्तनादवगम्यत इति भावः ॥

७. 'प्राचीनयोग्य' इति माहाचमस्योक्तिर्योग्यशिष्यस्यैव विद्यायामधिकार इति द्योतनद्वारेण उपासनायामादरप्रदर्शनार्था-इत्यर्थः । 'उक्तस्तूपासनाशब्दार्थः' इत्यधिकं वा ॥

८. अत्र वा ॥ पाठे 'अवान्तरदिशः' इति मूले भाष्ये च दृश्यते । कतरः पाठोऽत्र युक्त इत्यत्राध्येतार एव प्रमाणम् ॥

**ओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतम् । अथाध्यात्मम् । प्राणो व्यानोऽपान उदानः समानः । चक्षुः श्रोत्रं मनो वाक् त्वक् । चर्म माँसँ स्नावास्थिमज्जा । एतदधिविधाय ऋषिरवोचत् । पाङ्क्तं वा इदँ सर्वम् । पाङ्क्तेनैव पाङ्क्तँ स्पृणोतीति ॥७॥**

**अनुवाकविषयः -**

४०. यदेतद् व्याहृत्यात्मकं ब्रह्म उपास्यम् उक्तम्, तस्यै[1]वेदानीं पृथिव्यादिपाङ्क्तस्वरूपेणोपासनम् उच्यते । पञ्चसंख्यायोगात् पङ्क्तिच्छन्दः-संपत्तिः[2]। ततः पाङ्क्तत्वं सर्वस्य । पाङ्क्तश्च यज्ञः[3] । पञ्चपदा पङ्क्तिः[4] । 'पाङ्क्तो यज्ञः' (तै.सं १-५-२) इति श्रुतेः[5] । तेन यत् सर्वं लोकादि आत्मान्तं च पाङ्क्तं परिकल्पयति, यज्ञमेव तत् परिकल्पयति । तेन यज्ञेन परिकल्पितेन पाङ्क्तात्मकं प्रजापतिम् अभिसंपद्यते[6]। तत् कथं पाङ्क्तं वा सर्वमिति[7] ? अत आह -

**बाह्यपाङ्क्तत्रयम् -**

४१. पृथिवी, अन्तरिक्षम्, द्यौः, दिशः, अवान्तरदिशाः[8] - इति

---

१. तस्यैवेति । अपरब्रह्मण एवेत्यर्थः ॥

२. पञ्चसंख्यासंबन्धात् पङ्क्तिच्छन्दस्त्वेन संपादनम् ॥

३. पत्नीयजमानपुत्रदैवमानुषवित्तैः पञ्चभिः संपाद्यत इति पाङ्क्तो यज्ञः । तेन यज्ञत्वसंपादनमपि पञ्चसंख्यायोगात् भवति ॥

४. पङ्क्तिच्छन्दस अष्टाक्षरसंमिताः पञ्चपादा विद्यन्ते ॥

५. इदं वाक्यम् 'पञ्चपदा पङ्क्तिः' इत्यस्मात्प्रागेव निवेशनीयम् ॥

६. प्राप्नोति ॥

७. कथं पाङ्क्तत्वेन परिकल्पयितव्यमिति ॥

८. 'दिशः' वा ॥

लोकपाङ्क्तम् । अग्निः, वायुः, आदित्यः, चन्द्रमाः, नक्षत्राणि-इति देवतापाङ्क्तम्। आपः, ओषधयः, वनस्पतयः, आकाशः, आत्मा-इति भूतपाङ्क्तम् । आत्मा इति विराट्[१] । भूताधिकारात् । 'इत्यधिभूतम्' इति अधिलोकाधिदैवत-पाङ्क्तद्वयोपलक्षणार्थम् । लोकदेवतापाङ्क्तयोश्चाभिहितत्वात्[२]॥

## आध्यात्मिकपाङ्क्तत्रयम् -

४२. अथ अनन्तरम् अध्यात्मं पाङ्क्तत्रयम् उच्यते । प्राणादि वायुपाङ्क्तम्। चक्षुरादि इन्द्रियपाङ्क्तम् । चर्मादि धातुपाङ्क्तम्[३] ॥

## पाङ्क्तोपासनाफलम् -

४३. एतावद् हि इदं सर्वम् । अध्यात्मं बाह्यं च पाङ्क्तमेव इति एतत् एवम्[४] अधिविधाय परिकल्प्य ऋषिः वेदः, एतद्दर्शनसंपन्नो वा[५] कश्चिद् ऋषिः, अवोचत् उक्तवान् । किमिति ? आह । पाङ्क्तं वा इदं सर्वम् पाङ्क्तेनैव आध्यात्मिकेन संख्यासामान्यात् पाङ्क्तं बाह्यं स्पृणोति । बलयति । पूरयति । एकात्मतया उपलभते[६] इत्येतत् । एवं पाङ्क्तम् इदं सर्वम् इति यो वेद, स प्राजापत्यात्मैव[७] भवति इत्यर्थः ॥७॥

---

१. स्थूलसमष्ट्युपाधिः ॥

२. 'पाङ्क्तयोर्द्वयोश्च' इति वा ॥

३. यद्यपि रसादयो धातवः सप्तेति वैद्यशास्त्रप्रसिद्धिः तथापि चर्मादयः शरीरस्य धारणाद्धातव उच्यन्तेऽत्र ॥

४. एतत् इति क्रियाविशेषणं एवमित्यनेन व्याख्यातम् । सर्वं पाङ्क्तमेवेतीत्यर्थः ॥

५. साक्षात्कारवान् वा इत्यर्थः ॥

६. 'उपलभ्यते' इति पाठस्तु न साधुः । आध्यात्मिकेन एकात्मतया उपलभते, नाध्यात्मिकाद्व्यतिरिक्तं बाह्यं पाङ्क्तमित्येतत् साक्षात्कुरुते इत्यर्थः । आध्यात्मिकं पाङ्क्तत्रयमितरपाङ्क्तत्रयात्मना विद्यात् - इति केचित् । तेषामेतद्भाष्येण विरोधः स्फुट एव ॥

७. पाङ्क्तमेव सर्वं प्रजापतेर्मम शरीरभूतम् इत्युपास्यं साक्षात्कृतवतः प्रजापत्यात्मत्वं फलम् इत्यर्थः ॥

## ८. ओंकारोपासनम्

**ओमिति ब्रह्म । ओमितीदँ सर्वम् । ओमित्येतदनुकृति ह स्म वा अप्यो श्रावयेत्या-श्रावयन्ति । ओमिति सामानि गायन्ति । ओँशोमिति शस्त्राणि शँसन्ति। ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति। ओमित्यग्निहोत्रमनुजानाति। आमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति ॥८॥**

**अनुवाकविषयः -**

४४. व्याहृत्यात्मनो ब्रह्मण उपासनम् उक्तम् । अनन्तरं च पाङ्क्तस्वरूपेण तस्यैवोपासनम् उक्तम् । इदानीं सर्वोपासनाङ्गभूतस्य[1] ओंकारस्य उपासनं विधित्स्यते। परापरब्रह्मदृष्ट्या हि उपास्यमान ओंकारः, शब्दमात्रोऽपि परापरब्रह्मप्राप्तिसाधनं भवति । स हि आलम्बनं ब्रह्मणः परस्य अपरस्य च, प्रतिमेव विष्णोः । 'एतेनैवायतनेन एकतरमन्वेति' (प्र. ५-२) इति श्रुतेः ॥

**ओंकारोपासनाविधिः -**

४५. ओमिति । इतिशब्दः स्वरूपपरिच्छेदार्थः[2]। ओं इत्येतच्छब्दरूपं ब्रह्मेति मनसा धारयेत्, उपासीत । यतः, ओमिति इदं सर्वम्[3] । सर्वं हि शब्दरूपं

१. परापरोपासनाङ्गभूतस्य । बृ. पञ्चमाध्यायभाष्येऽवतरणिका द्रष्टव्या ॥

२. अर्थरूपाद् व्यावर्त्य शब्दरूपं समर्पयितुम् । अत्र 'इतिः शब्दरूपपरिच्छेदार्थः' इत्यपि मूलपाठः स्यादित्युन्नेतुं शक्यम् ॥

३. एतत्त्रुटितं मुद्रितपुस्तकेषु ॥

ओङ्कारेण व्याप्तम् । 'तद्यथा शङ्कुना' (छां. २-२३-३) इति श्रुत्यन्तरात्[१]। अभिधानतन्त्रं ह्यभिधेयम् इत्यतः, इदं सर्वम् ओङ्कार इत्युच्यते[२]॥

**ओङ्कारस्तुतिः -**

४३. ओङ्कारस्तुत्यर्थ[३] उत्तरो ग्रन्थः । उपास्यत्वात्तस्य । ओं इत्येतत् अनुकृतिः अनुकरणम् । 'करोमि', 'यास्यामि च' - इति कृतम् उक्तम्[४] ओं इत्यनुकरोति अन्यः । अतः ओङ्कारोऽनुकृतिः । ह स्म वै इति प्रसिद्धावद्योतकाः[५]। प्रसिद्धं हि ओङ्कारस्य अनुकृतित्वम् । अपि च 'ओ श्रावय' इति प्रैषपूर्वकम् आश्रावयन्ति प्रतिश्रावयन्ति[६] । तथा ओं इति सामानि गायन्ति सामगाः। ओं शोम् इति शस्त्राणि शंसन्ति, शस्त्रशंसितारोऽपि[७] । तथा ओं इति अध्वर्युः प्रतिगरं

---

१. यथा शङ्कुना पर्णनालेन सर्वाणि प्रत्रावयवजातानि व्याप्तानि, एवम् ओङ्कारेण सर्वं शब्दजातं व्याप्तम् इति छान्दोग्यश्रुत्यर्थः ॥

२. ओंङ्कारो हि सर्ववाचकः । तदवयवभूतेन अकारेण सर्वशब्दानां व्याप्तत्वात् सर्वस्याप्यभिधेयस्य ओङ्कारवाच्यत्वम् । अभिधानवशेन ह्यभिधेयं प्रकाश्यते प्रति अभिधानभूत ओंङ्कारः सर्वमित्युक्तम् ॥

३. 'स्तुत्यर्थम्' इति आ ॥

४. 'उक्तः' इति (वा॥) पाठोऽशुद्धः ॥

५. 'प्रसिद्धार्थ .....' वा ॥

६. दर्शपूर्णमासादियागेषु यजुर्वेदोक्तकर्मानुष्ठायिनोऽध्वर्यवो यस्मिन् काले आग्नीध्रं प्रति प्रैषप्रयोगकाले 'ओ श्रावय' इति मन्त्रं पठन्ति । हे आग्नीध्र, देवान् प्रति हविष्प्रदानावसरं श्रावय इति मन्त्रार्थः इति सायणः । अत्र ओकार ओङ्कारपूर्वभागानुकृतिः ॥

७. शस्त्राणि निष्केवल्यप्रउगादिनामकानि बह्वृचा होतारः पठन्ति । तत्र अध्वर्युं प्रत्यनुज्ञां याचमानाः 'अध्वर्यो शोंसावोम्' इति याचन्ते । अत्र हि मन्त्रे आदौ शोमिति, अन्ते चोङ्कारोऽस्ति ॥

प्रतिगृणाति[1] । ओं इति ब्रह्मा प्रसौति अनुजानाति[2] । ओं इति अग्निहोत्रम् अनुजानाति। जुहोमि इत्युक्ते ओं इत्येव अनुज्ञां प्रयच्छति । ओं इत्येव ब्राह्मणः प्रवक्ष्यन् प्रवचनं करिष्यन् अध्येष्यमाणः ओमित्येव आह । ओमिति[3] प्रतिपद्यते अध्येतुम् इत्यर्थः । ब्रह्म वेदम् उपाप्नवानि इति प्राप्नुयां ग्रहीष्यामि इति । उपाप्नोत्येव ब्रह्म । अथवा, ब्रह्म परमात्मानम् उपाप्नवानि इति आत्मानं प्रवक्ष्यन् प्रापयिष्यन्[4] 'ओं' इत्येव आह। स च तेन आङ्कारेण ब्रह्म प्राप्नोत्येव । ओङ्कारपूर्वं प्रवृत्तानां क्रियाणां फलवत्त्वं यस्मात्, तस्मात् ओङ्कारं ब्रह्मेत्युपासीत - इति वाक्यार्थः ॥८॥

## ९. कर्मणां पुरुषार्थसाधनत्वम्

**ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने च । दमश्च स्वाध्यायप्रवचने च । शमश्च स्वाध्यायपवचने च । अग्नयश्च स्वाध्यायप्रवचने च । अग्निहोत्रं च स्वाध्यायप्रवचने च । अतिथयश्च**

---

१. होत्रा शस्त्रे पठ्यमाने तत्पुरतः स्थितेनाध्वर्युणा तत्प्रोत्साहनार्थं पठ्यमानः 'ओथामोद इव' इत्यादिशब्दः प्रतिगरः । तत्र प्रतिगरादौ ओङ्कारः प्रयोक्तव्यः ।।

२. ऋत्विजम् इति शेषः ॥ अत्र 'प्रैषपूर्वकमाश्रावयति' इत्यधिकं आ ॥ पाठे । तत्त्वनपेक्षितम् ॥

३. अत्र 'ओमित्याह । ओमित्येव प्रतिपद्यते अध्येतुम्' इति वा ॥

४. वच परिभाषणे इति धातुमादाय प्रथमं व्याख्यानम् । ओङ्कारोच्चारणपूर्वकम्, अध्येतुं प्रवर्तते यस्मात् तस्माद्वेदं प्राप्नोतीति । वह प्रापणे इति धातुं स्वीकृत्य तु द्वितीयं व्याख्यानम् । आत्मानं परमात्मानं प्रापयिष्यामीति ओङ्कारध्यानपूर्वकं प्रयतते यस्मात्, तस्मात्तं प्राप्नोत्येवेति ॥

**स्वाध्यायप्रवचने च । मानुषं च स्वाध्याय-प्रवचने च । प्रजा च स्वाध्यायप्रवचने च । प्रजनश्च स्वाध्यायप्रवचने च । प्रजातिश्च स्वाध्यायप्रवचने च । सत्यमिति सत्यवचा राथीतरः। तप इति तपोनित्यः पौरुशिष्टिः । स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः । तद्धि तपस्तद्धि पतः ॥९॥**

**अनुवाकविषयः -**

४७. विज्ञानादेवाप्नोति स्वाराज्यम् (अनु. ६, भा. भा. ३७) इत्युक्तत्वात्, श्रौतस्मार्तानां कर्मणाम् आनर्थक्यं प्राप्तम् इत्यतः, तन्मा[१] प्रापत् इति कर्मणां पुरुषार्थं[२] प्रति साधनत्वप्रदर्शनार्थं[३] इह उपन्यासः ॥

**मुमुक्षुणा अवश्यानुष्ठेयानि कर्माणि -**

४८. ऋतम् इति व्याख्यातम् (भा.भा. १२) स्वाध्यायः अध्ययनम् । प्रवचनम् अध्यापनम्, ब्रह्मयज्ञो वा । एतानि ऋतादीनि 'अनुष्ठेयानि' इति वाक्यशेषः। सत्यं[४] सत्यवचनम्[५] । यथाव्याख्यातार्थं (भा.भा. १२) वा । तपः कृच्छ्रादि । दमः बाह्यकरणोपशमः । शमः अन्तःकरणोपशमः । अग्नयः[६] आधातव्याः । अग्निहोत्रं

१. 'एतन्मा' इति वा ॥

२. अपरब्रह्मप्राप्तिं प्रति । कर्मकाण्डे तु आश्रमकर्मत्वेन विहितानि कर्माणि । इह पुनर्विद्यासहकारित्वेनेति विशेषः ॥ सू.भा. ३-४-३५.

३. 'प्रदर्शनार्थम्' आ ॥

४. 'सत्यं च' इति आ ॥ पाठे चशब्दो मूलप्रतीकमिति ग्राह्यम् ॥

५. 'सत्यवदनम्' इति वा ॥

६. 'अग्नयश्च' इति चयुक्तः पाठः वा ॥

च होतव्यम् । अतिथयश्च पूज्याः । मानुषम् इति लौकिकः संव्यवहारः[१]; तच्च यथाप्राप्तम् अनुष्ठेयम् । प्रजा च उत्पाद्या । प्रजनश्च प्रजननम् । ऋतौ भार्यागमनम् इत्यर्थः । प्रजातिः पौत्रोत्पत्तिः । पुत्रो निवेशयितव्यः इत्येतत् ॥

## स्वाध्यायप्रवचनयोः प्राधान्यम् -

४९. सर्वैरेतैः कर्मभिर्युक्तस्यापि स्वाध्यायप्रवचने यत्नतोऽनुष्ठेये इत्येवमर्थं सर्वेण सह स्वाध्यायप्रवचनग्रहणम् । स्वाध्यायाधीनं हि अर्थज्ञानम् । अर्थज्ञानायत्तं[२] च परं श्रेयः । प्रवचनं च तदविस्मरणार्थं धर्मप्रवृद्ध्यर्थं[३] च । अतः[४] स्वाध्यायप्रवचनयोरादरः कार्यः । सत्यमिति सत्यमेव अनुष्ठयेम् इति सत्यवचाः। सत्यमेव वचो यस्य सोऽयं सत्यवचाः; नाम वा तस्य[५] । राथीतरः रथीतरसगोत्रः[६] । राथीतर आचार्यो[७] मन्यते । तप इति तप एव कर्तव्यम् इति तपोनित्यः। तपसि नित्यः तपः परः; तपोनित्य इति वा नाम[८] । पौरुशिष्टिः पुरुशिष्टस्य अपत्यं पौरुशिष्टिराचार्यो मन्यते । स्वाध्यायप्रवचने एवानुष्ठेय इति नाको नामतः । मुद्गलस्य अपत्यं मौद्गल्य आचार्यो मन्यते । तद् हि तपः, तद् हि तपः । यस्मात् स्वाध्यायप्रवचने एव तपः, तस्मात् ते एव अनुष्ठेये इति । उक्तानामपि सत्यतपःस्वाध्यायप्रवचनानां पुनर्ग्रहणम् आदरार्थम्[९] ॥९॥

---

१. लौकिकसंव्यवहारो विवाहादिः - इति टीकाकृत् ॥

२. 'अर्थज्ञानाधीनं' वा ॥ ३. 'धर्मवृद्ध्यर्थम्' इति वा ॥

४. 'ततः' इति वा ॥

५. 'सत्यवचः' इति न यौगिकः शब्दः, किन्तु संज्ञानामेति वा ॥

६. 'रथितरस्य गोत्रः' इति आ ॥ ७. 'राथीतराचार्यो' आ ॥

८. सत्यमेव अनुष्ठातव्यम्, तप एव कर्तव्यम् इति च य उपदिशति स तत्प्रयोजनं स्वयमनुभूतवानित्येव श्लिष्यते । अतोऽत्र केवलनाममात्रत्वस्वीकरणापेक्षया 'सत्यवचाः', 'तपोनित्यः' - इति च यौगिकशब्दावेतौ इति प्रथमव्याख्यानमेव साधीय इति युज्यते । योगरूढौ वा शब्दावेतौ स्याताम् ॥

९. एतेषामेव प्राधान्यं दर्शयितुमित्यर्थः । तत्रापि स्वाध्यायप्रवचनयोस्तपस्त्वेन संस्तुतत्वात् तत्र विशेषत आदरो गम्यते ॥

## १०. त्रिशङ्कोरार्षदर्शनम्

**अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि। द्रविणँ सवर्चसम् । सुमेधा अमृतोक्षितः । इति त्रिशङ्कोर्वेदानुवचनम्॥१०॥**

**मन्त्राम्नायो जपार्थः -**

५०. 'अहं वृक्षस्य रेरिवा' इति स्वाध्यायार्थो[१] मन्त्राम्नायः । स्वाध्यायश्च विद्योत्पत्तये । प्रकरणात् । विद्यार्थं[२] हि, इदं प्रकरणम् । न च अन्यार्थत्वम् अवगम्यते[३]। स्वाध्यायेन च विशुद्धसत्त्वस्य विद्योत्पत्तिरवकल्पते[४] ॥

५१. अहं वृक्षस्य उच्छेदात्मकस्य[५] संसारवृक्षस्य रेरिवा प्रेरयिता, अन्तर्याम्यात्मना[६] । कीर्तिः ख्यातिः गिरेः पृष्ठमिव उच्छ्रिता मम । ऊर्ध्वपवित्रः । ऊर्ध्वं कारणं पवित्रं पावनं ज्ञानप्रकाश्यं[७] परं ब्रह्म यस्य सर्वात्मनो मम सोऽहम् ऊर्ध्वपवित्रः । वाजिनीव वाजवतीव । वाजम् अन्नम् ; तद्वति सवितरीव[८] इत्यर्थः ।

---

१. जपार्थः ॥ २. न केवलं स्वाध्यायादिकर्मविधानार्थम् ॥

३. अन्यत्र विनियोजकप्रमाणान्तरेऽसति प्रकरणानुसरणमेव न्याय्यम् ॥

४. 'अवकल्प्यते' इति (आ॥) पाठतोऽयं (वा॥) पाठः साधीयान् । शुद्धसत्त्वस्य उपासनमाशुफलं ददाति, ज्ञानं वा उत्पद्यते - इत्युपपद्यते इत्यर्थः ॥

५. 'व्रश्चू च्छेदने' इति धातोरुत्पन्नो वृक्षशब्द उच्छेदात्मकत्वं संसारवृक्षस्य सूचयतीति भावः । 'उच्छेद्यात्मकस्य' इति वा ॥

६. अन्तर्यामिसंनिधिमात्रेण हि जगद्विपरिवर्तते ॥ गी.भा. ९-१०

७. ऊर्ध्वमूलो हि सर्वः संसारवृक्षः । अतोऽहमपि ऊर्ध्वपवित्रः । द्र.का. २-३-१, गी. १५-१. 'ज्ञानप्रकाश्यं' इत्यस्यानन्तरं 'पवित्रम्' इत्यधिकं आ ॥

८. अयं वा ॥ पाठः । 'सवितरि' इत्येतावदेव तु आ ॥

यथा सवितरि अमृतम् आत्मतत्वं विशुद्धं प्रसिद्धं श्रुतिस्मृतिशतेभ्यः[१], एवं स्वमृतं शोभनं विशुद्धम् आत्मतत्त्वम्[२] अस्मि भवामि । द्रविणं धनं सवर्चसं दीप्तिमत् ; तदेव आत्मतत्त्वम् । 'अस्मि' इत्यनुवर्तते । ब्रह्मज्ञानं वा आत्मतत्त्वप्रकाशकत्वात् सवर्चसं द्रविणमिव द्रविणम् । मोक्षसुखहेतुत्वात्[३] । अस्मिन् पक्षे 'प्राप्तं मया' इत्यध्याहारः कर्तव्यः[४] । सुमेधाः । शोभना मेधा सर्वज्ञत्वलक्षणा[५] यस्य मम सोऽहं सुमेधाः । संसारस्थित्युत्पत्त्युपसंहारकौशलयोगात्[६] सुमेधस्त्वम् । अत एव, अमृतः अमरणधर्मा। अक्षितः अक्षीणः, अव्ययः; अक्षतो वा[७] । अमृतेन वा उक्षितः[८] सिक्तः। 'अमृतोक्षितोऽहम्' (?) इत्यादि ब्राह्मणम् ।

## कर्मणो ज्ञानहेतुत्वम् -

५२. इति एवं त्रिशङ्कोः ऋषेः ब्रह्मभूतस्य ब्रह्मविदः[९] वेदानुवचनम् । वेदः वेदनम् । आत्मैकत्वविज्ञानम् । तस्य प्राप्तिम् अनुवचनम् वेदानुवचनम् । आत्मनः कृतकृत्यताप्रख्यापनार्थं **वामदेववत्**[१०] त्रिशङ्कुना आर्षेण[११] दर्शनेन दृष्टः मन्त्राम्नाय आत्मविद्याप्रकाशक इत्यर्थः ॥

---

१. सवितरि विशुद्धमात्मतत्त्वमिति श्रुतिषु (छा. ३-१, २, बृ. ५-५-३, तै.ना. १४ इत्याद्यासु), स्मृतिषु च (गी. ८-४ इत्याद्यासु) प्रसिद्धम् ॥

२. 'अमृतम्' इत्यस्यार्थ आत्मतत्त्वमिति ॥

३. आत्मतत्त्वं स्वयंप्रकाशत्वात् द्रविणम् इति प्रथमं व्याख्यानम् । यथा लोके द्रविणं सुखप्राप्तिहेतुः, एवं ब्रह्मज्ञानं मोक्षसुखप्राप्तिहेतुत्वात् द्रविणम् इति द्वितीयम् ॥

४. 'अस्मि' इत्यनुवृत्तिर्नाश्रयणीया ॥ ५. 'सर्वज्ञलक्षणा' इति आ ॥

६. 'संसारस्थित्युत्पत्तिसंहार' इति वा ॥; कौशलं चेदं कूटस्थचैतन्यस्वरूपेण स्थितस्यैव मायया संसारस्थित्यादिहेतुत्वम् ॥

७. अक्षितः इत्यस्यैव अर्थः, अक्षत इति । 'उक्षितो वा' इति आ ॥ पाठे अकारस्थाने उकारः प्रमादतः स्यात् क्षिप्तः ॥

८. अमृतोक्षित इति समस्तपाठं स्वीकृत्येदं व्याख्यानम् ॥

९. कर्मानुष्ठानात् चित्तशुद्धिमवाप्य ब्रह्मज्ञानद्वारा ब्रह्मभूतस्येत्यर्थः ॥

१०. वामदेवस्य वेदानुवचनं ऐतरेयोपनिषदि (२-४), बृहदारण्यके च (१-४-१०) श्रूयते ॥ ११. प्रातिभेन (ज्ञानेन) ॥

अस्य च जपो विद्योत्पत्त्यर्थोऽवगम्यते[१] । 'ऋतं च' - इत्यादि कर्मोपन्यासादनन्तरं[२] च वेदानुवचनपाठात् एतदवगम्यते - एवं श्रौतस्मार्तेषु नित्येषु कर्मसु युक्तस्य निष्कामस्य, परं विविदिषोः, आर्षाणि दर्शनानि प्रादुर्भवन्त्यात्मादिविषयाणि[३] इति ॥१०॥

## ११. विद्योत्पत्त्यर्थमनुष्ठेयानि कर्माणि

**वेदमनूच्याऽऽचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद। धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव।**

---

१. न तु अदृष्टफलार्थः । मन्त्रार्थपर्यालोचनात् फलान्तरासंकीर्तनाच्चैतदवगम्यते इत्यभिप्रायः । अहं वृक्षस्येति मन्त्रस्य ऋषिस्त्रिशङ्कुः, पङ्क्तिश्छन्दः, परमात्मा देवता; ब्रह्मविद्यार्थे जपे विनियोगः । ऋष्यादिस्मरणपूर्वकं जपः कर्तव्य इति सूचनाय ऋषिनामोल्लेखः कृतः । 'अधिगम्यते' इति वा ॥

२. 'धर्मोपन्यासात्' इति (वा॥) पाठापेक्षया कर्मेत्येव गृहीतं वरम् । वाक्यशेषे कर्मशब्दस्यैव ग्रहणात् ॥

३. अत्र 'आत्मादिविषयाण्यार्षाणि दर्शनानि भवन्ति' इति वचनात् उपदेशं विनापि कर्मानुष्ठानबलादात्मज्ञानमपि केषाञ्चित् अतिविशुद्धकार्यकरणानां पुरुषधौरेयाणामुत्पद्यत एवेत्याचार्यमतमिति गम्यते । न तु केवलमात्मविविदिषायामेव पर्यवस्यन्ति कर्माणि यथाहुः केचिदिति । द्रष्टव्यं बृ.भा. १-४-२.

आचार्यदेवो भव । अतिथि देवो भव । यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि । नो इतराणि । यान्यस्माकँ सुचरितानि । तानि त्वयोपास्यानि । नो इतराणि । ये के चास्मच्छ्रेयाँसो ब्राह्मणाः । तेषां त्वयाऽऽसनेन प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम्। भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्। ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाःस्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः । एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् । एवमु चैतदुपास्यम् ॥११॥

सत्यादिकर्तव्योपदेशप्रयोजनम् -

५३. 'वेदमनूच्य' इत्येवमादिकर्तव्योपदेशारम्भः[१] प्राग् ब्रह्मविज्ञानात्

---

१. 'कर्तव्यतोपदेशारम्भः' इति मुद्रितपाठ एवं परिवर्तितः ॥

नियमेन कर्तव्यानि श्रौतस्मार्तकर्माणि इत्येवमर्थः । अनुशासनश्रुतेः पुरुषसंस्कारार्थत्वात्[१] । संस्कृतस्य हि विशुद्धसत्त्वस्य आत्मज्ञानम् अञ्जसैव[२] उत्पद्यते। 'तपसा कल्मषं हन्ति विद्ययामृतमश्नुते' (मनु. १२-१०४) इति हि स्मृतिः[३]। वक्ष्यति च 'तपसा ब्रह्म विजिज्ञासस्व' (३-१) इति[४] । अतो विद्योत्पत्त्यर्थम् अनुष्ठेयानि कर्माणि । 'अनुशास्ति' इत्यनुशासनशब्दात् । अनुशासनातिक्रमे हि दोषोत्पत्तिः[५]। प्रागुपन्यासाच्च कर्मणाम् । केवलब्रह्मविद्यारम्भाच्च पूर्वं कर्माण्युपन्यस्तानि । उदितायां च[६] विद्यायाम्[७] 'अभयं प्रतिष्ठां विन्दते' (२-७), 'न बिभेति कुतश्चन' (२-९), 'किमहं साधु नाकरवम्' (२-९) इत्येवमादिना[८] कर्मनैष्किञ्चन्यं दर्शयिष्यतीत्यतोऽवगम्यते[९] पूर्वोपचितदुरितक्षयद्वारेण विद्योत्पत्त्यर्थानि कर्माणीति। मन्त्रवर्णाच्च । 'अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' (ई.मा. १४) इति[१०] ॥

---

१. 'अनुशास्ति' इति विद्याप्रकरणे विधानात् मुमुक्षोः संस्कारार्थत्वं कर्मणामित्यवगम्यते। केवलकर्मविधानस्यात्राप्रकृतत्वात् ॥

२. अप्रतिबन्धेन - इत्यर्थः ॥

३. कर्मणां संस्कारद्वारा विद्योत्पत्त्यर्थमुक्तस्मृतेरवगम्यत इत्यभिप्रायः । 'तपो विद्या च विप्रस्य निःश्रेयसकरं परम्' इति हि पूर्वार्धम् ॥

४. भृगुवल्ल्यां तु भाष्ये तपःशब्दो बाह्यान्तःकरणसमाधानार्थकत्वेन व्याख्यातः । तच्च समाधानं स्वधर्माचरणेनैव सम्यगनुष्ठितेन सिध्यतीत्यभिप्रायेण स्यात्तद्वाक्योदाहरणमत्र ॥

५. अतो नियमेन कर्तव्यानि ॥ ६. उदितायां तु इति त्वर्थे चः ॥

७. 'ब्रह्मविद्यायाम्' इति वा ॥ ८. इत्यादिना इति वा ॥

९. विद्योत्पत्त्यर्थमेव न तु फलप्राप्तौ विद्यासहकारित्वेनापीत्येतत्कथमवगम्यत इत्यत आह - उदितायां विद्यायां कर्मनैष्किञ्चन्यं दर्शयिष्यति इत्यतः इति ॥

१० इयं हि माध्यन्दिनश्रुतिः केवलविद्यैवामृतत्वसाधनमिति ब्रवीति । अत्र हि देवतादर्शनकर्मसमुच्चयस्य साध्यसाधनैषणाद्वयलक्षणस्य मृत्योरतितरणार्थत्वमुक्त्वा, तन्नान्तरीयकतयोत्पन्नया विद्यया अमृतत्वमश्नुते इति कीर्तितम् । अतो मृत्य्वतितरणद्वारेण विद्योत्पत्त्यर्थत्वं कर्मणामिति गम्यत इति भावः ॥ द्र.मां.का.भा. ३-२५

## द्विः कर्मोपदेशप्रयोजनम् -

५४. ऋतादीनां पूर्वत्रोपदेश आनर्थक्यपरिहारार्थः[१] । इह तु ज्ञानोत्पत्त्यर्थत्वात् कर्तव्यतानियमार्थः[२] ॥

## सत्यादीन्यनुष्ठेयानि -

५५. वेदम्[३] अनूच्य अध्याप्य आचार्यः अन्तेवासिनं शिष्यं अनुशास्ति[४] ग्रन्थग्रहणात् अनु पश्चात् शास्ति तदर्थं ग्राहयति इत्यर्थः । अतोऽवगम्यते अधीतवेदस्य[५] धर्मजिज्ञासाम् अकृत्वा गुरुकुलान्न समावर्तितव्यम्[६] इति । 'बुद्ध्वा'[७] कर्माणि चारभेत्'[८] (?) इति स्मृतेश्च ॥

कथम् अनुशास्तीति ? आह[९] । सत्यं वद यथाप्रमाणावगतं वक्तव्यं[१०] तद्वद । तद्वत् धर्मं चर । धर्मः इत्यनुष्ठेयानां सामान्यवचनम् । सत्यादिविशेषनिर्देशात्[११] । स्वाध्यायात् अध्ययनात् मा प्रमदः प्रमादं मा कार्षीः । आचार्याय आचार्यार्थं प्रियम्

---

१. अपरविद्यासहकारित्वेनापि सार्थक्यं वक्तुं ऋतं चेत्याद्युपदेश इत्यर्थः ॥

२. इह पुनर्विद्याया उत्पत्त्यर्थं नियमेन कर्तव्यानि कर्माणीत्युपदिश्यन्ते । न तु विद्यासहकारित्वेन । विद्यया अविधेयत्वात्, विद्याफलस्य च असाध्यत्वात्, विद्याकर्मणोर्विरोधाच्चेत्यर्थः ॥ छां. भा. ८-१५-१, सू.भा. ३-४-१३, ३-४ १६.

३. वेदमित्येकवचने न निर्भरः । एकं स्वशाखामात्रं द्वौ त्रीन् चतुरो वा साङ्गोपाङ्गानित्यर्थो द्रष्टव्यः ॥

४. अनुशासनं कुर्यात् ।

५. अत्र षष्ठ्यन्तस्यास्य कुत्रान्वय इति नावगम्यते । तृतीयान्तेनैवानेन भाष्यमिति भाति । न च पाठान्तरमुपलभ्यते । अत्र सुधिय एव प्रमाणम् ॥

६. 'वेदमधीत्य स्नायात्' (बो.गृ. ६-१) इति स्मृतिरेतदानुगुण्येन नेया इत्यभिप्रायः॥ शा.भा. १-१-१.

७. वेदार्थं बुद्ध्ध्वा इत्यर्थः ॥

८. कुर्वीत वा ॥

९. 'अत आह' वा ॥

१०. 'वक्तव्यं च वा॥; 'तत्' इति च नास्ति तत्र ॥

११. सत्यादीनामप्यनुष्ठेयत्वेनैवोपदेशात्, विशेषेणानिर्दिष्टानुष्ठेयसामान्यमिह धर्मशब्देनोच्यत इति गम्यत इत्यभिप्रायः ॥

इष्टं धनम् आहृत्य आनीय दत्त्वा विद्यानिष्क्रयार्थम्, आचार्येण चानुज्ञातोऽनुरूपान् दारान् आहृत्य, प्रजातन्तुं प्रजासंतानं मा व्यवच्छेत्सीः । प्रजासन्ततेर्विच्छित्तिर्न कर्तव्या ; अनुत्पद्यमानेऽपि पुत्रे पुत्रमाम्यादिकर्मणा तदुत्पत्तौ यत्नः कर्तव्य इत्यभिप्रायः । प्रजाप्रजन[१] प्रजातित्रयनिर्देशसामर्थ्यात् । अन्यथा[२] 'प्रजनश्च' इत्येतदेकमेव[३] अवक्ष्यत्[४]। सत्यात् न प्रमदितव्यम् प्रमादो न कर्तव्यः । सत्याच्च प्रमदनम् अनृतप्रसङ्गः । प्रमादशब्दसामर्थ्यात् विस्मृत्यपि अनृतं न वक्तव्यम् इत्यर्थः[५]। अन्यथा असत्यवदनप्रतिषेध एव स्यात्[६] । धर्मान्न प्रमदितव्यम् । धर्मशब्दस्य अनुष्ठेयविषयत्वात्[७] अननुष्ठानं प्रमादः । स न कर्तव्यः । अनुष्ठातव्य एव धर्म इति यावत् । एवं कुशलात् आत्मरक्षणार्थात्कर्मणो न प्रमदितव्यम् । भूतिः विभूतिः। तस्यै भूत्यै भूत्यर्थात् मङ्गलयुक्तात्[८] कर्मणः न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । स्वाध्यायः अध्ययनम्, प्रवचनम् अध्यापनम्; ताभ्यां न प्रमदितव्यम्[९]। ते हि [१०] नियमेन कर्तव्ये इत्यर्थः । तथा देवपितृकार्याभ्यां न

---

१. वा ॥ पाठोऽयम् । आ॥ पाठे तु 'प्रजाप्रजनन' इति वर्तते । एवं 'प्रजनश्च' इत्युत्तरत्रापि। तत्र तु चशब्दादानसामर्थ्यादवगम्यते भाष्ये श्रुतिमूलमेवानुसृतमितीत्यतो 'प्रजन' इत्येव धृतोऽस्माभिः ॥

२. केवललौकिकप्रयत्नस्यैव विवक्षितत्वे ॥

३. 'इत्येतावदेव' इति पाठान्तरम् ॥

४. ऋतं चेत्यनुवाके इति शेषः ॥

५. इतोऽनन्तरम् 'अनृतवदनविषये दोषश्रुतेश्च 'योऽनृतं वदति समूलो वा एष परिशुष्यति'' इति । 'न सत्यात्परमो धर्मो नानृतात्पातकं परम्' इति स्मृतेः'' इत्यधिकं क्वचित् ॥

६. नानृतत्यागे प्रयत्नो विहितः स्यादिति भावः ।

७. 'अनुष्ठेयविशेषविषयत्वात्' इति (वा॥) पाठे विशेषशब्दोऽनपेक्षितः ॥

८. भूत्यै इति पञ्चम्यर्थे प्रयोग इति भावः ॥

९. 'स्वाध्यायः' इत्याद्येतदन्तो भागो नास्ति वा ॥

१०. 'तद्धि तपः' (अनु ९) इत्यवधारणस्मारणार्थो हिशब्दः ॥

प्रमदितव्यम्। दैवापित्र्ये कर्मणी कर्तव्ये । मातृदेवः । माता देवः यस्य स त्वं मातृदेवः भव स्याः। एवं पितृदेवः[१], आचार्यदेवः, अतिथिदेवः भव । देवतावत् उपास्या एते इत्यर्थः ॥

यान्यपि च अन्यानि अनवद्यानि अनिन्दितानि शिष्टाचारलक्षणानि कर्माणि। तानि सेवितव्यानि कर्तव्यानि त्वया । नो न कर्तव्यानि[२] । इतराणि सावद्यानि शिष्टकृतान्यपि[३] । यानि अस्माकम् आचार्याणां सुचरितानि शोभनचरितानि आम्नायाद्यविरुद्धानि तान्येव त्वया उपास्यानि अदृष्टार्थानि अनुष्ठेयानि । नियमेन कर्तव्यानि इति यावत्[४]। नो इतराणि विपरीतानि, आचार्यकृतान्यपि[५] ॥

## गुरुजनेषु कर्तव्यम् -

५६. ये के च अविशेषिताः[६] आचार्यत्वादिधर्मैः अस्मत् अस्मत्तः श्रेयांसः प्रशस्यतराः[७] - ते च ब्राह्मणाः[८] न क्षत्रियादयः-तेषाम् आसनेन आसनदानादिना त्वया प्रश्वसितव्यम् । प्रश्वसनं प्रश्वासः श्रमापनयः । तेषां श्रमस्त्वया अपनेतव्य

---

१. पितृदेवो भव, आचार्यदेवोभव - इति भवशब्दाभ्यासो वा ॥

२. 'अकर्तव्यानि' इति आ॥; अत्र धृतस्तु वा ॥ पाठः ॥

३. विस्मृत्येति शेषः ॥ न हि शिष्टाः सावद्यं कर्म ज्ञात्वा कुर्युः । अथवा विशिष्टसंनिवेशे महावीर्यैः कृतान्यपि शिष्टाचारत्वेन स्वीकृत्य नानुकरणीयानीत्यर्थः । यथा जामदग्न्यः पितुराज्ञया स्वजननीं जघान, शुनःशेफो मातापित्रोरभिप्रायं बद्ध्वा जननीजनकौ तत्याज इत्यादीनि कर्माणि नानुकरणीयानीत्यर्थः ॥

४. इत्येतत् वा ॥

५. शास्त्रनिषिद्धत्वेनावगतान्यपि सदाचारत्वेन न स्वीकर्तव्यानीत्यर्थः । अत्र पूर्वमीमांसागतं स्मृत्याचारप्रामाण्याधिकरणं सभाष्यवार्तिकं परिशीलयितव्यम्॥

६. 'विशेषिताः' इति मुद्रितपाठे तु 'धर्मैः' इत्युत्तरेणान्वयः । ततो वरं 'अविशेषिताः' इत्येव स्वीकृतम् ॥

७. 'प्रशस्ततराः' वा ॥; शास्त्राध्ययनादिना इति शेषः ॥

८. यद्यपि क्षत्रियादयोऽपि योग्याः संभावनीया एव, ब्राह्मणेषु तु गौरवातिशयः समादरणीय इति बोधनार्थं ब्राह्मणग्रहणम् ॥

इत्यर्थः। तेषां वा[१] आसने गोष्ठीनिमित्ते समुदिते तेषु[२] न प्रश्वसितव्यं प्रश्वासोऽपि न कर्तव्यः । केवलं तदुक्तसारग्राहिणा भवितव्यम् ॥

## दानस्यावश्यकर्तव्यता -

५७. किञ्च यत्किञ्चिद् देयं तच्छ्रद्धयैव दातव्यम् । अश्रद्धया अदेयं न दातव्यम्[३] । श्रिया विभूत्या देयं दातव्यम् । ह्रिया लज्जया च देयम् । भिया भीत्या च[४] देयम् । संविदा च । संवित् मित्रादिकार्यम्[५]॥

## अनुष्ठानविषयकसंशये शिष्टाचारः प्रमाणम् -

५८. अथैवं वर्तमानस्य यदि कदाचित् ते तव श्रौते स्मार्ते वा कर्मणि वृत्ते वा आचारलक्षणे विचिकित्सा संशयः स्यात्[६] । ये तत्र तस्मिन् देशे काले वा ब्राह्मणाः तत्र कर्मादौ 'युक्ताः' इति व्यवहितेन सम्बन्धः कर्तव्यः । संमर्शिनः विचारक्षमाः । युक्ता अभियुक्ताः कर्मणि वृत्ते वा[७] । आयुक्ताः अपरप्रयुक्ताः[८] । अलूक्षाः अरूक्षाः अक्रूरमतयः । धर्मकामाः अदृष्टार्थिनः । अकामहता इत्येतत् । स्युः भवेयुः । ते ब्राह्मणाः[९] यथा येन प्रकारेण तत्र तस्मिन् कर्मणि वृत्ते वा वर्तेरन् तथा त्वमपि वर्तेथाः ॥

---

१. 'च' इति आ ॥

२. तेषाम् आस्थायिकायां सत्यां संभ्रमात्किञ्चिदपि न वक्तव्यम् इत्यर्थः । एतच्च 'आसने न प्रश्वसितव्यम्' इति सप्तमीपाठमासनशब्दस्य गृहीत्वा । आसनेन इति तृतीयामादाय तु प्रथमं व्याख्यानम् । अत एव 'तेषां वा' इति पाठो गरीयान् चयुक्तात्।

३. गी. १७-२८

४. 'भिया च भयेन' इति आ ॥

५. 'संविदा च मैत्र्यादिकार्येण देयम्' इति वा ॥; सात्त्विकदानवर्णनं (गी. १७-२०) गीतादिस्मृतेरधिगन्तव्यम् ॥

६. स्याच्चेत् । 'स्यात् भवेत्' इति च पाठान्तरे ॥

७. ये ब्राह्मणाः संमर्शिनः, तत्र युक्ता अभियुक्ताः इत्यन्वयप्रदर्शनमेतत् ॥

८. आयुक्ताः इत्येतत् 'अयुक्ताः' इत्यस्यैव रूपान्तरम् इति भावः ॥

९. 'ब्राह्मणा' इति नास्ति आ ॥

अथ अभ्याख्यातेषु । अभ्याख्याताः[1] अभ्युक्ताः । दोषेण संदिह्यमानेन संयोजिताः केनचित् । तेषु च यथोक्तं सर्वम् उपनयेत् 'ये तत्र' इत्यादि[2] ॥

**उपसंहारः -**

५९. एष आदेशः विधिः । एष उपदेशः पुत्रादिभ्यः पित्रादीनाम् । एषा वेदोपनिषत् वेदरहस्यम् । वेदार्थ[3] इत्येतत् । एतदेव[4] अनुशासनम् ईश्वरवचनम् । आदेशवाच्यस्य[5] विधेरुक्तत्वात् । सर्वेषां वा प्रमाणभूतानाम् अनुशासनमेतत् । यस्मादेवम् तस्मात् एवं यथोक्तं सर्वम् उपासितव्यं कर्तव्यम् । एवम् उ च एतदुपास्यम्। उपास्यमेव चैतत्, न अनुपास्यम् इति आदरार्थं पुनर्वचनम् ॥११॥

## परमपुरुषार्थसाधनविषये चिन्ता

**चिन्ताविषयः -**

६०. अत्रैतच्चिन्त्यते[6] विद्याकर्मणोर्विवेकार्थम् । किं कर्मभ्य एव केवलेभ्यः परं श्रेयः, उत विद्यासव्यपेक्षेभ्यः[7], अहोस्वित् विद्याकर्मभ्यां

---

१. 'अभ्याख्याताः' इत्येतत् त्यक्तम् आ ॥

२. तेषु च संदिह्यमानदोषेण संयोजितेषु सर्वमेतत्पूर्वोक्तं उपानीय संबन्धनीयम् - ये तत्र तेषु अभियुक्ताः । अपरप्रयुक्ताः, अक्रूरमतयः, केवलं धर्मदृष्टय ब्राह्मणाः स्युः ते यथा वर्तेरन् त्वमपि तथैव वर्तेथा इतीत्यर्थः ॥

३. वेदोपदिष्टार्थसार इत्यर्थः ॥

४. एतच्छब्दाभ्यासलब्धमवधारणम् ॥

५. वा ॥ पाठोऽयम् । 'आदेशवाक्यस्य' इति आ ॥; एष आदेशः इति वाक्येन विधेरुक्तत्वात् अपुनरुक्ततायै 'ईश्वरवचनम्' इति अनुशासनशब्दो व्याख्येय इत्यर्थः॥

६. यद्यपि अवतरणिकाभाष्ये एव (भा.भा. २) केवलकर्मणः, विद्यासहितकर्मणश्च निःश्रेयसहेतुत्वं निराकृत्य विद्यया कर्मोपादानहेतुपरिहारादेव मोक्ष इति प्रतिष्ठापितम्; तथापि शीक्षावल्ल्यां बहुशो विद्याविधानात् विज्ञानात्स्वाराज्यप्राप्तिश्रवणात्, 'ऋतं च', 'धर्मं चर' इत्यादिना भूयो भूयः कर्मविधानाच्च केवल विद्या नालं परप्राप्तये इति शङ्का स्यात्कस्यचिदितीह पुनरपि वितत्य चिन्त्यते ॥

७. प्रधानभूतेभ्यः कर्मभ्यः अङ्गभूतविद्यासहितेभ्यः ॥

संहताभ्याम्[१], विद्याया वा कर्मापेक्षायाः[२], उत केवलाया[३] एव विद्याया इति ॥

## केवलेभ्यः कर्मभ्यो न निःश्रेयसम् -

६१. तत्र केवलेभ्य एव कर्मभ्यः स्यात् । समस्तवेदार्थज्ञानवतः कर्माधिकारात्[४]। वेद कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना' (मनु. २-१६५) इति स्मरणात्[५]। अधिगमश्च सहोपनिषदर्थेन आत्मज्ञानादिना[६] । 'विद्वान् यजते', 'विद्वान् याजयति' इति च विदुष एव कर्मण्यधिकारः प्रदर्श्यते सर्वत्र[७] । 'ज्ञात्वा चानुष्ठानम्' (?) इति च । कृत्स्नश्च वेदः कर्मार्थ इति हि मन्यन्ते केचित्[८] । कर्मभ्यश्चेत् परं श्रेयो नावाप्यते, वेदोऽनर्थकः[९] स्यात् ॥

न । नित्यत्वान्मोक्षस्य । नित्यो हि मोक्ष इष्यते । कर्मकार्यस्य चानित्यत्वं प्रसिद्धं लोके । कर्मभ्यश्चेत् श्रेयः, अनित्यं स्यात् । तच्चानिष्टम् । 'तद्यथेह कर्मचितो लोकः क्षीयते' (छा. ८-१-६) इति न्यायानुगृहीतश्रुतिविरोधात्[१०] । ननु[११] काम्य-

---

१. समप्रधानाभ्याम् । २. प्रधानभूताया विद्यायाः कर्मसहितायाः ॥

३. इतरनिरपेक्षायाः ॥ ४. सू.भा. ३-४-६

५. न केवलं छान्दोग्यादि (८-१५-१) श्रुतयः स्मृतयश्चैवं वदन्तीति भावः ॥

६. ननु स्मृतौ रहस्याधिगममात्रमुदितं नात्मज्ञानमपीति शङ्कायामाह 'अधिगमश्च' इति 'आदिना' इति देवतादिज्ञानं गृह्यते ॥

७. कर्मप्रस्तावे तत्र तत्रैवं श्रूयते । तच्च गमकं कर्मणा सकलवेदार्थज्ञानमपेक्षितमित्यत्र। आत्मज्ञानमपि कर्तृसंस्कारकतयापेक्ष्यते इति भावः ॥

८. कर्ममीमांसकाः । अत्र (सू.भा१-१-४) समन्वयसूत्रभाष्ये प्रथमः पूर्वपक्षोऽनुसंधेयः॥

९. व्यर्थ एव स्यात् । अर्थान्तराभावाद्वेदस्येत्यर्थः ॥

१०. एतद्वाक्यं वा ॥ पाठे नास्ति । नान्वेति च पूर्ववाक्येन अञ्जसा । न हि श्रुतिविरोधात् अनिष्टत्वं साध्यते, अनित्यत्वं वेति । अथवा 'न चारभ्योऽपि नित्यः स्यादिति शङ्कनीयम्' इत्यर्थकं वाक्यमेतस्मात्प्राक् स्थितं त्रुटितं स्यादिति कल्पनीयम् । एतदुदाहरणसामर्थ्यात् ॥ ११. '[illegible]' [illegible] आ ॥ पाठे न विद्यते ॥

प्रतिषिद्धयोरनारम्भात्, आरब्धस्य च कर्मणः उपभोगेन[१] क्षयात्, नित्यानुष्ठानाच्च प्रत्यवायानुत्पत्तेः, ज्ञाननिरपेक्ष एव मोक्षः[२] - इति चेत् । तच्च न । कर्मशेषसंभवात्[३] तन्निमित्तं[४] शरीरान्तरोत्पत्तिः प्राप्नोतीति प्रत्युक्तम्[५] । कर्मशेषस्य च नित्यानुष्ठानेनाविरोधात् क्षयानुपपत्तिरिति च[६] ॥

यदुक्तं 'समस्तवेदार्थज्ञानवतः कर्माधिकारात्' इत्यादि । तच्च न । श्रुतज्ञानव्यतिरेकादुपासनस्य । श्रुतज्ञानमात्रेण हि कर्मण्यधिक्रियते, नोपासनम्[७] अपेक्षते[८]। उपासनं च श्रुतज्ञानादर्थान्तरं विधीयते[९] मोक्षफलम्[१०] । अर्थान्तर-

---

१. 'उपभोगेनैव' वा ॥

२. न ह्यारभ्यो मोक्षः इष्यतेऽस्माभिः ॥ येन तस्यानित्यत्वं प्रसज्येत; आत्मन्यवस्थानमेव तु मोक्ष उपवर्णितविधया कर्मद्वारेणावाप्यत इत्यस्माकं मतमिति भावः ॥

३. 'शेषकर्मसंभवात्' आ ॥

४. 'तन्निमित्ता' इति वा ॥ पाठः ॥

५. एतत् इति शेषः । अवतरणिकायां हि (भा.भा. ३) एतत्प्रत्युक्तम् ॥

६. एतदपि तत्रैव (भा.भा. ४) प्रोक्तम् । इह पुनरन्वारम्भणेन तदुच्यते समस्तवेदार्थज्ञानवतः कर्माधिकारः इति पक्षनिरासार्थम् । एवं च यदि कृत्स्नोऽपि वेदः कर्मार्थ एवेतीष्यते, तर्हि वेदार्थज्ञानं नालं मोक्षाधिगमायेत्यनिष्टमापतेत्, मोक्षवादिनीनां श्रुतीनामप्रामाण्यं चेत्यभिप्रायः ॥

७. 'नोपासनाम्' इति पाठान्तरम् । 'नोपासनज्ञानम्' इति (वा॥) पाठे 'ज्ञानम्' इत्यधिकम् ॥

८. छान्दोग्ये 'वेदमधीत्य' (छां. ८-१५-१) इत्यध्ययनमात्रश्रवणात् अध्ययनमात्रधत एव कर्मविधिः । तथा च यद्यपि कर्मावबोधनमधिकारकारणं भवेत्, तथापि औपनिषदमुपासनमपि तत्र नापेक्ष्यते इति भावः । सू.भा. ३-४-१२.

९. उपासनं च न केवलं भावनात्मकं सगुणब्रह्मणः, किन्तु परब्रह्मणो निदिध्यासनात्मकमपि । तच्च दर्शनपर्यवसायित्वात् यावद्दर्शनं कर्तव्यमिति विहितमिति सू.भा. ४-१-१ । अपरायत्तबोध एव निदिध्यासनम् इति तु वार्तिकप्रस्थानम् ॥ बृ.वा. २-४-२१७... २२४.

१०. मोक्षफलम् इति उपासनस्यैव विशेषणम् ॥

प्रसिद्धिश्च[१] स्यात् । श्रोतव्य इत्युक्त्वा तद्व्यतिरेकेण 'मन्तव्यो निदिध्यासितव्यः' (बृ. २-४-५) इति यत्नान्तरविधानात्[२] । मनननिदिध्यासनयोश्च प्रसिद्धं श्रवणज्ञानादर्थान्तरत्वम्[३] ॥

## विद्यासव्यपेक्षकर्मभ्योऽपि न मोक्षः -

६२. एवं तर्हि विद्यासव्यपेक्षेभ्यः कर्मभ्यः स्यान्मोक्षः । विद्यासहितानां च कर्मणां भवेत् कार्यान्तरारम्भसामर्थ्यम् । यथा स्वतो मरणज्वरादि-कार्यारम्भसामर्थ्यानामपि[४] विषदध्यादीनां मन्त्रशर्करादिसंयुक्तानां कार्यान्तरारम्भ-सामर्थ्यम्[५] एवं विद्यासहितैः कर्मभिर्मोक्ष आरभ्यते इति चेत् । आरभ्यस्यानित्यत्वात् इत्युक्तो दोषः । वचनात् आरभ्योऽपि नित्य एवेति चेत्[६] । न । ज्ञापकत्वाद्वचनस्य। **वचनं नाम यथाभूतस्यार्थस्य ज्ञापकं नाविद्यमानस्य[७] कर्तृ । न हि वचनशतेनापि नित्यमारभ्यते आरब्धं वा अविनाशि भवेत्[८] ॥**

---

१. 'अर्थान्तरप्रसिद्धम्' इति आ ॥ 'अर्थान्तरप्रसिद्धेश्च' इति वा ॥; तदुभयमपि परित्यज्य 'अर्थान्तरप्रसिद्धिश्च' इति पाठ आदृतः । उत्तरत्र अर्थान्तरत्वमेव हि साध्यत इति ॥

२. यदा उपासनमेव श्रुतज्ञानादर्थान्तरम् किमु वक्तव्यं तत्फलं दर्शनं नापेक्षितं कर्माधिकारे इतीति भावः ॥

३. एतच्चाऽऽत्मवाक्यश्रवणं कर्माधिकाराङ्गमित्यभ्युपगम्योक्तम् । वस्तुतस्तु आत्मज्ञानार्थं विहितस्य श्रवणस्यैव कर्माधिकारकारणत्वं न युक्तम् तत्रानुपयोगात्।

४. 'समर्थानामपि' इति वा ॥

५. अन्यत्राप्यानीतोऽयं दृष्टान्तः । द्रष्टव्यम् सू.भा.४-१-१६, बृ.भा.३-३, (संबन्धभाष्यम्)॥

६. 'न च पुनरावर्तते' (छां. ४-१५-१) इति श्रुतिवचनबलात् कर्मारब्धोऽपि नित्यः स्यात् इति शङ्कितुराशयः ॥

७. 'विद्यमानस्य कर्तृ' इति आ । पाठोऽसाधुः । अत्र धृतस्तु वा ॥ पाठः । वचनं ज्ञापकमेव न कारकमिति प्र.भा. ६-२, बृ.भा. २-१-२०, ३-१ (उपसंहारभाष्यम्) ४-३-२३ - इति भाष्येषूद्घोषितम् ॥

८. न हि अयुक्तमपि ज्ञापयेत् वचनम् । अप्रामाण्यप्रसङ्गात् । अतोऽनावृत्तिवचनमन्यथैव नेयमिति भावः ॥

## ज्ञानकर्मणोः समप्राधान्येन समुच्चितयोरपि न मोक्षहेतुता -

६३. एतेन विद्याकर्मणोः संहतयोर्मोक्षारम्भकत्वं प्रत्युक्तम् । विद्याकर्मणी मोक्षप्रतिबन्धहेतुनिवर्तके इति चेत्[१] । न । कर्मणः फलान्तरदर्शनात् । उत्पत्तिसंस्कारविकाराप्तयो[२] हि फलं कर्मणो दृश्यते । उत्पत्त्यादिफलविपरीतश्च मोक्षः[३] ॥

गतिश्रुतेराप्य इति चेत् । 'सूर्यद्वारेण'[४](मुं. १-२-२१), 'तयोर्ध्वमायन्' (का. २-३-१६, छां. ८-६-६) इत्येवमादिगतिश्रुतिभ्यः प्राप्यो मोक्ष इति चेत् । न सर्वगतत्वात्, गन्तृभिश्च अनन्यत्वात् । आकाशादिकारणत्वात्[५] सर्वगतं ब्रह्म; ब्रह्माव्यतिरिक्ताश्च सर्वे विज्ञानात्मानः । अतो नाप्यो मोक्षः । गन्तुरन्यद् विभिन्नदेशं च[६] भवति गन्तव्यम् । न हि येनैवाव्यतिरिक्तं यत्, तत् तेनैव

---

१. तथा च नानित्यत्वं मोक्षस्य प्रसजतीति भावः ॥

२. 'उत्पत्तिविकारसंस्काराप्तयो हि' इति वा ॥; उत्पत्त्यादिचतुष्टयमेव कर्मकार्यमिति न्यायो भाष्यान्तरेऽप्यानीतः । द्रष्टव्यम् सू. १-१-५, बृ. ३-३- संबन्धभाष्यम् ॥

३. नित्यसिद्धत्वात्, मोक्षोत्पत्त्यादिप्रतिपादकप्रमाणाभावाच्चेति भावः । न च केवलं प्रतिबन्धनिवर्तनेन अभिव्यञ्जकत्वं कर्मणः क्वचिद् दृष्टम् । अतो न तन्मोक्षसाधनमङ्गीकरणीयमित्यभिप्रायः ॥

४. सङ्ग्रहशङ्काग्रन्थस्य विवरणं क्रियते सूर्यद्वारेणेत्यादिना 'चेत्' इत्यन्तेन । 'सेन्द्रयोनिः' - इति षष्ठानुवाके श्रूयते । प्र. ३-७ - इत्यादिस्थलेषु च मोक्षमार्ग उपदिष्टः । अतः प्राप्यो मोक्ष इति पूर्वपक्ष्याशयः ॥

५. संग्रहवाक्यं विवृणोति 'आकाशादिकारणत्वात्' इत्यादिना 'इत्येवमादिश्रुतिशतेभ्यः' इत्यन्तेन । कालाकाशयोरपि कारणत्वात्, तद्ब्रह्म न कालादिना व्यवहितमिति भावः । सू.भा. १-१-४, ४-३-१४

६. 'विभिन्नं देशम्' इति चकाररहितात् अयमेव पाठः साधीयान् । 'देशं प्रति' इति (आ॥) पाठे प्रतीत्यधिकम् । प्राप्यत्वे हेतुद्वयमुपन्यस्तम् सर्वगतत्वम् अनन्यत्वं च। तत्र सर्वगतत्वमुपपाद्य, अनन्यत्वमुपपादयितुमारभते गन्तुरन्यदित्यादिना। चैत्रादन्यो विभिन्नदेशश्च प्राप्यो ग्रामः, ब्रह्म तु विज्ञानात्मनो नान्यत्, विभिन्नदेशं वेत्यर्थः । सू.भा. ४-३-१४ । एकदेशस्थयोर्न परस्परप्राप्यत्वं यथा द्रव्यगुणयोः। अत आह विभिन्नदेशं चेति । 'विभिन्नं च देशम्' इत्यतो वरं विभिन्नदेशं चेत्येव ॥

गम्तये[१]। अनन्यत्वप्रसिद्धिश्च[२] 'तत् सृष्ट्वा तदेवानुप्राविशत्' (२-७), 'क्षेत्रज्ञं चापि मां विद्धि' (गी. १३-२)[३] इत्येवमादिश्रुतिस्मृतिशतेभ्यः । गत्यैश्वर्यादिश्रुतिविरोधः[४] इति चेत् । अथापि[५] स्यात् , यद्यप्राप्यो मोक्षः, तदा गतिश्रुतीनाम् 'स एकधा' (छा. ७-२६-२), 'स यदि पितृलोककामः', (छां. ८-२-१), 'स्त्रीभिर्वा यानैर्वा' (छां. ८-१२-३) इत्यादिश्रुतीनां च कोपः स्यात् इति चेत् । न । कार्यब्रह्मविषयत्वात् तासाम्। कार्ये हि ब्रह्मणि स्त्र्यादयः स्युः, न कारणे[६] । 'एकमेवाद्वितीयम्' (छां. ६-२-१), 'यत्र नान्यत् पश्यति' (छां. ७-२४-१), 'तत् केन कं पश्येत्' (बृ. २-४-१४) इत्यादिश्रुतिभ्यः[७] ॥

---

१, 'गम्यते तत्' इति आ ॥ पाठे 'तत्' इत्यनाकाङ्क्षितम् ॥

२. अनन्यत्वसिद्धिरेव कथम् इत्यत आह 'अनन्यत्वप्रसिद्धिश्च' इति । 'अन्यत्वप्रसिद्धेश्च' आ॥, 'तदनन्यत्वसिद्धिश्च वा ॥ इत्यतोऽयमेव वरीयान् ॥

३. द्रष्टव्यमुदाहृतश्रुतिस्मृतिभाष्यं यत्र विस्तरेणैतच्चिन्तितम् ॥

४. अत्र आदिशब्देन यद्यपि नदीसमुद्रदृष्टान्तश्रुतयः, सृष्टिश्रुतयश्च ग्रहीतुं शक्यन्ते तथापि भाष्ये विवरणवाक्ये न गृहीतास्ताः ॥

५. गत्यैश्वर्यादीतिसंग्रहवाक्यं विवृणोति 'अथापि' इत्यादिना 'चेत्' इत्यन्तेन ॥

६. एकमेव ब्रह्म कारणं कार्यं चेति द्वेधा स्थितमुपाधिवशात् । कार्यं ब्रह्म, अपरं ब्रह्म, सगुणं ब्रह्म, सविशेषं ब्रह्म - इति पर्यायाः । हिरण्यगर्भस्य नामान्येतानि । एतदेवोपास्यं ब्रह्म सूत्रभाष्ये (१-१-१२, ४-३-७, ४-३-१४) अर्चिरादिमार्गेण गन्तव्यमिति वर्णितम् । कारणं ब्रह्म, परं ब्रह्म, निर्गुणं ब्रह्म, निर्विशेषं ब्रह्म इत्येतानि मुख्यब्रह्मणो नामानि । तच्च अस्थूलादिनिषेधशब्दैरुपदिश्यते श्रुतिभिः । तत्र च कारणत्वं सापेक्षम्, न तु स्वरूपगतम् । यद्यपि प्रजापतिवाक्ये कारणमेव ब्रह्म निर्दिष्टं 'स्वेन रूपेणाभिनिष्पद्यते' (८-१२-३) इति, तथापि 'स्त्रीभिर्वा' इत्यादयः सगुणब्रह्मोपासकैरनुभूयमाना ब्राह्मलौकिकाः कामाः सर्वात्मभूतेन ज्ञानिना संबध्यन्ते इत्यात्मज्ञानस्तुतये तत्र निर्दिष्टा इति व्याख्येयम्, अन्यथा 'एकमेवाद्वितीयम्' इत्यादितत्परश्रुतिकोपः स्यादिति भावः । द्रष्टव्यं च छान्दोग्यभाष्यम् ॥ (८-१२-३)

७. नास्त्येव कारणत्वोपलक्षितमद्वितीयं ब्रह्मेत्याशङ्क्य शुद्धब्रह्मणि प्रमाणमाह इत्यादिश्रुतिभ्य इति ॥

## ज्ञानकर्मसमुच्चय एवानुपपन्नः -

६४. विरोधाच्च विद्याकर्मणोः समुच्चयानुपपत्तिः । प्रविलीन[१] - कर्त्रादिकारकविशेषतत्त्वविषया हि विद्या[२] तद्विपरीतकारकसाध्येन कर्मणा विरुध्यते[३]। न हि, एकं वस्तु परमार्थतः कर्त्रादिविशेषवत् तच्छून्यं च - इति उभयथा द्रष्टुं शक्यते । अवश्यं हि अन्यतरत् मिथ्या स्यात्[४]। अन्यतरस्य च मिथ्यात्वप्रसङ्गे युक्तं यत् स्वाभाविकाज्ञानविषयस्य[५] द्वैतस्य मिथ्यात्वम्[६]। 'यत्र हि द्वैतमिव भवति' (बृ. २-४-१४) 'मृत्योः स मृत्युमाप्नोति' (का. २-१-११, बृ. २-४-१४), 'अथ यत्रान्यत् पश्यति तदल्पम्' (छां. ७-२४-१), 'अन्योऽसावन्योऽहमस्मि' (बृ. १-४-१०), 'उदरमन्तरं कुरुते । अथ तस्य भयं भवति' (२-७) इत्यादिश्रुतिशतेभ्यः[७]। सत्यत्वं च एकत्वस्य[८] । एकधैवानुद्रष्टव्यम् (बृ. ४-४-

---

१. 'प्रलीन' वा ॥

२. बृ. ४-५-१५- सू.भा. ३-४-१६

३. यद्यपि उपासनारूपा विद्या न कर्मणा विरुध्यते, तथा च कर्मसमुच्चितया अपरब्रह्मप्राप्तिश्च भवत्येव, तथापि न तया मुख्यब्रह्मप्राप्तिरित्युक्तं सिद्धान्तिना । मुख्या तु विद्या वस्तुतन्त्रं परब्रह्मज्ञानम् । तेन च कर्मणः समुच्चयो विरुध्यत इतीदानीमुच्यते ॥

४. वस्तुनि क्रियास्विव एवं नैवमिति विकल्पानुपपत्तेः ॥ सू.भा. १-१-२.

५. अज्ञानं हि सर्वस्याप्यविचारितसिद्धं स्वाभाविकम्, ज्ञानेन त्वागन्तुकेन तन्निबर्हणीयम्॥

६. स्वाभाविकाज्ञानविषयत्वाद् द्वैतस्य मिथ्यात्वं युक्तं । अत एवोदाहरिष्यमाणाः श्रुतयो युक्त्युपबृंहितास्तदपवदन्तीति भावः ॥

७. सत्यत्वे हि द्वैतस्य नैवं द्वैतदृष्टिर्विनिन्द्येत श्रुतिभिः - इति भावः ॥

८. 'युक्तम्' इत्यनुषज्यते । निर्दोषेण वेदेन सावधारणं प्रतिपादितत्वाद्युक्तम् एकत्वस्य नित्यत्वमित्यर्थः ॥

२०) 'एकमेवाद्वितीयम्' (छां. ६-२-१), 'ब्रह्मैवेदँ सर्वम्'[१] (?), 'आत्मैवेदँ सर्वम्' (छां. ७-२५-२) इत्यादिश्रुतिभ्यः। न च संप्रदानादिकारकभेदादर्शने[२] कर्म उपपद्यते । अन्यत्वदर्शनापवादाश्च विद्याविषये सहस्रशः श्रूयन्ते । अतो विरोधो विद्याकर्मणोः। अतश्च[३] समुच्चयानुपपत्तिः । तत्र[४] यदुक्तं संहताभ्यां विद्याकर्मभ्यां मोक्षः - इति, अनुपपन्नं तत्[५] ॥

## निरस्तकारकब्रह्मोपदेशे न श्रुतिविरोधः -

६५. विहितत्वात्[६] कर्मणां श्रुतिविरोध इति चेत् । यदि उपमृद्य[७] कर्त्रादिकारकविशेषम् आत्मैकत्वविज्ञानं विधीयते सर्पादिभ्रान्तिज्ञानोपमर्दक-रज्ज्वादिविषयविज्ञानवत्, प्राप्तः कर्मविधिश्रुतीनां निर्विषयत्वाद्[८] विरोधः । विहितानि

---

१. 'ब्रह्मैवेदं विश्वम्' (मुं. २-२-११) इति मुण्डकोपनिषत्पाठः । 'सर्वम्' इति तु वाक्यान्तरस्थमिति भाति । अन्यत्रापि (गी.भा. १३-१५, सू.भा. १-४-२२) ब्रह्मैवेदं सर्वम्-इत्येव पठितं दृश्यते यतः । यद्यपि नृसिंहोत्तरतापिन्यामस्तीदं वाक्यम्, तस्या उपनिषदो न किञ्चिद्वाक्यमुदाहृतमुपलभ्यते प्रस्थानत्रयभाष्ये ॥

२. अहमिदं करोम्येतां देवतामुद्दिश्य एतस्मै फलायेति ह्यनुसंधाय कर्मक्रियते । तत्र संप्रदानकारकं देवतादि ॥

३. एवं विरोधाच्च इत्यर्थः । अत्र समुच्चयार्थासंभवात् चशब्दस्य एवार्थता स्वीकरणीया। विरोधादेव समुच्चयानुपपत्तौ दूरापास्ता ततो मोक्षसंकथेत्युत्तरवाक्येन संगातिश्चैवं स्यात् ॥

४. सत्यां चैवं समुच्चयानुपपत्तौ ॥

५. वा ॥ पाठे तु 'तत्र यदुक्तं ... मोक्ष इत्येतदनुपपन्नमिति, तदयुक्तम्' इति श्रुतिविरोधपूर्वपक्षेण वक्ष्यमाणेन संबन्धः कृतः । आ ॥ पाठ एवाऽऽदृतोऽस्माभिः॥

६. 'तद्विहितत्वात्' इति वा ॥; तत्र तदित्यधिकम् ॥

७. अपबाध्य ॥

८. सति हि कर्त्रादिकारके कर्मविधेर्विषयः संभवति । तदसत्त्वे तु कर्मवाक्यस्याप्रामाण्यमेव स्यात् । किञ्च यथा कारकाभावे कर्मकाण्डमप्रामाण्यं भजते, तथा विद्योपदेशश्रुतिरपि । न हि बन्धमोक्षजिज्ञासाजिज्ञास्यादि-भेदमनभ्यपगम्य तत्प्रवृत्तिर्भवेदिति पूर्वपक्षिहृदयम् ॥ बृ. भा. २-१-२०.

च कर्मणि । स च विरोधो न युक्तः । प्रमाणत्वात् श्रुतीनाम् इति चेत् । न । पुरुषार्थो(पायो)पदेशपरत्वाच्छ्रुतीनाम्[१] । विद्योपदेशपरा तावत् श्रुतिः संसारात् पुरुषो मोक्षयितव्य इत संसारहेतोरविद्याया विद्यया निवृत्तिः इति विद्याप्रकाशकत्वेन प्रवृत्ता इति न विरोधः[२] ॥

एवमपि कर्त्रादिकारकसद्भावप्रतिपादनपरं[३] शास्त्रं विरुध्यत एवेति चेत् । न । यथाप्राप्तमेव[४] कारकास्तित्वम् उपादाय, उपात्तदुरतक्षयार्थं[५] कर्माणि विदधच्छास्त्रं मुमुक्षूणां, फलार्थिनां च फलसाधनम्[६], न कारकास्तित्वे व्याप्रियते[७] । उपचितदुरितप्रतिबन्धस्य हि विद्योत्पत्तिर्नावकल्पते । तत्क्षये च विद्योत्पत्तिः स्यात् । ततश्चाविद्यानिवृत्तिः, तत आत्यन्तिकः संसारोपरमः[८] ॥

---

१. पुरुषार्थोपायोपदेशपरत्वादिति भवितव्यम् । विद्या हि पुरुषार्थोपायः, न पुरुषार्थः । मुद्रितपुस्तकेषु तु 'पुरुषार्थोपदेशपरत्वात्' इत्येवोपलभ्यते ॥

२. द्वैतस्याविद्याकृतत्वात् तदपह्नवेन विद्यां बोधयन्ती श्रुतिर्न भेदास्तित्वपरेति वक्तुं युक्तम् । श्रुतेर्व्याहतवचनत्वप्रसङ्गात् । अतो न तस्याः केनचिद् विरोधः शक्यशङ्क इति भावः ॥

३. पूर्वपक्षी कारकसद्भावपरं कर्मकाण्डं मन्वानः शङ्कते ॥

४. लोकतः सिद्धमेव ॥

५. न तु केवलमकरणे प्रत्यवायपरिहारार्थम् ॥

६. 'विदधत्' इत्यनुषज्यते ॥

७. कर्मविधिपरं च कारकास्तित्वपरं चेति स्वीकारे हि वाक्यं भिद्येत । प्रत्यक्षं च तस्य विधिपरत्वम् । अतो न कारकास्तित्वे वाक्यव्यापार इत्यभिप्रायः ॥

८. एवं च परमपुरुषार्थोपायोपदेशपरत्वं कर्मकाण्डस्यापीत्युपपद्यते । तदर्थं विहितत्वात् । अमुमुक्षूणां तु तत्तदाकाङ्क्षितफलदायकोपायोपदेशपरत्वम् । नित्यानि च कर्तव्यानि भवन्ति विहितत्वादिति भावः (सू.भा. ३-४-३२) । यथा चात्र कर्मभेदेऽपि नित्यानित्यसंयोगविरोधाभावस्तथा शारीरकभाष्ये (३-४-३३) समुपपादितम् ॥

## विद्यायाः स्वफलदाने न कर्मापेक्षा -

६६. अपि च[१], अनात्मदर्शिनो ह्यनात्मविषयः कामः । कामयमानश्च करोति कर्माणि । ततस्तत्फलोपभोगाय शरीराद्युपादानलक्षणः संसारः । तद्व्यतिरेकेण, आत्मैकत्वदर्शिनो विषयाभावात् कामानुपपत्तिः[२] । आत्मनि चानन्यत्वात् कामानुपपत्तौ स्वात्मन्यवस्थानं मोक्षः[३] - इत्यतोऽपि विद्याकर्मणोर्विरोधः । विरोधादेव च विद्या मोक्षं प्रति न कर्माण्यपेक्षते[४] ॥

## स्वोत्पत्तौ त्वपेक्षते कर्माणि विद्या -

६७. स्वात्मलाभे तु[५] पूर्वोपचितदुरितप्रतिबन्धापनयनद्वारेण विद्याहेतुत्वं प्रतिपद्यन्ते कर्माणि नित्यानी[६]त्यत एवास्मिन् प्रकरणे उपन्यस्तानि कर्माणि-इत्यवोचाम[७]। एवं चाविरोधः कर्मविधिश्रुतीनाम् । अतः केवलाया एव विद्यायाः परं श्रेय इति सिद्धम् ॥

## विद्यायाः गार्हस्थ्यकर्माण्येवापेक्षितान्युत्पत्ताविति न नियमः -

६८. एवं तर्हि[८], आश्रमान्तरानुपपत्तिः । कर्मनिमित्तत्वाद् विद्योत्पत्तेः । गार्हस्थ्ये[९] च विहितानि कर्माणि - इत्यैकाश्रम्यमेव[१०] । अतश्च[११]

१. न केवलं कारकोपमर्दकत्वकारकापेक्षत्वस्वरूपाभ्यां विरोधो विद्याकर्मणोः, किन्तु वक्ष्यमाणहेतोश्चेत्याह - अपि चेति ॥
२. बृ. ४-४-६ । अनेन कामवैराग्ययोर्हेतुतोक्ता कर्मज्ञाने प्रति ॥
३. एवं च स्वरूपहेतुफलैर्विरोधो विद्याकर्मणोरिति भावः ॥
४. तथा च कर्मापेक्षया विद्यायाः परं श्रेय इति कल्पो निरस्तो भवतीति भावः ॥
५. एवं सर्वथापि कर्मनिरपेक्षता विद्यया इत्येवं प्राप्ते इदमुच्यते विद्योत्पत्तिहेतुत्वमस्त्येव कर्मणामिति । सू.भा. ३-४-३३, ३५
६. काम्यानि तु यथोक्तरीत्या विद्याविरोधीन्येवेति त्याज्यान्येव मुमुक्षुणेति भावः ॥
७. भा.भा. ५१
८. यदि दुरितक्षयादेव विद्योत्पत्तिः, तर्हि ॥
९. गृहस्थस्यैव वा ॥
१०. 'ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविहितत्वाद्गार्हस्थ्यस्य' (गौ.ध. १-३-३५) इति स्मृतेः ॥
११. ऐकाश्रम्याङ्गीकाराच्च ।

यावज्जीवादिश्रुतयोऽनुकूलतराः[१] । न । कर्मानेकत्वात् । न हि अग्निहोत्रादीन्येव कर्माणि । ब्रह्मचर्यं, तपः, सत्यवदनं, शमः, दमः, अहिंसा- इत्येवमादीन्यपि[२] कर्माणीतराश्रमप्रसिद्धानि[३] विद्योत्पत्तौ साधकतमानि[४] - असङ्कीर्णत्वात्[५] - विद्यन्ते ध्यानधारणादिलक्षणानि च[६]। वक्ष्यति च 'तपसा ब्रह्म विजिज्ञासस्व' (३-२) इति[७]। जन्मान्तरकृतकर्मभ्यश्च प्रागपि[८] गार्हस्थ्याद् विद्योत्पत्तिसंभवात् । कर्मार्थत्वाच्च गार्हस्थ्यप्रतिपत्तेः, कर्मसाध्यायां च विद्यायां सत्यां गार्हस्थ्यप्रतिपत्तिरनर्थिकैव[९]।

---

१. 'यावज्जीवश्रुतिर्बह्वृचब्राह्मणे पठ्यत' इति शा.भा. २-४-१. 'अनुकूलतराः स्युः' इति वा ॥

२. ब्रह्मचर्यम्, तपः, सत्यम्-इत्येतानि छां., तै., मुं - इत्याद्युपनिषत्सु विहितानि । शमदमादयश्च बृहदारण्यके (४-४-२३); अहिंसा च छां. ८-१५-१ इत्यादिश्रुतिषु। एवमादीनीति निवृत्तिप्रधानानीतराणि कर्माणि संगृह्यन्ते ॥

३. न हि तेषामग्निहोत्रादीनि सन्ति । न चाश्रमान्तराणि न सन्ति । विहितत्वादेव तेषामपि ॥ सू.भा. ३-४-१९, २०

४. अन्तरङ्गानि । यमप्रधानत्वात् ॥

५. असङ्कीर्णाः इति (वा॥) पाठो न शुद्धः । यद्यपि गृहस्थानामपि ब्रह्मचर्यादीनि सन्ति। तथापि तानि ऋतौ भार्यागमनम् इत्येवमादिभिः सङ्कीर्णानि । असङ्कीर्णानि त्वितराश्रमकर्मणेति संपन्नतराणि तानि साधनानि मोक्षं प्रति ॥

६. ध्यानादयस्तु गार्हस्थ्यकर्मरहितानामेव विहितानीति तेषां पृथग्ग्रहणम् । गी.भा. ६ अव.

७. तत्र हि अग्निहोत्रादिकर्मव्यतिरिक्तं तपः मनआद्यैकाग्र्यलक्षणं ब्रह्मज्ञान-साधनत्वेनोपदिष्टमिति भावः ॥

८. न चेहजन्मकृतमेव कर्म विद्योत्पत्तिकारणमिति नियमः । प्राग्जन्मकृतकर्मपरिपाकेनापि तदुत्पत्त्युपपत्तेर्वामदेवादीनामिव । के.भा. ४-८; ऐ.भा. २-४; गी.भा. ३-४; सू.भा. ४-१-१८; अतः प्रागपि गार्हस्थ्यात् ज्ञानसंभवः। अत एव ब्रह्मचर्यादेव प्रव्रजेत् इत्यादिजाबालश्रुतौ पठ्यते ॥

९. 'कर्मार्थत्वात्' इति ज्ञानकारणकर्मार्थत्वात् इत्यर्थः । मुमुक्षूणामेवात्र प्रकृतत्वात् ब्रह्मचर्याश्रम एवोत्पन्नज्ञानानां गार्हस्थ्यप्रतिपत्तिर्व्यर्थेति, नापेक्षिता-इति वाक्यार्थः॥

लोकार्थत्वाच्च पुत्रादीनाम् । पुत्रादिसाध्येभ्यश्च 'अयं लोकः', 'पितृलोकः', 'देवलोकः'[१] - इत्येतेभ्यो व्यावृत्तकामस्य नित्यसिद्धात्मलोकदर्शिनः[२] कर्मणि प्रयोजनम् अपश्यतः कथं प्रवृत्तिरुपपद्यते[३] ? प्रतिपन्नगार्हस्थस्यापि विद्योत्पत्तौ विद्यापरिपाकात् विरक्तस्य कर्मसु प्रयोजनम् अपश्यतः कर्मभ्यो निवृत्तिरेव स्यात्[४]। 'प्रव्रजिष्यन् वा अरेऽहमास्मात् स्थानादस्मि' (बृ. ४-५-२) इत्येवमादिश्रुतिलिङ्गदर्शनात्[५] ।

## कर्मणि श्रुतेर्यत्नाधिक्ये कारणम् -

६९. कर्म प्रति श्रुतेर्यत्नाधिक्यदर्शनादयुक्तमिति चेत् । अग्निहोत्रादिकर्म प्रति[६] श्रुतेरधिको यत्नः । महांश्च कर्मण्यायासः[७] । अनेकसाधनसाध्यत्वादग्निहोत्रादीनाम्। तपो ब्रह्मचर्यादीनां च इतराश्रमकर्मणां गार्हस्थ्येऽपि समानत्वात्[८],

१. बृ. (१-५-१६) श्रुत्युक्तानां पुत्रकर्मोपासनानां यथासंख्यं मनुष्यादिलोकफलत्वात् न तेभ्यो लोकेभ्यो विरक्तस्य तैः साधनैरर्थः इत्यभिप्रायः ॥

२. लोकशब्दस्त्यक्तो वा ॥; आत्मैव लोको नान्यो ज्ञानिनः । बृ. ४-४-२२.

३. मनुष्यादिलोकसाधने पुत्रकर्मादौ प्रयोजनं न पश्यति, तत्रैव प्रवर्तते च - इति हि विप्रतिषिद्धम् ॥

४. विक्षेपहेत्वभावे ऐकात्म्ये एवावस्थानं विद्यायाः परिपाकः । तस्मिन्निष्पन्ने कर्मभ्यो निवृत्तिरेव स्यादित्यर्थः । अथवा विद्यापरिपाकात् इति विद्यापरिपाकहेतोरित्यर्थः। तदर्थम् इति यावत् । विद्यापरिपाकार्थं कर्मभ्यो निवृत्तिरेव स्यात् इति संबन्धः । कर्मसंन्यासस्य विद्यापरिपाकाङ्गत्वमुक्तं सू.भा. ३-४-२०, गी.भा. १८-५५ इत्यादिस्थलेषु ॥

५. विदुषो गृहस्थस्यापि कर्मभ्यो निवृत्तिरेवेत्यत्र लिङ्गमिदमिति भावः ॥

६. पूर्वपक्षसंग्रहवाक्यं विवृणोति 'अग्निहोत्रादिकर्म प्रति' इत्यादिना 'चेत्' इत्यन्तेन॥

७. ज्ञानमात्रादेव यदि कैवल्यं सिध्येत् को जातुचिद्बहुद्रव्यायाससाध्यं कर्म कुर्यात् इति भावः । द्रष्टव्यमत्र तन्त्रवार्तिकोक्तं (१-३-८, पृ. २८७, २८८) ज्ञानकर्मसमुच्चयप्रसाधनम् ॥

८. गृहस्थस्य ब्रह्मचर्यादेः संकीर्णत्वं यदुक्तं पुरा (भा.भा. ६८) तत् प्रस्मृतमिह पूर्वपक्षिणा ॥

अल्पसाधनापेक्षत्वाच्चेतरेषां[१] न युक्तस्तुल्यवद्विकल्प आश्रमिभिस्तस्य - इति चेत्। न जन्मान्तरकृतानुग्रहात्[२] । यदुक्तं[३] कर्मणि श्रुतेरधिको यत्नः - इत्यादि । नासौ दोषः[४]। यतो जन्मान्तरकृतमप्यग्निहोत्रादिलक्षणं कर्म, ब्रह्मचर्यादिलक्षणं च - अनुग्राहकं भवति विद्योत्पत्तिं प्रति ; येन[५] जन्मनैव विरक्ता दृश्यन्ते केचित्, केचित्तु कर्मसु प्रवृत्ता अविरक्ता विद्याविद्वेषिणः[६] । तस्मात्, जन्मान्तरकृतसंस्कारेभ्यो विरक्तानाम् आश्रमान्तरप्रतिपत्तिरेवेष्यते [७]॥

कर्मफलबाहुल्याच्च[८] । पुत्रस्वर्गब्रह्मवर्चसादिलक्षणस्य[९] कर्मफलस्य असंख्येयत्वात्, तत् प्रति च पुरुषाणां कामबाहुल्यात्, तदर्थः श्रुतेरधिको यत्नः कर्मसु उपपद्यते । आशिषां बाहुल्यदर्शनात् 'इदं मे स्यात्, इदं मे स्यात्' इति ।

---

१. इतराश्रमधर्माणामहिंसादीनाम् अधिकतरयत्नसाध्यत्वमिहोपेक्षितं पूर्वपक्षिणा ॥

२. पूर्वोक्तं (भा. भा. ६८, पृ. ५३, टि. ८) स्मारयति ॥

३. संग्रहवाक्यं विवृणोति 'यदुक्तम्' इत्यादिना 'इष्यते' इत्यन्तेन ॥

४. असौ इतराश्रमिणां गार्हस्थ्येन तुल्यवद्विकल्पः, न दोषः ॥

५. येन अनुग्राहकब्रह्मचर्यादिबलेनेत्यर्थः । 'येन च' इति चयुक्त (वा॥) पाठे चकारोऽवधारणार्थः ॥

६. तादृशानुग्राहकविरहात् इति शेषः ॥

७. न तु कर्मप्रधानं गार्हस्थ्यम् । जन्मान्तरकृतकर्मसंस्कृतान्तःकरणानां कर्मभिः प्रयोजनाभावात् - इत्यभिप्रायः ॥

८. कर्मसु यत्नाधिक्यं श्रुतेर्नाश्रमान्तरविकल्पाश्रयणबाधकमित्युक्तम्, जन्मान्तर-कृतस्यापि कर्मणो विद्योत्पत्तिं प्रत्यनुग्राहकत्वमाश्रित्य । अविरक्तविद्याविद्वेषि-विषयत्वसंभवाद्यत्नाधिक्यस्येति । इदानीमेतज्जन्मकृतकर्मणामेवानुग्राहकत्वे-ऽङ्गीकृतेऽपि यत्नाधिक्यस्यान्यथासिद्धत्वात्, न तद्विकल्पविघातकमित्युपपादयन्नाह कर्मफलबाहुल्याच्चेति ॥

९. संग्रहवाक्यविवरणं पुत्रस्वर्गेत्याद्यारभ्य इतीत्यन्तम् । यत्नाधिक्यमुक्तं किं काम्यकर्मविषयम्, आहोस्विन्नित्यकर्मविषयम् ? - इति विकल्प्याद्यं प्रत्याह 'फलस्यासंख्येयत्वात्' पुरुषाशिषां च बाहुल्यात्' इति । कामबाहुल्यं प्रपञ्चितं द्रष्टव्यं तै.सं. २-१-१ इत्यादौ ॥

उपायत्वाच्च[१]। उपायभूतानि हि कर्माणि विद्यां प्रति इत्यवोचाम[२]। उपाये चाधिको यत्नः कर्तव्यः, नोपेये[३] ॥

## श्रवणादीनां साक्षाद्विद्यासाधनत्वम् -

७०. कर्मनिमित्तत्वाद् विद्यायाः, यत्नान्तरानर्थक्यम् इति चेत् । कर्मभ्य एव[४] पूर्वोपचितदुरितप्रतिबन्धक्षयात्[५] विद्या उत्पद्यते चेत्, कर्मभ्यः पृथक् उपनिषच्छ्रवणादियत्नोऽनर्थक इति चेत्[६]। न । नियमाभावात् । न हि[७] प्रतिबन्धक्षयादेव विद्या उत्पद्यते, न तु ईश्वरप्रसादतपोध्यानाद्यनुष्ठानात् - इति नियमोऽस्ति[८] । अहिंसाब्रह्मचर्यादीनां च विद्यां प्रत्युपकारकत्वात्[९] । साक्षादेव[१०] च कारणत्वात् श्रवणमननिदिध्यासनानाम्[११] ॥

---

१. द्वितीयं कल्पं प्रत्याह 'उपायत्वाच्च' इति ॥ अस्यैव विवरणं उपायभूतानि हीत्यारभ्य 'नोपेये' इत्यन्तम् ॥

२. कर्माणि दुरितक्षयद्वारा विद्योत्पत्त्युपायतां भजन्त इत्युक्तं प्राक् (भा. भा. ६५) । नित्यकर्मणां दुरितक्षयार्थत्वात्, कर्मप्रधानं गार्हस्थ्यमेवाश्रयणीयं नाश्रमान्तरम् इति पक्षो निराकृतः पूर्वम् (भा.भा. ६८) । इदानीं तु कर्मैव केवलं मुक्तिसाधनं न ज्ञानापेक्षमिति पक्षो निराक्रियत इति विशेषः ॥

३. अतश्च कर्मसु यत्नाधिक्यं युक्तमित्यभिप्रायः ॥

४. न तूपायान्तरेण - इति पूर्वपक्षिणोऽभिनिवेशः ॥

५. अङ्गीकृत्यवादोऽयम् । नित्यकर्माणि प्रत्यवायपरिहारार्थानीति खलु पूर्वपक्षिणो मतम् ॥

६. तथा च कर्मभ्य एव मोक्षः प्रतिबन्धक्षयद्वारेणेति स्थास्यतीति भावः ॥

७. नियमाभावात् इति संग्रहवाक्यं विवृणोति न हीत्यादिना ॥

८. ईश्वरप्रसादः सर्वत्र साधनानां फलदायकः । विशिष्य चाज्ञाननाशकज्ञानोत्पत्तौ (गी.भा. १०-११) कारणम् । कर्म त्विहजन्मकृतं जन्मान्तरकृतं वा दुरितक्षयद्वारा तत्र कारणम् । अहिंसादयश्चाधर्मादिपरिहारेण ज्ञानोत्पत्तौ ज्ञानपरिपाककारणत्वेन ज्ञाननिष्ठायां वा कारणम् - इति विवेकः ॥ ९. अन्तरङ्गसाधनत्वादित्यर्थः ॥

१०. न तु कर्मादिवत् परम्परयेत्यर्थः । ब्रह्मचर्याद्यपेक्षया साधकतमत्वाच्चेत्यप्याकूतम् ॥

११. 'निदिध्यासनादीनाम्' इति (वा॥) पाठे आदिशब्दोऽनपेक्षितः।श्रवणादीनां ज्ञान-कारणत्वं लोकत एव सिद्धम् । ज्ञानसाधनानां तारतम्यं बृ. १-४-२; गी.भा. १०-१०, ११, १८-४५, ४६; सू.भा. ३-४-५१, ४-१-१८ एतेषां भाष्येषु द्रष्टव्यम्॥

**उपसंहारः -**

७१. अतः[1] सिद्धान्याश्रमान्तराणि । सर्वेषां[2] चाधिकारो विद्यायाम्, परं च श्रेयः केवलाया विद्याया एव[3] इति सिद्धम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्भाष्ये
शीक्षावल्लीभाष्यम् ॥

## १२. शान्तिपाठः[4]

**शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा ।**
**शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः ।**
**नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं।**
**ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् ।**

---

१. कर्मभ्य एव केवलम्, उपासनारूपविद्यासहितेभ्यो वा तोभ्यो निःश्रेयसासिद्धेः दुरितप्रतिबन्धक्षयेण विद्योत्पत्तिद्वारैव तेषां मोक्षसाधनत्वात्, विद्यायाश्चेश्वरप्रसादादिभ्योऽप्युत्पत्त्युपपत्तेः, अहिंसादीनां चाश्रमान्तरेषु संपन्नतरत्वात् तेषामन्तरङ्गसाधनत्वाच्च विद्यां प्रति - इत्यतःशब्दार्थः ॥

२. सर्वेषां चाश्रमिणामित्यर्थः । द्रष्टव्यं सू.भा. ३-४-२०, मु.भा. अव., गी.भा. १८-४५

३. सू.भा. ३-४-१, ३-४-१७

४. अयं शान्तिपाठोऽध्ययनसंप्रदायक्रमेण शीक्षावल्ल्या द्वादशोऽनुवाकः । अत्र "अतीतविद्याप्राप्त्युपसर्गशमनार्थं शान्तिं पठति 'शं नो मित्र' इति । व्याख्यातमेतत् पूर्वम् ।" इति भाष्यवाक्यत्वेन मुद्रितपुस्तकेषु गृहीतमुपलभ्यते । तस्य च वाक्यद्वयस्य अनेकेषु मूलकोशेष्वदर्शनात् नात्र ग्रन्थशरीरे निवेशः कृतः । अत्राधिकमानन्दवल्ल्यवतरणिकाभाष्यव्याख्यानतोऽवगन्तव्यम् ॥

ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत्। तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् ॥१२॥

ओं शान्तिः शान्तिः शान्तिः ॥

# अथ शीक्षावल्लीसारः

## अत्र प्रतिप्रघट्टः दत्ताः सङ्ख्या अनुवाकसूचकाः

१. ब्रह्मविविदिषुणा कार्यकरणसंघाताभिमानिन्यो मित्रवरुणाद्या देवता नित्यं सुखकरणार्थं प्रार्थनीयाः । यतस्तासु सुखकृत्सु विद्याश्रवणधारणोपयोगा अप्रतिबन्धेन भविष्यन्ति । एवं ब्रह्मविद्योपसर्गशान्त्यर्थमपरब्रह्मणो वार्योर्नमस्कारः कार्यः, स्तोत्रं च । शीक्षावल्ल्या आद्यानुवाकान्ते 'ओं शान्तिः शान्तिः शान्तिः' इति त्रिर्वचनम् आध्यात्मिकाधिभौतिकाधिदैविकानां विद्याप्राप्त्युपसर्गाणां प्रशान्त्यर्थम् ॥

२. यद्यप्युपनिषदियमर्थप्रधाना, तथापि वर्णस्वराद्यलोपेन ग्रन्थपाठेऽपि प्रयत्नः कार्यः ॥

३. साधकानां सौकर्यार्थम् आदौ शब्दप्रधानान्येवोपासनान्यत्रोपदिश्यन्ते। तत्रापि प्रप्रथमं वेदे समुपलभ्यमानाः संहिता अधिकृत्य अधिलोकम्, अधिज्यौतिषम्, अधिविद्यम्, अधिप्रजम्, अध्यात्मं चेति पञ्चधा दृष्ट्या उपासनम् उपदिश्यते । तद्यथा -(१) संहितायाः पूर्वे वर्णे पृथिवीदृष्टिः कर्तव्या। उत्तरवर्णे चान्तरिक्षदृष्टिः । तत्सन्धौ मध्ये आकाशदृष्टिः । पूर्वोत्तरयोरुभयोः सन्धानसाधने वायुदृष्टिः । इत्यधिलोकमुपासनम् । (२) एवं पूर्ववर्णादिषु यथोक्तेषु यथाक्रमम् अग्निः, आदित्यः, आपः, विद्युत् - इति दृष्टिकरणमधिज्यौतिषमुपासनम्। (३) आचार्यः, अन्तेवासी, विद्या, प्रवचनम् - इति दृष्टिरधिविद्यम् । (४) माता, पिता, प्रजा, प्रजननम् - इति दृष्टिश्चाधिप्रजमुपासनम् । (५) अधरा हनुः, उत्तरा हनुः, वाक्, जिह्वा - इत्यध्यात्ममुपासनम् । एवं महावस्तुदृष्ट्याधारत्वात् एता महासंहिता उच्यन्ते । एवं महासंहितोपासनं योऽनुतिष्ठति तस्य साचार्यस्य प्रजापशुब्रह्मवर्चसान्नाद्यस्वर्गलोकरूपाणि फलानि भवन्ति ॥

४. मुमुक्षुणा यश्छन्दसाम् इत्ययं मन्त्रो वेदसारभूतोङ्कारस्तुतिपरः सततं जप्यः । तेन मेधाप्राप्तिर्भवति । कार्यकरणसंघातश्चाऽऽत्मज्ञानयोग्यो भवति । एवं

श्रीप्राप्त्या कर्मानुष्ठानेन चित्तशुद्धिं प्राप्य परम्परया ज्ञानं प्रेप्सुणा 'आवहन्ति' इत्यादिभिर्मन्त्रैर्होमः कर्तव्यः । एवमोंकारं जपहोमाभ्यां समुपास्य क्रमेण ज्ञानी भवति। अनेकब्रह्मचार्यन्तेवासिसेव्यश्च ॥

५-६. मह इति व्याहृत्यात्मनो ब्रह्मण अन्तरुपासनं कर्तव्यम् । भूर्भुवःसुवरित्येतासां चतुर्थीमेतां व्याहृतिं माहाचमस्यर्षिर्दृष्टवान् । तदेव च ब्रह्म । इतरव्याहृतीनामात्मा चेयम्, तद्व्यापकत्वात् । ताश्च तिस्रो व्याहृतयः प्रत्येकं चतुर्धा। तद्यथा । अयं लोकः, अग्निः, ऋग्वेदः, प्राणः - इति प्रथमा व्याहृतिर्भूरिति । एवम् अन्तरिक्षम्, वायुः, सामानि, अपानः - इति द्वितीया भुव इति । असौ लोकः, आदित्यः, यजूंषि, व्यानः - इति तृतीया सुवरिति । महआत्मकं तु ब्रह्म आदित्यचन्द्रप्रणवान्नरूपेण लोकज्योतिर्वेदप्राणात्मिका व्याहृतीर्व्याप्नोतीति ता अस्या ब्रह्मदृष्ट्यर्हाया व्याहृतेरङ्गभूताः । तच्चेदं व्याहृत्यात्मकं ब्रह्म हृदयाकाशे स्थितो मनोमयोऽमृतो हिरण्मयः पुरुष इति आकाशशरीरं मूर्तामूर्तरूपं प्राणाराममानन्दकृन्मनोविशिष्टं शान्त्या सम्यगुपलभ्यमानं ब्रह्मेति चैवं गुणविशिष्टमुपास्यम् । एवं य उपास्ते स देहत्यागसमये हृदयादूर्ध्वगामिन्या सुषुम्नानाड्या मूर्धभेदिन्या द्वारेण विनिष्क्रम्य भूरिति व्याहृतिरूपेऽग्नौ प्रतितिष्ठति। ततो भुव इति व्याहृतिरूपे वायौ । ततश्च सुवरित्यादित्ये । एवं क्रमेणाङ्गभूतदेवतासायुज्यं प्राप्य तदनु यथोक्तमनोमयादिगुणकस्य महइत्यङ्गिनः सायुज्यं प्राप्य स्वराड् भवतीत्येवं महाफलमिदमुपासनम् ॥

७. एतस्यैव ब्रह्मणो लोकपाङ्क्तं, देवतापाङ्क्त च, तथा वायुपाङ्क्तं, इन्द्रियपाङ्क्तं, धातुपाङ्क्तम् - इति च पाङ्क्तस्वरूपेणाप्युपासनं विधीयते । पाङ्क्तत्वं नाम पञ्चधा विभक्तत्वम् । यज्ञस्य पाङ्क्तत्वं श्रुतिप्रसिद्धमिति यथोक्तोपासनया सर्वं यज्ञत्वेन कल्पितं भवति । अत्र च बाह्यपाङ्क्तमाध्यात्मिकेन पाङ्क्तेन श्रुत्युक्तप्रकारेण पूरणीयम् । ततश्च पाङ्क्तात्मकप्रजापतित्वफलमुपासकस्य भवति ॥

८. परापरब्रह्मोपासनाङ्गभूतः प्रणवः । तस्य च ब्रह्मणः प्रतीकभूतस्योपासनेन परमपरं वा ब्रह्म प्राप्यते । ओंकारपूर्वकं प्रवृत्तानां सर्वासां क्रियाणां फलवत्त्वदर्शनात् ओंकारं ब्रह्मेत्युपासीतेति विधीयते ॥

९. उपसनादेव स्वाराज्यप्राप्तेरुक्तत्वात् श्रौतस्मार्तकर्माण्यकिञ्चित्कराणीति न मन्तव्यम् । ऋतं, सत्यं तपो, दमः, शमोऽग्निहोत्रम्, अतिथिपूजा, लौकिकः संव्यवहारः प्रजासन्तत्यर्थं कर्म चेत्येतत्सर्वमप्यनुष्ठेयमेव । तत्राप्यध्ययनमध्यापनं सत्यं तप इत्येतानि प्राधान्येनानुष्ठेयानि ॥

१०. 'अहं वृक्षस्य' इति मन्त्रो मुमुक्षुभिः सततं जप्यः । तस्य ज्ञानप्रकाशकत्वात् । कर्मोपदेशानन्तरं तस्य पाठात् श्रौतस्मार्तकर्मानुष्ठानपराणां निष्कामानां ब्रह्मविविदिषूणामेवंविधान्यार्षाणि दर्शनानि प्रादुर्भवन्तीत्यवगम्यते ॥

११. न कवेलम् अवश्यकर्तव्यत्वोपदेशात्, किन्तु चित्तशुद्धिद्वारा ज्ञानोत्पत्त्यर्थमपि कर्माणि नियमेनानुष्ठेयानि मुमुक्षुभिः । कर्माण्युपासनानि चात्र वल्ल्यामुपदिष्टानि शास्त्रविहितानि, गुर्वनुशासनरूपाणि, वेदरहस्यानि चेति सर्वथा पुरुषार्थसाधनानि भवन्तीति शिवम् ॥

इति

श्रमत्परमहंसपरिव्राजकवरेण्यश्रीमत्पूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्त-वेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यश्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतं वल्लीसारसहितं शीक्षावल्लीभाष्यटिप्पणम्

अथ शीक्षावल्ल्याः

# अनुवाकानामक्षरानुक्रमणिका


| अनुवाकप्रतीकम् | अनु. | पृष्टम् |
|---|---|---|
| अहं वृक्षस्य रेरिवा | १० | 44 |
| ऋतं च स्वाध्यायप्रवचने च | ९ | 41 |
| ओमिति ब्रह्म | ८ | 39 |
| पृथिव्यन्तरिक्षं द्यौर्दिशो | ७ | 36 |
| भूर्भुवः सुवरिति वा | ५ | 26 |
| यश्छन्दसामृषभो | ४ | 19 |
| वेदमनूच्याचार्यो | ११ | 46 |
| शं नो मित्रः शं वरुणः | १ | 11 |
| शं नो मित्रः शं वरुणः | १२ | 67 |
| शीक्षां व्याख्यास्यामः | २ | 14 |
| स य एषोऽन्तर्हृदय | ६ | 31 |
| सह नौ यशः | ३ | 15 |

# अथ भाष्यस्थमुख्यशब्दसूची

## अत्र दत्ताः सङ्ख्या भाष्यभागपरामर्शिन्यः


**अकरणम्** (अननुष्ठानं कर्मणाम्), ४, ६

**अज्ञानम्** (आत्मविषया अविद्या), ६४

**अनात्मविद्** (आत्मज्ञानरहितः), ५

**अनात्मदर्शी** (आत्मभिन्नविषयदर्शी), ६६

**अनात्मा** ५

**अनारब्धफलानि** (अनिष्पन्नफलानि कर्माणि), ३, ४

**अनारम्भः** (अकरणम्), २

**अन्तरुपासनम्** (हृदयमध्ये उपासनम्), ३८

**अभावः** (भावप्रतिसंबन्धी पदार्थः, तार्किकसंमतः), ६, ८

**अमृतः** (चिरस्थायी), ३५, ३८

**अमृतम्** (अमरणधर्मः), ५१

**अमृतम्** (नित्यम्), २०

**अविद्यानिवृत्तिः** (मिथ्याज्ञानापबाधः), १, १०, ६५

**आत्मज्ञानम्** (ब्रह्मज्ञानम्), २०, २१, २२, ५३, ६१

**आत्मभावः** (सायुज्यम्, ऐक्यम्), ३६, ३७

**आत्मलोकः** (साध्यलोकेभ्यो विलक्षण आत्मा), ६८

**आत्मविद्या** (आत्मज्ञानम्), ५२

**आत्मा** (सर्वस्य परमार्थस्वरूपम्), १, ५

**आत्मैकत्वविज्ञानम्** (अद्वितीयात्मज्ञानम्), ५२, ६५

**आत्मैकत्वदर्शी** (आत्माद्वितीयत्वानुभववान्), ६६

**आत्यन्तिकः संसारनाशः** (पुनरावृत्तिराहित्येन संसारनिवृत्तिः), ६५

**आप्तकामता** (आत्मव्यतिरिक्तकामाभावः) १

**आप्यम्** (गतिपूर्वकं प्राप्यम्), ६३

**आरब्धम्** (निष्पादितम्), २, ३, ७

**आरभ्यः** (निष्पादनीयः), ८

**आलम्बनम्** (प्रतीकम्) , १८, ४४

**उत्पत्तिसंस्कारविकाराप्तयः** (कर्मफलप्रकाराः), ६३

**उपनिषत्** (ग्रन्थः), १०, १४, ७० (ब्रह्मविद्या), १०, १४;
(उपासनम्), १५, १६; (रहस्यम्), ५९

**उपलब्धिः** (साक्षात्कारः), २२, ३४

**उपात्तदुरितक्षयः** (संचितपापनाशः), १, २७, ६५

**उपासनम्** (शास्त्रीयवस्तुचिन्तनम्), १८, २८, २९, ४४, ६१

**ऋतम्** (यथाशास्त्रं कर्तव्यम्), १२, ४८, ५४

**ऐकाश्रम्यम्** (गार्हस्थ्यमात्रम्), ६८

**ओङ्कारः** (उपास्यःप्रणवः), २०

**कर्म** (शास्त्रविहिता निषिद्धा वा क्रिया), १, २, ३, ४, ५, ७, ८, ९, ६०, ६१, ६२, ६३, ६६, ६८ ; (अग्निहोत्राद्यतिरिक्तं गार्हस्थ्यादन्यत्राश्रमे विहितम्), ६८

**कर्मकार्यम्** (कर्मनिष्पाद्यम्), ६१

**कर्मनैष्किञ्चन्यम्** (सर्वथा कर्माभावः), ५३

**कर्महेतुः** (कर्मणि प्रवृत्तौ निमित्तम्), १, २ (कर्मकारणकम्), २

**कर्मोपादानहेतुः** (कर्मणि प्रवृत्तौ हेतुः), १, १०

**कामः** (कर्मफलेच्छा) १, ५

**काम्यानि** (कामिभिरनुष्ठीयमानानि कर्माणि), १, २, ६१

**कारकम्** (क्रियानिष्पत्तिकारणम्), ६४, ६५

**कारकास्तित्वम्** (कर्त्रादिकारकसत्यत्वम्), ६५

**कार्यकारणसंघातः** (देहेन्द्रियसंघातः), २१

**कार्यब्रह्म** (अपरं ब्रह्म, हिरण्यगर्भः), ६३

**कार्यान्तरारम्भः** (मिलितयोः कर्मज्ञानयोः स्वकार्यादन्यस्य निष्पादनम्), ६२

**गतिश्रुतयः, गत्यैश्वर्यादिश्रुतयः** (उपासकानां ब्रह्मप्राप्त्यर्थं गतिः, मुक्तानां तेषामैश्वर्यम् - इत्यादिबोधिकाः श्रुतयः), ६३

**ज्ञानम्** (आत्मयाथात्म्यविद्या), ५

**ज्ञापकम्** (भूतार्थयाथात्म्यव्यञ्जकम्), ६२

**ज्ञानोत्पत्तिः** (आत्मयाथात्म्यज्ञानजन्म), ५४

**तपः** (कृच्छ्रादि), ४८ ; (स्वाध्यायप्रवचने विशिष्टतपसी), ४९; (विद्योत्पत्तिकारणं कर्म), ५३, ६८

**दमः** (बाह्येन्द्रियनिग्रहः), ४८

**दर्शनम्** (उपासनम्) १६, १७; (ज्ञानम्), ५२

**देवतात्मा** (अध्यात्माधिदैवाभिमानी देवता) ११

**नित्यप्राप्तम्** (स्वरूपभूतम्, आप्त्यनपेक्षम्), ५

**नित्यानि** (फलानुषङ्गं विना विहितानि, अवश्यकरणीयानि कर्माणि), १, २, ४, ६, ५२

**नित्यारम्भः** (नित्यस्य निष्पादनम्), ८

**निर्विशेषः** (स्वगतभेदरहितः), ८

**परप्राप्तिः** (मोक्षप्राप्तिः), १

**परं ब्रह्म** (परमात्मा), ५, ५१, ५२

**परं श्रेयः** (निरतिशयश्रेयः, मोक्षः), ४९, ६०, ६७

**परापरब्रह्मणी** (निर्गुणसगुणब्रह्मणी), ४४

**पुत्रादिसाध्याः** (मनुष्यादिलोकाः), ६९

**पुरुषः** (हृदि स्थितः, भूरादिव्यापको वा), ३५

**पुरुषसंस्कारः** (इहजन्मनः प्रक्संचितानि पापानि), ६, ५३, ६७, ७०
(कर्मणा निष्पाद्यमाना ज्ञानयोग्यता), ५३
**पूर्वोपचितानि** (इहजन्मनःप्राक् सञ्चितानि पापानि), ६, ५३, ६७, ७०
**प्रजापतिः** (पाङ्क्तात्मकमपरं ब्रह्म), ४०, ४३
**प्रतिमा** (अर्चा विष्ण्वादिप्रतीकभूता), ४४
**प्रतिषिद्धानि** (श्रुत्यापादितानि कर्माणि), २, ६१
**प्रत्यवायः** (नित्याकरणेन प्राप्यमाणो दोषः), २, ४, ६, ६१
**प्रध्वंसाभावः** (वस्तुनाशे जन्यत्वेन कल्पितोऽभावः), ८
**प्रवर्तकः** (कर्मणि प्रयोक्ता), १
**प्रविलीनकर्त्रादिकारकम्** (कारकविभागरहितम्), ६४
**फलार्थिनः** (काम्यकर्मण्यधिकारिणः), १, ६५
**ब्रह्म** (परमात्मतत्त्वम्), १, १२, २२, २५, ३८, ६३ ;
(कार्यमपरं ब्रह्म), ३६, ३७, ३८, ४०
**ब्रह्मज्ञानम्, ब्रह्मविज्ञानम्** (ब्रह्मस्वरूपावगतिः), ५१, ५३
**ब्रह्मविद्या** (ब्रह्मज्ञानम्), १, १०, ५३
**ब्रह्मविद्योपसर्गाः** (ज्ञानविघ्नाः), १२, १३
**मेधा** (लौकिकप्रज्ञा), २२; (आत्मज्ञानयोग्यप्रज्ञा), २२, २३
**मोक्षः** (परमपुरुषार्थः), २, ७, ९, १०, ५१, ६१, ६३
**योगशास्त्राणि** (मनोनिग्रहप्रकारबोधकशास्त्राणि), ३६
**लक्षणम्** (ज्ञापकम्), ६
**लौकिकप्रज्ञा** (व्यावहारिकं ज्ञानम्), २२
**वचनम्** (वेदवाक्यम्), ६२
**वायुः** (आध्यात्मिकप्राणात्मना स्थिता देवता, अपरं ब्रह्म), १२
**विकल्पः** (मनोविकल्पनामात्रम्), ८

**विज्ञानम्** (उपासना), १८; (आत्मावगतिः), ६५

**विद्या** (उपासनम्), ८, ९, ६०, ६२, ६३ ;
(ज्ञानम्), १०, १३, २७, २८, ५३, ६४, ६५, ६६, ६९, ७०, ७१

**विद्याकर्मकर्ता** (उपासनकर्मणोरनुष्ठाता), ९

**विद्याकर्मणोर्विवेकः** (ज्ञानकर्मणोर्हेतुस्वरूपकार्यवैलक्षण्यनिर्धारणम्), ६०

**विद्याकर्मसंतानः** (अविरतानुष्ठिते उपासनकर्मणी), ९

**विद्योत्पत्तिः** (आत्मज्ञाननिष्पत्तिः), ५३, ६८, ६९

**विशुद्धसत्त्वः** (कर्मानुष्ठानजनितसंस्कारसंजातचित्तशुद्धिमान्), ५०

**विष्णुः** (पादयोरभिमानी देवता, प्रतिमादिष्वर्च्यमाना देवता), ११, ३४, ४४

**व्याहृत्यात्मा** (महोव्याहृतिद्वारेण उपास्य आत्मा), २८, ३०, ३७, ४०

**शमः** (अन्तःकरणनिग्रहः), ४८

**शरीरारम्भः** (देहनिष्पादनम्, जन्मप्रदानम्), ३

**शालग्रामः** (अर्च्यमानस्य विष्णोः प्रतीकभूतः शिलाविशेषः), ३४

**शेषकर्म** (भोक्ष्यमाणत्वेनावशिष्टं कर्म), ३

**श्रवणमनननिदिध्यासनानि** (ज्ञानोत्पत्तौ साक्षात्साधनानि), ७८

**श्रौतस्मार्तानि** (श्रुतिस्मृतिविहितकर्माणि), ४७, ५२, ५३

**संहते** (समप्राधान्येन समुच्चिते), ६३

**सत्यम्** (मूर्तामूर्तम्, अवितथरूपं वा), ६८, (सत्यवदनम्), १२, ४८, ४९, ५५

**सर्पादिभ्रान्तिज्ञानोपमर्दकरज्ज्वादिविषयविज्ञानम्** (अविद्योपमर्दकविद्याया दृष्टान्तः), ६५

**सर्वगतम्** (सर्वत्र व्याप्तं ब्रह्म), ६३

**सर्वप्रमाणव्याकोपः** (सर्वप्रमाणैर्विरोधः, अभावाद्भावोत्पत्तिस्वीकारे), ६

**सर्वात्मकत्वम्** (सर्वेणानन्यत्वम्), ३७

**सर्वात्मभावः** (हिरण्यगर्भावाप्तिः), ३४
**सर्वोपासनाङ्गभूतः** (ओङ्कारः, परापरब्रह्मप्रतीकभूतः), ४४
**साक्षात्कृतः** (सोऽहमित्यध्यवसितः), ३६
**साधनसाध्यानि** (अनेककारणसामग्रीनिष्पाद्यानि कर्माणि), ६९
**सुषुम्ना** (अपरब्रह्मप्राप्तये गमनद्वारभूता नाडी), ३६
**स्वरूपप्रतिपत्तिः** (अपरब्रह्मसारूपप्राप्तिः), ३६
**स्वर्गः** (कर्मणां परमा गतिः, मोक्षत्वेनाभिमता मीमांसकानाम्), २, ७
**स्वाध्यायप्रवचने** (अवश्यकर्तव्येषु प्रधानभूते), ४८, ४९
**स्वात्मन्यवस्थानम्** (स्वेन रूपेणावस्थितिः, मोक्षः), १, २, ६, १०, ६६
**स्वात्मा** (स्वस्य पारमार्थिकं स्वरूपम्), १, २, १०, ६६
**स्वाभाविकाज्ञानम्** (अविचारस्वभावेन विद्यमानमात्माज्ञानम्), ६४
**स्वाराज्यम्** (अपरब्रह्मसाधर्म्यप्राप्त्या निष्पन्नमैश्वर्यम्), ३७

# *ĀNANDAVALLĪ*
# *BHRIGUVALLĪ*

THE

# TAITTIRĪYA UPANISHAD

## *ĀNANDAVALLĪ -BHRIGUVALLĪ*

WITH

**Sri Shankara's Commentary**

Edited

*With a New Sub-commentary of his own*

Called

**The Bhāshyārtha Vimarshinī**

By

**SRI SWAMI SATCHIDANANDENDRA SARASWATI**

No. 112

**ADHYATMA PRAKASHA KARYALAYA**

Holenarasipura - 573211, Karnataka, INDIA

Tel : 08175 - 273820 www.adhyatmaprakasha.org

2011

**THE TAITTIRĪYA UPANISHAD, *ĀNANDAVALLĪ-BHRIGUVALLĪ*** WITH **Sri Shankara's Commentary** Edited with Notes and a new sub-commentary Bhāshyārtha Vimarshinī by **SRI SATCHIDANANDENDRA SARASWATI SWAMIJI**

Published by Adhyatma Prakasha Karyalaya, (Public Chariatable trust), Holenarasipura - 573211 ; Tel : 08175 - 273820; www.adhyatmaprakasha.org

Pages : XXXVII + 407

All rights reserved by
The Adhyatma Prakasha Karyalaya

Type set :
**Meera Raghuram**
Cell : 94814 77334

*Printed by*
**Sri Rama Printers**
# 25, 15th Cross
5th Main, Srinidhi Layout
Bangalore - 560 062

अध्यात्मग्रन्थावलिः

# तैत्तिरीयोपनिषदि

## आनन्दवल्ली - भृगुवल्ली च

श्रीशाङ्करभाष्यसंयुता


### श्री सच्चिदानन्देन्द्रसरस्वतीसंयमिभिः

स्वोपज्ञया भाष्यार्थविमर्शिनी नाम व्याख्यया समलङ्कृत्य
संपादिता



क्रमाङ्कः 112

*प्रकाशनस्थानम् :*

**अध्यात्मप्रकाशकार्यालये**

होळेनरसीपुरम् - 573211

शकाब्दाः 2011

# ग्रन्थविभागक्रमः

१. प्रास्ताविकं प्रकाशकानाम् v

२. भूमिका, (आङ्ग्लभाषामयी) vii

३. भूमिका, संस्कृतवाण्याम् xviii

४. विषयानुक्रमणिका xxv

५. सङ्केताक्षरविवरणम् xxxvii

६. ग्रन्थशरीरम् 1-386

७. अनुवाककवर्णानुक्रमणिका 387-388

८. उपनिषत्खण्डसूची 389-392

परिशिष्टम्

१. भाष्सस्यमुख्यशब्दसूची 393-399

२. विमर्शिनीगतमुख्यशब्दसूची 400-407

## PUBLISHERS' NOTE - FIRST EDITION

The first portion of Sri Shankaracharya's Bhashya on the Taittiriya edited by. Sri Swami Satchidanandendra Saraswati swamiji with Introduction and Notes, has already seen the light of the day. The present one is the second portion of the same Bhashya with the Swamiji's illuminating Commentary.

The reason for the departure from the chalked out plan for our publication of Sri Shankaracharya's Upanishad Bhashyas, has been set forth by Swamiji himself in his Introduction in English as well as in Sanskrit. We sincerely hope that our readers will join us in thanking His Holiness for this erudite Commentary, as a work of this kind was a long-felt want. The other features of the Series have been kept intact.

Swamiji has asked us to offer his Narayana Smaranams in gratitude for the assistance rendered in bringing out this edition, to **Sriyuta Parakkaje Subrahmanya Bhatta,** Vedanta Siromani and Visharada, and Pandita Pravara **Sri. H. Ananta Murthy Sastrigal.** They have both looked through the manuscript and offered some useful suggestions. Pandita Pravara **Sri. K. Krishna Jois,** Asthana Vidwan of Sri Sringeri Mutt, has gone through the Ananda Valli, and his views have been of great help also.

We are extremely grateful to the several ladies and gentlemen for financial aid towards the printing expenses of the publication. Among these are to be especially mentioned a gentleman of Bombay who prefers to remain anonymous;

Sri Vithalji Purushotham. Mangalore; Sri Vanamalidas Gokuldas, Mangalore ; Sri S. M. Desai, Kolhapur; some devotees of Mattur, Shimoga Dist.; members of the Darshanika Parishad. N. R. Colony. Bangalore ; members of the Adhyatma Vichara Sangha (Sri S. Vittala Sastrigal and others), Mysore; Shankara Jayanti Sabha, Basavangudi, Bangalore; Srimati Lakshmidevamma, Mattur; Anatha Sevashrama, Malladihalli, Holalkere Taluk; Narayana Krishna Deshpande, Masur ; Sri Subbaraya Shetty, Davanagere and Sri K. R. Venkataraman. Tiruchirapalli. We value very highly the gracious donation by His Holiness Sri Shankaracharya of Kamakoti Peetha as a token of his blessings for the thriving of this publication.

**Holenarsipur**

**25-6-62** *PUBLISHERS*

# INTRODUCTION

General observations on the scope and tenor of the Taittiriya Upanishad, will be found in the Introduction to the Shiksha Valli. We shall now enter upon the central theme of the Upanishad as taught in the Ananda Valli and the Bhrigu Valli, which together form a composite whole.

## The Relation between the Two Parts of the Upanishad

From Shankara's introductory remarks on the Shiksha (pp. 2,3) as well as the Ananda Valli (para 3, p-7), we learn that while Brahmavidya is actually begun in the Shiksha Valli alone, it is still merely Upasana (meditation) of the conditioned Brahman that is attempted there. That teaching necessarily presumes the distinction of Brahman and the devotee, who is to reach Brahman only after shuffling off this mortal coil. Now, all this is within the sphere of Avidya (ignorance) of the pure Brahman, and therefore the Highest Goal is not attained until one realises his absolute identity with Brahman after annihilating this nescience. It is only on this supposition that one can understand why, on exhausting all meditations whether exclusive of or conjoint with Karma, a distinct section like the Ananda Valli devoted solely to the pure knowledge of Brahman, becomes necessary.

## Subject-matter of this portion

We may now enter into details of the Upaanishadic teaching as presented here. Brahman, is Reality, Consciousness, Infinity (9) and Bliss (97)[1]. Whoever realises

---

1. The references are to the paragraphs unless otherwise mentioned.

it as one's own Self, has no cause of fear at all, since he abides for ever in that secondless Brahman (67) beyond the pale of fear. And Tapas (contracting of all the organs of knowledge) is the one indispensable means to this knowledge (94).

There are a few Upasanas enjoined in both the Anandavalli and the Bhriguvalli, but they are meant only for mediocre aspirants. The main trend of the teaching, however, is unbroken even while these Upasanas are interposed in as much as they serve a useful purpose in pointing out the media of realization, or else in glorifying the knower of Brahman in order to eulogize the knowledge of Brahman, as explained at some length in the present commentary (93, pp. 3, 9, 336, 340).

## Brahman as the Cause

There are three methods of approach adopted here to lead the aspirant to the intuition of Brahman. All of these may be comprehended under one heading - Adhyaropa - Apavada (the method of deliberate imputation and subsequent negation). This method consists in attributing certain characteristics to the featureless Brahman in order to fix the attention of the student on it, and then passing on to a higher point of view from which the assumed characteristic becomes sublated. The attribution itself, is a concession to the empirical intellect, to enable it, to rise to the higher standpoint later on.

The Modus operandi of the method, may be illustrated by applying it to the notion of causality. The time-bound human intellect is inherently used to the notion of causality

so much, that it demands a cause for the entire universe, naively forgetting that this relation, if at all, can obtain within the universe, only between phenomena in time or place. The Upanishad, therefore, starts from a definition of Brahman as Reality, Consciousness and Infinity and declares outright, that even Akasha (ether, the primary element concomitant with time), is produced from Brahman. All creation, or rather evolution, is only a manifestation of Brahman, Paramatman, or God as the true Self of all, who wills to become many, to become this manifold world. He himself enters into the aggregate of the body and senses as jiva- the supporter of the senses- and transforms himself into all that we see- gross and subtle, sentient and non-sentient, real and unreal. Now, this is only for the purpose of pointing out that there can be nothing apart from Brahman, the effect being only the cause in another form. We thus arrive at the conclusion that Brahman is the only Reality, the only Consciousness, and is Infinity itself. Hence, there is no second to limit it. For all limitation is due to space, or time, or a second thing beside the one which it limits. But everything including time and space is produced from Brahman, is infact an appearance super-imposed upon it, and nothing which is merely a construction of the mind, can possibly limit or otherwise affect its real substrate. And the individual soul being no other than Brahman itself, is only a seeming distinct on account of the superimposed adjunct, the mind (8-11,50-64). According to Shankara, then, the Sruti apparently teaching creation, only purports to convince the inquirer of his identity with the non-dual Brahman which brooks no second.

## The Method of Five Sheaths

Again, the Sruti in the course of describing the evolution of Brahman into the universe, states that from the earth came plants, and from plants food, whence this human being. As related above, Brahman has itself entered this human body and manifests itself as jiva with his various specific properties such as seeing, hearing, thinking and understanding. Now man generally looks upon himself as a body, though he is daily aware of the vital force, mind, and understanding also as a part of himself. The Sruti therefore starts from this false Atman (or body) as the most familiar man and takes the enquirer to the real Atman or Brahman, step by step, through the Pranamaya, Manomaya and Vijnanamaya selves, each subtler than the previous one, each pervading all the previous Koshas or sheaths, and hence more entitled to be considered as one's own self. In each case, however, the Sruti also broadens his ordinary outlook. Thus it identifies the Annamaya with the Cosmic Virat, the Pranamaya with the Cosmic Sutratma, and the Manomaya with Hiranyagarbha as Vedatma, while it identifies the Vijnanamaya with Hiranyagarbha, the Cosmic Buddhyatma, till at last even the Anandamaya or enjoying self is transcended and Brahman as the real self of all is realised as such (24, 25-44, 45).

Here too, the Sruti does not mean to aver that there are actually five different Koshas like scabbards covering a sword - each literally enclosed within the next one. All the Koshas are really super-impositions of Avidya, The only Reality being Brahman. Only each successive Kosha being subtler than the preceding one, claims to be more entitled to be regarded as the real Self, as the enquirer looks deeper and deeper.

## Proofs for the Existence of Brahman

Brahman described as the tail and support of Anandamaya being divested of, all conditions, and having no characterizing features whatever, is likely to be considered as altogether nonexistent. Man is so habituated to look upon his body, senses or mind as his own real Self, that he might be inclined to think that after all the Brahman which the Sruti postulates as the real Self of all, might be no more than an abstraction, since nothing whatever remains as a residue after the elimination of the physiological, psychical, intellectual and ethical constituents of the human being. The Sruti, therefore, offers some proofs, or rather persuasive suggestions, to lead him to the intuition of the Real Self. The fact that the world demands a cause or reality underlying it, that there is an individual self inclosed within each mind which an introvert person recognizes as his true Self, that the phenomena of real and apparent names and forms as well as of sentient and insentient beings, desiderate some real basis, that virtue is universally believed to be ultimately rewarded, that all beings strive with the fervent hope of attaining worldly pleasure and with a firm belief in a fountainhead of joy and the fact that some highly developed souls are seen to be altogether free from fear while the rest are invariably inspired with fear, one should conclude that there is Brahman or Reality which alone could satisfactorily account for these data of experience (51, 56, 61, 62, 64, 65, 66.)

While these are by no means proofs in the logical sense of the term, they do arrest our attention and direct us towards Brahman which is our true Self. It is clear that we can neither

prove nor disprove the existence of our own Self, since it is the very basis of thought which we utilize for proving or disproving anything, and nobody can shake off his own Self, try as he may. And the secondless Brahman as our Self, says the Sruti, is inperceptible, formless, undefinable, not requiring another support, and as such, one who abides in It, is surely established in absolute fearlessness (67).

## Trail of Brahmananda

Anandavalli is appropriately so named on account of its revealing the unexcelled, featureless, and secondless bliss called Brahmananda. The Sruti describes Ananda (pleasure) as the central part of Anandamaya as body. And Shankara says:

"Ananda or worldly pleasure, is really Brahman, which manifests itself in a particular modification of the mind whenever one's son, friend or other object of desire, is presented by virtue of good Karma. This is known in ordinary life as 'sensual pleasure'. This pleasure is momentary, because the Karma which gives rise to the particular mood of the mind, is unstable. As the mind is more and more freed from sullying impressions by the practice of concentration, meditation, chastity and reverential faith which dispel the darkening Tamas, it becomes more and more clear and transparent, and the pleasure amplified to that extent " (94).

Thus we learn that Brahmananda or Divine Bliss itself, assumes the guise of worldly pleasure owing to concomitant conditions. That is why the Sruti says "Who could be active and who could breathe, if there were not this Bliss in Akasha?" implying thereby that all human activities really

aim at the attainment of this bliss (65). And it is for this reason, too, that the highest type of worldly happiness, attained through external and internal practices, is pointed out here, to enable us to trace this Supreme Bliss. Shankara observes.

"As consciousness is more and more screened by ignorance and as ignorance becomes more and more intense, a particle of the Highest Bliss itself becomes the unstable worldly pleasure experienced by Brahma and other beings downward in the measure of their Karma, meditation and the external means available. This same Bliss is experienced in greater and greater degrees by Manushyas, Gandharvas and other beings in the higher planes according as Avidya, desire and Karma decrease, till the highest point is reached in the bliss of Brahman. When, on the other hand, distinction of . subject and object is blotted out by Vidya, it be· comes the Natural Bliss, perfectly uniform and non-dual" (71)

It will be observed that here, as elsewhere, Avidya is radically responsible for the apparent distinction of the Divine and the mundane. The difference between Brahmananda and worldly pleasures, degrees of worldly happiness and its impermanence - are all creations of Avidya. Just as the removal of this veil of ignorance by knowledge, results in the realization of Brahman untainted by the manifold universe, and in the absolute identity of Brahman and Jiva untinged with the Koshas or rather, just as the universe and individual self enveloped by the Koshas lose their self-identity in, and reveal their eternally real nature as Brahman- so also all worldlier happiness with its apparently various degrees, is seen to merge its self-identity in Brahmananda

or Pure Bliss without any distinction of subject and object. Shankara here quotes a Sruti Text: 'It is of this Bliss, verily that other beings enjoy a part. ' (Br. 4-3-32). He compares these particles of Bliss-particles only as seen by ignorance to drops of sea-spray implying thereby that worldly pleasures are for ever one with Brahmananda which is intensively Brahman itself (75).

## Reward of Knowledge

Whoever succeeds in identifying the five Koshas with the corresponding macro-cosmic Upadhis of Brahman and melting each preceding Kosha-self in the succeeding one by realizing it as a more subtle, more pervasive and as such more entitled to be regarded as the true Self, finally intuits Brahman as his very Self. He has absolutely nothing to be afraid of, for he verily becomes Brahman itself, simultaneously with the dawn of such intuition (98). He need no more fear the consequences of omitting any good deed or committing a bad one. For in his eyes both the good and the bad have been sublimated and are now indistinguishable from his own Self (88). No desires remain for him unfulfilled; for desires too, have now melted into Atman. It is only adopting the common parlance that the Sruti sings his praise when it declares that he can assume all forms and enjoy desired objects in whatever worlds they may happen to exist (110).

## Knowledge and Ignorance

Thus, according to Shankara, the process of the one Brahman becoming the manifold universe, Brahman's entering the body as a living soul, the soul's introspection and discrimination of the five Koshas, and its final realization

and rest in the Bliss of .Brahman ineffable and incomprehensible, and beyond the pale of fear, these and other details belong to the province of Adhyaropa or deliberate imputation only, merely intended as a device to make the teaching intelligible to the enquiring mind (86, 90); for all duality is a figment of Avidya. One may convince oneself of this truth by turning one's mind to the experience of deep sleep, where, in the absence of Avidya, no trace of duality is to be seen: It cannot be contended that non-·xperience of duality in that state, may itself be due to ignorance, just like the perception of the dual world in the other two states ; for, what we call sleep is the natural state of Atman not contingent on any extraneous factor (81).

In truth, however, neither knowledge nor ignorance is a property of the Self, in as much as they are both objects of intuition, whereas the Self itself can never be objectified. They belong, therefore, to the category of names and forms, superimposed on the Self (83) like day and night that are naively imputed to the Sun.

## The Present Commentary

The Bhashya on the Taittiriya Upanishad, though written in a very simple style, contains many such valuable thoughts often tersely put in aphoristic sentences demanding an elucidative commentary. There is available, no doubt, the invaluable Vartika by Sureswaracharya the immediate disciple of Shankara, but it is in itself too brief for a beginner to understand all that is implied in it. Anandagiri's Tika and Sayana's elaborate Bhashya on the Taittiriya Aranyaka, are, as observed in my Introduction to the Sikshavalli, often wide

of the mark, and cannot be taken for safe guides on many a knotty point that puzzles the ordinary student of the Bhashya.

Feeling therefore that an explanatory commentary on the Bhashya, is still a desideratum, I have tried, in my humble way, to supply this want. The procedure adopted here, is the same as in my ("Mandukya Rahasya Vivriti") a complete explanation of the Bhashya in all its implications from the beginning to the end in the order in which they occur, together with a critical review of objections to Shankara's interpretation by recent writers belonging to other schools of Vedanta, so as to bring to the forefront the comparative excellence of Shankara's system.

For this purpose, I have relied upon Shankara's other commentaries on the Prasthana Trayi or the Tripod of Vedanta (to wit: the Upanishads, the Bhagavadgita and the Brahmasutras), the Upadesha Sahasri of Shankara, the Vartikas of Sureswaracharya, and Gaudapada's famous Karikas, as my exclusive authorities for determining the traditional method and the cardinal doctrines of Vedanta. I have not hesitated to examine any errors of thought or interpretation in other commentaries, which I deemed to be in clash with Shankara's views on points of importance.

As usual in my edition of the other Bhashyas, the original text has been sub-divided into paragraphs with appropriate headings. The division of the Upanishadic Text itself into Anuvakas, as accepted by Vedic reciters, could not be followed here, and so, in order to exhibit the correspondence between the original and the Bhashya, I have been obliged to divide the Text into several Khandas for convenience' sake,

preserving, however, the usual Anuvaka division also with due warning of the beginning and end of each Anuvaka. All the important various readings have been noted, with reasons adduced for the one adopted here. Summaries of both the Anandavalli and the Bhriguvalli, have been added and two Indexes - one for the important words occurring in the Bhashya, and another a fairly exhaustive Subject-Index to the commentary itself - have been incorporated in the Appendix.

I hope that this edition of the Bhashya and the new commentary now presented, will be of some use to the students of Shankara, who wish to appreciate the teachings of that revered teacher, constant memory of whose holy feet, is my one solace in life.

Holenarsipur.

*Editor and Commentator.*

# भूमिका

## १. शीक्षावल्ल्या प्रकृतग्रन्थभागस्य संबन्धः

तैत्तिरीयोपनिषदं सामान्यतोऽधिकृत्य विचारः प्रतानितः शीक्षावल्लीभूमिकायाम् । अथैतदुपनिषत्प्रतिपाद्यम् असाधारण-विषयमधिकृत्य विशेषतः किञ्चिदुल्लेखितुम् इदमारभ्यते ॥

उपनिषत्समान्यस्य संबन्धः संक्षेपत इत्थमुपक्षिप्तो भगवता भाष्यकारेण 'इदानीं कर्मोपादानहेतुपरिहाराय ब्रह्मविद्या प्रस्तूयते' - इति। विवृतं चेदं संग्रहवाक्यम् -

> (१) 'कर्महेतुः कामः स्यात् । प्रवर्तकत्वात् । आप्तकामानां हि कामाभावे स्वात्मन्यवस्थानात् प्रवृत्त्यनुपपत्तिः । आत्मकामत्वे आप्तकामता । आत्मा च ब्रह्म। तद्विदो हि परप्राप्तिं वक्ष्यति । अतः अविद्यानिवृत्तौ स्वात्मन्यवस्थानं परप्राप्तिः ॥ (शी. पृ. 3-4)

इति । अथ, आनन्दवल्लीसंबन्धकथानावसरे लिखितमस्ति -

> (२) ''संहितादिविषयाणि कर्मभिरविरुद्धान्युपासनानि उक्तानि । अनन्तरं च अन्तः सोपाधिकस्य दर्शनमुक्तं व्याहृतिद्वारेण स्वाराज्यफलम्। न चैतावता अशेषतः संसारबीजस्य उपमर्दनमस्ति, इत्यतः, अशेषोपद्रवबीजस्य अज्ञानस्य निवृत्त्यर्थं विधूतसर्वोपाधि-विशेषात्मदर्शनार्थम् इदमारभ्यते 'ब्रह्मविदाप्नोति परम्' इत्यादि ॥''

इति एतेनेदं गम्यते यद् यद्यपि शीक्षावल्ल्यामेव ब्रह्मविद्या आरब्धा कर्मनिरपेक्षा स्वाराज्यफलदायिनी, तथापि तत्राज्ञानकल्पितो-पास्योपासकविभागम्, प्राप्यप्राप्तृविभागं चाङ्गीकृत्यैव मध्यमाधिकारिणां ब्रह्मप्राप्त्युपायः प्रदर्शितः, तत्प्राप्तये नाडीमार्गश्च । न चाज्ञानस्यात्यन्ति-कनिवृत्तिमन्तरेण स्वात्मन्यवस्थानेन सर्वकामावाप्तिरस्तीति,

आत्यन्तिकपरमपुरुषार्थप्राप्तये निरुपाधिकब्रह्मात्मविद्या वक्तव्या अवशिष्यत इति वल्लीयमारभ्यत इति । एवं हि कर्मणा तत्समुच्चितविद्यया केवलविद्यया च प्राप्यं यत् फलम्, तत्प्रतिपादनेन कालान्तरफलदायिक्रिया-सामान्यस्य विचारं परिसमाप्य क्रियाविलक्षणज्ञानम् अज्ञानमात्रव्यवधाननिवर्तनेन सद्यः सर्वकामावाप्तिफलकं ब्रह्मज्ञानं प्रतिपादयितुमारभ्यः समुचितो भवतीति । कर्मकाण्डे विस्तरेणाधिगतानामपि कर्मणां ज्ञानकाण्डे पुनरुपादानं तु न केवलम् उपासनासहकारित्वेन, किं तर्हि परविद्योत्पत्तिसाधनेनापि विनियोगप्रदर्शनार्थम् - इति शीक्षावल्लीभूमिकायाम् (शी. पृ. 14) ोचाम ॥

## २. प्रकृतवल्लीद्वयप्रतिपाद्यं ज्ञानम्

आनन्दवल्लीभृगुवल्लयोः प्राधान्येनोपदेशविषयः सत्यज्ञानानन्तपरमानन्दस्वरूपं ब्रह्म । तत्र ब्रह्मणः सत्यत्वं ज्ञानत्वमद्वितीयत्वं मुमुक्षुभिः स्वात्मत्वेन संविदितस्यात्यन्तिकाभयप्रतिष्ठाहेतुत्वं च आन्दवल्ल्यां प्रतिपाद्यते; तस्यैव च तपःसाधनेन तथा वेद्यत्वं भृगुवल्ल्यामुच्यते - इति विशेषः ॥

यद्यपि भृगुवल्ल्याम्, अन्नादिविषयाण्युपासनान्यपि पूर्वमनुक्तानि विहतानि दृश्यन्ते तथापि - अन्नादिसंस्तवद्वारेण तेषां ब्रह्मोपलब्धिद्वारत्वावधारणार्थत्वात्, ब्रह्मविद्विभूतिकीर्तनेन विद्यास्तुत्यर्थत्वाद् वा - न परविद्याप्रकरणभञ्जकानि तानि; अवान्तरतात्पर्येण तु तेषां मध्यमाधिकार्युपकारकत्वमपि न पराणुद्यते इति दर्शितमसाभिरत्र व्याख्याने (पृ. 308, 310, 337)

## ३. सृष्टिप्रक्रिया

परमतात्पर्यविषयीभूतस्य ब्रह्मात्मैकत्वज्ञानस्य फलमादर्शयितुम् अस्यामुपनिषदि ब्रह्मणो जगत्सृष्ट्यादिकारणत्वं, पञ्चकोशविवेकश्च - इति प्रक्रियाद्वयम् प्रदर्शितं प्राधान्यतः । तत्र सृष्टिप्रक्रिया । तावदित्थम् - परमात्मा 'बहु स्याम्' इति कामयित्व, अविद्याकल्पितनामरूपमायानुरोधेन, आलोचनात्मकं तपश्च

तप्त्वा, सर्वमिदमाकाशादिकं जगत् सृष्ट्वा, जीवरूपेण तदेवानुप्रविश्य सत्यानृतात्मकं चेतनाचेतनात्मकं च सर्वं स्वयमेवाभवत् । तस्मात् तस्य सत्यज्ञानानन्तत्वमुपपद्यते, आत्मानन्यत्वं च (भा. भा. ८-२१, ५०-६४) । अत्र जगत्सृष्टेः, तदनुप्रवेशस्य च कीर्तनम् 'नित्यनिर्विशेषाद्वयं ब्रह्मैकमेव परमार्थः; तद्व्यतिरेकेण जीवो वा, तदुपाधिभूतदेहादिर्वा, बाह्यं जगद् वा वस्तुतो नास्त्येव' इत्येतत्प्रतिपादनपरम्, न तु सृष्ट्यादिप्रतिपादनपरम् । सृष्ट्यादिज्ञानप्रतिबद्धफलाश्रयणात् - इति ॥

## ४. पञ्चकोशविवेकप्रक्रिया

यथैवाकाशादिसृष्टिप्रक्रिया ब्रह्मणोऽजाद्वितीयात्मत्वज्ञापनार्थेति गम्यते एवमेव, अन्नमयाद्यात्मपञ्चकवर्णनप्रक्रियापि आत्मनः पञ्चकोशविलक्षणत्वप्रतिपादनेन अद्वितीयानन्दस्वरूपत्वज्ञापनार्थैव, न स्वप्रधानेति गम्यते । सा हि प्रक्रिया एवं प्रवृत्ता - आकाशादिक्रमेणान्नरसमयपुरुषान्तं कार्यं सृष्ट्वा तदेवानुप्रविष्टं बुद्धिसंबन्धेन द्रष्टृत्वश्रोतृत्वादिविशेषधर्मवदिवोपलभ्यते । तत्र तथैवान्नमये देहे आत्मभावेन लोको वर्तते, एवमेव प्राणमये, मनोमये, विज्ञानमये, आनन्दमये च कोशस्वरूपे आत्ममतिं करोति । तत्रान्नमयादीनां पूर्वपूर्वस्मिन् आत्ममतिपरित्याजनार्थं श्रुतिः, उत्तरस्मिन्नुत्तरस्मिन् प्राणमयादौ आत्मबुद्धिमध्यारोपयति, शाखाचन्द्रनिदर्शनन्यायेनात्मतत्त्वं दर्शयितुम् (भा.भा. २४) । तत्र च व्यष्टिभूतान्नमयादिकोशस्य विराडाद्युपाधिलक्षणसमष्टच्यनन्ययताम्, आत्मनश्च क्रमेण सूत्रात्मतां वेदात्महिरण्यगर्भस्वरूपताम्, समष्टिबुद्ध्युपाधिकहिरण्यगर्भाभिन्नताम्, समष्ट्यानन्दोपाधिकहिरण्यगर्भानन्यतां च बोधयित्वैव अविद्याकल्पितान्नमयादिकोशलक्षणेष्वात्ममतिं परिहाप्य पर्यन्ते आनन्दमयपुच्छत्वेनाद्वैतं निर्विशेषं ब्रह्मैव सर्वात्मभूतं आत्मत्वेन विनिर्दिशति (भा.भा. २५, ४४, ४५) । इहापि च भृगुवल्लीवत् । परमतात्पर्येण तु, आत्मनः सत्यज्ञानानन्तब्रह्मत्वबोधनमेवानुगम्यत इति ज प्रकरणविच्छेदः ॥

ब्रह्म चानन्दमयस्य प्रतिष्ठात्वेन निर्दिष्टं निरुपाधिकत्वात्, निर्विशेषत्वाच्च नास्त्येवेति मन्दमतीन् प्रतिभायात् इति, 'जगत्कारणत्वात्, विज्ञानगुहायां जीवरूपापन्नमिवोपलभ्यमानत्वात्, नामरूपात्मना चेतनाचेतनविभक्तत्वेन

चावभासात्, सुकृतत्वेन प्रसिद्धेः, आनन्दरसत्वात्, कार्यकरणसंघातचेष्टानामुपपादकत्वात्, भयाभयहेतुत्वाच्च तदस्तीत्वेवावगन्तव्यम् (भा.भा. ५१, ५३,६१, ६२, ६४, ६५, ६६) इति ज्ञापयति श्रुतिः । तस्मिश्चाविद्याकल्पितमूर्तामूर्तधर्मान् दृश्यत्वादिलक्षणानपोह्य प्रत्यस्तमितसर्वविशेषे आत्मभावेन यः प्रतिष्ठां गच्छति, स एवाभयरूपं परमपुरुषार्थं गच्छति (भा.भा. ६७) इति प्रतिजानीते ॥

## ५. ब्रह्मानन्दानुगमः

नित्यनिरतिशयनिर्विशेषाद्वितीयानन्दत्वेन ब्रह्मस्वरूपसमर्पकत्वात् 'आनन्दवल्ली' इत्यन्वर्त नामस्योपनिषद्भागस्य । आनन्दमयस्य पुरुषविधतां 'तस्य प्रियमेव शिरः' इत्यादिना प्रदर्शयन्ती श्रुतिः 'आनन्द आत्मा' इति लौकिकानन्दं तस्यात्मत्वेनोपक्षिपति । एतस्य च लोकप्रसिद्धस्य विषयानन्दस्य सतत्त्वं विशदीकर्तुं भगवान् भाष्यकारः प्राह -

"आनन्द इति परं ब्रह्म । तद् हि शुभकर्मणा प्रत्युपस्थाप्यमाने पुत्रमित्रादिविषयविशेषोपाधौ अन्तःकरणवृत्तिविशेषे तमसा अप्रच्छाद्यमाने प्रसन्ने अभिवयज्यते । तद्विषयसुखम् इति प्रसिद्धं लोके । तद्वृत्तिविशेषप्रत्युपस्थापकस्य कर्मणोऽनवस्थित्वात् सुखस्य क्षणिकत्वम् । तद् यदा अन्तःकरणं तपसा तमोघ्नेन, विद्यया ब्रह्मचर्येण श्रद्धया च निर्मलत्वमापद्यते यावद् यावत् तावत् तावद् विविक्ते प्रसन्ने अन्तःकरणे आनन्दविशेष उत्कृष्यते विपुलीभवति ॥"

(भा.भा. ४४)

**इति । एवं च ब्रह्मानन्द एवायम् उपाधिवेशेषतो लौकिकानन्दवेषं धत्ते इत्युक्तं भवति । अत एव 'रसो वै सः' (२-७ खं २२) इति रसवदानन्दकरं ब्रह्म विदुषाम् इति प्रतिज्ञाय 'को ह्येवान्यात् कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्' इति प्राणिकार्यकरणचेष्टाः सर्वाः लौकिकानन्दरूपब्रह्मानन्दार्था एवेत्याह (भा.भा. ६५)। अत एव चैतस्य ब्रह्मानन्दस्यानुगमाय लौकिकानन्दो बाह्याध्यात्मिकसाधनसंपत्तिनिमित्त उत्कृष्टो निर्दिश्यते । अत आह भगवान् -**

> "अविद्यया तिरस्क्रियमाणे विज्ञाने उत्कृष्यमाणायां चाविद्यायां ब्रह्मादिभिः कर्मवशाद् यथाविज्ञानं विषयादिसाधनसंबन्धवशाच्च विभाव्यमानश्च लोके अनवस्थितो लौकिकः संपद्यते । स एवाविद्या-कामकर्मापकर्षेण मनुष्यगन्धर्वाद्युत्तरोत्तरभूमिषु अकामहतविद्वच्छ्रोत्रिय-प्रत्यक्षो विभाव्यते शतगुणोत्तरोत्तरोत्कर्षेण यावद् हिरण्यगर्भस्य ब्रह्मण आनन्दः इति । निरस्ते त्वविद्याकृते विषयविषयिविभागे विद्यया स्वाभाविकः परिपूर्ण एवानन्दोऽद्वैतो भवति ॥" (भा.भा. ७१)

इति । अत्राप्यविद्याप्रत्युपस्थापितोपाधिवशादेव लौककानन्दस्य ब्रह्मानन्दवैलक्षण्यं तारतम्यम्, अनित्यता च । अपोदितायां त्वविद्यायां विद्यया, लौकिक एवानन्दोब्रह्मानन्दः संपद्यते उत्कर्षापकर्षरहितः -

> 'स एष आनन्दः यस्य मात्राः समुद्राम्भस इव विप्रुषः प्रविभक्ताः, यत्रैकतां गताः, स एष परमान्दः स्वाभाविकः । अद्वैतत्वात् । आनन्दानन्दिनोश्च अविभागोऽत्र॥" (भा.भा. ७५)

## ६. विदुषः फलम्

स यः पञ्चकोशान् यथोक्तरीत्या विराडादिसमष्ट्युपाध्यभिन्नान् मत्वा पूर्वस्मात् पूर्वस्मादुत्तरस्योत्तरस्य सूक्ष्मतरत्वात्, व्यापकतरत्वात्, प्रत्यगात्मत्वाच्च ब्रह्मबुद्ध्यर्हत्वं विज्ञाय, अन्ते सर्वप्रतिष्ठाभूतमेवानन्दं निरतिशयं निरुपाधिकं यथोक्तं परमं ब्रह्म स्वात्मत्वेन वेद, तस्य कुतश्चन भयं नास्ति, 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' (२-८ खं २९) इति श्रुतेर्विद्यासमकालमेवाभयं गतो भवति (भा.भा. ८७) । एषा विद्या परमानन्दस्वरूपे एवाद्वैतात्मनि परिसमाप्ता भवति । वेदितुरात्मैव हि ब्रह्म - इत्यतो विद्यासमकालमेव ब्रह्मैव भवति तद्वित् (भा.भा. ९८) । 'स य एवं वेद प्रतितिष्ठति' (३-७, खं. १७) इति श्रुतेः । न च तस्य शुभकर्माकरणनिमित्तम् अशुभकरणनिमित्तं वा भयं संभवति । शुभाशुभकर्मणोरुभयोरप्यद्वितीयात्मरूपेणैव दृष्टत्वात् तेन । अत एव तस्य न कर्तृत्वभोक्तृत्वरूपसंसारानुवृत्तिः । सर्वस्यापि भोक्तृभोग्यभावादेः कार्यविषयत्वात्

'प्राणो वा अन्नम्, शरीरमन्नादम्' इत्यादिश्रुतेः (भा.भा. १०९)। न च तेनानवाप्तः कामः कश्चनावशिष्यते, येनासंतुष्टिः स्यात् । सर्वेषामपि लोकानामाप्तव्यानां तस्यात्मरूपेणाप्तत्वात् । 'इमाँल्लोकान् कामान्नी कामरूप्यनुसंचरन् । एतत् सामागायन्नास्ते' इति नित्यतृप्तत्वश्रवणात् (भा.भा. ११०) संव्यवहारमात्रविषयस्य च भोक्तृभोग्यादिव्यवहारस्य तस्य सर्वात्मनोऽव्यतिरेकाच्च परमार्थतः। 'अहमन्नम्', 'अहमन्नादः,' 'अहं श्लोककृत्' इति च श्रुतेः (भा.भा. ११३) तस्मात् सर्वथापि कृतकृत्योऽसौ ब्रह्मवित् ॥

## ७. विद्याविद्यासतत्त्वम्

यथोक्तनीत्या ब्रह्मात्मनः सकाशात् सृष्टिः, कार्ये तस्य जीवभावेनानुप्रवेशः, जीवस्य पञ्चकोशविवेकानन्दमयपुच्छब्रह्मणि प्रतिष्ठानम्, ब्रह्मानन्दस्यैव सतो लौकिकानन्दस्योत्कर्षापकर्षवत्त्वम् - इत्येतत् सर्वम् अविद्याध्यारोपितमेव सद् ब्रह्मविद्यामात्रेणापह्नुतं भवति। 'सत्यज्ञानानन्तानन्दरूपमद्वैतं ब्रह्मैव सर्वस्यात्मभूतम्' इति विदितं च तत्त्वं सद्यः परमपुरुषार्थाय । अतः सर्वमेतदविद्यामात्रं यद् दृश्यते इति विज्ञेयम् । सुषुप्तिसमाध्योर्हि सर्वथा अविद्याया अभावे सति द्वैतं नैव गृह्यत इति । न च सुषुप्ते द्वैताग्रहणमपि जाग्रत्स्वप्नयोस्तद्ग्रहणमिवाविद्याकृतमेवेति शक्यशङ्कम्। सुषुप्तस्यान्यनिरपेक्षात्मस्वभावमात्रत्वात् (भा.भा. ८१) । न चैवं विद्याविद्ययोरात्मधर्मत्वमिति शङ्क्यम् । तयोरनुभूयमानत्वादनुभवितृ-धर्मत्वानुपपत्तेः। तस्मात्, विद्याविद्ये अपि नामरूपपक्षस्यैव सवितर्यहोरात्रे इवात्मनि कल्पिते, न परमार्थतो विद्यमाने इति सर्वमनवद्यम् (भा.भा. ८३) ॥

## प्रकृतव्याख्यानस्य निर्माणे प्रयोजनम्

त इमे जिज्ञासुभिरवधेया भाष्यप्रतिपादिताः प्रमुखा विषयाः यथामति संग्रहेण प्रदर्शिताः । सन्त्येतादृशा अन्येप्यमोघाभिप्राया अत्र भाष्यकृद्भिस्तत्र तत्राविष्कृता वेदान्तप्रक्रियास्वरूपाभिज्ञापकाः । तदिदं वल्लीद्वयभाष्यं प्रसन्नगम्भीरं क्वचित् क्वचिदतिसंक्षिप्तैर्वाक्यैग्रन्थग्रन्थ्युपस्थापकं न कुत्रापि व्याख्याने सप्रपञ्चं परिशीलितं यथा विज्ञासुमनोनैराकुल्यं भवेदस्यैदम्पर्यविषये । श्रीसुरेश्वराचार्यैर्भगवत्पादानां

साक्षादन्तेवासिभिर्यद्यप्यमूल्यं वार्तिकं व्यरचि, तथापि तस्यापि ग्रन्थस्यातिसंक्षिप्तत्वात् तदीयोऽप्याशयः तत्र तत्र दुरूह एव संवृत्त इति, वार्तिकमपि भाष्यार्थनिर्धारणाय न पर्याप्तमभूत् । भाष्यटीकासायणभाष्यादिषु चाक्षरानुलोम्येन भाष्यार्थाविवरणात्, भाष्यानुल्लिखितवेदान्तसूत्रादिविषयविचारबाहुल्येन क्वचित् क्वचिच्च तदनभिमतव्याख्यानप्रस्थानप्रक्रियासंपृक्ततया च भाष्यार्थनिर्धारणासिद्धेश्च परिशुद्धशाङ्करप्रक्रियातत्त्वं बुभुत्सूनां न तृष्णाशान्तये भवन्ति तादृशा अपि ग्रन्था इति शीक्षावल्लीभूमिकायामेवावेदितम् । तदेतत् सर्वमनुसंधाय मया भाष्याक्षरानुक्रमेणैव भगवत्पादीयभाष्यान्तरसंवादेन तत्तद्विषयविमर्शनं कृत्वा अर्वाचीनमतान्तरप्रविष्टवेदान्तिभिरुत्थाप्यमानशङ्कानां निरसनपूर्वकं विशुद्धशाङ्करप्रक्रियायाः श्रैष्ठ्यमाविष्कुर्वती भाष्यार्थविमर्शिनी नाम व्याख्येयं प्रणीता ॥

अत्र च भगवत्पादीयभाष्यान्तराणि, उपदेशसाहसी, तैत्तिरीयबृहदारण्यकवार्तिके, वेदान्तार्थसंप्रदायविदां श्रीगौडपादानां माण्डूक्यकारिकाश्च - इत्येते एव ग्रन्थाः केवलं प्रमाणत्वेन गृहीताः शुद्धसंप्रदायानुसारिप्रक्रियानिर्धारणार्थम् । भाष्याशयविरुद्धा व्याख्यासु दृश्यमाना दोषा निर्विशङ्कम् उद्घाटिताः, भाष्यार्थनिर्णिनीषूणामुपकारार्थम् । भाष्यमूलं पाठान्तरशोधनपूर्वकं ग्रन्थशरीरविभजनेन तत्तद्भागार्थसूचकशिरोलखनिवेशनेन च भाष्योदाहृतप्रमाणवाक्यनामाकरस्थाननिर्देशनपूर्वकं यथामति संस्कृतम् । परिशिष्टे च भाष्यस्थमुख्यशब्दानां सार्थानां सूची, व्याख्यानप्रतिपादितप्रधानविषयाणां च सूची चेति वर्णानुक्रमानुसारि सूचीद्वयं सञ्चितम् - इतीयता सौकर्येण प्रकाशितोऽयं ग्रन्थो भगवत्पादीयभाष्याशयं जिघृक्षूणां कियत् साहाय्यमाचरेदित्यत्र त एव प्रमाणम् । मम तु भगवत्पादचरणसंस्मरणमविरतं यदि तदनुग्रहेण संसिध्येत्, तावतैव कृतार्थता इति निवेदनम् ।

**अध्यात्मप्रकाशकार्यालये**
**विकृतिनाम संवत्सरस्य माघशुक्ल सप्तम्यां**

**ग्रन्थसंपादकः**

# विषयानुक्रमणिका

### अत्र स्थूलाक्षरैः मुद्रापिता भाष्यभागाङ्काः;
### व्याख्यासूचकास्तु अन्ते दत्ताः पत्रपृष्ठाङ्काः

## आनन्दवल्ली


पृष्टसंख्याः

१. **शान्तिपाठः**

ग्रन्थावतरणिका, शान्तिपाठाक्षराश्चस्यविमर्शश्च - भाष्यस्य व्याख्यानान्तरं तद्दूपणं च - शं न इत्यस्याः शान्तेर्वक्ष्यमाणार्थत्वोप - पादनम् ॥ 2-5

२. **द्वितीयशान्तिव्याख्यानम्**

सह नाविति शान्तेर्विनियोगः ॥ 5-7

३. **ग्रन्थसंबन्धः**

संहितादिविषयाणीत्यत्र आदिशब्दार्थः - अतीतवल्लीप्रोक्तं नात्यन्तिकममृतत्वम् - संसारबीजभूताज्ञाननिवृत्त्यर्थं निरुपाधिकब्रह्मविद्या काङ्क्षणीया - अतीतग्रन्थस्य परविद्योपकारकत्वम् ॥ 7-10

४. **ब्रह्मविद्यायाः संसाराभाव आत्यन्तिकः**

सोपाधिकनिरुपाधिकब्रह्मविभागः - अविद्यानिवृत्तिः साक्षात्फलं ब्रह्मविद्यायाः ॥ 10-13

५. **विद्यासंबन्धप्रयोजनोपन्यासः**

साक्षाच्छ्रुतिरेव विद्याफलं परमपुरुषार्थ इत्याह - ग्रन्थादावेव संबन्धप्रयोजनज्ञापनस्य फलम् ॥ 13-15

६-७. वल्लीसूत्रवाक्यार्थः

सूत्रवाक्यस्याक्षरार्थः - ब्रह्मविज्ञानस्य ब्रह्मभाव एव फलम् - परप्राप्तिरविद्यानिरसनद्वारेण इत्यत्र दृष्टान्तः ॥ 15-19

८. ऋगुदाहरणावतरणिका

अवतरणिकाभाष्यार्थः ॥ 19-20

९. लक्षणवाक्ये विशेषणानां कृत्यम्

सत्यादिविशेषणानां लक्षणार्थता - किंरूपमिदं लक्षणम् ? 21-24

१०-१२. सत्यादिपदानां प्रातिस्विककृत्यविवेचनम्

'सत्यम्' इत्यनृताद् विकाराद् व्यावृत्त्यर्थम् - सत्यादिविशेषणविषये शङ्काग्रन्थस्य सार्थक्यम् - 'ज्ञानम्' इति ज्ञप्तिमात्रमुच्यते - 'ज्ञानम्' इति न ज्ञानकर्तृत्वार्थकम् - आत्मनो ज्ञेयत्वमपि न ज्ञानशब्दार्थः - ज्ञानशब्दस्य भावसाधनत्वोपसंहारः, तत्फलकथनं च - अनन्तम् इति विशेषणस्य कृत्यम् ॥ 24-32

१३-१४. लक्षणवाक्यस्याबोधकत्वशङ्का तत्परिहृतिश्च

लक्षणवाक्यस्यानर्थकताशङ्का - शून्यार्थताशङ्कापरिहारः - वेदितुरात्मत्वाच्च न ब्रह्मासत् ॥ 32-36

१५. ब्रह्मणो ज्ञानत्वं कीदृशम् ?

ज्ञानत्वं ज्ञानकर्तृत्वमेव स्यादित्याशङ्का - ज्ञानं नित्यम्, न कार्यम्- ब्रह्मणः सर्वज्ञता - ज्ञानरूपस्य ब्रह्मणो न धात्वर्थता, न च ज्ञानकर्तृता ॥ 37-43

१६. ब्रह्मणोऽपदार्थत्वम् अवाक्यार्थत्वं च

ब्रह्मणः सत्यादिशब्दलक्ष्यत्वे आक्षेपपरिहारौ ॥ 43-46

१७. ब्रह्मणो हार्दे व्योम्नि वेद्यत्वम्

व्योमशब्दस्य अव्याकृतपरत्वेन व्याख्यानम् - 'हार्दाकाशमेव परमं

व्योम' इति द्वितीयं व्याख्यानम् - परमव्योमशब्दस्य साक्षिचैतन्यपरता ॥ 46-50

१८. **ब्रह्मविद्याफलम्**

फलवाक्यस्थपदानां संबन्धः - अत्र सहशब्दो न सार्थपर्यायः - सर्वकामावाप्तिविषये शङ्कासमाधाने - विपश्चित्त्वविशेषणार्थः - मन्त्रार्थोपसंहारः ॥ 50-54

१९. **ग्रन्थशेषसंबन्धः**

कृत्स्नवल्ल्यर्थः ॥ 54-55

२०. **ब्रह्मण आनन्त्यम्, सत्यत्वं च**

उत्तरग्रन्थः सत्यानन्तत्वोपपादनार्थः - कालाकाशयोरन्तवत्त्वोपपादनम्-ब्रह्मणि त्रिविधानन्त्योपपत्तिः - ब्रह्मणो निरतिशयसत्यत्वम् - ब्रह्मणो जगत्कारणत्वमपि मायिकमेव ॥ 55-61

२१. **आकाशादिसृष्टिः**

अद्वितीयब्रह्मण एव जगत्कारणत्वम् - ब्रह्मण आत्मत्वम् - ब्रह्मण आकाशादिकारणत्वम् - सृष्टिक्रमचिन्तनावश्यकता - मुण्डकश्रुतिमवलम्ब्य सृष्टिश्रुतिवाक्यार्थनिर्णयः ॥ 61-70

२२-२४. **अन्नमयात्मा**

अन्नात् सर्वप्राणिनां सृष्टिः - अन्नाद् रसादिकमेण पुरुषोत्पत्तिः - ब्रह्मणोऽन्नमयादित्वमविद्याकृतम् - पुरुषस्यैव विशेषतो ग्रहणे श्रुत्यभिप्रायः - शरीरस्य शिरःपक्षपुच्छादिकल्पने प्रयोजनम् - अन्नमयस्य शिरआद्यवयवनिरूपणम् ॥ 71-77

२५-२६. **अन्नमयात्मप्रकाशकः श्लोकः**

श्लोकस्यान्नमयप्रकाशकत्वोपपादम् - अन्नमयस्य विराडभेदवर्णनम् - अत्र वार्तिकप्रस्थानान्तरं तद्विमर्शश्च - अत्रान्नब्रह्मोपासनम-

विवक्षितम् इति मतम्, तद्दूषणं च - अन्नस्य सर्वौषधनामकत्वम् - अन्नब्रह्मविदः फलम् - अन्नमयकोशोपसंहारः ॥ 77-84

२७-२९. **प्राणमयात्मा**

उत्तरग्रन्थसंबन्धः - अन्नरसमयस्य प्राणमयेन पूर्णत्वम् - प्राणमयस्य पुरुषविधत्वोपपादम् ॥ 84-90

३०-३२. **प्राणमयात्मप्रकाशकः श्लोकः**

प्राणमयस्य आधिदैविकेन वायुना अभेदः - तेनैष पूर्ण इति वाक्यस्य परमतात्पर्यम् - प्राणोपासनफलम् ॥ 90-95

३३. **प्राणमय एवान्नमयस्याऽऽत्मा**

प्राणमयस्यात्मत्वावधारणफलम् - प्राणमयस्य आत्मत्वोपपत्तिः - शरीरत्वव्यपदेशाच्च प्राणमय एवान्नमयस्यात्मा ॥ 95-99

३४-३५. **मनोमयात्मा**

मनोमयात्मावतरणिका - मनोमयस्य पुरुषविधत्वनिरूपणम् - यजुरादीनां मानसत्वोपपादनम् - यजुरादीनां मानसत्वाङ्गीकारेण प्रयोजनम् - मनोमयस्य वेदात्मतोपसंहारः ॥ 100-105

३६-३७. **मनोमयात्मप्रकाशकश्लोकः**

वेदात्मज्ञानस्तुतिः, तदुपासनाफलं च ॥ 106-107

३८-३९. **विज्ञानमयात्मा**

विज्ञानमयस्य मनोमयाद् वैलक्षण्यं च - विज्ञानमयात्मनः पुरुषविधता ॥ 107-110

४०-४१. **विज्ञानमयात्मप्रकाशकश्लोकः**

विज्ञानमयश्लोकावतारः - विज्ञानस्य कर्तृत्वविषये आक्षेपसमाधाने - समष्टिविज्ञानस्तुतिः - विज्ञानब्रह्मोपासनाफलम् ॥ 110-115

४२-४३. **आनन्दमयात्मा**

विज्ञानमयः स्वाभ्यन्तरानन्दमयेन पूर्णः - आनन्दमयसतत्त्वे वृत्तिकारमतम् - आनन्दमयः कार्यात्मैव - आनन्दमयस्योपासनाप्रप्यत्वं ब्रुवतां मते दोषः - आनन्दस्यस्वरूपनिर्धारणम् ॥ 116-122

४४. **आनन्दमयस्य पुरुषविधत्वम्**

पुरुषविधताश्रुतितात्पर्यम् - आनन्दमयस्य शिरः, पक्षौ च - आनन्दमयस्य आत्मा आनन्दसामान्यम् - आनन्दमयस्य पुच्छं परं ब्रह्मैव ॥ 122-129

४५-४७. **ब्रह्मास्ति, द्वैतावसानभूतत्वात्**

पुच्छब्रह्मास्तित्वपरत्वेन श्येकावतरणिका - ब्रह्मासदिति मन्वानस्य अनर्थप्राप्तिः - ब्रह्मनास्तित्वशङ्कायां निमित्तम्, तस्या अयुक्तत्वप्रदर्शनं च - ब्रह्मास्तित्वविदः परप्राप्तिः कीदृशी ? - व्याख्यानान्तरेण प्रयोजनम् - सच्छब्दस्य साधुवाचकत्वेन व्याख्यानम् - श्लोकार्थसंग्रहः ॥ 129-137

४८. **आनन्दमयप्रकरणोपसंहारः**

अन्तिमकोशग्रन्थपरिसमाप्तिः - 'एतत्' शब्देन आनन्दमय एव परामृश्यते ॥ 137-139

४९. **ब्रह्मप्राप्तिविषये शिष्यस्यानुप्रश्नाः**

अनुप्रश्नावतरणम् - प्रश्नपरिगणनम् ॥ 139-142

५०. **प्रतिवचनग्रन्थावतरणिका**

ब्रह्मणोऽस्तित्वस्यैव निर्णेयत्वेनोपादाने हेतुः - ब्रह्मणः सत्त्वोपपादनेन सत्यत्वमप्युक्तं भवति - ब्रह्मणो ज्ञानत्वमप्युच्यते आगामिग्रन्थे- उत्तरग्रन्थस्य सत्यत्वप्रतिपादने गमकम् ॥ 142-145

**५१-५५. प्रतिवचनम् : अस्ति ब्रह्म जगत्कारणत्वात्**

ब्रह्मासत्त्वाशङ्का - वेदान्तसंमतसत्कार्यवादः - ब्रह्म स्वातन्त्र्येण जगत्कारणम् - निरपेक्षस्वातन्त्र्यं ब्रह्मणः - सोऽकामयत इति वाक्यस्य तात्पर्यम् - मायिकसृष्टिवादे आक्षेपः - पूर्वपक्ष्युपक्षिप्तदोषप्रतिक्षेपः - पारमार्थिकसिसृक्षावादे दोषाः - पारमार्थिकसिसृक्षावादिना स्वप्रक्रियाविशदीकरणम् - ईश्वरप्रत्यभिज्ञावादे व्याघातदोषः - सर्वज्ञत्वं सर्वकर्तृत्वं चेश्वरस्य स्वाभाविकम् इत्यप्यसत् - ब्रह्मणः कामप्रकारवर्णनम् - नामरूपयोर्वास्तवत्वानुपपत्तिः - ब्रह्मणः स्रष्टव्यविषयकं तपः - परमात्मना जगतः सर्वस्य सृष्टिः - निर्व्यापारस्याप्युपादानान्तरानपेक्षं सर्वस्रष्टृत्वोपपत्तिः ॥ 146-165

**४६-६०. अस्ति ब्रह्म, विज्ञानगुहायामुपलभ्यमानत्वात्**

प्रवेशग्रन्थे चिन्ताविषयोपन्यासः - प्रवेशानुपपत्तिशङ्का-परिणामवादिमतनिराकरणम् - ब्रह्मप्रतिबिम्बवादनिरासः- नवीनवेदान्त्यभिमतप्रवेशप्रकारनिरसनम् - व्याख्यानप्रस्थानाभिमत-प्रतिबिम्बवादनिरसः-प्रवेशश्रुतेरर्थो नास्त्येवेति पूर्वपक्षोपसंहारः - प्रवेशवाक्यस्य सिद्धान्तिसंमता गतिः - बुद्धिगुहाश्रितम् आभासविशेषरूपम् आत्मवेदसाधनम् - ब्रह्मप्रवेशस्वरूपकथनम्, ब्रह्मवेदनप्रकारनिरूपणं च - परमप्रकृतोपसंहारः ॥ 166-182

**६१. अस्ति ब्रह्म । नामरूपात्मकत्वात् चेतनाचेतन-विभक्तत्वेनावभासाच्च**

ब्रह्मणो नामरूपापत्तिरपि मायिक्येव-सृष्ट्यादिवाक्यानाम् आत्मैकबलाद् प्रतिपत्त्यर्थत्वात् तत्र निमित्तादिप्रश्नप्रतिवचनानुपपत्तिः श्रुतिबलाद् विरुद्धेऽप्यर्थे श्रद्धा न कार्या - सच्छब्दार्थकथनम् - सत्त्यदादीनि व्याकृतनामरूपविषयाणि विशेषणानि त्यदादीन्यत्र विशिष्या-ध्यात्मिकप्राणाकाशविशेषणानि - चेतनाचेतन-विभक्तरूपेण ब्रह्मणो बहुभावः - सत्यानृतविभक्तरूपेण ब्रह्मणो बहुभावः - अभिनववेदान्तिव्याख्यानं 'सत्यमित्याचक्षते' इत्यंस्य-ब्रह्मणः परमार्थ सत्यत्वम् ॥ 182-191

**६२-६३. अस्ति ब्रह्म । सुकृतप्रसिद्धेः**

प्रवेशबहुभवनग्रन्थवाक्यार्थः - सर्वान्तरात्मास्तित्वपरत्वेन श्लोकावतरणिका - ब्रह्मण एव कार्यत्वं च - कार्यस्य कारणानन्यत्वम् - ब्रह्मणोऽस्तित्वोपपादकत्वेन सुकृतप्रसिद्ध्युपन्यासः ॥ 192-198

**६४. अस्ति ब्रह्म । रसत्वप्रसिद्धेः**

निरेषणानामपि तृप्तिहेतुत्वात् अस्ति ब्रह्म ॥ 198-199

**६५. अस्ति ब्रह्म । कार्यकारणसंघातक्रियादर्शनात्**

कार्यकारणानां संहत्यकारित्वं ब्रह्मास्तित्वगमकम् - परव्याख्यानदूषणम् - श्रुतौ गम्यमानो जीवेश्वरभेदोऽत्र लोकसिद्धानुवादेन ॥ 199-204

**६६-६७. अस्ति ब्रह्म, भयाभयहेतुत्वात्**

आगामिग्रन्थसंबन्धः - वार्तिककारप्रस्थानम् - अभयहेतोरस्तित्वोपपादनम् - ब्रह्मणोऽदृश्यत्वादिधर्मकत्वम् - ब्रह्मणि विदुषोऽभयप्रतिष्ठा - अदृश्यत्वादिधर्मवत्वेऽपि न ब्रह्मणोऽपरमार्थता - अद्वैतब्रह्मणो विद्वदभयहेतुत्वोपपत्तिः - अभयहेतुर्ब्रह्म - अविदुषो भयहेतुर्ब्रह्म - अस्ति ब्रह्म, भयसामान्यकारणत्वात् ॥ 204-216

**६९. भयहेतुश्लोकभाष्यम्**

श्लोकावतरणिका - श्लोकाभिप्रायवर्णनम् ॥ 216-218

**७०-७४. ब्रह्मानन्दमीमांसा**

मीमांसाविषयः - लौकिकानन्दविशेषैर्ब्रह्मानन्दानुगमः - ब्रह्मानन्दस्य साक्षादवाप्तिर्विद्यया - आनन्दोत्कर्षगणनार्थं मानुषानन्दस्यैकत्वेन ग्रहणम् - उत्तरोत्तरभूमिकासु आनन्दस्य उत्कृष्टतरत्वे प्रयोजकम् - अकामहतत्वं परमानन्दप्राप्तिसाधनम् - आनन्दोत्कर्षकाष्टा - आनन्दोत्कर्षश्रुतेरर्वाचीनवेदान्तिव्याख्यानं तद्दूषणं च - आनन्दतारतम्यश्रुतेर्व्याख्यानान्तरं तन्निरासश्च ॥ 218-233

## ७५. आनन्दमीमांसाफलम्

स्वाभाविकब्रह्मानन्दवाक्यव्याख्यानार्थमवतरणिका ॥ 233-235

## ७६. परमानन्दनिर्देशः

उत्तरवाक्यसंबन्धः - स यश्चायम् इत्यादिवाक्यार्थः - अत्र हिरण्यगर्भैकत्वम् अविवक्षितम् - ज्ञेयब्रह्मवाक्यमिदं स यश्चायमिति, नोपासनावाक्यम् - प्रस्थानान्तरेण उपनिषद उपासनपरत्वशङ्का तद्दूषणं च - आनन्दमीमांसाफलोपसंहारोऽप्यत्रैव - द्वैतोपमर्दज्ञानविषये चोद्यपरिहारौ ॥ 235-246

## ७७-७८. ब्रह्मविद्याफलम्

वृत्तग्रन्थार्थानुद्रवणम् - द्वितीयानुप्रश्नानादरणेन तृतीयस्यैव निर्णेयत्वेन स्वीकारे हेतुः - सर्वस्याप्यविशेषेण ब्रह्मज्ञानमात्रेण ब्रह्मप्राप्तिः - विद्वान् सर्वैषणात्यागेन ब्रह्म प्राप्नोति - मतान्तरेण प्रेत्यशब्दव्याख्यानं, तद्दूषणं च - कोशपञ्चकसंक्रमणप्रकारः - संक्रमणश्रुतेर्व्याख्यानान्तरं तद्दूषणं च - अन्नमयादिशब्दास्तच्छरीरक परमात्मपरा इति न सम्यक् - संक्रमणश्रुत्यर्थविमर्शोपसंहारः ॥ 246-257

## ७९-८५. चिंता : संक्रमणकर्ता कः, कथं वा संक्रामति ?

चिन्ताया विषयः प्रयोजनं च - ब्रह्मप्राप्तिरित्यन्नमयाद्यात्मबुद्धिनिवृत्ति-र्विवक्षिता - प्राप्तिशब्दस्योक्तार्थत्वे विद्यामात्रोपदेशोलिङ्गम् - अभेदपक्षः साक्षाछ्रुत्यनुगृहीतः - अभेदपक्षे एवाभयप्रतिष्ठोपपत्तिः - अद्वैतानुभवप्रदर्शनम् - सुषुप्तस्य द्वैताग्रहणं स्वाभाविकम् - अविद्याविशेषवादिमतस्यात्रानावकाशः - सुषुप्तिनिदर्शनभाष्यस्य गौडपादीयप्रस्थानेनाविरोधः - द्वैतिपक्षे भयनिवृत्त्याकाङ्क्षा नैवास्ति - द्वैतिव्याख्यानदूषणम् - द्वैतस्य विकल्पनामात्रत्वम् - द्वैतदर्शननिवृत्तिविषये एकदेशिमतद्वयं तद्दूषणं च - विद्याविद्या-सतत्त्वविमर्शः - विद्याविद्ये आत्मनि कल्पिते - प्रसङ्गादेकदेशीय-कल्पितप्रस्थाननिराकरणम् - संक्रमणमत्र न मुख्यम्, किं तु ज्ञानरूपम् - संक्रमणशब्दस्य ज्ञानार्थत्वे न काचिदनुपपत्तिः - संक्रमणवाक्यार्थोपसंहारः ॥ 257-287

८३-८७. **आनन्दवल्ल्यर्थसंग्राहकश्लोकः**

सर्वोऽपि व्यवहारो ब्रह्मण्येव कल्पितः - परमार्थतस्तु ब्रह्म नित्यनिर्विकल्पम् - श्लोकावतरणिका ब्रह्मानन्दस्य सर्ववागगोचरत्वम् - ब्रह्मानन्दस्य सर्वप्रत्यागोचरत्वम् ब्रह्मानन्दस्यसाधारणविशेषणानि - ब्रह्मानन्दस्य वेद्यत्वं कीदृशम् ? - ब्रह्मानन्दविदो भयहेत्वभावः ॥ 287-297

८८. **ब्रह्मानन्दविदो भयनिमित्तं नास्त्येव**

विदुषोऽधर्मादिभयनिमित्ताभावः ॥ 297-299

८९. **आनन्दवल्ल्या उपसंहारः**

ब्रह्मविद्यास्तुत्या ग्रन्थोपसंहारः ॥ 300

**आनन्दवल्लीसारः** 301-304

## भृ गु व ल्ली

९०. **वल्लीसंबन्धः**

वृत्तार्थसंक्षेपः - वर्तिष्यमाणार्थसंक्षेपः ॥ 305-307

९१. **पितापुत्रसंवादतात्पर्यम्**

आख्यायिकार्थः ॥ 307

९२. **भृगोरुपसत्तिः**

ब्रह्मजिज्ञासार्थं गुरूपगमनमवश्यं करणीयम् ॥ 307-308

९३. **पितुर्वरुणस्योत्तरम्**

ब्रह्मोपलब्धिद्वारम् - 'इमानि भूतानि' इत्यत्र भूतशब्दार्थः - भूतानां ब्रह्मकारणत्वावधारणं कथम् ? - 'जानाति जीवन्ति' इत्यस्यार्थः - ब्रह्मणो भूतसंवेशनस्थानत्वम् - लक्षणवाक्यार्थः - ब्रह्म चान्नादिद्वारेणैव प्रतिपत्तव्यम् ॥ 308-315

९४. **तपसो ब्रह्मविद्यासाधनत्वम्**

ब्रह्मजिज्ञासोर्विशिष्टसाधनम् अपेक्षितम् - तपस एवापेक्षित-साधनत्वनिर्धारेण उपपत्तिः - ब्रह्मप्रतिपत्तिसाधनत्वेनाभिमतस्य तपसः स्वरूपम् ॥ 315-318

९५. **अन्ने ब्रह्मत्वनिश्चयः**

समष्टिरूपमेवान्नादिकमत्रोपदिष्टम् ॥ 319-320

९६. **भृगोर्ब्रह्मप्रतिपत्तिक्रमः**

भृगोः पुनरप्युपगमने कारणम् - पितुः प्रतिवचनम् - आनन्दब्रह्म-पर्यायपर्यन्तस्य ग्रन्थस्य समुदितार्थः ॥ 320-324

९७. **आख्यायिकातात्पर्यम्**

तपः परमं साधनम् - आनन्दो ब्रह्मेति पञ्चकोशविलक्षणं निर्विशेषं ब्रह्म विवक्षितम्-लक्षणवाक्यविषये वादिविकल्पः, तद्विमर्शश्च - अविद्योपादानकजगद्वाद्यभिमतलक्षणद्वयविमर्शः - सूत्रतद्भाष्ययोः कीदृशं ब्रह्मलक्षणमभिप्रेतम् ? लक्षणद्वयस्य ब्रह्मस्वरूपाधिगमन-प्रकारभेदः - नवीनवेदान्तिप्रक्रिया तद्विमर्शश्च ॥ 324-332

९८. **ब्रह्मविद्याफलम्**

उत्तरवाक्यसंबन्धः - ब्रह्मविद्यास्वरूम् - ब्रह्मविद्यायाः परमफलम् - ब्रह्मविदो दृष्टं फलम् - अन्नान्नादत्वादि कया प्रणाड्या फलम् ? 332-337

९९. **अन्ननिन्दानिषेधः**

अन्ननिन्दानिषेधस्य प्रयोजनम् ॥ 337-338

१००. **प्राणशरीरयोरन्नान्नादत्वभावना**

अन्नान्नादोपासनाप्रकरणस्यैदम्पर्यम् - प्राणशरीरयोरन्नान्नादत्वम् ॥ 338-341

१०१. **अब्ज्योतिषोरन्नान्नादत्वोपासनम्**

अन्नपरिहारोपदेशतात्पर्यम् - अपां ज्योतिषश्चान्योन्यान्नत्वम् ॥ 341-343

१०२. **अन्नस्य बहुकरणं व्रतम्**

अन्नस्य बहुकरणोपदेशः - पृथिव्यादिकमत्र मुख्यत आध्यात्मिकं विवक्षितम् ॥ 343-344

१०३. **बह्वन्नसंपादने हेतुद्वयम्**

बह्वन्नसंपादने प्रयत्न आस्थेयः ॥ 344-346

४. **अन्नदानमाहात्म्यम्**

अन्नदानस्य दातृवयःसत्कारानुगुणं फलम् ॥ 346-347

१०५-१०७. **ब्रह्मोपासनप्रकाराः**

ब्रह्मोपासनविधिग्रन्थस्य संबन्धः - आध्यात्मिकोपासनानि - आधिदैविकोपासनानि - ब्रह्माभिन्नाकाशोपासनप्रकाराः, तत्फलं च॥ 348-355

१०८. **अन्नान्नादत्वोपदेशस्य परमतात्पर्यम् आत्मनोऽसंसारित्वे**

आत्मा न संसारी परमार्थतः, कारणब्रह्मानन्यत्वात् - आत्मा न कार्यान्तर्गतः, प्रवेशश्रुतेः - आत्मनः संसारित्वे न प्रत्यक्षादि प्रमाणम् - आत्मनोऽसंसारित्वं न तर्कविरुद्धम् ॥ 355-364

१०९. **आत्मन एकत्वादेव चासंसारित्वम्**

आत्मन एकत्वम् असंसारित्वं च श्रुतियुक्तिसिद्धम् ॥ 364-366

११०. **आत्मज्ञस्य कृतकृत्यता**

'स य एवंवित्' इत्यादेः संबन्धः - 'फलवचने सह समश्नुते'

इत्येतदुपपादयितव्यम् - विदुषः सर्वकामावाप्तिः सर्वात्मत्वात् - विदुषो ब्रह्मरूपसामगानम् ॥ 367-372

**१११. विदुषो ब्रह्मात्मैकत्वप्रख्यापनप्रकारः**

महाश्चर्यब्रह्मरूपता विदुषः - अहमन्नम् इत्यादेस्त्रिरुक्त्यभिप्रायः - ब्रह्माभिन्नस्य विदुषः सर्वात्मकता - ब्रह्मण एव सर्वामृतत्वकारणत्वम्॥ 372-376

**११२. अज्ञानामन्नदानादानयोः फलम्**

अन्नदानितददानिनोरनुगुणं फलम् ॥ 377-378

**११३. विदुषोऽन्नत्वोक्तिर्ब्रह्मभावस्तुतये**

विद्वद्दृष्ट्या अन्नान्नादिव्यवहारो नास्त्येव ब्रह्मणः पृथक् - अन्नान्नादसामगानस्य तात्पर्यम् - विद्या सर्वद्वैतविलापिनी ॥ 378-381

**११४. मुक्तस्य नित्यचैतन्यरूपता**

मुक्तस्य स्वरूपम् - ब्रह्म विदुषः परमपुरुषार्थप्राप्तिरिति वल्लीद्वयार्थोपसंहारः॥ 381-383

**भृगुवल्लीसारः** 384-386

**अनुवाककवर्णानुक्रमणिका** 387-388

**उपनिषत्खण्डसूची** 389-392

**परिशिष्टम् :-**

१. भाष्यस्थमुख्यशब्दसूची 393-399

२. विमर्शिनीगतमुख्यशब्दसूची 400-407

# संकेताक्षरविवरणम्

**उपनिषदाम् ई. के. - इत्यादिरीत्या आद्याक्षरेण, तद्भाष्याणां च ई. भा., के.भा. - इत्येवमादिरीत्या च सङ्केतः कृतः । सङ्केताक्षरं विना दत्ताः संख्याः, एतद्ग्रन्थस्य भाष्यभागसूचकाः ॥**

| | |
|---|---|
| ई.प्र. | ईश्वरप्रत्यभिज्ञासूत्रे |
| उप., उप. सा. | उपदेशसाहस्र्याम् |
| ऋ. | ऋग्वेदसंहितायाम् |
| ऐ.आ. | ऐतरेयारण्यके |
| ा. | ऐतरेयब्राह्मणे |
| गौ.का. | गौडपादीयकारिकासु |
| तै.आ. | तैत्तिरीयारण्यके |
| तै.आ.भा. | तैत्तिरीयारण्यकसायणभाष्ये |
| तै.वा. | तैत्तिरीयवार्तिके |
| तै.सं. | तैत्तिरीयसंहितायाम् |
| पा. | पाणिनीयसूत्रे |
| बृ.मा. | बृहदारण्यके माध्यन्दिनीये |
| बृ.वा. | बृहदारण्यकवार्तिके |
| भा.भा. | भाष्यभागे |
| मनु. | मनुस्मृतौ |
| मा.का. | माध्यमिक कारिकासु |
| मां.का. | माण्डूक्यकारिकासु |
| वि.पु. | विष्णुपुराणे |
| वे.सू. | वेदान्तसूत्रे |
| वे.सू. रा.भा. | वेदान्तसूत्ररामानुजीयभाष्ये |
| शी.भा.भा. | शीक्षावल्लीभाष्यभागे |
| सू.भा. | सूत्रभाष्ये |

|| ॐ ||

# तैत्तिरीयोपनिषदि

## आ न न्द व ल्ली

### १. शान्तिपाठः

(ॐ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत्। आवीन्माम्। आवीद्वक्तारम् ॥

ओं शान्तिः शान्तिः शान्तिः ॥)[१]

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

१. शीक्षावल्ल्यन्ते पठिता शान्तिरियं भाष्यर्थविर्शार्थमिह दत्ता ॥

## अथ शाङ्करभाष्ये

### शान्तिपाठावतरणिका

१. शं नो मित्र इत्याद्या[१] अतीतविद्याप्राप्त्युपसर्गप्रशमनार्था शान्तिः पठिता। इदानीं तु वक्ष्यमाणब्रह्मविद्याप्राप्त्युपसर्गोपशमार्था शान्तिः पठ्यते - 'शं नो मित्र' इति, 'सह नाववतु' इति च। 'शं नो मित्र' इत्यादि पूर्ववत् स्पष्टम्[२] ॥

अथ सच्चिदानन्देन्द्रसरस्वतीकृता

### भाष्यार्थविमर्शिनी

पञ्चकोशातिगं सत्यमदृश्यत्वादिधर्मकम् ।
निर्भयानन्दमात्मानं शङ्करं प्रणतोऽस्म्यहम् ॥

**१. ग्रन्थावतरणिका, शान्तिपाठाक्षराञ्जस्यविमर्शश्च -**

ॐ नमो भगवते वरुणाय ब्रह्मविद्याचार्याय भृगवे च । नमो भगवद्भाष्यकारादिभ्यो गुरुभ्यः ॥

उपनिषदः शीक्षावल्ल्याष्टिप्पणं कृतम् । अथेदानीम् आनन्दवल्ल्या भाष्यार्थविमर्शिनी व्यख्या प्रारभ्यते मुमुक्षुजिज्ञासुजनोपकाराय । अत्र हि परब्रह्मविद्या आत्यन्तिकमोक्षदायिनी प्रदर्शयिष्यत इति ॥

---

१. 'इत्यादि' इत्यतोऽयमेव साधुतरः पाठः । द्रष्टव्यं व्याख्यानम् ॥

२. इहादृत आ ॥ पाठः । वा ॥ पाठस्त्वित्थम् - 'अतीतविद्या .... पठिता । इदानीं तु वक्ष्यमाण .... पठ्यते - सह नाववत्विति' ॥

तत्र भगवान्आचार्यः शान्तिपाठाभिप्रायम् आविश्चिकीर्षुस्तावदाह - **'शं नो मित्र इत्याद्या'** इत्यादि **'इति च'** इत्यन्तम् । अतीतविद्या हि सोपाधिकापरब्रह्मविषया । तत्प्राप्त्युपसर्गाणां प्रशमनार्थं 'शं नो मित्रः शं वरुणः' इत्याद्या 'अवतु वक्तारम्' इत्यन्ता (१-१) शान्तिः पठिता । इदानीं तु तस्या विद्याया निर्वृत्तत्वात्, वक्ष्यमाणविद्याया निरुपाधिकपरब्रह्मविषयायाः प्राप्तौ संभावितानामुपसर्गाणाम् उपशमनार्थं शान्तिद्वयं पठ्यते, 'शं नो मित्र' इत्याद्या 'आवीद्वात्तारम्' इत्यन्ता शान्तिरेका, 'सह नाववतु' इत्याद्या 'मा विद्विषावहै' इत्यन्ता शान्तिरपरा च इत्यर्थः । अत्र 'इत्याद्यतीतविद्याप्राप्त्युपसर्गप्रशमनार्था' इति मुद्रितपुस्तकपाठस्तु लेखकप्रमादात् त्रुटितदीर्घाकारचिह्न इत्युन्नीयते । यथोपात्तस्य 'इत्यादि' इत्यस्यान्वयाभावात्, 'इत्याद्या शान्तिः' इत्यस्यैव च समन्वयोपपत्तेः ॥

## २. भाष्यस्य व्याख्यानान्तरं तद्दूषणं च -

यत्वत्र केषाश्चित् "अतीतविद्याप्राप्त्युपसर्गप्रशमनार्थं पठति 'शं नो मित्र' इति । व्यख्यातमेतत्पूर्वम्" इति शीक्षावल्लीद्वादशानुवाकस्य भाष्यं कल्पयित्वा[१] 'तदपरं ब्रह्म माम् अपरविद्यार्थिनम् आवीत् अरक्षत् इत्यर्थः' इति व्याख्यानम्, यच्च प्रकृतवल्लीप्ररम्भे पुनरपि 'शं नो मित्र' इत्याद्यां 'अवतु वक्तारम्' इत्यन्तां शान्तिं 'सह नाववतु' इत्यस्याः प्राक् प्रकल्प्य "शान्तिद्वयस्यापौनरुक्त्यमाह - 'शं नो मित्र' इति । इदानीं परविद्यार्थिनमप्यवतु । साधारण्येन मया पूर्वं प्रार्थितत्वात् इत्यर्थः । असाधारण्येन परविद्योपसर्गशान्त्यर्थमाह - 'सह नाववत्विति' इति, तदेतदबद्धं पठित्वा कुचोद्यपरिहारप्रयतनमात्रम् । द्वादशानुवाकान्ते कल्पितस्य भाष्यस्य भूयःसु कोशेष्वदर्शनात् । पुनरपि 'अवतु वक्तारम्' इत्यन्तायाः शान्तेः कल्पनामात्रविजृम्भितत्वात् । त एते व्याख्यातारः 'अतीतविद्या प्राप्त्युपसर्गप्रशमनार्था शान्तिः पठिता' । इति भाष्यार्थमविमृश्यैव तु यथोपवर्णित भाष्यकल्पनातद्याख्यानरूपे व्यर्थप्रयासे स्वनिर्मितमोहजाले स्वयं निपेतुरिति तु वयमुत्पश्यामः । तदनुसारेणान्धपरम्परया त्वधुनातना अध्येतारश्च केचित्

---

१. इदं च आनन्दाश्रममुद्रितपुस्तकपाठमनुसृत्योक्तम् । वा ॥ पाठस्तु 'शं नो मित्र इति' इत्यस्य स्थाने 'शं नो मित्र इत्यादि' इति ॥

शीक्षावल्ल्यनन्तरम् आनन्दवल्ल्यारम्भे चेत्येवं द्विवारम् अवतु वक्तारमित्यन्तां शान्तिमधिकं पठन्तीति च । न हि विमृश्य विचारणे 'आवीन्माम्', 'अवीद्वक्तारम्' इति चातीतविद्याप्राप्त्युपसर्गप्रशमनार्थमित्युत्प्रेक्षितुमपि शक्यमेतत्। न हि यदेव निष्पन्नं तस्यैव प्राप्तिः प्रार्थ्यत इत्यनुन्मत्तः कल्पयेत्, प्रागेव निर्दुष्टो भगवान्वेदः । अत एवारण्यकभाष्यकारैः सायणाचार्यैरेकवारमेवैनां शान्तिं पठित्वा प्रोक्तम् - 'निष्पन्नस्य विघ्नपरिहारस्य पुनः परामर्शः कृतघ्नत्वनिवारणार्थः' (तै.आ.भा. ७-१२) इति । 'सह नाववतु' इत्येतामेव चैकां शान्तिं ते पेठुरानन्दवल्ल्यारम्भे । आचार्यास्तु अध्ययनपरम्परया शीक्षावल्ल्यन्ते पठ्यमानामपि शान्तिम् अर्थक्रमानुसारेण वक्ष्यमाणपरब्रह्मविद्याप्राप्त्युपसर्गोपशमनार्थामेव मन्यन्त इत्यन्यदेतत् ॥

### ३. शं न इत्यस्याः शान्तेर्वक्ष्यमाणार्थत्वोपपादनम् -

अथ कथमस्याः शान्तेः 'आवीत्' इति ब्रुवाणाया वक्ष्यमाणार्थता सङ्गमनीयेति ? तत्र **वार्तिककाराः** - 'भाव्ये तु परिहाराय तन्मामावीदितीरणम् । आत्मनो ब्रह्मतां यस्मात् स्वतःसिद्धां प्रवक्ष्यति ॥' (तै. १-१-१८६) इति । अयमभिप्रायः। तदपरं ब्रह्म मामावीत् इति निष्पन्नस्य ईरणं तु भाव्ये भविष्यत्युपसर्गविषये परिहाराय । न ह्यपरब्रह्मोपासनया अनपोढविघ्नस्य परविद्यायामधिकारो भवेत् । स्वतःसिद्धब्रह्मात्मैक्यविद्यां हि प्रवक्ष्यति श्रुतिरागामिग्रन्थे-इति । तत्रानाराधितसर्वदेवात्मकापरब्रह्मणः परप्राप्तौ प्रयतमानस्य बलवत्संभावनीया देवादिनिमित्ता उपसर्गाः । देवेभ्य एव तावत्, 'तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः' (बृ.१-४-१०) इति श्रुतेः । व्याचख्युश्चैतदेवं भाष्यकाराः - 'अतो देवाः पशूनिव व्याघ्रादिभ्यो ब्रह्मविज्ञानाद् विघ्नमाचिकीर्षन्ति । अस्मदुपभोग्यत्वान्मा व्युत्तिष्ठेयुरिति । यं तु मुमोचशिषन्ति तं श्रद्धादिभिर्योक्ष्यन्ति, विपरीतमश्रद्धादिभिः । तस्मान्मुमुक्षुर्देवाराधनपरः, श्रद्धाभक्तिपरः, प्रणेयोऽप्रमादी स्यात् विद्याप्राप्तिं प्रति (इति), विद्यां प्रतीति वा काक्वा एतत् प्रदर्शितं भवति देवाप्रियवाक्येन' इति । तदेवं सिद्धं तावत् शं न इत्यादिशान्तिर्वक्ष्यमाण विद्याप्राप्त्युपसर्गप्रशमनार्थेति । तदेतत्सर्वमनुसन्धाय, अक्षरार्थः सुगम एवेति मत्वा,

प्राहाऽऽचार्यः 'शं नो मित्र इत्यादि पूर्ववत् स्पष्टम्' इति शीक्षावल्लीप्रथमानुवाकभाष्यवदित्यर्थः ॥

## द्वितीयशान्तिव्याख्यानम्

३. सह नाववतु । नौ शिष्याचार्यौ सहैव अवतु रक्षतु । सह नौ भुनक्तु[1] भोजयतु । सह वीर्यं विद्यादिनिमित्तं सामर्थ्यं करवावहै । तेजस्विनौ आवयोस्तेजस्विनोः अधीतम् स्वधीतम् अस्तु । अर्थज्ञानयोग्यमस्तु इत्यर्थः । मा विद्विषावहै । विद्याग्रहणनिमित्तं शिष्यस्य आचार्यस्य वा प्रमादकृतात् अन्यायात् विद्वेषः प्राप्तः; तच्छमनाय इयमाशीः 'मा विद्विषावहै' इति । मैव इतरेतरं विद्वेषमापद्यावहै । शान्तिः शान्तिः शान्तिः - इति त्रिर्वचनम् उक्तार्थम् । वक्ष्यमाणविद्याविघ्नप्रशमनार्था च इयं शान्तिः । अविघ्नेनाऽऽत्मविद्याप्राप्तिराशास्यते । तन्मूलं हि परं श्रेय इति ॥

४. सह नाविति शान्तेर्विनियोगः -

अथ कथमत्र द्वितीया विनियोग इति ? तदेतत्कथयिष्यन् तां व्याकरोति । **सह नाववतु** इत्यादि निगदव्याख्यातं भाष्यम् **'निर्वर्तयावहै' इत्यन्तम्** । अथ तेजस्विनावित्यादेरर्थः । तेजस्विनौ इति षष्ठ्यर्थे । आवयोस्तेजस्विनोः, अधीतं

---
१. इतःपरं 'ब्रह्म' इत्याधिकं वा ॥

स्वधीतमस्तु । कथं स्वधीतत्वम् ? तत्राह - 'अर्थज्ञानयोग्यमस्त्वित्यर्थः' इति । अर्थज्ञानार्थमेव ह्यध्ययनम् । प्रकारान्तरेणाप्येतद्वाक्यं व्याख्यातं **काठकभाष्ये** - नौ आवाभ्यां यदधीतम्, तदतीव तेजस्वि वीर्यवदस्तु इत्यर्थः - इति । उभयथापि अधीतस्य कार्यक्षमत्वं प्रार्थ्यते । 'मा विद्विषावहै' इति मूलम् । कथं विद्वेषप्रसङ्ग इति? तत्राह - **विद्याग्रहणनिमित्तम् इति** । उपलक्षणमेतत्। 'आचार्यस्य विद्याग्राहणनिमित्तम्' इत्यापि द्रष्टव्यम् । ननु कथं शिष्याचार्यौ विद्याग्रहणग्राहणार्थमेव प्रवृत्तौ अन्यायं कुर्युः, कथं वा तन्निमित्तो द्वेषः प्रसज्येतेति ? तत्राह - **प्रमादकृतात्** इति । तच्छमनाय । अन्यायप्रसक्तान्योन्य-विद्वेषशमनायेयमाशीः - इत्यर्थः । यथोक्तं **वार्तिके** - 'प्रमादोत्थादपन्यायाद्गुरु-शिष्याभिसङ्गतेः । प्रसक्तो यस्तयोर्द्वेषस्तच्छान्त्यै शान्तिरुच्यते' (तै. वा. १-१८४) इति । **त्रिर्वचनमुक्तार्थमिति** । शीक्षावल्ली-प्रथमानुवाकभाष्योक्तरीत्या आध्यात्मिकाधिभौतिकाधिदैविकानां विद्याप्राप्त्युपसर्गाणां प्रशमार्थमित्यर्थः ॥

ननु पूर्वशान्तेरप्येतदर्थत्वात् किं पुनरुक्तेन ? तत्राह - **वक्ष्यमाणेत्यादिना 'परं श्रेय'** इत्यन्तेन । श्रेयांसि बहुविघ्नानीति न्यायेन परस्य श्रेयसः तत्कारणीभूतब्रह्मात्मविद्यायाश्च बहवो विघ्नाः सम्भाविताः तत्र पूर्वं देवादिनिमित्तविघ्ननिवाराणाय शान्तिः पठिता । अधुना तु विद्याप्रदातुर्गुरोरशान्तिप्रयुक्तो ज्ञानवैफल्यरूपो विघ्नो मा भूदिति पुनरियं शान्तिः पठ्यत इत्यपौनरुक्त्यमित्यभिप्रायः । यथोक्तं **वार्तिककारैः** -'स्याज्ज्ञानं फलवद्यास्माच्छान्तान्तःकरणे गुरौ । तस्येश्वरेणानन्यत्वाद्भूयः शान्तिरियं ततः ॥ (तै.वा. १-१८५) अत्र यद् व्याख्यातृभिर्वार्तिकत्रयं विशस्य प्रमादोत्थेति वार्तिकस्य तस्येश्वरेणानन्यत्वादित्यन्तस्य 'शं नो मित्र' इत्यादिशान्तिसार्थक्योपपादनपरतया, 'भूयः शान्तिरियं ततः'इत्येतावन्मात्रस्य च 'सह नाववतु' - इत्येतच्छान्ति-सार्थक्योपपादनपरतया, तन्मामावीदित्यस्य च सगुणविद्याविषयतया योजनम्, तद्यथावर्णितान्धपरम्परानुसरणकृतं भाष्यवार्तिकाक्षरानुलोम्यानालोचनकृतं चेति क्षन्तव्यं भाष्यर्थविमर्शकैरित्युपरम्यते ॥

तदेवं प्रसन्नगम्भीरभाष्यं कलुषीकर्तुमीहमानैर्विविधविप्रतिषिद्ध-व्याख्यानैराकुलितचित्तानां जिज्ञासूनां कृते भाष्यार्थनिर्मलत्वाय मया यथाशक्ति प्रयत्नः क्रियत इत्येतत् क्षन्तव्यं धाष्ट्यं विबुधैः ॥

## उपनिषत्प्रारम्भः

**ब्रह्मविदाप्नोति परम् । तदेषाभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह । ब्रह्मणा विपश्चितेति[१] ॥१॥**

### ग्रन्थसम्बन्धः

**३. संहितादिविषयाणि कर्मभिरविरुद्धान्युपानानि उक्तानि। अनन्तरं च अन्तःसोपाधिकात्म[२] दर्शनमुक्तं व्याहृतिद्वारेण स्वाराज्यफलम्। न चैतावता अशेषतः संसरबीजस्य उपमर्दनमस्ति, इत्यतः[३] अशेषोपद्रवबीजस्याज्ञानस्य निवृत्त्यर्थं**

---

१. सम्प्रतितनाध्येतृसंप्रदायानुसारेण आनन्दवल्ली नवानुवाकात्मिका, भृगुवल्ली च दशानुवाकात्मिका । वेदभाष्यकारैस्तु सायणाचार्यैः सह नाववत्वित्येकोऽनुवाकः, अवशिष्टस्तु द्वितीयः - इत्यनुवाकद्वयमेव प्रकल्पितमानन्दवल्ल्याः । भृगुवल्ल्यात्मना च तृतीयेनानुवाकेनानुवाकत्रयी 'वारुण्युपनिषत्' इति व्यवहृतं तैः । पूज्यपादैर्भाष्यकारैः पुनरनुवाकनाम्ना न कस्यचिद्ग्रन्थभागस्य प्रकृतवल्ल्यां परामर्शः कृतो दृश्यते । अनुवाकविभागक्रमस्य चार्थविमर्शे नैवोपयोग इत्यतोऽस्माभिस्तत्र तत्र अनुवाकसमाप्तिं [ ] एवं कोष्ठान्तर्भावनेन प्रदर्शयद्भिरपि वल्लीद्वयम् अर्थविमर्शसौकर्यार्थं खण्डशो विभज्यैव निवेशितमित्याकलनीयं वाचकैः ।

२. 'सोपाधिकमात्म' वा ॥　　　　३. इतिवर्ज्यम् 'अतः' इति वा ॥

## विधूतसर्वोपाधिविशेषात्मदर्शनार्थम् इदमारभ्यते 'ब्रह्मविदाप्नोति परम्' इत्यादि ॥

### ५. संहितादिविषयाणीत्यत्राऽऽदिशब्दार्थः -

नन्वतीतवल्ल्युक्तोपासनपूगादेव सर्वपुरुषार्थसिद्धेः किमपरं साध्यम् अवशिष्यते यदर्थं वक्ष्यमाणा विद्या अपेक्षितव्या, तदर्था च शान्तिः पठितव्या स्यात् - इत्याशङ्क्य वक्ष्यमाणब्रह्मविद्यायाः पूर्वोक्तविद्यातो वैलक्षण्यं प्रदर्शयितुं वृत्तमनुद्रवति - **'संहितादिविषयाणि'** इत्यादिना । आदिशब्देनात्र यश्चन्दसामित्याद्यनुवाकोक्तौ जपहोमौ गृह्येते । अनन्तरशब्दसामर्थ्यात्। न हि किञ्चिदुपासनान्तरं संहितोपासनोत्तरं प्राग् व्याहृत्यात्मब्रह्मोपासनाद् विहितं दृश्यते, येन तौ परित्यजनीयौ स्याताम्। जपहोमावपि श्रद्धादिमानसव्यापारपूर्वकमेव कर्तव्यौ विद्यार्थौ च इति तयोरप्युपासनकुक्षौ निक्षेपणमिति कथञ्चिन्नेयं भाष्यम् । उपासनाङ्गत्वाद्वा । 'ओङ्कारो ह्यत्रोपास्यः' इति हि भाष्यम् । तदुपासनाङ्गत्वेन च जपहोमौ विहिताविति वा स्यात्तयोर्ग्रहणमादिशब्देन। यद्यप्यतीतवल्ल्यां पाङ्क्तोङ्कारोपासने अपि उक्ते, तथापि पाङ्क्तोपासनं व्याहृतिब्रह्मोपासनवत् प्राजापत्यफलकमिति न संहितादिविषयकोपासनकुक्षौ निवेशमर्हति; ओङ्कारोपासनं तु सर्वोपासनाङ्गभूतमिति न हिरुगुपादानार्हम् - इति न तयोरिह स्वशब्देनोल्लेखः करणीयः । प्रजादिफलवन्मेधाश्रियोरपि प्राजापत्यादर्वाचीनफलत्वाविशेषाच्च तत्साधनयोर्जपहोमयोः प्रणवोपासनाङ्गभूतयोः संहितोपासनेन सह निर्देश इति युक्तमुत्पश्यामः। अत्र चोपासनानि न स्वप्राधान्येन विवक्षितानि, 'संहितादिविषयाणि कर्मभिरविरुद्धान्युपासनानि' इति वाचो युक्त्या, किं तर्हि उपासनानि तदनुगुणानि कर्माणि च ब्रह्मलोकादर्वाचीनफलानीत्येतावन्मात्रमिति सन्तोष्टव्यम् । उपासनादेवाऽऽप्नोति स्वाराज्यम् इत्युक्तत्वात् कर्मणामानर्थक्यं मा भूदिति 'ऋतं च स्वाध्याय प्रवचने च' (१-९) इति कर्मणामपि पुरुषार्थं प्रति साधनत्वप्रदर्शनात्, पुनश्च विद्योत्पत्त्यर्थत्वेन 'सत्यं वद, धर्मं चर' (१-१२) इत्यादिना अनुशासनदर्शनाच्च 'कर्मभिरविरुद्धानि' इत्यस्यैष एवार्थोऽभिप्रेत इत्यवसीयते । ये तु 'संहिताविषयाणि' इत्यादिशब्दरहितमेव भाष्यवाक्यं पठन्ति, तेषां पक्षे नास्त्येव

कोऽपि क्लेशः । 'उपासनानि' इति बहुवचनं तु लोकादिदृष्टिरूपाणां बहुत्वादिति व्याचक्षीत । आदिशब्दस्तु 'यावन्त्युपासनान्यादावविरुद्धानि कर्मभिः । संहिताविषयादीनि स्युस्तान्यभ्युदयाय तु' ॥ (तै.वा. ३) इति **वार्तिकस्थ**मादिपदं दृष्ट्वा तदानुगुण्येनेहापि भाव्यमिति भ्रान्त्या केनचिदविमृश्यकारिणा प्रक्षिप्तमिति कल्पनीयम् । सर्वथापि तु कर्मभिरविरुद्धान्युपासनान्येव स्वाराज्यपर्यन्तफलान्युक्तानि न तु निरुपाधिकब्रह्मविद्या - इत्येतावति पर्यवसन्नं भाष्यवाक्यद्वयमित्यलमतिमतिकर्दमेन ॥

## ६. अतीतवल्लीप्रोक्तं नात्यन्तिकममृतत्वम् -

ननु 'आप्नोति स्वाराज्यम्' इत्यादिना 'शान्तिसमृद्धममृतम्' (१-८) इत्यन्तेन व्याहृतिब्रह्मोपासनस्यैव स्वाराज्यामृतत्वफलश्रवणात् किमधिकमाकाङ्क्ष्यमस्ति वक्ष्यमाणविद्यया ? ब्रह्मविद्ययापि हीदमेव प्राप्तव्यं फलम्, 'यो वै भूमा तदमृतम्' (छा. ७-२४-१), 'स स्वराड् भवति' (छां. ७-२५-२) इति च श्रुत्यन्तरात् । तत्राह - **'न चैतावता'** इत्यादिना **'उपमर्दनमस्ती'** त्यन्तेन । अयमभिप्रायः। यद्यपि 'आप्नोति स्वराज्यम्' (१-६), 'तस्मै देवा बलिमावहन्ति' (१-५) - इत्यनेन निरङ्कुशमैश्वर्यमाप्नोत्युपासक इत्युक्तमिव भाति, तथापि 'आप्नोति मनसस्पतिम्' (१-६) इति सर्वमनसां पतिमीश्वरम् आप्नोतीति वचनात्, ईश्वरायत्तमेवेदं स्वाराज्यमिति गम्यते । यदपि च 'शान्तिसमृद्धममृतम्' (२-६) इत्यमृतत्वं श्रूयते, तदप्यमृतस्वरूपादित्यमण्डलस्थब्रह्मायत्तमेवामृतत्वं सापेक्षम् । 'आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते'। (वि.पु. २-८-९७) इति स्मरणात् । मुख्यामृतत्वमपि तत्रत्यानां भवद् वक्ष्यमाणब्रह्मविद्याप्रप्त्यैव भवेत् कार्यब्रह्मलोकान्ते इति 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्जरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥' (?) इति स्मृतेरवगम्यते । तदेतच्छारीरके निर्णीतम् (द्रष्टव्यम् वे. सू. ४-४-१७ आरभ्य ४-४-२२, ४-३-११) तत एव चाधिकमवगन्तव्यम् । तस्मात् स्वाराज्यमेतत् स्वर्गादिवदवस्थान्तरमेव, नात्यन्तिकममृतत्वम् । अतोऽवगम्यते व्याहृत्यात्मकब्रह्मप्राप्त्यापि न संसारस्यान्तिकी निवृत्तिरिति । तस्मात् सूक्तं **'न चैतावता अशेषतः संसारबीजस्योपमर्दनमस्ति'** इति । उपमर्दनं निवृत्तिः ॥

**७. संसारबीजभूताज्ञाननिवृत्त्यर्थं निरुपाधिकब्रह्मविद्या काङ्क्षणीया -**

अथ किमिदं संसारबीजं कथं वा तन्निवृत्तिरिति ? तत्राह - '**इत्यतः, अशषोपद्रवबीजस्याज्ञानस्य निवृत्यर्थम्**', इत्यादिना '**इदमारभ्यते**' इत्यन्तेन । अज्ञानम्, अविद्या, अप्रतिबोधः, अनवगमः, भ्रान्तिः - इति पर्यायाः। अज्ञानं चात्राऽऽत्मानात्मनोः सत्यानृतयोरितरेतराध्यासरूपं मिथ्याज्ञानमिति **शारीरकमीमांसाभाष्योपोद्धाते** वितत्य प्रदर्शितम् । विस्तरस्तु तत एवाधिगन्तव्यः। उक्तस्वाराज्यं प्राप्तानामपि अपरब्रह्मणा भोगसाम्यदर्शनात्, 'वाक्पतिश्चक्षुष्पतिः' इत्यादिलिङ्गाच्च शरीरेन्द्रियमनोवत्त्वावगमात्, उक्तब्रह्मप्राप्तिरपि यथोपवर्णिताज्ञानविषयैवेति गम्यते । तस्यास्याज्ञानस्य च निवृत्तिर्विधूतसर्वोपाधिविशेषात्मदर्शनादेव वक्ष्यमाणादिति तत्प्रतिपादनार्थमिदं 'ब्रह्मविदाप्नोति परम्' इत्यादिवाक्यजातमारभ्यत इत्यभिप्रायः ॥

**८. अतीतग्रन्थस्य परविद्योपकारकत्वम् -**

नन्वेवमनर्थक एवातीतग्रन्थभाग इति प्राप्तम् । अविद्याप्रत्युपस्थापितसंसारगोचरफलतत्साधनमात्रप्रदर्शकत्वादिति । न । अविदुषां फलार्थिनां तदुपायप्रदर्शनेन सार्थक्यात् । मुमुक्षूणां च चित्तशुद्धिवैराग्यप्रत्यक्प्रवणताजननद्वारा परविद्याधिकाराधानाच्चेति परिहृतत्वान्नानर्थक्यचोद्यमत्रोत्थापयितव्यम् । उपपादितं च पूर्वोक्तसाधनानां परविद्यार्थत्वं **वार्तिके** - 'नित्यकर्माद्यनुष्ठानाच्छुद्धान्तःकरणः पुमान् । विरक्तश्चान्यजाल्लाभात् स्वप्नपुत्रादिलाभवत् । प्रत्यक्षागमलिङ्गैर्हि यद्यत्कर्मोद्भवं फलम् । तत्क्षयिष्णिवति विज्ञाय विरक्तो नरकाद्यथा ॥ अपास्ताशेषदोषं यत्सर्वकामनिरासकृत् । तदनाप्तं तमोमात्र[१]प्रसिद्ध्यैव हि तद्यतः ॥ तदनाप्तिकृदज्ञानध्वस्तयेऽलं न कारकम् । प्रत्यग्ज्ञानेऽधिकार्यस्मात्त्यक्त पूर्वोक्तसाधनः ॥' (तै.वा. २-६, ७, ८, ९) इति ॥

**ब्रह्मविद्यायाः संसाराभाव आत्यन्तिकः**

## ४. प्रयोजनं चास्या ब्रह्मविद्याया

१. 'तमोमात्रा' इति मुद्रितपाठ इत्थं परिवर्तितः ॥

अविद्यानिवृत्तिः, ततश्च[1] अत्यन्तिकः संसाराभावः । वक्ष्यति च 'विद्वान्न बिभेति कुतश्चन (२-९) इति । संसारनिमित्ते च सति अभयं प्रतिष्ठां[2] विन्दते' (२-७) इत्यनुपपन्नम्। 'कृताकृते पुण्यपापे न तपतः' (२-९) इति च। अतोऽवगम्यते अस्मात् विज्ञानात् सर्वात्मब्रह्मविषयादात्यन्तिकः संसाराभाव इति ॥

८. सोपाधिकनिरुपादिकब्रह्मविभागः -

ननु चान्तःसोपाधिकब्रह्मदर्शनमुक्तं व्याहृतिद्वारेणेत्युक्तम्, इदानीं तु विधूतसर्वोपाधिविशेषब्रह्मदर्शनार्थमिदमुच्यत इति च । तत्र किं द्वे ब्रह्मणी सोपाधिकं निरुपाधिकं चेति ? कथं च ब्रह्मविषयैव सती विद्या सोपाधिकब्रह्मविद्या संसारगोचरफला, वक्ष्यमाणा तु न तथेति शक्यमवगन्तुमिति ? नैष दोषः । अविद्याकृतनामरूपोपाधिविशेषविशिष्टत्वेनोपासनार्थमुपदिश्यमानं ब्रह्म सोपाधिकम्, सर्वविशेषप्रतिषेधेन चोपदिश्यमानं तदेव निरुपाधिकम् - इत्यभ्युपगमात्। उपाधीनां चाविद्याकृतत्वान्नाद्वितीयप्रवादोपरोधः। तत्र मनोमयत्वादिगुणकस्य व्याहृत्यात्मब्रह्मणः सोपाधिकत्वात् तदुपासनाफलं स्वाराज्यं संसारगोचरमित्युक्तम्। इदानीं 'ब्रह्मविदाप्नोति' इति प्रदर्श्यमानं तु विधूतसर्वोपाधिकम् 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने' (२-७) इति सर्वोपाधिविशेषनिषेधेनोपदेशादित्यतो नैतद्विद्याफलं संसारगोचरमित्यनवद्यम् । तदेतत्सर्वमभिसंधायाऽऽह **'प्रयोजनं चास्या'** इत्यादिना **'संसारभाव इति'** इत्यन्तेन ॥

---

१. 'ततः' इति चरहितः पाठ आ ॥ २. 'च' इत्यदिकम् आ ॥

## १०. अविद्यानिवृत्तिः साक्षात्फलं ब्रह्मविद्यायाः -

ननु विशेषनिषेधमात्रेण कथमात्यन्तिकः संसाराभावः फलमिति गम्यते ? अत्रापि हि वक्ष्यते 'सोऽश्नुते सर्वान् कामान् सह' (२-१) इति संसारगोचरमेव कामावाप्तिरूपं फलम् । अत्रोच्यते । **प्रयोजनं चास्या ब्रह्मविद्याया अविद्यानिवृत्तिस्तत आन्यन्तिकः संसाराभावः** । विद्याया अविद्यानिवर्तकत्वस्वाभाव्यस्य लोके दृष्टत्वात्, ब्रह्मविद्याया अपि ब्रह्माविद्यानिवृत्तिरेव मूलतः फलमिति श्लिष्यते । अविद्याकृतकामादि संसारधर्मविशेषनिवृत्तिस्तु तन्नान्तरीयकी - इति वक्तुं 'सोऽश्नुते सर्वान् कामान्' इत्याह । न च विद्यादृष्ट्या आप्तव्याः कामा आप्तुरन्याः सन्ति, येन आप्त्राप्तव्यादिविभागार्थं तस्या अपि अविद्याविषयत्वम् अवगच्छेम । यथा चैतत्तथा तद्वाक्यार्थविमर्शनावसरे दर्शयिष्यामः । परमप्रयोजनं चास्या विद्याया अविद्यानिवृत्तिरेवेत्येतत्तु 'विद्वान्न बिभेति कुतश्चन' (२-९) इति वचनादवगम्यते । भयं हि स्वस्मादन्यस्माद्द्वितीयाद्धेतोर्भवद्भवेत् । 'द्वितीयाद्वै भयं भवति' (बृ. १-४-२) इति श्रुत्यन्तरात् । भयहेतुं च निषेधति न बिभेति कुतश्चनेति । अतो द्वितीयभयहेतुप्रत्युपस्थापकाविद्यानिवृत्तिर्विद्यायाः प्रयोजनमित्यवगच्छामः । मास्तु भयहेतुः, तथाप्यविद्या निवृत्तिः संजातेति कथं गम्यत इत्याशङ्क्य श्रुतार्थापत्त्येत्याह - **'संसारनिमित्ते च सति अभयं प्रतिष्ठां विन्दते (२-७) इत्यनुपपन्नम्'** इति । 'प्रतिष्ठां च' इति पाठे चाधिकः । 'संसारनिवृत्तावसत्याम्' इति पाठं केचित्कल्पयन्ति । ततो वरं 'संसारनिमित्ते च सति' इत्येव पठितम् । अविद्यानिवृत्तौ संसाराभाव इत्येतदुपपादयितुं खलु प्रवृत्तं भाष्यं न संसारनिवृत्तावभय-प्रतिष्ठाप्राप्तिमिति। संसारनिमित्तं ह्यविद्या । सा विद्यते च, अभयप्रतिष्ठां लभते च - इति विप्रतिषिद्धं भवेत् । निवर्तितायां तु तस्यां निमित्तापाये नैमित्तिकस्यापि संसारस्यापाय इत्युपपद्यते - इत्यभिप्रायः । न केवलम् अभयप्रतिष्ठान्यथानुपपत्त्या एवं कल्पनीयम्, **'कृताकृते पुण्यपापे न तपतः (२-९)'** इत्येतच्च नोपपन्नम् - इत्यनुपपत्त्यन्तरसमुच्चयार्थश्चकारो भाष्ये । 'एतं ह वाव न तपति । किमहं साधु नाकरवम् । किमहं पापमकरवमिति । (२-९)' इति श्रुतिरर्थतः पठिता 'कृताकृते पुण्यपापे न तपत' इति । उभे ह्येवैष एते आत्मानं स्पृणुते इति हि तद्वाक्यशेषे विदुष

आत्मैकावशेषो दर्शितः । तच्च सति संसारनिमित्तेऽज्ञाने न संभवतीति विद्यायाः संसारहेतुभूताविद्यानिवर्तनमेव मूलतः फलम् । संसाराभावस्तु नान्तरीयकत्वेन सिध्यतीति भावः । तदेवं प्रतिज्ञातम्, अर्थापत्या उपपादितं च संसाराभावम् उपसंहरति - **अतोऽवगम्यतेऽस्माद् विज्ञानात् सर्वात्मब्रह्मविषयादात्यन्तिकः संसाराभाव** इतीति । अविद्याया निवृत्तेः सिद्धत्वात्, सर्वस्याप्यात्मभूतस्य ब्रह्मणो विज्ञानादात्यन्तिकः कामक्रोधभयपुण्यपापादेः संसारस्याभाव इत्यवगम्यत इत्यर्थः । तदुक्तं **वार्तिके** 'कामादयो यदज्ञानात्तज्ज्ञानात्स्यादकामता । अतः परं तदैकात्म्यं वक्ष्यतेऽज्ञानघस्मरम्।। (तै.वा. २-१) इति ॥

## विद्यासम्बन्धप्रयोजनोपन्यासः

**५. स्वयमेव च प्रयोजनमाह[१] - 'ब्रह्मविदाप्नोति परम्' इत्यादावेव संबन्धप्रयोजनज्ञापनार्थम् । निर्ज्ञातयोर्हि संबन्धप्रयोजनयोः, विद्याश्रवणग्रहणधारणाभ्यासार्थं प्रवर्तते । श्रवणादिपूर्वकं हि विद्याफलम् 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. २-४-५) इत्यादिश्रुत्यन्तरेभ्यः ॥**

**११. साक्षाच्छ्रुतिरेव विद्याफलं परमपुरुषार्थ इत्याह -**

अविद्यानिवृत्तिद्वारेणात्यन्तिकसंसारोच्छित्तिरेव ब्रह्मविद्यायाः फलम् इत्येतत् साक्षाच्छ्रुत्यैवोच्यत इति न तत्राश्रद्धाकारणमस्तीत्यभिप्रायेण प्रकृतवल्लीसूत्रवाक्यमेव तत्र प्रमाणत्वेनोदाहरति - **स्वयमेव चेति** । न चोक्तश्रुतिवचनद्वयम् 'अभयं प्रतिष्ठाम्' (२-७) इति 'एतं ह वाव' (२-९) इति चान्याथाप्युपपादनीयं भवेदिति

---

१. 'स्वयमेवाह प्रयोजनम्' वा ॥

शङ्क्यम्। यतः श्रुतिः स्वयमेव च यथोक्तमात्यन्तिकसंसाराभावरूपं विद्यायाः प्रयोजनमाह । तच्चादावेवाह। उपक्रमे कण्ठरवेणोक्तं हि न पुरुषमतिप्रभवकल्पान्तरेण शक्यं प्रत्याख्यातुमित्याशयोऽभिव्यज्यते भाष्येण - **स्वयमेवेत्या**दिना **आदावेवे**त्यन्तेन। अत्र हि ब्रह्मविद्यायाः परप्राप्तेश्च साध्यसाधनभावः स्पष्टं श्रूयते। तदेतदेव वचनमलं विद्यायाः संसारात्यन्ताभावप्रयोजनवत्त्वावगमाय - इत्याभिप्रायः॥

## १२. ग्रन्थादावेव सम्बन्धप्रयोजनज्ञापनस्य फलम् -

ननु किमित्यादावेव प्रयोजनमुच्यते ? विज्ञाप्य हि परब्रह्मविद्यां तदनु तत्फलं दर्शयितव्यमित्यत आह - **'आदावेव सम्बन्धप्रयोजनज्ञापनार्थम्'** इति । सम्बन्धप्रयोजनाभ्याम् आदावेव ज्ञापिताभ्यां किं सिध्यति ? किं वा प्रमाणं तयोरादावेव वक्तव्यत्वे ? - इत्यत्रोत्तरमाह **'निर्ज्ञातयोर्हि'** इत्यादिना **'श्रुत्यन्तरेभ्यः'** इत्यन्तेन। विद्यैव परमपुरुषार्थहेतुः, न कर्मादि ; विद्यायाः परमपुरुषार्थ एव फलं नान्यत् - इति साध्यसाधनयोर्विद्यापरप्राप्त्योर्निष्कृष्य ज्ञातयोर्विद्याश्रवणादौ नियमेन प्रवर्तते पुरुषार्थार्थी मुमुक्षुर्नान्यथा । अतः श्रवणादौ प्रवृत्तिस्तेन ज्ञापनेन सिध्यतीत्यर्थः। मा नाम प्रवर्ततां श्रवणादौ तथा च का हानिरित्यत आह - **श्रवणादिपूर्वकं हीति** । उक्तं हि **मीमांसावार्तिके** - 'सिद्धार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते । शास्त्रादौ तेन वक्तव्यः सम्बन्धः, सप्रयोजनः ॥' (श्लो.वा. १-१७) इति । अत्र श्रवणं तावत् आचार्यत आगमतश्च । तदनु ग्रहणं तदनुगुणतर्कतः । एवं श्रुतस्य मतस्य चार्थस्य धारणं स्वसंवेद्यतापादनार्थं ध्यानम् । तदेषां श्रवणग्रहणधारणानाम् अभ्यासार्थं वाक्यार्थाध्यवसायनिष्पत्तिपर्यन्तं प्रवृत्तिः सम्बन्धप्रयोजननिर्धारणायत्ता। प्रयोजनस्य हि सर्वत्र प्रवर्तकत्वं साधनोपादाने । साधनं च मोक्षस्य ब्रह्मविद्येति ज्ञाते हि सत्यवश्यं श्रवणादौ प्रवर्तते । ततश्च विद्यां विद्याफलं च नियमेन लभते । श्रवणादिपूर्वकं हि विद्याफलप्राप्तिरिति 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्' (बृ. १-४-५) इति श्रुत्यन्तरात्, 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छा. ८-७-१) इत्यादिश्रुत्यन्तरेभ्यश्च विज्ञायते । अतः फलावाप्तये श्रवणादिषु नियमेन प्रवृत्तिसिद्ध्यर्थमादावेव विद्याप्रयोजनमाह

सम्बन्धप्रयोजनज्ञापनार्थमित्यभिप्रायः । यथोक्तं **वार्तिके** - 'प्रवृत्तिजनकं यस्मात्सर्वत्रैव प्रयोजनम् । श्रुतिर्ब्रह्मविदाप्नोतीत्याह पुंसः प्रलुब्धये । फलश्रुत्यङ्कुशाकृष्टः श्रवणादौ प्रवर्तते । तत्पूर्वकं यतो ज्ञानं श्रुतिश्चैवमभाषत ॥' (तै.वा. २-२७, २८) इति ॥

## वल्लीसूत्रवाक्यार्थः

**६. ब्रह्मविद् । 'ब्रह्म' इति वक्ष्यमाण-लक्षणं बृहत्तमत्वाद् ब्रह्म। तद् वेत्ति विजानातीति ब्रह्मवित् । आप्नोति[१] परं निरतिशयम् । तदेव ब्रह्म परम् । न ह्यन्यस्य विज्ञानादन्यस्य प्राप्तिः । स्पष्टं च श्रुत्यन्तरं ब्रह्मप्राप्तिमेव ब्रह्मविदो दर्शयति 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' (मुं - ३-२-९) इत्यादि ॥**

**१३. सूत्रवाक्यस्याक्षरार्थः -**

अथाधुना 'ब्रह्मविदाप्नोति परम्' इत्येतस्य कृत्स्नवल्लीसूत्रात्मकस्य वाक्यस्याक्षराणि व्याचष्टे - 'ब्रह्मविद्' इत्यादिना । अत्र 'ब्रह्म' इति सत्यं ज्ञानमनन्तमिति वक्ष्यमाणलक्षणं वस्तु निर्दिश्यते । बृहत्तमत्वात् । 'बृहि वृद्धौ' इतिधातोर्व्युत्पन्नस्य ब्रह्मशब्दस्य तावन्निरुपपदत्वात् सर्वथा निरतिशयबृहत्त्वमर्थः स्यादिति प्रतीयते । तच्च वक्ष्यमाणलक्षणवाक्यस्थसत्यज्ञानानन्तपदैः समभिव्याहारात् तथैवेति निश्चीयते । तथालक्षणं ब्रह्म यो वेद विजानाति स निरतिशयबृहद्रूपं परं प्राप्नोतीति वाक्यार्थः ॥

---

१. 'आप्नोति प्राप्नोति' इति वा ॥

**१४. ब्रह्मविज्ञानस्य ब्रह्मभाव एव फलम् ।**

अत्र परमिति तदेव ब्रह्मोच्यत इत्यवगन्तव्यम् । कुतः ? तत्राह - **न ह्यन्यस्य विज्ञानादान्यस्य प्राप्तिरिति** । यद्यपि मार्गज्ञानाद् ग्रामप्राप्तिर्दृष्टेत्यन्यस्य ज्ञानादप्यन्यस्य प्राप्तिर्भवेदित्यनुमीयेत, तथापि निरतिशयमहत्त्वस्य ब्रह्मणोऽन्यस्य चिन्तयितुमप्यशक्यत्वात्, अत्रान्याप्तिर्नैव शक्या कल्पयितुमिति कृत्वा प्रोक्तं न ह्यन्यस्येत्यादि। अपि च दृष्टान्ते न मार्गज्ञानादेव केवलात् साक्षाद्ग्रामप्राप्तिरस्ति, अपि तु गमनात् । मार्गज्ञानं तु गमने प्रयोजकमित्यन्यथासिद्धम् । इह पुनर्ब्रह्मवेदनामात्रस्य परप्राप्तिसाधनत्वं श्रूयते, न तु ब्रह्मविज्ञानानन्तरं कार्यं किमप्यन्यदस्ति वाक्यशेषे श्रुतमिति वैषम्यम्। तस्माद् ब्रह्मविद् ब्रह्मैवाप्नोति, सैव च परप्राप्तिरिह विवक्षितेति गम्यत इति साधूक्तं **'तदेव ब्रह्म परम्'** इति । अस्ति चात्र श्रुत्यन्तरमस्यार्थस्योपबृंहकम् इत्याह - **स्पष्टं चेति** । इयं **ह्याथर्वणश्रुति**-र्ब्रह्मभावापत्तिरेव ब्रह्मवेदनफलमित्याह । तस्माद् ब्रह्मविद् ब्रह्म प्राप्नोतीत्येव वाक्यार्थ इत्यभिप्रायः ।

**७. ननु सर्वगतं सर्वस्य चा[१] ऽऽत्मभूतं ब्रह्म वक्ष्यति । अतो नाऽऽप्यम्। प्राप्तिश्च अन्यस्यान्येन, परिच्छिन्नस्य च परिच्छिन्नेन दृष्टा। अपरिच्छिन्नं सर्वात्मकं च ब्रह्म इत्यतः परिच्छिन्नवत् अनात्मवच्च तस्याऽऽप्तिरनुपपन्ना। नायं दोषः । कथम् ? दर्शनादर्शनापेक्षत्वाद् ब्रह्मण अप्त्यनाप्त्योः । परमार्थतो ब्रह्मरूपस्यापि सतोऽस्य जीवस्य भूतमात्राकृतबाह्यपरिच्छिन्नान्नमयाद्यात्मदर्शिनः,**

१. 'सर्वस्यात्मभूतम्' (आ॥) इत्यतो वरीयानां (वा॥) पाठः ॥

तदासक्तचेतसः - प्रकृतसंख्यापूरणस्य आत्मनोऽव्यवहितस्यापि बाह्यसंख्येय-विषयासक्तचित्ततया स्वरूपाभावदर्शनवत् - परमार्थब्रह्मस्वरूपाभावदर्शनलक्षणया अविद्यया अन्नमयादीन् बाह्याननात्मन आत्मत्वेन प्रतिपन्नत्वात् 'अन्नमयाद्यनात्मभ्यो नान्योऽहमस्मि' इत्यभिमन्यते । एवमविद्यया आत्मभूतमपि ब्रह्म अनाप्तं स्यात् । तस्य एवमविद्यया अनाप्तब्रह्मस्वरूपस्य प्रकृत-संख्यापूरणस्याऽऽत्मनः अविद्ययानाप्तस्य सतः केनचित् स्मारितस्य पुनस्तस्यैव विद्यया आप्तिर्यथा, तथा - श्रुत्युपदिष्टस्य सर्वात्मब्रह्मण आत्मत्वदर्शनेन विद्यया तदाप्तिरुपपद्यत एव ॥

१५. परप्राप्तिरविद्यानिरसनद्वारेणेत्यत्र दृष्टान्तः -

यत्तदुक्तमवतरणिकायाम् - ब्रह्मविद्यायाः प्रयोजनम् अविद्यनिवृत्तिः, ततश्चात्यन्तिकः संसाराभाव इत्येतदुच्यते परप्राप्तिवाक्येनेति, तदेव स्फुटीकर्तुं शङ्कामुत्थापयति '**ननु सर्वगतम्**' इत्यादिना '**आप्तिरनुपपन्ना**' इत्यन्तेन । यदि हि ब्रह्म देशकालवस्तुपरिच्छिन्नं प्राप्तुश्च भिन्नं स्यात्, तर्हि तस्याप्तिरपि स्याद् व्यवधानविनाशेन साध्या । न तु तथा परिच्छिन्नं भिन्नं वा ब्रह्म । यतो ब्रह्म सर्वगतम्, सर्वस्य चात्मभूतम् - इति वक्ष्यति 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति कालाकाशदेरपि कारणत्वोक्त्या, प्रत्यगात्मवाचकात्मशब्दोपादानेन च । अतः

कथमपरिच्छिन्नस्य स्वात्मन एव सत आत्मनैव प्राप्तिः स्यात् ? न चोदाहृताथर्वणश्रुतेर्ब्रह्मण एव सतो ब्रह्मभावापत्तिर्वेदनेन स्यादिति वाच्यम् । 'देवो भूत्वा देवानप्येति' (बृ. ४-१-२) इतिवद् ब्रह्मोपासनेन ब्रह्मसाक्षात्कारं गत्वा देशान्तरे कालान्तरे च तद्भावमाप्नोतीत्यपि तद्वचनव्याख्यानसंभवात् इत्याक्षेपस्य सारः ॥

अत्रोत्तरम् - **नायं दोषः । दर्शनादर्शनापेक्षत्वाद् ब्रह्मण आप्त्यनाप्त्योरिति** । संग्रहवाक्यमिदं विवृणोति - **'परमार्थतो ब्रह्मरूपस्यैव सतः'** इत्यादिना **'उपपद्यत एव'** इत्यन्तेन । यथा दशमदृष्टान्ते दशमस्यैव सतो बाह्यसंख्येयनवपुरुषगणनासक्ततया दशमाभावदर्शनलक्षणा अविद्या, ततश्च दशमानाप्तिः । एवं ब्रह्मण एव सतो भूतांशारब्धान्नमयाद्यनात्मस्वेवाऽऽत्मभावप्रतिपत्या स्वरूपभूतब्रह्माभावदर्शनलक्षणाविद्या, ततश्च ब्रह्मानाप्तिः । यथा च तस्मिन् दृष्टान्ते केनाचित्पान्थेन स्मारितस्य पुनस्तस्यैव विद्यया अविद्यानिवृत्त्यां सत्यां दशमावाप्तिरिव, एवं प्रकृतेऽपि श्रुत्याचार्योपदिष्टस्य विद्यया ब्रह्मात्माभावदर्शनलक्षणाविद्यानिवृत्त्यां सत्यां सर्वात्मब्रह्मस्वरूपावाप्तिरिव भवतीति सर्वगतस्य सर्वात्मन एव सतोऽपि गौणी आप्तिरुपपद्यत - इति समाधान भाष्यसारः ॥

## १६. परप्राप्तिब्रह्मवेदनादेर्गौणार्थतास्वीकारे बीजम् -

ननु मुख्यार्थसंभवेऽपि किमिति आप्तिशब्दस्य गौणार्थता कल्प्यते? परमाप्नोतीति यथाश्रुतार्थग्रहणे किं बाधकमिति ? एतदुक्तमुपरितनभाष्ये शङ्काग्रन्थ एव । सर्वगतं सर्वस्यात्मभूतं च ब्रह्म यतो वक्ष्यत्यनुपदमेव श्रुतिः, अतोऽत्र वेदितुर्भिन्नस्य ब्रह्मणो ग्रहणं न कर्तव्यम् । ब्रह्मशब्दस्य मुख्यार्थस्य श्रुत्यभिमतस्य त्यागप्रसङ्गात् । अत एवैतदानुगुण्यार्थमत्राप्तिर्गौणी स्वीकर्तव्येति समाधानभाष्यं सङ्गच्छते । अत एव चात्र वेदितृवेद्यवेदनविभागोऽपि श्रूयमाणो गौण एवेति स्वीकर्तव्यम् । एवं च वेदित्रादिविभागरहितं ब्रह्मैव ममाऽऽत्मा-इति यो वेद तस्यैवेयं प्राप्तिः प्राप्तस्यैव परस्येत्यर्थे पर्यवस्यति वाक्यमिति ज्ञेयम् । यदाहुर्**वार्तिककाराः**- 'विभिन्नवेत्तृवेद्यादौ गौणं ब्रह्म यतस्ततः । अभिन्नवेत्तृवेद्यादि ग्राह्यं मुख्यार्थसिद्धये ॥'

(तै.वा. २-३७) इति । अत एव चाविद्यानिवृत्तिमात्रेण परप्राप्तेरुक्तनीत्या सुप्रतिपदत्वात्, परप्राप्त्यर्थं मुमुक्षुर्नियुज्यतेऽनेन वाक्येनेति ये वदन्ति, तेऽपि दूरनिरस्ता भवन्ति । पराक्रान्तं चात्र नियोगवादनिराकरणभागे **वार्तिके** - इत्यलमतिप्रपञ्चेन ॥

## ऋगुदाहरणावतरणिका

८. 'ब्रह्मविदाप्नोति परम्' इति वाक्यं सूत्रभूतं सर्वस्य वल्ल्यर्थस्य। ब्रह्मविदाप्नोति परम् - इत्यनेन वाक्येन वेद्यतया सूत्रितस्य ब्रह्मणः - अनिर्धारितस्वरूपविशेषस्य - सर्वतो व्यावृत्तस्वरूप-विशेषसमर्पणसमर्थस्य लक्षणस्याभिधानेन स्वरूपनिर्धारणाय, अविशेषेण चोक्तवेदनस्य ब्रह्मणो वक्ष्यमाणलक्षणस्य विशेषेण प्रत्यगात्मतया अनन्यरूपेण विज्ञेयत्वाय ब्रह्मविद्याफलं च ब्रह्मविदो यत् परप्राप्तिलक्षणमुक्तम्[१] स सर्वात्मभावः सर्वसंसारधर्मातीत-ब्रह्मस्वरूपत्वमेव नान्यत् इत्येतत्प्रदर्शनाय च[२], एषा ऋगुदाह्रियते 'तदेषाभ्युक्ता' इति ॥

---

१. 'परब्रह्मप्राप्तिलक्षणम्' (आ॥) इत्यतः साधीयानयं (वा॥) पाठः । मूलानुसारित्वात्॥

२. चयुक्त (वा॥) पाठ एव युक्ततरः ॥

## १७. अवतरणिकाभाष्यार्थः -

अथ सूत्रव्याख्यानरूपम् उदाहरिष्यमाणं मन्त्रं व्याख्यास्यन् 'तदेषाभ्युक्ता' इति ब्राह्मणवाक्याभिप्रायं तावद् व्याचष्टे वृत्तार्थस्मारणपूर्वकम् - **ब्रह्मविदाप्नोती**त्यादिना **'उदाह्रियते'** इत्यन्तेन ॥

तदेषाभ्युक्ता इत्यस्यायमभिप्रायः । सूत्रवाक्ये तावत् 'ब्रह्म' इत्यनेन बृहत्तमं वस्तु सामान्येन निर्दिष्टम् ; 'किंस्वरूपं तदिति तु विशिष्य नोक्तमिति **सर्वतो व्यावृत्तस्वरूपविशेषसमर्पणसमर्थस्य लक्षणस्याभिधानं** कर्तव्यं तत्स्वरूपनिर्धारणाय। अतो वक्ष्यमाणा ऋगुदाह्रियते । ननु ब्रह्मैव सर्वम्, न तु ततोऽन्यदस्ति यतस्तद् व्यावृत्तिरभीप्स्यते । बाढम् । तथापि अविद्याकल्पितमब्रह्माप्यस्ति यस्मिन्नज्ञानादात्ममतिर्दृढेति ततो व्यावर्त्य परमार्थस्वरूपसमर्पणसमर्थं लक्षणमभिधित्सितमतो न दोषः । **केचित्तु** - अव्याकृतादेर्ब्रह्मशब्दवाच्यस्य सजातीयस्य घटादेश्च विजातीयस्य व्यावर्तकतया वक्ष्यमाणस्य लक्षणत्वसिद्धिमाहुः । तदयुक्तम् । ब्रह्मशब्दवाच्यत्वमात्रेण ब्रह्मसजातीयत्वप्रसङ्गाभावात् । ब्रह्मणः सर्वशब्दावाच्यत्वस्यैव श्रुत्या विवक्षणीयत्वाच्च 'यतो वाचो निवर्तन्त' इति । 'एकमेव च ब्रह्म न ब्रह्मान्तराणि येभ्यो विशेष्येत' इति भाष्योक्तिविरोधाच्च नैतत्साधु व्याख्यानम् । अतो यथाव्याख्यातमेव सर्वतोव्यावृत्तस्वरूपविशेषसमर्पणम् । तेनैव च ब्रह्मस्वरूपं निर्धार्यत इति युक्तमुत्पश्यामः । एवं स्वरूपनिर्धारणाय ऋगुदाह्रियते । तथा 'ब्रह्मवित्' इति सामान्येनोक्तस्य वेदनस्य वेदनविशेषरूपप्रतिपादनाय च साऽभिधीयते । किं तद्रूपमिति ? प्रत्यगात्मतया वेदनमित्यभिप्रेत्याह भाष्यकृत् - **वक्ष्यमाणलक्षणस्य विशेषेण प्रत्यगात्मतयाऽनन्यरूपेण विज्ञेयत्वायेति** । एवं फलस्यापि परप्राप्तिलक्षणस्य सूत्रवाक्योक्तस्य विशेषरूपप्रतिपादनाय च ऋगभिधीयते । किं तद्विशिष्टं फलस्य रूपमिति? तत्राऽऽह - **सर्वात्मभावः सर्वसंसारधर्मातीतब्रह्मस्वरूपत्वमेव नान्यदिति।** यथा चैतत्सर्वं तथा ऋग्व्याख्याने स्फुटं भविष्यति । तदेवं ब्रह्मतद्वेदनतत्फलानां सामान्येन सूत्रावाक्योक्तानां विशिष्टरूपेण प्रदर्शनार्थं ऋगुदाहरणमिति भाष्यवाक्यार्थः।

## लक्षणवाक्ये विशेषणानां कृत्यम्

९. तत् तस्मिन्नेव ब्राह्मणवाक्योक्तेऽर्थे एषा ऋक् अभ्युक्ता आम्नाता । 'सत्यं ज्ञानमनन्तं ब्रह्म' इति ब्रह्मणो लक्षणार्थं वाक्यम्। सत्यादीनि हि त्रीणि विशेषणार्थानि पदानि विशेष्यस्य ब्रह्मणः । विशेष्यं ब्रह्म । विवक्षितत्वाद् वेद्यतया[१] । विशेषण-विशेष्यत्वादेव सत्यादीनि एकविभक्त्यन्तानि पदानि समानाधिकरणानि । सत्यादिभि-स्त्रिभिर्विशेषणैर्विशेष्यमाणं ब्रह्म विशेष्यान्तरेभ्यो निर्धार्यते। एवं हि तज्ज्ञातं[२] भवति यदन्येभ्यो निर्धारितम् । यथा लोके 'नीलं महत् सुगन्धि उत्पलम्' इति । ननु विशेष्यं विशेषणान्तरं व्यभिचरद् विशेष्यते। यथा नीलं रक्तं चोत्पलमिति। यदा ह्यनेकानि द्रव्याणि एकजातीयानि, अनेक-विशेषणयोगीनि[३], तदा विशेषणस्यार्थवत्त्वम्।

---

१. अतः परम् 'वेद्यत्वेन यतो ब्रह्म प्रधान्येन विवक्षितम्, तस्माद् विशेष्यं विज्ञेयम्। अतः अस्मात्' इत्यधिकं वा ॥

२. 'ज्ञानम्' आ ॥

३. 'योगीनि च' वा ॥

**न ह्येकस्मिन्नेव वस्तुनि । विशेषणान्तरायोगात्, यथाऽसावेक आदित्य इति । तथा एकमेव च ब्रह्म न ब्रह्मान्तराणि येभ्यो विशेष्येत नीलोत्पलवत् । न । लक्षणार्थत्वाद् विशेषणानाम् । नायं दोषः । कस्मात्? यस्मा[१] ल्लक्षणार्थप्रधानानि विशेषणानि न विशेषण-प्रधानान्येव । कः पुनर्लक्षणलक्ष्ययोर्विशेषण-विशेष्ययोर्वा विशेष इति[२] ? उच्यते । समानजातीयेभ्य[३] एव निवर्तकानि विशेषणानि विशेष्यस्य ; लक्षणं तु सर्वत एव, यथा 'अवकाशदात्राकाशम्'[४] इति। लक्षणार्थं च वाक्यम् इत्यवोचाम ॥**

## १८. सत्यादिविशेषणानां लक्षणार्थता -

अवतरणिकावाक्यस्थाक्षराणि व्याचष्टे यथोक्ताभिप्रायज्ञापनाय - **तत् तस्मिन्नेवे**त्यादिना । ब्राह्मणवाक्योक्तो ह्यर्थः ब्रह्मविद्यया परप्राप्तिलक्षणः । तस्मिन्नेवार्थे तद्विशेषप्रकाशनायैषा ऋगाम्नाता इत्यभिप्रायः ॥

तत्र वाक्यार्थघटकादवान्तरार्थत्रयात् प्रथमं ब्रह्मस्वरूपनिर्धारणं विशदयितुकामो लक्षणवाक्यमादत्ते - **सत्यं ज्ञानमनन्तं ब्रह्मेति ब्रह्मणो लक्षणार्थं वाक्यमिति** । तत्र लक्ष्यलक्षणविभागं द्योतयितुं वाक्यस्थपदानां

---

१. 'यस्मात्' ति नास्ति वा ॥ २. इति शब्दो नास्ति वा ॥
३. 'सजातीयेभ्य' इति वा ॥ ४. 'प्रदात्राकाशम्' वा ॥

विशेष्यविशेषणविवेकमाह - **सत्यादीनि त्रीणीति** । ब्रह्म वेदनकर्मत्वेन विवक्षितत्वाद्विशेष्यम्, सत्यादीनि तु तद्विशेषणार्थानि पदानि । एतच्च विशेषणविशेष्यत्वं पदानां सामानाधिकरण्येन प्रयोगाद् गम्यते । सर्वाणि हि पदान्यत्र द्वितीयान्तानि । तत्र सत्यादीनि तथा विशेषयन्ति ब्रह्म यथा विशेष्यान्तरेभ्यस्तन्निर्धार्येत, कथं नु नाम तस्या साधारणं स्वरूपं निर्धारितं भवेदितीत्याह - **एवं हीति** । विशेषणैर्विशेष्यस्य स्वरूपनिर्धारणे दृष्टान्तो **यथा लोक** इति । यथा तत्रोत्पलम् नैल्यादिरहितेभ्यो विशेष्येभ्यो विशिष्टस्वरूपेण निर्धार्यते, तथेह ब्रह्मापीत्यभिप्रायः ।

अत्र 'निर्धार्यते' इति लिलक्षयिषितं ब्रह्म तद्व्यतिरिक्तेभ्य इत्यर्थः । दृष्टान्तेऽपि 'अन्येभ्य' इति नैल्यादिरहितेभ्यो वस्तुभ्यो निर्धारितम् उत्पलं ज्ञातं भवतीत्येव विवक्षितं न तु सजातीयमात्राद् व्यावर्तितमिति । तदेतदभिप्रायमजानन् शङ्कते - **नन्विति** । किञ्चिदुत्पलं नीलं भवति, किञ्चित्तु रक्तमिति 'उत्पलमानय' इति सामान्येनोक्ते न विज्ञायते नीलमेवोत्पलमानिनाययिषितमिति । अतो विवक्षितोत्पलविशेषं ज्ञापयितुकामेन वक्तव्यं भवति नीलमुत्पलमानयेति रक्तोत्पलव्यावृत्त्यर्थम् । एवमेव प्रकृतेऽपि सत्यं ज्ञानमनन्तं ब्रह्मेत्युक्ते अनृताज्ञानसान्तब्रह्मभ्यो व्यावृत्तिर्विवक्षितेति कस्यचिदविवेकिनः प्रतिभायात् । तन्मा भूदिति सजातीयेभ्य एव व्यावृत्त्यर्थं विशेषणादानं यद्यपि व्यवहाराङ्गम्, तथापि सर्वत्र तथैवेति न नियमः । यतः सर्वतो व्यावृत्तस्वरूपनिर्धारणार्थं लक्षणवाक्यप्रणयनेऽपि विशेषणानामुपयोगो भवतीति प्रदर्शयितुं शङ्कामुत्थाप्य **लक्षणार्थप्रधानानि विशेषणानि न विशेषणप्रधानान्येव** - इति समाधानमुच्यते, न पुनर्लक्ष्यलक्षणभावप्रदर्शने विवक्षिते विशेष्यविशेषणत्वं नैव विद्यत इत्यभिप्रायेणेति ध्येयम् । यस्मात् सत्यादीनि त्रीणि ब्रह्मणो विशेषणार्थानीत्येवाऽऽहाऽऽचार्यः । तस्मात् सत्यादीनि विशेषणानि न ब्रह्मान्तरेभ्यः प्रकृतब्रह्मणो व्यावृत्त्यर्थमुपात्तानि, किमर्थं तर्हि, सर्वतोऽब्रह्मतो व्यावर्त्य स्वरूपनिर्धारणार्थमेवेति भाष्यार्थ इति सर्वं निर्मलम् ॥

## १९. किंरूपमिदं लक्षणम् ?

लक्षणवाक्यं चेदं ब्रह्मस्वरूपसमर्पकमेव न तु तन्त्रान्तर इव लक्ष्यमाणासाधारणधर्मसमर्पकम्, व्यतिरेक्यनुमानज्ञापकं वेति न प्रस्मर्तव्यम् । न हि ब्रह्मणः सन्ति केचिदसाधारणा धर्मा ये समवयन्ति तस्मिन् इतरव्यावर्तकतया । न चानुमानगम्यं ब्रह्म येन तज्ज्ञापनाय लक्षणवाक्यं प्रणीयेत । अनुमित्सोः स्वरूपभूतत्वात्, लिङ्गादिरहितत्वाच्च । नापि प्रकृतलक्षणाद्व्यवहारसिद्धिः फलं विवक्षितम् । अव्यवहार्यब्रह्मसमर्पकत्वेनैवोपक्षीणत्वात् सर्वस्या उपनिषदः 'यतो वाचो निवर्तन्त' इति । तस्मात् अनृताचेतनपरिच्छिन्नेभ्यः सर्वविकल्पेभ्यो व्यावृत्तस्य ब्रह्मस्वरूपस्योपदेशात् वेदितुरात्मन्येव विश्रान्तिर्भविष्यतीति ब्रह्मणः स्वरूपमेवेदं लक्षणमुच्यते सत्यं ज्ञानमनन्तं ब्रह्मेति । अत एव च दृष्टान्तेऽवकाशप्रदातृत्वमाकाशस्य लक्षणमुक्तम्, न तु शब्दगुणकत्वादीत्यवधेयम्॥

## सत्यादिपदानां प्रातिस्विककृत्यविवेचनम्

**१०. सत्यादिशब्दा न परस्परं संबध्यन्ते। परार्थत्वात् । विशेष्यार्था हि ते । अतः, एकैको विशेषणशब्दः परस्परं निरपेक्षो ब्रह्मशब्देन संबध्यते 'सत्यं ब्रह्म', 'ज्ञानं ब्रह्म', 'अनन्तं ब्रह्म' इति ॥**

**'सत्यम्' इति । यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत् सत्यम्, यद्रूपेण निश्चितं यत्[१] तद्रूपं व्यभिचरत् (तत्)[२] अनृतमित्युच्यते । अतो विकारोऽनृतम् । 'वाचारम्भणं विकारो**

१. 'यन्निश्चितं' वा ॥

२. 'तत्' इत्याधिकावापः कृतो वा ॥ पाठानुसारेण ॥

**नामधेयं मृत्तिकेत्येव सत्यम्' (छां. ६-१-४), एवं 'सदेव सत्यम्' इत्यवधारणात् । अतः सत्यं ब्रह्म इति विकारान्निवर्तयति ॥**

२०. 'सत्यम्' इत्यनृताद्विकाराद्व्यावृत्त्यर्थम् -

सत्यादीनि सर्वतो व्यावृत्तं ब्रह्मस्वरूपं समर्थयितुं प्रवृत्तानि विशेषणानि - इत्युक्तम् । तत्रोत्तरत्र सत्यादीनाम् अन्योन्यनियम्यनियामकभावेन ब्रह्मलक्षकत्वं प्रदर्शयिष्यन् इदानीं तेषाम् एकैकशो विशेष्यान्तराद् व्यावृत्तिप्रकारं तावद्दर्शयति । यद्यपि सत्यज्ञानानन्तत्वानि परस्परतो व्यावृत्तविशेषरूपेण नैव सन्ति ब्रह्मणि, तथापि ब्रह्मणः सत्यत्वं ज्ञापयत् पदं तत्र कीदृग्विकल्पतो व्यावृत्तत्वं बोधयतीति, एवं ज्ञानत्वम् एवम् अनन्तत्वं च बोधयत्पदम् कीदृग्विकल्पतो व्यावृत्तत्वं बोधयतीति च स्फुटीकर्तुं एकैकश उपादानम्। वक्ष्यमाणान्योन्यनियम्यनियामकत्वप्रदर्शनार्थं चैतदित्यनुपदमेव स्थास्यति । अतो न दोषः ॥

तत्र 'सत्यम्' इति पदकृत्यं विवरीतुं सत्यानृतपदार्थौ तावन्निर्वक्ति। **यद्रूपेणेत्यादिना** । येनैव रूपेण निश्चितं सत्तेनैव रूपेण कूटस्थं तिष्ठति यत् तत्सत्यम्। आदौ निश्चितं रूपं व्यभिचरत्तु अनृतमुच्यत इत्यर्थः। अत्रानृतलक्षणवाक्ये 'यत्' इत्यनेन संबन्धार्थं 'तत्' इत्यध्याहार्यं, लेखक प्रमादेन त्रुटितं वेत्युन्नीयते । 'यद्रूपेण यन्निश्चितं तद्रूपं व्यभिचरति तदनृतमुच्यते' इति (वा॥) पाठे तु नैव कश्चनान्वयगत आतङ्कः । तदेवं सत्यानृतविभागे स्थिते किं फलतीत्याह - **अत इति** । **छान्दोग्यश्रुतौ** समानप्रकरणे सर्वस्यापि ब्रह्मविकारत्वश्रवणात्, विकारस्य च मृदादिदृष्टान्तोपन्यासेन वाचारम्भणमात्रत्वावगमात्, सच्छब्देन प्रक्रान्तस्य च ब्रह्मणः 'तत्सत्यम्' (छां ६-८-७) इति सत्यत्वावधारणाच्च अत्र 'सत्यम्' इति ब्रह्मणः सर्वस्माद्विकारात् अनृताद् वैलक्षण्यं द्योतयतीति निश्चीयते - इति भाष्यार्थः ॥

**११. अतः कारणत्वं प्राप्तं ब्रह्मणः । कारणस्य च कारकत्वम् । वस्तुत्वात्**

मृद्वदचिद्रूपता च प्राप्ता । अत इदमुच्यते 'ज्ञानं ब्रह्म' इति। ज्ञानं, ज्ञप्तिः, अवबोधः । भावसाधनो ज्ञानशब्दः । न तु ज्ञानकर्तृ[1]। ब्रह्मविशेषणत्वात् सत्यानन्ताभ्यां सह । न हि सत्यता, अनन्तता च ज्ञानकर्तृत्वे सति उपपद्यते[2] । ज्ञानकर्तृत्वेन हि विक्रियमाणं कथं सत्यं भवेत्, अनन्तं च ? यद् हि न कुतश्चित्प्रविभज्यते तदनन्तम् । ज्ञानकर्तृत्वे च ज्ञेयज्ञानाभ्यां प्रविभक्तम् इत्यनन्तता न स्यात्। 'यत्र ... नान्यद् विजानाति स भूमा । अथ यत्र ... अन्यद्विजानाति तदल्पम्' (छां ७-२४-१) इति श्रुत्यन्तरात् । 'नान्यद् विजानाति' इति विशेषप्रतिषेधादात्मानं विजानाति - इति चेत् । न । भूमलक्षणविधिपरत्वाद् वाक्यस्य। 'यत्र नान्यत्पश्यति ....' (छां. ७-२४-१) इत्यादि भूम्नो लक्षणविधिपरं वाक्यम् । यथाप्रसिद्धमेव अन्योऽन्यत् पश्यतीत्ये-तदुपादाय यत्र तन्नास्ति स भूमा - इति भूमस्वरूपं तत्र ज्ञाप्यते । अन्यग्रहणस्य प्राप्त-

१. एतद्वाक्यं वा ॥ पाठात् ॥

२. 'उपपद्येते वा ॥

प्रतिषेधार्थत्वात्, न स्वात्मनि क्रियास्तित्वपरं वाक्यम् । स्वात्मनि च भेदाभावाद् विज्ञानानुपपत्तिः। आत्मनश्च विज्ञेयत्वे ज्ञात्रभावप्रसङ्गः । ज्ञेयत्वेनैव विनियुक्तत्वात्। एक एवाऽऽत्मा ज्ञेयत्वेन ज्ञातृत्वेन च उभयथा भवतीति चेत् । न युगपत्। अनंशत्वात् । न हि निरवयवस्य युगपज्ज्ञेय-ज्ञातृत्वोपपत्तिः । आत्मनश्च घटादिवत् विज्ञेयत्वे ज्ञानोपदेशानर्थक्यम्। न हि घटादिवत् प्रसिद्धस्य ज्ञानोपदेशोऽर्थवान् । तस्मात् ज्ञातृत्वे सति, आनन्त्यानुपपत्तिः । सन्मात्रत्वं चानुपपन्नं ज्ञानकर्तृत्वादिविशेषवत्त्वे सति । सन्मात्रत्वं च सत्यत्वम् । 'तत्सत्यम्' (छा. ६-८-७) इति श्रुत्यन्तरात् । तस्मात् सत्यानन्तशब्दाभ्यां सह विशेषणत्वेन ज्ञानशब्दस्य प्रयोगाद् भावसाधनो ज्ञानशब्दः। 'ज्ञानं ब्रह्म' इति कर्तृत्वादिकारकनिवृत्त्यर्थं, मृदादिवदचिद्रूपतानिवृत्त्यर्थं च प्रयुज्यते ॥

**२१. सत्यादिविशेषणविषये शङ्काग्रन्थस्य सार्थक्यम् -**

अथ 'ज्ञानम्' इति विशेषणस्य कृत्यं विवरीतुमारभते । तत्रादौ 'सत्यं ब्रह्म'

इत्येतावदेवालम् , किमर्थं 'ज्ञानम्' इति विशेषणान्तरोपादानम् ? न ह्यब्रह्मभूतं जातुचिदनृतत्त्वं व्यभिचरति - इत्याशङ्क्य सत्यशब्दप्रयोगात्प्रसक्तं दोषं वारयितुं तदपेक्षितमिति तावदाह - **अतः कारणत्त्वं प्राप्तं ब्रह्मणः .... अचिद्रूपता चेति ।** ब्रह्म न विकार इत्युक्ते कार्यत्वप्रतियोगि कारणत्वं प्राप्नोति । तच्च कारणत्वं यदि प्रकृतित्वाद् भिन्नम्, तर्हि कर्तृत्वादिकारकविशेषत्वं प्रसज्यते । अथ प्रकृतित्वम्, तर्हि सावयववस्तुत्वात् मृदादिवदचिद्रूपता बलादापतति । न हि कार्यात्मना परिणममानस्य सावयवस्य चिद्रूपता संभवति - इत्याशङ्क्येत । तदेतदुभयदोषविनिवारणाय 'ज्ञानम्' इति विशेषणम् - इत्यभिप्रायः । ननु च कारणत्वप्राप्तिरिष्टैव । वक्ष्यति ह्यनुपदमेव 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति । उत्तरत्र च 'सोऽकामयत बहु स्यां प्रजायेय' (२-६) इति प्रकृतित्वम् 'इदं सर्वमसृजत' (२-६) - इति सृष्टिकर्तृत्वं वक्ष्यते । तत्कथमयं दोषः स्यादिति ? न। श्रुत्यभिमतकारणत्वस्य मायिकत्वेनैवोपपत्तेः । 'इन्द्रो मायाभिः पुरुरूप ईयते' (बृ. २-५-२९) इति श्रुत्यन्तरात् । तथा ह्याहुः **संप्रदायविदः** - 'सतो हि मायया जन्म युज्यते न तु तत्त्वतः । तत्त्वतो जायते यस्य जातं तस्य हि जायते ॥' (मां.का. ३-२७) इति। परमार्थेन सतो माययैव जन्म न तु तत्त्वत इति युज्यते । तत्त्वतो जायत इत्यभ्युपगमे हि स्वभावतोऽजस्यैव जन्माङ्गीकृतं स्यात्। तच्च विप्रतिषिद्धम्। ततश्च तत्त्वत एव कार्यकारणत्ववादिनो जातादेव जायते कार्यमित्युक्तं भवेत् । तच्चैवं जातमन्यस्मात्, तदप्यन्यस्मादित्येवम् अनवस्था दुष्परिहरा तस्मिन् पक्षे - इति कारिकार्थः । तदेतत् प्रपञ्चयिष्यते स्वस्थान एवोत्तरत्र सृष्टिप्रकरण इत्यलमत्र प्रसक्तानुप्रसक्तचिन्तया ॥

यद्यपि 'सत्यं ब्रह्म' इत्युक्ते अचैतन्यव्यावृत्तिरर्थाल्लभ्यते । अनन्तता च । न ह्यचेतनस्य परिच्छिन्नस्य वा सत्यत्वप्रसक्तिरस्ति। अचेतनस्य सर्वस्यापि विकारस्यानृतत्वावश्यंभावात्, परिच्छिन्नस्य च सर्वदेशकालयोरव्यभिचरत्स्वरूपत्वायोगाच्च । तथापि सत्यत्वं कीदृशमत्राभिप्रेतम्? किं लौकिककारणवस्तूनामिव कारकत्वाचिद्रूपत्वोभययुक्तं लूताकीटादिशरीरवत्, तदन्यतरयुक्तं वा कुलालमृदादिवत्, आहोस्वित् सर्वथा स्वरूपबाधविधुरत्वरूपम्?

- इत्यत्रैव सन्दिहानानां 'ज्ञानम्' इत्यनेन सन्देहनिवृत्तिर्भवति । एवं सत्यत्वं यदि व्यावहारिकं समर्थक्रियाकारित्वादिरूपम्, तर्हि परिच्छिन्नत्वमपि बलादायातीति शङ्कापरिहाराय 'अनन्तम्' इत्यपि विशेषणमपेक्ष्यते। अतो न व्यर्थः कारकत्वादिशङ्कापरिहारः । इत्थमेव च सत्यादीनामन्योन्यनियम्यनियामकत्वोक्तिरुत्तरत्र भाष्यस्था सार्थिका भविष्यतीत्यदोषः । तदेतत्सर्वमभिसंधायोक्तदोषद्वयपरिहाराय ज्ञानविशेषणम् इत्याह - **अत इदमुच्यते ज्ञानं ब्रह्म इतीति** ॥

## २२. 'ज्ञानम्' इति ज्ञप्तिमात्रमुच्यते -

ज्ञानशब्दस्य जानातीति ज्ञानम्, ज्ञायत इति ज्ञानम्, ज्ञायतेऽनेनेति ज्ञानम् - इत्येवं बहुधा व्युत्पत्तिसंभवात् कतमात्र व्युत्पत्तिर्विवक्षितेति शङ्कायामाह - **'ज्ञानं, ज्ञप्तिः, अवबोधः । भावसाधनो ज्ञानशब्दः'** इति । ज्ञानक्रियासामान्यानुगततत्त्वमेवेह ज्ञानशब्देन विवक्षितम् । तच्च भावार्थे व्युत्पाद्यमानेन शब्देनोपलक्ष्यत इत्यभिप्रायः। एतच्च विशदयिष्यते परस्तात् ।

## २३. 'ज्ञानम्' इति न ज्ञानकर्तृत्वार्थकम् -

ननु ज्ञानवद्वस्तु, ज्ञानकर्तृ-इत्यस्मिन्नेवार्थे ज्ञानम् इत्यच्प्रत्ययान्तः शब्द इति किं न स्यात् ? तत्राऽऽह - **'न तु ज्ञानकर्तृ'** इति । एतद्ग्रहणकवाक्यं क्वचित्पुस्तकेषु न दृश्यते । अपेक्षितं तु । एतदेव हि उत्तरवाक्येन विव्रियते **'न हि सत्यता, अनन्तता च ज्ञानकर्तृत्वे सत्युपपद्यते'** इत्यनेन । कथं नोपपद्यत इत्यत्र प्रतिवचनम् **'ज्ञानकर्तृत्वेन हि'** इत्यादि **'श्रुत्यन्तरात्'** इत्यन्तम् । विक्रियमाणस्य व्यभिचरत्स्वरूपानृतत्वध्रौव्यात् - इत्यर्थः । **'अनन्तं च'** । कथं भवेदित्यनुषङ्गः। कथम् ? - इत्याक्षेपार्थत्वात् न भवेदेवेत्यर्थः । अनन्तत्वाभावप्रसङ्गमेवोपपादयति **'ज्ञानकर्तृत्वे च'** इति । ज्ञानकर्तृ हि स्वज्ञानज्ञेयाभ्यां प्रविभज्यत इति वस्तुपरिच्छिन्नं स्याद्ब्रह्म । ततश्च तस्यानन्तता श्रुत्युक्ता बाध्येत । ततश्च ब्रह्मणो ब्रह्मत्वं हीयेत - इति भावः । एतदुपष्टम्भकत्वेन श्रुत्यन्तरमुदाहरति 'यत्र ..... नान्यद्विजानाति स भूमा' (छा. ७-२४-१) इति । अत्र हि स्वतो विभक्तज्ञेयविज्ञानाभाव एव भूमलक्षणम्

इत्युक्तम् । 'भमूा' इति बहुत्ववाची शब्दो बृहत्तमवाचकब्रह्मशब्दपर्यायः । अन्यद्विज्ञानं परिच्छिन्नत्वे प्रयोजकम् इत्यस्मिन्नर्थे तत्रैव वाक्यशेषं प्रमाणयति 'अथ यत्र .... अन्यद्विजानाति तदल्पम्' इति । अल्पत्वं हि परिच्छिन्नत्वम्।तस्माज्ज्ञानकर्तृत्वे ज्ञानशब्दार्थत्वेनाभ्युपगम्यमाने परिच्छिन्नत्वं प्रसज्यत इत्यनन्तत्वहान्या अब्रह्मत्वप्रसङ्गात्, न तथाभ्युपगन्तव्यम् इति भावः। **'इति श्रुत्यन्तरात्'** इत्यत्र चकारमध्याहृत्य योजयितव्यम्, उक्तयुक्तिसमुच्चयार्थम्। न केवलमनन्तत्वश्रुत्युपरोधप्रसङ्गो यथोक्तयुक्तिबलादवसेयः, किं तु विज्ञेयादिप्रविभक्तत्वे ब्रह्मणो ब्रह्मत्वहानेः श्रुत्यन्तरे स्फुटमुद्घोषणादपीति । एवं च नेयं युक्तिरस्मदभ्यूहमात्रम् , किं तु श्रुत्यनुसारिणीत्युक्तं भवति ॥

## २४. आत्मनो ज्ञेयत्वमपि न ज्ञानशब्दार्थः -

अथ ज्ञायत इति ज्ञानम् - इति कर्मसाधनत्वेनापि ज्ञानशब्दमुपपन्नं मन्वानस्य शङ्कामुत्थापयति । तत्र पूर्ववादी सिद्धान्त्यभिप्रायमजानन्, उक्तश्रुतिव्याख्यान-माक्षिपति - **'नान्यद्विजानातीति'** इति । आत्मनोऽन्यन्न विजानाति - इत्यन्य-योगव्यवच्छेदोऽभिप्रेतः श्रुत्या। 'अन्यत्' इति विशेषनिषेधाद्धि शिष्टविज्ञानमभ्यनुज्ञायते । आत्मा चात्र परिशिष्टः । न ह्युदाहृतश्रुतौ 'न विजानात्येव' इति विज्ञानयोगमात्रं निषिद्धमस्तीति भावः । सिद्धान्ती स्वाभिप्रायं प्रकटयति **'न, भूमलक्षणविधिपरत्वाद् वाक्यस्य' इति** । अन्यविज्ञानं हि लोके प्रसिद्धमेव। तदत्र नास्तीति भूमस्वरूपं ज्ञाप्यते वाक्येन, न पुनरात्मानं विजानातीति विज्ञानविधिपरमपि वाक्यम् । तथा सति वाक्यभेदप्रसङ्गात् - इत्यभिप्रयः । युक्त्याप्यात्मनि ज्ञेयत्वं न सिध्यतीत्येतत्प्रदर्शनपरम् **'स्वात्मनि भेदाभावात्'** इत्यादि **'अर्थवान्'** इत्यन्तं भाष्यम् । सति ह्यात्मनि ज्ञानज्ञेयविभागे, आत्मानं विजानातीति श्रुत्यर्थः कल्प्येतापि कदाचित् । न तु निरवयवस्याऽऽत्मनः सोऽस्ति। एकस्यैव सतस्त्वात्मनः निरंशस्य ज्ञेयत्वेऽभ्युपगतेऽवश्यं ज्ञानत्वं परित्यक्तं स्यात् । एकदैव निरंशस्याऽऽत्मनो ज्ञेयत्वेन ज्ञानत्वेन चोभयथाभवस्तु नैव शक्यशङ्कः । किञ्च, आत्मनो ज्ञेयत्वे सति प्रमाणान्तरप्रसिद्धत्वोपपत्तेः श्रुत्या 'ब्रह्मविदाप्नोति परम्' इति परप्राप्त्यर्थं तज्ज्ञानोपदेशो निरर्थकः स्यात् । स्फीतालोकमध्यवर्त्तिघटस्य ज्ञातव्यत्वोपदेश इवेति भाष्यार्थसारः ।

**२५. ज्ञानशब्दस्य भावसाधनत्वोपसंहारः, तत्फलकथनं च -**

तदेवं ज्ञानकर्तृत्वाद्यर्थं निरस्य यदादौ प्रतिज्ञातं ज्ञानशब्दस्य भावसाधनत्वं तदुपसंहरिष्यन्, ज्ञातृत्वाद्यार्थानुपपत्तिं तावदुपसंहरति- **तस्माज्ज्ञातृत्वे सतीति**। 'ज्ञातृत्वे' इति प्रदर्शनार्थम्। ज्ञेयत्वस्यापि निरस्तत्वात्, कारकान्तरेष्वपि स्वीकृतेषु प्रविभक्तत्वेन ब्रह्मण आनन्त्यानुपपत्तिरिति न्यायस्य समानत्वाच्चेति बोध्यम्। तदेवमानन्त्यानुपपत्तिमुपसंहृत्य सत्यत्वानुपपत्तेः प्रदर्शिताया अपि प्रकारान्तरेण प्रदर्शनार्थमन्वारम्भेणाऽऽह - **सन्मात्रत्वं चेति**। ज्ञानकर्तृत्वकर्मत्वादिविशेषवत्त्वे ब्रह्मणः सन्मात्रत्वमनुपपन्नम्। तथा च 'सदेव सोम्य' (छां. ६-२-१) इति श्रुत्यन्तरोपरोधः। तत्रैव च 'तत्सत्यम्' (छां. ६-८-७ ... ६-१६-३) इति पुनःपुनः सन्मात्रस्यैव सत्यत्वावधारणात् सन्मात्रत्वरहितस्य सत्यत्वं चानुपपन्नं स्यात्। तस्मात् सत्यत्वोपपादनाय ज्ञानकर्तृत्वादिविशेषवत्त्वं ब्रह्मणः परित्याज्यमित्यर्थः **'श्रुत्यन्तरात्'** इत्यन्तस्य भाष्यस्य। विविधोपपत्त्या प्रसाधितं ज्ञानशब्दस्य भावसाधनत्वमुपसंहरति - **'तस्मात् सत्यानन्तशब्दाभ्यां सह विशेषणत्वेन ज्ञानशब्दस्य प्रयोगाद् भावसाधनो ज्ञानशब्द'** इति। अत्र भावसाधनत्वे यदधिकं वक्तव्यं, तदुपरिष्टात् शून्यवादप्रसङ्गभाष्यविमर्शानन्तरं वक्ष्यत इत्यास्तां तावत्। एवं च ज्ञानशब्दस्य भावसाधनत्वे सिद्धे सति यत् केवलसत्यविशेषणे प्रसञ्जितं ब्रह्मणि कारकत्वमचिद्रूपता चेति दोषद्वयं, तन्निवृत्तिः फलतीति परमप्रकृतमुपसंहरति - **ज्ञानं ब्रह्मेति** इत्यादिना ॥

## १२. 'ज्ञानं ब्रह्म' इति वचनात् प्राप्तम् अन्तवत्त्वम्। लौकिकस्य ज्ञानस्यान्तवत्त्वदर्शनात्। अतस्तन्निवृत्त्यर्थमाह - अनन्तम् इति ॥

**२६. अनन्तम् इति विशेषणस्य कृत्यम् -**

किमर्थं तर्हि अनन्तविशेषणमिति? अत आह - **'ज्ञानं ब्रह्म' इति वचनात्**

इति । केवलज्ञानशब्दोपादाने दोषोद्भावनमिदमिति स्पष्टयति - **लौकिकस्येति**। लोके भवतीति लौकिकं ज्ञानम् । तच्च तत्तद्विषयपरिच्छिन्नं कालपरिच्छिन्नं स्वनिष्पादकसाधनपरिच्छिन्नं चेति तस्यान्तवत्त्वदर्शनात् ज्ञानरूपस्य ब्रह्मणोऽप्यन्तवत्त्वं स्यादिति प्राप्तम् इत्यर्थः । उपलक्षणमिदम् । अन्तवत्त्वादेव च व्यभिचरत्स्वरूपत्वादनृतत्वमपि प्राप्तम् ; तन्निवृत्त्यर्थं सत्यम् इत्याह - इत्यपि द्रष्टव्यम्। एवम् 'अनन्तम्' इत्येतस्यैव विशेषणस्योपादाने देशत आनन्त्यस्य वा कालत आनन्त्यस्य वा ग्रहणं स्यादिति प्राप्नोति । कालाकाशयोरिवाचिद्रूपता शङ्कापि। तन्निवृत्त्यर्थं सत्यं ज्ञानमिति विशेषणद्वयम् इत्यप्यूह्यम् । सत्यज्ञानाभ्यां समवधानेन त्वनन्तशब्दस्य तन्निवृत्तिरिति च ॥

## लक्षणवाक्यस्याबोधकत्वशङ्का तत्परिहृतिश्च

**१३. सत्यादीनाम् अनृतादिधर्मनिवृत्तिपरत्वात्, विशेष्यस्य च[१] ब्रह्मण उत्पलादिवदप्रसिद्धत्वात्, 'मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः । एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः ॥' इतिवत् शून्यार्थतैव प्राप्ता सत्यादिवाक्यस्य - इति चेत् । न । लक्षणार्थत्वात्। विशेषणत्वेऽपि सत्यादीनां लक्षणार्थप्राधान्यम् इत्यवोचम । शून्ये हि लक्ष्ये, अनर्थकं लक्षणवचनम् । अतः, लक्षणार्थत्वान्मन्यामहे न शून्यार्थतेति । विशेषणार्थत्वेऽपि[२] सत्यादीनां स्वार्थापरित्याग**

---

१. चशब्दो नास्ति आ ॥ २. 'अपि च' इति वा ॥

**एव । शून्यार्थत्वे हि सत्यादिशब्दानां विशेष्यनियन्तृत्वानुपपत्तिः । सत्याद्यर्थैरर्थवत्त्वे तु तद्विपरीतधर्मवद्भ्यो विशेष्येभ्यो[1] ब्रह्मणो विशेष्यस्य नियन्तृत्वम् उपपद्यते । ब्रह्मशब्दोऽपि स्वार्थेनार्थवानेव । तत्रानन्तशब्दोऽन्तवत्त्व-प्रतिषेधद्वारेण विशेषणम् । सत्यज्ञानशब्दौ तु स्वार्थसमर्पणेनैव विशेषणे भवतः ।**

## २७. लक्षणवाक्यस्यानर्थकता शङ्का -

सत्यादीनि विशेषणानि परस्परसाहाय्येन स्वविरोध्यर्थनिवर्तनद्वारेण ब्रह्मणः सर्वतो व्यावृत्तस्वरूपविशेषं समर्पयन्तीत्युक्तं गतेन ग्रन्थेन । तमिमं सिद्धान्ताभिप्रायं कात्स्न्येन ग्रहीतुमशक्तः शङ्कते - **सत्यादीनामित्यादिना 'इति चेत्'** इत्यन्तेन। यदि सत्यादीनि स्वविरोधिव्यावृत्तिमात्रे पर्यवसितानि, ब्रह्मशब्दश्चालौकिकत्वाद् वन्ध्यासुतशब्दादिवत् प्रमाणान्तरासिद्धार्थस्य वक्ता, तर्हि न बोधकमिदं वाक्यं कस्यचिदप्यर्थस्येति प्राप्तम् 'मृगतृष्णाम्भसि स्नातः' इत्यदिवाक्यतौल्यम् । न ह्युत्पलादिवत् प्रत्यक्षादिवेद्यं ब्रह्म, येन सत्यादीनि केवलव्यावृत्यापि तत्स्वरूपं समर्पयेयुः - इति शङ्काग्रन्थार्थः । तथा च सर्वविकल्परहितं नैस्वाभाव्यं तत्त्वमातिष्ठमानानां मताद् वैलक्षण्यं न किमप्यत्र पश्यामः । आहुर्हि बाह्या अपि 'अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम् । निर्विकल्पमनानार्थमेतत्तत्त्वस्य लक्षणम्' (मा.का. १८-९, वृ.पृ. १३३) इति-इति भावः ॥

## २८. शून्यार्थताशङ्कापरिहारः -

**'न । लक्षणार्थत्वात्'** इत्यादि **'न शून्यार्थतेति'** इत्यन्तं भाष्यं निगदव्याख्यातम्। **शून्ये हि लक्ष्ये इति** । असति लक्ष्ये इत्यर्थः ॥

---

१. 'विशेषेभ्यो' आ॥

अत्र सत्यादिपदानामादौ ब्रह्मपदेन सामानाधिकरण्यं प्रतीयते । तेन च सत्यादीनां ब्रह्मणश्च विशेषणविशेष्यभावो निर्धार्यते, येन सत्यादीनि स्वविरोध्यर्थव्यावर्तकानीत्यवगम्यते । तदनु सत्यादीनां ब्रह्मणश्च लक्ष्यलक्षणभावो हृदयं गच्छति, येन ब्रह्मणः सर्वतो व्यावृत्तं स्वरूपं समर्पितं भवति - इत्येष ब्रह्मप्रतिपत्तिक्रमः । तत्र लक्ष्यलक्षणभावेऽवगते ब्रह्मणः स्वरूपस्यैवावगतत्वात् नास्त्येवापराशङ्कासमुन्मेष इति तदवगमकविशेषणविशेष्यभावसमालोचनावस्थायां शङ्कापरिहारप्रकारं विशदयितुमारभते **विशेषणार्थत्वेपी**त्यादिना । विशेषणार्थत्वेऽपीति, विशेषणविशेष्यभावदशायामपीत्यर्थः । विशेषणानि हि विशेष्यान्तरेभ्यः स्वविशेष्यं व्यावर्त्य तन्नियमनाय प्रयुज्यन्ते । तत्रासिति स्वाभिधेयेऽर्थे कथं स्वविशेष्यं नियच्छेयुः ? असति च विशेष्ये किं नियच्छेयुः ? न च लोके किञ्चिदपि पदं स्वार्थमनभिधाय केवलव्यावृत्त्यवबोधकं दृष्टचरम् । आदौ विशेषणानि स्वस्वार्थमभिधायैवार्थान्मानान्तरद्वारेण तद्विरोधिनं व्यवच्छिन्द्युरिति तु युक्ततरम् । यथाहु**र्वार्तिककाराः** - 'शब्दात् प्रतीयते तावत् सङ्गतिर्धर्मधर्मिणोः । मानान्तरादपोहस्तु न शाब्दस्तेन स स्मृतः।।' (तै.वा. २-६७) इति । तदिहापि सत्यादिपदान्यपि कूटस्थनित्यादिवस्तु प्रथमं प्रतिपाद्यैवानन्तरम् अनृतत्वाद्यभावमर्थाद् गमयन्तीति युक्तमुत्पश्यामः - इति **'विशेष्यस्य नियन्तृत्वमुपपद्यते'** इत्यन्तस्य भाष्यस्याभिप्रायः । यत्तूक्तं ब्रह्मशब्दो वन्ध्यासुतादिशब्दवदसदर्थक इति, तत्राऽऽह - **ब्रह्मशब्दोऽपीति** । बृहि - वृद्धौ - इतिधातोर्निष्पन्नोऽयं ब्रह्मशब्दः । तस्य च बृंहतेर्धातोरर्थानुगमात् सर्वातिशायि नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितं वस्तु प्रतीयते । धात्वर्थस्य संकोचने कारणाभावात्। तस्मान्न ब्रह्मशब्दो वन्ध्यासुतशब्दतुल्यः । तदेवं विशेषणविशेष्यसमर्पकाणां सत्यादिपदानामर्थवत्त्वावगमादेव सत्यादीनां ब्रह्मणश्च नियम्यनियामकत्वमुपपद्यते । तत एव चानिष्टार्थव्यावृत्त्या लक्ष्यलक्षणभावावगतिरिति भावः । तत्रानन्तशब्दो यद्यप्यन्तवत्त्वप्रतिषेधमात्रवाचकत्वादस्वार्थवानिव भाति, तथापि सत्यज्ञानशब्दौ तावत्स्वार्थसमर्पणद्वारेणैव स्वविरोध्यर्थं व्यवच्छिन्त इति तत्साहचर्यादेव सोऽपि स्वान्तर्भावितानन्तपदार्थं निष्कृष्य वक्तुं शक्तो भवतीत्यभिप्रेत्याह - **तत्रानन्तशब्द** इत्यादिना **विशेषणं भवत** इत्यन्तेन॥

यदप्याशङ्क्यते शून्यवादाद् वैलक्षण्यं नैवास्य दर्शनस्य दृश्यत इति तदप्येवं परिहृतम् । यस्मात् सर्वविकल्पप्रतिषेधमात्रेण परितुष्टाः शून्यवादिनः । वेदान्तिनस्तु सर्वविकल्पास्पदीभूतस्वरूपव्यवस्थापने व्यग्रा इति । न हि निरास्पदः क्वचन विकल्पोऽस्ति । यथाहु**र्वार्तिककाराः** 'परमार्थमनालिङ्ग्य न दृष्टं वितथं क्वचित्। तस्माद्वा वितथं सर्वं परमार्थैकनिष्ठितम्' (तै.वा. २-६४) इति । 'तस्माद्वा' इति, तस्मादेवेत्यर्थः । एवं च सत्यादिशब्दाः स्वार्थाभिधानमपरित्यज्यानृतादि-विकल्पप्रपञ्चव्यावर्तनपूर्वकं सर्वविकल्पास्पदीभूतं ब्रह्म समर्पयन्तीति न लक्षणवाक्यस्याबोधकत्वचोद्यमत्रावतरतीति ध्येयम् । नन्वेवं शब्दसमर्पितार्थत्वे ब्रह्मणः पदार्थत्वं वाक्यार्थत्वं चापतति । तत्र कथं ब्रह्मणो निर्विशेषत्वसिद्धिः ? कथं वा 'यतो वाचो निवर्तन्ते' (२-९) इति श्रुत्यनुपरोध इति ? नैष दोषः । अध्यारोपितनामरूपकर्मापेक्षयैव हि ब्रह्म लक्षणया निर्दिश्यते 'ब्रह्म' 'आत्मा' इत्यादिशब्दैः । यदा तु स्वरूपमेव निर्दिदिक्षितं विधूतसर्वविशेषम् , तदा 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते' (२-७) इति सर्वविकल्पप्रतिषेधद्वारेणैव तत्तत्त्वसमर्पणम् - इत्यनवद्यम् । एतच्च स्फुटीकरिष्यतेऽनुपदमेव ज्ञानतत्वनिर्धारणप्रसङ्गेनेत्यलमतिशङ्कया ॥

**१४. 'तस्माद्वा एतस्मादात्मनः' (२-१) इति ब्रह्मण्येवात्मशब्दप्रयोगात् वेदितुरात्मा[1] ब्रह्म । एतमानन्दमयमात्मानमुपसङ्क्रामति' (२-८) इति च[2] । तत्प्रवेशाच्च। 'तत्सृष्ट्वा तदेवानुप्राविशत्' (२-६) इति च तस्यैव जीवरूपेण शरीरप्रवेशं दर्शयति । अतो वेदितुः स्वरूपं ब्रह्म ॥**

---

१. 'आत्मैव' वा ॥

२. 'आत्मतां दर्शयति' - इति चशब्दानन्तरं वा ॥

## २९. वेदितुरात्मत्वाच्च न ब्रह्मासत् -

यद्यपि निर्दोषेण वेदेन प्रणीतत्वाल्लक्षणवाक्यस्य न तच्छब्दप्रमाणकैरतिशङ्कनीयं भवति, तथापि ब्रह्मवेदनस्यानुभवावसानत्वाभ्युपगमात्, न शब्दार्थव्यवहारमात्रेण कस्यचिदर्थस्य सिद्धिः - इति न्यायमनुसृत्य लक्षण वाक्यस्थशब्दव्यापारनिर्णयमात्रेण न ब्रह्म सिध्यतीति कैश्चिदाशङ्क्येत। तन्निवारणार्थं वेदितुरात्मैव ब्रह्मेति न ब्रह्मासत्त्वशङ्का कार्येति बोधयन्, तत्र श्रुतिप्रमाणमुदाहरति - **तस्माद्वा एतस्मादात्मन** इत्यादि । नन्वात्मत्वे 'ब्रह्मविदाप्नोति परम्' इत्युपदेशस्यैवाप्रवृत्तिः प्रसज्यते । न ह्यात्मानं न वेत्ति कश्चिदिति । नायं दोषः। तद्विशेषं प्रति वादिविप्रतिपत्तिदर्शनात्। देहेन्द्रियप्राणमनोबुद्धिजीवेषु प्रत्येकमात्मत्वमातिष्ठन्ते वादिनः । तत्कतमोऽयमात्मा ? किमेतेष्वन्यतमः, किं वा एतव्द्यतिरिक्त एव कश्चित् ? - इति भवति विशयः । तदत्र सत्यज्ञानानन्तरूपं सर्वस्याऽऽत्मानं स्वात्मत्वेन विदितवत एव परप्राप्तिमुपदेष्टुं श्रुतिप्रवृत्तिरित्यनवद्यम्॥

भाष्यार्थस्तु 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति तच्छब्दपरामृष्टे सत्यज्ञानानन्तरूपे ब्रह्मण्येवाऽऽत्मशब्दप्रयोगात्, वेदितुरात्मा ब्रह्मेति विज्ञायते ; तथा 'एतमानन्दमयमात्मानमुपसंक्रामति' इत्यत्रात्मशब्दप्रयोगादपि वेदितुरात्मा ब्रह्मेति विज्ञायत इति । यद्यप्यत्र श्रुतौ आनन्दमय एवाऽऽत्मशब्दः प्रयुक्तो नोपसंक्रमणकर्तरि। तथाप्यन्नमयाद्यानन्दमयान्तेषु प्रयुक्तस्याऽऽत्मशब्दस्य तत्तदतिरिक्तात्मोपदेशेन संक्रमणोपदेशात् संक्रमणकर्तैव ब्रह्मेति निर्दिष्टं भवतीत्यदोषः। एवंविदानन्दमयमात्मानपुसंक्रामतीत्युपदेशाच्च एवंवेदितुरात्मा ब्रह्मेत्युपदिष्टमिति गम्यते - इति श्रुत्युदाहरणाभिप्रायः। क्वचिच्च 'संक्रामतीति चाऽऽत्मतां दर्शयति' इत्यपि पाठो दृश्यते । तत्राप्ययमेवाभिप्रायः । स्फुटयिष्यते चाग्रे भाष्यकृतैव विशिष्टचिन्तामारप्स्यमाणेन 'कोऽयमेवंवित्, कथं वा संक्रामतीति' (२-८) इति सर्वमनवद्यम् । इतश्च वेदितुरात्मेत्याह - **तत्प्रवेशाच्चेति** । तदेवं ब्रह्मण एव श्रुत्या आत्मत्वेन निर्देशात् स्वात्मनश्च केनचित्प्रत्याख्यातुमशक्यत्वात्, य एव प्रत्याख्याता तस्यैवाऽऽत्मत्वात् , नैवंभूतस्य ब्रह्मणो वन्ध्यापुत्रतौल्यं केनचिच्छक्यशङ्कम् इति शून्यवादप्रसङ्गपरिहारभाष्यस्य परिसमाप्तिरिह द्रष्टव्या ॥

## ब्रह्मणो ज्ञानत्वं कीदृशम् ?

१५. एवं तर्हि आत्मत्वाज्ज्ञानकर्तृत्वम् । आत्मा ज्ञाता - इति हि प्रसिद्धम् । 'सोऽकामयत' (२-६) इति च कामिनो ज्ञानकर्तृत्वप्रसिद्धिः । अतो ज्ञानकर्तृत्वात् 'ज्ञप्तिर्ब्रह्म' इत्ययुक्तम् । अनित्यत्वप्रसङ्गाच्च। यदि नाम ज्ञप्तिर्ज्ञानम् इति भावरूपता ब्रह्मणः, तथाप्यनित्यत्वं प्रसज्येत । पारतन्त्र्यं च । धात्वर्थानां कारकापेक्षत्वात्। ज्ञानं च धात्वर्थः । अतोऽस्य अनित्यत्वं परतन्त्रा च । न। स्वरूपाव्यतिरेकेण कार्यत्वोपचारात् । आत्मनः स्वरूपं ज्ञप्तिः, न ततो व्यतिरिच्यते । अतो नित्यैव। तथापि बुद्धेरुपाधिलक्षणायाश्चक्षुरादि-द्वारैर्विषयाकारेण परिणामिन्या[१] ये शब्दाद्याकारावभासाः, ते आत्मविज्ञानस्य विषयभूता उत्पद्यमाना एव आत्मविज्ञानेन व्याप्ता उत्पद्यन्ते । तस्मात् आत्मविज्ञानावभासाश्च[२] ते विज्ञानशब्दवाच्याश्च धात्वर्थभूता आत्मन एव धर्मा विक्रियारूपा इत्यविवेकिभिः परिकल्प्यन्ते।

१. 'विषयाकारपरिणामिन्याः' वा ॥

२. 'आत्मविज्ञानावभास्याश्च' (वा॥) इति न शुद्धः पाठः ॥

यत्तु[१] ब्रह्मणो विज्ञानम्, तत् सवितृप्रकाशवत् अग्न्युष्णवच्च[२] ब्रह्मस्वरूपाव्यतिरिक्तं स्वरूपमेव तत् । न तत्कारणान्तरसव्यपेक्षम् । नित्यस्वरूपत्वात् । सर्वभावानां च तेनाविभक्तदेशकालत्वात् कालाकाशादिकारणत्वात्[३] निरतिशयसूक्ष्मत्वाच्च न तस्यान्यदविज्ञेयं सूक्ष्मं व्यवहितं विप्रकृष्टं भूतं भवद् भविष्यद्वा अस्ति। तस्मत् सर्वज्ञं तद्ब्रह्म। मन्त्रवर्णाच्च - 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्' (श्वे. ३-१९) इति*। "न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद् द्वितीयमस्ति" (बृ.४-३-३०) इत्यादिश्रुतेश्च। विज्ञातृस्वरूपाव्यतिरेकात् करणादिनिमित्तानपेक्षत्वाच्च ब्रह्मणो ज्ञानस्वरूपत्वेऽपि नित्यत्वप्रसिद्धिः । अतो नैव धात्वर्थस्तत् ।

१. 'यत्तु तद्' इति पाठे तदित्यनपक्षितम् ॥ २. 'अग्न्युष्णत्ववत्' वा ॥

३. 'कालाकाशादिकारणत्वाच्च' इति (आ॥) पाठे चोऽधिकः ॥

* अयम् 'इति'- शब्दः शक्यस्त्यक्तुम् । 'इत्यादिश्रुतेश्च' इत्यनेनैव चारितार्थ्यात्। अथवा 'इतिश्रुतेः' इति पठितव्यम् अक्लिष्टान्वयलाभाय । मुद्रितपुस्तकेषु परं यथान्यासमेव दृश्यते ।

## अक्रियारूपत्वात् । अत एव च न ज्ञानकर्तृ ॥

### ३०. ज्ञानत्वं ज्ञानकर्तृत्वमेव स्यादित्याशङ्का -

तदेवं सत्यज्ञानानन्तशब्दानामर्थवत्त्वं तद्विरोध्यर्थव्यावर्तनद्वारेण ब्रह्मलक्षणसमर्पणसामर्थ्यं च विवृत्य ब्रह्मशब्दस्य च स्वार्थेनार्थवत्वात्, ब्रह्मणो वेदितुरात्मत्वेन श्रवणाच्च न लक्षणवाक्यस्य शून्यार्थतेत्युपसंहृतम्। अथेदानीं पुनरप्यन्वारम्भेण ज्ञानत्वं ज्ञानकर्तृत्वमेव स्यादित्याशङ्क्य परिहरति विवक्षितज्ञानस्वरूपत्वं विशदीकरिष्यन् - एवं तर्हीति । सत्यानन्तशब्दाभ्यां सह विशेषणत्वेन ज्ञानशब्दप्रयोगाद् भावसाधनो ज्ञानशब्द इत्युक्तं प्राक्, ब्रह्मणो ज्ञानकर्तृत्वादि विशेषवत्वनिराकरणाय । तस्यैव ब्रह्मणश्चेदिदानीं शून्यत्ववारणाय सर्वस्यात्मत्वमङ्गीक्रियते, तदेव ज्ञानकर्तृत्वं त्वदनिष्टं पुनः प्राप्नोतीत्यर्थः । आत्मत्वेऽपि कथं ज्ञातृत्वमित्यत आह - **आत्मा ज्ञातेति हि प्रसिद्धं लोके ।** आत्मा हि नाम स्वरूपं सर्वस्य । सर्वोऽपि च - 'अहं पश्यामि', 'अहं शृणोमि', 'मन्ये', विजानामि' - इति च ज्ञानकर्तृत्वमेवात्मनि प्रत्येति, न तु ज्ञानत्वम् । अधिकृतश्च शास्त्रार्थं ज्ञात्वा तत्तत्कर्मानुष्ठाय फलं भोक्ष्ये-इत्येवाभिसंधत्त इति प्रसिद्धमेतत् । अतोऽपि ज्ञानकर्तृत्वमात्मनः । तदेवं लोके वेदे चात्मनो ज्ञातृत्वप्रसिद्धेर्ध्रुवं ज्ञातृत्वं प्राप्नोति ब्रह्मण आत्मत्वाङ्गीकारे । श्रुतिप्रामाण्याच्च । 'सोऽकामयत बहु स्यां प्रजायेयेति' (२-६) इति हि ब्रह्मणो बहुभवनकामितां वक्ष्यति। कामिनश्च ब्रह्मणश्चेतनत्वादस्मदादिवदेव ज्ञानकर्तृत्वं प्रसिध्यतीति । अस्त्वेवम्, ततः किम् ? तत्राह **'अतो ज्ञानकर्तृत्वात् ज्ञप्तिर्ब्रह्मेत्ययुक्तम्'** इति । एवमात्मत्वान्यथानुपपत्या, श्रुतिप्रामाण्याच्च 'ज्ञानं ब्रह्म' इत्यत्र ज्ञानकर्तृब्रह्मेत्येव व्याख्येयमिति शङ्कितुराशयः।

तदेवं ज्ञानशब्दस्य कर्तृसाधनत्वपक्षे अनुकूलतर्कं श्रुतिं चोपन्यस्य भावसाधनत्वपक्षे प्रतिकूलतर्कमप्याह - **'अनित्यत्वप्रसङ्गाच्च'** इति । तदिदं विवृणोति **यदि नामे**त्यादिना । अयमभिप्रायः । ज्ञानकर्तृत्वादि विशेषवत्त्वे परिच्छिन्नत्वम् अनित्यत्वं च दुर्वारम् । ततश्च सत्यत्वमानन्त्यं च हीयेत - इति

भिया हि (११) त्वया ज्ञानत्वं ब्रह्मण आस्थितम् । तत्राङ्गीकृतेऽपि ज्ञानत्वे तद्दोषान्नैव मोक्ष्यसे । यत्कारणं ज्ञानं नाम धात्वर्थः क्रियारूपः, क्रिया चानेककारकनिष्पाद्येति तस्य कथङ्कारं परिच्छिन्नत्वम् अनित्यत्वं वा वार्येत ? अन्यापेक्षनिष्पत्तेश्च तस्य पारतन्त्र्यमपि ध्रुवं प्रादुःष्यात् । एवं च भक्षितेऽपि लशुने न शान्तो व्याधिरित्याभाणकस्य गोचरीभवेर्ब्रह्मणो ज्ञानत्वमुररीकुर्वन् । तदेवं दोषस्योभयपक्षसामान्यम् - इत्यतो वरं उक्तयुक्तिश्रुतिबलाज्ज्ञानकर्तृत्वमेवाश्रितम्। अस्मिन् पक्षे हि श्रुतिप्रामाण्येन लौकिकयुक्तिबाधे सति कथञ्चिदुदाहृतदोषवारणस्यापि संभव इति ॥

## ३१. ज्ञानं नित्यम्, न कार्यम् -

उक्तचोद्यं ज्ञानस्वरूपविवेचनेनैव निरवकाशीकरोति **'न । स्वरूपाव्यतिरेकेण कार्यत्वोपचारात्**, इत्यादिना **'नित्यस्वरूपत्वात्'** इत्यन्तेन । अयमभिप्रायः । उक्तशङ्का ज्ञानस्वभावाविवेचनात् कृता । तथा हि, आत्मा तावज्ज्ञानप्रकाशरूप एवाभ्युपगन्तव्यस्तैरपि ये तद्व्यतिरिक्तं ज्ञानमात्मनो गुणं क्रियां वा अभ्युपयन्ति । अन्यथा हि केन साधनेन स्वव्यतिरिक्तज्ञानान्तरस्योत्पत्तिं गतिमागतिं वा विजानात्वात्मेति ? तथा च श्रुत्यन्तरम् 'एतेनैव विजानाति' (का. २-१-३) इति। ननु प्रत्यक्षमेतत् 'ज्ञानं म उत्पन्नम्' 'ज्ञानं मे विनष्टम्' इति च । तत्र किमित्येषा प्रसिद्धिस्त्यज्यत इति ? अत्रोच्यते । यद्यपि बुद्धिवृत्तिरेव लोके ज्ञानमिति व्यवह्रियते 'ज्ञानं जातम्' इत्यादिना, तथापि बुद्धेरचेतनाया करणरूपाया ज्ञानस्वभावत्वं तत्कर्तृत्वं वा न युज्यते । उक्तनयेन तद्वृत्तेर्ज्ञानत्वाङ्गीकारेऽपि तादृशं ज्ञानं चेतयितुं तद्व्यतिरिक्तमन्यज्ज्ञानमपेक्ष्येतैवेत्यत आत्मनः स्वरूपभूतस्य ज्ञानस्याकामेनाप्यभ्युपगन्तव्यत्वात्, असत्यामपि बुद्धौ सुषुप्तादिषु तदभावानुभवोपपादनार्थमात्मनो ज्ञानस्वरूपत्वस्यावश्यस्वीकरणीयत्वाच्च । कथं तर्ह्यात्मस्वरूपस्यैव सतो ज्ञानस्योत्पत्यादिकमुपपादनीयमिति ? **अत्र ब्रूमः - बुद्धेरुपाधिलक्षणायाश्चक्षुरादिद्वारैर्विषयाकारेण परिणामिन्या** इत्यादि । अस्यार्थः । यदा यदा विषयोपलब्धिः, तदा तदा बुद्धेस्तत्तद्विषयाकारत्वेन परिणामो जायते, स एव च परिणामो धात्वर्थो विक्रियात्मकः, स एव च जायते,

विनश्यतीत्यादिव्यवहारविषयो न त्वात्मनः स्वरूपभूतं ज्ञानम् । तथापि यदा यदा विषयाकारेण परिणामो बुद्ध्याः, तदा तदा तत्तत्प्रत्ययः स्वतःसिद्धात्माश्रयेणैव जायमानस्तज्ज्ञानेन व्याप्त एव जायते तद्भानभासितश्च । तेन प्रत्ययेन तदाकारमिव गतोऽप्यात्मा तदव्यतिकीर्ण एवावतिष्ठते स्वाभाविकज्ञानप्रकाशेनाप्रयत्नेनैव स्वाश्रितसर्वबुद्धिप्रत्ययप्रकाशनात्, प्रदीपाद्यालोक इव स्वाश्रितप्रकाशकः । यथोक्तम् - व्यञ्जकस्तु यथाऽऽलोको व्यङ्ग्यस्याकारतां गतः । व्यतिकीर्णोऽप्यसङ्कीर्णस्तद्वज्ज्ञः प्रत्ययैः सदा ॥ स्थितो दीपो यथायत्नः प्राप्तं सर्वं प्रकाशयेत् । शब्दाद्याकारबुद्धीर्ज्ञः प्राप्तास्तद्वत्प्रपश्यति ॥ (उ.सा. १६-५, ६) इति । प्रत्ययस्तु जायमान आत्मविज्ञानावभासमुद्गृह्णाति, मुखसम्मुख इव स्वच्छादर्शस्तदाभासम् । तदेवात्मज्ञानाभासफलावसानत्वात् बौद्धप्रत्ययस्य तदेव ज्ञानं जातमित्युपचर्यते । तेनैव चाऽऽत्मधर्मभूतेन ज्ञानेनाऽऽत्मा ज्ञानकर्तेत्यपि । तदेतत्सर्वं वितत्य विचारितं निर्णीतं चोपदेशसाहस्र्याम् । 'आत्माभासस्तु तिङ्वाच्यो धात्वर्थश्च धियः क्रिया । उभयं चाविवेकेन जानातीत्युच्यते मृषा ॥' (उप.सा. १८-५१) इति । 'यत्र यस्यावभासस्तु तयोरेवाविवेकतः । जानातीति क्रियां सर्वो लोको वक्ति स्वभावतः ॥ बुद्धेः कर्तृत्वमध्यस्य जानातीति ज्ञ उच्यते । तथा चैतन्यमध्यस्य ज्ञत्वं बुद्धेरिहोच्यते ॥' (उप. सा. १८-६२-६३) इति च । ब्रह्मणस्तु ज्ञानं तत्स्वभावत्वान्न जायते नापि नश्यतीत्याह - **यत्तु ब्रह्मणो विज्ञानमिति** । नैतद्विज्ञानं लौकिकसम्मतप्रत्ययलक्षणज्ञानवत् कारणान्तरसव्यपेक्षम्, बुद्धेरिवात्मनो विषयाकारेण परिणतिं वा, विषयसंयोगेन फलजननं वा नैवापेक्षते । कुतः ? नित्यस्वरूपत्वात् । नित्यज्ञप्तिस्वरूपो ह्यात्मा यथा सविता प्रकाशस्वरूप एव, न तु प्रकाशगुणः प्रकाशक्रियावान्वा । यथा वा अग्निरुष्णस्वभाव एव, न तूष्णगुणः, दाहक्रियावान् वा । अतो न तस्य ज्ञानोत्पत्त्यपेक्षा, तदर्थं कारणापेक्षा वा समस्तीत्यर्थः ॥

## ३१. ब्रह्मणः सर्वज्ञता -

अथैवं नित्यज्ञप्तिस्वरूपत्वे कथं ब्रह्म सर्वज्ञमिति प्रवादः ? न हि सर्वविषयं ज्ञानमकुर्वत् सर्वज्ञमित्युपपद्यते । तत्राह - **सर्वभावानां चेत्यादिना श्रुतेश्चेत्यन्तेन**।

यद्यपि ब्रह्म न सर्वविषयं ज्ञानं सर्वदा कुर्वदास्ते । तथापि सर्वविषयावभासनक्षमत्वादेव तज्ज्ञानस्य, तत्सर्वज्ञत्वमनपह्नवनीयं भवति । कूटस्थनित्यज्ञानस्वरूपत्वानुपगमे हि कदाचिज्ज्ञानाति कदाचिन्नेत्यसर्वज्ञत्वमपि शङ्क्येतेति भावः । कूटस्थज्ञानस्वभावमपि विषयाणां व्यवधानवशात् स्यादज्ञं व्यवधानपरिहारकत्वेनैव च तत्तद्विषयज्ञात्रिति शङ्कापरिहारार्थं **'सर्वस्य तेनाविभक्तदेशकालत्वात्'** इति वचनम् । सर्वसाक्षिणो हि तस्य नास्ति व्यवधानं संभावितम्, यत्परिहारेण ज्ञातृत्वमवकल्पेत । कालाकाशादेस्तु संभाव्यमानस्य तत्कार्यत्वान्न तद्व्यवधानं शक्यशङ्कमित्याह - **कालाकाशादिकारणत्वा**दिति। तस्मान्नैवास्ति कालदेशादिव्यवधानप्रतिबन्धो येन स्यादपि सर्वज्ञताहानिरिति भावः। नापि विषयसूक्ष्मतानिमित्तः प्रतिबन्धः शङ्क्यः । सूक्ष्मात्सूक्ष्मतरस्यापि तज्ज्ञानविषयत्वेनैवाऽऽत्मलाभादित्याह - **निरतिशयसूक्ष्मत्वा**च्चेति। हेतुत्रयसिद्धमर्थं पुञ्जीकृत्याह - **न तस्यान्यदविज्ञेयमि**त्यादि । उपसंहरति - **तस्मात्सर्वज्ञं ब्रह्मेति** । इदं च ज्ञेयस्थितिदशापेक्षयोक्तम् । प्राक्सृष्टेरपि सर्वविषयावभासनक्षमस्य ज्ञानस्य स्वरूपेणैवावस्थितेः सर्वज्ञत्वमव्याहतम् । यदा तु सर्वस्य ज्ञेयस्य तदनन्यत्वावगमः तदा अद्वितीयत्वात् सर्वं च ज्ञस्वभावं च तदेवेति सर्वज्ञमिति द्रष्टव्यम् । उक्तर्थे श्रुतिप्रमाणमाह - **'अपाणिपाद'** इत्यादि, **'न हि विज्ञातु'** रित्यादि **च** । अत्राऽऽद्या श्रुतिर्ब्रह्मणो ज्ञाने करणान्तरव्यपेक्षाभावम्, नित्यज्ञस्वभावम्, सर्वकारणत्वेन सर्वव्यापकत्वाद्देशकालादिव्यवधानप्रतिबन्धाभावं च दर्शयति । द्वितीयात्वद्वितीयस्वभावत्वेन तस्य नित्याविपरिलुप्त-विज्ञानस्वरूपतामाचष्ट इति विवेकः । ये तु नवीनवेदान्तिनः प्रत्यवतिष्ठन्ते - चिदचिद्विशिष्टं चैतन्यं ब्रह्मेति । चिद्रूप एव चात्मा चिद्गुणको ज्ञातेति । स्वयमपरिच्छिन्नमेव चात्मनो धर्मभूतं ज्ञानं संकोचविकासार्हमिति । चैतन्यरूपं ब्रह्मापि स्वरूपनिरूपकज्ञानगुणवत्त्वेन सर्वज्ञमित्यादि मणिप्रदीपप्रभादिदृष्टान्तावलम्बेन, 'विज्ञातारमरे केन विजानीयात्' (बृ. २-४-१४), 'यः सर्वज्ञः' (मु. २-१-६) इत्यादि श्रुत्यवष्टम्भेन च, ते स्वयं सर्वज्ञाः केनचिदलौकिकेनैव ज्ञानेन चिच्चैतन्ययोस्तद्धर्मभूतज्ञानयोश्च वैलक्षण्यं विविच्य विजानीयुरिति नास्मादृशां तत्प्रतिसमाधानाय यत्नान्तरं कृतं सफलं भवेदित्युपरम्यते॥

### ३३. ज्ञानरूपस्य ब्रह्मणो न धात्वर्थता, न च ज्ञानकर्तृता -

तदेवं ज्ञानशब्दस्य ज्ञानस्वरूपपरत्वविवक्षणान्न कोऽपि दोष इत्युक्तमुपसंहरति, अधिकं किञ्चिद्विवक्षन् - **'विज्ञानस्वरूपाव्यतिरेकात्'** इत्यादिना। ननु ज्ञप्तिर्ज्ञानमिति ज्ञानशब्दस्य भावसाधनतास्वीकारे, ज्ञानस्य पारतन्त्र्यम् अनित्यत्वं च स्यादित्युक्तमुपक्रमे । तस्य कः समाधिः ? अत्रोच्यते । ज्ञानज्ञात्रोरितरेतरव्यतिरेके हि स्वीकृते ज्ञातुर्ज्ञानस्य पारतन्त्र्यम्, उत्पत्तिमत्वेन चानित्यतादोष इत्युत्थातव्यम्। न तु तदस्ति । विज्ञातृस्वरूपत्वादेव ज्ञानस्य करणादिनिमित्तोदीक्षणाभाव इत्युपपादितत्वात् । कथं तर्हि भावसाधनतावाचोयुक्तिः? कर्तृत्वादिकारकत्वनिवारणार्थमिति ब्रूमः । न तु भावार्थतायां तात्पर्येण । यदुक्तमाचार्यैरेव - 'नाप्यतो भावशब्देन ज्ञप्तिरित्यपि युज्यते। न ह्यात्मा विक्रियामात्रो नित्य आत्मेति शासनात् ॥' (उप.सा १८-३३) इति । तदाह - **'अतो नैव धात्वर्थः, अक्रियारूपत्वात्'** इति । ज्ञानकर्तृत्वं तु न पृथङ्निरसनीयम् । ज्ञातृज्ञानयोरव्यतिरेकोक्त्यैव - **अत एवेति** । उक्तनीत्या ज्ञानस्वरूपस्यैव सतो ज्ञातृत्वोपचारादेवेत्यर्थः । न हि ज्ञातृज्ञानयोर्भेदोऽत्र विद्यते तार्किकसमय इव, येन धात्वर्थभूतेन ज्ञानेन विक्रियाप्याशङ्क्येतात्मनः । एतेन कामयितृत्वश्रुतिर्व्याख्याता। आत्मा जानातीति च लौकिकप्रसिद्धिश्च 'आत्माभासस्तु तिङ्वाच्यः' इत्यभियुक्तोक्त्यनुसारेण मृषाध्यासकृतेत्यवोचाम । अतः सर्वमनवद्यम्। का तर्हि भावसाधनत्वेन ज्ञानशब्दव्युत्पादनस्य गतिः ? उक्तविधया ज्ञानस्वरूपस्यैव सतः, आत्मबुद्ध्यन्योन्याध्यासदाशायां लक्षणया तद्याथात्म्यप्रतिबोधनार्थत्वमेव गतिरित्यदोषः । तदप्युक्तम् 'चैतन्याभासता बुद्धेरात्मनस्तत्स्वरूपता । स्याच्चेत्तं ज्ञानशब्दैश्च वेदः शास्तीति युज्यते ॥' (उप.सा. १८-४८) इति ॥

## ब्रह्मणोऽपदार्थत्वमवाक्यार्थत्वं च

**१६. तस्मादेव च न ज्ञानशब्दवाच्यमपि तद्ब्रह्म । तथापि तदाभासवाचकेन**

बुद्धिधर्मविषयेण[१] ज्ञानशब्देन तल्लक्ष्यते । न तूच्यते । शब्दप्रवृत्तिहेतुजात्यादिधर्म-रहितत्वात्। तथा सत्यशब्देनापि । सर्व-विशेषप्रत्यस्तमितस्वरूपत्वाद् ब्रह्मणः । बाह्यसत्तासामान्यविषयेण सत्यशब्देन लक्ष्यते 'सत्यं ब्रह्म' इति । न तु सत्यशब्दवाच्यमेव[२] ब्रह्म। एवं सत्यादिशब्दाः इतरेतरसन्निधौ अन्योन्यनियम्यनियामकाः सन्तः सत्यादि-शब्दवाच्यात् तन्निवर्तका[३] ब्रह्मणो लक्षणार्थाश्च भवन्तीत्यतः सिद्धं 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह।' (२-४), 'अनिरुक्तेऽ-निलयने' (२-७) इति च अवाच्यत्वम्, नीलोत्पलवदवाक्यार्थत्वं च ब्रह्मणः ॥

**३४. ब्रह्मणः सत्यादिशब्दलक्ष्यत्वे आक्षेपपरिहारौ -**

नन्वेवं सत्यादिशब्दैर्लक्षणयापि कथं ब्रह्मवस्तु बोध्यत इत्यतर्कणीयमेवैतत्। यतो वाच्यया लक्षणया वा भवतु, अन्यया वा यया कयाचिद् वृत्त्या बोधः, सर्वा हि सा वृत्तिरेवेति तया लौकिकमेव वस्तुनिर्देष्टुं पार्येत, न तु स्वक्षेत्रं लोकमेवातिलङ्घितुमिति । तत्राऽऽह **'एवं सत्यादिशब्दा'** इत्यादिना **'लक्षणार्थाश्च भवन्ति'** इत्यन्तेन । अयमाशयः । वर्णितनीत्या सत्यादिशब्दाः

१. 'विशेषण' इति वा ॥ पाठोऽयुक्तः ॥

२. एवकारो नास्ति वा ॥; किं त्वपेक्षितः ॥

३. 'निवर्तका' इति तच्छब्दविरहितः पाठः वा ॥

स्वं स्वं वाच्यमात्रं निर्देष्टुं समर्था अपि स्वस्वेतरशब्दद्वयसान्निध्यप्रभावाल्लौकिकं वस्तु निर्देष्टुमपारयन्तः स्वस्ववाच्याद्विलक्षणं ब्रह्मेति यत्तावदुपदिशन्ति, तदेतल्लक्षणावृत्तिमार्ग एव स्थित्वा। ननु किमिति वाच्यवृत्तिमाश्रित्यैव नाभिदधते ? तत्रोक्तमेतत् **न तूच्यते** । शब्दप्रवृत्तिहेतुजात्यादिधर्मरहितत्वादिति । जातिद्रव्यगुणक्रियासम्बन्धा हि शब्दप्रवृत्तिहेतवः । ते तु ब्रह्मणि नैव विद्यन्त इत्यतो सत्यादिशब्दैर्नोच्यते - इति '**ज्ञानशब्देन तल्लक्ष्यते न तूच्यते**' इत्यत्रोक्तं सर्वमत्राप्यनुसंधेयम् । तदेवमन्योन्यनियम्यनियामकत्वं प्राप्य सत्यादिशब्दवाच्याद्विलक्षणं निरतिशयसत्यादिलक्षणं वस्त्वस्ति किञ्चिदिति सूचयित्वा यावद्विरमन्ति ते, तावत् सर्वहेयोपादेयविषयात् विनिवर्तिता वेदतुर्बुद्धिः 'यो वेद निहितं गुहायाम्', 'तस्माद्वा एतस्मादात्मनः' इति च श्रुत्वा स्वप्रत्यगात्मन्येव विश्राम्यति । एवं च सत्यादिवाक्यं स्वान्तर्गतसत्यादिशब्दानाम् अन्योन्यनियम्यनियामकतामापाद्य तैः सूचितं ब्रह्मात्मवस्तु सर्वशब्दातिगमपि स्वयंज्योतिश्चैतन्यस्वरूपं शब्दार्थसंबन्धग्रहणमनपेक्ष्यैव स्वेन केनचिदचिन्त्यमहिम्ना स्वात्मज्ञाननिवर्तनद्वारेणैव बोधयति सुषुप्तपुरुषबोधकवाक्यवत् - इत्यभिप्रायो बोध्यः। यथोक्तं **वार्तिककृद्भिः** 'अपीतकरणग्रामः पुमान् यद्वत्सषुप्तगः । शब्दान्निद्रामपास्याथ यथा वस्त्ववबोध्यते। अगृहीत्वैव संबन्धमभिधानाभिधेययोः। हित्वा निद्रां प्रबुध्यन्ते यथेहापि तथाऽऽत्मनि।। शब्दशक्तेरचिन्त्यत्वादात्मत्वाद्बोधरूपिणः । तत्साक्ष्यत्वाच्च निद्राया विद्मस्तं मोहहानतः ॥ (बृं. वा. ४-४-६९६, ६९७, ६९८) इति । अतोऽतर्कणीयमित्येतावता न दृष्टमप्येतदनादरणीयम्। न हि दृष्टेऽनुपपन्नं नामेति॥

यस्मादेवेत्थं श्रुतिरपि वेद्यवेदितृवेदनादिभेदं निवर्तयन्त्येव स्वतःसिद्धं ब्रह्म वेदितुः प्रत्यगात्मत्वेन बोधयत्यविषयतया, न त्वभिधानाभिधेय लक्षणवाक्यधर्मस्वीकारेण, अत एव सूत्रवाक्योक्तस्य परप्राप्तिलक्षणस्य फलस्य निरपेक्षपरप्राप्तिपरत्वमुपपद्यत इति मन्वान आह - **इत्यतः इति** । 'यतो वाचो निवर्तन्ते' (२-९) इत्यादिश्रुत्युक्तदिशा ब्रह्मणोऽपदार्थत्वं सिद्धं भवति नीलोत्पलादिवाक्यवैसादृश्यं चेत्यर्थः । यद्यपि स्वस्मिन्नध्यारोपित-घटपटादिविकल्पात्मना प्रत्ययवेद्यत्वं पदार्थत्वं च दृष्टं ब्रह्मणः, तथापि स्वेन

पारमार्थिकेनाद्वितीयेन रूपेण वाङ्मनसाप्राप्यमेव तदिति हि श्रुतेरभिप्रायः। अतोऽपदार्थत्वं ब्रह्मणः । अपि च नीलमुत्पलम् इति वाक्यं नीलेतरभेदमुत्पले, उत्पलेतरभेदं वा नीले बोधयतीत्येके; नीलोत्पलपदार्थसंसर्गं बोधयतीत्यपरे । ब्रह्मणि तु प्रत्यस्तमितसर्वविशेषे भेदस्य संसर्गस्य वा नास्त्येवावकाश इत्यवाक्यार्थतापि सिद्धं भवति अनुभवैकगम्यत्वं च, यथाहुर्**वार्तिककाराः** 'भेदसंसर्गहीनत्वात् पदवाक्यार्थतात्मनः । दुःसंभव्याऽत आत्मायमात्मनैवानुभूयते ॥' (बृ.वा. १-४-१४०८) इति सर्वमवदातम् ॥

## ब्रह्मणो हार्दे व्योम्नि वेद्यत्वम्

**१७. तद् यथाव्याख्यातं ब्रह्म यो वेद विजानाति निहितं स्थितं गुहायाम्। गूहतेः संवरणार्थस्य । निगूढा अस्यां ज्ञानज्ञेयज्ञातृपदार्थाः - इति गुहा बुद्धिः । गूढौ अस्यां भोगापवर्गौ पुरुषार्थौ - इति वा । तस्यां परमे प्रकृष्टे व्योमन् व्योम्नि आकाशे अव्याकृताख्ये । तद् हि परमं व्योम । 'एतस्मिन् खल्वक्षरे गार्ग्याकाशः' (बृ. ३-८-११) इत्यक्षरसंनिकर्षात् । 'गुहायां व्योमन्'[१] इति वा सामानाधिकरण्यात् अव्याकृताकाशमेव गुहा । तत्रापि निगूढाः सर्वे पदार्थास्त्रिषु कालेषु। कारणत्वात्, सूक्ष्मतरत्वाच्च । तस्मिन् अन्तर्निहितं ब्रह्म । हार्दमेव तु परमं व्योम -**

१. 'व्योम्नि' आ ॥

इति न्याय्यम्। विज्ञानाङ्गत्वेन[१] व्योम्नो विवक्षितत्वात् । 'यो वै स बहिर्धा पुरुषादाकाशः', 'यो वै सोऽन्तःपुरुष आकाशः', 'योऽयमन्तर्हृदय आकाशः' (छां. ३-१२-७, ८, ९) इति श्रुत्यन्तरात् प्रसिद्धं हार्दस्य व्योम्नः परमत्वम् । तस्मिन् हार्दे व्योम्नि या बुद्धिर्गुहा तस्यां निहितं ब्रह्म । तद्वृत्त्या[२] विविक्ततया उपलभ्यत इति । न ह्यन्यथा विशिष्टदेशकालसम्बन्धोऽस्ति ब्रह्मणः । सर्वगतत्वात्, निर्विशेषत्वाच्च॥

३५. व्योमशब्दस्याव्याकृतपरत्वेन व्याख्यानम् -

ब्रह्मविदाप्नोति परमिति सूत्रेऽविशेषेण निर्दिष्टस्य ब्रह्मणः स्वरूपविशेषो निर्दिष्टो लक्षणवाक्येन । तस्य च सत्यादिलक्षणत्वेन व्याख्यातस्य, इदानीं वेदनप्रकारविशेषः प्रदर्श्यत इत्याह - **'तद्यथा व्याख्यातम्'** इत्यादिना **'तस्मिन्नन्तर्निहितं ब्रह्म'** इत्यन्तेन। गुहू संवरणे इत्यस्य धातोरर्थानुगमाद् गुहाशब्दस्य बुद्धिरित्यर्थो लभ्यते निगूढा अस्यां ज्ञानज्ञेयज्ञातृपदार्था इति । बुद्ध्युपाधिसंबन्धान्निरस्तनानात्वस्यापि ब्रह्मणो ज्ञातृज्ञेयादिरूपेणाभिव्यक्तिः । अतस्तेषां परमार्थरूपं निगूह्य मृषा विभक्तरूपेण तान् दर्शयतीति सा गुहाशब्दव्यपदेश्या भवति । 'गुहाहितम्' (क. १-२-१२) 'आत्मानमन्विच्छ गुहां प्रविष्टम्' (मो.ध. १७५-३८) इत्दादि श्रुतिस्मृतिदर्शनात्। **गूढावस्यां भोगापवर्गौ पुरुषार्थौ** इति वा सा गुहा स्यात् । बुद्ध्या हि शास्त्रसंस्कृतया साधनमध्यवसाय

१. अस्यानन्तरम् 'उपासनाङ्गत्वेन' इत्यधिकम् आ ॥

२. 'तद्व्यावृत्त्या' इति वा ॥

तदनुष्ठानेन त्रिवर्गं वा, अपवर्गं वा पुरुषोऽश्नुत इति कृत्वा । तस्यां गुहायां यत्परमं व्योम भूताकाशापेक्षया - पृथिव्यादीनामाकाशान्तानां बाह्यं बाह्यं निराकृत्य परं परं पूर्वपूर्वव्यापकं सूक्ष्मतरं परिगृह्य ब्रह्मलोकान्तम्, सूत्राधिगमानन्तरं 'यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाशे तदोतं च प्रोतं च' (बृ. ३-८-४) इति सूत्रात्मकं जगदव्याकृताकाशे त्रिष्वपि कालेषु वर्तत इत्युक्त्वा 'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च' (बृ. ३-८-११) इत्यव्याकृतसमनन्तरं निर्विशेषमक्षरमेव निर्दिष्टमित्यतोऽक्षरस्य संनिकृष्टतरमितरकार्यापेक्षया तदव्याकृतमिति तत् 'परमं व्योम' इत्यभिधानमर्हति। तदेवं गुहायां बुद्धौ यदन्तरव्याकृताख्यं परमं व्योम तस्मिन् कारणत्वोपाधिमपि निरस्य ब्रह्म निहितं यो वेद तस्य वक्ष्यमाणं फलमिति वेदनप्रकारविशेषाख्यानमिदमित्यर्थः ॥

अथवा 'यो वेद निहितं गुहायां परमे व्योमन्' इति गुहारूपे परमाकाशेऽव्याकृते यो वेद इति सामानाधिकरण्यव्यपदेशमाश्रित्य साक्षादव्याकृताकाशमेव गुहाशब्देन निर्दिष्टमिति व्याख्यातव्यम् । तस्यां ह्यव्याकृतरूपगुहायां यथोदाहृतश्रुतिप्रामाण्येन भूतं भवद्भविष्यच्चेति सर्वं जगत् त्रिषु कालेषु सृष्टिस्थितिप्रलयेषु स्थितमिति तत्रापि सर्वे पदार्था निगूढाः । तस्मिन् परमे व्योम्नि अव्याकृताख्ये यो वेद ब्रह्म निहितं तस्यैतत्फलमिति वेदनवाक्यार्थः ॥

## ३६. हार्दाकाशमेव परमं व्योमेति द्वितीयं व्याख्यानम् -

यथोपस्थापितं च व्याख्यानं यद्यपि नासङ्गतम्, तथापि तु कतृत्वभोक्तृत्वातीतसर्वसाक्षित्वेनैव ब्रह्मानन्दमयास्यान्तर्विज्ञेयमित्युपदेष्टुत्तर-ग्रन्थसमालोचनेन बुद्धिगुहायामेव वेदितव्यमिति वैयाधिकरण्यसंबन्ध एव स्वीकृतः साधीयानिति मत्वाऽऽह - **हार्दमेव तु परमं व्योमेति न्याय्यमिति** । कोऽसौ न्यायो यस्मादनपेतमिदं व्याख्यानमिति ? तत्राह - **विज्ञानाङ्गत्वेन व्योम्नो विवक्षितत्वात्** इति । अत्र हि 'यो वेद' इति ब्रह्मविज्ञानं प्रकृत्य तदुपायत्वेन 'गुहायां परमे व्योमन्' इत्युच्यते । तेनावगम्यते बुद्धिगुहात्र हार्दे व्योम्नि स्थितैवाभिप्रेतेति । एवं च सति 'हृदि ह्येष आत्मा' (प्र. ३-६), 'स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृद्यमिति तस्माद्धृदयम्' (छां.८-३-३) 'कतम आत्मेति

योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' (बृ. ४-३-७) इत्यादिश्रुतिभिरात्मानं हृदयावच्छिन्नाकाशे दर्शयन्तीभिरस्यैकवाक्यता भवतीति भावः । अत्र 'विज्ञानाङ्गत्वेनोपासनाङ्गत्वेन' इति क्वचिदुपलभ्यमानोऽपपाठः । वस्तुतन्त्रज्ञानप्रकरणत्वादुपासनाङ्गत्वानुपपत्तेर्व्योम्नः । नन्वस्मिन् पक्षे हार्दव्योम्नः परमत्वं कथमुपपाद्यतामिति ? तत्र श्रुत्यन्तरप्रसिद्धिमुत्तरत्वेनावतारयति **'यो वै स बहिर्धा'** इत्यादिना **'योऽयमन्तर्हृदयआकाशः'** इत्यन्तेन । छान्दोग्यवाक्यानां प्रतीकग्रहणमिदम् । तत्र हि गायत्र्याख्यब्रह्मण उपासनं प्रकृत्य बाह्याकाशः, पुरुषान्तराकाशः हृदयाकाश इति चाकाशं त्रेधा विभज्य हृदयाकाश एव चेतः समाधानं कर्तव्यमिति 'तदेतत्पूर्णमप्रवर्ति'ति स्तुतत्वात् तस्य परमत्वमवगतम् । तदिहापि सत्यादिलक्षणब्रह्मविज्ञानाङ्गत्वेनोपदिदिक्षितत्वाद् हार्दव्योम्नः परमत्वं न्यय्यमिति भावः । अस्मिन् पक्षे **'हार्दे व्योम्नि या बुद्धिर्गुहा तस्यां निहितं ब्रह्म'** - इति योजना कर्तव्या । बुद्ध्युपाधिसंबन्धाद्धि तद्ब्रह्म कर्तृभोक्तृत्वेन प्रतीयत इति तत्रैव ब्रह्मणो वेद्यत्वमुपदिशतीति । कथं तर्हि ब्रह्म बुद्धिगुहायां निहितत्वेनोपदिश्यते । न हि तत्कर्तृ भोक्तृ वा तथ्यत इति । अत आह - **तद्वृत्त्या विविक्ततया उपलभ्यत** इति। संस्कृतबुद्धिवृत्त्युपलभ्यत्वमेव बुद्धौ निहितत्वं ब्रह्मणः, न तु तत्र निक्षिप्तत्वम् । तत्रोपलभ्यत्वं च तद्विविक्तसाक्षित्वेन निश्चेयत्वम् 'प्रतिबोधविदितं मतम् ।' (के. २-४) इतिवत्, न तूपलब्ध्या विषयीक्रियमाणत्वम्। 'यन्मनसा न मनुते' (के. १-६), 'अप्राप्य मनसा सह' (२-९) इत्यादिश्रुतिविरोधप्रसङ्गात् - इत्यभिप्रायः । ननु हृदये निहितमिति यथाश्रुतमेव किं न स्यादिति ? अत आह - न ह्यन्यथा इति। ब्रह्म हृदये स्थितमित्येतन्नोपपद्यते । कालाकाशादिकारणस्य तस्य हृदयदेशसंबन्धानुपपत्तेः, सर्वगतस्य च तस्य हृदयमात्रपरिच्छिन्नत्वानुपपत्तेश्च । किञ्च, निर्विशेषं ब्रह्मेह लक्षितं सत्यादिवाक्येन । न च नित्यनिरस्तसर्वविशेषस्य देशविशेषाधेयत्वं चिन्तयितुमपि शक्यते । तस्माद् वेदितुः परमार्थस्वरूपत्वेन विविक्ततया संस्कृतमनोगम्यत्वमेव निहितं गुहायामित्यनया वाचोयुक्त्या शिष्यत इत्यर्थः ॥

## ३७. परमव्योमशब्दस्य साक्षिचैतन्यपरता -

अन्यथापि चायं परमव्योमशब्दार्थो शक्यव्याख्यान इति भाति । कथम् ?

गुहायाम् उक्तनीत्या आत्मनि क्रोडीकृतभोगापवर्गायां बुद्धौ यत् परमं व्योम बुद्धिसाक्षितया स्थितम्, तत्र यथोक्तलक्षणं ब्रह्म निहितं स्वरूपेण स्थितं यो वेद, तस्यैतत्फलमुक्तमिति । न हि बुद्धेः प्रत्यगात्मभूतं सत्यज्ञानादिलक्षणाद् ब्रह्मणोऽन्यत् प्रतीयते । अतो यथोक्तसत्यादिवाक्यस्थपदार्थनिरूपणेन अनृताचेतना-परिच्छिन्नानात्मनो व्यावृत्य यत्स्वबुद्धेः प्रत्यक्तमं व्योम वीक्ष्यते-तद्धि बुद्धिसाक्षित्वात् भूताकाशबुद्ध्याकाशयोरुभयोरपि व्यापकमिति कृत्वा परमाकाशः - तस्मिन्नेव साक्षिचैतन्यतत्त्वे विदिते सत्यादिलक्षणं ब्रह्म विदितं स्यादित्यर्थो गुहानिहितवाक्यस्य । परमात्मन्यपि व्योमशब्दपर्याय आकाशशब्दः प्रयुक्तः श्रुत्यन्तरे 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' (बृ. २-१-१७) इत्यत्र । अत एव **वार्तिककारा आहुः** 'गुहायां परमे व्योमन् वस्तुवृत्तमपेक्ष्य वा । सत्यादि-लक्षणान्नान्यद्धियः प्रत्यक्प्रतीयते ॥ सत्याद्यर्थविरुद्धेभ्यः सम्यग्व्यावृत्तधीर्यतिः । धियः प्रत्यक्प्रविश्याथ सत्यात्मानं प्रपश्यति । तस्मादुपाय सिद्ध्यर्थं बुद्धेः प्रत्यक्प्रवेशनम् । गुहायां परमे व्योमञ्श्रुतिरस्मानतोऽन्वशात् ॥' (तै.वा. २-११- १२- १३) इति । इत्थं यद्भगवत्पादचरणनिरन्तरस्मरणबलात्प्रतिभातम्, तदप्युपहारीकृतमत्र वेदान्तार्थव्याख्यानकोविदेषु वात्सल्येन परीक्षणार्थमित्यलं विस्तरेण ॥

## ब्रह्मविद्याफलम्

**१८. स एवं ब्रह्म विज्ञानन् किम् इति ? आह-अश्नुते भुङ्क्ते सर्वान् निरवशेषान्[१] कामान् भोगान्[२] इत्यर्थः । किम् अस्मदादिवत् पुत्रस्वर्गादीन् पर्यायेण? नेत्याह-सह युगपत् एकक्षणोपारूढानेव एकया उपलब्ध्या[३] सवितृप्रकाशवन्नित्यया ब्रह्मस्वरूपा-**

१. निरवशिष्टान्' आ ॥ २. 'काम्यभोगान्' वा ॥

३. 'एकोपलब्ध्या' इत्यतो वरमेष एवादृतः पाठः ॥

व्यतिरिक्तया याम् अवोचाम 'सत्यं ज्ञानमनन्तम्'[१] इति । एतत् तदुच्यते 'ब्रह्मणा सह' इति । ब्रह्मभूतो विद्वान् ब्रह्मस्वरूपेणैव सर्वान् कामान् सह अश्नुते । न यथा[२] उपाधिकृतेन स्वरूपेण आत्मनो[३] जलसूर्य-कादिवत् प्रतिबिम्बभूतेन सांसारिकेण धर्मादिनिमित्तापेक्षान् चक्षुरादिकरणापेक्षांश्च कामान्[४] पर्यायेण अश्नुते लोकः, कथं तर्हि ? यथोक्तेन प्रकारेण सर्वज्ञेन सर्वगतेन सर्वात्मना नित्यब्रह्मात्मस्वरूपेण धर्मादिनिमित्तानपेक्षान् चक्षुरादिकरणनिरपेक्षांश्च[५] सर्वान् कामान् सहैव[६] अश्नुत इत्यर्थः । विपश्चिता मेधाविना सर्वज्ञेन । तद्धि वैपश्चित्यं यत् सर्वज्ञत्वम् । तेन सर्वज्ञस्वरूपेण ब्रह्मणा अश्नुते इति । इतिशब्दो मन्त्रपरिसमाप्त्यर्थः ॥

३८. फलवाक्यस्थपदानां संबन्धः -

इत्थं ब्रह्मस्वरूपविशेषं तद्वेदनप्रकारं च विशदय्य यथोक्तलक्षणं ब्रह्म

---

१. 'अनन्तम्' इति नास्ति वा ॥ २. 'तथा यथा' वा ॥

३. 'आत्मना' इति आ ।

४. 'सर्वान् कामान्' इति (वा ॥) पाठे सर्वशब्दोऽधिकः ॥

५. 'करणानपेक्षांश्च' वा ॥ ६. एवशब्दो नास्ति वा ॥

प्रोक्तप्रकारेण विदितवतः फलं परप्राप्तिमपि विशदयन् प्रश्नमुत्थाप्योत्तरयति **'स एवं ब्रह्म विजानन् किमिति ? आह'** इत्यादिना । 'स सर्वान् कामान् विपश्चिता ब्रह्मणा सह अश्नुते' इति वाक्यस्थपदानां योजना । तत्र स इत्यनेन प्रकृत एवंवित् परामृश्यते। 'अश्नुते' इति व्याप्तिकर्मणो धातोरुत्पन्नस्य, ज्ञानेन व्याप्नोति भुङ्क्ते, अनुभवतीत्यर्थः । 'सर्वान् इत्यत्र संकोचकारणाभावात्, निरवशेषाः कामाः - काम्यन्त इति कर्मसाधनग्रहणेन - यावन्तो यत्र कुत्रचित्, यदाकदाचित् संभाव्यमाना भोगा गृह्यन्ते । सह इति युगपदर्थको निपातः । 'ब्रह्मण विपश्चिता' इति सर्वज्ञब्रह्मरूपेणेत्यर्थः । एवं च ब्रह्मविद्यावतः ब्रह्मस्वरूपावाप्तिः, युगपदेव सर्वदेशकालस्थितसर्वकामभोगश्च फलमिति वाक्यार्थः संपद्यते ॥

## ३९. अत्र सहशब्दो न सार्थपर्यायः -

ब्रह्मणा सह तेन सार्धं सर्वान् कामान् अश्नुत इति तु नार्थः । विदुषः पराग्भूतस्य सत्यादिलक्षणत्वासंभवे, अद्वितीयत्वस्यैव लक्षणवाक्यार्थत्वेन स्वीकार्यत्वात्, 'यो वेद निहितं गुहायाम्' इति वेदितुः प्रत्यगात्मत्वेनैव वेद्यत्वेनोपप्रदर्शितत्वाच्च ब्रह्मणः। अतो युगपदित्यर्थ एव सहशब्दस्येत्यभिप्रेत्य सर्वकामाप्तिप्रकारं प्रश्नपूर्वकं व्याचष्टे **'किमस्मदादिवत्?** इत्यादिना ॥

## ४०. सर्वकामावाप्तिविषये शङ्कासमाधाने -

ननु ब्रह्मणः प्राप्तव्यभोग एव नास्ति तावत् । आप्तकामत्वात् । तत्कथं तद्रूपेण विदुषः सर्वकामावाप्तिरुच्यते ? कामप्रयुक्तस्य हि कर्मसु प्रवृत्तिस्तत्फलावाप्तिवार्ता वा । न च कामादयः प्रवर्तकदोषाः सन्ति ब्रह्मणि, येन कर्मफलावाप्तिः शङ्क्येतापीति चेत् । न । उक्तोत्तरत्वात् । आप्तकामत्वादेव ब्रह्मणस्तदात्मभूयंगतस्य विदुषोऽपि स्वात्मन्येवावस्थानं न फलान्तरावाप्त्यर्थं प्रवृत्तिः ; एषैव तु परप्राप्तिरित्युक्तोत्तरमेतदुपनिषद्भाष्यारम्भे, इत एवाऽऽकृष्य । तथा च श्रुत्यन्तरम् - 'अथाऽकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामः' (बृ. ४-४-६) इति। यस्याऽऽत्मनो नान्यत्कामयितव्यं भवति, स आत्मकामत्वात् आप्तकामः, अत एव स निष्कामः, अत एव चाकामः - इति श्रुतेरर्थः । तदेवं विद्यया

अविद्यानिवृत्तौ स्वात्मन्येवावस्थानं परप्राप्तिर्नाम । सैव प्राप्तिः सर्वान् कामानश्नुत इति वाचोयुक्त्या प्रदर्श्यते । न तु कर्मणा फलावाप्तिः । अतो न विरोधः । एवं च ब्रह्मणोऽद्वैतत्वज्ञापनाय प्रवृत्तत्वादुपनिषदः, यथैव वेदितृविद्यावेदविभागनिरासाय ब्रह्मविदाप्नोतीति वेदित्रादित्रिपुटीगर्भवाक्यस्योपादानम्, तथैव कामयितृकामकाम्यविभागनिरासाय 'सोऽश्नुते सर्वान् कामान् सह' इति त्रिपुटीगर्भवाक्यस्योपादानम्, न तु कामयित्रादिभेदप्रतिपादनार्थमित्यवधेयम् ॥

तदिदमाह सह **युगपदेकक्षणोपारूढान्** इत्यादिना । यद्यपि ब्रह्मणि कालो नास्ति, अद्वितीयत्वात् । नापि विविधकामानाम् उपलब्धृत्वम्, अविकारित्वात् । तथा च ब्रह्मप्राप्त एकक्षणोपरूढान् सर्वान् कामानश्नुत इत्युक्तिर्नाञ्जसीव । तथाप्यविदुषां यथा विविधकामानां पर्यायेण भोगः, तथा नास्येति यथाप्राप्तनिषेधमात्राभिप्रायत्वान्न दोषः ॥

अथवा ये सर्वे कामा अज्ञानामनेकसाधनसाध्याः, ते सर्वे अस्यैव विदुषः । सर्वात्मत्वापन्नत्वादस्य - इति ब्रह्मविद्यास्तुतिरियम् 'अश्नुते सर्वान् कामान् सह' इतीत्यनवद्यम् । कथं पुनः, किञ्च कारणम् अज्ञो लोकः कामान् पर्यायेणाश्नुत इत्येतद्विवृणोति विदुषि तत्प्राप्तिनिषेधार्थम् - **न यथोपाधिकृतेने**त्यादिना । लोको ह्यज्ञो जनोऽविद्याप्रत्युपस्थापितकार्यकरणसङ्घातादिकमात्मात्मीयत्वेन प्रतिपन्नः बुद्ध्युपाधिकृतप्रतिबिम्बभूतेन द्रष्ट्रादिस्वरूपेण सांसारिकेण धर्माधर्मादि कृत्वा तत्फलभूतान् कामांश्चक्षुरादिकरणापेक्षांश्च देशकालव्यवहितान् परिच्छिन्नांश्च कामान् यथाकर्मपरिपाकं तत्तदाकारवृत्तिरूपज्ञानेन पर्यायेणैवोपलभते । विध्वस्ताविद्यत्वात् तु कमाकर्मरहितो ब्रह्मभूतो विद्वान् सवितृप्रकाशवत् कूटस्थनित्येन स्वरूपभूतेन सर्वगतेन सर्वात्मभूतेनैव ज्ञानेन बुद्धिवत् स्वात्मनि विकारमननुभवन्नेव सर्वान् कामान् स्वात्माव्यतिरिक्तान् युगपदेव प्रकाशयन् भुङ्क्ते । धर्मादिनिमित्तानपेक्षत्वात्, चक्षुरादिकरणनिरपेक्षत्वाच्च तत्स्वरूपभूतज्ञानस्येति वैषम्यम् । तथा हि विज्ञायते 'न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥' (श्वे. ६-८), 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् । अन्यत्र भूताच्च भव्याच्च' (क. १-२-

१४), 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः । स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुग्र्यं पुरुषं महान्तम्॥' (श्वे. ३-११) इत्यादिवेदान्तेभ्यः । अस्मिंस्तु व्याख्याने यद्यपि भोक्तव्याः कामा विदुषः स्वरूपाद्ब्रह्मणो व्यतिरेकेण न सन्ति, तथापि तदनन्यतयापि न विवक्ष्यन्ते प्रतीयमानस्ववपुषेति तत्वान्यत्वाभ्यामनिर्वचनीयाः स्वीक्रियन्त इति मन्तव्यम् ॥

## ४१. विपश्चित्त्वविशेषणार्थः -

तदेवं ब्रह्मस्वरूपेणैव ज्ञानेनायं विद्वान् सर्वान् कामान् साक्षादुपलभमानोऽश्नुते नाविद्याकल्पितोपाधिधर्मभूतेन परिच्छिन्नविषयेण कालाद्यपेक्षेणेति प्रदर्शनार्थं विपश्चिद्विशेषणमित्याह - **विपश्चिता मेधाविना सर्वज्ञेनेति । एतद्विवरणम् तद्धि वैपश्चित्यं यत्सर्वज्ञत्वमिति ।** कूटस्थनित्येन युगपत् सर्वावभासनक्षमेण ज्ञानेन सर्वकामोपलब्धृत्वमेव 'ब्रह्मणा विपश्चिता' इति समानाधिकरणनिर्देशेन द्योत्यत इत्यर्थः ॥

## ४२. मन्त्रार्थोपसंहारः -

इतिशब्दो मन्त्रसमाप्त्यर्थः । 'तदेषाभ्युक्ता' इति प्रारभ्य 'ब्रह्मणा विपश्चिता' इत्येवंपर्यन्तं 'ब्रह्मविदाप्नोति परम्' इति सूत्रव्याख्यानम् इति द्योतयितुम् इतिशब्दः प्रयुक्त इत्यर्थः ॥

## ग्रन्थशेषसंबन्धः

**१९. सर्व एव वल्ल्यर्थो 'ब्रह्मविदाप्नोति परम्' इति ब्राह्मणवाक्येन सूत्रितः । स च सूत्रितोऽर्थः संक्षेपतो मन्त्रेण व्याख्यातः । पुनस्तस्यैव विस्तरेणार्थनिर्णयः कर्तव्य इति उत्तरस्तद्वृत्तिस्थानीयो ग्रन्थ आरभ्यते - 'तस्माद् वा एतस्मात्' इत्यादिः ॥**

४३. कृत्स्नवल्ल्यर्थः -

भाष्यं स्पष्टार्थम् । पुनस्तस्यैवेति, तस्यैव वल्ल्यर्थस्य सूत्रितस्य मन्त्रेण यथाव्याख्यातस्य चेत्यर्थः । कृत्स्नवल्ल्यर्थस्तु वृत्तवर्तिष्यमाणसार एवं संगृहीतोऽन्यत्र - 'सत्यं ज्ञानमनन्तं च रसादेः पञ्चकात् परम् । स्यामदृश्यादिशास्त्रोक्ताहं ब्रह्मेति निर्भयम्' (उप. सा. १७-६२) इति ॥

**तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी ॥२॥**

## ब्रह्मण आनन्त्यम् सत्यत्वं च

२०. तत्र च 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्युक्तं मन्त्रादौ । तत्कथं सत्यं (ज्ञानम्?)[१] अनन्तं चेति ? अत आह । तत्र[२] त्रिविधं हि आनन्त्यम् देशतः, कालतः, वस्तुतश्च - इति। तद्यथा देशतोऽनन्त आकाशः । न हि देशतस्तस्य परिच्छेदोऽस्ति । न तु कालतश्च आनन्त्यम् वस्तुतश्चाऽऽकाशस्य । कस्मात् ? कार्यत्वात् । नैवं ब्रह्मण आकाशवत् कालतोऽपि अन्तवत्त्वम् । अकार्यत्वात् । कार्यं हि वस्तु कालेन परिच्छिद्यते । अकार्यं च ब्रह्म।

---

१. ज्ञानशब्दस्त्यक्तो वा ॥　　२. नात्स्ययं शब्दो वा ॥

तस्मात् कालतोऽप्यानन्त्यम्। तथा वस्तुतः। कथं पुनर्वस्तुत आनन्त्यम्? सर्वानन्यत्वात्। भिन्नं हि वस्तु वस्त्वन्तरस्य अन्तो भवति। वस्त्वन्तरबुद्धिर्हि प्रसक्ताद्[1] वस्त्वन्तरात् निवर्तते। यतो यस्य बुद्धेर्निवृत्तिः, स तस्यान्तः। तद्यथा गोत्वबुद्धिरश्वत्वान्निवर्तत इति, अश्वत्वान्तं गोत्वमिति अन्तवदेव भवति। स चान्तो भिन्नेषु वस्तुषु दृष्टः। नैवं ब्रह्मणो भेदः। अतो वस्तुतोऽपि आनन्त्यम्। कथं पुनः सर्वानन्यत्वं ब्रह्मण इति? उच्यते। सर्ववस्तुकारणत्वात्। सर्वेषां हि वस्तूनां कालाकाशादीनां कारणं ब्रह्म। कार्यापेक्षया वस्तुतोऽन्तवत्वम् इति चेत्। न। अनृतत्वात् कार्यवस्तुनः[2]। न हि कारणव्यतिरेकेण कार्यं नाम वस्तुतोऽस्ति यतः कारणबुद्धिर्विनिवर्तेत। 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां. ६-१-४) एवं सदेव सत्यम् इति श्रुत्यन्तरात्॥

तस्मात्, आकाश[3]कारणत्वाद् देशतस्ता-

१. 'प्रसक्ता' आ॥ २. 'कार्यस्य वस्तुनः' वा॥
३. 'आकाशादि' वा॥

**वदनन्तं ब्रह्म । आकाशो ह्यनन्त इति प्रसिद्धं देशतः । तस्य चायं कारणम् । तस्मात् सिद्धं देशत आत्मन आनन्त्यम्। न ह्यसर्वगतात् सर्वगतम् उत्पद्यमानं लोके किञ्चिद् दृश्यते । अतो निरतिशयम् आत्मन आनन्त्यं देशतः । तथा अकार्यत्वात् कालतः । तद्भिन्न-वस्त्वन्तराभावाच्च वस्तुतः । अत एव निरतिशयसत्यत्वम्॥**

## ४४. उत्तरग्रन्थः सत्यानन्तत्वोपपादनार्थः -

अथ 'तस्माद्वा एतस्मात्' इत्यादिसमनन्तरग्रन्थस्य तात्पर्यं निश्चित्य प्रकथयितुं मन्त्रोक्तमर्थविशेषमनुवदति - **तत्र च सत्यं ज्ञानमनन्तं ब्रह्मेत्युक्तं मन्त्रादौ** इति । तत्र सत्यानन्तविशेषणयोरर्थनिर्णयोऽत्र करिष्यत इत्याह - **तत्कथं सत्यमनन्तं चेत्यत आहेति** । अत्र सत्यानन्तशब्दयोरन्तराले ज्ञानशब्दोऽपि धृतः क्वचित्पाठे दृश्यते । तत्र तदविवक्षितमिति व्याख्येयम् । आनन्त्यशब्दार्थ एव ह्युत्तरग्रन्थे विवृतो दृश्यते; सत्यत्वं चार्थात्सिद्धमित्यतिदेशेनोपसंहरिष्यति । न तु ज्ञानपरामर्शकभाष्यमत्र पश्याम इति । ज्ञानस्य तु विवरणं लक्षणवाक्यभाष्य एव गतमित्युपेक्षितमत्रेति युक्तमुत्पश्यामः॥

## ४५. कालाकाशयोरन्तवत्त्वोपपादनम् -

तत्रानन्तत्वमेव तावदुपपादनायाऽऽदत्ते - **तत्र त्रिविधं ह्यानन्त्यमिति** । तत्रेति सत्यत्वानन्त्ययोर्मध्य इत्यर्थः । आनन्त्यमेव तावद्विव्रियते, तद्विवरणेनैव सत्यत्वं विवृतं भविष्यतीति कृत्वेति भावः । उद्दिष्टमानन्त्यत्रैविध्यं दृष्टान्तोपन्यासेन हृदयमारोपयति - **तद्यथेति** । आकाशो हि सर्वत्र देशेऽस्त्येव, नाऽऽकाशरहितः

प्रदेशो नामास्तीति । आकाशे हि देशस्याभिव्यक्तिः । अतो देशतोऽनन्त आकाश इत्याभिप्रायः । प्राप्तं तर्हि ब्रह्माकाशवदेवानन्तमिति । 'आकाशवत् सर्वगतश्च नित्यः' (?) इति श्रुत्यन्तरात् इत्याशङ्क्याह - **न त्विति** । श्रुत्युक्तं नित्यत्वं तु सापेक्षनित्यत्वपरमिति भावः । यद्यपि कालाकाशौ परस्परविरहेण न दृष्टचरौ, कालेन सहैवाभिव्यक्तिदर्शनादाकाशस्य; तथापि कार्यत्वात् प्रागुत्पत्तेरसत्वावगमात् कालतः परिच्छिद्यत आकाश इति व्यपदेशः । कार्यत्वं तु वक्ष्यमाणश्रुतिप्रामाण्यादिति भावः । एवं वस्तुतः परिच्छेदोऽप्याकाशस्य विद्यते । विनिवर्तते ह्याकाशबुद्धिः कालादिति कृत्वा कालान्तमाकाशमित्यूह्यं प्रदर्श्यमाननीत्यनुसारेण । एवं कालस्यापि कार्यत्वाद् वस्त्वन्तरेण परिच्छेदाच्चान्तवत्वमुपपादनीयम् । ननु कालाकाशयोः कार्यत्वमेव कथम् ? कार्यमात्रं हि कालाधारं देशाधारं चेति स्थितिः । न च कालस्य कालान्तरम् देशस्य देशान्तरं वा आधारत्वेन चिन्तयितुमपि शक्यते । तार्किकशास्त्रविरुद्धश्चायं कालाकाशादीनामपि कार्यत्वाभ्युपगमः । तत्कथं कालाकाशयोः कार्यत्वोक्तिरिति चेत् । 'यावद्विकारं तु विभागो लोकवत्' (वे. सू. २-३-७) इति न्यायेन कालाकाशयोः पृथिव्यादिभ्यो विभक्तत्वात् कार्यत्वोपपत्तिरिति ब्रूमः । न च कार्यत्वस्य आकाशाधारत्वं वा कालाधारत्वं वा नियामको धर्मः । कालाकाशव्यतिरिक्तव्यावहारिककार्यविषयत्वात्तस्य नियमस्य । न चात्र तार्किकविरोधः शङ्क्यः । तार्किकाणां मूलाभावात्, 'आकाशः संभूतः', 'न ह पुरा ततः संवत्सर आस'(बृ. १-२-४) इत्यादिश्रुतिविरोधाच्च भ्रान्तत्वोपपत्तेः । सुषुप्त्याद्यवस्थासु कालाकाशादिविभागाभावस्य सर्वानुभवसिद्ध त्वाच्चानुभवानुसारीदं श्रौतं कालाकाशयोः कार्यत्ववचनमित्यलं निराधारकर्कशतर्कानयनेन ॥

## ४६. ब्रह्मणि त्रिविधानन्त्योपपत्तिः -

तदेवं कार्यभूतयोः कालाकाशयोः परिच्छिन्नत्वे सिद्धे सति तद्विलक्षणस्य ब्रह्मणः कार्यत्वाभावादेव देशतः कालतश्चानन्त्यं निर्विवादं सिध्यतीत्याह - **तस्मात् कालतोऽप्यनन्तमिति** । तथा वस्तुतोऽप्यानन्त्यं प्रतिपादयन् वस्तुनोऽन्तवत्त्वं तावत्स्वविषयकबुद्धिनिवर्तकस्वभिन्नवस्तुबुद्धिप्रसक्तिनिमित्तमित्येतद् विशदयति -

**'भिन्नं हि वस्तु'** इत्यादिना । अयमभिप्रायः । यावदेव हि वस्तुनः स्वरूपविषया धर्मविषया च बुद्धिरनुवर्तते, तावदेव तस्य स्थितिरनुमन्यते लोके । यत्र तु तन्निवृत्तिः स तस्यान्त इत्यध्यवस्यते - इति प्रसिद्धमेतत् । तद्यथा खण्डगोः खण्डत्वलक्षणधर्मविषय बुद्धिर्मुण्डाद्गोर्निवर्तत इति खण्डर्गोर्मुण्डो गौरन्तो भवति गोत्वस्यानुवृत्तावपि तस्मिन् । यस्मात्पुनरश्वादेर्गोत्वबुद्धिरपि निवर्तत, अश्वत्वादिलक्षणभिन्नबुद्ध्याक्रान्तत्वात् तस्य वस्त्वन्तरस्य, स गोत्वस्याप्यन्त इति परिगण्यते । यत्रापि वृद्धे गवि बाल्यबुद्धिविषयतानिवृत्तावपि स एवायं गौरिति बुद्धिः, तत्रापि बाल्यस्यान्तवत्त्वं स्वीक्रियत एव । गोव्यक्तेरभिन्नत्वादेव तु स एवायमिति बुद्धिर्न विहन्यत इति । भिन्नबुद्धिविषयस्य वस्तुनो वस्त्वन्तरान्तत्वं न व्यभिचरतीत्यनवद्यमिति । अस्त्वेतदेवम्; किमतो भविष्यतीति ? तत्राह - **नैवं ब्रह्मणो भेदः । अतो वस्तुतोऽप्यानन्त्यम्** इति । भवेदेतदेवं यदि ब्रह्मणः सर्वानन्यत्वमुक्तं सिध्येत् । तदेव तु कथम् ? इत्याशङ्क्य परिहरति - **कथं पुन**रित्यादिना। अत्र कार्यस्य मिथ्याभूतस्य वस्तुसता ब्रह्मणानन्यत्वं विवक्षितम्, न तु ब्रह्मणः कार्येण - इति सिद्धान्तं स्फोरयन् कार्यसतत्वमजानतः शङ्कामुद्भावयति - **कार्यापेक्षया वस्तुनोऽनन्तत्त्वमिति चेत्** इति । कार्यतो हि कारणबुद्धिरवश्यं विनिवर्तते अतः कार्यत्वान्तं कारणत्वमिति शङ्कितुराशयः । शङ्कां परिहरति स्वाभिसन्धिं प्रकटयन् - **न । अनृतत्वात् कार्यवस्तुन इति** । कार्यवस्तुन इति, वस्तुत्वेनाभिमतस्य कार्यस्येत्यर्थः । यदि हि कार्यं नाम कारणव्यतिरेकेण वस्त्वभविष्यत्, आपत्स्यतापि तर्हि कारणस्य कार्यतोऽन्तवत्त्वम्। न तु तदस्ति । मायामात्रं हि कारणस्य कार्यत्वं नाम । 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां ६-१-४), एवं 'तत्सत्यम्' (छा. ६-८-७) इति विकारस्यानृतत्वोद्घोषणपूर्वकं सत एव ब्रह्मणः सत्यत्वावधारणात् । न च कार्यं नाम प्रमाणैर्निरूप्यमाणं कारणव्यतिरेकेण वस्तुसदुपलभ्यते । व्यभिचरद्रूपत्वात् । अतो ब्रह्मणो नानृतेन कार्येणान्तवत्त्वं शक्यशङ्कमित्यभिप्रायः ॥

तदेवमुपपादितं ब्रह्मणस्त्रिविधमानन्त्यं निगमयति । **तस्मादाकाशकारणत्वादि**त्यादिना **'वस्तुतः'** इत्यन्तेन । अत्र मुद्रितपुस्तकेषु

सर्वत्र आदिशब्दघटित एव पाठ उपलभ्यते 'आकाशादिकारणत्वात्' इति । 'आकाशकारणत्वात्' इत्येव मूले लिखितं स्यादिति तून्नीयते । वाक्यशेषबलात् । वाक्यशेषे ह्याकाशकारणत्वमात्रं देशत आनन्त्ये हेतुतयोपन्यस्तमुपलभ्यत इति । कथमाकाशकारणत्वं हेतुर्देशत आनन्त्ये ब्रह्मण इत्यत्रोपपत्तिमाह - **न ह्यसर्वगतादिति** । असर्वगतात् परिच्छिन्नात् परिच्छिन्नमेव तूत्पद्यमानं लोके दृष्टम् । आकाशश्च सर्वगतत्वेनाभिमतो ब्रह्मणः संभूत इति श्रूयते । तस्मात्तत्सर्वगतत्वोपपादनार्थं ब्रह्मणोऽपि सर्वगतत्वमभ्युपगन्तव्यं भवतीत्यर्थः । नात्र सर्वगतब्रह्मण उत्पद्यमानत्वादाकाशस्य लोके सर्वगतत्वमिति प्रतिपिपादयिषितम्, किं तर्हि आकाशस्य सर्वगतत्वेन प्रसिद्धस्यापि ब्रह्मकार्यत्वात् ब्रह्मण निरतिशयमहता भाव्यम् । ततश्च देशत आनन्त्यं सिद्धमिति संभावनायुक्तिरूपप्रदर्श्यत इत्यनुसंधेयम् । **'तथा अकार्यत्वात्कालत'** इति व्याख्यातम् । तद्भिन्न **वस्त्वन्तराभावाच्च** वस्तुत आनन्त्यमित्युपपादितम्, वस्त्वन्तराभिमतकार्यस्यानृतत्वख्यापनेन । एवं च सर्वथापि निरतिशयमानन्त्यं ब्रह्मण इति सिद्धमित्यभिप्रायः ॥

## ४७. ब्रह्मणो निरतिशयसत्यत्वम् -

तदेवं ब्रह्मणो वियदादिजगत्कारणत्वात्, कार्यस्य चानृतत्वान्निरतिशयमानन्त्यमिति विनिर्णीतम् । निरतिशयसत्त्वमप्युक्तयुक्त्यैव सिध्यतीत्यतिदिशति - **अत एवेति** । यस्य हि देशतः कालतो वस्तुतो वा परिच्छित्तिर्नास्ति तस्याद्वितीयस्य स्वतः परतो वा विकारो न शङ्कनीयो भवति । अत एव च सर्वथा अव्यभिचरत्स्वरूपत्वात् निरतिशयसत्यत्वं सिद्धं भवतीत्यभिप्रायः ॥

## ४८. ब्रह्मणो जगत्कारणत्वमपि मायिकमेव -

अत्र कार्यस्यानृतत्वहेतोरानन्त्योपपादनात् कारणत्वमपि ब्रह्मणि मायिकमेव, न तत्त्वतोऽस्तीत्यभिप्राय आविष्कृतो भवति भगवत आचार्यस्य । अत एव चात्र श्रूयमाणा आकाशादिसृष्टिः, आनन्त्याद्युपपादनेनाऽऽत्मैकत्वबुद्ध्यवतारार्थ-

मुपायमात्रम् इति तिष्ठति । यथोक्तम**भियुक्तैः** - 'सृष्टिर्या चोदितान्यथा । उपायः सोऽवताराय नास्ति भेदः कथञ्चन ।' (मां का. ३-१५) इति । 'सतो हि मायया जन्म युज्यते न तु तत्त्वतः । तत्त्वतो जायते यस्य जातं तस्य हि जायते' (मां का. ३-२७) इति । वार्तिककारैरप्युक्तम् - 'नाभूत्सृष्टिरभूतत्वादभूतं कालहेतुतः । न भविष्यत्यभाव्यत्वादभाव्यं चाक्रियोत्थितेः ॥ नेदानीमद्वितीयत्वात्कौटस्थ्यादात्मनः सदा । भविष्यत्यस्त्यभून्नातो वस्तुवृत्तमपेक्ष्य तु । भविष्यत्यसत्यभूच्चेति यतो वन्ध्यं विशेषणम् । उष्ट्रादिवदणोस्तस्मादविद्यैवात्र कारणम्॥' (तै.वा. २-१४३-१४४, १४५) इति । ब्रह्मणः कालस्यापि हेतुत्वान्न भूतकालसंबन्धः । अतः सृष्टिरभूदितिवक्तुं न युज्यते । तथा 'भविष्यति' इत्यपि न युज्यते वक्तुम् । क्रिया साध्यत्वाभावे सति ब्रह्मणो भाव्यत्वानुपपत्तेः । न चेदानीमप्यस्ति ब्रह्मणि सृष्टिः । कूटस्थनित्याद्वैतस्वभावत्वाद् ब्रह्मणः । तस्माद्ब्रह्मणः सृष्टिरभूत् - इत्यादि कालत्रयविशेषणं व्यर्थम् । परमाणुरस्ति, उष्ट्रत्वात् - इत्यादिपरमाणुसाधकहेतुवत्। ततश्चाविद्यात एव सृष्टिरिति वार्तिकत्रयाभिप्रायः । यथा चेदं तथा प्रतिपादितं **माण्डूक्यरहस्यविवृतौ** - इति तत एवाधिकमवगन्तव्यम् ॥

## आकाशादिसृष्टिः

**२१. 'तस्मात्' इति मूलवाक्यसूत्रितं ब्रह्म परामृश्यते । 'एतस्मात्' इति मन्त्रवाक्येन अनन्तरं यथालक्षितम् । यद्ब्रह्म आदौ ब्राह्मणवाक्येन सूत्रितम्, 'यच्च सत्यं ज्ञानमनन्तं ब्रह्म' इत्यनन्तरमेव लक्षितम्, तस्मादेतस्माद् ब्रह्मणः । आत्मनः आत्मशब्दवाच्यात् । आत्मा हि तत्सर्वस्य । 'तत्सत्यं स आत्मा' (छां. ६-८-७) इति**

**श्रुत्यन्तरात्। अतो ब्रह्म आत्मा । तस्मादेतस्माद् ब्रह्मण आत्मस्वरूपात्, आकाशः संभूतः समुत्पन्नः । आकाशोनाम शब्दगुणः, अवकाशकरो मूर्तद्रव्याणाम् । तस्मादाकाशात् स्वेन स्पर्शगुणेन पूर्वेण च कारणगुणेन[१] शब्देन द्विगुणो वायुः, 'संभूतः' इत्यनुवर्तते । वायोश्च स्वेन रूपगुणेन पूर्वाभ्यां च त्रिगुणोऽग्निः 'संभूतः' । अग्नेः[२] स्वेन रसगुणेन पूर्वैश्च त्रिभिश्चतुर्गुणा आपः 'संभूताः' । अद्भ्यः स्वेन गन्धगुणेन पूर्वैश्च चतुर्भिः पञ्चगुणा पृथिवी 'संभूता' ॥**

### ४९. अद्वितीयब्रह्मण एव जगत्कारणत्वम् -

'तस्मात्', 'एतस्मात्' इति च सर्वनामद्वयस्यार्थं कथयन् श्रुतिं व्याकरोति **'तस्मात्'** इत्यादिना **'समुत्पन्ना'** इत्यन्तेन । - 'ब्रह्मविदाप्नोति परम्' इत्यत्र ब्रह्मशब्देन निर्दिष्टं वस्तु तच्छब्देन परामृश्यते । तदनन्तरं मन्त्रवाक्येन सत्यं ज्ञानमनन्तमिति यथालक्षितं तदेव 'एतस्मात्' इत्यनेन परामृश्यते । तथा च 'तस्मादेतस्मात्' इति यत्सूत्रितमादौ ब्रह्म, यच्च सत्यादिलक्षणवाक्येन लक्षितम्, तस्मादेतस्माद् ब्रह्मण आकाशः संभूतः - इति वाक्यार्थः संपद्यत इत्यर्थः । एवं चाद्वितीयमेव ब्रह्म जगत्कारणतया उपदिश्यत इत्यतोऽद्वितीयब्रह्मानन्यत्वं सर्वस्य जगतः प्रतिपिपादयिषितम् आकाशादिपृथिव्यन्तसंभववाक्येनेत्यभिप्रायः ॥

---

१. 'आकाशगुणेन' वा ॥

२. 'अग्नेश्च' वा ॥

## ५०. ब्रह्मण आत्मत्वम् -

'ब्रह्मण आत्मन' इति सामानाधिकरण्यं वेदितृप्रत्यगात्माभिन्नत्वं ब्रह्मणो द्योतयति । 'यो वेद निहितं गुहायाम्' इति बुद्धिगुहायां वेदितव्यत्वेन ब्रह्मणो निर्देशात्, ब्रह्मणा विपश्चिता रूपेण सर्वान् कामान् समश्नुत इति फलोक्तेश्चैवमर्थोऽवगम्यते। सर्वास्वपि श्रुतिषु ब्रह्मण्यात्मशब्दप्रयोगदर्शनात्, आत्मशब्दस्य च प्रत्यगात्मन्येव निरूढत्वाच्चेत्यभिसंधायाऽऽह - **आत्मा हि तत्सर्वस्येति** । श्रुतिप्रसिद्धं निदर्शयति - **तत्सत्यमिति** । 'तत्सत्यं स आत्मा तत्वमसि' (छां. ६-७-८) इति हि सर्वस्याऽऽत्मा ब्रह्म, तदेव त्वमसि - इति सद्ब्रह्मप्रत्यगात्मनोरभेदः सुस्पष्टं प्रतिपादित**श्छान्दोग्ये** । अतो वेदितुः प्रत्यगात्मभूतादेव ब्रह्मणोऽस्याऽऽकाशादेर्जगत उत्पत्तिरभिप्रेतात्रेति गम्यते । तदेतदाह - **तस्मादेतस्मादित्यादि** । इतश्चैतदेवम्। यतो वक्ष्यत्युदर्के 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते' (२-७) इति ब्रह्माभेदेन प्रतिष्ठां विदुशः - इत्यपि द्रष्टव्यम् । न च ब्रह्मण्यदृश्यत्वादिगुणके स्वात्मभिन्न एव प्रतिष्ठा तत्रोच्यते न त्वात्माभिन्न इति शङ्क्यम् । अदृश्यत्वादीनां हि प्रत्यगात्मभिन्नवस्तुधर्मत्वाङ्गीकारे तद्धर्मकब्रह्मविद्यया न कश्चिदपि पुरुषार्थः स्यादिति ब्रह्मविदाप्नोति परमित्युपक्रमवाक्यमप्रमाणीकृतं स्यात् । तेषामात्मधर्मत्वे तु दृश्यत्वाद्यनात्मधर्मापह्नवेनासंसारित्वमात्मनः प्रतिबोधितं स्यादिति परप्राप्तिप्रतिज्ञासिद्धिः फलं भविष्यति । किञ्च प्रत्यगात्मनोऽन्यस्यैव ब्रह्मणो दृश्यत्वादिनिषेधाय यथोदाहृतश्रुतिप्रवृत्तिरिति चेत् कल्प्यते, तर्ह्यनात्मनस्तस्य ब्रह्मणो दृश्यत्वादिसर्वविशेषरहितस्य निष्प्रमाणकत्वेन शून्यतैव प्रतिपादिता स्यादिति शून्यविज्ञानेनैव परप्राप्तिः प्रतिज्ञाता स्यादित्येवमप्यनिष्टप्रसङ्गः । अत एतद्दोषपरिहाराय प्रत्यगात्मन एव दृश्यत्वाद्यनात्मधर्माध्यासनिवारणेन ब्रह्माभेद उपदिश्यत अभयप्रतिष्ठावाक्येनेत्यङ्गीकरणीयम् । दर्शितश्चैष न्याय **आचार्यैरेवान्यत्र,** 'आत्मनोऽन्यस्य चेद्धर्मा अस्थूलत्वादयो मताः । अज्ञेयत्वेऽस्य किं तैः स्यादात्मत्वे ह्यन्यधीह्नुतिः ॥ मिथ्याध्यासनिषेधार्थं ततोऽस्थूलादि गृह्यताम्। परत्र चेन्निषेधार्थं शून्यतावर्णनं हि तत्' ॥ (उप. सा. ३-२, ३) इति । तदेवं 'यो वेद निहितं

---

१. 'अनात्मत्वे' इति पाठान्तरम् ॥

गुहायाम्' इत्युपक्रमवाक्येन दृश्यत्वादिनिषेधकाभयप्रतिष्ठाश्रुतेरैकार्थ्ययापि 'ब्रह्मण आत्मन' इति प्रत्यगात्माभिन्नत्वमेव विवक्षितमित्यवगम्यत इत्यलं प्रपञ्चेन॥

## ५१. ब्रह्मण आकाशादिकारणत्वम् -

**'तस्मादेतस्माद्ब्रह्मण आत्मस्वरूपादाकाश संभूत'** इत्यादि भाष्यं प्रत्यगात्मनोऽद्वितीयब्रह्मत्वप्रतिबोधनार्थं तस्मादेवाऽऽकाशादिसृष्टिरुच्यत इत्यभिप्रायकम् । एवं च यद्यपि 'तस्मादाकाशात् स्वेन स्पर्शगुणेन पूर्वेण च कारणगुणेन शब्देन द्विगुणे वायुः संभूतः' इत्यादियथाश्रुतवाक्ये आकाशादेरेवोत्तरोत्तरभूतकारणत्वं शिष्टमिति भाति, तथापि परमात्मन एवाऽऽकाशादिभावापन्नाद् वाय्वादिसंभवोऽभिप्रेत इति गम्यते । तथैव भाष्यान्तरे विस्पष्टकथनाच्च । इत्थं च पूर्वपूर्वस्वभावस्योत्तरस्मिन्नुत्तरस्मिन् कार्ये दृष्ट्वा तत्तत्स्वभावत्वमुत्तरस्योत्तरस्याभिमन्यते लोकः । वस्तुतस्तु यथा उत्तरोत्तरं कार्यं पूर्वपूर्वस्वभावकम्, तथा जगदपि ब्रह्मस्वभावकम् ; यथा च पूर्वं पूर्वं कारणं नोत्तरोत्तरकार्यस्वभावकम्, तथा ब्रह्मापि न जगत्स्वभावकम् - इत्यस्मिन्नर्थे पर्यवस्यति 'कारणगुणेन शब्देन द्विगुणो वायुः' इत्यादिभाष्यम् । **यथोक्तमुपदेशसाहस्त्र्याम्** 'सूक्ष्मताव्यापिते ज्ञेये गन्धादेरुत्तरोत्तरम् । प्रत्यगात्मावसानेषु पूर्वपूर्वप्रहाणतः । वाय्वादीनां यथोत्पत्तेः पूर्वं खं सर्वगं तथा । अहमेकः सदा सर्वश्चिन्मात्रः सर्वगोऽव्ययः॥' (उप.सा. ९-१, ३) इति । अत्र गन्धादेरित्यस्य स्थाने भूम्यादेरिति पाठान्तरमप्यस्ति। तदभावेऽपि भूम्यादेरित्येवार्थोऽवसेयः। तन्त्रान्तर इव गुणगुणिभेदस्याविवक्षितत्वात् सिद्धान्ते । यथाहुराचार्या **बृहदारण्यकभाष्ये** 'परमाणुर्नाम पृथिव्या गन्धघनायाः परमसूक्ष्मोऽवयवो गन्धात्मक एव । न तस्य पुनर्गन्धवत्वं नाम शक्यते कल्पयितुम्' (बृ.भा. ४-२-३०) इति ॥

## ५२. सृष्टिक्रमचिन्तनावश्यकता -

अत्र चाऽऽकाशादीनि श्रुतानि सूक्ष्माण्येव न तु स्थूलानीति ज्ञेयम् । 'द्विगुणो वायुः', 'त्रिगुणोऽग्निः' इत्याद्यक्षराञ्जस्यार्थम् । स्थूलान्येव चेदभिप्रैष्यन्त, तदा

तेषां पञ्चीकृतत्वात् प्रत्येकं पञ्चगुणत्वमवक्ष्यदिति । प्राणसृष्ट्यनन्तरं चेयं भूतसृष्टिरेष्टया । 'एतस्माज्जायते प्राणः' (मुं २-१-३), 'स प्राणमसृजत्' (प्र. ६-४) इत्यादिभिः श्रुतिभिरैकार्थ्याय । ननु किमर्थमित्थमश्रुतं कल्पनीयम् ? न हि सृष्टौ तात्पर्यमपि श्रुतेरङ्गीक्रियते येन क्रमोऽप्येष्टव्यो भवेत् । तथा हि **छान्दोग्यभाष्यम्** 'अविवक्षित इह सृष्टिक्रमः । सत्कार्यमिदं सर्वम्, अतः सदेकमेवाद्वितीयम् इत्येतद्विवक्षितम्' (छां. भा. ६-२-३) इति । **वार्तिककाराश्चाहुः** 'प्रक्रिया नियमो नापि पुंव्युत्पत्तिप्रधानतः । प्रतिश्रुति विगीतिश्च प्रकियाणां समीक्ष्यते । यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि । सा सैव प्रक्रियेह स्यात्साध्वी सा चानवस्थिता ॥' (बृ. वा. १-४-४०१, ४०२) इति । उदाहृता च ननु त्वयाप्यभियुक्तोक्तिः 'उपायः सोऽवताराय' (मां.का. ३-१५) इति, 'अविद्यैवात्र कारणम्' (तै.वा. २-४५) इति च । बाढम् । परं तु, आत्मैकत्वप्रतिबोधनायोपायत्वेन श्रुता, आविद्यक्यपि सृष्टिर्न क्रमानपेक्षेत्यास्थातुं शक्यते । न खलु स्वप्नेऽपि जातो गोवत्सो जातुचित् स्वमातुः पूर्वं लब्धजन्मेति कल्प्यते । अस्ति चात्र भाष्योक्तिः क्रमस्य विवक्षितत्वे। तद्यथा, **बृहदारण्यकभाष्ये** तावत् प्राणादपां सृष्टिमुक्त्वा अभिहितम् 'अत्राऽऽकाशप्रभृतीनां त्रयाणामुत्पत्त्यनन्तरमिति वक्तव्यम् । श्रुत्यन्तरसामर्थ्यात्, विकल्पासंभवाच्च सृष्टिक्रमस्य' (बृ.भा. १-२-१) इति । **आथर्वणे च** 'तपसा चीयते ब्रह्म' इति मन्त्रव्याख्यानावसरे 'यद्ब्रह्मण उत्पद्यमानं विश्वं तदनेन क्रमेणोत्पद्यते, न युगपद् बदरमुष्टिप्रक्षेपवदिति क्रमनियमविवक्षार्थोऽयं मन्त्रः' (मु. १-१-८) इति। तथा तद्ब्रह्मणोऽपि कलासृष्टिप्रस्तावे 'यस्मिन्नेताः षोडशकलाः प्रभवन्तीत्युक्तः पुरुषविशेषणार्थः कलानां प्रभवः, स चान्यर्थोऽपि श्रुतः केन क्रमेण स्यादित्यत इदमुच्यते' (प्र.भा. ६-३) इति । 'अविवक्षित इह सृष्टिक्रमः' इति भाष्यवाक्यं तु त्रिवृत्करणप्रदर्शनेन सदेकमेवाद्वितीयमिति प्रतिपादनव्यग्रत्वात् श्रुतिर्वियदादिसृष्टिं नाचष्टे - इत्येतदभिप्रायकत्वेन नेतव्यम् । 'इह' इति विशेषणात् । तत्रैव च 'यथा तु त्रिवृत्कृते त्रीणि रूपाणीत्येव सत्यम्, तथा पञ्चीकरणेऽपि समानो न्यायः ' इत्याकाशादि सृष्टिवाक्यसंगानदर्शनाच्च न क्रमविवक्षाव्याहतिः । **वार्तिककारैस्तु** सृष्टिप्रक्रिया विविधा विगीताभासा च दृश्यते श्रुतिषु । अतो यया यया पुमान् प्रत्यगात्मैक्ये व्युत्पाद्यते सा सैव प्रक्रिया तत्र साध्वीति मन्तव्या । न तु

श्रुत्यन्तरप्रक्रियासाम्याभावमात्राद्धातव्या - इत्येतावदुक्तम् । न पुनः क्रमव्यवस्था नैव स्वीकरणीयेत्यपि । अतो न दोषः । तस्मादद्वितीयात्मप्रतिपादनार्थापि श्रुता सृष्टिः किंक्रमा बोध्यत इति चिन्तनीयमेवैतत् ।

नन्वेवमपि चिन्तित एव तावत् सृष्टिव्यवस्थाक्रमो **वेदान्तमीमांसायाम्**, किं पुनरत्राधिकं कर्तव्यमवशिष्यत इति ? नैष दोषः । मन्दमतिप्रतिसमाधानार्थत्वात् । यद्यपि सृष्टिक्रमं व्यवस्थापयांबभूवैव भगवान् सूत्रकारः, तथापि 'आथर्वणे तु समाम्नायक्रममात्रं करणानां भूतानां च' (सू.भा. २-३-१५) इत्यादि भाष्यं दृष्ट्वा मन्दमतीनां केषाश्चित् व्यामोह उपजायेत सृष्टौ न विवक्षितः क्रम इति, व्याहतवचनो भाष्यकार इति वा । प्रस्थानभेददर्शनाच्च । भिन्नं हि व्याख्यानप्रस्थानमत्र विषये दृश्यते भाष्यकारीयात् । तद्यथा बृहदारण्यकभाष्यव्याख्याता तावत् आकाशादीनां हिरण्यगर्भात् सृष्टिमूरीकृत्य तैत्तिरीयबृहदारण्यकयोः पञ्चीकृतभूतानां सृष्टिः परामृष्टेति मन्यते । एवम् मुण्डके 'एतस्माज्जायते प्राणः' इत्यस्य व्याख्याता प्राह - 'पाठक्रमोऽयमर्थक्रमेण बाध्यते । 'गताः कलाः पञ्चदश प्रतिष्ठाः' इति भूतेषु लयश्रवणेन प्रणानां भौतिकत्वावगमात् भूतोत्पत्त्यनन्तरं प्राणोत्पत्तिर्द्रष्टव्या' इति । प्रश्नभाष्यव्याख्यातापि 'स प्राणमसृजत' इत्यत्र भूतसृष्ट्यनन्तरं प्राणमसृजत इति भाष्याभिप्रायं व्याख्यत् । सूत्रभाष्ये तु प्राणानां भौतिकत्वेऽभौतिकत्वे वा स्पष्टोक्तिर्नोपलभ्यते । 'अथ त्वभौतिकानि करणानि' (सू.भा. २-३-१५) इति विकल्पाश्रयणाभासवाक्यदर्शनात् । छान्दोग्यभाष्ये त्रिवृत्करणन्यायं पञ्चीकरणेऽतिदिश्याप्यत्र तेन वियदादीनामुत्तरोत्तरमेकैकगुणवृद्धि पूर्वपूर्वस्योत्तरोत्तरापेक्षया सूक्ष्मताव्यापिते स्वीकृते इति प्रदर्शितमधस्तात् । अतः श्रुतिभाष्यवाक्यानां संगानप्रदर्शनेन सृष्टिश्रुत्यर्थनिर्मलत्वाय प्रयतितव्यमवशिष्यते॥

## ५३. मुण्डकश्रुतिमवलम्ब्य सृष्टिश्रुतिवाक्यार्थनिर्णयः -

अतोऽत्रास्मदभिप्रायः किञ्चिदुपह्रियते स्वबोधपरिशोधनार्थं वेदान्तार्थनिर्णयाभियुक्तनिकषोपलेषु । **आथर्वणे** तावद्विवक्षित एव क्रम इति भाष्यकाराभिप्रायोऽध्यवसेयः । 'अनेन क्रमेणोत्पद्यते न युगपद् बदरमुष्टिप्रक्षेपवत्' इति विस्पष्टमुदीरणात् । न च 'समाम्नायक्रममात्रं तत्' इति सूत्रभाष्येण तद्व्याहन्यते।

अन्यार्थत्वात् । 'एतस्माज्जायते प्राणः' (मुं. २-१-३) इति मन्त्रविषयं हि तद्वाक्यम्। करणानामभौतिकत्वपक्षे 'भूतोत्पत्तिक्रमो न करणैर्विशेष्यते' (सू. भा. २-३-१५) इत्येतावति चोपक्षीणं तद्भाष्यम् । प्रथमं करणान्येवोत्पद्यन्ते भूतापेक्षया, भूतान्येव वा उत्पद्यन्ते करणापेक्षया - इत्येतन्निर्णयाय नालम् 'एतस्माज्जायत' इति वाक्यम् इतीयन्मात्रे हि तात्पर्यवद् वाक्यं न करणानां भौतिकत्वेऽभौतिकत्वे वा व्याप्रियते। युक्तं चैतत् । 'एतस्माज्जायत' इति वाक्यस्य कथमप्राणममनश्चाक्षरम् ? इत्युपपादनार्थं प्रस्तुतत्वात् तत्रोत्पत्तिक्रमेऽप्यैदम्पर्यास्तित्वे प्रमाणाभावात् । न तु तथास्ति तात्पर्यान्तरं शक्यकल्पनं 'तपसा चीयते' (मुं - १-१-१) इत्यादिवाक्यस्य। अक्षरस्य भूतयोनित्वस्यैव प्रपञ्चने प्रवृत्तत्वात् तस्य । किञ्च 'यदि तावद्भौतिकानि करणानि', 'अथ त्वभौतिकानि' (सू.भा. १-३-१५) इति नैवायं करणानां भौतिकत्वाभौतिकत्वविकल्पः, उदितानुदितहोमादिक्रियास्विव भूतवस्तुविषये विकल्पासंभवात्; किं तर्हि, करणानां भौतिकत्वस्य गौणमुख्यान्यतरत्व-विवक्षानिर्धारणाभिप्रायकः । तथा हि प्राणोत्पत्तिमेवाधिकृत्य विमर्शने प्रवृत्तो विविच्य प्राह - 'यदि तावन्मुख्यमेवैषाम् अन्नादिमयत्वम्, ततो वर्तत एव ब्रह्मप्रभवत्वम् । अथ भाक्तम्, तथापि ब्रह्मकर्तृकायां नामरूपव्याक्रियायां श्रवणात् 'येनाश्रुतं श्रुतं भवति' इति चोपक्रमात्, 'ऐतदात्म्यमिदं सर्वम्' इति चोपसंहारात्, श्रुत्यन्तरप्रसिद्धेश्च, ब्रह्मकार्यत्वप्रपञ्चनार्थमेव मनआदीनामन्नादिमयत्ववचनम् इति गम्यते' (सू.भा. २-४-४) इति । अत्र हि ब्रह्मकार्यत्वं प्राणानां श्रुत्यन्तरप्रसिद्धं छान्दोग्येऽपि भाक्तान्नमयादित्ववाक्येन विवक्षितमित्युच्यते । 'यदि तावन्मुख्य-मेवैषामन्नमयादित्वम्' इति त्वेवं व्याख्येयम् । एतत्कल्पे नैव शङ्कासमुन्मेषः । सिद्धमेव ह्यन्नादीनां ब्रह्मकार्यत्वे तत्कार्याणामपि ब्रह्मप्रभवत्वम् - इति कृत्वा चिन्तैवेयमिति। न हि 'एतस्माज्जायते प्राणः' 'स प्राणमसृजत' इत्यन्यत्र सुस्पष्टश्रुतमपि क्वचिदश्रणं बाधितुमुत्सहत इति । तदेवं क्रमस्य विवक्षितत्वे निराबाधे 'तपसा चीयते ब्रह्म' इति श्रुतः क्रमो नान्यत्राश्रवणाद् विहन्तव्यो भवतीति स्थितम्।

तदत्र मुण्डकोपनिषदमेवाऽऽश्रित्य सर्वेषां सृष्टिवाक्यानामेकवाक्यता संपादयितव्येति यथाप्रतिभानं तत्र प्रयतामहे भाष्याक्षरानुसारेण । तत्र (१) 'तपसा चीयते ब्रह्म' इति । सृष्टिविषयालोचनेन जदगुत्पिपादयिषया प्राणिकर्मवशात्तदुन्मुखं

भवति ब्रह्म बीजमिवाङ्कुरमुत्पिपादयिषत् इत्यर्थः । तदेतदिहापि वक्ष्यते 'स तपोऽतप्यत' (२-६) इति । (२) 'ततोऽन्नमभिजायते' । ततः एवमुपचितात् सर्वज्ञात्सर्वशक्तेर्ब्रह्मणः, अन्नमभिजायते, अविद्याकल्पितनामरूपबीजशक्तिरूपम् अव्याकृतं व्याचिकीर्षितावस्थां समापद्यत इत्यर्थः । तदिदं बृहदारण्यके प्रकारान्तरेणोच्यते 'आप एवेदमग्रआसुः' (बृ. ५-५-१) इति ; स्पष्टमेव च 'तद्धेदं तर्ह्यव्याकृतमासीत्' (बृ. १-७-७) इति । इहापि वक्ष्यति 'असद्वा इदमग्र आसीत्' (२-७) इति । (३) अन्नात् प्राणः । एवंरूपादव्याकृतादन्नाख्यात् **प्राणः**; यो ब्रह्मणो ज्ञानशक्तिप्रधानतया **हिरण्यगर्भ** इत्युच्यते, क्रियाशक्तिप्रधानतया वायुः सूत्रम् इति च । एतस्यैव प्राणस्य हिरण्यगर्भापराभिधानस्य प्रथमविकारत्वात् 'महद्यक्षं प्रथमजम्' (बृ. १-४-१) इति श्रुत्यन्तरे निर्देशः । वक्ष्यतीहापि 'ब्रह्म ज्येष्ठम्' (२-४) इति । (४) एतस्माच्च प्राणात् 'मनः', संकल्पविकल्पाद्यात्मकं समष्ट्यन्तःकरणतत्वम् अभिव्यज्यते, 'तन्मनोऽकुरुत' (बृ. १-२-१) इति श्रुत्यन्तरनिर्दिष्टम्। इहापि च मनोमयप्रकाशकश्लोके 'यतो वाचो निवर्तन्ते' (२-४) इति । प्रश्नोपनिषदि तु मनस्तत्त्वं 'श्रद्धा' शब्देनैवोपलक्षितं वेदितव्यम् । मनःकार्यत्वात् श्रद्धयाः । अत्रैवेन्द्रियसृष्टिरपि द्रष्टव्या । मनः समानयोगक्षेमत्वादितरकरणानाम्। 'मनः सर्वेन्द्रियाणि च' (मुं २-१-३) इत्युत्तरत्र सहपाठात् । श्रुत्यन्तराच्च 'प्रजापतिर्वा इदमग्र आसीत् स आत्मानमैक्षत स मनोऽसृजत तन्मन एवासीत्तदात्मानमैक्षत तद्वाचमसृजत' (?) इति । 'इन्द्रियं मनः' (प्र. ६-४) इति च ब्राह्मणम् । (५) अतो मनसः **'सत्यम्'** मूर्तामूर्तात्मकं भूतपञ्चकं सूक्ष्मम् । यदिह 'सच्च त्यच्चाभवत्' (२-६) इति वक्ष्यते, यच्च **बृहदारण्यके** 'तस्यार्चत आपोऽजायन्त' इत्यबुपलक्षितम् विवृतं चेह 'आत्मन आकाशः संभूत' इत्यादिना। यद्यपि भूतानां सूक्ष्माणामेकैकगुणत्वं वक्तुं युक्तम्, तथापि पूर्वपूर्वकारणानुगतत्वसूचनार्थं 'द्विगुणो वायुः' इत्यादिभाष्यमित्यविरोधो द्रष्टव्यः । यथोक्तं वार्तिके 'वाय्वादिषु तु यः शब्दः खस्थं तमविचक्षणाः । वाय्वादीनामिवेक्षन्ते स्रग्गुणानिव भोगिनः ॥' (तै.वा. २-५५) । यस्तु **प्रश्नोपनिषद्भाष्ये** 'कर्मफलोपभोगसाधनाधिष्ठानानि कारणभूतानि महाभूतान्यसृजत' इति महाभूतशब्देन व्यपदेशः, स तूत्क्रान्त्युपाधिलक्षण-पञ्चीकृतस्थूलभूतकारणत्व विवक्षयेत्यदोशः । सूक्ष्माण्यपि हि भूतानि महान्त्येव,

सर्वविकारव्यापकत्वात् । तथा हि निर्वचनं कृतं दृश्यते गीताभाष्ये (गी.भा. १३-५) तेषां क्षेत्रस्वरूपत्वनिर्धारणावसरे । अत्रान्यदपि यद्वक्तव्यं तस्य प्रश्नोपनिषद्**टिप्पणे** विस्तरः। (६) तस्मादेतस्मात् 'सत्याख्याद्भूत-पञ्चकादण्डक्रमेण सप्तलोकाः ।' इति भाष्यम् । तत्र **विराट्**सृष्टिरप्युक्ता वेदितव्या। तदर्थं पञ्चीकृत**स्थूलभूतसृष्टिश्च** । 'सत्यं ब्रह्म प्रजापतिम्' (बृ. ५-५-१) इति श्रुतेः । छान्दोग्ये श्रुतस्य त्रिवृत्करणस्य पञ्चीकरणोपलक्षणत्वात्, प्रजापतिर्देवान् (बृ. ५-५-१) इति विराजैव लोकदेवतासृष्टेरन्यत्र श्रवणाच्च । अण्डोत्पत्तिक्रमस्तु 'सा पृथिव्यभवत्' (बृ. १-२-१), 'तमेतावन्तं कालमबिभः' (बृ. १-२-४) 'असदेवेदमग्र आसीत् ..... तदाण्डं निरवर्तत' (छां. ३-१९-१) इत्यादिश्रुतिभाष्यतोऽधिगन्तव्यः । उत्तरत्र 'अन्नं ब्रह्मोपासते' इतीहाप्यनुपदमेव वक्ष्यमाणोपासनोपपत्तेश्चेत्यलं प्रसक्तानुप्रसक्तेन चिन्तितेन । (७) तेषु लोकेषु - विशेषतो मनुष्यलोके 'कर्मानुबन्धीनि मनुष्यलोके' (गी. १५-२) इति स्मरणात् - **कर्माणि** । इहापि वक्ष्यते मनुष्यसृष्टिः 'अन्नात् पुरुषः' इति । (८) **कर्मसु चामृतम्**। कर्मसु निर्वर्तितेषु यत्फलं शास्त्रनिर्दिष्टम् । इत्येवमाथर्वणोप-निषदमवलम्ब्य सृष्टिक्रमवाक्यानामेकस्यार्थस्य प्रतिपादकत्वेन समन्वयः प्रदर्शितः। 'अन्नमयं हि सोम्य मनः' (छां. ६-५-४) इत्यादिवचनं तु व्यष्टिपिण्डेषूत्पद्यमानानां मनआदीनां त्रिवृत्कृतान्नाद्युपचितत्वप्रदर्शनेन तदव्यतिरेकं, तथा च ब्रह्मकार्यत्वं, प्रदर्शयितुं भाक्तमुक्तमिति समुदाहृतभाष्याद्गम्यत इति न तद् यथोपवर्णित-समष्टिप्राणादेरुत्पत्तिक्रमस्य बाधनाय प्रभवतीति सर्वमनाकुलम् । तदेतत्सर्वमनुसंधाय **वार्तिककारैरपि** 'अद्भ्यः पृथिवी' इत्येतदन्तं व्याख्यायाभिहितम् 'दिगादिकारणो देवः पञ्चभूतशरीरभृत् । सर्वोऽस्मीत्यभिमानेद्धो विराडेवमजायत । अस्मात्पूर्वं भवेत्सूत्रं तस्मिन्सति विराड्यतः । श्रुत्यन्तरानुरोधाच्च विज्ञानमिति लिङ्गतः॥ व्युत्थाप्यान्नमयादिभ्यो ह्यन्नं प्राणमितीरणात् । उपासनोपदेशाच्च सूत्रमत्र विवक्षितम्॥' (तै.वा. २-१५८, १५९, १६०) इति । तदेतत्सर्वं त्रय्यन्तव्याख्याननिष्णातानां यद्यपि पिष्टपेषणमिव, तथापि मन्दमति-प्रतिबोधनार्थमस्माभिर्विवृतमिति क्षन्तव्योऽयं प्रसक्तानुप्रसक्तप्रपञ्चः ॥२॥

**पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात् पुरुषः । स वा एष पुरुषोऽन्नरसमयः। तस्येदमेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । अयमात्मा । इदं पुच्छं प्रतिष्ठा ॥३॥**

## अन्नमयात्मा

२२. पृथिव्याः ओषधयः । ओषधीभ्योऽन्नम् । अन्नाद् रेतोरूपेण परिणतात्, पुरुषः । शिरःपाण्याद्याकृतिमान्। स वै एष पुरुषः, अन्नरसमयः अन्नरसविकारः। पुरुषाकृतिभावितं हि सर्वेभ्योऽङ्गेभ्यस्तेजः संभूतं रेतोबीजम् । तस्माद् यो यो[1] जायते सोऽपि तथा पुरुषाकृतिरेव स्यात् । सर्वजातिषु जायमानानां जनकाकृतिनियमदर्शनात्॥

५४. अन्नात् सर्वप्राणिनां सृष्टिः -

इयता ग्रन्थेन भूरादिलोकपर्यन्ता सृष्टिरुदिता वेदितव्या । अथेदानीं भूलोके मनुष्यसृष्टिमनुक्रामन् तदर्थम् ओषधिसृष्टिमाचष्टे **पृथिव्या ओषधय** इत्यादि । अत्र 'ओषधयः' इति तरुलतागुल्मादिसर्वोपलक्षणार्थम् । ओषधीभ्योऽन्नम् इति च जङ्गमप्राण्यदनार्हं सर्वं गृह्यते । **'अन्नात्पुरुषः'** इत्यत्र बृहदारण्यकादिश्रुत्यन्तरोप-

---

१. 'यो जायते वा' ॥

वर्णितदिशा पशुपक्षिमृगादीनां सृष्टिरपि संग्राह्या। श्रुतिस्त्वत्र विशिष्य मनुष्यसृष्टिमेवाऽऽह कारणविशेषाद् वक्ष्यमाणात् ।

## ५५. अन्नाद्रसादिक्रमेण पुरुषोत्पत्तिः -

तच्चान्नं केन प्रकारेण पुरुषोत्पत्तौ कारणं भवतीत्येतदभिव्यञ्जयन् व्याचष्टे **रेतोरूपेण परिणतादिति** । जग्धादन्नाद्रसः, रसाद्रक्तम्, ततो मांसं मांसाच्च मेदः, तस्माच्च मेदसोऽस्थीनि, तेभ्यो मज्जा, ततश्च रेतः इत्येवंक्रमेण रेतोरूपेण परिणतात्, स्त्रीशोणितसंयुक्तात् क्रमेण कललबुद्बुदादिरूपमास्थाय **पुरुषः शिरःपाण्याद्याकृतिमान्** संभवत्यीर्थः । अत्र च श्रुत्यन्तरोपवर्णितम् 'अन्नमशितं त्रेधा विधीयते' इत्यादि 'अन्नमयं सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्' इत्यन्तं (छां ६-५-१, २, ३) सर्वमनुसंधेयम् । तथा च स्थूलसूक्ष्मोभयविधशरीरोत्पत्तिः पञ्चीकृतान्नादेवेति फलिष्यति । भाष्ये शिरःपाण्याद्याकृतिमत एव तु पुरुषस्य ग्रहणे बीजं त्वन्नमयस्यैवाऽऽत्मनः कोशशोधने सर्वादौ प्रस्तूयमानत्वादित्यनुपदमेव स्फुटीभविष्यति । उक्तक्रमेण यद्रेतोबीजमुत्पद्यते 'तदेतत्सर्वेभ्योऽङ्गेभ्यस्तेजः संभूतम्' (ऐ. २-१) इति श्रुत्यन्तरात् पुरुषाकृतिभावितमेव तत्साररूपं जातमित्यतः **पुरुषाकृतिरेव** जायमानः सर्वोऽपि । अयं च न केवलं मनुष्यजातावेव नियमः, किं तर्हि तिर्यगादिजन्तुष्वपीत्याह - **सर्वजातिष्वति** । एवं च जायमानस्य सर्वस्यापि जन्तोः प्रत्यगात्माभिन्नब्रह्मण एव जातत्वात्तदनन्यत्वेऽपि तत्तदन्नपरिणाम - विशेषभूतजनकाङ्गभावितोत्पत्तिमत्वात्, तत्तच्छरीरस्य तत्तदाकृतिविशेषवत्वम् । तत्तच्चराचरशरीरजननमरणादिभ्य एव तु जायते म्रियते इत्यादिलौकिकव्यपदेशः प्राणिविषयो भाक्तः । घटसंभवनाशादिप्रयुक्तघटाकाशादि-संभवनाशादिव्यपदेशवत् - इत्युक्तं भवति । यथोक्तं **संप्रदायविद्भिः** 'मरणे संभवे चैव गत्यागमनयोरपि । स्थितौ सर्वशरीरेषु ह्याकाशेनाविलक्षणः ॥ (गौ.का. ३-१) इति ॥

## ५६. ब्रह्मणोऽन्नमयादित्वमविद्याकृतम् -

'अन्नात्पुरुषः' इति श्रुत्या मनुष्यादिप्राणिसामन्यमुक्तं प्रदर्शनार्थं पुरुषं गृहीत्वा। तत्र पुरुषेणैव सर्वा जीवसृष्टिरुपलक्ष्यते नान्येन केनाचिदित्यत्र कोऽभिप्राय

इत्याविष्कुर्वती श्रुतिरन्वारम्भेणाऽऽह - **'स वा एष'** इत्यादि । तदेतत् व्याचष्टे **'स वा एष पुरुषोऽन्नरसमयोऽन्नरसविकारः'** इत्यादिना । अत्र स इति ब्रह्माभिन्नः प्रत्यगात्मा परामृश्यते य 'आत्मन आकाशः संभूतः' इति निर्दिष्टः । तथा परामृष्टं स्मारयति 'वै' इति । यः स मूलकारणात्मा निर्दिष्टः, स एवायमविद्यया इत्थमन्नरसमयत्वादिपरिच्छिन्नपञ्चकोशधर्मतां प्राप्त इत्यर्थः । तदिदम् अनुपदमेव शिरःपक्षादिकल्पनया अपरिच्छिन्नरूपोपदेशेन च श्रुत्यैवाऽऽविष्क्रियत इति कृत्वा भाष्यकारैर्नात्रोद्घाटितम् । **वार्तिककारैस्तु** सर्वमेतत् स्फुटीकृतम् 'मूलात्मानं सशब्देन स्पृष्ट्वा तत्स्मृतयेऽथ वै । कोशात्मतां समापन्न एष इत्यभिधीयते ॥ अविद्ययाऽतदर्होऽपि रज्जुसर्पात्मतामिव । कोशपञ्चकतां यातस्तमनुक्रोशतीव वै ॥' (तै. वा. २-२४९, २५०) इति ॥

**२३. सर्वेषामपि अन्नरसविकारत्वे ब्रह्मवंश्यत्वे च अविशिष्टे कस्मात् पुरुष एव गृह्यते ? प्राधान्यात् । किं पुनः प्राधान्यम् ? कर्मज्ञानाधिकारः । पुरुष एव हि शक्तत्वात्, अर्थित्वात् , अपर्युदस्तत्त्वाच्च कर्मज्ञान-योरधिक्रियते । 'पुरुषेत्वेवाऽऽविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सतीत्येवंसम्पन्नः । अथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानम्' (ऐ. आ. २-३-१) इत्यादिश्रुत्यन्तरदर्शनात् । स हि पुरुष इह विद्यया अन्तरतमं ब्रह्म संक्रामयितुमिष्टः ।**

**५७. पुरुषस्यैव विशेषतो ग्रहणे श्रुत्यभिप्रायः -**

नन्वेवं सर्वेषामपि जीवानामन्नरसविकारत्वं समानम्, ततश्च जननमरणादिव्यवहारः सर्वेषामपि भाक्त एव, घटाकाशादीनां जननविनाशादिव्यवहारवत् । वस्तुतस्तु सर्वेऽपि जीवा ब्रह्मण एव जातत्वाद् ब्रह्मवंश्यास्तदनन्या एवेति स्थिते पुरुष एव कमसाधारणं धर्ममालक्ष्य श्रुतिः 'अन्नात्पुरुषः' इति ब्रूते ? - इत्याक्षिपति **'सर्वेषामपि'** इत्यादिना **'गृह्यते'** इत्यन्तेन। तत्र परिहारमाह **प्राधान्यादिति** । अथ किं पुनः प्राधान्यमस्य ? - इति पृच्छायामाह कर्मज्ञानाधिकार इति । कथं पुरुषस्यैवाधिकारः कर्मसु ज्ञाने वा इत्यत्राधिकारविदां समयमाह - **'पुरुष एव** हीत्यादि । अत्र 'अपर्युदस्तत्वात्' इत्यनन्तरम् 'अर्थी विद्वान् समर्थः' इत्यधिकं पठ्यते क्वचित् । तदभावेऽपि नार्थन्यूनतेति न गृहीतोऽस्माभिः स पाठः । शास्त्रं ह्यविशेषप्रवृत्तमपि मनुष्यानेवाधिकरोति तेषां शक्तत्वादिकारणात्। न हि पश्वादयः शास्त्रीयं कर्म कर्तुं शक्ताः, तत्फलेनार्थिनो वा शास्त्रार्थवैदुष्यासंभवात्तेषां पुरुषवत् - इत्यधिकारिविशेषणाभिप्रायः । पुरुषशब्दोऽत्राधिकारिणं त्रैवर्णिकमाह वेदपूर्वककर्मज्ञानाधिगमस्यैव प्रकृतत्वादित्यभिसंधिराह - **अपर्युदस्तत्वाच्चेति।** 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' (तै.सं ७-१-१-६) इत्यादिवचनप्रामाण्यात्, उपनयनादिसंस्कारवैधुर्याच्च शूद्रस्य वैदिके कर्मणि ज्ञाने वा नास्त्यधिकारः । पर्युदस्तत्वात् । इतिहासपुराणाधिगमपूर्वकं तु ज्ञानं तस्यापि न दण्डवारितमित्यप- **शूद्राधिकरणभाष्ये** स्थितमित्यन्यदेतत् । तदेवं पुरुष एव ब्रह्मविद्यायामधिकृत इत्यतोऽत्र 'अन्नात् पुरुषः' इति विशेषवचनम् इत्यभिप्रायः । यद्यपि ब्रह्म सर्वेषामप्यात्मभूतम्, तथापि विज्ञानाधिकारस्तु पुरुषस्यैवेत्यस्मिन्नर्थे **ऐतरेयश्रुतिवचन**मुदाहरति प्रमाणत्वेन ' - **पुरुषे त्वेवाऽऽविस्तरामात्मा'** इत्यादि **'अभिविज्ञानम्'** इत्यन्तम् । यद्यपि चेतनाचेतनपदार्थाः सर्वेऽपि परमात्मनः कार्यभूता एव, तथापि तस्याविर्भावस्तारतम्येनैव भवति तेषु । तद्यथा अचेतनेषु तावत्सत्तामत्रस्याविर्भावो दृश्यते । स्थावरेषु रसलिङ्गेन प्राणभृत्सु च रसश्चितं चेति लिङ्गद्वयेन चाधिकाधिकमात्माविर्भावो भवतीति गम्यते । प्राणभृत्स्वपि पुरुषे

त्वेव तदितरापेक्षया आविस्तराम् आत्मा । यतः स विज्ञानपूर्वकमेव वदति, पश्यति, प्रत्यभिजानाति च बाह्यवस्तूनि इहपरलोकौ शास्त्रसाहाय्येन विज्ञाय साधनानुष्ठानपूर्वकं तं तं पुरुषार्थं प्राप्तुमिच्छति । तदितरे तु प्राणिनः केवलमशनायापिपासादिवेदानाप्रेरिता एव सद्यः फले लौकिककर्मणि प्रवर्तन्ते । नैव तेषां विज्ञानपूर्वकं लौकिका प्रवृत्तिरपि, कैव कथा शास्त्रीयसाधनानुष्ठानस्येति श्रुत्यर्थः । ननु तथापि किं प्रयोजनमत्र विशेषेण पुरुषग्रहणस्येत्याशङ्क्याऽऽह **स हीत्यादि** । उक्तविशेषणः पुरुष एव ब्रह्मविद्यायामधिकृतो यस्मात् तस्मात्तमेवात्र पुरुषं सर्वान्तरात्मभूतं परं ब्रह्म संक्रामयितुं विज्ञाप्य प्रापयितुमिच्छति । अतो युक्तमेव विशिष्याभिधानम् अन्नात्पुरुष इतीत्यभिप्रायः ।

**२४. तस्य च बाह्याकारविशेषेष्वनात्मसु आत्मभाविता बुद्धिः, अनालम्ब्य विशेषं[१] कञ्चित् सहसा अन्तर[२]तमप्रत्यगात्मविषया निरालम्बना च कर्तुमशक्येति, दृष्टशरीरात्म-सामान्यकल्पनया शाखाचन्द्रनिदर्शनवत् अन्तःप्रवेशयन् आह - 'तस्येदमेव शिरः' । तस्यास्य पुरुषस्य अन्नरसमयस्य, इदमेव शिरः प्रसिद्धम् । प्राणमयादिषु अशिरसां शिरस्त्वदर्शनात्, इहापि तत्प्रसङ्गो मा भूदिति 'इदमेव शिरः' इत्युच्यते । एवं पक्षादिषु योजना । अयं दक्षिणो बाहुः, पूर्वाभिमुखस्य दक्षिणः पक्षः । अयं सव्यो बाहुः, उत्तरः पक्षः ।**

---

१. 'विना आलम्बनविशेषं' वा ॥ २. 'आन्तर वा ॥

**अयं मध्यमो देहभागः, आत्मा अङ्गानाम् । 'मध्यं ह्येषामङ्गानामात्मा' (ऐ. आ. २-३-५) इति श्रुतेः । 'इदम्' इति नाभेरधस्तात् यदङ्गम्, तत् पुच्छं प्रतिष्ठा । प्रतितिष्ठति अनया इति प्रतिष्ठा। पुच्छमिव पुच्छम् । अधोलम्बन-सामान्यात् । यथा गोः पुच्छम् । एतत् प्रकृत्योत्तरेषां प्राणमयादीनां रूपकत्वसिद्धिः। मूषानिषिक्तद्रुतताम्रप्रतिमावत् ।**

**शरीरस्य शिरःपक्षपुच्छादिकल्पने प्रयोजनम् -**

यद्येवं वेदिता पुरुषो विद्यया अन्तरतमं ब्रह्म संक्रामयितुमिष्टः, तर्हि तदेव ब्रह्म तस्याऽऽत्मत्वेन साक्षात्प्रदर्श्यताम् किमनेन अनपेक्षितपक्षपुच्छादि-प्रकल्पनप्रयासेनेत्याशङ्कां परिहरति - **'तस्य चे'** त्यादिना **'अन्तःप्रवेशयन्नाह'** इत्यन्तेन । अयमभिप्रायः । सत्यम्, अन्तरतमं ब्रह्मैवाऽत्रात्मत्वेनोपदिदिक्षितमिति। तथापि बुभुत्सोः पुरुषस्य बुद्धिर्बाह्यसाकारविषयेष्वेवाऽनात्मसु आत्मभाविता, अनाद्यविद्यावशात् । न हि बाह्यदर्शनभाविता बुद्धिः सहसा ततो व्यावर्त्य अन्तरतमं ब्रह्म संक्रामयितुं शक्यते । तथा अविद्याकल्पितनामरूपाकारविशेषेष्वेवाभिनिविष्टा सा बुद्धिश्चिरकालादिति न निराकारे ब्रह्मणि सहसा निधापयितुं शक्यते । किञ्च विषयभूतेष्वेवाऽनात्मसु आत्मत्वेनालम्बमाना तिष्ठति सा बुद्धिर्भूयसः कालादिति न सहसा निरालम्बनीकृत्य अन्तरतमे प्रत्यगात्मभूते विषयिणि ब्रह्मणि निष्ठां प्रापयितुं शक्यते । इत्यतः प्रथमतः शिरःपाण्याद्याकृतिमद्देहमेवाऽऽलम्ब्य बाह्यसाकारविषयेभ्यः परावर्त्यते । तदनु ततोऽन्तरं प्राणम्, ततोऽन्तरतरं मनआदिकमिति क्रमेण सर्वान्तरे प्रत्यगात्मनि प्रतिष्ठाप्य निरालम्बनीक्रियत इति नायं व्यर्थः पक्षपुच्छादिप्रकल्पनप्रयास इति ।

ननु शरीरं वा ततोऽन्तरं वा यत्किञ्चिदालम्ब्यते तदप्यालम्बनमेव कल्पिताकारविशेषमनात्मा चेत्यनिवार्यमेतत् । तत्कथमीदृश आलम्बने शतशोऽभ्यस्तभावनापि बुद्धिर्निरालम्बनीकृत्य सर्वान्तरे निराकारे प्रत्यगात्मन्यवतारयितुं शक्येतेति न जानीमः - इत्याशङ्क्य भवत्येवेयं कल्पना प्रत्यगात्मन्यवतारणोपायः प्रकारान्तरेणेति सनिदर्शनं हृदयंगमीकरोति - **दृष्टशरीरात्मसामान्यकल्पनया शाखाचन्द्रनिदर्शनवदिति** । अयमाशयः। पूर्वपूर्वस्य देहादेरन्तरन्तःस्थिततत्तद्व्यापकप्राणादौ दृष्टदेहेन पक्षपुच्छादिमत्त्वं सामान्यं प्रकल्प्य विनाऽऽयासं बुद्धिमवतार्यावतार्य पूर्वपूर्वालम्बने आत्मबुद्धिपरित्याजनार्थमेव तु पक्षपुछादिव्यावर्णनम्, न पुनरालम्बनभावनाभ्यास एव परमं तात्पर्यमात्र । तदेवंक्रमेण विज्ञाने कर्तृभोक्तृत्वोपाधौ विनिवेशितायां त्वात्मबुद्धौ, ततो भोक्तृत्वमप्यपाकृत्य तस्यां विज्ञानगुहायां निहितं प्रत्यगात्मस्वरूपं ब्रह्म शक्यत एव प्रदर्शयितुम् । 'शाखोपरि चन्द्र' इत्युपदेशेन यद्वत् । यथा हि शाखायां चन्द्र इति प्रतिज्ञाय प्रथमं बहुशाखं तरुं विनिर्दिश्य, ततस्तत्र प्रत्यक्प्रवणां शाखां दर्शयित्वा तदनु 'अस्याः शाखाया उपरि दृश्यतां चन्द्रमाः' इत्युक्ते यथा द्वितीयाचन्द्रं दिदृक्षुः पूर्वप्रदर्शितं तरुं शाखाश्च ददृशिवानपि तत्सर्वं विहाय अन्तिमपर्यायप्रदर्शित-शाखामप्यतीत्य, तस्यामेव च दिशि दृष्टिं प्रसार्य शाखासंसर्गरहितमेव चन्द्रं व्योम्नि स्थितं स्वप्रयत्नेन पश्येत् सप्रणिधानम्, एवं अन्नरसमयादिपरम्परया विज्ञानात्मानमुपदिश्य ततो 'बुद्धिगुहायां ब्रह्म द्रष्टव्यं' इत्यभिहितो जिज्ञासुस्तामतीत्य तत्संसर्गरहितं तत्साक्षिभूतमेव ब्रह्म स्वात्मत्वेनानुभवितुं प्रभवेदिति श्लिष्यते । अतः क्रमशो बुद्धिवैशद्यापादनार्थमेवं पक्षपुच्छादिकल्पनमिति सर्वमवदातमिति ।

## ५९. अन्नमयस्य शिरआद्यवयवनिरूपणम् -

**'तस्येदमेव शिरः'** इत्यादिभाष्यं स्पष्टार्थम् । गच्छद्व्याख्यानं तु भाष्यार्थविमर्शनसौकार्यार्थमिति वेदितव्यम् । **अशिरसां शिरस्त्वदर्शनादिति।** शिरस्त्वकल्पनदर्शनादित्यर्थः । **एवं पक्षादिषु योजना इति** । दक्षिणबाहुः सव्यबाहुश्चेति प्रसिद्धावेव पक्षत्वेन ग्राह्यौ - इत्यभिप्रायः । **'एतत्प्रकृत्योत्तरेषां प्राणमयादीनां रूपकत्वसिद्धिः' इति** । एतत् अन्नरसमयस्य शिरः

पक्षपुच्छादिकल्पनं प्रकृत्य । एतदपेक्षया इति यावत् । प्राणमयादीनां रूपकत्वसिद्धिः । शिरःपक्षादिकल्पनसिद्धिरित्यर्थः । तत्र निदर्शनम् **'मूषानिषिक्तद्रुतताम्रप्रतिमावत्'** इति । यथा अग्नौ प्रतप्तं द्रवीभूतं ताम्रं मूषान्तर्निषिक्तं मूषाकारतामेवैति ; पुनर्घनीभूतं च प्रतिमाकारं दधत् मूषानुकारेण तदाकारतामेव धत्ते । एवं प्राणोऽपि निराकारो देहान्तर्गतस्तद्व्यापकः सन् देहाकारमेव भजत इव । तदालम्ब्य च 'प्रण एव शिरः' इत्यादिरूपककल्पनेत्यभिप्रायः । अत्रोपपादकं कल्पान्तरमपि वक्ष्यते भाष्ये मनोमयावयवविमर्शनावसरे इत्यास्तां तावत्॥३॥

## तदप्येषः श्लोको भवति

## (इति प्रथमोऽनुवाकः)

**अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवीँ श्रिताः । अथो अन्नेनैव जीवन्ति । अथैनदपि यन्त्यन्ततः । अन्नँ हि भूतानां ज्येष्ठम्। तस्मात्सर्वौषधमुच्यते । सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते । अन्नँ हि भूतानां ज्येष्ठम् । तस्मात् सर्वौषधमुच्यते। अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते । अद्यतेऽत्ति च भूतानि। तस्मादन्नं तदुच्यत इति ॥४॥**

### अन्नमयात्मप्रकाशकः श्लोकः

२५. तदप्येषः श्लोको भवति । तत्

तस्मिन्नेवार्थे ब्राह्मणोक्ते अन्नमयात्मप्रकाशकः एष श्लोकः मन्त्रः भवति । अन्नात् रसादिभावपरिणतात् । वै इति स्मारणार्थः[1] प्रजाः स्थावरजङ्गमात्मकाः प्रजायन्ते । याः काश्च अविशिष्टाः पृथिवीं श्रिताः पृथिवीम् आश्रिताः, ताः सर्वा अन्नादेव प्रजायन्ते । अथो अपि जाताः अन्नेनैव जीवन्ति प्राणान् धारयन्ति। वर्धन्त इत्यर्थः । अथ अपि एनत् अन्नम् अपि यन्ति अपिगच्छन्ति । अपिशब्दः प्रतिशब्दार्थे । अन्नं प्रति, प्रलीयन्त[2] इत्यर्थः। अन्ततः अन्ते जीवनलक्षणाया वृद्धेः परिसमाप्तौ । कस्मात्? अन्नं हि यस्मात् भूतानां प्राणिनां ज्येष्ठं प्रथमजम् । अन्नमयादीनां हि इतरेषां भूतानां कारणम् अन्नम् । अतोऽन्नप्रभवाः, अन्नजीवनाः, अन्नप्रलयाश्च सर्वाः प्रजाः । यस्माच्चैवम् तस्मात्, सर्वौषधम् सर्वप्राणिनां देहदाहप्रशमनम् अन्नम् उच्यते ।

६०. श्लोकस्यान्नमयप्रकाशकत्वोपपादनम् -

अथ यथाविर्णतस्यान्नमयस्य याथात्म्यवर्णनपरं मन्त्रमवतारयति ब्राह्मणम्।

---

१. 'स्मरणार्थः' इति मुद्रितपुस्तकपाठः  २. 'लीयन्ते' वा ।

तदप्येष श्लोको भवतीति । तद्व्याकरोति - तत्तस्मिन्नेवार्थे इत्यादि । ननु मन्त्रस्यान्नरसमयपरत्ववर्णनमननुरूपम् 'अन्नाद्वै प्रजाः प्रजयन्ते' इत्यादेः । अन्नं ह्यत्र प्रशस्यते श्लोके । न चान्नप्रशंसा अन्नमयप्रशंसा भवेत् । प्रत्युत अन्नाज्जायते, तस्मिन्नेव च प्रलीयत इत्यन्नाधीनतया तस्य नैच्यमेवोक्तं स्यात् । न चान्नप्रशंसैव श्लोकेऽन्नमय प्रशंसापि भविष्यति । इत्थंमहाभागादन्नाज्जातत्वात् प्रशस्तवंश्योऽयमिति इति शङ्क्यम् । न ह्यन्नेन प्रशंसितेन किञ्चित्कर्तव्यमस्ति । नाप्यन्नमयप्रशंसनेन । यतोऽन्नमयाद्व्यावृत्य प्राणमयादिषु क्रमेण चित्तावतारणमेवात्रेष्टमिति भवतो राद्धान्तः । तत्कथमिदमिति चेत् । अत्रोच्यते । अन्नमितीह समष्टिपञ्चभूतलक्षणो विराडुपाधिर्विवक्षितः । तथा च वर्णितमस्माभिरधस्तात् - हिरण्यगर्भात् सूक्ष्मभूतसृष्ट्यनन्तरमण्डोत्पित्तिक्रमेण विराडुत्पत्तिरप्येष्टव्येति । यत्तूक्तं प्राक् 'स वा एष पुरुषोऽन्नरसमयः' इति, तत्तु सत्यज्ञानानन्तात्मन एव सतोऽविद्यया अन्नरसमयत्वमिति ज्ञापनार्थमध्यारोपदृष्ट्या - इत्यवोचाम । इदानीं पुनस्तदपवादप्रक्रियामारभते विराडाद्यभेदज्ञापनक्रमेण ब्रह्माभिन्नत्वमेवोपसंहरिष्यन्निति विशेषः । अतः साध्वेतदुक्तम् 'अन्नमयात्मप्रकाशक एष श्लोक' इति ॥

## ६१. अन्नमयस्य विराडभेदवर्णनम् -

तदिदं मन्त्राक्षरव्याख्यानेन हृदयमारोपयति - अन्नादित्यादिना अन्नात्, विराजः स्थूलोपाध्येकदेशात्, भूतैराद्यत्वेनान्नत्वेन विभावितात् प्रजाः प्रजायन्ते । वै इति प्रसिद्धमेतत् स्मार्यते । अन्नादेव हि स्थावरजङ्गमाः प्रजा उत्पद्यन्त इति । **'याः काश्चाविशिष्टाः पृथिवीं श्रिता'** इत्यादि तु प्रकृतान्नमयपुरुषेऽपि तदतिदेशार्थम्। अन्नादेव प्रजायन्त इति न केवलम्, **अथो अपि अन्नेनैव जीवन्ति। प्रणान् धारयन्तीति धात्वर्थकथनमेतत्** । वर्धन्त इत्यर्थोऽत्र ग्राह्यः। तथोपसंहारदर्शनात्। अपि च **एनदन्नमेव अपि यन्ति अपिगच्छन्तीत्यपि स्मर्तव्यम्। अन्ततः जीवनोपलक्षितवृद्धेः परिसमाप्तौ** तस्मिन्नेव प्रलीयन्ते इत्यर्थः । किं कारणं पुनरन्नं प्रजानां जन्मादिकारणमिति पृष्ट्वा प्रतिवक्ति - **कस्मादिति।** अन्नं हीति च । अन्नमेव हि विराड्रूपं सर्वप्राणिनामन्नमयादीनां

कारणं ज्येष्ठं प्रथमोत्पन्नशरीरत्वात् 'स वै शरीरी प्रथमः' (?) इति पुराणस्मृतेरित्यर्थः। **अन्नप्रभवा, अन्नजीवना, अन्नप्रलयाश्च** इत्यन्नस्यैव सर्वभूतप्रकृतित्वोपपादनं तदुपाधिके विराजि ब्रह्मलक्षणसमन्वयप्रदर्शनार्थम्, अन्नमयपुरुषस्य तदनन्यत्वप्रतिबोधनार्थं च । एवं ह्यन्नमयस्य परिच्छिन्नत्वमपोदितं भवति । तथा च तद्व्यापकानां प्राणमयादीनामप्ययत्नत एवाऽऽधिदैविकवाय्वाद्यात्मता सेत्स्यतीति। यथाभिहितं **वार्तिके** - 'विराडात्मकतां याते पिण्डेऽध्यात्मावसायिनि । प्राणो वाय्वात्मतामेति प्रध्वस्तघटदीपवत् ॥' (तै. वा. २-२५४) इति । एवमेव चाऽऽत्मन आधिदैविकाभिन्नत्वाभ्युपगमे सति निरतिशयानन्त्योपपत्तौ परब्रह्मणैकत्वमुपसंहृतं स्यात् । अन्यथा ह्यन्नमयादीनां स्वदेहपरिच्छिन्नत्वादन्तिमपर्याये दृष्टोऽपि शुद्धात्मा परिच्छिन्न एव स्यादिति साङ्ख्यसिद्धान्तविशेष एव स्याद्वेदान्त-दर्शनस्यापि यदप्याहु**र्वार्तिककाराः** - कार्याणां कारणात्मत्त्वमेवं स्यादुत्तरेऽष्वपि। ब्रह्मानन्तं भवेदेवं साङ्ख्यराद्धान्तमन्यथा ॥' (तै.वा. २-२६८) इति । अन्नमयवाक्य इव उत्तरेष्वपि वाक्येष्वेवमेव कार्याणां प्राणमयादीनां कारणात्मत्त्व वाख्याद्यभिन्नत्त्व स्यात्, ब्रह्मणोऽनन्तता च । अन्यथा ब्रह्मणोऽनानन्त्यात् साङ्ख्यराद्धान्त-स्थितपरिच्छिन्नपुरुषत्वमात्रं भवेदिति वार्तिकार्थः।

## ६२. अत्र वार्तिकप्रस्थानान्तरं तद्विमर्शश्च -

एवं विराडनन्यत्वग्रहणेनान्नमयात्मनि यथोपवर्णितं शिरआदिमत्वम् विराज्यपि शक्यातिदेशनम् । 'आत्मैवेदमग्र आसीत् पुरुषविधः' (बृ. १-४-१) इति श्रुत्यन्तरात् तस्यापि शिरःपाण्यादिलक्षणत्वावगमात् । तदानीं च शिरआदिप्रकल्पना न केवलं भाष्योक्तदिशा अन्नमयापेक्षया प्राणमयादीनां पुरुषविधत्वसिद्ध्यर्था, अपि तु 'एवं विराडुपासनं कर्तव्यम्' इत्युपासनाविध्यर्थापि भविष्यतीति तु वार्तिककाराः । यथाहुः 'शिरआदिप्रक्लृप्तिस्तु स्यादुपासनकर्मणे। तस्मादेवं चितीरेतामानसीर्व्याचचक्षिरे ॥ शिरो मूर्धा भुजौ पक्षावात्मा कायश्च मध्यमः। शेषं पुच्छमिति ज्ञेयं चितिमेवं विचिन्तयेत् ॥' (तै.वा. २-२४२, २४३) इति। परं तद्युक्त्युपबृंहितभाष्यार्थाध्यवसानधाष्ट्यं वहन्ती मम मन्दमतिः शङ्कते कथं न्वस्मिन् पक्षे 'इदमेव शिरः' इति श्रुत्यवधारणम्, 'प्राणमयादिष्वशिरसां शिरस्त्वदर्शनादिहापि

तत्प्रसङ्गो मा भूदिति 'इदमेव शिरइत्युच्यते' इति भाष्यगतं व्याख्यानं च संगमयितव्यमिति। अथवा नात्र पुरुषतन्त्रं ध्यानापरपर्यायमुपासनाशब्देन विवक्षितं महावेदान्तज्ञानश्रीमद्भिर्वार्तिककारैः, किं तर्हि, दृष्टफलतोऽपरायत्त-बोधापरपर्यायनिदिध्यासनानुकूलः प्रयत्नविशेष एव । तथा ह्युत्तरस्मिन् वार्तिके 'उपासीनश्चितीरेवं विद्वानेता यथाक्रमम् । पूर्वपूर्वप्रहाणेन ह्यन्तरन्तः प्रपद्यते॥' (तै.वा. २-२४४) इति क्रमेण सर्वान्तरात्मज्ञानमेव दृष्टं फलमुपासनस्याभिधीयते न तु देहपातोत्तरभावि यत्किञ्चिदित्यलं श्रीमच्छङ्करभगवत्पादानुग्रहपात्राग्र्यतमेष्वपि न्यूनतागवेषणेनेत्यास्तां तावदेतत् । सर्वथापि त्वन्नब्रह्मोपासनमत्र विवक्षितमित्यत्र तु न काचन संशीतिः ॥

## ६३. अत्रान्नब्रह्मोपासनमविवक्षितमिति मतं तद्दूषणं च -

यत्त्वत्र केचिदुशन्ति - उत्तरत्र प्राणादौ शिरआदिकल्पनाया बाह्यविषयासङ्गव्यपोहेन बुद्धेरात्मनि स्थिरीकरणार्थत्वमेव, नोपासनाविधानमिह विवक्षितम् । उपक्रमोपसंहारयोर्ब्रह्मात्मैकत्वप्रतिपादनेनैवोपक्षयात्, मध्ये ग्रन्थस्योपासनाविधौ तात्पर्ये च वाक्यभेदप्रसङ्गात् । अतोऽत्र 'अङ्गे स्तुतिः परार्थत्वात्' इति न्यायेनान्नमयादिप्रतिपत्तेः फलश्रवणमर्थवाद एवेति । तन्नादर्तव्यम्। 'अन्नब्रह्मविदः फलमुच्यते' (२६) इत्यादिभाष्यवचनानाम् असति बाधके मुख्यार्थपरित्यागे हेत्वभावात् । न च वाक्यभेदप्रसङ्ग एव बाधक इति प्रत्यवस्थेयम्। छान्दोग्ये नामाद्युपासनमिव स्वभावतः प्राप्तम्, श्रुत्यन्तरादेव वा प्राप्तम् उपासनमनूद्य ज्ञानं प्रधानतयोपदिश्यत इत्यङ्गीकारे वाक्यभेदाप्रसङ्गात् । अथवा इहैवावन्तरतात्पर्येण श्रुतिपरिप्रापितमुपासनम्, परमतात्पर्येण तु ज्ञानमेव विवक्षितम् श्रुत्यन्तरे आदित्यादिपुरुषोपासनं विवक्षित्वाप्यजातशत्रुणा परमतात्पर्येण ब्रह्मोपदेशनवदिति स्वीकारे नैव किञ्चिद्बाधकं पश्यामः । इहापि तत्रेव प्रत्युपासनोपदेशं तत्तद्गुणकत्वविधानस्य तदनुरूपफलश्रवणस्य च लक्ष्यमाणत्वात् । न चोपासनानामिह विहितानां प्रधानज्ञानविघातकत्वमस्ति, प्रत्युत कार्यकरणसङ्घाताभिमानिनो विराडाद्याधिदैविकानन्यत्वचिन्तनेन सत्यत्वानन्तत्वप्रतिबोधने दृष्टोपकारकत्व-मेवास्तीति । तस्मात्, अवान्तरतात्पर्येणोपासनानां विवक्षितत्वमेव युक्तमभ्युपगन्तुमित्युत्पश्यामः । तदेतत्सर्वं वार्तिकेऽपि विस्पष्टमुक्तम् -

'श्रुतेरनतिशङ्क्यत्वात्संभाव्येत यथोदितम् । लिङ्गप्रत्यक्षगम्ये हि स्यादाशङ्का नृबुद्धितः ॥ स्वभावतो वा संप्राप्तमनूद्योपासनं श्रुतिः । नामादाविव भूमानां विधत्ते ज्ञानमात्मनि ॥ श्रुत्यन्तराद्वा संप्राप्तं मोक्षादर्वाक्फलाय तु । तदनूद्य परं श्रयःप्राप्तये ज्ञानमुच्यते ॥' (तै.वा. २-२४५, २४६, २४७) इति । तस्मादिह 'अन्नाद्वै प्रजाः' इत्याद्या श्रुतिरन्नमयात्मनो विराडात्मनैक्यप्रतिबोधनायैव प्रवृत्तेत्यलं श्रुतिभाष्याक्षरार्थवैरूप्यप्रसञ्जनचिन्तया ॥

### ६४. अन्नस्य सर्वौषधनामकत्त्वम् -

प्रकृतमेवानुसरामः । एवमन्नस्य प्रजाप्रभवत्वकथनेन तद्देहसारतामुक्त्वा तद्धारणपोषणादिहेतुत्वमप्यन्वर्थनामनिर्देशेन समर्थयति । तदाह **यस्माच्चेति** । यस्माच्चैवमन्नजीवनाः प्रजाः, **तस्मात् सर्वौषधं सर्वप्राणिनां देहदाहप्रशमनम् अन्नमुच्यते** । जाठराग्निर्हि सर्वेषां क्षुधार्तानां प्राणिनां देहधातून् ओषतीत्योषः सः। तमोषं धयति पिबति, उपशमयतीत्यन्नमोषधम् । अतः सर्वौषधमुच्यतेऽन्नम् इत्यर्थः ॥

**२६. अन्नब्रह्मविदः फलमुच्यते । सर्वं वै ते (अन्नं) समस्तम् अन्नजातम् आप्नुवन्ति । के ? ये अन्नं ब्रह्म यथोक्तम् उपासते । कथम्? 'अन्नजः, अन्नात्मा, अन्नप्रलयोऽहम् , तस्मादन्नं ब्रह्म' इति । कुतः पुनः सर्वान्न-प्राप्तिफलम् अन्नात्मोपासनमिति ? उच्यते । अन्नं हि भूतानां ज्येष्ठम् । भूतेभ्यः पूर्वं निष्पन्नत्वात्[१] ज्येष्ठं हि यस्मात् तस्मात् सर्वौषधमुच्यते । तस्मादुपपन्ना सर्वान्नात्मो-**

१. 'उत्पन्नत्वात्' वा ॥

**पासकस्य सर्वान्नप्राप्तिः । 'अन्नाद् भूतानि जायन्ते, जातान्यन्नेन वर्धन्ते' इति उपसंहारार्थं पुनर्वचनम् । इदानीम् अन्ननिर्वचनमुच्यते । अद्यते भुज्यते चैव यद् भूतैरन्नम्[१], अत्ति च भूतानि स्वयम्, तस्माद् भूतैर्भुज्यमानत्वात् भूतभोक्तृत्वाच्च अन्नं तदुच्यते। इतिशब्दः प्रथमकोशपरिसमाप्त्यर्थः ॥**

**६५. अन्नब्रह्मविदः फलम् -**

**'अन्नब्रह्मविदः फलमुच्यते'** इति प्रकृतान्नमयस्य विराडनन्यतां विदितवतः फलं स्तुत्यर्थमुच्यते । विराडन्नोपासकस्य चेत्यर्थः । विराट् तादात्म्यज्ञानेन हि प्राणिनां सर्वेषां यद्यदन्नं तत्सर्वमस्य विदुष एव भवति, सर्वात्मत्वादिति ज्ञानस्तुतिः। एवं विराडात्मानम् आत्मत्वेन परिगृह्य येऽन्नब्रह्मात्मकोऽहमिति सत्कारपूर्वकं निरन्तरमाप्रायणाद् ध्यायन्ति, ते विराडात्मतां जीवन्त एव साक्षात्कृत्य शरीरपातानन्तरं तद्भावमापन्नाः सन्तस्तद्वदेव सर्वान्नमाप्नुवन्तीत्युपासनाफलम् । न ह्यन्यथा मनुष्यस्य सतः कस्यचिदपि सर्वान्नात्मत्वं संभवति । दृष्टमपि च फलम् एतदानुगुण्येन सर्वान्नप्राप्तिः स्वाद्यभूतसर्वान्नलाभ इति द्रष्टव्यम् । न हि साक्षात्कृतसर्वान्नदैवतस्य अन्नदारिद्र्यं भवितुमर्हतीति । शिष्टं स्पष्टं भाष्यम् । 'अद्यतेऽत्ति च' इत्यन्नशब्दनिर्वचनं तद्गुणकोपासकस्य तदनुगुणफलप्राप्तिकथनार्थम्। 'विराडन्नम्'[२] (?) ' सैषा विराडन्नादी' (छां. ४-३-८), इति 'सर्वं वा अत्तीति तददितेरदितित्वम्' (बृ. १-२-५) इति च श्रुत्यन्तरात् प्रसिद्धं प्रजापतेराद्यत्वमत्तृत्वं चेति युक्तमेव तद्गुणकोपासकस्य सर्वप्राधान्येन सर्वाद्यत्वम्, सर्वोपलब्धृत्वेन चात्तृत्वमिति भावः ।

---

१. 'अन्नम्' इति नास्ति वा ॥ २. 'अन्नं विराट्' इति तै. सं ५-४-६-४

**६६. अन्नमयकोशोपसंहारः -**

**इतिशब्दः प्रथमकोशपरिसमाप्त्यर्थ इति ।** यद्यपि श्लोकसमाप्त्यर्थक इतिशब्द इति युक्तं वक्तुम्, 'तदप्येष श्लोको भवति' इति प्रस्तुतस्योपसंहरणार्थत्वात्, तथापि प्रथमकोशयाथात्म्यप्रकाशकत्वाच्छ्लोकस्य युक्तमेव कोशसमाप्त्यर्थवत्वमपीति निरवद्यम् ॥४ ॥

**तस्माद्वा एतस्मादन्नरसमयात् । अन्योऽन्तर आत्मा प्राणमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्राण एव शिरः । व्यानो दक्षिणः पक्षः । अपान उत्तरः पक्षः । आकाश आत्मा । पृथिवी पुच्छं प्रतिष्ठा ॥५॥**

## प्राणमयात्मा

२७. अन्नमयादिभ्य आनन्दमयान्तेभ्य आत्मभ्यः अभ्यतरतमं ब्रह्म विद्यया प्रत्यगात्मत्वेन दिदर्शयिषु शास्त्रम् अविद्याकृतपञ्चकोशापनयनेन अनेकतुषकोद्रववितुषीकरणेनेव तदन्तर्गततण्डुलान्[१] - प्रस्तौति 'तस्माद्वा एतस्मादन्नरसमयात्' इत्यादि॥

१. 'तदन्दर्गतशब्दो नास्ति' वा ॥

**६७. उत्तरग्रन्थसम्बन्धः -**

अन्तरतमं ब्रह्म संक्रामयितुमिष्टः पुरुष इत्युक्तम् । स च सुप्रसिद्धान्नमयत्वाद् व्युत्थाप्य तत्कारणमन्नं तावत्संक्रामितः । अथास्यातोप्यन्तरतरप्राणमय-स्वरूपत्वप्रदर्शनेनान्तःप्रवेशः कार्यते श्रुत्या । तच्चैतत् प्रवेशनं न प्राणमये प्रतिष्ठापनार्थम्, किमर्थं तर्हि, क्रमश उत्तरोत्तरं तत्तद्व्यापकं निदर्श्य, अन्ते सर्वप्रतिष्ठारूपे परब्रह्मणि तदात्मभावेनावस्थापनार्थमेव । मनोमयाद्यन्यात्मोपन्यासस्तु पूर्वपूर्वस्मिन् निरूढाया आत्मभावनायाः परित्याजनार्थमित्यवोचाम । त एतेऽन्नमयाद्या आनन्दमयान्ता यद्यप्यविद्यावस्थायां सूक्ष्मसूक्ष्मतरत्वेन विभाव्यमानास्तत्तद्धर्मविशेषयुक्तत्वादात्मबुद्ध्यर्हा इवाभान्ति, तथापि ते सर्वे अविद्याकृत एव आत्मनः कोशाः, न वस्तुत आत्मानः । अविद्या-कल्पितत्वाविशेषेऽपि तेषामुत्तरोत्तरं परमार्थात्मत्वेन पश्यतां जिज्ञासूनां पूर्वपूर्वकोशेऽनात्मबुद्धिः परिनिष्पन्ना भवतीतीयन्मात्रप्रयोजनं तेषां क्रमेण निदर्शनमिति बोध्यम् । तदेतदाह - **अन्नमयादिभ्यः आनन्दमयान्तेभ्य** इत्यादिना। अविद्याकृतत्वं त्वन्नमयत्वादीनां प्राणमयत्वाद्यध्यवसानसमसमयं बाध्यमानत्वात्। यद्यपि प्राणमयत्वाद्यपि प्रातीतिकशरीरमाविद्यकमेव, तथापि स्वप्नान्तर्गतस्वप्नादुत्थितस्य पुरुषस्य तदन्तर्भावकस्वप्नस्यैव सतो जागरितत्वेन सत्यत्वेन च प्रतिभासवत् यावत्तावदप्युत्तरेण बाधावधि सत्यत्वेनैव प्रतिभासात् तस्य तस्य तत्तत्पूर्वतनरूपबाधकत्वमुपपद्यत इति ज्ञेयम् । प्रत्यगात्मबुद्धिस्तु सर्वत्र परमार्थात्मानुगमात्, आत्मचैतन्याभासयुक्तान्तरान्तरकोशसंसर्ग-वशाच्चाऽऽत्मानात्मान्योन्याध्यासहैतुकीत्यदोषः । तदेवमन्नमयकोशे बाधनेऽप्यात्मबुद्धेः प्राणमये, तत्र बाधने च मनोमये - इत्येवमभूताभि-निवेशानुवर्तनात्, तत्तदवधानेन तत्तत्पूर्वतनाध्यारोपापोहार्थः क्रमेण कोशोपन्यास इत्यत्र दृष्टान्तमुपन्यस्यति - अनेकतुषकोद्रववितुषीकरणेनेव तदन्तर्गततण्डुलान् इति। कोद्रवा हि क्षुद्रधान्यविशेषा नैकवारं कण्डनमात्रेण वितुषीभवन्ति स्वान्तर्गतांस्तण्डुलान् दर्शनगोचरान् कुर्वन्ति वा सकृन्निष्कोषिताः । अनेकतुषत्वात्। अपेक्षन्ते तु पुनः पुनरवहननं यावत्तण्डुलदर्शनम् । एवमयमप्यात्मा पुनः पुनः प्रत्यवमर्शेनैव विकोशीकर्तव्यो भवति यावत्प्रत्यगात्माभिन्नब्रह्मस्वरूपदर्शनम्,

अनेकतुषस्थानीयनिरूढनिबिडाविद्यावासनाकृतानेककोशपरम्परावृतत्वादित्यतः श्रुतिः प्रस्तौति तस्माद्वा एतस्मादन्नरसमयात् इत्यादिना पुनः पुनरन्तरान्तरकोशविवरणमित्यर्थः ॥

**२८. तस्माद् वै[1] एतस्मात् यथोक्तात् अन्नरसमयात् पिण्डात् अन्यः व्यतिरिक्तः अन्तरः अभ्यन्तरः आत्मा पिण्डवदेव मिथ्यापरिकल्पित आत्मत्वेन । प्राणमयः । प्राणः वायुः, तन्मयः तत्प्रायः । तेन प्राणमयेन एष अन्नरसमय आत्मा पूर्णः । वायुनेव दृतिः । स वै एष प्राणमय आत्मा पुरुषविध एव पुरुषाकार एव, शिरःपक्षादिभिः। किं स्वत एव? नेत्याह। प्रसिद्धं तावत् अन्नरस-मयस्यात्मनः पुरुषविधत्वम् । तस्य अन्नरसमयस्य पुरुषविधतां पुरुषाकारताम् अनु, अयं प्राणमयः पुरुषविधः मूषानिषिक्त-प्रतिमावत्। न स्वत एव । एवं पूर्वस्य पूर्वस्य पुरुषविधताम्[2] अनु उत्तरोत्तरः पुरुषविधो भवति । पूर्वः पूर्वश्च उत्तरोत्तरेण पूर्णः ॥**

---

१. इदं पदं त्रुटितम् आ ॥

२. 'विधता तामनु' वा ॥

## ६८. अन्नरसमयस्य प्राणमयेन पूर्णत्वम् -

**तस्माद्वा एतस्मादन्नरसमयात्** इत्यादि भाष्यस्याऽयमर्थः । तस्माद् विराडभिन्नत्वेनोपप्रदर्शितात् वै इति स्मारितात् एतस्मात् शिरःपक्षादियुतत्वेन यथोक्तात् अन्नरसमयत्वात् पिण्डात्मत्वेन विभाव्यमानात् अन्यः अतिरिक्तः, तदन्तरस्तस्मादभ्यन्तर आत्मा तद्वदेव आत्मत्वेन **मिथ्यापरिकल्पितः** । प्राणमयात्मोपन्यासः शरीरे निसर्गप्राप्ताया आत्मबुद्धेर्व्यपोहार्थः । अन्नरसमयादिष्वात्मबुद्धिः सर्वत्रैव हि परमार्थात्मानात्मनोरन्योन्याध्यासकृतेत्यवोचाम। तेन यदैव प्राणमये आत्मबुद्धिर्व्यवस्थाप्यते तदैवान्नरसमयात्मा व्यावर्तत इति यथोक्तमनुसंधेयम् । एवमुत्तरत्रापि । प्रणमये **वायुप्रायताभिधानं** तस्मिन् इतरभूतापेक्षया वायोरेव भूयस्त्वम्, यथान्नमये पृथिव्या इति ज्ञापनार्थम्। न तु वायुविकारत्वापह्नवार्थम् । उक्तं हि सूत्रभाष्ये 'वायुरेवायमध्यात्मापन्नः पञ्चव्यूहो विशेषात्मनाऽवतिष्ठमानः प्राणो नाम भण्यते' (सू.भा. २-४-९) इति । अस्यान्नमयादतिरिक्तत्ववचनं च तद्वैलक्षण्योपदेशपरम्, न त्वश्वमहिषवदितरेतरपृथक्त्वमभिप्रेत्य । न ह्यविद्याकल्पितयोरेतयोर्वास्तविकमन्योन्यपृथक्त्वमस्ति । परमार्थात्मरूपेण त्वैक्यमेव सर्वेषामपि सर्पधारादिविकल्पानां रज्जुरूपेणेव । यथाऽऽहुर्वेदान्तवृद्धाः 'नाऽऽत्मभावेन नानेदं न स्वेनापि कथञ्चन' (गौ-का. २-३४) इति । अन्तर इत्यन्नमये प्रसक्ताया प्रत्यक्त्वबुद्धेर्वारणाय । सर्वप्रत्यक्तवत्वेनैव हि ब्रह्मेह दिदर्शयिषितम् । 'निहितं गुहायाम्' इत्युपक्रमात् । अतोऽन्नमयादिषु प्राप्तप्रत्यक्त्वबुद्धिः क्रमशो वारणीयेति 'अन्योऽन्तर आत्मा' इति प्रतिपर्यायमुच्यते। आत्मत्वोक्तिस्तु पूर्वस्मिन् कोशे तद्बुद्धिनिवृत्यर्थेत्यवोचाम । कल्पितात्मसु प्राणमयादिषु क्रमेणैवमात्मत्वं विनिवार्य ब्रह्मण्येव परमात्मत्वं स्थिरीकरिष्यामीति मन्यते श्रुतिः । तदिदं सर्वं प्राणमयादि ग्रन्थसम्बन्धप्रस्तावेनैवोक्तमपि पुनरिह भाष्यकारेण सुहृद्भावेन पदार्थकथनव्याजेन वितत्य प्रदर्शितम् , उत्तरेष्वपि मनोमयादिपर्यायेष्वेवमनुसंधेयमिति प्रतिबोधनार्थमित्यनवद्यम् ।

**तेन प्राणमयेनान्नरसमय आत्मैष पूर्णः** । तत्र दृष्टान्तो **वायुनेव दृतिरिति**। यथा हि वायुना निरन्तरमभ्यन्तरे सर्वत्र पूर्णा दृतिः कर्मकारेणोपमृदिता

स्वयं निश्श्वसितीव लक्ष्यते, एवमयमन्नमयोऽपि स्वाभ्यन्तरे प्राणपूर्ण एव चेष्टते न तु स्वत इति वेदितव्यम् । दृतिदृष्टान्ते चर्मदेशे नैव वायुरस्तीति न सर्वसमता दृष्टान्तदार्ष्टान्तिकयोर्विवक्षिता । 'शिलयेव शिलापुत्रकः', 'सर्प इव रज्ज्वा' इति वा समञ्जसतरं निदर्शनं शक्याभ्यूहनमत्र । अन्नमयो हि सर्वात्मना प्राणमये ओतश्च प्रोतश्चेति विवेकिनां प्राणचेष्टां विना नान्नमयशब्दवाच्यं किञ्चिद्वस्तुसदस्ति । प्राणमयात्मनि प्रविलापनात् प्राक्त्वन्नमयस्यायं दृष्टान्तो वायुनेव दृतिरितीत्यदोषः । तेन **'तस्यान्नरसमयस्य पुरुषविधतामनु, अयं प्राणमयः पुरुषविधः'** इति सिध्यति । यथा वायुरमूर्तो दृत्याकारमनु तदाकारवानिव भवति । एवं प्राणमयोऽप्यन्नरसमयस्य पुरुषविधतामनु पुरुषविध इव न स्वत इति । प्रतिमादृष्टान्तो व्याख्यातपूर्वः । एवं मनोमयादिष्वपि द्रष्टव्यमित्याह - **एवं पूर्वस्य पूर्वस्येत्यादि। उत्तरेणोत्तरेण पूर्णः** इति श्रुत्युपदेशक्रममनुसृत्योक्तम् । अर्थात्तु पूर्वस्य पूर्वस्य तदुत्तरैः सर्वैरपि पूर्णत्वमवसेयम्, अन्नमयस्य तदुत्तरैश्चतुर्भिः कोशैः प्राणमयस्यत्रिभिः, मनोमयस्य द्वाभ्याम्, विज्ञानमयस्य त्वानन्दमयेनैकेनेति तदिदमविद्याकल्पितकोशानां पृथक्पृथगवस्थितिमुपेत्य । वस्तुतस्तु ब्रह्मैवैकं पूर्णं सर्वत्रेति विचारान्ते स्थास्यति ॥

**२९. कथं पुनः पुरुषविधता अस्येति ? उच्यते । तस्य प्राणमयस्य प्राण एव शिरः । प्राणमयस्य वायुविकारस्य प्राणः मुखनासिकानिःसरणो वृत्तिविशेषः शिर इति कल्प्यते[१] । वचनात् । सर्वत्र वचनादेव पक्षादिकल्पना । व्यानः व्यानवृतिः दक्षिणः पक्षः । अपान उत्तरः पक्षः । आकश आत्मा। य आकाशस्थो वृत्तिविशेषः समानाख्यः स**

---

१. 'एव परिकल्प्यते' इति आ ॥

**आत्मेव आत्मा । प्राणवृत्त्यधिकारात् । मध्यस्थत्वात् इतराः पर्यन्ता वृत्तिरपेक्ष्य आत्मा। 'मध्यं ह्येषामङ्गानामात्मा' (ऐ. आ. २-३-५) इति श्रुतिप्रसिद्धं मध्यस्थस्यात्मत्वम्[1] । पृथिवी पुच्छं प्रतिष्ठा । 'पृथिवी' इति पृथिवीदेवता आध्यात्मिकस्य प्राणस्य धारयित्री। स्थितिहेतुत्वात् । 'सैषा पुरुषस्यापानमवष्टभ्य' (प्र. ३-८) इति हि[2] श्रुत्यन्तरम् । अन्यथा उदानवृत्त्या ऊर्ध्वगमनं, गुरुत्वात्[3] पतनं वा स्यात् शरीरस्य । तस्मात् पृथिवी देवता पुच्छं प्रतिष्ठा प्राणमयस्यात्मनः ॥**

## ६९. प्राणमयस्य पुरुषविधत्वोपपादनम् -

मूर्तस्यान्नमयस्य शिरः पक्षादिकल्पना ऋज्ववबोधा; अमूर्तस्य तु प्राणमयस्य सा कथमिति पृच्छति - **कथं पुनः पुरुषविधताऽस्य** इति । तत्र प्रतिवचनम् 'तस्य प्राणमयस्य' इत्यादि । प्राणस्य पञ्चवृत्तय एवेह शिरआदित्वेन कल्प्यन्ते, न तु तस्य शिरआद्यवयवत्त्वं विवक्षितम् । तथाकल्पने च वचनमेव नः प्रमाणम् । न हि प्राणवृत्तिः शिरोभाग एव व्यानवृत्तिर्दक्षिणबाहावेवेत्यादि वा प्रमाणान्तराधिगतम् इत्याह - **सर्वत्र वचनादेव पक्षादिकल्पना** इति । कल्पना चेयं प्राणमये

---

१. 'मध्यमस्थस्य' इति मकाराधिकः पाठः आ ॥

२. 'हि' इति नास्ति आ ॥

३. 'गुरुत्वाच्च' आ ॥

प्रणिधानसौकर्यार्थेति भावः । 'आकाश आत्मा' इत्यत्र **आकाशशब्दस्याध्यात्माकाशस्थोवृत्तिविशेषः समानाख्योऽर्थो** लक्षणया स्वीक्रियते। मञ्चाः कोशन्तीत्यत्र तत्स्थपुरुषा यथा । मुख्यार्थत्यागे बीजं प्रकरणमित्याह - **प्राणवृत्त्यधिकारात्** इति । कथं तर्हि **पृथिवी देवता** प्राणमयस्य पुच्छमिति ? न हि सा प्राणमयस्यावयव इत्याशङ्क्याऽऽह - **अध्यात्मिकस्य प्राणस्य धारयित्री। स्थितिहेतुत्वादिति** । शिरआदीनामिवाऽत्रापि वचनादेव पुच्छत्वकल्पनम्। अत्रोपपत्तिस्तु 'सैषा पुरुषस्यापानमवष्टभ्य' (प्र. ३-८) इति श्रुत्यन्तरोक्तदिशा । अपानवृत्तिद्वारेण अध एवापकर्शन्ती शरीरस्य स्थितौ उपकरोतीति पुच्छं प्रतिष्ठेत्युच्यते। अतो न दोष इत्यभिप्रायः । अत्र प्राणवृत्तिविशेषगतमधिकम्। आथर्वणे तृतीयप्रश्नतोऽधिगन्तव्यम् ॥

## तदप्येष श्लोको भवति ।

(इति द्वितीयोऽध्यायः)

**प्राणं देवा अनु प्राणन्ति । मनुष्याः पशवश्च ये । प्राणो हि भूतानामायुः । तस्मात् सर्वायुषमुच्यते । सर्वमेव त आयुर्यन्ति। ये प्राणं ब्रह्मोपासते । प्राणो हि भूतानामायुः । तस्मात् सर्वायुषमुच्यत इति ॥६॥**

### प्रणमयात्मप्रकाशकः श्लोकः

३०. तत् तस्मिन्नेवार्थे प्राणमयात्मविषय

**एष श्लोको भवति। प्राणं देवा अनु प्राणन्ति । देवा अग्न्यादयः प्राणं वाय्वात्मानं प्राणनशक्तिमन्तम् अनु तदात्मभूताः सन्तः प्राणन्ति प्राणनकर्म कुर्वन्ति। प्राणनक्रियया क्रियावन्तो भवन्ति ।। अध्यात्माधिकाराद् देवा इन्द्रियाणि प्राणमनु प्राणन्ति मुख्यप्राणमनु चेष्टन्त इति वा । तथा मनुष्याः पशवश्च ये ते प्राणनकर्मणैव चेष्टावन्तो भवन्ति।।**

७०. **प्राणमयस्याधिदैविकेन वायुना अभेदः -**

इहापि 'तदप्येष श्लोक' इति प्राणमययाथात्म्यप्रकाशक इत्येवार्थः पूर्ववदित्याह - **तस्मिन्नेवार्थे इति** । अग्न्यादयो वाय्वात्मानमनु **तदात्मभूताः सन्तः प्राणन्तीति** । प्रसिद्धमेतत् श्रुत्यन्तरात् 'तं देवाः सर्वे अर्पिताः' (का. २-१-९) इति। 'यद्वा एतेऽमुर्ह्यध्रियन्त तदेवाप्यद्य कुर्वन्ति' (बृ. १-५-२३) इति च। **'अध्यात्माधिकारात् देवा इन्द्रियाणि प्राणमनु प्राणन्ति मुख्यप्राणमनु चेष्टन्त इति वा'** इति वाकारश्चार्थे द्रष्टव्यः । 'स यथैषां प्राणानां मध्यमः प्राण एवमेतासां देवतानां वायुः' (बृ. १-६-२२) इति श्रुत्यन्तरादधिदैवतमपि समानत्वान्न्यायस्य । 'मनुष्याः पशवश्च' इति वाक्यशेषाद् देवतानां ग्रहणस्यैव युक्ततरत्वाच्च । मनुष्याः पशवश्च प्रजाः प्राणमेवानु प्राणन्ति। तथा च श्रुत्यन्तरम् 'अथेमाः प्राणते प्रजाः' (प्र. २-१०) इति । तस्मादत्राधिदैवतवाय्वात्मता प्राणमयस्योपदिश्यते यथा अन्नमयस्य विराडात्मतेति युज्यते ।।

**३१. अतश्च नान्नमयेनैव परिच्छिन्नेनाऽऽत्मना आत्मवन्तः प्राणिनः किं तर्हि,**

**तदन्तर्गतेन[१] प्राणमयेनापि साधारणेनैव सर्वपिण्डव्यापिना आत्मवन्तो मनुष्यादयः। एवं मनोमयादिभिः पूर्वपूर्वव्यापिभिः, उत्तरोत्तरैः, सूक्ष्मैः, आनन्दमयान्तैराकाशादि-भूतारब्धैरविद्याकृतैः आत्मवन्तः सर्वे प्राणिनः। तथा स्वाभाविकेनापि आकाशादिकारणेन नित्येन, अविकृतेन, सर्वगतेन, सत्यज्ञानानन्तलक्षणेन, पञ्च-कोशातिगेन सर्वात्मना आत्मवन्तः, स हि परमार्थत आत्मा सर्वेषाम्-इत्येतदपि अर्थादुक्तं भवति ॥**

## ७१. तेनैष पूर्ण इति वाक्यस्य परमतात्पर्यम् -

यथोपवर्णितप्राणमयेनान्नमयस्य पूर्णत्वे सिद्धे किं फलतीत्येदाह अतश्चेति । अन्नमयो हि मूर्तत्वात् प्रतिव्यक्ति भिन्नत्वाच्च परिच्छिन्न इव । यद्यपि समष्ट्यन्नात्मत्वेन सोऽपि साधारण एव, तथाप्युक्तहेतुना परिच्छिन्नत्वेन विभाव्यमानत्वात् प्रतिप्राण्यसाधारण इव भवति । प्राणमयस्तु तत्तत्पिण्डमनु पुरुषविधत्वेन परिच्छिन्नवदवभासमानोऽपि वस्तुतो नैव परिच्छिन्न इति झटितितरामध्यवस्यते। अत उच्यते 'प्राणमयेनापि साधारणेनैव' इति । अपिशब्देनात्र समुच्चयो न ग्राह्यः। न हि 'अहं परिच्छिन्नकार्यकरणवान्, सर्वपिण्ड-साधारणप्राणमयात्मा च' इति कस्यचिज्जातु मतिर्भवति । अतो यथैव पिण्डात्मनि मनःसमवधाने कार्यकरणसंघातात्मबुद्धिर्भवति, तथैव साधारणे प्राणमयात्मन्यपि

---

१. 'तदन्तर्गतप्राणमयोनापि' वा ॥

समवधाने 'अहमस्मि सर्वपिण्डव्यापी प्राणः' इत्यध्यवसितो भवति; मुञ्चति तु पिण्डात्मभावमतिम् - इत्येवाभिप्रायः । एवं मनोमयविज्ञानमयानन्दमयैरपि पूर्वपूर्वव्यापित्वेन परिभावितैस्तत्तदात्मत्वेनाध्यवसायो भवति, पूर्वपूर्वकोशात्ममतिपरित्यागश्च । एवं परमार्थात्मन्येव यदा चित्तसमवधानम्, तदा तत्रैवात्ममतिरुदेति, कोशात्मभावमतिश्चापगता भवति । तदेतदाह - तथा स्वाभाविकेनापीति । स्वरूपभूतेनापीत्यर्थः । तस्य स्वरूमेव विवृणोति - आकाशादिकारणेनेति । इदमुक्तं भवति - सर्व एवैते आनन्दमयान्ताः कोशाः प्रतीयमानेन स्वेन रूपेण पञ्चभूतविकारभूताः, परस्परपरिच्छिन्ना, अनृता, अचेतनाश्चेत्यत आगन्तुकात्मान एव प्राणिनाम् । भूतानि चाकाशादीनि ब्रह्मकार्यत्वात् त ्नन्यानीत्यतोऽविद्याकृतनामरूपमायावेषेणैव तु कोशाः परमात्मनः पृथगिवावभासन्ते । तद्विलक्षणः परमात्मैव तु वस्तुतो नित्यं सर्वेषां कोशानामप्यात्मेति। न हि सर्पादेर्विकल्पस्य तद्व्यापिरज्ज्वादितः पृथगात्मत्वं समस्तीत्यभिप्रायः । परमार्थत इति । अविद्यादशायमपीति शेषः ।

३२. प्राणं देवा अनु प्राणन्ति - इत्युक्तम्। तत्कस्मादिति ? आह - प्राणो हि यस्मात् भूतानां प्राणिनां आयुः जीवनम् । 'यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः' (कौ. ३-२) इति श्रुत्यन्तरात् । तस्मात् सर्वायुषम् सर्वेषाम् आयुः सर्वायुः, सर्वायुरेव 'सर्वायुषम्' इत्युच्यते । प्राणापगमे मरणप्रसिद्धेः प्रसिद्धं हि लोके सर्वायुष्ट्वं प्राणस्य। अतोऽस्मात् बाह्यात् असाधारणात् अन्नमयादात्मनोऽपक्रम्य अन्तः साधारणं

**प्राणमयमात्मानं ब्रह्म उपासते ये 'अहमस्मि प्राणः सर्वभूतानामात्मा आयुः जीवनहेतुत्वात्' इति ते सर्वमेव आयुः - अस्मिन् लोके यन्ति। नापमृत्युना म्रियन्ते प्राक् प्राप्तादायुषः - इत्यर्थः। शतं वर्षाणि इति तु युक्तं सर्वमायुः[१] इति। श्रुतिप्रसिद्धेः। किं कारणम्? प्राणो हि भूतानाम् आयुः। तस्मात् सर्वायुषमुच्यत इति। यो यद्गुणकं ब्रह्म उपास्ते, स तद्गुणभाग् भवतीति विद्याफलप्राप्तेर्हेत्वर्थं पुनर्वचनम् 'प्राणो हि' इत्यादि॥६॥**

७२. प्राणोपासनफलम् -

**प्राणं देवा अनुप्राणन्तीत्युक्तम्** इत्यादि भाष्यं स्पष्टार्थम्। 'प्राणो हि' इति वाक्यस्य यस्मात् प्राणो भूतानामायुरिति प्रसिद्धः, तस्माज्जीवनार्थं ते देवादयः प्राणमेवानुप्राणन्तीत्यर्थः। आयुष्ट्वप्रसिद्धिस्फोरणार्थं **कौषितकिवचनम्**, लोकप्रसिद्ध्युदाहरणं च। 'सर्वायुषम्' इति प्राणस्य गुणनाम। तदुपासकस्य तत्प्राप्तिं सिद्धवत्कृत्य दृष्टं फलमाह - **अस्मिँल्लोक** इत्यादिना। 'सर्वं हैवास्मिँल्लोक आयुरेति' 'नैनं पुरा कालात् प्राणो जहाति' 'नैनं पुराकालान्मृत्युरागच्छति' (बृ. २-१-१०, १२) इति हि श्रुत्यन्तरम्। तथेहाप्यकालमृत्युवारणार्थमेव सर्वशब्दग्रहणमिति भावः। स्वकर्मोपार्जितं सर्वमायुः प्राप्नोति निर्विघ्नतयेत्युक्त्वा तत्रास्वरसात् प्रकारान्तरेण व्याचष्टे - **शतं वर्षाणीति तु युक्तं सर्वमायुः इति**। तत्र हेतुः, श्रुतिप्रसिद्धेरिति। 'शतायुः पुरुषः' (तै.सं. १-५-७-६) इति हि श्रुतिप्रसिद्धिरित्यभिप्रायः।

---

'सर्वमायुरेति' वा॥

'सर्वमायुरिति श्रुतिप्रसिद्धेरित्येकं वाक्यं वा भाष्ये । 'शतं वर्षाणि सर्वमायुः पुरुषस्य' (?) इति श्रुतिरिति हि छान्दोग्यभाष्ये (छां. २-११-२) समुदाहृतं दृश्यत इति । सर्वायुष्ट्वप्राप्तिः फलमित्यत्र **किं कारणम्** ? - इति शङ्कावारणार्थकतया उत्तर वाक्यमवतारयति - प्राणो हीति । कथमिदं संभाव्यते प्राक्कर्मार्जितायुष ऊर्ध्वमपि जीवेदिति ? - इति शङ्कितुराशयः । परिहारस्तु प्राणो हि भूतानामायुः । तस्मद्युक्तमुपासनावीर्येणायुषो वृद्धिरितीति । ननु प्रागेव गतमेतद्वाक्यं 'प्राणो हि' इत्यादि । किमर्थेयं पुनरुक्तिरिति ? अत्राह - **यो यद्गुणकमित्यादि** । 'तं यथा यथोपासते' (शत. ब्रा. १०-५-२-२०) इति न्यायेन सर्वायुषत्वेन ब्रह्मोपासितुर्युक्तमेव पूर्णायुष्ट्वमिहलोके, परत्र सर्वायुषप्राणावाप्तिश्चेत्यभिप्रायकमिदं वाक्यमिति भावः ॥६॥

## तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥७॥

### प्राणमय एवान्नमयस्याऽऽत्मा

**३३. तस्य पूर्वस्य अन्नमयस्य एष एव शरीरे अन्नमये भवः शारीर आत्मा । कः ? य एष प्राणमयः ॥**

**७३. प्राणमयस्यात्मत्वावधारणफलम् -**

'तस्य इति पूर्वनिर्दिष्टोऽन्नरसमयः परामृश्यते । योऽसौ पूर्वं निर्दिष्टोऽन्नरसमयः पुरुष इति, नासौ वस्तुत आत्मा । शिरःपाण्यादिमत्त्वेन मूर्तत्वात् । तद्धर्माध्यासेन तु लोकोऽभिमन्यते 'अहं शिरआदिमान्' इति । यस्तु तद्व्यतिरिक्तः प्राणमयः शारीरः, तस्मिन्नन्नमये शरीरे भवतीति, स एष एव तस्यात्मा । स ह्यन्नरसमयोऽनेन पूर्णः । तस्मात्तमाप्नोतीत्येष एव तस्यात्मेति युक्तं मतिं धारयितुम् । सर्वायुष्ट्वेन तस्याऽऽत्मधारणहेतुत्वाच्च । तस्मात्तमन्नमयं शरीरमात्रत्वेन निश्चित्य तस्मिन्नात्ममतिः परित्याज्येत्यन्ययोगव्यवच्छेदार्थ एवकारः ।

## ७५. प्राणमयस्यात्मत्वोपपत्तिः -

अत्र **वार्तिककारास्तु** 'यः पूर्वस्य' इति श्रुतिवचनाञ्जस्यार्थम्, 'तस्य प्राणमयस्य एष एव सत्यादिलक्षणः शारीर आत्मा, यः पूर्वस्यान्नरसमयस्य' इत्येवं वाक्यस्थपदान्यन्यथापि योजयांचक्रुः । न्यायं च तत्रोदाजह्रुः 'न ह्यात्मवान् भवेत्सर्पो दण्डाद्यध्यासरूपिणा । आत्मनाऽवितथेनैव सर्पो रज्ज्वात्मनाऽऽत्मवान्॥' (तै. वा. २-२८६) इति । तदनुग्रहोपजीविनो ममत्वेवं प्रतिभाति । 'तस्य इति दवीयोवाचिशब्देन प्रकृतं प्राणं परामृश्य समीपतरवर्त्येतच्छब्देन विप्रकृष्ट-सत्यज्ञानानन्तब्रह्मात्माकर्षणं न न्याय्यम् । पूर्वोक्तस्य त्वन्नमयस्य तच्छब्देन, प्रशंसाश्लोकेनेदानीमेवोपसंहृतस्य प्राणमयस्यैतच्छब्देन न निर्देशो युक्ततर इति । यत् सत्यमेवैतत् प्राणमयादीनामपि कल्पितत्वान्न मुख्यात्मत्वं घटत इति ; तथापि तु शाखाचन्द्रनिदर्शनन्यायेन तस्यैव मुख्यात्मनो दिदर्शयिषया तत्र तत्र प्राणमयादिष्वात्मबुद्ध्यवतारणं नायुक्तम्, नामादिप्राणान्तेष्विव भूमात्मदिदर्शयिषया। यत्तूच्यते आत्मनाऽवितथेनैव सर्पो रज्ज्वात्मनाऽऽत्मवान् इति दृष्टान्तादानेन, तदभीष्टमेव भाष्यकारव्याख्यानुयायिनाम् । अत एव हि हेतोरन्नमयाद्यानन्द-मयान्तेष्वप्यध्यस्तात्मबुद्धिरनुगतेत्यभ्युपगम्यते । तामेव चानुगतिमाश्रित्यारोपाप-वादन्यायेन पूर्वपूर्वस्मिन्नात्मबुद्धिः परित्याज्यत इत्यवोचाम। ब्रह्मात्मनैव सर्वमिदं सत्यं, प्रतीयमानस्वरूपेण तु मिथ्येति हि सिद्धान्तः । यथोक्तमन्यत्र भवगत्पादैः 'अविद्यामात्र एवातः संसरोऽस्त्वविवेकतः । कूटस्थेनात्मना नित्यमात्मवानात्मनीव सः । रज्जुसर्पो यथा रज्ज्वा सात्मकः प्राग्विवेकतः । अवस्तुसन्नपि ह्येष कूटस्थेनात्मना तथा । आत्माभासाश्रयश्च' (उप.सा. १८-४३, ४४, ४५) इति । यत्पुनः 'कल्पितेन प्राणमयादिना न कल्पितोऽन्नमय आत्मवान् भवितुमर्हति । न ह्यध्यासरूपिणा दण्डादिना सर्प आत्मवान् भवेदिति । नायं दोषः। 'क्लृप्तानामपि रज्ज्वादौ कल्पितान्तरसंश्रयात् । क्लृप्तान्तरापनुत्तिः स्याद्यथा तद्वदिहात्मनि॥' (बृ. वा. १-२-१७५) इति भवद्भिरेवोपदिष्टया नीत्या कल्पितस्याप्यन्नमयादेः कल्पितात्मान्तरत्वसमाश्रयेणात्मबुद्ध्यपह्नवोपपत्तेः । तस्मात्समारोपितात्म-बुद्धिविषय एवेह प्राणमयादिः पूर्वपूर्वस्याऽऽत्मत्वेनोपदिश्यत इति निरवद्यम् ।

अस्मिन् विमर्शे संभाव्यमानदोषाणां विद्वद्द्वारेणोद्घाटनेनानुग्राह्योऽहं श्रीमत्सुरेश्वरगुरुभिः, क्षन्तव्यं चेदं बालभाषितमित्यभ्यर्थये ॥

## ७६. शारीरत्वव्यपदेशाच्च प्राणमय एवान्नमयस्यात्मा -

इतश्चैतदेवं प्रतिपत्तव्यम् । कुतः ? 'एष एव शारीर आत्मा' इति शारीरत्वव्यपदेशादेतच्छब्दनिर्दिष्टस्य । न हि सत्यज्ञानानन्तलक्षणस्य शारीरत्वमञ्जसोपपद्यते । प्राणमयस्तु प्राणादिपञ्चवृत्तिभिर्भोगाधिष्ठाने शरीर एव भवतीति युक्तं तस्य शारीरत्वम् । यद्यपि प्राणमयस्याप्यधिदैवतवाय्वात्मना सर्वपिण्डसाधारण्योक्तेः शरीराद्बहिरपि वृत्तिरवकल्पते, तथाप्याध्यात्मिकान्नरसमयादेः प्राणमयाद्यात्मना प्रविलापनस्यैवात्र प्रधान्येनोपदेशात्, अध्यात्मदृष्ट्या तस्यैव शारीरत्वं युक्तमभ्युपगन्तुम्, नित्यानन्तरूपिणस्तु ब्रह्मात्मनः कथञ्चिदपि तन्न युज्यत इति वैषम्यम् ॥

## ७७. परमात्मैव शारीर इति प्रस्थानं सर्वथा अवैदिकमयुक्तं च -

यत्वत्र **नवीनवेदान्तिनः** प्रक्रियां रचयन्ति अस्मिन् प्रकरणे सर्वत्र 'तस्यैष एव शारीर आत्मा । यः पूर्वस्य' इति परमात्मन एव शारीरात्मत्वाभिधानम् । 'यः पृथिव्यां तिष्ठन्' (बृ.मा. ३-७-७) इत्याद्यन्तर्यामिब्राह्मणप्रामाण्यात्, 'यः पृथिवीमन्तरे सञ्चरन्' (सुबा. ७) इति सुबालश्रुतिप्रामाण्याच्च । स्वव्यतिरिक्तं चेतनाचेतनवस्तुजातं सर्वं स्वशरीरमिति स एव निरुपाधिकः शारीर आत्मा । अत एव परं ब्रह्माधिकृत्य प्रवृत्तं शास्त्रं 'शारीरकम्' इत्यभियुक्तैरधीयते - इत्यादि । तच्छ्रुतियुक्त्यनुभवबाह्यत्वादनादरणीयं श्रेयोर्थिभिर्वेदान्तार्थतत्त्वजिज्ञासुभिः । न हि परमात्मा कुत्रचिदपि वेदान्तेषु शारीरत्वेन व्यपदिष्ट उपलभ्यते । 'स त आत्मान्तर्याम्यमृतः' (बृ.मा. ३-७-७) इत्यन्तर्यामिस्वरूपनिर्देशपरत्वात् अन्तर्यामिब्राह्मणस्य, **सुबालश्रुतेश्च** सर्वाभियुक्तानुदाहृताया अपि नारायणदेवस्य सर्वभूतान्तरात्मत्वोपदेशेनैवोपक्षीणत्वात्, तयोर्वाक्ययोः परमात्मनः शरीरवत्त्वबोधनेऽपि व्यापारकल्पने वाक्यभेदप्रसङ्गात् । प्रमाणत्वेन सर्वसंप्रतिपन्नेषु वेदान्तवाक्येषु 'अयं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन् याति'

(बृ. ४-३-३५) इत्यादिषु जीवस्यैव शारीरत्वेन व्यपदेशदर्शनात् , तद्विलक्षणस्य परमात्मनः प्राज्ञशब्देनैवाभिधानात्, सूत्रकारेणाप्यन्तर्याम्यधिकरणे 'शारीरश्च' (वे.सू. १-२-२०) इति जीवस्यैव शारीरशब्दसंज्ञितत्वेन संसूत्रणात्, भवद्भिरपि तत्र (वे. सू. रा. भा. १-२-२०) तथैव व्याख्यातत्वात्, परमात्मनस्तु क्वचिदपि तथाव्यपदेशाभावात्, प्रत्युत 'अशरीरमलोहितं शुभ्रम्' (प्र. ४-१०) इति, 'अकायमव्रणम्' (ई. ८) इति च प्रत्यक्षमेव शरीरवत्त्वापह्नवात्, 'योऽयमशरीरः प्रज्ञात्मा' इत्युपक्रम्य 'स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्य एकमेव तदिति विद्यात्' (ऐ. आ. ३-२-३) इति अध्यात्माधिदैवतयोः पुरुषयोरशरीरत्वेनैवैकत्वोपदेशदर्शनात्, वेदान्तमीमांसायाः शारीरकत्वेन व्यपदेशस्य शारीरकपरमार्थतत्वनिर्धारणपरतयाप्युपपत्तेः, प्राचीनतरैरभियुक्तैस्तथैव व्यवहृतत्वाच्च । तस्माद्ब्रह्मणः शारीरत्वं चिदचिच्छरीरकत्वं च श्रुतिबाह्यमेवैतैर्वादिभिरभिलषितसिद्ध्यर्थं कल्पितमिति युक्तमुत्पश्यामः ॥

युक्त्यनुभवबाह्यं चेदं कल्पनम् । कथं हि सत्यज्ञानानन्तस्वरूपस्य कर्मपारवश्यव्याप्तं शरीरित्वम्, चिदेकरसस्वरूपयोर्जीवपरयोः स्वभावभेदः शरीरशरीरिभावो वा मनसापि चिन्तयितुं शक्येतेति ? ननु परमात्मनः शरीरं न गुणत्रयमयो भूतसंङ्घसंस्थानविशेषः, येन परोऽपि कर्मवशः स्यात्, किं तर्हि ? स्वाभिमतस्वानुरूपोऽप्राकृतः । यथा हि तस्य स्वाभाविकानतिशयासङ्ख्येयकल्याणगुणगणाः सन्ति, तद्वदेव स्वाभिमतानुरूपदिव्यरूपमपि स्वाभाविकमस्ति । सत्यसङ्कल्पत्वात् स्वेच्छागृहीतानि च नैकानि शरीराणि । न च शरीरत्वं नाम कर्मफलोपभोगाधिष्ठानत्वमेवेति शक्यमवस्थातुम् । यथोक्तेष्वीश्वरशरीरेषु मुक्तानां च 'स एकधा भवति' (छा. ७-२६-२) इत्यादिवाक्यावगतेषु चास्य लक्षणस्याव्याप्तेः । अत आधेयत्वविधेयत्वशेषत्वान्येव शरीरशब्दप्रवृत्तिनिमित्तानीत्यभ्युपेयम् । एवं च सर्वं परमपुरुषेण सर्वात्मना स्वार्थे नियाम्यं धार्यं तच्छेषत्वैकस्वरूपं चेति सर्वं चेतनाचेतनं तस्य शरीरमिति कथमियं प्रक्रिया युक्त्यनुभवबाह्येति चेत् । न । उक्तदोषतादवस्थ्यात् । चिदेकरसस्वभावे जीवे परमात्मनि च स्वभावभेदो गुणगुणिभावः शरीरशरीरिभावो वा मनसापि चिन्तयितुं न शक्यत इत्युक्तदोषस्तदवस्थ एव, न तस्य परिहारो बहुभाषित्वमात्रेण

भविष्यति। यत्पुनः कर्मफलोपभोगाधिष्ठानत्वरूपशरीरलक्षणस्याव्याप्तिप्रदर्शनपूर्वकम् अभिनवलक्षणप्रणयनव्यसनम्, तत्तु 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' (छा. ८-१२-१) इति न्यायोपबृंहितश्रुतिविरुद्ध कुतर्करसिकताप्रदर्शनमात्रमित्युपेक्ष्यम् । 'स एकधा भवति' (छा. ७-२६-२) इत्यादिमुक्तवैभवस्यापि सगुणविद्याविपाकावस्थानत्वात् स्वर्गादिशरीरवदेव मुक्तकल्पितशरीरेऽपि मानसकर्मफलोपभोगाधिष्ठानत्वस्यानिवारणीयत्वात् । परमात्मनश्चाशरीरत्वस्वाभाव्यस्य श्रुत्यवष्टम्भेन प्रसाधितत्वात्स्वेच्छागृहीत शरीराणां मायामयत्वेन सुखोपपादनीयत्वात्, 'माया हेषा मया सृष्टा' (मो.ध. ३३९-४५), 'संभवाम्यात्ममायया' (गी. ४-६) इत्यादिस्मृतिभिस्तथैवावगमाच्च न भोगाधिष्ठानत्वरूपस्य लक्षणस्य क्वचिदप्यव्याप्तिः शक्यदर्शना । वस्तुतस्तु सशरीरत्वेन विभाव्यमानस्य जीवस्य सुषुप्त्यादिष्ववस्थासु प्राज्ञेन संपरिष्वक्तस्याशरीरत्वानुभवात्, 'एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' (छां. ८-१२-३) इति विवेकेन शरीरात्समुत्थितस्यैव जीवस्य स्वेन रूपेणाभिनिष्पत्त्युपदेशात् । 'मर्त्यं वा इदं शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानम्' (छा. ८-१२-१) इत्यशरीरस्वभावस्यात्मनोऽविद्यादृष्ट्या भोगाधिष्ठानत्वेनैवोपदर्शनाच्च शरीरस्य, जीवस्यैव तावत्सशरीरत्वं दुरवधारणम्, किं पुनर्ब्रह्मण इति युक्त्यनुभवाबाह्यमेव परमात्मनः शरीरत्वकल्पनमित्यलमतिप्रपञ्चेन । एतेन **यदप्यन्ये** प्राहुः - अन्नरसमयाद्यानन्दयान्ता अनिरुद्धप्रद्युम्नसङ्कर्षणवासुदेवनारायणाख्या ब्रह्मस्वरूपा एव, परमात्मैव बहिरन्तश्च देहदेहिरूपेण स्थित इति शारीर आत्मेत्युच्यते - इति । 'पञ्चरूपं च तद्ब्रह्म जीवादन्यन्न विद्यते । इति ये तु विजानन्ति तेऽसन्तस्तमआलयाः' इति प्रतिवादिभ्यो गालिदानेनैव स्वाभिलषितां प्रक्रियां साधितां मन्यमानाः, तदपि प्रत्युक्तं वेदितव्यम् । न ह्यभिलषितसिद्धिनिबन्धना वस्तुव्यवस्थितिरिति ॥

'तस्मात्तस्यैष एव शारीर आत्मा । यः पूर्वस्य' इति वाक्यं प्राणमयपरमेव न सत्यज्ञानानन्तलक्षणब्रह्मात्मपरमिति निराबाधं सिद्धम् ॥

## तस्माद्वा एतस्मात् प्राणमयात् । अन्योऽन्तर

**आत्मा मनोमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुष विधः । तस्य यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा ॥८॥**

## मनोमयात्मा

**३४. 'तस्माद्वा एतस्मात्' इत्यादि[१] उक्तार्थमन्यत् । अन्योऽन्तर आत्मा मनोमयः । मन इति सङ्कल्पाद्यात्मकम्[२] अन्तःकरणम् । तन्मयः मनोमयः । यथा अन्नमयः[३] । सोऽयं प्राणमयस्य अभ्यन्तर आत्मा ॥**

**७८. मनोमयात्मावतरणिका -**

तस्माद्वा एतस्मादिति पूर्ववद्व्याख्यातव्यं कोशग्रन्थावतरणघट्टोक्तानुसारेणेति मत्वा **'उक्तार्थमन्यत्'** इत्याह । तेन तस्मात् आधिदैविकवाय्वभेदेन प्रतिपादितात्, एतस्मात् प्राणमयादन्यो मनोमय आत्मा - इत्यादिकं सर्वमनुसंधेयं भवति । पूर्वत्र क्रियाशक्त्यधिष्ठितस्य सूत्रस्योपादानमिह तु ज्ञानशक्त्यधिष्ठितस्य तस्यैव

---

१. 'इत्युक्तार्थम् इति आ ॥

२. संकल्पविकल्पात्मकम् वा ॥

३. एतद्वाक्यं नास्ति वा ॥

हिरण्यगर्भाख्यस्येति विवेकः । तत्रापि, अन्तःकरणं सङ्कल्पविकल्पसंशयादिवृत्तिकं मन इति निश्चयादिवृत्तिकं बुद्धिरिति च द्वेधा विभज्य, मनोमयात्मानं तावदादत्ते। **यथान्नमयः** समष्ट्यन्नस्य कार्यभूतः, एवं मनोमयः समष्टिमनसः इति ज्ञेयम् । सोऽयं प्राणमयस्याभ्यन्तर आत्मा । 'तेनैष पूर्ण' इति वाक्यमपि पूर्ववद्व्याख्येयमित्युपेक्षितं भाष्ये, त्रुटितं वा भाष्यं लेखकप्रमादात् । मनोमयस्य ज्ञानलक्षणस्य प्राणमयात् क्रियालक्षणादभ्यन्तरत्वं तु मानसज्ञानविषयत्वात्क्रियाया व्यापकस्य ज्ञानस्य व्याप्यक्रियातोऽभ्यन्तरत्वोपपत्तेरिति मन्तव्यम् ॥

३५. तस्य यजुरेव शिरः । 'यजुः' इति अनियताक्षरपादावसानो मन्त्रविशेषः। तज्जातीयवचनो यजुःशब्दः । तस्य शिरस्त्वं प्राधान्यात् ।। प्रधान्यं च यागादौ संनिपत्योपकारकत्वात् । यजुषा हि हविर्दीयते स्वाहाकारादिना । वाचनिकी वा शिरआदिकल्पना सर्वत्र । मनसो हि स्थानप्रयत्ननादस्वरवर्णपदवाक्ययिषया तत्सङ्कल्पात्मिका तद्भाविता वृत्तिः श्रोत्रादिकरणद्वारा यजुःसङ्केतविशिष्टा यजुरित्युच्यते । एवम् ऋक्। एवं साम च ॥

एवं च मनोवृत्तित्वे मन्त्राणां वृत्तिरेव आवर्त्यत इति मानसो जप उपपद्यते। अन्यथा अविषयत्वात् मन्त्रो नावर्तयितुं शक्यो घटादिवदिति मानसो जपो नोपपद्यते।

मन्त्रावृत्तिश्च चोद्यते बहुशः कर्मसु । अक्षरविषयस्मृत्यावृत्त्या मन्त्रावृत्तिः स्यात्, इति चेत् । न । मुख्यार्थासंभवात् । 'त्रिः प्रथमामन्वाह त्रिरुत्तमाम्' (तै. सं. २-५-७, ऐ.भा. ३-३-१३) इति ऋगावृत्तिः श्रूयते । तत्र ऋचोऽविषयत्वे तद्विषयस्मृत्यावृत्तौ च क्रियमाणायां 'त्रिः प्रथमामन्वाह' इति ऋगावृत्तिर्मुख्योऽर्थश्चोदितः परित्यक्तः स्यात्। तस्मात्, मनोवृत्त्युपाधिपरिच्छिन्नं मनोवृत्ति-निष्ठम् आत्मचैतन्यम् अनादिनिधनं यजुःशब्द-वाच्यम् आत्मविज्ञानं मन्त्रा इति ॥

एवं च नित्यत्वोपपत्तिर्वेदानाम् । अन्यथा विषयत्वे रूपादिवदनित्यत्वं च स्यात् । नैतद् युक्तम् । 'सर्वे वेदा यत्रैकं भवन्ति स मानसीन आत्मा' (तै. आ. ३-११-१) इति च श्रुतिर्नित्यात्मना एकत्वं ब्रुवति ऋगादीनां नित्यत्वे समञ्जसा स्यात्। 'ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः' (ऋ. २-३-२५, श्वे. ४-८) इति च मन्त्रवर्णः ॥

**आदेशोऽत्र ब्राह्मणम् । आदेष्टव्यविशेषान् आदिशति[१] इति । (अथर्वाङ्गिरसः)[२] अथर्वणा[३] अङ्गिरसा च दृष्टा मन्त्रा ब्राह्मणं च शान्तिकपौष्टिकादिप्रतिष्ठाहेतुकर्मप्रधानत्वात् पुच्छं प्रतिष्ठा ॥८॥**

### ७८. मनोमयस्य पुरुषविधत्वनिरूपणम् -

'स वा एष पुरुषविध एव तस्य पुरुषविधताम् अन्वयं पुरुषविधः' इति वाक्यद्वयं पूर्ववदेव व्याख्यातव्यं मन्वानस्तदुत्तरवाक्यमादत्ते विशेषविवक्षया **तस्य यजुरेव शिरः** इति । तत्र यजुःशब्दार्थं विवृणोति - यजुरितीति । ऋक्तु नियताक्षरपादवती, साम च गीतिरूपमिति च द्रष्टव्यम् । 'यजुः' इत्येकवचनं जात्यभिप्रयम्। तदाह तज्जातीयवचन इति । यजुषः शिरस्त्वे उपपत्तिमाचष्टे - **'तस्य शिरस्त्वं प्राधान्यात्'** इत्यादिना । अथवा प्राणमयात्मनीवेहापि वचनप्रामाण्यादेवास्तु शिरआदिकल्पना, पौरुषेयकल्पनातो वचनस्य बलीयस्त्वादित्याह - **'वाचनिकी वा शिरआदिकल्पना सर्वत्र'** इति ॥

### ७९. यजुरादीनां मानसत्वोपादनम् -

नन्वेवं नियतानियताक्षरपादादित्वे ऋगादीनां शब्दरूपत्वमेवेति कथं मनोमयशिरआदित्वमवकल्पते ? तत्राऽऽह - मानसो हीत्यादिना स्थानं कण्ठादि, प्रयत्नो बाह्य आभ्यन्तरश्च । नादो ध्वनिः, स्वरा उदात्तादयः, वर्णा अकारादयः, त एवानुपूर्वी गताः पदविशेषाः, पदसंहतिश्च वाक्यम् इत्येतद्विषया यथोपवर्णितरूपभावनानुरञ्जिता, 'एतदधीमहे' इति सङ्कल्पात्मिका वृत्तिः,

---

१. 'अतिदेष्टव्यविशेषानतिदिशतीति' आ ॥

२. एतत्पदं त्रुटितं स्यादित्युन्नीयते ॥

३. 'अथर्वाङ्गिरसा च' आ ॥

वाक्करणद्वारा बहीरूपं गता श्रोत्रद्वारा च गृहीता यजुरित्युच्यते तत्सङ्केतविशिष्टा। एवमेव ऋक्सामे अपि वृत्तिरूपे एवेति नानुपपन्नं यजुरादीनां मनोमयशिरआदित्वमित्यभिप्रायः ॥

## ८०. यजुरादीनां मानसज्ञानत्वाङ्गीकारेण प्रयोजनम् -

ननु किमनया यजुरादीनां मानसत्ववर्णनविडम्बनया ? श्रोत्रग्राह्यशब्द-रूपत्वमेवास्तु तेषाम्, का हानिः ? इत्याशङ्क्य प्रत्याह - **एवं चेत्या**दिना **'परित्यक्तः स्यात्'** इत्यन्तेन । एवं मानसरूपत्व एव यजुरादीनां मनोविषयत्वं घटते, तथात्व एव च मन्त्रावृत्तिस्तत्र तत्र चोद्यमाना सविषयत्वं लभते। तथा च मानसो जप उपपद्यते । अन्यथा शब्दमात्ररूपस्य मन्त्रस्य मनोविषयत्वं न घटते । घटादिवत् बाह्ये तस्मिन् स्वातन्त्र्याभावान्मनस इति बहुशश्चोद्यमानो मानसो जपो नोपपद्येत । न च तत्तदक्षरविषयस्मृत्यावृत्त्यैव मन्त्रावृत्तिविधिश्चरितार्थो भविष्यतीति वाच्यम् । मन्त्रावृत्तेश्चोदितायाः परित्यागेन तत्स्मृतिमात्रस्यावर्तने मन्त्रशब्दस्य गौणार्थतैव स्वीकृता स्यात्। 'त्रिः प्रथमामन्वाह त्रिरुत्तमाम्' (ऐ. भा. ३-३-१३) इति ऋगावृत्तिर्हि श्रूयते, न ऋक्स्मृत्यावृत्तिः । गौणमुख्ययोश्च मुख्ये संप्रत्ययो युक्तोऽसतिबाधके । सोमक्रयादूर्ध्वं प्राचीनवंशं प्रति नीयमाने सोमे पठितव्या अष्टौ ऋचो विधाय 'तासां त्रिः प्रथमामन्वाह त्रिरुत्तमाम् । ता द्वादश संपद्यन्ते' इति ऋगावृत्तिर्विहिता । तत्राद्यन्तयोर्ऋचोः स्मृतिरेवाऽऽवर्त्यते न ऋचौ इति कथमवशिष्टाभिः सह स्मृती आवर्तिते अपि द्वादशसङ्ख्यापूरणसमर्थे स्याताम्? समानस्वभावानां हि सङ्ख्यापूरकत्वमिष्यते । । तथा चात्र विध्यपेक्षितद्वादश-संङ्ख्यासंतत्यभावे 'त्रिः प्रथमां त्रिरुत्तमामन्वाह यज्ञस्यैव तद्बर्सौ नह्यति स्थेम्ने' (ऐ.आ. ३-३-१३) इत्युक्तं यज्ञस्थेमफलमपि न भवेत् विहितहानाविहितकरणाभ्यां श्रुत्यर्थानुष्ठानाभावप्रसङ्गादित्यभिप्रायः । तस्मादेतद्दोषपरिजिहीर्षुणा मनोवृत्तिरूपा एव यजुरादयः स्वीकार्या इति भावः ॥

किंचैवं मनोवृत्तिरूपत्वं यजुरादीनां न केवलमुत्पन्नप्रध्वंसिमनोविकारमात्रत्व-मङ्गीकर्तव्यम्, किं तु तत्तदर्थप्रकाशकत्वेन वेदशब्दस्यान्वर्थत्वसिद्ध्यर्थं तत्तद्वृत्त्युपहितात्मचैतन्यव्याप्तत्वं तदाभासत्वं चेष्टव्यम्; स चार्थप्रकाशो

मूलतस्तत्तद्वृत्तिनिष्ठस्यात्मचैतन्यस्यैवेति स्थिते, यजुरादीनां परमार्थत उत्पत्तिविनाशरहितचैतन्यस्वरूपत्वमपि सिध्यति । एवं च वेदनित्यत्वोपपत्तिरपि सेत्स्यतीत्याह - **तस्मान्मनोवृत्त्युपाधिपरिच्छिन्नमित्यादिना वेदानामित्यन्तेन**। न च लौकिकवाक्यानामप्येतेन न्यायेन चैतन्याभिन्नत्वान्नित्यता स्यादित्यतिशङ्कनीयम्। परमार्थदृष्ट्या सर्वस्या अपि वाचश्चैतन्यरूपेण नित्यत्वेऽपि 'सर्वे वेदा यत्पदमामनन्ति' (का. १-२-१५) इति 'वेदा अवेदाः' (बृ. ४-३-२२) इति च श्रुत्युक्तविधया वेदानां सर्वस्यापि जगत इव स्वात्मनोऽपि चैतन्याभेदप्रकाशनायैव तात्पर्येण प्रवृत्तत्वरूपविशेषसद्भावात्, लौकिकवाक्यवत्केनाप्यतत्त्वज्ञेन पुरुषेण प्रयत्नपूर्वकं व्यावहारिक-वस्तुविशेषप्रकाशनाय क्वचित्कालविशेषे निर्मितत्वाभावाच्च तत्साम्यानुपपत्तेरिति मन्तव्यम् । केवलशब्दरूपत्वे कथमनित्यत्वम् ? तत्राऽऽह - अन्यथेति । शब्दस्य हि बाह्यविषयलक्षणस्य रूपादिवदेवाऽऽगमापायित्वादनित्यत्वं दुर्वारम् । आत्मचैतन्येन नित्यानन्यस्वभावरूपत्वे तु नैवमिति वैषम्यमिति भावः । अस्त्वनित्यत्वमपीति हठवादं श्रुतिविरोधान्नैवमिति वारयति - **नैतद्युक्तमिति** । सर्वे वेदा यत्रात्मन्येकतां गच्छन्ति स एव मानसीनो मनसि भवः साक्ष्यात्मा जनानामिति वेदानां मानसात्मनैकत्वं ब्रुवती श्रुतिरेवमेव मुख्यार्था कल्पिता भवेत् । 'ऋचो अक्षरे' इत्यक्षरात्मन्यनन्ते ऋचामनन्यत्वेन निषण्णत्वं ब्रुवन् मन्त्रवर्णोप्येवमेव समञ्जसो भवति । अतोऽपि यजुरादीनां मानसज्ञानत्वमेष्टव्यमित्यर्थः ॥

## ८१. मनोमयस्य वेदात्मतोपसंहारः -

तदेवं शिरःपक्षवाक्यानि व्याख्यातानि । अथात्मपुच्छवाक्ये व्याख्यातुमारभते **आदेश** इत्यादिना । आदिशति विधत्ते अनुष्ठातव्यम् इत्यादेशो ब्राह्मणम् । तच्च यजुरादीनामात्मा यथा जीवात्मा स्वाङ्गानाम् । विध्यर्थत्वात्तेषाम् । अथर्वणा तदाख्येन अङ्गिरोनाम्ना च महर्षिणा दृष्टा मन्त्रा ब्राह्मणभागश्च 'अथर्वाङ्गिरसः' । ते च इष्टप्राप्त्यनिष्टपरिहाराभ्याम् ऐहिकप्रतिष्ठाहेतुकर्मप्रधानत्वात् वेदात्मनः पुच्छं प्रतिष्ठा। ऐहिकप्रतिष्ठारहितस्य हि नाप्रतिबन्धेन पारलौकिके कर्मणि परमपुरुषार्थदायिनि ज्ञानसाधने वा प्रयत्नः स्थिरो भवेदिति कृत्वा अथर्वाङ्गिरसः पुच्छं प्रतिष्ठेत्युक्तमिति ध्येयम् ॥८॥

## तदप्येष श्लोको भवति ।

(इति तृतीयोऽनुवाकः)

## यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान् । न विभेति कदाचनेति ॥ १॥

### मनोमयात्मप्रकाशकश्लोकः

**३६. तदप्येष श्लोको भवति मनोमयात्मप्रकाशकः पूर्ववत्, 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इत्यादिः[१] ॥१॥**

### ८२. वेदात्मज्ञानस्तुतिः, तदुपासनाफलं च -

ब्राह्मणोक्ते मनोमयात्मरूपेऽर्थे एष मन्त्रात्मकः श्लोको भवतीति पूर्ववत् सर्वम्। **यतो वाचो निवर्तन्त** इत्यादिश्लोकः स्पष्टार्थ इत्युपेक्षितो भाष्यकृता । वाङ्मनसे सर्वविषयविषये सती परं ब्रह्मैकं तु न विषयीकर्तुमुत्सहेते । मनोमयशब्देन च ताभ्यामुपहितो वेदात्मा हिरण्यगर्भो मन्तव्यो जिज्ञासुभिः, तद्रूपेणोपास्यो वा मध्यमाधिकारिभिः - इति ज्ञापनार्थमयं श्लोकः । यथोक्तं वार्तिके - "नागोचरं यथोरस्ति ब्रह्म मुक्त्वा निरञ्जनम् । ते मनोमयनिर्दिष्टे विद्याद्वाङ्मनसे बुधः । इतीममर्थं चोद्दिश्य श्लोकं श्रुतिरुदाहरत्॥' (तै.वा. २-३०४) इति । मनोमयात्मनोऽपि सर्वातिशायिज्ञानवतः सकाशाद् वाचो मनसा सह निवर्तन्ते इति युक्तम् । वाङ्मनसयोर्विषयित्वादेवावाङ्मनसगोचरत्वोपपत्तेः । अन्यथा एकस्य कर्मकर्तृत्वप्रसङ्गादिति॥

---

१. 'इत्यादि' आ ॥ वा ॥

अहमस्मि मनोमयो वेदात्मा इति यथानुभवं विदुषो ज्ञानिनः स्वानन्दाच्च्युतिरूपं भयं न कदाचन भवति । एवं वेदात्माभिन्नमात्मानमुपास्य तमेव साक्षात्कृतवतः, पतितेऽस्मिन् शरीरे ब्रह्मलोके अप्रतिघज्ञानहिरण्यगर्भभोगसाम्यात् सर्वातिशायिसुखमनुभवतस्तच्च्युतिरूपं भयं न कदाचन भवतीति फलश्रुत्यर्थः ॥९॥

**तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥१०॥**

३७. तस्य पूर्वस्य प्राणमयस्य एष एवाऽऽत्मा शारीरः । शरीरे प्राणमये भवः शारीरः । कः ? य एष मनोमयः ॥१०॥

॥ श्रुतिः ॥

**तस्माद्वा एतस्मान्मनोमयात् । अन्योन्तर आत्मा विज्ञानमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य श्रद्धैव शिरः । ऋतं दक्षिणः पक्षः । सत्यमुत्तरः पक्षः । योग आत्मा । महः पुच्छं प्रतिष्ठा ॥११॥**

## विज्ञानमयात्मा

३८. 'तस्माद्वा एतस्मात्' इत्यादि[१] पूर्ववत् । अन्योऽन्तर आत्मा विज्ञानमयः । मनोमयस्य अभ्यन्तरो विज्ञानमयः । मनोमयो

---

१. 'इति' वा ॥

**वेदात्मा उक्तः । वेदार्थविषया बुद्धिर्निश्चयात्मिका विज्ञानम् । तच्च अध्यवसाय-लक्षणम् अन्तःकरणस्य धर्मः । तन्मयः निश्चयविज्ञानैः प्रमाणस्वरूपैः निर्वर्तित आत्मा विज्ञानमयः । प्रमाणविज्ञानपूर्वको हि यज्ञादिस्तायते । यज्ञादिहेतुत्वं च वक्ष्यति श्लोकेन ॥**

**८३. विज्ञानमयस्य मनोमयाद्वैलक्षण्यं तद्व्यापित्वं च -**

सूत्रात्माभिन्नत्वेन विनिर्दिष्टात् तस्माद्वा एतस्माद्वेदात्मनो मनोमयात् अन्यः, तद्विलक्षण आत्मा विज्ञानमयः । वेदात्मा हि वेदभावितमनोवृत्त्यात्मकः । अयं तु विज्ञानमयो वेदार्थनिश्चयात्मकबुद्धिविज्ञानैर्निर्वृत्त इति तद्वैलक्षण्यमस्य । तदभ्यन्तरत्वं तद्व्यापित्वं चास्य । यतो वेदार्थज्ञानमात्रान्न कर्म क्रियते, 'अयमेव वेदार्थः, अहं चास्मिन् कर्मण्यधिकारी तस्मान्मयेदं कर्तव्यम्' इति ज्ञानेनैव तु क्रियते । कर्तुर्हि निश्चयात्मनः करणाज्ज्ञानादभ्यन्तरत्वं युक्तम् । ज्ञानस्य निश्चयार्थत्वादिति । कर्मकरणाध्यवसाय एवात्र विज्ञानमिति कथमवगम्यते ? तत्राह - **यज्ञादिहेतुत्वं चेतदि ॥**

**३९. निश्चयविज्ञानवतो हि कर्तव्येष्वर्थेषु पूर्वं श्रद्धा उत्पद्यते[१] । सा सर्वकर्तव्यानां प्राथम्यात् शिर इव शिरः । ऋतसत्ये यथाव्याख्याते एव । योगः, युक्तिः, समाधानम् आत्मेव[२] आत्मा । आत्मवतो हि**

१. 'उपपद्यते' वा ॥

२. 'आत्मैव इति (वा॥) पठो न समीचीनः

**युक्तस्य समाधानवतः, अङ्गानीव श्रद्धादीनि यथार्थप्रतिपत्तिक्षमाणि भवन्ति । तस्मात् समाधानं योग आत्मा विज्ञानमयस्य । महः पुच्छं प्रतिष्ठा । 'महः' इति महत्तत्त्वं प्रथमजम् । 'महद्यक्षं प्रथमजम्'[१] (बृ. ५-४-१) इति श्रुत्यन्तरात्, पुच्छं प्रतिष्ठा । कारणत्वात् । कारणं हि कार्याणां प्रतिष्ठा । यथा वृक्षवीरुधां पृथिवी । सर्वबुद्धिविज्ञानानां च महत्तत्त्वं कारणम् । तेन तद् विज्ञानमयस्यात्मनः प्रतिष्ठा ॥११॥**

## ८४. विज्ञानमयात्मनः पुरुषविधता -

'स वा एष पुरुषविध एव । तस्य पुरुषविधताम् अन्वयं पुरुष विधः' - इति वाक्यद्वयं पूर्ववद् व्याख्येयं मत्वा पुरुषविधतामेव प्रपञ्चयितुमारभते । तत्र श्रद्धायाः शिरस्त्वमुपपादयति **'निश्चयविज्ञानवतो हि'** इत्यादिना **'शिरः'** इत्यन्तेन । शिरस इव पुरुषस्य, प्राथम्यादस्य विज्ञानमयस्य कर्मप्रवृत्तौ श्रद्धा शिर इत्युच्यते । 'अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् । असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥' (गी. १७-२८) इत्यश्रद्धया कृतस्य सर्वथा निष्फलत्वस्मरणात्, इदं कर्मावश्यं मया कर्तव्यमिति निश्चयविज्ञानवतः सर्वस्यापि प्रथमं श्रद्धा समुत्पद्यत इति युक्तं तस्याः शिरस्त्वमित्यभिप्रायः । **ऋतसत्ये यथाव्याख्याते एव** शीक्षावल्ल्याम् (खं १२) ऋतं यथाशास्त्रं कर्तव्यत्वेन मनसा निश्चितम्, सत्यं च यथानिश्चितमेव वाक्कायाभ्यां संपाद्यमानमिति । योगश्च चित्तसमाधानम् आत्मा । श्रद्धादीन् आप्नोत्यात्मेवाङ्गानीति । चित्तसमाधानव्याप्तान्येव हि श्रद्धर्तसत्यानि कार्यक्षमाणि भवन्ति । असमाहितचित्तस्य यावत्कर्मसमाप्ति स्थैर्यासंभवादिति । **महः पुच्छं**

---

१. 'प्रथमजं वेद' वा ॥

**प्रतिष्ठा। मह इति महत्तत्त्वं प्रथमजम्** । 'यो हैवं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमाँल्लोकान्' (बृ. ५-४-१) इति **बृहदारण्यके** महत्त्वेन विशेषितत्वात् हिरण्यगर्भस्य, 'मनो महान् मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः । प्रज्ञा संविच्चितिश्चैव स्मृतिश्च परिपठ्यते ॥' (?)[१] इति स्मृतौ हिरण्यगर्भबुद्धेर्महत्त्वाभिधानाच्च । तच्च महत्तत्त्वं विज्ञानात्मनः प्रतिष्ठा । तद्धि समष्टिबुद्धितत्त्वं सर्वासां व्यष्टिबुद्धीनां कारणमिति तासां परा प्रतिष्ठा इत्याह - **'कारणत्वात्'** इत्यादिना - **'विज्ञानमयस्यात्मनः प्रतिष्ठा'** इत्यन्तेन ॥

## तदप्येष श्लोको भवति ।

(इति चतुर्थोऽनुवाकः)

**विज्ञानं यज्ञं तनुते । कर्माणि तनुतेऽपि च ।**
**विज्ञानं देवाः सर्वे । ब्रह्म ज्येष्ठमुपासते ।**
**विज्ञानं ब्रह्म चेद्वेद । तस्माच्चेन्न प्रमाद्यति ।**
**शरीरे पाप्मनो हित्वा । सर्वान् कामान्त्समश्नुत इति ॥ १२ ॥**

---

१. अयं श्लोकः सूत्रभाष्ये (सू.भा. १-४-१) उदाहृतः कुत्रत्य इति न विज्ञायते । समानार्थकौ तु श्लोकौ महाभारते दृश्यते -

महानात्मा मतिर्ब्रह्मा विश्वः शंभुः स्वयंभुवः ।
बुद्धिः प्रज्ञोपलब्धिश्च संवित् ख्यातिर्धृतिः स्मृतिः ॥ (अनु. १४-४२६)

महानात्मा मतिर्विष्णुः जिष्णुशंभुश्च वीर्यवान् ।
बुद्धिः प्रज्ञोपलब्धिश्च तथा ख्यातिर्धृतिः स्मृतिः ।
पर्यायवाचकैश्शब्दैर्महानात्मा विभाव्यते ॥ (अश्व. ४०-२)

## विज्ञानमयात्मप्रकाशकश्लोकः

४०. तदप्येष श्लोको भवति, पूर्ववत् । यथा अन्नमयादीनां ब्राह्मणोक्तानां प्रकाशकः श्लोकाः, एवं विज्ञानमयस्यापि ॥

विज्ञानं यज्ञं तनुते । विज्ञानवान् हि यज्ञं तनोति श्रद्धादिपूर्वकम्[१]। अतो विज्ञानस्य कर्तृत्वं 'तनुते' इति । कर्माणि च तनुते । यस्माद् विज्ञानकर्तृकं सर्वम्, तस्माद् युक्तं विज्ञानमय आत्मा ब्रह्मेति । किञ्च विज्ञानं ब्रह्म सर्वे देवा इन्द्रादयः, ज्येष्ठम् । प्रथमजत्वात् । सर्वप्रवृत्तीनां[२] वा तत्पूर्वकत्वात् प्रथमजं विज्ञानम् । ब्रह्म उपासते ध्यायन्ति । तस्मिन् विज्ञानमये ब्रह्मणि अभिमानं कृत्वा उपासते इत्यर्थः। तस्मात्ते महतो ब्रह्मण उपासनात् ज्ञानैश्वर्यवन्तो भवन्ति । तच्च विज्ञानं ब्रह्म चेद् यदि वेद विजानाति । न केवलं वेदैव तस्माद् ब्रह्मणश्चेन्न प्रमाद्यति - बाह्येष्वेव[३]अनात्मसु

---

१. 'श्रद्धापूर्वकम्' वा

२. 'सर्ववृत्तीनां' वा ॥

३. एवकाररहितः पाठः वा ॥

आत्म (त्व?) भावितत्वात्[१] प्राप्तं विज्ञानमये ब्रह्मणि आत्मभावनायाः प्रमदनम्। तन्निवृत्त्यर्थमुच्यते 'तस्माच्चेन्न प्रमाद्यति' इति। अन्नमयादिषु आत्मभावं हित्वा केवले विज्ञानमये ब्रह्मणि आत्मत्वं भावयन्नास्ते चेत् - इत्यर्थः । ततः किं स्यादिति? उच्यते । शरीरे पाप्मनो हित्वा । शरीराभिमाननिमित्ता हि सर्वे पाप्मानः। तेषां च विज्ञानमये ब्रह्मणि आत्माभिमानात् निमित्तापाये हानम् उपपद्यते। छत्रापाय इव छायापायः[२] । तस्मात् शरीराभिमान-निमित्तान् सर्वान् पाप्मनः शरीरप्रभावान् शरीर एव हित्वा विज्ञानमय ब्रह्मस्वरूपापन्नः, तत्स्थान् सर्वान् कामान् विज्ञानमयेनैवात्मना समश्नुते सम्यग्भुङ्क्ते इत्यर्थः ॥१२॥

८५. विज्ञानमयश्लोकावतारः -

'तदप्येष श्लोको भवति' इति ब्राह्मणवाक्यस्य तात्पर्यमाह - **'यथान्नमयादीनाम्'** इत्यादिना । यथा अन्नमयादीनां आविद्यक परिच्छिन्नबुद्धिपरित्याजनार्थं विराडाद्यभेदरूपतद्याथात्म्यप्रकाशकाः श्लोका मन्त्राः, एवं विज्ञानमयस्यापि आविद्यकव्यष्टिबुद्धिपरित्याजनार्थम् आधिदैविकसमष्टि-

१. 'आत्मा भावितः तस्मात्' वा ॥

२. 'छायायाः' वा ॥

बुद्ध्युपाधिकहिरण्यगर्भाभिन्नत्वतद्याथात्म्यप्रकाशक एष श्लोको भवतीत्यभिप्रायः। यद्यपि मनोमयस्यापि समष्टिमनोमयरूपहिरण्यगर्भाभेद एव याथात्म्यम् तथापि संकल्पविकल्पाद्यात्मकवृत्तिप्राधान्येन 'मनोमयः' इति सकलवेदार्थग्रहणविवक्षया तत्र व्यपदेशः, इह पुनरध्यवसायात्मकवृत्तिप्राधान्येनानुष्ठेयनिश्चयविवक्षया विज्ञानमय इति व्यपदेश इत्येतावान् विशेषः । अत्र श्लोके विज्ञानस्य यज्ञकर्तृत्वं संकीर्तितं सर्वचोदनार्थविषयककर्तृत्वोपलक्षणार्थं वेदितव्यम् । ब्रह्मविजिज्ञासार्थ-शमदमाद्यनुष्ठानविषयकाध्यवसितेरपि विज्ञानमयधर्मत्वाविशेषात्। अत एवाह - **कर्माणि च तनुते** इति ॥

## ८७. विज्ञानस्य कर्तृत्वविषये आक्षेपसमाधाने -

'विज्ञानं यज्ञं तनुते' इत्यादिवाक्यद्वयस्य तात्पर्यमाह - **'यस्माद्विज्ञानकर्तृकं सर्वम्'** इत्यादिना । ननु विज्ञानकर्तृकत्वमिदं किं व्यष्टिविज्ञानापेक्षयोच्यते, किं वा समष्टिविज्ञानापेक्षया? किं चातः ? यदि तावद्व्यष्ट्यपेक्षया, न तर्हि विज्ञानमय आत्मा ब्रह्मेति बुद्धिं धारयेत् । न हि संसारी विज्ञानात्मा ब्रह्मबुद्ध्यर्ह इति । कथं च विज्ञानस्य करणस्यैव सतो यज्ञकर्तृत्वमिति वक्तव्यम् । अथ समष्ट्यपेक्षया, कथं तस्य यज्ञतायित्वम् ? न हि हिरण्यगर्भस्य यज्ञादिकर्तव्यं समस्ति । तस्य कृतकृत्यत्वात्। न वा तद्विज्ञानस्य करणमात्रस्येति चेत् । नैष दोषः । उभयथाप्युपपत्तेः। कथम् ? यदि तावद्विज्ञानात्मापेक्षयैतदुच्यत इति कल्प्यते, तदा विज्ञानमयस्यैव ब्रह्मदृष्ट्योपासनं कर्तव्यमिति विधीयते। न ह्यब्रह्मणि ब्रह्मदृष्टिर्विधीयमाना नोपपद्यत इति शक्यं प्रत्यवस्थातुम् । श्रुतेरनतिशङ्क्यत्वात्। अतो न दोषः । अथवा समष्टिबुध्यात्मन एव सर्वव्यापकत्वात् तस्यैवेद यज्ञकर्तृत्वमुपचर्यते इति तदुपासनमेवात्र विवक्ष्यते इति युक्ततरम् । अतो न दोषः । अस्मिन् पक्षे 'विज्ञानं यज्ञं तनुते' इति न करणव्यपदेशः । 'विज्ञानेन इति करणविभक्त्या निर्देशादर्शनात् । कर्तृसमानाधिकरण्यनिर्देशाद् विज्ञानवत एवायं विज्ञानशब्देन व्यपदेश इति गम्यते। अस्ति चात्र प्रयोजनमेवं निर्देशे । यस्मादिदं कर्तृत्वमात्मनो न स्वतः, किं तु विज्ञानोपाधिकृतमेवेति मन्यते श्रुतिः । न हि केवलस्य निरुपाधिकस्याऽऽत्मनः कूटस्थस्य कर्तृत्वमुपपद्यते, श्रद्धाद्यवयववत्त्वं वा । ये तु

श्रद्धादिज्ञानविशेषाणामात्मधर्मत्वमुपयन्ति ते भ्रान्ताः, सुषुप्तसमाध्यादिषु तादृशधर्मवत्त्वस्य वा कर्तृत्वभोक्तृत्वयोर्वा अनुपलब्धेरिति भाष्यकारैरेवान्यत्र शिक्षिता इत्यास्तां तत्तावत् । एवं च कर्तृत्वांशस्य बुद्धेरेवोपपत्तेः, सर्वकारकाणां स्वस्वव्यापारेषु कर्तृत्वस्यावश्यंभावित्वात्, विज्ञप्त्यंशस्य च कूटस्थत्वात्कर्तृत्वानुपपत्तेः, 'विज्ञानं यज्ञं तनुते' इति कर्तृत्वांशप्राधान्येनायं विज्ञानमयस्य समारोपितकर्तृत्वव्यपदेश इति निरवद्यम् । तदेवं यज्ञकर्तृत्ववचनमिदं व्यष्टिविज्ञानापेक्षयेत्यङ्गीकारे तावन्न दोषः । समष्टिविज्ञानापेक्षयेत्यङ्गीकारेऽप्यदोष एव । कथम् ? तस्यापि हिरण्यगर्भस्य कार्यसिसृक्षया 'स मनसा वाचं मिथुनं समभवत्' (बृ. १-२-४) इति त्रय्यालोचनपूर्वमण्डक्रमेण विराट्त्वमापन्नस्य 'सोऽकामयत भूयसा यज्ञेन भूयो यजेयेति' (बृ. १-२-६) इति मानसाश्वमेधकर्तृत्वस्य श्रावितत्वात्, श्रुत्यन्तरे । अत उभयथापि दोषाभावाद् युक्तमेवोक्तं विज्ञानं यज्ञं तनुत इतीत्यलमस्थाने चोद्येन ॥

## ८८. समष्टिविज्ञानस्तुतिः -

अत एव समष्टिविज्ञानस्तुतिमाह **किञ्च विज्ञानमित्यादिना भवन्तीत्यन्तेन**। सर्वे देवा अग्न्यादयो विज्ञानमेव हिरण्यगर्भं ज्येष्ठं प्रागुक्तविधया विराजोऽपि पूर्वमेवाव्याकृतव्याकरणप्रक्रियायां प्रथमजत्वात् मनइन्द्रियादि-सर्वप्रवृत्तीनां विज्ञानपूर्वकत्वाद्वा-ज्येष्ठं ब्रह्म उपासते सर्वात्मना, स्वपितरमपि विराजमतीत्य । 'ते देवाः सत्यमेवोप्रासते' (बृ. ५-४-१) इति श्रुत्यन्तरावधारणात्। तदेवं महतो ब्रह्मणस्तदात्मभावं गत्वा ध्यानादेव ते ज्ञानैश्वर्यवन्तः परोक्षविषयेष्वपि ज्ञानवन्तोऽणिमाद्यैश्वर्यवन्तश्च महान्त एव भवन्ति । 'ज्ञानमप्रतिघं यस्य' (?)[१] इत्यादिस्मरणाद्धि विज्ञानब्रह्म ज्ञानाद्यतिशयवदिति गम्यते । तदुपासनात्तदनुगुणमेव तेषां फलं भवतीति युक्तमिति भावः ॥

## ८९. विज्ञानब्रह्मोपासनाफलम् -

तदेवं स्तुत्या महीकृतस्य विज्ञानस्योपासनादधुनातनानामपि महत्फलं

१. एतद्वाक्यं बृहदारण्यकभाष्ये (१-४-२) समुदाहृतं यद्यपि वायुपुराणे (१-१-४) उपलभ्यते तथापि नैव तत्पुराणं भाष्येषु क्वचिदप्युदाहृतमिति मृग्य एवैतदाकर इति भाति ॥

भवतीत्याह - **'तच्च विज्ञानम्'** इत्यादिना **'सम्यग्भुङ्क्त इत्यर्थः'** इत्यन्तेन । निगदव्याख्यातं भाष्यम् । अत्र समष्टिविज्ञानात्मानं स्वात्मत्वेन विदितवतः पूर्वकोशप्रविलापनं फलम् । ततश्च विज्ञानब्रह्मविदः सर्वात्मभावे सति यत्र क्वचिद्देवर्ष्यादिषूत्कृष्टकामभोगः प्राप्तः, स सर्वस्तस्यैवेति तज्ज्ञानं स्तूयत इति स्पष्टमेव। उपासकस्यापि अनारब्धकार्ययोः पाप्मशब्दवाच्ययोः पुण्यपापयोर्विद्यासामर्थ्यादेव क्षये सति, आरब्धकार्ये ते उपभोगेन क्षपयित्वा शरीरपातानन्तरं ब्रह्मलोके हार्दविद्यावन्त इव संकल्पादेव सर्वान् कामान् समश्नुत इति कण्ठोक्तं फलम् । एवं चं यथा अन्नमयोपासनेन विराडात्मना सर्वान्नावाप्तिः, प्राणमयोपासनेन प्राणात्मना सर्वायुष्ट्वप्राप्तिः, मनोमयोपासनेन च वेदात्मात्मना नित्याभयप्राप्तिः, एवं विज्ञानमयोपासनेन समष्टिविज्ञानात्मनैव दुरितहानं सर्वकामभोगावाप्तिश्च निश्चितं फलमित्यभिप्रायः ॥१२॥

**तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥१३॥**

**४१. तस्य पूर्वस्य मनोमयस्य आत्मा एष एव शारीरे मनोमये भवः । कः ? य एष विज्ञानमयः ॥१३॥**

॥ श्रुतिः ॥

तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमयः । तेनैष पूर्णः। स वा एष पुरुषविध एव । तस्य पुरुषविधताम्। अन्वयं पुरुषविधः । तस्य प्रियमेव शिरः । मोदो दक्षिणः प्रक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा ॥१४॥

## आनन्दमयात्मा

४२. तस्माद्वा एतस्माद् इत्युक्तार्थम् । 'आनन्दमय' इति कार्यात्मप्रतीतिः । अधिकारात्, मयट्शब्दाच्च । अन्नादिमया हि कार्यात्मानो भौतिका इहाधिकृताः । तदधिकारपतितश्चायम् आनन्दमयः। मयट् चात्र विकारार्थे दृष्टः । यथा 'अन्नमयः' इत्यत्र। तस्मात् कार्यात्मा आनन्दमयः प्रत्येतव्यः । संक्रमणाच्च । 'आनन्दमयमात्मानमुपसंक्रामति' (तै. २-८) इति वक्ष्यति । कार्यात्मनां च संक्रमणम् अनात्मनां दृष्टम् । संक्रमणकर्मत्वेन च 'आनन्दमय आत्मा' श्रूयते। यथा 'अन्नमयमात्मानमुपसंक्रामति' (तै. २-८) इति । न च आत्मन एवोपसंक्रमणम्, अधिकारविरोधात् । असंभवाच्च । न ह्यात्मनैव आत्मन उपसंक्रमणं संभवति । स्वात्मनि भेदाभावात् । आत्मभूतं च ब्रह्म संक्रमितुः । शिरआदिकल्पनानुपपत्तेश्च। न हि यथोक्तलक्षणे आकाशादिकारणे

१. 'अब्रह्मप्रतिपत्त्यर्थत्वात्' आ ॥

**अकार्यपतिते शिरआद्यवयवरूप (क?) कल्पना उपपद्यते । 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने' (२-७) 'अस्थूलमनणु ....' (बृ. ३-८-८) 'नेति नेत्यात्मा'(बृ. ३-९-२६) इत्यादिविशेषापोहश्रुतिभ्यश्च। मन्त्रोदाहरणानुपपत्तेश्च । न हि प्रियशिरआद्यवयवविशिष्टे प्रत्यक्षतोऽनुभूयमाने आनन्दमये आत्मनि ब्रह्मणि 'नास्ति ब्रह्म' इत्याशङ्काभावात् 'असन्नेव स भवति । असद्ब्रह्मेति वेद चेत्' (२-६) इति मन्त्रोदाहरणम् उपपद्यते । 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यपि चानुपपन्नं पृथग् ब्रह्मणः प्रतिष्ठात्वेन ग्रहणम् । तस्मात् कार्यपतित एवानन्दमयः, न पर एवाऽऽत्मा ।।**

## १०. विज्ञानमयः स्वाभ्यन्तरानन्दमयेन पूर्णः -

**'तस्माद्वा'** इत्यारभ्य **'तेनैष पूर्णः'** इत्यादि वाक्यद्वयं पूर्ववत् सुव्याख्यानम्। तस्मात् समष्टिबुद्धिविज्ञानोपाधिकहिरण्यगर्भाभिन्नत्वेन प्रतिपादितात् एतस्माद्विज्ञानमयात् अन्योऽन्तरः तद्विलक्षणस्तस्याप्यभ्यन्तर आनन्दमयाख्योऽस्ति। तेन चाऽऽनन्दमयेनैष विज्ञानमयः पूर्णः संव्याप्त इति ।।

## ११. आनन्दमयसतत्वे वृत्तिकारमतम् -

तत्र कोऽयमानन्दमय इति विमर्शनीयम् । किमयं परमेव ब्रह्म यत्प्रकृतं 'सत्यं ज्ञानमनन्तम्' (२-१) इति, किं वा अन्नमयादिवदेव कार्यात्मा कश्चिदिति। किं

चातः ? यदि तावदयं परमेव ब्रह्म, तदा यो वेद निहितं गुहायामिति प्रकृत्य, अन्नमयादिपरम्परया एतत्प्रतिपादनार्थमेव श्रुतेः प्रवृत्तिः, एतद्वेदनादेव च सर्वकामावाप्तिरभिप्रेता - इति स्यात् । अथायं कार्यात्मैव कश्चित्, तदा अस्मादर्थान्तरमेव परं ब्रह्म । तदेव च निहितं गुहायामिति तदेव प्रत्यगात्मत्वेन वेदनीयम्, तद्विद्ययैव च सर्वकामावाप्तिः परमपुरुषार्थ इति स्यात् । सर्वमेतच्छास्त्रप्रामाण्याद् भविष्यति । अतो विमर्शनीयमेतत् ।

तत्र **वृत्तिकाराः** केचिन्मन्यन्ते स्म-वाक्यशेषे आनन्दशब्दस्य ब्रह्मवाचकस्य बहुशोऽभ्यासात्, 'एष ह्येवानन्दयाति' (२-७) इति चास्यैवानन्दहेतुत्वकथनात्, 'सत्यं ज्ञानम्' इति मन्त्रे प्रकृतस्यैवात्रब्राह्मणे उपसंहारः क्रियत इत्येकवाक्यतायाम् अस्मत्पक्षोपपत्तेः, 'यदा ह्येवैष एतस्मिन् .... अभयं प्रतिष्ठां विन्दते' (२-७) इति चास्मिन्नेव जीवस्य तादात्म्यनिष्ठया अभयप्रतिष्ठोपदेशदर्शनात्, पूर्वेष्विव पर्यायेषु एतस्मादन्यस्यान्तरस्यात्मनोऽनुपदेशाच्च परमात्मैवायं सर्वान्तरत्वेनोपदिष्ट आनन्दमय इति ॥

## ९२. आनन्दमयः कार्यात्मैव -

तदेतन्मतं निराकर्तुमारभते - **आनन्दमय इति कार्यात्मप्रतीतिरिति** । 'न तु सत्यज्ञानानन्तलक्षणस्य परब्रह्मणः' इति शेषपूरणमत्रकर्तव्यम् । एवं ह्युत्तरत्रोपन्यस्यमानानां हेतूनां यथायोगं योजना आञ्जसी भविष्यतीति । तत्र हेतूपन्यासः (१) 'अधिकारान्मयट्शब्दाच्च' इति । अन्नमयादीन् भूतविकारानधिकृत्य विकारार्थकमयट्शब्दं सर्वत्र प्रयुङ्क्ते । तदधिकारपतितश्चायमानन्दमय इत्यमुनापि विकारात्मनैव केनाचिद्भाव्यमिति श्लिष्यत इत्यर्थः । (२) अथ द्वितीयो हेतुः - **संक्रमणाच्चेति** । 'एतमानन्दमयमात्मानमुपसंक्रामति' (२-८) इति संक्रमणकर्मत्वेन निर्दिश्यमानोऽयमानन्दमयः, तथा निर्दिश्यमानान्नमयादिवत् कार्यात्मैव भवितुमर्हति। तदधिकारग्रस्तत्वात् । ब्रह्मणश्चात्मत्वेन प्रक्रान्तस्य आत्मैवोपसंक्रमणासंभवादित्यभिप्रायः । (३) अथ तृतीयो हेतुः - **शिरआदिकल्पनानुपपत्तेश्चेति**। कल्प्यन्ते ह्यत्रावयवाः 'तस्य

प्रियमेव शिरः' इत्यादिना । सा चेयं कल्पना कार्यात्मन एवोपपद्यते । न तु ब्रह्मणोनिरवयवस्य । उपलक्षणमिदम् । 'शारीर आत्मा' इति शारीरत्वेन निर्देशानुपपत्तेश्चेत्यपि द्रष्टव्यम् । नन्वतीतानन्तरोपाधिजनिता शिरआदिकल्पना भविष्यति । शारीरत्वव्यपदेशाच्च अन्नमयादिशारीरपरम्परया प्रदर्श्यमानत्वादुपपत्स्यत इति चेत् । नेति ब्रूमः । प्रयोजनाभावात् । न हि ब्रह्मणि विज्ञानमयोपाधिजनितशिरआदिकल्पनया शारीरत्वव्यपदेशेन वा किञ्चित् प्रयोजनमस्ति, अतीतातीततरपर्याययोस्तु तत्र बुद्धिस्थिरीकरणं तत्तदवयववत्वेनोपासनेन लोकान्तरे वेदात्मबुद्ध्यात्मप्राप्तिर्वा प्रयोजनं संभाव्यते। शारीरत्वव्यपदेशेन च तस्यैव पूर्वकोशशरीरे स्थितत्वेनात्मभावदाढर्ये सति पूर्वपूर्वकोशे आत्मबुद्धिपरित्याजनं प्रयोजनम् । इह पुनः सत्यज्ञानानन्तत्वेन प्रक्रान्तत्वेन ब्रह्मणः शिरआद्यवयववत्वकल्पने शारीरत्वव्यपदेशे च मन्त्रब्राह्मणयोरनेकवाक्यतैवानिष्टा प्रादुःष्यादिति महद्वैषम्यम् । यथोक्तलक्षणे आकाशादिकारणे ब्रह्मणि शिरआदिकल्पनाद्यनुपपत्तिर्न युक्तिमात्रात्, अपि तु 'अदृश्येऽनात्म्ये' (२-७) इत्याद्युपसंहारे, तथा 'अस्थूलमनणु' (बृ. ३-८-८) इत्यादिश्रुत्यन्तरेषु च विशेषापोहनाच्चैतदवगम्यते । 'स एष नेति नेत्यात्मा' (बृ. ३-९-२६- ४-२-४, ४-४-२२, ४-५-२५) इति च पदे पदे प्रत्यस्तमितसर्वविशेषस्यैवाऽऽत्मत्वेनोपदेशाच्च । तस्मात्सूक्तमेवोक्तं शिरआदिकल्पनानुपपत्तेश्चेति । (४) अथात्र चतुर्थो हेतुः - **मन्त्रोदाहरणानुपपत्तेश्चेति।** प्रियआद्यवयववान् ह्यात्मा सर्वस्यापि स्वसंवेद्यः । न चेदृशे 'असद्ब्रह्मेति वेद चेत्' (२-६) इति नास्तित्वशङ्कोन्मिषतीति 'असन्नेव स भवति । असद्ब्रह्मेति वेद चेत्' इत्यादिमन्त्रोदाहरणं श्रुत्या असमञ्जसमेवोक्तमिति व्यक्तं कल्पितं स्यादानन्दमयब्रह्मवादिनां पक्षे । निर्विशेषब्रह्मविषयकत्वे तु कल्पनम् उपपद्यते। संभाव्यते हि तत्र असद्ब्रह्मेति शङ्का स्थूलमतीनामिति । तस्मात्, आनन्दमयस्य इति कार्यात्मैव प्रत्येतव्यः । (५) अस्ति पञ्चमोऽपि हेतुरत्र - **'ब्रह्म पुच्छं प्रतिष्ठा' इत्यपि चानुपपन्नमिति** । न हि आनन्दमयस्य ब्रह्मत्वे तस्यैव ब्रह्मणः स एव पुच्छत्वेन पृथग्गृह्येतेति । निगमयति - **'तस्मात्कार्यपतित एवाऽऽनन्दमयो न पर एवाऽऽत्मा'** इति । तथा च, आनन्दमयान्तेभ्योऽविद्ययात्मत्वेन परिकल्पितेभ्योऽन्यदेवेदं ब्रह्म यत्प्रक्रान्तं 'सत्यं ज्ञानमनन्तमिति' उपसंहृतं च 'ब्रह्म

पुच्छं प्रतिष्ठा' इति स्वशब्देनैव । यानि तु लिङ्गान्यानन्दाभ्यासादीनि वृत्तिकारैः प्रदर्शितानि तानि सर्वाणि यथासंभवमेतस्मिन्नेव ब्रह्मणि संगमनीयानि । आनन्दमयस्य कार्यात्मत्वसाधकयुक्तीनां प्रबलत्वादेवेति भावः ॥

## ९३. आनन्दमयस्योपासनाप्रात्यत्वं ब्रुवतां मते दोषः -

येऽप्यर्वाचीनवेदान्तिनो 'ब्रह्मविदाप्नोति', 'यो वेद निहितं गुयायाम्' इति च मन्त्रब्राह्मणयोरुपासनैव विवक्षितेति स्वीकृत्य 'सोऽश्नुते सर्वान् कामान् सह । ब्रह्मणा विपश्चिता' इत्यत्र ब्रह्मणोऽपि भोग्यत्वं कामानामिवोपासनाफलमुपदिष्टमिति मन्यन्ते, सर्वैः कामैः सह ब्रह्माश्नुते, सर्वगुणान्वितं ब्रह्माश्नुत इत्युक्तं भवतीति व्याचक्षाणाः, तेषां चिदचिच्छरीरकं ब्रह्मेत्यङ्गीकृत्यैव श्रुतियुक्तिविरुद्धं ब्रह्मण आप्यत्वं भोग्यत्वं चास्थितानां न किञ्चिदपि दुष्करम् । ते हि 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादीनि सुप्रसिद्धानि वाक्यानि विद्राव्य तत्स्थाने चिदचिच्छरीरकं ब्रह्मेत्येतदेव लक्षणवाक्यत्वेनाभिषेचयितुमीहन्ते । चिदचितोः संबन्धं चिदचिद्विलक्षण-चैतन्यस्वरूपं वा मनसापि चिन्तयितुमशक्यं विकल्पयन्त्यनपत्रपाः। 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३-२-९), 'बहवो ज्ञानतपसा पूता मद्भावमागताः' (गी. ४-१०), 'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते । आत्मनो ब्रह्मणे भेदमसन्तं कः करिष्यति॥' (वि.पु. ६-७-९६) इत्यादिश्रुतिस्मृतिपुराण-वाक्यान्यपि पृष्ठतः कृत्वा श्रुत्यादिषु क्वचिदप्यनाघ्रातचरं युक्तिविरुद्धं शरीरित्वेनापृथग्भूतस्य नित्यप्राप्तस्यैव ब्रह्मणः शरीरभूतजीवेनोपासनाप्राप्यत्वं तद्भोग्यत्वं च कल्पयन्तीत्यलमतिसाहसिकैस्तैर्विवादेन॥

**४३. 'आनन्दः' इति विद्याकर्मणोः फलम् । तद्विकार आनन्दमयः। स च विज्ञानमयादन्तरः[१]। यज्ञादिहेतोर्विज्ञान-मयादस्यान्तरत्वश्रुतेः[२] । ज्ञानकर्मणोर्हि फलं**

---

१. 'आन्तरः' वा ॥

२. 'विज्ञानमयस्यान्तरश्रुतेः' इति आ ॥ पाठाद्वरम् एष एव (वा॥) पाठो गृहीतः॥

**भोक्त्रर्थत्वादन्तरतमं स्यात्। अन्तरतमश्चाऽऽनन्दमयआत्मा पूर्वेभ्यः । विद्याकर्मणोः प्रियाद्यर्थत्वाच्च । प्रियादिप्रयुक्ते हि विद्याकर्मणी । तस्मात् प्रियादीनां फलरूपाणाम् आत्मसंनिकर्षात् विज्ञानमयादस्य[२] अभ्यन्तरत्वम् उपपद्यते । प्रियादिवासनानिर्वृत्तो हि[३] आनन्दमयो विज्ञानमयाश्रितः स्वप्न उपलभ्यते ॥**

## १४. आनन्दमयस्वरूपनिर्धारणम् -

कस्तर्ह्ययमानन्दमय आत्मा अत्राभिप्रेत इत्येतदनुभवमारोपयितुम् आनन्दशब्दार्थं तावदाह - **आनन्द इति विद्याकर्मणोः फलम् इति** । यथा लोके भुजेः फलं तृप्तिः सर्वानुभवसिद्धा, एवमेव शास्त्रीययोरपि कर्मोपासनयोः फलं सुखापरपर्यायमत्रानन्दशब्दवाच्यम् । तच्च सुखमन्तःकरणवृत्तिरूपमेवेति तद्विकारस्तदुपाधिलक्षणो भोक्ता आनन्दमय इत्युच्यते । न हि शरीरेन्द्रियमनोवियुक्तस्य केवलात्मनो भोक्तृत्वमस्ति । 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' (क. १-३-४), 'ध्यायतीव लेलायतीव' (बृ. ४-३-७) इति च श्रुत्यन्तरात् । स चैष **विज्ञानमयादन्तरः** । यज्ञादिकर्ता हि श्रद्धाद्यवयवो विज्ञानोपाधिः पूर्वत्र विज्ञापितः । इदानीं तु तत्कर्मफलविज्ञानोपाधिर्विज्ञाप्यते । कथं विज्ञानमयादस्यान्तरत्वमित्यत्र श्रुत्यर्थापत्तिं तावदाह - **विज्ञानमयादस्यान्तरत्वमत्र** श्रूयते इत्यादिना । विज्ञानमयश्च यज्ञादिकर्मज्ञानतदनुष्ठानहेतुरिति प्रसिद्धम् । ज्ञानकर्मणोश्च फलमानन्दः । स च भोक्त्रर्थत्वात् ज्ञानकर्मापेक्षया संनिकृष्ट

---

१. विज्ञानमयस्याभ्यन्तरत्वम्' इति आ ॥ पाठोऽसाधुः ॥

२. 'निर्वर्तितो ह्यात्मा' इति वा ॥

इति युक्तं श्रुतिप्रामाण्यान्यथानुपपत्या आनन्दमयस्यान्तरत्वमित्यर्थः । इतश्च । **अन्तरतमश्चानन्दमय आत्मा** । पूर्वेभ्यः सर्वेभ्योऽप्यन्नमयादिभ्योऽन्तरतमो ह्ययमानन्दमयः श्रूयते । शरीरचेष्टासंकल्पक्रियानुष्ठानेभ्योऽन्तरतमं फलमिति च युक्तम्। तस्मादपि फलविज्ञानमेवात्रानन्दः । तदुपाधिकश्चाऽऽनन्दमय इति श्लिष्यते। इतश्चानन्दमयस्यान्तरतरत्वं विज्ञानमयादिति युज्यते । कुतः ? **विद्याकर्मणोः प्रियाद्यर्थत्वाच्च** । प्रियादिफलप्रयुक्तो हि तत्प्राप्त्यर्थं विद्याकर्मणी अनुतिष्ठति । असति प्रयोजके फले कस्यापि प्रवृत्त्यनुपपत्तेः । तस्मात् **प्रियादीनां फलरूपाणाम्** - आनन्दमयावयवत्वेन श्रुतानां भोक्त्रर्थत्वेन आत्मसंनिकर्षात् विज्ञानमयादप्यस्यानन्दमयस्याभ्यन्तरत्वमित्युपपद्यते । अनुभवाच्चैतदेव-मध्यवसातव्यमित्याह - **प्रियादिवासनानिर्वृत्तो** हि इत्यादिना । स्वप्ने हि प्रियादिवासनानिर्वृत्तो तद्वासनाभिरेव प्रत्युपस्थापितो भोक्ता अनुभूयते विज्ञानमयाश्रितः । 'विज्ञानमयाश्रिते स्वप्ने' इति भाष्यपाठं ये कल्पयन्ति, तेषां जागरितसुषुप्तयोर्न तदाश्रितत्वं स्यात् । विज्ञानमय एव ह्यवस्थात्रयभोक्तृत्वमात्मनो मन्यमानः कर्मसु प्रवर्तत इति । प्रथमान्तपाठ एव च वार्तिककाराणामपि संमतः 'प्रियादिवासनारूपो ह्यानन्दमय ईक्ष्यते । विज्ञानमयसंस्थो यः स्वप्ने वै स्वप्नदर्शिभिः' (तै. वा. ३-३४३) इति । तदेवमनुभवतोऽपि विज्ञानमयादभ्यन्तरत्वमानन्दमयस्य स्वप्ने । तेनावगम्यते प्रियादिवृत्तिनिष्पन्नस्यैव जागरितेऽपि भोक्तृत्वं विज्ञानमयादभ्यन्तरत्वेनानुभवश्चेति । तस्मात्कर्तुरप्यन्तरतरोऽयं भोक्ता उपाधिलक्षण एवानन्दमयत्वेनात्र निर्दिश्यते कर्तर्यात्मबुद्धिपरित्याजनार्थम् । भोक्तृत्वादपि तु व्यावर्तनं केवलात्मनो 'ब्रह्म पुच्छं प्रतिष्ठा', 'एतमानन्दमयमात्मानमुपसंक्रामति (२-८) इत्येतस्मादेव सेत्स्यतीति सर्वमनाकुलम् ॥

## आनन्दमयस्य पुरुषविधत्वम्

**४४. तस्य आनन्दमयस्यात्मनः इष्टपुत्रा-दिदर्शनजं प्रियं शिर इव शिरः । प्राधान्यात् । मोद इति प्रियलाभनिमित्तो हर्षः। स एव च**

प्रकृष्टो हर्षः प्रमोदः । 'आनन्दः' इति सुखसामान्यम् आत्मा प्रियादीनां सुखावयवानाम् । तेष्वनुस्यूतत्वात्। आनन्द इति परं ब्रह्म । तद्धि शुभकर्मणा प्रत्युपस्थाप्यमाने पुत्रमित्रादिविषय-विशेषोपाधौ अन्तःकरणवृत्तिविशेषे तमसा अप्रच्छाद्यमाने प्रसन्ने अभिव्यज्यते । तद् विषयसुखम् इति प्रसिद्धं लोके । तद्वृत्ति-विशेषप्रत्युपस्थापकस्य कर्मणोऽन-वस्थितत्वात् सुखस्य क्षणिकत्वम् । तद् यदा[1] अन्तःकरणं तपसा तमोघ्नेन विद्यया ब्रह्मचर्येण श्रद्धया च निर्मलत्वम् आपद्यते यावद्यावत्, तावत्तावद्[2] विविक्ते प्रसन्ने अन्तःकरणे आनन्दविशेष उत्कृष्यते विपुलीभवति । वक्ष्यति च 'रसो वै सः। रसँ ह्येवायं लब्ध्वाऽऽनन्दी भवति । एष ह्येवानन्दयाति' (२-७) इति[3]। 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ. ४-३-३२)

---

१. 'तद्यदन्तःकरण' वा।।, 'तद्यथान्तःकरण' इति च पाठौ ।।

२. 'यावत् तावत्' वा ।।

३. मुद्रितपुस्तकेष्वविद्यमानमपीदं पदमत्रापेक्षितम् ।।

**इति च श्रुत्यन्तरात्[१] । एवं च कामोपशमोत्कर्षापेक्षया शतगुणोत्तरोत्तरोत्कर्ष आनन्दस्य वक्ष्यते । एवं चोत्कृष्यमाणस्य आनन्दमयस्यात्मनः परमार्थब्रह्मविज्ञानापेक्षया ब्रह्म परमेव - यत् प्रकृतं सत्यज्ञानानन्तलक्षणं, यस्य च प्रतिपत्त्यर्थं पञ्च अन्नमयादिकोशा[२] उपन्यस्ताः, यच्च तेभ्योऽभ्यन्तरम्[३], येन च ते सर्वे आत्मवन्तः, तद् ब्रह्म पुच्छं प्रतिष्ठा । तदेव च सर्वस्याविद्यापरिकल्पितस्य द्वैतस्य अवसानभूतम् अद्वैतं ब्रह्म प्रतिष्ठा ॥१४॥**

## ९५. पुरुषविधताश्रुतितात्पर्यम् -

तस्यैवंनिर्धारितस्वरूपस्य भोक्तुरानन्दमयस्यापि प्राणमयादिवत्पुरुषविधतामाह श्रुतिः - 'स वा एष पुरुषविध एव' इत्यादिना । अत्र पुरुषविध एवेत्यवधारणम्, तस्य विज्ञानमयस्य पुरुषविधतामन्वयं पुरुषविधः इति विज्ञानमयानुसरणवचनं च विज्ञानमयान्तात्मवदस्यापि शरीराभिमानसत्त्वात्तत्कृतसविशेषत्वमस्त्येवेति द्रढयित्वा तस्मिन् परब्रह्मत्वं नाकाङ्क्षितव्यमिति प्रतिबोधनार्थमित्यनुसंधेयम् । न हि सत्यज्ञानानन्तरूपे ब्रह्मणि पुरुषविधत्वमुपचितापचितसुखत्वं वा शक्यसंभावनमिति ॥

---

१. किमिदं 'इति च श्रुत्यन्तरे' इत्यस्य स्थाने ?

२. अन्नादिमया कोशाः वा ॥

३. 'तेभ्य आभ्यन्तरम्' वा ॥

## १६. आनन्दमयस्य शिरः, पक्षौ च -

तदेतद्वाक्यद्वयं व्याख्यातप्रायं मन्वान आनन्दमयस्य पुरुषविधता प्रापकप्रियाद्यवयवस्वरूपविशेषं व्याकरोति - **तस्यानन्दमयस्यात्मन इष्टपुत्रादिदर्शनजं प्रियम्** इत्यादिना । अत्र दृष्टपुत्रादिविषयविशेष-स्वभावतारतम्यादानन्दस्यापि तारतम्यम्। दर्शनमात्रादेव प्रियवृत्त्युत्थानं तु पूर्वानुभवजनितवासनोद्बोधकृतस्मरणात्। अतो दर्शनजमित्युपलक्षणं स्मरणजत्वस्यापीति बोध्यम. । अत एवैवं वासनानिर्वृत्तत्वादस्य 'आनन्दमयः' इति विकारार्थकमयट्शब्दबोध्यत्वमिति ध्येयम्। 'एवं **मोदः प्रियलाभनिमित्तो** ऽः' इत्येतदपि लाभाभिमाननिमित्त इति व्याख्येयम्। न ह्यानन्दमयस्याध्यात्मिकस्य ऽज्ञानमयादप्यभ्यन्तरस्य साक्षादेव प्रियपुत्रादिलाभः समस्तीति । एवमेव च **स एव प्रकृष्टो हर्षः प्रमोद** इत्यपि । प्रकर्षश्च हर्षस्य पुनःपुनरावर्तनरूपचित्ताभोगात्। तदेवमयं प्रियमोदप्रमोदलक्षणाभिर्वृत्तिभिर्भूयोभूय आवर्त्यमानाभिः कोशकार इवात्मानं संवेष्टयतीत्यानन्दमय इत्यन्वर्थनामा संवृत्त इत्यनुक्रोशतीव संसारिणं श्रुतिः ॥

## १७. आनन्दमयस्यात्मा आनन्दसामान्यम् -

**आनन्द इति सुखसामान्यमात्मा** । प्रियादिषु सर्वत्र सुखसामान्यं अनुगतमस्त्येव, शरीरावयवेष्विवात्मा इति कृत्वा आनन्दस्तेषामात्मेत्युच्यते । तदाह **- तेष्वनुस्यूतत्वात् इति** ॥

अथ कोऽयमानन्दः सुखसामान्यं यद्विशेषत्वं प्रियादीनामित्यतस्त-त्सतत्त्वनिर्धारणार्थमाह - **आनन्द इति परं ब्रह्म** इत्यादि **शतगुणोत्तरोत्तरोत्कर्ष आनन्दस्य वक्ष्यते** इत्यन्तम् । इदमत्राकूतम् । यथैवात्मस्वरूपविज्ञानस्य तदाभासविशिष्टतत्तद्विषयकवृत्तिविशेषस्य चान्योन्याध्यासात् आत्मा 'विजानाति' इति व्यवहारभाग्भवति, एवमेव विज्ञानाभिन्ननिर्विशेषात्मानन्दस्वरूपस्य तच्छायापन्नप्रियादिलाभनिमित्तवृत्तेश्चान्योन्याध्यासात् आत्मा 'विषयं भुङ्क्ते, सुखी भवति' इति व्यवहारभाग्भवति । तस्यैतस्यानन्दच्छायापन्नवृत्तेस्तारतम्यं चानन्दस्यैव

तारतम्यमभिमन्यते लोक इति । तदेतद्विवृण्वन्नाह - **तद्धि आनन्दरूपं ब्रह्म शुभकर्मणा प्रत्युपस्थाप्यमाने पुत्रमित्रादिविषयविशेषोपाधौ अन्तःकरणवृत्तिविशेषे तमसा अप्रच्छाद्यमाने, प्रसन्ने अभिव्यज्यते । तद्विषयसुखमिति प्रसिद्धं लोके** इति। अयमाशयः । अन्तःकरणं कदाचित्तमसा आव्रियते । तदा आत्मस्वरूपभूतसुखच्छाया न तस्मिञ्जायत इति नैव लोकः सुखं सवेत्ति । अथवा यत्किञ्चित्तत्र सुखं निर्विकल्पं वेत्तीव, तदपि मोहनमेव भवति। तत्सुखं तामसमित्युच्यते। यथोक्तं **भगवता** 'यदग्रे चानुबन्धे च सुखं मोहनमात्मनः। निद्रालस्य प्रमादोत्थं तत्तामसमुदाहृतम्' (गी. १८-३९) इति । यत्तु केवलविषयेन्द्रियसंयोगात्संवेद्यते तत्प्रियभोगारम्भमपि दुःखोदर्कं भवति । तद्राजसं सुखमित्युच्यते । यदप्युक्तम् - 'विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् । परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥' (गी. १८-३८) इति । तदेतत्सुखं पूर्वकृत**शुभकर्मणा प्रत्युपस्थापितविषयविशेषोपाधिनिमित्तमिति तद्वृत्तिविशेषप्रत्युपस्थापकस्य कर्मणोऽनवस्थितत्वात्**, सुखस्यापि क्षणिकत्वम्, न चिरकालावस्थायित्वम् । यदा पुनस्तदन्तःकरणं तपसा, तमोघ्नेन, विद्यया, ब्रह्मचर्येण, श्रद्धया च निर्मलत्वमापद्यते तदा सात्विकं सुखं भवति । तच्च नैर्मल्यं कष्टसाध्यतपोविद्याद्युत्कृष्टसाधनपरिपाकासादितमिति चिरस्थायि भवति । यदप्युक्तं भवगतैव 'यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥'' (गी. १८-३७) इति विषमिव अत्यन्तायासपूर्वक वैराग्याद्यायत्तत्त्वात्, परिणामे ज्ञानवैराग्यादिपरिपाकजत्वादमृतोपमम् इत्यर्थः । तदेवं वृत्तिप्रतिफलितं सुखं निरूप्य तत्तारतम्यमपि हृदयं गमयति - तदेवम् **अन्तःकरणं निर्मलत्वमापाद्यते यावद्यावत् तावत्तावद्विविक्ते प्रसन्नेऽन्तःकरणे आनन्दविशेष उत्कृष्यते विपुलीभवतीति** । तदेवमनुभूयमानं लौकिकसुखतारतम्यं तत्तदिष्टप्रत्युपस्थापककर्मनिमित्तान्तःकरणवृत्तेरेवानन्द-स्वरूपात्मप्रतिच्छायासहितायाः, न त्वात्मानन्दस्य । यथा प्रतिबिम्बस्य स्फुटतास्फुटतातारतम्यं मुखच्छायाप्रतिग्राह्यादर्शस्यैव न मुखस्य, तद्वत् । यद्यपि चैतन्यसुखं न मूर्तम् मुखमिव। न च तस्य प्रतिच्छाया अचेतनेऽन्तःकरणे शक्यकल्पना, आदर्शे इव मुखस्य । तथापि यावद्यावदन्तःकरणम्

अपध्वस्तविषयवासनाकल्मषं भवति तपउपासनाब्रह्मचर्यश्रद्धादिभिर्निवृत्तिप्रधानैः साधनैः, तावत्तावत् सूक्ष्मतापादितं सत् आत्मस्वरूपसंनिकर्षं व्रजति, साधकश्चात्मानात्मान्योन्याध्यासविदूरगो भवतीति स्वात्मनः स्वरूपभूतं सुखं तत्त्वेनानध्यवसायाप्यनुभवितुं शक्नोत्यन्तःकरणवृत्तिद्वारेणेत्येतावन्मात्रं मुखादर्शदृष्टान्तेन विवक्ष्यत इत्यदोषः । तत्राभिव्यज्यमानानन्दोत्कर्षस्तु आदर्शस्वच्छताप्रयुक्तमुखविवक्तताग्दर्शनवद्वृत्तिनैर्मल्योत्कर्षनिमित्तः । स्वरूपानन्दस्तु ब्रह्मणो मुखवत्तथैवोत्कर्षापकर्षहीनोऽवतिष्ठत इति । नास्मत्कल्पनामात्रमिदं, किं तु श्रुतिपरिप्रापितमपीत्याह - **'वक्ष्यति च'** इत्यादिना। उदाहृतश्रुतौ 'रसो वै सः' इति परमात्मन आनन्दस्वरूपत्वं प्रतिपाद्य, अयं जीव एतमात्मन आनन्दं लब्ध्वैव स्वान्तःकरणे तदाभासमासाद्यैव आनन्दी भवति, सुखशब्दवाच्यं वृत्तिविशेषं भजते इत्युच्यते । श्रुत्यन्तरेऽप्येवमेवोक्तमिति तत्संगानमाह **'एतस्यैवानन्दस्य'** इत्यादिना। तत्रापि एतस्यैव प्राज्ञानन्यस्वरूपस्य परमानन्दस्य मात्रां कलां विषयेन्द्रियसंयोगकालविभाव्यां वृत्तिविशेषप्रतिफलितां प्राणिन उपजीवन्तीति स्वरूपसुखाभिव्यक्तिनिमित्तं लौकिकसुखं निर्दिष्टमिति भावः। तदेतल्लौकिकं सुखमत्रानन्दमयस्यात्मत्वेनोक्तं वैराग्यादिनिमित्तेनोत्कर्षतारतम्यं भजत इत्येतदपि वाक्यशेषानुवादेनोपष्टम्भयति **'एवं च कामोपशमोत्कर्षापेक्षया'** इत्यादिना। तत्र 'श्रोत्रियस्य चाकामहतस्य' इति प्रतिपर्यायं पूर्वपूर्वानन्दविषयकामोपहतिरहितस्य शतगुणोत्तरोत्तरोत्कर्ष आनन्दस्य श्रावयिष्यमाणः 'स एको ब्रह्मण आनन्दः' इति हिरण्यगर्भब्रह्मानन्दपर्यन्तः, साधनविशेषेणान्तःकरणनैर्मल्यापादनेन लभ्यः सुखोत्कर्ष इत्येतद्गमयतीत्यभिप्रायः ॥

## आनन्दमयस्य पुच्छं परं ब्रह्मैव -

अथेदानीमानन्दमयस्य पुच्छमवशिष्टं वक्तव्यम् । तदुच्यते - **'एवं चोत्कृष्यमाणस्य'** इत्यादिना **'अद्वैतं ब्रह्म प्रतिष्ठा'** इत्येतदन्तेन । अतीतानामन्नमयादीनां तत्तत्प्रतिष्ठाकारणं स्वसमानसत्ताकमेव तत्तधारभूतं पुच्छं दृष्टमितीहापि तथैव स्यादिति प्राप्तम् । तत्तु नैवात्रोपपद्यते । यस्माद् द्वैतविषयस्यानन्दस्य प्रतिष्ठाभूतं द्वैतविषये नैवोपलभ्यते न वा शक्यसंभावनम् । न

च 'स एको ब्रह्मण आनन्दः' (२-८) इति श्रुत्यैवानन्दपर्यवसानस्य हिरण्यगर्भे दर्शयिष्यमाणत्वात्, तस्मात्परस्य चोत्कर्षस्याभावात्, तस्यैवास्तु ब्रह्मणः पुच्छत्वमत्रापि विवक्षितं 'ब्रह्म पुच्छम्' इतीति शङ्कनीयम् । तस्यापि सर्वातिशाय्यानन्दभागिनः कालपरिच्छिन्नत्वात् प्रतिष्ठान्तरापेक्षाविशेषात् । श्रूयते हि तस्यापि ब्रह्मण उत्पत्तिः 'यो ब्रह्माणं विदधाति पूर्वम्' (श्वे. ६-१८) इति । 'तेषामिह न पुनरावृत्तिः' (बृ.मा. ६-१-१८) इति च श्रुतेः ब्रह्मलोकं गतानामपि ब्रह्मसमानानन्दवतां कल्पान्तरे पुनरावृत्तिर्गम्यते । 'इह' इति विशेषणसामर्थ्यात् । 'आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन' (गी. ८-१६) इति स्मृतेश्च । अयमपि ह्यानन्दः सत्वोत्कर्षाज्जायमानो न परमार्थानन्दसंस्पर्शी । अविद्ययैव हि विषयविषय्यविवेकलक्षणया सत्त्वगुणधर्मभूते ज्ञाने इव, एतस्मिन्नपि सुखे सक्तानि भवन्ति भूतानि ब्रह्मादीनि । यथोक्तं भगवता 'तत्र सत्वं निर्मलत्वात्प्रकाशक-मनामयम्। सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥' (गी. १४-६) इति । तस्माद्ब्रह्मणोऽपि कालपरिच्छिन्नव्यावहारिकानन्दवत्वादन्वेष्यं तस्याप्यानन्दस्य प्रतिष्ठाभूतं पुच्छान्तरम् । अतः स इह न विवक्षितो 'ब्रह्म पुच्छं प्रतिष्ठा' इति ॥

किं तर्हि तत्पुच्छं तस्यानन्दमयस्योत्तरोत्तरमुत्कृष्यमाणस्येति ? तदुच्यते - **परमार्थब्रह्मविज्ञानापेक्षया ब्रह्म परमेव इति** । परं ब्रह्मैव हि 'ब्रह्मविदाप्नोति परम्' इति विज्ञेयत्वेनोपन्यस्तम् । तदेवात्र 'पुच्छं प्रतिष्ठा' इत्युपसंह्रियते । एवं च यत्प्रकृतं सत्यज्ञानानन्तलक्षणं ब्रह्म तदेवेहापि स्वशब्देन 'ब्रह्म पुच्छं प्रतिष्ठा' इति प्रत्यभिज्ञायते, न कालपरिच्छिन्नानन्दवदपरं ब्रह्म इति श्लिष्यते । **यस्य च प्रतिपत्त्यर्थं पञ्चान्नमयाद्याः कोशा उपन्यस्ताः**, तदेव परं ब्रह्मेहोच्यत इति युक्तम् । अन्यथा ह्यन्नमयादीनामुपन्यासोऽस्थाने स्यात् । न च सर्वान्नादिप्राप्त्यर्थ-मुपासनाविधानायैव स उपन्यास इति वाच्यम् । परब्रह्मज्ञानप्रकरणभङ्गप्रसङ्गात् । अन्यान्योपासनाविधानेनैवोपक्षये ग्रन्थस्यैकवाक्यताभावप्रसङ्गाच्च । किञ्च 'अन्योऽन्तर आत्मा', 'अन्योऽन्तर' इति प्रतिपर्यायमन्यस्यान्यस्य अभ्यन्तरत्वं ब्रुवती श्रुतिः सर्वान्तरमेव तत्त्वं प्रत्याययितुं प्रवृत्तेति युक्तं नान्तरालिकमपरं ब्रह्म । तथा 'तस्यैष एव शारीर आत्मा' इत्युत्तरोत्तरस्यानात्मनोऽपि पूर्वपूर्वस्यात्मतां निर्दिशन्ती

भगवती श्रुतिर्मुख्यात्मानमेव परब्रह्मरूपं 'तस्माद्वा एतस्मादात्मनः' इति सर्वकारणत्वेनोपन्यस्तमिहापि 'ब्रह्म पुच्छम्' इति निर्दिदिक्षति, 'यो वेद निहितं गुहायाम्' इति मन्त्रेणैकवाक्यतायै इति श्लिष्टतरम् । परब्रह्मण एव हि सर्वाभ्यान्तरत्वमात्मत्वं च मुख्यवृत्ततः । 'यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' (बृ. ३-५-१), 'एष त आत्मा ... नान्योऽतोऽस्ति द्रष्टा' - (बृ. ३-७-२३) इति च श्रुत्यन्तरात् । उक्तं च **संप्रदायविद्भिः** 'रसादयो हि ये कोशा व्याख्यातास्तैत्तिरीयके । तेषामात्मा परो जीवः' (मां का. ३-११) इति । अतो यच्च **तेभ्योऽन्नमयादिभ्योऽभ्यन्तरं येन च ते सर्व आत्मवन्तः**, तद्ब्रह्म परमेव पुच्छमिति युक्तमुत्पश्यामः । तस्मात्, यथोक्तनीत्या द्वैतानन्दस्य कस्यचिदपि द्वैतक्षेत्रावस्थितस्याधारत्वासंभवात् यदेवादौ प्रक्रान्तं मन्त्रे सत्यं ज्ञानमनन्तं चेति, तदेव परं ब्रह्म पुच्छवत्पुच्छम् आनन्दमयस्याधारभूतमिति सिद्धम्। **प्रतिष्ठा** चेति। **तदेव च सर्वस्याविद्यापरिकल्पितस्य द्वैतस्यावसानभूतमद्वैतं ब्रह्म प्रतिष्ठा,** परायणम्, एकनीडं लौकिकानन्दजातस्य, तैमिरिकदृष्टानेकचन्द्रप्रकाशस्येवैकः परमार्थचन्द्रमाः। 'पुच्छम्' इत्यवयवशब्दप्रयोगस्तु प्राचुर्यात्। अन्नमयादीनां हि शिरआदिषु पुच्छान्तेष्ववयवेषूक्तेषु, आनन्दमयस्यापि प्रियमोदाद्यवयवान्तराण्युक्त्वा, अवयवप्रकथनप्रायेऽस्मिन् ग्रन्थे ब्रह्मणोऽपि पुच्छत्वमुक्तं प्राचुर्यानुरोधात्; तदपि सर्वद्वैतानन्दास्पदत्वविवक्षयैव, न त्ववयवत्वविवक्षयेति सर्वं शुद्धम् ॥१४॥

## तदप्येष श्लोको भवति

(इति पञ्चमोऽनुवाकः)

**असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् ।**
**अस्ति ब्रह्मेति चेद्वेद । सन्तमेनं ततो**
**विदुरिति ॥१५॥**

# ब्रह्मास्ति द्वैतावसानभूतत्वात्

**४५. आनन्दमयस्य एकत्वावसानत्वात्, अस्ति तदेकम् अविद्याकल्पितस्य द्वैतस्यावसानभूतम् अद्वैतं ब्रह्म प्रतिष्ठा पुच्छम्। तत् एतस्मिन्नपि अर्थे एष श्लोको भवति ॥**

## ९९. पुच्छब्रह्मास्तित्वपरत्वेन श्लोकावतरणिका -

तदेवमानन्दमयपुरुषविधत्वोपवर्णनप्रसङ्गेन, उपचितापचितानन्दविशेषवत्वात्तस्य प्रतिशरीरं भिन्नत्वं पूर्वकोशचतुष्टयादभ्यन्तरत्वमात्मत्वं चापेक्षिकमुपपाद्य, वाक्यशेषबलेन तस्यानन्दस्योत्तरोत्तरोत्कर्षेण हिरण्यगर्भब्रह्मणि सर्वातिशायित्वेन विश्रमणेऽपि तस्यापि स्वाधारभूतप्रतिष्ठान्तरापेक्षत्वात् निरपेक्षं परं ब्रह्मैव तस्य पुच्छं प्रतिष्ठेत्यवगमितम् । इदानीं तदेवानन्दमयस्य क्वचित्प्रतिष्ठापेक्षत्वं हेतूकृत्य निर्विशेषाद्वितीयब्रह्मणः सत्वं साधयितुमुत्तरमन्त्रप्रवृत्तिरिति तमवतारयति **आनन्दमयस्ये**त्यादिना । न तावद् द्वैतस्य द्वैतमेवावसानभूमिर्भवितुमर्हति । स्वात्माश्रयदोषात् । अवसानभूमित्वेन कल्प्यमानस्य कस्यचिदपि निराकांङ्क्षावसानस्थानत्वकल्पने हेतुविशेषाभावाच्च। न च द्वैतभूमौ क्वचित्तदवसानस्थानान्तरं समस्तीत्यतोऽद्वैतमेव तस्यावसानमित्यवगच्छामः । तस्य चाद्वैतस्य द्वैतसमसत्ताकत्वे द्वैतत्वमेव प्राप्नोतीत्यतस्तस्य ततोऽपि परा सत्ता काचिदेष्टव्या । न च सत्तायां विशेषो विद्यते शक्यकल्पनो वा, इति तस्यां परापरविभागोऽन्यथानुपपद्यमानो द्वैतस्याविद्याकल्पितसत्त्वमेवागमयति । तस्मात् यथैव जाग्रत्वेनाभिमन्यमानोत्तरस्वप्नाद्बाध्यमानायाः पूर्वस्वप्नपरम्परायाः स्वप्नमात्रबाधिका परमार्थजागरितावस्थैवावसानम्, तथैवाविद्यापरिकल्पितकोशपरम्पराया आनन्दमयात्मकत्वेनाविद्यावस्थायामभिमन्यमानायाः कोशमात्रापबाधकमद्वैतं परं ब्रह्मैव विद्याप्राप्यमवसानम् । अतो निर्विशेषस्यापि तस्याविद्याकृतद्वैतप्रतिष्ठात्वेनास्तित्वं बलादायाति । तस्मिन्नेतास्मिन्नप्यर्थे,

अविद्याकल्पितकोशपञ्चकरूपात्मनां प्रतिष्ठाभूतस्य परमार्थात्मनो ब्रह्मणोऽस्तित्व-प्रकाशने, एष श्लोको भन्त्रो भवतीति श्लोकावतरणिकाब्राह्मणवाक्यस्याभिप्राय इत्यर्थः ॥

अत्र यद्यप्यन्नमयादीनां विराडाद्यात्मत्वोपदेशेन तत्तदुपासना यथैवोपदिष्टा पूर्वेषु पर्यायेषु तथैवात्राप्युपदेष्टव्यम्, तत्फलं च समष्ट्यानन्दोपाधिकब्रह्मावाप्तिरदृष्टं दृष्टं च निरतिशयानन्दोपलब्धिरुपासकस्य - वक्ष्यति हि 'स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य' (२-८) इति - तथाप्येतत्सर्वं भोक्त्रात्मविवरण-मवान्तरतात्पर्येण विवक्षितं कर्त्रात्मविवरणप्रस्तावे 'विज्ञानं ब्रह्म चेद्वेद ..... सर्वान् कामान् समश्नुते' (२-५) इत्यनेनैव विज्ञापितप्रायमित्येतदर्थं श्लोकमनुदाहृत्य श्रुतिः 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यत्र स्वप्रधानतयैव निर्विशेषं ब्रह्म निर्दिष्टमिति स्फुटयितुं परमतात्पर्यविषयीभूतब्रह्मास्तित्वप्रकाशकमेव श्लोकं त्वरयोदाजहारेति मन्तव्यम्। अत एवार्थिकार्थमेनमभिप्रेत्य वार्तिककारैरुक्तम् - 'आध्यात्मकान् विलाप्याथ यथा स्वं प्रत्यगात्मसु । अन्नादीन् पर्युपासीत ह्युत्तरोत्तररूपगान् । जगध्वा कार्यात्मनामेवं कारणात्मतया स्थितः । आत्मनालिङ्गते ब्रह्म वाक्यज्जग्ध्वा च तामपि ॥' (२-२३६, २३८) । 'चतुर्णां प्रत्यगात्मैवमानन्दमय उच्यते । प्रज्ञानघनरूपत्वात् स्याद्भेदोऽप्यस्य कार्यतः। शिरआदिप्रक्लृप्तिस्तु स्यादुपासनकर्मणे॥' (२-२४१, २४२) इति चेति सर्वं शिवम्॥

## अद्वैतब्रह्मास्तित्वपरश्लोकार्थः

**४६. असन्नेव असत्सम एव - यथा असन् अपुरुषार्थसंबन्धी[१] एवम् - स भवति अपुरुषार्थसंबन्धी । कोसौ ? यः असत्**

---

१. अकाररस्त्रुटित आ ॥ पाठे ॥

अविद्यमानं ब्रह्म इति वेद विजानाति चेत् यदि[१]। तद्विपर्ययेण यत् सर्वविकल्पास्पदं सर्वप्रवृत्तिबीजं सर्वविशेषप्रत्यस्तमितमपि अस्ति तद् ब्रह्म इति वेद चेत् -

कुतः पुनराशङ्का तन्नास्तित्वे ? व्यवहारातीतत्वं ब्रह्मण इति ब्रूमः। व्यवहारविषये हि वाचारम्भणमात्रे अस्तित्वभाविता[२] बुद्धिः, तद्विपरीते व्यवहारातीते नास्तित्वमपि प्रतिपद्यते । यथा घटादिर्व्यवहार-विषयतयोपपन्नः सन्, तद्विपरीतोऽसन्-इति प्रसिद्धम् । एवं तत्सामान्यात्, इहापि स्याद् ब्रह्मणो नास्तित्वं प्रति आशङ्का। तस्मादुच्यते 'अस्ति ब्रह्मेति चेद् वेद' इति ॥

किं पुनः स्यात् तदस्तीति विजानतः ? तदाह - सन्तं विद्यमानं ब्रह्मस्वरूपेण परमार्थसदात्मापन्नम् एनम् एवंविदं

१. ब्रह्म इति वेद इत्येतावता वाक्यं संपूर्णं भवति । चेद्यदीत्यपि तु मूलानुरोधेन आकाङ्क्ष्यते । यः कश्चिद्वेद चेत् सः इति पूरणं कृत्वा असन्नेव स भवतीत्यनेन संबन्धः कार्य इति भाति ॥

२. 'भावितबुद्धिः' वा ॥

# विदुर्ब्रह्मविदः । ततः तस्मादस्तित्ववेदनात्, सोऽन्येषां ब्रह्मवद् विज्ञेयो भवतीत्यर्थः ॥

## १००. ब्रह्मासदिति मन्वानस्यानर्थप्राप्तिः -

ब्रह्म विदुषः परप्राप्तिःप्रतिज्ञाता 'ब्रह्मविदाप्नोति परम्' इति । अत्र तद्विपर्ययेण ब्रह्माविदुषोऽपुरुषार्थसंबन्धोऽपि स्यादित्युच्यते 'असन्नेवेति' । ननु न कस्यापि विद्यमानस्यासत्वमुपपद्यते, 'नाभावो विद्यते सतः' (गी. २-१६) इति न्यायात् ? अत आह - **'असत्सम एव'** इति । यथा ह्यसतो न पुरुषार्थसंबन्धो भवेत्, एवं ब्रह्मणोऽसत्वं प्रतिपद्यमानस्यापीत्यत उच्यते असन्नेवेति, न पुनरसत्वापन्न एव भवतीति कृत्वेत्यर्थः । अत्राविदुषः पुरुषार्थसंबन्धाभावमात्रपर्यवसायित्वं न ग्राह्यम्। स्वात्मनास्तित्वं प्रतिपद्यमानस्य अनात्मन्यात्ममतेरवश्यंभावादनर्थप्राप्तिरपि ध्रुवं स्यादित्यापि द्रष्टव्यम् । 'असुर्या नाम ते लोका अन्धेन तमसाऽऽवृत्ताः । ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥' (ई. ४) 'मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्' ॥ (गी. १६-२०) इति श्रुतिस्मृतिभ्याम् । तदुक्तं **वार्तिककारैः** 'सदप्यात्मस्वरूपेण ब्रह्मासदिति वेद चेत् । सोऽसन्नेवेह भवति । कोशात्मत्वाभिमानभाक् ॥' (तै.वा. २-३५३) इति ॥

## १०१. ब्रह्मनास्तित्वशङ्कायां निमित्तं, तस्या अयुक्तत्वदर्शनं च -

एतद्विपर्ययेण ब्रह्मास्तित्वविदः परमपुरुषार्थप्राप्तिं प्रदर्शयिष्यंस्तावच्चोदनामुद्भावयति - **'कुतःपुनराशङ्का तन्नास्तित्वे'** इति । न ह्यात्मन एव सतो नास्तित्वशङ्का संभाव्यमाना इत्यभिप्रायः । शङ्कां संभावयति - **'व्यवहारातीतत्वमिति ब्रूमः'** इति । एतद्विवृणोति - **'व्यवहारविषये हि'** इत्यादिना **'स्याद्ब्रह्मणो नास्तित्वं प्रत्याशङ्का'** इत्यन्तेन । अयमर्थः । यद्यद्धि व्यवह्रियते वाचा मनसा वा 'इदमित्थम्' इति, तत्तदस्तिशब्दप्रत्ययगम्यमिति प्रसिद्धं घटादिवत्, यत्पुनस्तद्विपरीतं तथा व्यहवारागोचरं शशविषाणादि, तन्नास्तिशब्दप्रत्ययगम्यमिति च । एवं व्यवहारविषये एवास्तित्वभाविता

बुद्धिर्लोकस्य, अवाङ्मनसगोचरे ब्रह्मण्यपि नास्तित्वं शङ्केतेति युक्तमिति कृत्वोच्यते 'असद्ब्रह्मेति वेद चेत्' इतीत्यर्थः ॥

वस्तुतस्तु नैषा शङ्का युक्ता । विपरीतज्ञानजनिताभिनिवेशमात्र प्रयुक्तत्वादित्याशयेन व्यावहारिकं वस्तु विशिनष्टि - **व्यवहारविषये हि वाचारम्भणमात्रेऽस्तित्वभाविता बुद्धिः इति** । यद्यद् व्यवह्रियते 'घटः' 'पटः' इत्यादि वाचा, तस्य सर्वस्यापि कार्यस्य निरूप्यमाणस्य स्वकारणव्यतिरेकेणाभावाद् वाचारम्भणमात्रत्वम् । वाचैव केवलमारब्धत्वं न तु वस्तुतोऽप्यस्तित्वमस्ति । तथा च श्रुतिः 'वाचारम्भणं विकारो नामधेयम्' (छां. ६-१-४) इति । यत्पुनः सर्वकारणं ब्रह्म, तस्यैव तु परमार्थसत्वं सत्यत्वं च । सर्वस्याप्यात्मभूतस्य तस्य बाधकहेत्वभावात् । यदप्याह श्रुतिः 'ऐतदात्म्यमिदं सर्वं तत्सत्यम्' (छां ६-८-७) इति । तथा च व्यवहारविषयभूतस्य सर्वस्यापि कार्यस्य पञ्चकोशात्मकस्य विकल्पमात्रस्य स्वास्पदीभूतब्रह्मणा विना नैव सत्वमस्ति सर्पादेरिव रज्ज्वादिना विनेत्येव युक्तम् । यथोक्तं **वार्तिककृद्भिः** - 'न हि कोशात्मना सत्वमृते ब्रह्म समश्नुते। कुतः सर्पात्मना सत्वमृते रज्जुं सदात्मिकाम् ॥' (तै. वा. २-३५४) इति । तस्मादस्त्येव ब्रह्म निर्विकल्पमपि । सर्वविकल्पास्पदत्वात् । इतश्चास्ति तत् । सर्वप्रवृत्तिबीजत्वाच्च । चितिकर्मत्वापत्तिनिमित्ता हि सर्वा प्रवृत्तिः 'अहमिदं पश्यामि', 'श्रृणोमि', 'एतदर्थमिदं करोमि', 'सुखं दुःखं वा भोक्ष्ये' इत्याद्या अवगतिनिष्ठा अवगत्यवसानैव । अतः सर्वप्रवृत्तिबीजभूतज्ञानलक्षणं ब्रह्म सर्वथा निर्विशेषमप्यस्तीत्येवावगन्तुं युक्तम् । तदेतदभिसंधाय श्रुतिं व्याचष्टे **'यत्सर्वविकल्पास्पदं सर्वप्रवृत्तिबीजं सर्वविशेषप्रत्यस्तमितमप्यस्ति तद्ब्रह्मेति वेद चेत्' इति** । 'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये । यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्वतः' (गी. ७-३) इति न्यायाद् ब्रह्मास्तित्वज्ञानं सुदुर्लभमिति कृत्वा 'अस्ति तद्ब्रह्मेति वेद चेत्' इत्युक्तमिति ध्येयम् ॥

## १०२. ब्रह्मास्तित्वविदः परप्राप्तिः कीदृशी ?

अथेदानीं 'सन्तमेनं ततो विदुः' इति श्रुतिव्याख्यानमुखेन ब्रह्म विदुषः

परमपुरुषार्थप्राप्तिं विशदयन् , शङ्कोत्तरत्वेन तामवतारयति - **'किं पुनः स्यात्तदस्तीति विजानतः ? तदाह'** - इत्यादिना । ब्रह्मैव ह्येकं वस्तुतो विद्यमानं वस्तु । सर्वस्यात्मभूतत्वात् । न त्वन्नमयादयः । तेषामुक्तनीत्या विकल्पमात्रत्वात्। यदाप्यन्नमयाद्यन्यतमकोशे आत्मबुद्धिरविदुषाम्, तदापि परमार्थतो विद्यमानब्रह्मात्मतादात्म्याध्यासादेव सेत्यावेदितम् । अतो योऽस्ति ब्रह्मेति वेद, 'अहमस्मि ब्रह्मात्मैव न कोशात्मकः' इत्यध्यवस्यति, **सन्तं विद्यमानब्रह्मस्वरूपेण परमार्थसदात्मापन्नमेवंविदं विदुर्ब्रह्मविदः ।** ब्रह्मविदां हि ब्रह्मैवेदं विश्वं वयं चेति निश्चयः । अब्रह्मप्रत्ययः सर्वोऽविद्यामात्रो रज्जामिव सर्पप्रत्यय इति च । अतो यो ब्रह्मविद्यया विध्वस्ताविद्यः, तं तत एव ब्रह्मास्तित्ववेदनात् केवलात् परमार्थसदात्मापन्नं विदुः प्रागपि सद्ब्रह्मैव सन्तमेनं ब्रह्मविद इत्यर्थः । **आर्थिकार्थमाह - सोऽन्येषां ब्रह्मवद्विज्ञेयो भवतीत्यर्थः इति।** अन्ये हि यद्ब्रह्म विविदिषन्ति त एनमेव तद्विविदिषन्ति वस्तुतः । यतोऽयं न ब्रह्मणो भिन्नः । ब्रह्मास्तित्ववेदनेन तदात्मभावापन्नत्वात् । यद्यपि ते न जानीयुरेष ब्रह्मभूत इति, तथापि तेषां विज्ञेयभूतं ब्रह्मास्मादभिन्नमेवेति ब्रह्मवद्विज्ञेयो भवति तेषामित्युच्यते ब्रह्मविद्यास्तुतय इति बोध्यम्। अथवा - अस्य ब्रह्मवित्त्वं ज्ञानिलक्षणैरनुमाय, अन्येऽप्येनं सद्गुरुं ब्रह्मबुद्ध्या उपसीदन्ति विद्यार्थमित्यभिप्रायः। 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥' (श्वे. ६-२३) इति मन्त्रवर्णात् ॥

**४७. अथवा यो नास्ति ब्रह्म इति मन्यते, स सर्वस्यैव सन्मार्गस्य वर्णाश्रमादि-व्यवस्थालक्षणस्याश्रद्दधानतया नास्तित्वं प्रतिपद्यते । ब्रह्म प्रतिपत्त्यर्थत्वात्[1] तस्य । अतो नास्तिकः सोऽसन् असाधुरुच्यते लोके ।**

---

१. 'अब्रह्मप्रतिपत्त्यर्थत्वात्'

**तद्विपरीतः सन् यः, अस्ति ब्रह्मेति चेद् वेद, स तद्ब्रह्मप्रतिपत्तिहेतुं सन्मार्गं वर्णाश्रमादिव्यवस्थालक्षणं श्रद्दधानतया यथावत् प्रतिपद्यते यस्मात्, ततः तस्मात् सन्तं साधुमार्गस्थम् एनं विदुः साधवः । तस्मादस्तीत्येव ब्रह्म प्रतिपत्तव्यमिति वाक्यार्थः ॥१५॥**

## १०३. व्याख्यानान्तरेण प्रयोजनम् -

आनन्दमयान्तानां कोशानामात्मभूतम् अस्ति ब्रह्म निर्विशेषमपि इत्येतत् साक्षाद्विदितवतो ब्रह्मस्वरूपेणैव परमार्थसदाप्तिः फलम् इत्येवंपरतया श्लोको व्याख्यातः । तत्र च ब्रह्मवेदनमेव ब्रह्मप्राप्तिर्नान्या प्राप्तिः, अविद्यामात्रव्यवहितत्वाद् ब्रह्मण इत्यभिप्रायकत्वेन 'सन्तमेनं ततो विदुः' इति वाक्यं व्याख्यातम् । अथेदानीं ब्रह्मास्तित्वनास्तित्वयोः परोक्षेण विदितयोरपि फलवैलक्षण्यमनेनैव मन्त्रेण द्योत्यत इति दर्शयितुं मन्त्राक्षराणि प्रकारान्तरेण योजयितुमारभते - **'अथवा'** इत्यादिना॥

## १०४. सच्छब्दस्य साधुवाचकत्वेन व्याख्यानम् -

तत्र सच्छब्दस्यास्तित्वार्थतां गृहीत्वा पूर्वं व्याख्यानम् , साधुभावार्थतामपि गृहीत्वेदमपरमिति विवेकः । तथा च 'असन्नेव स भवति, असद्ब्रह्मेति वेद चेत्' इत्यस्यात्र कोऽर्थः ? **यो नास्ति ब्रह्मेति मन्यते** 'जगदाहुरनीश्वरम्' (गी. १६-८) इति स्मृत्युक्तामसुराणां मतिमनुरुन्धानः, सोऽसद्वादी, असन्नेव असाधुरेव भवति। **सर्वस्यैव सन्मार्गस्य वर्णाश्रमादिव्यवस्थाया** इहलोकपरलोकसुखप्राप्तिहेतुभूतायाः परम्परया निःश्रेयसहेतुभूतायाश्च **नास्तित्वमेव प्रतिपद्यते** श्रेयःसाधनतां न श्रद्धत्ते। नास्ति वर्णाश्रमादिकर्मानुष्ठानेन किञ्चित् प्राप्तव्यमिति कृत्वा स्वैरचारी भवति । 'प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः । न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥' (गी. १६-७) इत्युक्तमसुराणां पन्थानमेवानुसरति । **अतो**

**नास्तिकः सोऽसन् असाधुरुच्ये लोके** । शिष्टगर्हितो भवतीत्यर्थः । ब्रह्मप्राप्तेस्तु तस्य दूरत एव प्रत्याशा । 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' (गी. १८-४६) इति स्मृतेर्वर्णाश्रमधर्मानुष्ठानादिसन्मार्गस्यैव ब्रह्मप्रतिपत्त्यर्थत्वात्। तस्य चानेन परित्यागात् । 'अब्रह्मप्रतिपत्यर्थत्वात् तस्य' इति भाष्यपाठस्तु - ब्रह्मणो नास्तित्वं मन्यमानः सन्मार्गस्यापि नास्तित्वं प्रतिपद्यते, तस्य मार्गस्य अब्रह्मप्रतिपत्त्यर्थत्वात्, ब्रह्मप्रतिपत्तिसाधनत्वेनाविश्वस्यमानत्वात् तेन - इत्यर्थकत्वेन कथञ्चिन्नेयः । तद्विपरीतः सन् 'अस्ति ब्रह्म यत्प्रसादलभ्यम् इहपरसुखं निःश्रेयसं च' इति श्रद्धया साधनमनुतिष्ठति यः, तं सन्तं साधुमार्गस्थं विदुः साधवः शिष्टाः । अतः शिष्टजननिन्दापरिजिहीर्षुभिः पुरुषार्थप्रेप्सुभिश्चावश्यम् ईश्वरास्तित्वे श्रद्धा कार्येति भावः ॥

**१०५. श्लोकार्थसंग्रहः -**

नैते व्यख्याने परस्परपरिहारेण ग्राह्ये, कथं तर्हि, परस्परपरिपूरकार्थ-द्वयसमर्पकतयेत्यभिप्रेत्याऽऽह-**तस्मादिति** । ब्रह्मास्तित्वं पुरस्कृत्य वेदोक्तसाधनानुष्ठाने प्रवृत्तस्य चित्तशुद्धिप्रत्यक्प्रवणतामूलकं शास्त्राचार्योपदेश-श्रवणमननादिद्वारेण क्रमशः सर्वात्मभूतसद्ब्रह्मात्मत्वं प्रसीदति यस्मात्, तस्मादस्तीत्येव ब्रह्म प्रतिपत्तव्यं मुमुक्षुणा । 'अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः । अस्तीत्येवोपलब्धस्य तत्वभावः प्रसीदति ॥' (का. २-३-१३) इति श्रुतेरित्यर्थः ॥ १५॥

## तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥ १६॥

### आनन्दमयप्रकरणोपसंहारः

**४८. तस्य पूर्वस्य विज्ञानमयस्य एष एव शरीरे विज्ञानमये भवः शारीर आत्मा । कोऽसौ? य एष आनन्दमयः । तं प्रति**

**नास्त्याशङ्का नास्तित्वे । अपोढसर्वविशेषत्वात्तु ब्रह्मणो नास्तित्वं प्रति आशङ्का युक्ता । सर्वसामान्याच्च[१] ब्रह्मणः ॥ १६ ॥**

**१०६. अन्तिमकोशग्रन्थपरिसमाप्तिः -**

तदेवमानन्दमयस्य पुरुषविधतां प्रदर्श्य तत्पुच्छविषये प्राप्तां नास्तित्वशङ्कां च मन्त्रेणापनीय, आनन्दमयकोशप्रकरणं समापयति श्रुतिः 'तस्यैष एव शारीर आत्मा' इति । तदाह - **'तस्य पूर्वस्य विज्ञानमयस्य'** इत्यादिना **'आनन्दमयः'** इत्यन्तेन ॥

**१०७. एतच्छब्देनानन्दमय एव परामृश्यते -**

ननु 'असन्नेव स भवति' इति मन्त्रेणैवान्तरित आनन्दमयः कथमिह संनिहिततरवाचिना एतच्छब्देन निर्दिश्येत ? ब्रह्मैव तु सर्वात्मत्वात् तथा निर्दिश्यत इति युक्तम् । समनन्तरपूर्वस्मिन् वाक्ये तस्यैव स्वशब्देनाभिधानादिति चेत् । न । 'तस्यैष एव शारीर आत्मा' इत्यक्षरानुलोम्याभावात् । 'तस्य' इति हि सर्वत्र पूर्वपर्यायेषु समानवाक्ये पूर्वकोशस्यैव परामर्शः क्रियते, तत्रात्मबुद्धिपरित्याजनार्थं चोत्तरस्य कोशस्य 'तस्मिन् पूर्वकोशे शरीरे भवः शारीर आत्मा' इत्यात्मत्वमुपदिश्यत इति स्थितिः । तथात्रापि विज्ञानमये शारीरे भव आत्मा इत्यानन्दमयस्यैव शारीरात्मत्वे संभवति कथमक्षरानञ्जस्यमप्यविगणय्य प्रक्रमभङ्गः क्रियताम् ? 'ब्रह्म पुच्छम्' इत्यत्र प्रक्रमभङ्गेनाप्यवयवत्वमुल्लङ्घ्य स्वप्राधान्यकल्पने उपपत्तिर्दर्शिता ; न त्विह सा अस्ति। प्रत्युत 'शारीर आत्मा' इति प्रत्यक्षश्रुतिपरित्यागप्रसङ्गलक्षणा बाधकयुक्तिरेवास्ति । अतः प्रकृतानन्दमयस्यैवायम् तच्छब्देन परामर्शस्तत्प्रकरणोपसंजिहीर्षयेत्येव सम्यक् । ननु तर्हि श्लोकस्याप्येवमानन्दमयविषयतैवास्तु । तथा च सर्वमिदमानन्दमयप्रकरणमेवेति समञ्जसं कल्पितं स्यादित्याशङ्क्य तत्र बाधकम् 'मन्त्रोदाहरणानुपपत्तेश्च' इत्यत्रोक्तमपि पुनः स्मारयत्युत्तरार्थम् - **'तं प्रति**

---

१. 'सर्वसाम्याच्च' इति वा ॥

**नास्त्याशङ्का नास्तित्वे'** इति । प्रियमोदादिविशेषवत्वेन सर्वानुभवसिद्धत्वात् - इति शेषः । कथं तर्हि ब्रह्मणोऽपि नास्तित्वे शङ्का ? तत्राऽऽह - **'अपोढसर्व विशेषत्वात्तु'** इत्यादि। तत्र हेत्वन्तरमप्यस्तीत्याह - **सर्वसामान्याच्च ब्रह्मणः** इति । सर्वेषां साधारणं हि ब्रह्म तत्कारणतया तदात्मतया च । न त्वानन्दमय इव प्रतिव्यक्त्यनुभूयमानासाधारणविशेषवत् , येन तदस्तित्वे नाशङ्का स्यात् । यथैव हि सर्वसाधारण आदित्यादिः सर्वेणापि व्यवह्रियते अयमसावादित्यश्चन्द्रमा वा इत्येवम्, तथैवेदमपि ब्रह्म सर्वसाधारणं सत् 'इदमदो ब्रह्म' इति व्यवह्रियेत सर्वेणापीति युक्तम् । न चैतदस्ति। अतस्तन्नास्तीति युक्ता आशङ्केति तत्परिहारार्थम् 'असन्नेव स भवति । असद्ब्रह्मेति वेद चेत्' इत्यादिमन्त्र इत्यभिप्रायः ॥१६॥

**अथातोऽनुप्रश्नाः । उताविद्वानमुं लोकं प्रेत्य। कश्चन गच्छती३ । आहो विद्वानमुं लोकं प्रेत्य । कश्चित्समश्नुता ३ उ ॥१७॥**

## ब्रह्मप्राप्तिविषये शिष्यस्यानुप्रश्नाः

**४९. यस्मादेवम् अतः तस्मात्, अथ अनन्तरम्, श्रोतुः शिष्यस्य अनुप्रश्नाः, आचार्योक्तिम् अनु एते प्रश्ना अनुप्रश्नाः[१] । सामान्यं हि ब्रह्म आकाशादिकारणत्वाद् विदुषः अविदुषश्च । तस्मात्[२], अविदुषोऽपि ब्रह्मप्राप्तिराशङ्क्यते । उत अप्यविद्वान्, अमुं लोकं परमात्मानम्, इतः प्रेत्य कश्चन -**

१. अनुप्रश्नाः इति नास्ति वा ॥

२. 'अतः' वा ॥

चनशब्दोऽप्यर्थे - अविद्वानपि गच्छति प्राप्नोति? किं वा न गच्छति ? - इति द्वितीयोऽपि प्रश्नो द्रष्टव्यः । 'अनुप्रश्नाः' इति बहुवचनात् । विद्वांसं प्रति अन्यौ प्रश्नौ । यदि अविद्वान् सामान्यं कारणमपि ब्रह्म न गच्छति, ततो विदुषोऽपि ब्रह्मागमनम् आशङ्क्यते। अतस्तं प्रति प्रश्नः 'आहो विद्वान्' इति । विद्वान् ब्रह्मविदपि[१] कश्चित् इतः प्रेत्य, अमुं लोकम् (समश्नुते व्याप्नोति) - 'समश्नुते उ' इत्येवं स्थिते, अयादेशे यलोपे च कृते, अकारस्य प्लुतिः, 'समश्नुता३ उ' इति । उकारं च वक्ष्यमाणम् अधस्तादपकृष्य, तकारं च पूर्वस्मात् उतशब्दाद् व्यासज्य, 'आहो' इत्येतस्मात् पूर्वम् उतशब्दं संयोज्य पृच्छ्यते 'उताहो विद्वान्' इति । विद्वान् समश्नुते अमुं

१. 'विद्वान् ब्रह्मविदपि' इत्यारभ्य 'उताहो विद्वान्' इत्येतदन्तं वा ॥ पाठो भिन्नः । तद्यथा - 'आहो विद्वानिति । उकारं च वक्ष्यमाणमधस्तादपकृष्य तकारं च पूर्वस्मादुतशब्दाव्द्यासज्य आहो इत्येतस्मात्पूर्वमुतशब्दं संयोज्य पृच्छति उताहो विद्वानिति । विद्वान् ब्रह्मविदपि कश्चिद् इतः प्रेत्य अमुं लोकं समश्नुते प्राप्नोति? समश्नुते उ इत्येवं स्थिते अयादेशे यलोपे च कृते अकारस्य प्लुतिः समाश्नुता३ उ इति' - इति । अर्थे तु न विशेषः । 'समश्नुते व्याप्नोति' इति कोष्ठान्तर्गतो भागः क्वचिदेव दृश्यते । तदभावेऽपि न क्षतिः ।

लोकम् ? किं वा यथा अविद्वान् एवं विद्वानपि न समश्नुते ? - इत्यपरः प्रश्नः ।

द्वावेव वा प्रश्नौ विद्वदविद्वद्विषयौ । बहुवचनं तु सामर्थ्यप्राप्तप्रश्नान्तरापेक्षया घटते। 'असद्ब्रह्मेति वेद चेत्', 'अस्ति ब्रह्मेति चेद्वेद' इति श्रवणात् अस्ति नास्तीति संशयः । ततोऽर्थप्राप्तः 'किमस्ति, नास्ति ?' इति प्रथमोऽनुप्रश्नः । ब्रह्मणोऽपक्षपातित्वात् 'अविद्वान् गच्छति, न गच्छति ?' इति द्वितीयः। ब्रह्मणः समत्वेऽपि अविदुष इव विदुषोऽपि अगमनम् आशङ्क्य[1] 'किं विद्वान् समश्नुते न समश्नुते ?' इति तृतीयोऽनुप्रश्नः ॥१७॥

## १०८. अनुप्रश्नावतरणम् -

यस्मादेवं सर्वसामान्यं ब्रह्म, तस्मादेवोत्तरग्रन्थोऽपि संगच्छत इत्यभिप्रयेणाऽऽह-यस्मादेवम् इति । 'असन्नेव स भवति' इत्यादिना ब्रह्मवेदनब्रह्मत्वप्राप्त्योर्हेतुहेतुमद्भावोपन्यासेन आचार्योक्तिमनु, व्यवहारगोचरकार्यमात्रास्तित्वभावितबुद्धेः शिष्यस्य प्रश्नाः भवन्ति वक्ष्यमाणा इत्यर्थः ॥

## १०९. प्रश्नपरिगणनम् -

आकाशादिसर्वकारणत्वात्, ब्रह्म विदुषोऽविदुषश्च समानमित्यतो विद्वानेवामुं

---

१. 'आशङ्क्यते' आ ॥

लोकं परमात्माख्यं गच्छतीति न युक्तं भाति । अतः परिपृच्छति - (१) अविद्वानपीतो मर्त्यलोकात् प्रेत्य गच्छति, किं वा नेति ? कार्यभूतं हि सर्वमन्ततः स्वकारणं गच्छेदिति युक्तम् । तत्र यद्यविद्वान् स्वकारणभूतमपि ब्रह्म न गच्छति, तर्हि विद्वानपि न गच्छतीत्येव युक्तम् । अतः पृच्छति (२) उताहो विद्वानपि तं लोकं गच्छति, न वेति ॥

अत्र व्याख्याने अविद्वानपि कश्चिद्ब्रह्म गच्छति न वा गच्छति ? इति द्वौ प्रश्नौ, एवं विद्वद्विषयावपि द्वौ प्रश्नौ - इति कृत्वा 'अनुप्रश्नाः' इति बहुवचनप्रयोगनिर्वाहः कृतः । परं नैष प्रश्नप्रविभागो युक्त इव । अत्र प्रश्नो हि नाम शिष्यस्य स्वसंशयोपस्थापकं वाक्यम् । संशयश्च नियमेन द्विकोटिको भायादिति स्थिते तत्रैकैकस्याः कोटेरेकैकप्रश्नत्वेनाङ्गीकारे गौरवदोषग्रासप्रसङ्गात्, उत्तरत्र प्रतिवचनचतुष्टयस्यानुपलब्धेः, विद्वदविदुषोरेवाभयप्रतिष्ठाभयप्राप्तिरूपफलकथन-दर्शनाच्च,इत्यरुचेराह - **'द्वावेव वा प्रश्नौ'** इति । कथं तर्हि बहुवचनम् ? तत्रोत्तरम् **'बहुवचनं तु'** इति । शिष्टं भाष्यं स्पष्टार्थम् ॥१७॥

**सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदँ सर्वमसृजत । यदिदं किञ्च ॥१८॥**

## प्रतिवचनग्रन्थावतरणिका

**५०. एतेषां प्रतिवचनार्थम्[१] उत्तरग्रन्थ[२] आरभ्यते । तत्र अस्तित्वमेव तावदुच्यते । यच्चोक्तम् 'सत्यं ज्ञानमनन्तं ब्रह्म' इति तत्र[३]**

१. 'प्रतिवचनार्थः' २. 'उत्तरो ग्रन्थः' वा ॥

३. 'तत्र च' वा ॥

**कथं सत्यत्वम् इत्येतद् वक्तव्यम् इति इदमुच्यते। सत्त्वौक्त्यैव सत्यत्वमुच्यते । उक्तं हि 'सदेव सत्यम्' (छां. ६-८-७) इति । तस्मात् सत्त्वोक्त्यैव सत्यत्वमुच्यते । कथमेवमर्थता अवगम्यतेऽस्य ग्रन्थस्य ? शब्दानुगमात् । अनेनैव हि अर्थेन अन्वितानि उत्तराणि वाक्यानि[१] । 'तत्सत्यमित्याचक्षते' (२-६), 'यदेष आकाश आनन्दो न स्यात्' (२-७) इत्यादीनि ॥**

**११०. ब्रह्मणोऽस्तित्वस्यैव निर्णेयत्वेनोपादाने हेतुः -**

अथ यथोपन्यस्तानां प्रश्नानां प्रतिवचनत्वेनोत्तरग्रन्थमवतारयति - **'एतेषाम्'** इति । अर्थप्राप्तः 'किमस्ति, किं वा नास्ति ब्रह्म ?' इति प्रश्नः प्रथमत्वेनोपात्तस्तावत्प्रत्युच्यत इत्याह - **'तत्रास्तित्वमेव'** इति । ननु किमित्यर्थ-प्राप्त एवादौ प्रत्युच्यते ? न तु कण्ठरवेणोपन्यस्तौ द्वावपरौ प्रश्नौ ? **अत्र वार्तिककाराः** 'द्वयोः सद्भावपूर्वत्वादस्तित्वं तावदुच्यते' (तै. वा. २-३६७) इति । निर्ज्ञाते ह्यस्तित्वे विद्वदविदुषोर्ब्रह्मप्राप्तिराशङ्क्येत । अतः सद्भावः प्रथमं निर्णेय इत्यर्थः । अत्र भगवान् भाष्यकारो लाभान्तरमाह - **'यच्चोक्तम्'** इति । 'सत्यं ज्ञानानमनन्तं ब्रह्म, यो वेद निहितं गुहायां परमे व्योमन्, सोऽश्नुते सर्वान् कामान् सह' इति सत्यज्ञानानन्तत्वेन ब्रह्म धीगुहायां स्थितं वेदितव्यमिति यदादावुपक्षिप्तम्, तस्य खल्वयं ग्रन्थो वृत्तिस्थानीय इत्युक्तम् । तत्रानन्तत्वम् आकाशादिकारणत्वेनैव निर्णीतम् । तत्कथं सत्यं ज्ञानं चेति वक्तव्यमवशिष्यते । तस्मात् **कथं सत्यत्वमित्येतद्वक्तव्यमितीदमुच्यते** ॥

---
१. 'उत्तरवाक्यानि'

## १११. ब्रह्मणः सत्त्वोपपादनेन सत्यत्वमप्युक्तं भवति -

ननु च अस्तिनास्तीतिप्रश्नस्योत्तरत्वेनोपस्थापितोऽयं ग्रन्थः कथं सत्यत्वस्याप्युपपादको भवेत् ? तदुच्यते - **'सत्त्वोक्त्यैव'** इति । न ह्यसतः कथञ्चिदपि सत्यत्वं संभाव्यते । तस्मात्सत्यत्वोपपादनार्थमपि सत्वं तावदुपप्रदर्शयितव्यमित्यर्थः। ननु सत्त्वमात्रोक्त्यैव कथं सत्यत्वमुपपादितं भवेत् ? सत्त्वेन व्यवह्रियमाणस्य हि सत्यत्वमिवासत्यमपि नासंभावितम् । तथाव्यवहृतस्य शुक्तिरजतादेरसत्यत्वदर्शनादित्याशङ्काया व्यपोहनायाह - **'उक्तं हि सदेव सत्यमिति'** इति । अयमभिप्रायः। न तावद्वस्तुसतो जातुचिदसत्यत्वं समस्ति । न हि सतोऽभावो विद्यत इति शक्यकल्पनम् । तथा हि सति सतोऽसत्वापत्तौ असतः सत्वापत्तेरप्यशक्यवारणत्वात् सर्वप्रमाणविरोधः सर्वत्र व्यवहारेऽनाश्वासश्च प्रसज्येयातामिति । शुक्तिरजतस्य सत्त्वव्यवहारस्तु व्यपदेशमात्रमिति ज्ञेयम् । शुक्तिरजतं हि नाम विकल्पमात्रम्, न तु शुक्तिरजतं नाम वस्त्वस्त्यपि, येन तस्य रजतशब्दवाच्यत्वं सत्यत्वमसत्यत्वं वा प्रतिज्ञायेतेति । तदेवं वस्तुसतोऽसत्त्वापत्तिविरहेणाव्यभिचरत्स्वरूपत्वे सिद्धे सत्यत्वमपि बलादायाति । अत एव हि श्रुतिः 'ऐतदात्म्यमिदं सर्वं तत्सत्यम्' (छा. ६-८-७) इति सदेव सत्यमित्याह । तस्मात् 'सत्त्वोक्त्यैव सत्यत्वमुच्यते' इति सम्यगुक्तम् ॥

## ११२. बह्मणो ज्ञानत्वमप्युच्यते आगामिग्रन्थे -

उपलक्षणमिदं ब्रह्मणः सत्यत्वमुच्यत इति । यच्चोक्तं ज्ञानमनन्तं ब्रह्मेति, तत्र कथं ज्ञानं ब्रह्मेत्येतदपि वक्ष्यत इति द्रष्टव्यम् । वक्ष्यते हि 'सोऽकामयत' इत्यादिना चेतनत्वमपि । प्राधान्येन तु सत्त्वमेवोच्यते प्रश्नोत्तरत्वेन, तद्द्वारा सत्यत्वप्रतिपादनार्थं चेति कृत्वा 'तत्रास्तित्वमेव तावदुच्यते' इत्युक्तमित्यवधेयम् ॥

## ११३. उत्तरग्रन्थस्य सत्त्वप्रतिपादने गमकम् -

अत्र प्राधान्येन सत्वमेव प्रतिपाद्यत्वेनोपादीयत इति कथं ज्ञायत इति प्रश्नमुत्थापयति - **'कथमेवमर्थतावगम्यत इति ?'** उत्तरमाह **'शब्दानुगमात्'** इति । तदिदं विवृणोति - **अनेनैव ह्यर्थेनेत्यादिना** । स्पष्टार्थं भाष्यम् ॥

## (१) आचार्यप्रतिवचनम् - अस्ति ब्रह्म । जगत्कारणत्वात्

५१. तत्र असदेव ब्रह्मेत्याशङ्क्यते । कस्मात् ? यदस्ति तद्विशेषतो गृह्यते यथा घटादि । यन्नास्ति तन्नोपलभ्यते, यथा शशविषाणादि । तथा नोपलभ्यते ब्रह्म। तस्माद् विषेशतोऽग्रहणान्नास्तीति । तन्न । आकाशादिकारणत्वात् ब्रह्मणः। न नास्ति ब्रह्म। कस्मात् ? आकाशादि हि सर्वं ब्रह्मणो जातं गृह्यते । यस्माच्च जायते किञ्चित्, तदस्तीति दृष्टं लोके, यथा घटाङ्कुरादिकारणं मृद्बीजादि । तस्मात्, आकाशादिकारण-त्वादस्ति ब्रह्म। न चासतो जातं किञ्चिद् गृह्यते लोके कार्यम् । असतश्चेन्नामरूपादि कार्यम्, निरात्मकत्वान्नोपलभ्येत । उपलभ्यते तु । तस्मात्, अस्ति ब्रह्म । असतश्चेत् कार्यं गृह्यमाणमपि असदन्वितमेव तत्[१] स्यात् । न चैवम् । तस्मात् अस्ति ब्रह्म ।तत्र 'कथमसतः सज्जायेत' (छां. ६-२-२) इति श्रुत्यन्तरम्

१. तत् इति नास्ति वा ॥

**असतः सज्जन्मासंभवम् अन्वाचष्टे न्यायतः ।**
**तस्मात् सदेव ब्रह्म इति युक्तम् ॥**

**११४. ब्रह्मासत्त्वाशङ्का -**

तत्र ब्रह्मणि नास्तित्वशङ्कैव कुतः ? - इत्याक्षिप्य युक्त्या शङ्कां संभाव्य तद्व्युदासार्थत्वेन 'इदँ सर्वमसृजत' इति वाक्यमवतारयितुकाम आह - **तत्रेत्यादि।** अयमाशयः । 'अदृश्येऽनात्म्ये' (२-७) इत्यादिना सर्वमूर्तामूर्तधर्मनिषेधेन प्रत्यस्तमितसर्वविशेषं ब्रह्मैवाभयस्थानमिति वक्ष्यते । तत्रागृह्यमाणत्वादेव ब्रह्म नास्तीति प्राप्नोति । कस्मात् ? यद्धि वस्त्वस्ति तद् विशेषतो गृह्यते इदमित्थम् इति। **यन्नास्ति तन्नोपलभ्यते यथा शशविषाणादि** । यैस्त्वाशङ्क्येत शुक्तिरजतादेरप्युपलभ्यमानत्वात्, न युक्तं वक्तुं यन्नास्ति तन्नोपलभ्यत इतीति, ते प्रतिवक्तव्याः - न तत्रापि दृष्टान्तेऽसत उपलब्धिरस्ति । सत एव शुक्त्यादिमात्रस्य रजतादिवदवभासमानत्वादिति । न हि रजतादिमिथ्याप्रत्ययालम्बनत्वेन शुक्त्यादिव्यतिरेकेणानिर्वचनीयं रजताद्यप्युत्पन्नमस्तीति विकल्पयन्तो विश्वसनीया भवन्ति संविदनुसारिभिः । अतो युक्तमेवोक्तं यन्नास्ति तन्नोपलभ्यत इति । **'तथा नोपलभ्यते ब्रह्म । तस्माद्विशेषतोऽग्रहणान्नास्तीति' युक्तम्** । इति शङ्कासंभावना ॥

ननु चेयं नास्तित्वशङ्का प्रागेव निरस्ता 'असन्नेव स भवति । असद्ब्रह्मेति वेद चेत्' इति । तत्कथमिह पुनः सा मृतेवामृतसेकेन पुनरुज्जीविष्यन्ती प्रादुर्भविष्यति? सत्यम् । अन्नमयादिष्वानन्दमयान्तेषु कोशेष्वनात्मतया निराकृतेषु, आनन्दमयस्य पुच्छप्रतिष्ठात्वेनोपदिष्टं ब्रह्म सर्वाभावादविशिष्टमिति प्राप्ते 'अस्त्येव तद्ब्रह्म सर्वद्वैतप्रतिष्ठाभूतमिति वेदितव्यम् । वेदितुरात्मत्वात् । अन्यथा स्वात्मनोऽप्यसत्वप्रसङ्गात्' इत्युक्तं पञ्चकोशव्यतिरिक्तात्मास्तित्वप्रदर्शनन्यायेन । न तु ब्रह्मप्राप्त्युपादनत्वेन स न्याय उपन्यस्तः इत्यतो निरस्तापि नास्तित्वाशङ्का पुनरुद्भाव्यते विदुषोऽविदुषश्च सममेवात्मत्वेन विद्यमानमपि ब्रह्म विद्वानेवाश्नुते नाविद्वान्, अविद्यामात्रव्यवहितत्वाद्ब्रह्मप्राप्तेरिति प्रदर्शनार्थम् । अतो

विद्वन्मात्रप्राप्यत्वोपपादकत्वेन ब्रह्मास्तित्वप्रदर्शनपरत्वान्न पुनरुक्तिदोषः ॥

## ११५. वेदान्तसम्मतसत्कार्यवादः -

तदेवं संभावितायाः शङ्कायाः परिहारः 'तन्न । आकाशादि**कारणत्वाद् ब्रह्मणः**' इति । आकाशादिकं जगत् सकारणं भवितुमर्हति । कार्यत्वाद् घटादिवदित्यभिप्रायः। न च जगतो ब्रह्मकार्यत्वे ब्रह्मणो जगद्रूपेण गृह्यमाणत्वात् 'अदृश्येऽनात्म्ये' इति ब्रह्मणोऽग्राह्यत्वोपदेष्ट्री श्रुतिर्व्याहन्येतेति शङ्कनीयम् । अग्राह्यस्यैव सतो ब्रह्मण आकाशादिजगद्रूपेण मायया जन्म, माययैव च तद्ग्राह्यत्वविकल्पनम् - इत्यङ्गीकारादुक्तशङ्कानवतारात् । विद्यमानस्यैव हि ब्रह्मणो रज्ज्वादेरिव सर्पादिरूपेण जगद्रूपेण जन्म संभवति नासत इति सत्कार्यवादमाश्रित्य ब्रह्मणोऽस्तित्वं हृदयंगमीकरोति श्रुतिः । न पुनर्ग्राह्यत्वमपि प्रतिपादयति । अतो न दोषः । अत एवाह - **असतश्चेन्नामरूपादिकार्यं निरात्मकत्वान्नोपलभ्येतेति। असतश्चेत्कार्यं गृह्यमाणमप्यसदन्वितमेव स्यादिति च** । तदेतत् सत्कार्यवादं श्रुत्याप्युपष्टम्भयति - तत्र '**कथमसतः सज्जायेत**' इत्यादिना ॥

ननु नैव क्वचिद् दृष्टम् असत्कार्यमसदन्वितमिति, येनासदन्वितत्वादर्शनादसत्कारणकत्वं जगतः प्रतिषिध्येत । न हि महावैनाशिका अप्यसतः कारणत्वं ब्रुवते, येन तन्निषेधः प्राप्तावसरः स्यात् । ते हि सतोऽसतश्च सममेव कार्यकारणत्वे प्रतिषेधन्ति 'नैवासतो नैव सतः प्रत्ययोऽर्थस्य युज्यते । असतः प्रत्ययः कस्य सतश्च प्रत्ययेन किम्॥ न सन्नासन्न सदसन् धर्मो निर्वर्तते यदा । कथं निर्वर्तको हेतुरेवं सति हि युज्यते ॥' (मा. का. ४-६, ७) इति । सत्यमेवैतत्, नास्त्यसतः कार्यत्वं कारणत्वं वेति । लोके तु परं कार्यं कारणान्वितमेव दृश्यते, यथा घटरुचकादि मृत्सुवर्णाद्यन्वितम्। तथा चेदं जगत् सर्वत्र सद्बुद्धिविषयत्वात् सत्कारणकमेव भवितुमर्हतीति संभावनया कारणासत्त्वं निवार्यते, न तु कार्येऽसदन्वयः साध्यत इत्यनवद्यम् । वैनाशिकैस्तु वास्तविककार्यकारणभावं व्यासेधद्भिर्लोकसिद्धकार्यकारणभावो व्यवहारमात्रत इत्युक्तं भवतीति नः साहाय्यमेवाचरितम् । यत्कारणमजातब्रह्मवादिनो वयं मायिकीमेव जातिमातिष्ठामहे । **यथाहुर्वेदान्तसंप्रदायविदः**

- 'सतो हि मायया जन्म युज्यते न तु तत्त्वतः । तत्त्वतो जायते यस्य जातं तस्य हि जायते॥ असतो मायया जन्म तत्त्वतो नैव युज्यते । वन्ध्यापुत्रो न तत्त्वेन मायया वापि जायते ॥' (गौ.का ३-२७-७८) इति । यत्पुनरसद्वादिभिरुच्यते 'यथा माया यथा स्वप्नो गन्धर्वनगरं यथा । तथोत्पादस्तथा स्थानं तथा भङ्ग उदाहृतः ॥' (मा.का. ७-३४) इति । तत्र मायादिदृष्टान्तैरप्यस्मदभिमतसत्कार्यवाद एव निदर्श्यत इति न किञ्चिद्वक्तव्यमस्तीत्यलं प्रासङ्गिककथया ॥

**५२. तद् यदि मृद्बीजादिवत् कारणं स्यात्, अचेतनं तर्हि । न । कामयितृत्वात्। न हि कामयितृ अचेतनमस्ति लोके । सर्वज्ञं हि ब्रह्म - इत्यवोचाम। अतः कामयितृत्वोपपत्तिः । कामयितृत्वात् अस्मदादिवदनाप्तकामम् इति[१] चेत्। न। स्वातन्त्र्यात् । यथा अन्यान् परवशीकृत्य कामादिदोषाः प्रवर्तयन्ति, न तथा ब्रह्मणः प्रवर्तकाः कामाः, कथं तर्हि, सत्यज्ञानलक्षणाः, स्वात्मभूतत्वाद् विशुद्धाः। न तैर्ब्रह्म प्रवर्त्यते, तेषां तु तत् प्रवर्तकं ब्रह्म प्राणिकर्मापेक्षया । तस्मात् स्वातन्त्र्यं कामेषु ब्रह्मणः । अतो न अनाप्तकामं ब्रह्म । साधनान्तरानपेक्षत्वाच्च । किञ्च[२], यथा**

१. 'कामं चेत्' इति आ ॥; गृहीतस्तु वा ॥ पाठः ॥

२. किञ्चेति नास्ति वा ॥; तदभावेऽपि न क्षतिः ॥

**अन्येषाम् अनात्मभूता धर्मादिनिमित्तापेक्षाः कामाः स्वात्मव्यतिरिक्तकार्यकरण-साधनान्तरापेक्षाश्च, न तथा ब्रह्मणः[१], किं तर्हि, स्वात्मनोऽनन्याः। तदेतदाह-सोऽकामयत। स आत्मा यस्मात् आकाशः संभूतः अकामयत कामितवान् ॥**

**११६. ब्रह्म स्वातन्त्र्येण जगत्कारणम् -**

स्वतोऽग्राह्यत्वेऽप्याकाशादिकारणत्वात्, कार्यस्य च गृह्यमाणत्वात्, न नास्ति ब्रह्मेत्यवगमितम्। तच्च कारणत्वं मृद्बीजादेरिवोपादानत्वेन चेत्, तर्हि तद्वदेवाचेतनत्वं प्राप्नोतीत्याशङ्कामुत्थापयति, अधिष्ठात्रन्तरानपेक्षणात् सृष्टिक्रियायां स्वातन्त्र्यमप्यस्तीत्युपपादयिष्यन् - **'तद्यदि, मृद्बीजादिवत्कारणम्'** इति। अचेतनं हि मृदादिस्वावयवविन्यासविशेषमश्नुवानं घटादिकार्यरूपेण परिणमते, न तु चेतनाः कुलालादयः स्वयं घटादिभावमापद्यमानाः क्वचिद् दृष्टा इति भावः। तामेतामाशङ्कां 'सोऽकामयत' इत्युत्तरवाक्यावष्टम्भेन प्रत्याचष्टे - **'न। कामयितृत्वात्'** इति। **न हि कामयित्रचेतनमस्ति लोके**। 'न हि मृदादिः स्वयं घटादिभावमापद्येयेति जातुचित्कामयेतेत्यर्थः। ननु सन्मात्रस्य कथङ्कारं कामयितृत्वमुपपद्यताम्? अत आह - **सर्वज्ञं हि ब्रह्मेत्यवोचाम इति**। न केवलं सन्मात्रं ब्रह्म। किन्तु 'सत्यं ज्ञानम्' इति श्रवणाज्ज्ञानस्वरूपमपीति सर्वज्ञं तत्। सर्वभावानामपि तेनाविभक्तदेशकालत्वादित्यवोचाम ज्ञानविशेषण-विवेचनप्रघट्टके (१५) इत्यर्थः। अतः सृज्यमानज्ञानवत्कुलालादिवत्कर्तृत्वमप्यस्ति ब्रह्मणः कार्यं प्रतीत्यभिप्रेत्याह - **'अतः कामयितृत्वोपपत्तिः'** इति। एवं चाधिष्ठात्रन्तराभावात्कर्तृत्वम्, उपादानान्तराभावाच्च प्रकृतित्वम् - इत्युभयमप्युप-पद्यत इत्यभिप्रायः। यत्तूच्यते न चेतनाः कुलालादयः स्वयं घटादिभावमापद्यमाना

१. 'निमित्ताद्यपेक्षत्वम्' इत्यधिकम् आ ॥

लोके क्वचिद् दृष्टा इति । नैष दोषः । देवर्षिपित्रादिवदैश्वर्ययोगादिच्छामात्रेणैव कार्यनिर्मातृत्वोपपत्तेर्ब्रह्मणः । तन्तुनाभादीनां च स्वत एव तन्त्वादिसृष्टि कर्तृत्वोपलब्धेश्च । तस्मात् कामयितृत्वादेव जगत्कारणत्वोपपत्तिर्ब्रह्मण इति निरवद्यम्॥

ननु च कामयितृत्वे ब्रह्मणो ब्रह्मत्वमेव हीयेत । आप्यानां कामानां देशकालादिव्यवहितत्वे सति ब्रह्मणः परिच्छिन्नत्वप्रसङ्गादिति शङ्कामुद्भावयति स्वातन्त्र्यस्फोरणार्थम् - **'कामयितृत्वादस्मदादिवदनाप्तकाममिति चेत्'** इति। कामयमानो हि सर्वः कामप्रेरितः सन् इदं मे स्यादित्यध्यवसाय तदनुरूपां क्रियां करोति, यदनु कालान्तरे तदीयं फलमश्नुते-इतीदं 'स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते' (बृ. ४-४-५) इति श्रुतिरन्वाचष्टे । तद्यदि ब्रह्म कामादिदोषवशादेव सृष्टौ प्रवर्तते, तर्हि तदप्यस्मदादिवदेव क्लेशकर्मविपाकाशयैः परामृष्टं संसार्येव स्यात्, न तु परमैश्वर्ययुतमित्यभिप्रायः । अनाप्तकामं ब्रह्मेत्यभ्युपगमे च 'सोऽश्नुते सर्वान् कामान् सह' (२-१) इति तद्विद्यया सर्वकामावाप्तिप्रतिपादिनी श्रुतिरप्रमाणीकृता स्यादिति महदनिष्टमिति भावः । शङ्का व्यपोहति - **'न । स्वातन्त्र्यात्'** इति । तदेतद् विवृणोति **'यथान्यान्'** इत्यादिना **'अतो नानाप्तकामं ब्रह्म'** इत्यन्तेन । अयमभिप्रायः । संसारिणां हि दोषास्तदन्तः-करणाश्रया एव सन्तो मिथ्याभिमानवशादात्मन्यध्यारोपितास्तांस्तान् पुरुषान् यथायथं कुशलाकुशलकर्मसु प्रवर्तयन्तीति संसारिणोऽविद्यादशायां तत्परतन्त्रा भवन्ति । ब्रह्म तु नित्यं सत्यज्ञानस्वरूपमेव । तत्कामा अपि नित्यं सत्यज्ञानस्वरूपा एव स्वात्मभूतब्रह्मानन्यत्वेन स्थिता विशुद्धाः। न तु तस्मिन् ब्रह्मणि नामरूपदोषगन्धिता जातुचिदिति न कदापि ब्रह्म कैश्चिदपि दोषैः प्रवर्त्यते परमार्थतः। कथं तर्हि ब्रह्मणो जगत्सृष्टौ प्रवृत्तिः संभवतीति ? अत्रोत्तरम् - **'तेषां तु तत् प्रवर्तकं ब्रह्म, प्राणिकर्मापेक्षया'** इति । नामरूपे हि सर्वज्ञस्य ब्रह्मण आत्मभूते इवाविद्याकल्पिते तत्त्वान्यत्वाभ्यामनिर्वचनीये, प्राणिनां धर्माधर्मरूपकर्मापेक्षया कामादिरूपेण विपरिवर्तेते । ततश्च विविधा विषमा सृष्टिर्भवति सलिलादिव फेनादीनाम् । यथा च फेनं सदा सलिललक्षणमेव सदपि कार्यकारणव्यवहारदृष्ट्या

कारणावस्थायां सलिलस्यात्मभूतं कार्यावस्थायां फेनमिति च व्यपदिश्यते, एवमेव कामाः सदा सत्यज्ञानब्रह्मलक्षणा एव सन्तोऽविद्याव्यवहारदृष्ट्या कारणावस्थायां ब्रह्मण आत्मभूताः कार्यावस्थायां च कामा इति च व्यपदिश्यन्ते । त इमे कामाः सदैव सत्यज्ञानलक्षणब्रह्माश्रिता रज्ज्वाश्रिता इव सर्पादिविकल्पाः, कार्याकारेण विपरिवर्तमानाश्च ब्रह्मव्याप्ता एव विपरिवर्तन्ते यस्मात्, तस्माद्ब्रह्मायत्ता एवेति कृत्वा 'ब्रह्म तेषां प्रवर्तकम्' इत्युच्यते । न तु ब्रह्मणि कश्चिद्व्यापारमप्युररीकृत्य । तथा च श्रुतिस्मृती 'यो अस्याध्यक्षः परमे व्योमन्' (ऋ. १०-१२९-६) इति 'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् । हेतुनानेन कौन्तेय जगद्विपरिवर्तते' (गी. ९-१०) इति च । तदिदमाह - **तस्मात् स्वातन्त्र्यं कामेषु ब्रह्मणः । अतो नानाप्तकामं ब्रह्मेति** । अत्र कामेष्विति न केवलमिच्छासु, किं तर्हि काम्यमानविषयेष्वपीत्यर्थः । ते हि नित्यावाप्ताः सर्वे कामा ब्रह्मणेति तेषु तस्य स्वातन्त्र्यमित्यभिप्रायः ॥

## ११७. निरपेक्षस्वातन्त्र्यं ब्रह्मणः -

**'साधनान्तरानपेक्षत्वाच्च'** इति संसारिभ्यो व्यतिरेकप्रदर्शनार्थमभ्युच्चयार्थश्चकारः । संसारिणो हि कामादिदोषप्रयुक्ता एव कर्मसु प्रवर्तन्त इत्युपवर्णितमधस्तात् । तथा प्रेरणानन्तरमपि ते साधनान्तरं विना स्वयमेव कर्म कर्तुं न प्रभवन्ति, फलं वा समासादयितुम् । न त्वेवं ब्रह्मेति । एतदेव प्रपञ्चयति - **किञ्चेत्यादिना** । ब्रह्मणो ह्यन्येषां जीवानां कामाः प्रेप्सितफलरूपा अनात्मभूताः, स्वात्मव्यतिरिक्तदेशकालव्यवहिताः । धर्माधर्मरूपनिमित्तापेक्षाश्च ते । कुशलेनैव हि कर्मणा निमित्तभूतेन इष्टं फलमवाप्यते अकुशलेनैव चानिष्टम्, न तु निर्निमित्तमिति । स्वात्मव्यतिरिक्तकार्यकरणसाधनान्तरापेक्षाश्च ते । न हि कार्यं शरीरं करणानि च पाणिपादादीन्यव्यापार्य कर्म निर्वर्त्यते । न चानिर्वर्तितेन कर्मणा कामावाप्तिरस्ति । तानि च कार्यकरणानि स्वात्मनो व्यतिरिक्तान्येवेति कर्मानुष्ठानेऽपि पारतन्त्र्यमेव संसारिणाम् । न तु तथा ब्रह्मण अनात्मभूताः कामाः, किं तर्हि स्वात्मनोऽनन्या एव । अत एव नित्यप्राप्तत्वात् स्वप्राप्तये धर्मादिनिमित्तं तदर्थं कर्मानुष्ठानं कर्मार्थं च कार्यकरणादिव्यापारं वा नापेक्षन्त इति सर्वथा स्वातन्त्र्यं ब्रह्मण इत्यर्थः । तथा हि श्रूयते - 'न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य

शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥' (श्वे. ६-८) 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः । स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्' (श्वे. ३-१९) इति च ॥

## ११८. सोऽकामयत इति वाक्यस्य तात्पर्यम् -

तदेतत् सर्वं 'सोऽकामयत' इति वचनप्रमाणकमित्याह - **'तदेतदाह'** इति। वाक्याक्षराणि व्याचष्टे **'स आत्मा'** इत्यादिना । अत्र **वृत्तिकारानुयायिनो** वदन्ति स्म। आनन्दमयसंनिधाने 'सोऽकामयत' इति प्राक्शरीराद्युत्पत्तेः श्रणवात्, जीवानां च शरीराद्यनपेक्षकामासंभवात्, आनन्दमयोऽयं परं ब्रह्मैव भवितुमर्हतीति । तदसत्, 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यनेन संनिहिततरेण ब्रह्मणा संबध्यमाना हीयं श्रुतिर्नानन्दमयस्य ब्रह्मतां प्रतिबोधयितुं प्रभवति । 'सोऽकामयत' इति पुल्लिङ्गनिर्देशस्तु पुल्लिङ्गेनाप्यात्मशब्देन ब्रह्मणः प्रक्रमादित्यभिसंधाय 'यस्मादाकाशः संभूतः' इति विशेषणम् । सोऽयं परमात्मा अकामयत, स्वतन्त्र एव वक्ष्यमाणप्रकारेणाकामयत ऐच्छत् स्रक्ष्यमाणप्राणिकर्मापेक्षयेति सर्वं यथोक्तमिहानुसंधेयम् ॥

## ११९. मायिकसृष्टिवादे आक्षेपः -

अत्र यथोपवर्णितव्याख्यानेऽपरितुष्यन्तः **केचिदाहुः** । यत्तावदुक्तं 'सोऽकामयत' इति स्वातन्त्र्यं कामेषु परमेशितुः प्राह श्रुतिरिति, तदनुमोद्यते । परामर्शलक्षणस्य स्वातन्त्र्यस्य परमेश्वरे उपपद्यमानत्वात् । चिकीर्षारूपेच्छा हि परामर्श इति व्यवह्रियते । न च तां पारमार्थिकीं विना सृष्टिक्रिया कथञ्चिदुपपद्यत इति । यत्पुनरुच्यते अविद्यादृष्ट्यैव ब्रह्मण आत्मभूता इव कल्पिताः कामा इति तन्न मृष्यते । ज्ञानमात्ररूपं हि ब्रह्मेमां विश्वरूपतावैचित्रीमविद्यादृष्ट्या परिगृह्णातीति कथं स्यादव्याहतं वच इति । तथा हि - न तावद् ब्रह्मणो विद्यैकरूपस्याविद्यारूपता। न चान्यः कश्चिदस्ति वस्तुतो यस्याविद्या भवेत् । अथ स्यात् अनिर्वाच्येयमविद्या अभ्युपगम्यते, अतो न दोष इति । कस्येयमनिर्वाच्येति न विद्मः । स्वरूपेण च भाति न च निर्वाच्या-इति किमेतत् ? युक्त्या नोपपद्यत इत्यनिर्वाच्येति चेत्, संवेदनतिरस्कारिणी का खलु युक्तिर्नाम ? अनुपपत्तिश्च भसमानस्य कान्या

भविष्यति? सद्रूपमेव ब्रह्माभिन्नं चकास्त्यविकल्पेन । विकल्पबलात्तु भेदोऽयम् - इति चेत् । कस्यायं विकल्पनव्यापारः ? ब्रह्मणश्चेत् । अविद्यायोगो नान्योऽस्ति । तदेवं वास्तवं चिदेकत्वमभ्युपगम्यानेकत्वमाविद्यकं मन्यमानस्य न कथञ्चिदपि ब्रह्मणः कर्तृत्वलक्षणा भिन्नरूपसमावेशात्मका क्रिया उपपद्यते । यस्य पुनः परामर्शलक्षणं स्वातन्त्र्यं, तस्य सर्वमेतदुपपद्यत इति तथैवोपगन्तव्यमिति ॥

## १२०. पूर्वपक्ष्युपक्षिप्तदोषप्रतिक्षेपः -

तदेतत् काचनिर्मितभिदुरगृहे निवसतः दृढतरशिलाचितभित्ति प्रातिवेशिकभवनोपरि पांसुपिण्डप्रक्षेपणव्यसनम् । तत्र यथा पूर्वपक्ष्यवपातितचोद्यलोष्टः सिद्धान्तशिलाभित्तिं प्राप्य स्वयं विध्वंसते, तथा किञ्चित् प्रदर्शयिष्यामः । यत्तावदुच्यते चिन्मात्रस्वरूपं ब्रह्म विश्वरूपवैचित्रीं परिगृह्णात्यविद्यादृष्ट्येति व्याहतं वच इति, तदयुक्तम्। अद्वैते हि ब्रह्मणि विश्वरूपतावैचित्री नास्त्येव वास्तवीति यावदुक्तं भवति, तावदेवोक्तं भवत्यविद्यादृष्ट्या ब्रह्म विश्वरूपतां परिगृह्णातीत्यनेन वचसा । तत्र किं केन व्याहन्यत इति वक्तव्यम् । ननु विद्यास्वरूपे ब्रह्मणि न समस्त्यविद्येति स्थिते ब्रह्मण्यविद्योक्तिर्व्याहता । न च जीवस्यैवेयमविद्येति युक्तम् । न ब्रह्मणोऽन्योऽस्ति जीवादिरिति स्थिते तस्यापि वचनस्य व्याहतत्वमेवेत्युक्तम् । सत्यमुक्तम् । दुरुक्तं तु तत् । न ह्यद्वितीये विद्यासतत्वरूपे ब्रह्मण्यविद्यास्तीति केनचिदुक्तम् । यदि तावज्जानीषे ब्रह्मण्यविद्या तद्विलसितं जगद्वा नास्त्येवेति, नन्वियमेव विद्या नान्या। तत्र किं केन व्याहन्यते ? अथ नैवं जानीषे, तत्र किमिदं पृच्छसि कस्येयमविद्येति? नन्विदानीमेव त्वं स्वयमेवात्मानमविद्यावन्तं प्रत्यभिज्ञासीरिति । एतेन कस्येयमनिर्वाच्येति चोदनापि विनिवारिता भवति । 'कस्येयमनिर्वाच्येति न विद्मः' इति त्वयैवात्मन एवाविद्याश्रयत्ववत् तन्निर्वचनासामर्थ्यस्याप्यङ्गीकृतत्वात् । यच्चाक्षिप्तम् - स्वरूपेण च भाति न च निर्वाच्येति किमेतदिति, तदपि परिहृतप्रायम्। यदेवात्मनि तत्वान्यत्वाभ्यामनिर्वचनीयत्वेन भानम्, तदेवास्या अनिर्वचनीयत्वम्। एतेनैव अविद्याया भानं युक्त्या नोपपद्यत इत्यप्युपपादितम् । यत्कारणम् 'अहमविद्वान्' इति भासमानापीयमविद्या स्वात्मनो विविक्तैव भातीति तस्याविवेकेन

ग्रहीतुरात्मनोऽविद्याराहित्यमेव परमार्थत इति युक्तं संविदनुसारेणाध्यवसातुम् । अथ च 'अहं न जाने मुग्धोऽस्मि' इति प्रत्येति लोक इति किमस्मात् परं युक्त्या अनुपपाद्यमानत्वं नामाविद्यायास्तदाश्रयस्य चेति ? तस्मान्न किञ्चिदत्र भवच्चोद्यमवतरति । तदेवं सत्यज्ञानलक्षणस्य ब्रह्मणः परमार्थदृष्ट्या न कश्चित् कामः सृष्टिर्वा समस्ति । अविद्यासंव्यवहारदृष्ट्या तु यथावर्णितनीत्या स्वातन्त्र्यं ब्रह्मणः सिसृक्षायां सृष्टौ चेति सर्वमिदमुपपद्यते ॥

## १२१. पारमार्थिकसिसृक्षावादे दोषाः-

यस्यैव तु पारमार्थिकं चिकीर्षापराभिधानं परामर्शलक्षणं परमेश्वरस्य स्वातन्त्र्यम्, तस्यैव सर्वा अनुपपत्तयोऽशक्यनिवारणाः । तत्कथम् ? उच्यते । य एव चिकीर्षुस्तस्यैव सा चिकीर्षा बहिष्पर्यन्ततां प्राप्ता क्रियेत्यभिधीयते, सैव च कर्तृता तदेव च हेतुत्वं नान्यत् किञ्चित् - इति किल तेषां प्रक्रिया ; ज्ञानपल्लवस्वभावैव क्रियेति च । तत्र यदि कर्तृताज्ञातृतादिकं स्वभाव एव चेन्महेशितुः, तर्हि तस्य किं विषयकं स्वातन्त्र्यमिति न विद्मः । ज्ञानम् , चिकीर्षा, क्रिया चेति सर्वे पर्यायशब्दा अग्निवह्न्यनलशब्दा इवेति च प्राप्नोत्यस्मिन् पक्षे । ननु चिकीर्षा बहिष्पर्यन्ततां प्राप्ता क्रियेत्यभिधीयत इति न पर्यायता भवेत् । नैवं भवेत् । प्राक्सृष्टेः परमेश्वरस्य चिकीर्षोर्बाह्याभ्यन्तरभेदासंभवात् । तत्संभवे वा कृतमेव सदा सर्वमिति किंविषयेयं चिकीर्षा स्यात् ? अथ मायापदे सर्वमिदमुपपद्यत इति ब्रूषे, तर्हि कस्येयं माया मोहिनी ? न खलु परमशिवादन्यः कश्चन जीवो परमार्थत इति भवद्विसृष्टो बाणोऽयं भवन्तमेव प्रहरति ॥

## १२२. पारमार्थिकसिसृक्षावादिना स्वप्रक्रियाविशदीकरणम् -

ननु च 'प्राक्सृष्टेः' इति सिद्धान्तरहस्यमविजानता भवता निवेशितं विशेषणम्। 'सक्रमत्वं च लौकिक्याः क्रियायाः कालशक्तितः । घटते न तु शाश्वत्याः प्राभव्याः स्यात्प्रभोरिव ॥' (ई.प्र. २-१-२) इति हि सिद्धान्तः । यथा हि चैत्रमैत्रादेः पचामीति यैवान्तरिच्छा सैव क्रिया, तथा चाधिश्रयणादिबहुतरस्पन्दनसंबन्धेऽपि पचामीति नास्य विच्छिद्यते, एवं च तदिच्छारूपायां क्रियायां न कश्चित्क्रमस्तात्वतः,

एवमीश्वरस्यापि 'ईशे, भासे, स्फुरामि, घूर्णे, प्रत्यवमृशामि' इत्येवंरूपेच्छात्मकविमर्शनेऽपि न कश्चित्क्रमः । यदा तु, इच्छारूपं 'पचामि' इति स्पन्दनात्मतां कायपर्यन्तां गतं क्रमरूषितमाभाति, तदा भगवदिच्छा प्रमातृप्रमेयभेद पर्यवसिता तत्क्रमोपश्लिष्टा भाति, दर्पणतलमिव विततप्रवहन्नदीप्रवाहक्रमसमाश्लिष्टम् । चित्स्वभावस्याप्येकतानपबाधेनाभासभेदसंभवे क इव विरोधः? अनुभवादेव हि स्वच्छस्यादर्शादेरखण्डितस्वस्वभावस्यैव पर्वतमतङ्गजादिसंभिन्नं वपुरुपपद्यते । न च रजतद्विचन्द्रादि यथा शुक्तिकैकचन्द्रस्वरूपतिरोधानेन वर्तते, तथा दर्पणे पर्वतादि। दर्पणस्य हि तथावभासे दर्पणतैव सुतरामुन्मीलति 'निर्मलोऽयमुत्कृष्टोऽयं दर्पणः' इत्यभिमानात् । तस्मान्न द्विचन्द्रादितौल्येनापारमार्थ्यं शक्यशङ्कमाभासानाम् । यत्तु चोदितं कस्येयं मोहिनी मायेति, तत्रोच्यते । परमेश्वरे सर्वस्यात्मनि स्थिते तस्मिन्नेव प्रकाशरूपे स्वात्मदर्पणे स एव स्वात्मानं स्वातन्त्र्यात् सङ्कुचितमवभासयति । इह खलु परमेश्वरस्येदं परं स्वातन्त्र्यं यदस्मादृशेषु प्राच्यपशुदशाविशेषासम्भाव्यमानातिदुष्करवस्तुसंपादनं नाम । इतश्च किमतिदुष्करं भविष्यति यत्प्रकाशात्मन्यखण्डितताद्रूप्ये एव प्रकाशमाने प्रकाशननिषेधावभासः प्रकाशमानः? तस्मात् परमेश्वरस्येदं तत् परं स्वातन्त्र्यं यत्तथावभासनं पशुरूपतावभासनं नाम ग्राहकांशसमुत्थापनं तद्द्वारेण ग्राह्योल्लासनमपि । सैषा भगवतो विमोहिनी मायाशक्तिरुच्यते । तत्र ग्राहकांशस्य मोहिनीयं माया - 'एष प्रमाता मायान्धः संसारी कर्मबन्धनः ।' (ई.प्र. ३-३-२) इत्युक्तेः । एष एव तु प्रमाता विद्यया प्रत्यभिज्ञापितैश्वर्यो विश्वं चिद्रूपमेवाभिमन्यमानो मुक्त इति व्यपदिश्यते स्थितेऽपि देहे - 'विद्याभिज्ञापितैश्वर्यश्चिद्घनो मुक्त उच्यते।' (ई. प्र. ३-२-२) इत्युक्तेः । स एष मुक्तो भावान् स्वाङ्गवत् प्रमिमीते इति तेषां स्वामी स्वरूपपरमार्थसमर्पणाच्च पालकः इति पतिः । यदा तु मायाशक्तिकृतभेदान् व्यतिरिक्तानेव प्रमिमीते, तदा स एव तैर्मेयैः पाशित इति पशुरुच्यते । यदप्युक्तम् - 'स्वाङ्गरूपेषु भावेषु प्रमाता कथ्यते पतिः । मायातो भेदिषु क्लेशकर्मादिकलुषः पशुः ।' (ई.प्र. ३-२-३) इति । तस्मात् सिद्धान्तानभिज्ञानमेवापराध्यति मायाविषयेऽपि चोद्यमुद्भावयत इति ॥

## १२३. ईश्वरप्रत्यभिज्ञावादे व्याघातदोषः -

तदेतत्सर्वं स्वोक्तिव्याहतिमप्यलक्षयतां तयाप्यलज्जमानानां वा बहुभाषित्वप्रकटनमात्रम् । तथा हि - यत्तावदुच्यते प्रभोरिव प्राभव्याः शाश्वत्याः क्रियाया न सक्रमत्वमिति, तेन तावदेवोक्तं भवति यावदुक्तं भवति प्रभोरिच्छैव सृष्टिः शाश्वतीति । तत्रेदं वक्तव्यं कथं तर्हि तस्य शिवस्योन्मेषनिमेषाभ्यां जगत उदयप्रलयौ स्यातामिति ? न ह्युन्मेष एव निमेष इति वक्तुं पार्यते केनापि सचेतसेति। ननु यद्यप्येकमेव शिवतत्त्वम्, तथापि तदीयमेव स्वातन्त्र्यं स्वात्मनि स्वरूपभेदं तावत्प्रतिबिम्बकल्पतया दर्शयति । अत एव 'ईश्वरो बहिरुन्मेषो निमेषोऽन्तः सदाशिवः॥' (ई.प्र. ३-१-३) इत्यभियुक्तोक्तिः संगच्छते । अतो न दोष इति चेत्। एवं तर्हि प्रतिबिम्बवदेवेयं सृष्टिरप्याभासमात्रं न तु भाविकीत्युपेयम् । ननु चाभासोऽपि नाखण्डितपरमेश्वरस्वरूपतिरोधायकः, दर्पणप्रतिफलित-पर्वतमतङ्गजादीव दर्पणस्वरूपातिरोधायकम् । तेन न द्विचन्द्रशुक्तिरजतादितुल्यः स इत्युक्तम् । अस्त्वतिरोधायकः स्वरूपस्य, तावता प्रतिबिम्बकल्पस्य भेदाभासस्य पारमार्थिकता कथं कुत आयास्यतीति वक्तव्यम् । ननु यद् यथा यावदबाधितं विमृश्यते, तत्तथा तावदस्तीति दर्पणप्रतिबिम्बितमपि पर्वतादि पारमार्थिकमेवास्ति। एवं चिद्दर्पणे प्रतिबिम्बितानामाभासानामपि पारमार्थिकतैव । अस्तित्वस्य प्रकाशं शरणीकुर्वतः प्रकाशप्राणितदेशीयं विमर्शमाश्रित्य समुन्मेषात् । अविमृष्टं हि न सत्, नाप्यसदिति भवेदिति भवताप्येतदवश्यमनुमन्तव्यम् इति चेत् । हन्त तर्हि शुक्तिरजतादीनामपि तथैवास्तित्वं बलादायतीति किङ्कृतोऽयं प्रतिबिम्बस्य ततो विवेक इति न जानीमः । नन्वस्त्वेवमपि मुक्तदृष्ट्या । एकमेव शिवतत्त्वं चिन्मात्रं माययैव विश्वरूपेण प्रथत इति हि मुक्तदृष्टिः । मुक्तिश्चासौ प्रत्यभिज्ञापितैश्वर्य-प्रमातृदृष्ट्यैव स्थिते देहे । पतिते तु तस्मिन् शिव एकघन एवेति कः कुतो मुक्तः ? भूतपूर्वगत्या तु प्रमात्रन्तरापेक्षया मुक्तः शिव इति व्यवहारः । अथ किमिदं प्रत्यभिज्ञापनं नाम ? किं पशुप्रमातुः परमशिवात्मतापादनम्, उताहो पतित्वज्ञापनम्? नोभयमपि संगच्छते । यत्कारणम् आद्ये कल्पे पशोः स्वरूपनाश एव स्यात् । द्वितीये तु चित्प्रकाशमात्रत्वं शिवस्य नावकल्पेत । नोभयमपि । किं तर्हि

मोहापसरणमात्रमिदम् । यश्चायं मोहः, तदपसरणं च यत् , तदुभयमपि भगवत एव विजृम्भमात्रम् न त्वधिकं किञ्चित् । अतो न कश्चिदिह विरोध इति चेत् । अहो मोहस्य वैभवम् ! यत्कारणम् इयतो वाग्विजृम्भणस्येयन्मात्रं जीवितम् यच्चिन्मात्रपरमेश्वर एव परमार्थः, स एव च जिज्ञासोः परमार्थात्मा । स एव च विश्वं, नान्यत् किमपि विश्वं नाम । मोहेन तु प्रमाता जिज्ञासुः स्वात्मानं परिच्छिन्नं किञ्चिज्ज्ञं च मन्यत इति । तदेतदेवास्माभिरुच्यमानम्, अविद्ययैव विश्वमिदमहं चेति सत्यज्ञानलक्षणे ब्रह्मणि गृह्यते शुक्तिकायामिव रजतादीति । तत्किमिति भवते न रोचत इति न विद्मः । ननु च स्वात्मरूपमेव विश्वं सत्यरूपं प्रकाशात्मतापरमार्थम् अत्रुटितप्रकाशाभेदमेव सत् प्रकाशपरमार्थेनैव भेदेन प्रकाशयति महेश्वर इति तदेवास्यातिदुर्घटकारित्वलक्षणं स्वातन्त्र्यमैश्वर्यमुच्यतेऽस्माभिः । किञ्च 'कर्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे । अजडात्मा निषेधं वा सिद्धं वा विदधीत कः ॥ किं तु मोहवशादस्मिन् दृष्टेऽप्यनुपलक्षिते । शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते॥' (ई.प्र. १-१-२, ३) इत्यभियुक्तोक्तिमनुसरद्भिरस्माभिरात्मनः सर्वकर्तृत्वं सर्वज्ञत्वं च महेश्वरेऽभ्युपगम्यते वास्तवमेव । मायाप्रमातुरात्मनि प्रकाशात्मतया सततमवभासमानेऽपि भागेनाप्रकाशवशादनुपलक्षिते तत्पूर्णतावभासनात्मकाभिमानविशेषसिद्धये प्रत्यभिज्ञा अपेक्ष्यते इति च । भवद्भिस्तु चिन्मात्रमेव ब्रह्मतत्त्वम्, कर्तृत्वादिकमपि मायामयमित्युररीक्रियते इति महद्वैषम्यं प्रस्थानयोर्भातीति चेत् । अहो विस्मरणशीलता ! न ह्यप्रकाशितं जडं भाति, नापि जीवन्तो नाम महेश्वरादन्ये परमार्थतः- इत्यभ्युपगम्यैव महेश्वरस्य सर्वकर्तृत्वं सर्वज्ञातृत्वं च पारमार्थिकं किल स्वीक्रियते । तत्र यदि विश्वं स्वात्मरूपमेवात्रुटितप्रकाशाभेदं सदा, तदा प्रकाशमात्रविश्वात्मकस्य सतः शिवस्य कं प्रति कीदृशं ज्ञातृत्वं कर्तृत्वं वा, अविद्याकल्पितमायिकं भेदं कर्मत्वेनानभ्युपगम्य? कीदृशं वा कं प्रति वा प्रकाशमात्ररूपस्य प्रकाशमानतया अवभासमानेऽपि भागेनाप्रकाशमानता नाम ? न हि प्रकाशमात्रे - अविद्याकल्पितं विभागं विना - पूर्णता अपूर्णता वा शक्यकल्पनेति । मोहतदपसारणे अपि भगवत एव विजृम्भामात्रमित्यपि किमेतत्, आविद्यकं मायिकं विजृम्भणमकल्पयित्वा ? तदेवमविद्याकल्पितनामरूपमायाकृतं स्वातन्त्र्यं नाङ्गीक्रियते, भगवद्विजृम्भणारूपस्वातन्त्र्यमेव मोहादिकमिति तु स्वीक्रियते

इति विकल्पवचोनीहारेण जिज्ञासुजनचित्तमावृत्य व्याकुलयद्भिरलं श्वश्रूनिर्गच्छोक्तिरसिकैर्विवादेन ॥

## १२४. सर्वज्ञत्वं सर्वकर्तृत्वं चेश्वरस्य स्वाभाविकमित्यप्यसत् -

ननु कथमत्र श्वश्रूनिर्गच्छोक्तिन्यायः क्रमते ? चिदेकमात्रत्वं हि वास्तवमङ्गीक्रियते भवद्भिः ; इतरत्सर्वमाविद्यकमिति च । अस्माभिः पुनः स्वात्मरूपमेव विश्वं सत्यरूपं प्रकाशात्मतापरमार्थम् । अत्रुटितप्रकाशाभेद एव सत् प्रकाशपरमार्थेनैव भेदेन प्रकाशयति महेश्वर इति, तदेवास्यातिदुर्घटकारित्वलक्षणं स्वातन्त्र्यमैश्वर्यमिति चेष्यते । इत्थं च सर्वक्रियास्वतन्त्रः सर्वज्ञश्च नः परमेश्वरो न तु चिदेकरसोदासीनस्वभावो भवतामिवेति स्थिते, कथं वा अनयोः प्रक्रिययोरेकत्वं स्वप्नेऽप्याशङ्क्येतेति चेत् । अत्राभिधीयते । न तावदिदं सर्वक्रियास्वातन्त्र्यं वा सर्वज्ञत्वं वा सुषुप्तिसमाध्यादौ दृष्टम् । चित्प्रकाशत्वमेव हि तत्रेति सार्वजनीनानुभवसिद्धमेतत् । अत एव हि भवद्भिरपि सुषुप्तमपि प्रति प्रकाशत एव, अन्यथा स्मृत्ययोगात् - इत्युच्यते । ननु च सुषुप्ते प्रलयेऽभावसमाधौ च शून्यमाकाशकल्पमनात्मरूपं वेद्यभावोचितम् 'अहम्' इत्यात्मत्वेन वीक्ष्यते - इत्यागमानुसारिणामभ्युपगमः । न 'सर्वं चैवेदं शून्यं वस्तुतश्चिन्मात्रसारमेव, माययैव तावदचिद्रूपतया भासितम्' इत्यपि भवद्भिरङ्गीकारात् । 'प्रागहमस्वाप्सम्' इति सुप्तोत्थितस्मरणस्य जाग्रद्दृष्टिरूषितत्वात् तेन सुषुप्तेऽहमोऽसिद्धेः । 'सुषुप्ते शून्यमचिदेव वेद्मि' इति केनाप्यननुभूयमानत्वाच्च पुनरपि स एव श्वश्रूनिर्गच्छोक्तिन्यायसंक्रम इत्यलमतिविस्तरेण ॥

**५३. कथम् ? बहु स्याम्[१] ; बहु प्रभूतं स्याम् भवेयम् । कथमेकस्य अर्थान्तराननुप्रवेशे बहुत्वं स्यादिति? उच्यते । प्रजायेय उत्पद्येय ।**

---

१. बहुस्यामिति नास्ति वा ॥

न हि पुत्रोत्पत्त्येव[1] अर्थान्तरविषयं बहुभवनम्, कथं तर्हि, आत्मस्थानभिव्यक्तनामरूपाभि-व्यक्त्या । यदा आत्मस्थे अनभिव्यक्ते नामरूपे व्याक्रियेते तदा आत्मस्वरूपापरित्यागेनैव ब्रह्मणो[2]ऽप्रविभक्तदेशकाले सर्वावस्थासु व्याक्रियेते, तदा तन्नामरूपव्याकरणं ब्रह्मणो बहुभवनम् । नान्यथा निरवयवस्य ब्रह्मणो बहुत्वापत्ति-रुपपद्यते, अल्पत्वं वा । यथा आकाशस्य अल्पत्वं बहुत्वं च वस्त्वन्तरकृतमेव । अतस्तद्द्वारेणैव आत्मा बहु भवति । न हि आत्मनोऽन्यत् अनात्मभूतं तत्प्रविभक्तदेश-कालं सूक्ष्मं व्यवहितं विप्रकृष्टं भूतं भवद् भविष्यद् वा वस्तु विद्यते । अतो नामरूपे सर्वावस्थे ब्रह्मणैवात्मवती, न ब्रह्म तदात्मकम् । ते तत्प्रत्याख्याने न स्त एवेति तदात्मके उच्येते । ताभ्यां चोपाधिभ्यां ज्ञातृज्ञेयज्ञानशब्दार्थादिसर्वसंव्यवहारभाग् ब्रह्म ॥

---

१. पुत्रोत्पत्तेरिव इति वा ॥

२. 'ब्रह्मणा' इति आ ॥ वा ॥ पाठोऽयं गृहीतः ॥

**ब्रह्मणः कामप्रकारवर्णनम् -**

स परमात्मा स्रक्ष्यमाणप्राणिकर्मापेक्षया कामेषु स्वतन्त्रः सन् कामितवान् इत्युक्तम् । तत्र 'कथं कामितवान्?' इति प्रश्नस्योत्तरत्वेन श्रुतिवाक्यमवतारयति- **बहु स्यामिति** । अत्र बहुभवनं सङ्ख्यया परिमाणेन वेति मत्वा सङ्ख्यापक्षे तावदाक्षिपति - **कथमेकस्येति** । घटस्य स्वान्यघटपटाद्यर्थान्तरानुप्रवेशे हि सङ्ख्योपचये बहुत्वं स्यात् । न ह्येकस्यैव स्थितस्य बहुत्वापत्तिरन्यथोपपद्यते - इत्याक्षेप्तुरभिप्रायः । तत्र परिहारः श्रुत्या - 'प्रजायेय' इति । तद्व्याचष्टे **उत्पद्येय** इति । स्वयमेव बहुरूपेणोत्पद्येय इत्येषोऽर्थ उत्तमपुरुषप्रयोगेण श्रुत्या द्योत्यत इति भावः । तदेव लौकिकदृष्टान्तेन विशदयति - **'न हि पुत्रोत्पत्त्येव'** इति । यथा देवदत्तस्य पुत्रोत्पत्तेरर्थान्तरानुप्रवेशेनापि बहुसङ्ख्यावत्वप्राप्तिः, 'आत्मना तृतीयो जातोऽयं द्वितीयपुत्रोत्पत्त्या' इत्यादिव्यवहारदर्शनात् । न तथेह । **'कथं तर्हि ?'** इति प्रश्नः । तत्रोत्तरम् - **'आत्मस्थानभिव्यक्तनामरूपाभिव्यक्त्या'** इति । तत्र नामरूपाभिव्यक्तिः स्वेनैव नामरूपात्मना अनभिव्यक्तयोरिति मा शङ्कीत्यतः संग्रहवाक्यं विवृणोति - **'यदा आत्मस्थे' इत्यादिना** । वाक्याभिप्रायो व्याख्यात एवास्मभिः कामयितृत्वविमर्शनप्रस्तावेन (पु. १५०) । **आत्मस्थे** इति आत्मन्यात्मरूपेणैव स्थिते अविद्यादृष्ट्या - ब्रह्मण आत्मभूते इवाविद्याकल्पिते - इत्यादि सर्वं यथावर्णितमिहानुसंधेयम् । नामरूपे **ब्रह्मणोऽप्रविभक्तदेशकाले** इति । यत्र यत्र यदा यदा नामरूपव्यवहारः, तत्र तत्र तदा तदा ब्रह्मात्मतास्वरूपापरित्यागेनैव तयोः स्थितिर्व्यवहारश्चेत्यभिप्रायकमेतत् । न पुनर्देशकालयोरधिकरणत्वं विवक्षितम् ब्रह्मणो नामरूपयोश्च समानदेशकालयोरेव स्थितिर्न भिन्नदेशकालयोरिति । देशकालयोरपि नामरूपत्वाविशेषात् । तथा चाव्याकृतावस्थायामिव व्याकृतवास्थायामपि नामरूपे ब्रह्मात्मनैव स्थिते, यथा फेनः सदा सलिलात्मनैव स्थितः, यथा वा माया मायाव्यात्मनैवेत्यभिप्रायः । एवं चात्मन एकस्यैव सतो नामरूपव्याकरणावस्थायां बहुभवनमिव भवतीत्यविरोध इति भावः । ननु वस्तुत एव ब्रह्म जगदुत्पिपादयिषदुच्छूनतां गच्छति, परिणामान्तरं गच्छत् प्रचितं भवति, सङ्ख्याबहुत्वं चापद्यते भूतभौतिकरूपेण,

बीजमिववृक्षत्वमापन्नं बहुशाखादिरूपेणेति किं न स्यात् ? तत्राह - **'नान्यथा निरवयस्य'** इति निरवयवस्यैकस्य न बह्वल्पसङ्ख्यापरिमाणादिभाक्त्वमन्यथोपपद्यते यथोपवर्णितप्रकारं मुक्त्वा । यथोपवर्णितप्रकारेण तूपपद्यतेल्पत्वं बहुत्वं चेत्यत्र दृष्टान्तः - **'यथा आकाशस्य'** इति । न ह्याकाशस्य निरवयवस्य घटकरकाद्युपाध्यपेक्षतां मुक्त्वा अल्पत्वं बहुत्वं वा भवति । एवम् इहाप्यविद्याकल्पितनामरूपोपाधिद्वारेणैव ब्रह्मणो बहुत्वं भवतीत्यभ्युपेयम् इत्याह- **अतस्तद्द्वारेणैवेति** ॥

## १२६. नामरूपयोर्वास्तवत्त्वानुपपत्तिः -

ननु नामरूपे वास्तविके एवाव्याकृते व्याकृते च भविष्यतः । तथा हि केचिद् वर्णयन्ति - सूक्ष्मचिदचिद्वस्तुशरीरकः परमात्मा कारणम्, स एव च परमात्मा स्थूलचिदचिद्वस्तुशरीर· कार्यमिति । एवं च बहुभवनसङ्कल्पोऽपि नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुशरीरकतया एकधावस्थितस्य विभक्तनामरूपचिदचिच्छरीरकतया बहुप्रकारतापत्तिविषय इति स्थास्यतीति किमनेनाविद्याकल्पितनामरूपोपाधिना परिकल्पितेन ? तत्परिकल्पने हि ब्रह्मव्यतिरिक्तस्य अविद्यासम्बन्धिन उपाधिसंबन्धिनो वा चेतनस्याभवात्, अविद्योपाधिसंबन्धौ, तत्कृताश्च दोषा ब्रह्मण एव भवेयुरिति । नैतत्सारम् । कस्मात्? **न ह्यात्मनोऽन्यदनात्मभूतं तत्प्रविभक्तदेशकालं सूक्ष्मं व्यवहितं विप्रकृष्टं वा भूतं भवद्भविष्यद्वा वस्तु विद्यते** । न हि परमात्मचैतन्येन सर्वगतेनाव्याप्तं ततो देशकालप्रविभक्तम् अन्यत्किञ्चित् संभाव्यते । ब्रह्मणश्चिदचिच्छरीरकत्वकल्पनं त्वाकाशस्य स्वकार्यघटादिना आकारवत्वकल्पनमिव मिथ्याज्ञानविजृम्भितमात्रम्। चिदचितोर्हि ब्रह्मचैतन्यव्याप्तयोर्ब्रह्मात्मनैवात्मधारणम्, यथा मृद्व्याप्तस्य घटस्य मृदात्मनैवेति श्लिष्यते । न हि मृदो व्यतिरिक्तो घटस्यात्मा नाम कश्चित्संभाव्यते। न च सर्वप्रत्यगात्मभूतब्रह्मणोऽन्यच्चिद्रूपं नाम समस्ति निरूप्यमाणम् । 'नान्यदतोऽस्ति द्रष्टृ' (बृ. ३-८-११) इत्यादिश्रुतेः । चैतन्यव्यतिरिक्तस्याचित्त्वध्रौव्यात्, चिच्चैतन्ययोः संविदेकरूपत्वे सति स्वरूपे विशेषाभावाच्च । न चाचिद्रूपं संविदेकरूपत्वे सति स्वरूपे विशेषाभावाच्च । न चाचिद्रूपं ब्रह्मचैतन्येनाव्याप्त-

मणुमात्रमपि संभाव्यते विद्यते वा ॥ 'ब्रह्मैवेदं विश्वम्' (मुं. २-२-१२) इति श्रुतेः। **अतो नामरूपे सर्वावस्थे ब्रह्मणैवात्मवतीति** सिद्धम् । तत्किमिदानीं ब्रह्मापि नामरूपे एवाचिदात्मके ? तथा च बहुसंमञ्जसं कल्पितं स्यात्। नो चेत्, नामरूपयोर्नामिरूपत्वेनैव चिद्वैलक्षण्येनानुभूयमानयोः किमिति ब्रह्मात्मकत्वमुच्यते? तत्रोत्तरम् - **न ब्रह्म तदात्मकम् । ते तत्प्रत्याख्याने न स्त एवेति तदात्मके उच्येते इति** । अयमाशयः । यथा नामरूपे स्वोपलम्भदशायामपि ब्रह्मावलम्बनेनैव स्वरूपं भजतः ब्रह्मणोऽन्यत्वेन निरूप्यमाणे वस्त्वन्तरे तत्त्वतो न स्त एव, फेनबुद्बुदादिरिव सलिलादन्यत्वेन, मायेव च स्वसंप्रसारकमायाव्यन्यत्वेन। यथा च ते स्वरूपव्यभिचारमपि भजतः सुषुप्तिप्रलयादिषु, सलिलदशायामिव फेनबुद्बुदादयः स्वोपसंहारदशायामिव च माया; न तथा ब्रह्मापि नामरूपावलम्बनेनैव स्वात्मानं बिभर्ति, नापि ताभ्यामन्यत्वेन निरूप्यमाणं नास्ति, तयोरस्तमये च स्वं रूपं व्यभिचरतीति शक्यं कल्पयितुम् । अनुभवविरोधात् । स्वयंसिद्धं ह्यात्मचैतन्यं जाग्रत्स्वप्नयोर्नामरूपप्रादुर्भावे सुषुप्तादिषु तत्तिरोभावे चोपचयापचयरहितं स्वरूपेणैवावतिष्ठत इति सार्वजनीनानुभवसिद्धमेतत्। अतो ब्रह्म न नामरूपात्मकम्, नामरूपे तु ब्रह्मात्मचैतन्यावलम्बनेनैव लब्धप्राणे चैतन्यप्रकाशेनैवासादितस्फुरणे चेति ते ब्रह्मात्मके उच्येते इति । तस्मात् परमार्थतो ब्रह्मणः सदैव निर्विशेषत्वं सर्वव्यवहारातीतत्वं चास्थेयम् । अविद्याकल्पितेनैव तु नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म सर्वव्यवहारास्पदत्वं प्रतिपद्यत इति युक्तमित्याह - **'ताभ्यां चोपाधिभ्यां ज्ञातृज्ञेयज्ञानशब्दार्थादिसंव्यवहारभाग्ब्रह्म'** इति । ज्ञप्तितत्वैकस्वभावमपि सत्, अहङ्कारोपाधिना ज्ञातृव्यवहारभाग् ब्रह्म, शब्दस्पर्शादिलक्षणोपाधिना ज्ञेयव्यवहारभाक्, अन्तःकरणवृत्त्युपाधिना ज्ञानव्यवहारभाक्, जिह्वाश्रोत्राद्युपाधिना शब्दादिव्यवहारभाक्, शब्दविवक्षितभूतभौतिकाद्याकारोपाधिना अर्थव्यवहारभाक्। आदिशब्दात् परिणामकार्यकरणक्रियाकारकफलादिव्यवहारभाक्च तत्तदुपाधि-वशादिति द्रष्टव्यम् । उपाधीनां चाविद्याप्रत्युपस्थापितत्वात् पारमार्थिकस्वरूपेण तु सर्वदा सर्वव्यवहारातीतमेवावतिष्ठते तदिति ज्ञेयम् । यत्तूच्यते अविद्योपाधिपरिकल्पने अविद्यासंबन्धिन उपाधिसंबन्धिनो वा ब्रह्मव्यतिरिक्तस्या-

भावाद् ब्रह्मण एवाविद्योपाधिसंबन्धौ तत्कृतदोषाश्च स्युरिति । स शङ्काव्याधिर्विहितभेषज एव ब्रह्मस्वातन्त्र्यविमर्शावसर इति नाधिकं वक्तव्यमवशिष्यते । न हि प्राग् ब्रह्मात्मैक्यबोधात् व्यवहारावस्थायाम् अविद्याश्रयो जीवो न विद्यते । चोदयितुरेव तदाश्रयत्वसंभवात् । न च तेनाध्यारोपितैर्दोषैर्ब्रह्माणुमात्रमपि संबध्यते, बालैरध्यारोपिततलमलादिदोषैरिवाकाशम् । बोधात्परं त्वविद्या तत्प्रत्युपस्थापितोपाधिर्वा नैवापेक्ष्यते नापि समस्तीत्यास्तां प्रासङ्गिकमेतत् । प्रकृतं त्विदं यत् स परमात्मा यथावर्णितेन प्रकारेण अकामयत बहु स्यां प्रजायेयेति श्रुत्यर्थविवेचनम् । स चात्मा यथावस्थितस्वरूपेण स्थित एवार्थान्तराननुप्रवेशेन मायाविवत् स्वात्मस्थनामरूपमायाव्याकरणेन बहु भवेयमिति संकल्पितवान् इति च श्रुतेरर्थ इति स्थितम् ॥

**५४. स आत्मा एवंकामः सन् तपोऽतप्यत। 'तपः' इति ज्ञानमुच्यते । 'यस्य ज्ञानमयं तपः।' (मुं. १-१-१) इति श्रुत्यन्तरात्। आप्तकामत्वाच्चेतरस्यासंभव एव तपसः। तत्तपः अतप्यत तप्तवान् । सृज्यमानजगद्रचनादिविषयम् आलोचनाम् अकरोदात्मा इत्यर्थः ॥**

**१२७. ब्रह्मणः स्रष्टव्यविषयकं तपः -**

अथेदानीं ब्रह्मणो जगत्कारणस्य चेतनत्वे कामयितृत्ववल्लिङ्गान्तरमप्यस्तीति वक्तुं व्याचिख्यासितं वाक्यान्तरमवतारयति - **'स आत्मा एवंकामः'** इत्यादि । स सत्यज्ञानादिलक्षणतया प्रागुपन्यस्त आत्मा 'बहु स्यां प्रजायेय' इत्येवंकामः सन्, तपोऽतप्यत । तपःसाध्या तर्हि परमात्मनोऽपि जगत्सृष्टिरित्याशङ्कापरिहारार्थं व्याचष्टे **'तप इति ज्ञानमुच्यते'** इति । तत्र समानप्रकरणं श्रुत्यन्तरं संवादयति - **'यस्य**

**ज्ञानमयं तपः' इति श्रुत्यन्तरात्** इति । यस्य ज्ञानविकार एवालेचनारूपं तपः, नायासरूपमिष्टार्थसाधनत्वेन महर्ष्यादिभिस्तप्यमानम् इति श्रुत्यर्थः । इतश्चात्र ज्ञानमयमेव तपोऽङ्गीकार्यमित्याह - **'आप्तकामत्वाच्च'** इति । सर्वज्ञं ब्रह्म सत्यज्ञानलक्षणं सर्वेषामपि कामानां तदनन्यत्वेन स्थितेरित्याप्तकामम्-इत्यवोचाम। न हि तस्यानाप्तमस्ति यदायासलक्षणेन तपसा आप्तव्यं स्यात् । अतोऽप्यत्र तपो ज्ञानमेवेति गम्यत इत्यभिप्रायः । एवं च तपेरालोचनकर्मण इदं रूपम् अतप्यतेतीत्याशयवान् वाक्यार्थमाह - **'सृज्यमानजगद्रचनादिविषया-मालोचनामकरोदात्मा इत्यर्थ'** इति । आलोचना चेयं पूर्वोक्तदिशा अविद्याकल्पितनामरूपलक्षणेन रूपभेदेन मायिक्येवेति सर्वमनवद्यम् ॥

**५५. स एवमालोच्य तपस्तप्त्वा प्राणिकर्मादिनिमित्तानुरूपम् इदं सर्वं जगद् देशतः कालतो नाम्ना रूपेण च यथानुभवं सर्वैः प्राणिभिः सर्वावस्थैरनुभूयमानम् असृजत सृष्टवान् । यदिदं किञ्च यत्किञ्चेदम् अविशिष्टम् ॥१८॥**

### १२८. परमात्मना जगतः सर्वस्य सृष्टिः -

**'स एवमालोच्य'** इति । जगद्रचनतत्स्थित्यादिविषयिकां यथोक्तप्रकारेण माययैव चिन्तां कृत्वेत्यर्थः । व्याख्यानमिदं **'तपस्तप्त्वा'** इत्यनूदितश्रुतिभागस्य। अत्र 'तपस्तप्त्वा इदं सर्वमसृजत' इति क्त्वाप्रत्ययप्रयोगात् यथा कुम्भकारादिर्घटादि सिसृक्षुः 'पूर्वं किं घटं कुर्यां न कुर्यां वा ; घटं वा कुर्यां शरावं वा' - इत्येवमादिविमर्शपूर्वकं घटमेव करिष्यामीति क्रतुं कृत्वा घटमेव निर्वर्तयति, एवमेव परमात्मा पूर्वं तपस्तप्त्वा तदनन्तरं जगदसृजतेति कालक्रमो विवक्षित इति न भ्रमितव्यम् ; किं तर्हि सर्वज्ञस्य तस्यात्मस्थे इव कल्पिते नामरूपे स्वयमेव

तत्सांनिध्यबलात् स्रष्टव्यप्राणिकर्मापेक्षया तत्तद्रूपेण विपरिवर्तेते इत्यभिप्रायेणाह - **प्राणिकर्मादिनिमित्तानुरूपम्** इत्यादि **नामरूपेण चे**त्यन्तम् । यथा यथा प्राणिनः कर्म कृतवन्तः पूर्वकल्पे, यस्मिश्च देशे काले वा यन्निमित्तं च नामरूपाभ्यां तत्तद्विशेषाकारेण परिणताभ्यां तेषां प्राणिनां फलैर्योगो भाव्यः, तथा तथा तदनुरूपमेव सर्वमसृजतेत्यर्थः। एवं च सृज्यमानप्राणिकर्माद्यपेक्षयैव यतोऽस्राक्षीत्, ततो नामुष्य स्वच्छस्वभावस्यैव सतो विषमसृष्टिं विहितवानिति रागद्वेषादिसंसर्गः सृष्टिकर्मलोपो वा शङ्कनीय इति भावः । **'यथानुभवम्'** इति प्रतिनियतदेशकालनिमित्त-क्रियाफलाश्रयं यथानुभूयते तथास्थितं जगत् परामृश्यते। **'सर्वैः प्राणिभिः सर्वावस्थैरनुभूयमानम्'** इति च सुरनरतिर्यगादिभिर्धर्माधर्मानुष्ठानेन सुखदुःखावाप्तृभिर्नानाविधकर्तृभोक्तृभिः संयुक्तं जगदेव विशेष्यते। **इदं सर्वम्** इति यथोक्तविशेषणं प्रत्यक्षसंनिधापितं जगद्विवक्षितमित्यभिप्रायः । तदीदृशं जगद्यथोपवर्णितज्ञानमयतपोमात्रेणानुपादायैव किञ्चित्, महामायावित्वात् यथावस्थितं स्वात्मानमेवैतज्जगद्रूपेण सृष्टवानित्यभिप्रायः॥

## १२९. निर्व्यापारस्याप्युपादानान्तरानपेक्षं सर्वस्रष्टृत्वोपपत्तिः -

न च 'निर्व्यापार एव कथं सृष्टवान् ? कथं वा एकरूप एव चावतिष्ठमानो देशकालादिवैचित्र्यचित्रीकृतजगत्वेनात्मानं सृष्टवान् ?' इति शङ्कनीयम् । कुर्वत एव कारणत्वम्, नानारूपस्यैव वा इति नियमाभावात् । ध्रुवस्यैव सतोऽयस्कान्तस्य लोहाकर्षणदर्शनात् । एकरूपस्याप्यलातस्य स्पन्दनमात्रेण ऋजुवक्राद्यनेकाकारा-भासदर्शनाच्च । इहापि यथोक्तप्रकारेण नामरूपमायास्पन्दितेनैव कूटस्थस्यापि सत्यज्ञानलक्षणस्य ब्रह्मणो वैश्वरूप्यलाभोपपत्तेः । बहु स्यां प्रजायेयेति सङ्कल्पा-भिधायकश्रुतिप्रामाण्याच्च । यथाहु-**वार्तिककाराः** 'ध्रुवः सन् कुरुते कार्यमयस्कान्तो मणिर्यथा । कारणत्वं भवेदेवं कुर्वतोऽतिशयः कुतः ॥' (तै.वा. २-३७०), 'अलातस्यैकरूपस्य वैश्वरूप्यं यथान्यतः । रूपाभिधानभ्रान्त्युत्था बहुतेयं परात्मनः। प्रजायेयेत्यतो वक्ति नामरूपात्मना प्रभुः ॥' (तै.वा. २-३७२) इति च । तस्मात् तपोमात्रेण सर्वसृष्टिरविरुद्धेत्यभिसंधाय व्याचष्टे - **'यदिदं किञ्च यत्किञ्चेदविशिष्टमिति ॥१८॥**

तत्सृष्ट्वा । तदेवानुप्राविशत् ॥१९॥

(२) अस्ति ब्रह्म । विज्ञानगुहायामुपलभ्यमानत्वात्

५६. तदिदं जगत् सृष्ट्वा किमकरोदिति ? उच्यते । तदेव सृष्टं जगत् अनुप्राविशदिति ॥

## प्रवेशवाक्यार्थचिन्ता

५७. तत्रैतच्चिन्त्यम् - कथम् अनुप्राविशत् ? इति। किं यः स्रष्टा स तेनैवात्मना अनुप्राविशत् उतान्येनेति । किं तावद् युक्तम् ? क्त्वाप्रत्यय-श्रवणाद् यः स्रष्टा स एवानुप्राविशदिति । ननु न युक्तं मृद्वच्चेत्कारणं ब्रह्म । तदात्मकत्वात् कार्यस्य। कारणमेव हि कार्यात्मना परिणतम्[१] इत्यतोऽप्रविष्टस्येव[२] कार्योत्पत्तेरूर्ध्वं पृथक्कारणस्य पुनः प्रवेशोऽनुपपन्नः । न हि घटपरिणामव्यतिरेकेण मृदो घटे प्रवेशोऽस्ति। (१) यथा घटे चूर्णात्मना मृदोऽनुप्रवेशः, एवम्

१. 'परिणमते' वा ॥

२. 'अप्रविष्ट इव' आ । 'अप्रविष्टस्यैव वा ॥ इति पाठद्वयमपि परित्यज्य षष्ठ्यन्तपाठ एव स्वीकृतोऽत्र कारणस्येत्यनेनान्वयार्थम् । टीकायां तु 'अप्रविष्टे यथा मंठादौ देवदत्तस्य प्रवेशो दृष्टः' इति व्याख्याय सप्तम्यन्तपाठ एवाङ्गीकृतः । तत्र 'पुनः प्रवेश' इति भाष्यं न स्वरसमिति स्पष्टम् ॥

अन्येनात्मना[1] नामरूपकार्येऽनुप्रवेश आत्मन इति चेत् । श्रुत्यन्तराच्च 'अनेन जीवेनात्मनानुप्रविश्य' (छां. ६-३-२) इति। नैवं युक्तम् । एकत्वाद् ब्रह्मणः । मृदात्मनस्तु अनेकत्वात् सावयत्वाच्च युक्तो घटे मृदश्चूर्णात्मना अनुप्रवेशः । मृदश्चूर्णस्याप्रविष्टदेशवत्वाच्च[2]। न त्वात्मनः एकत्वे सति निरवयत्वात्, अप्रविष्टदेशाभावाच्च प्रवेश उपपद्यते । (२) कथं तर्हि प्रवेशः स्यात् ? युक्तश्च प्रवेशः । श्रुतत्वात् 'तदेवानुप्राविशत्' इति । सावयवमेवास्तु तर्हि? सावयवत्वान्मुखे हस्तप्रवेशवत्, नामरूपकार्ये जीवात्मना अनुप्रवेशो युक्त एवेति चेत् । न । अशून्य(प्र) देशत्वात्[3]। न हि कार्यात्मना परिणतस्य नामरूपकार्यदेशव्यतिरेकेण आत्मशून्यः प्रदेशोऽस्ति यं प्रविशेज्जीवात्मना। (३) कारणमेव चेत् प्रविशेत्, जीवात्मत्वं जह्यात्। यथा घटो मृत्प्रवेशे घटत्वं जहाति ।

---

१. 'अनेनात्मना' वा ॥

२. 'देशत्वाच्च' इति वा ॥

३. 'अशून्यात्वात्' आ ॥ 'अशून्यदेशत्वात्' वा ॥

'तदेवानुप्राविशत्' इति च श्रुतेर्न कारणानुप्रवेशो युक्तः (४) कार्यान्तरमेव स्यात् इति चेत् । 'तदेवानुप्राविशत्' इति जीवात्मरूपं कार्यं नामरूपपरिणतं कार्यान्तरमेवापद्यते इति चेत्। न । विरोधात्। न हि घटो घटान्तरमापद्यते । व्यतिरेक-श्रुतिविरोधाच्च । जीवस्य नामरूप-कार्यव्यतिरेकानुवादिन्यः श्रुतयो विरुध्येरन्। तदापत्तौ मोक्षासंभवाच्च । न हि यतो मुच्यमानः तदेवापद्यते । न हि शृङ्खला-पत्तिर्बद्धस्य तस्करादेः । (५) बाह्यान्तर्भेदेन परिणतम् इति चेत्। तदेव कारणं ब्रह्म शरीराद्याधारत्वेन तदन्तर्जीवात्मना आधेयत्वेन च परिणतम् इति चेत् । न । बहिष्ठस्य प्रवेशोपपत्तेः । न हि यो यस्यान्तःस्थः स एव तत्प्रविष्ट उच्यते । बहिष्ठस्यानुप्रवेशः स्यात् । प्रवेशशब्दार्थस्य एवं दृष्टत्वात्, 'यथा गृहं कृत्वा प्राविशत्' इति। (६) जलसूर्यकादि-प्रतिबिम्बवत् प्रवेशः स्यात् इति चेत् । न । अपरिच्छिन्नत्वात्, अमूर्तत्वाच्च। परिच्छिन्नस्य मूर्तस्यान्यस्य अन्यत्र प्रसादस्वभावके जलादौ

**सूर्यकादिप्रतिबिम्बोदयः स्यात् । न त्वात्मनः अमूर्तत्वात्, आकाशादिकारणस्यात्मनो व्यापकत्वात्, तद्विप्रकृष्टदेशप्रतिबिम्बाधारवस्त्वन्तराभावाच्च प्रतिबिम्बवत् प्रवेशो न युक्तः ॥**

## १३०. प्रवेशग्रन्थे चिन्ताविषयोपन्यासः-

अथ ब्रह्मणः सृष्ट्यनन्तरं जीवरूपेण प्रवेशः श्रूयते । तत्र प्रवेशश्रुतेरैदम्पर्यं निर्णेतुं चिन्तामवतारयिष्यन् तत्कर्तव्यतां तावत्प्रतिजानीते - **तत्रैतच्चिन्त्यम्** इति। किमत्र चिन्त्यमिति ? तत्राह - **यः स्रष्टा स तेनैवात्मना अनुपाविशत्,** उतान्येनेति । यथाश्रुतार्थं तावद्गृह्णाति - क्त्वाप्रत्ययश्रवणादिति । यथा हि 'भुक्त्वा अगच्छत्' इत्युक्ते भोजनकर्तैव गमनकर्तेति भुजिगमिक्रिययोरेककर्तृत्वमेवावगम्यते, एवमिहापि 'सृष्ट्वा अनुप्राविशत्' इत्युक्तेः सृष्ट्यनुप्रवेशक्रिययोरेककर्तृकत्वमेव युक्तमवसातुमिति भावः । तदेवं सृष्टिकर्तैव सृष्टं कार्यं प्रविवेशेति वाक्यार्थे स्थिते, 'कथमनुप्राविशत्?' इत्येतच्चिन्त्यं भवतीति चिन्ताविषयोपन्यासो द्रष्टव्यः । प्रवेशप्रकारस्यैवाक्षेपपरिहाराभ्यां निर्धारयिष्यमाणत्वात् ॥

## १३१. प्रवेशानुपपत्तिशङ्का -

अत्र यथैव परमेश्वरस्य सृष्टिर्मायिकी, तथैव प्रवेशोऽपि मायिकः श्राव्यते ब्रह्मात्मैकत्वबोधनार्थम् इति चिन्तान्ते पर्यवसास्यति । यदाहुर्**वार्तिककाराः** 'मायवी जदगुत्पाद्य माययैवेश्वरेश्वरः । सर्पादीन् कल्पितान् स्रग्वत्तदेवानुविवेश सः ॥' (तै.वा. २-३७८) इति । तदिदं रहस्यमविजानन्तो वेदान्त्येकदेशिनः प्रवेशः पारमार्थिक एवेत्यवयन्ति । अतस्तत्पक्षनिरासार्थं पूर्वपक्षमुत्थापयति - **'ननु न युक्तं मृद्वच्चेत्कारणम्'** इत्यादिना 'न घटे प्रवेशोऽस्ती'त्यन्तेन । 'बहु स्याम्' इत्यभिध्यानश्रुतेस्तावत् परिणामकारणता गम्यते ब्रह्मणः । तथा च 'असृजत' इत्यस्य

कार्यरूपेणात्मानं परिणमयांचक्रे इत्यर्थोऽवसीयते । एवं चेत् सृष्टिश्रुतेरर्थः, सृष्ट्यैव कार्यप्रवेशस्य निष्पन्नत्वात्, पुनरपि कारणं पृथगवस्थितमिव कृत्वा "तदेवानुप्राविशत्" इति कार्यानुप्रवेशकथनं नोपपद्यते - इत्याक्षेप्तुरभिप्रायः ॥

**परिणामवादिमतनिराकरणम् -**

तत्रैकदेशी परिणाममेवोररीकृत्य श्रुत्यर्थं व्याचष्टे - **'यथा घटे चूर्णात्मना मृदोऽनुप्रवेश'** इत्यादिना चेदित्यन्तेन । एतत्पक्षे श्रुत्यन्तरमप्यनुकूलमित्याह - **'श्रुत्यन्तराच्च'** इत्यादिना । न हि परमात्मस्वरूपेणैवानुप्रविशामि, कथं तर्हि रूपान्तरेण जीवरूपेणैव देहम् - मृदिव चूर्णात्मना घटम् - अनुप्रविशामीर्ति सदाख्या परा देवता संकल्पितवतीति परिणामवाद्यभिमतः श्रुत्यर्थः । तदेतन्निराकरोति प्रवेशाक्षेप्ता - **'नैवं युक्तम्'** इत्यादिना । मृदश्चूर्णात्मनेव परमात्मनो जीवात्मना परिणम एव तावन्न युक्तः । अतस्तदात्मना प्रवेश इत्यपि न युक्तमित्यर्थः । कुतः ? **एकत्वाद्ब्रह्मणः** । एकं निष्कलं हि ब्रह्म वेदान्तसंमतम् । **मृदात्मनस्त्वनेकत्वात्सावयवत्त्वाच्च युक्तो घटे मृदश्चूर्णात्मना अनुप्रवेशः** ॥ चूर्णरूपत्वं भजन्ती मृद् घटात्मतामापद्यत इति चूर्णात्मना तं प्रविशतीति व्यपदेष्टुं शक्यत इति विषमो दृष्टान्तः । इतश्च विषमो दृष्टान्तः - **मृदश्चूर्णस्याप्रविष्टदेशवत्त्वाच्च** । न हि चूर्णदेश एव घटदेशः, ततोऽप्यधिकतरस्तु । अतः समस्त्यप्रविष्टो देशश्चूर्णस्येत्यर्थः। तर्हि परमात्मनोऽप्येवमेव जीवात्मना परिणामोऽस्तु नामरूपात्मके कार्ये, ततोऽप्यधिकतरदेशवर्तिप्रवेशश्चेत्याशङ्क्य निराचष्टे **न त्वात्मन** इत्यादिना । प्रज्ञानघनत्वादनेकात्मकत्वाभावे निरवयवत्वात् , आकाशवत्सर्वगतत्वेनाप्रविष्टदेशाभावाच्च परिणामः प्रवेशो वा नोपपद्यत इत्यर्थः ॥

अथ **परिणामवादी** प्रवेशश्रुतेः स्वपक्षानुकूलत्वात् प्रबलतरत्वं मन्वानोऽनिष्टापत्तिमप्यविगणय्य प्रकृतश्रुतिसार्थक्यार्थं 'दिव्यो ह्यमूर्तः पुरुष' (मुं. २-१-२), 'निष्कलं निष्क्रियम्' (श्वे. ६-१९) इत्यादिश्रुतिगणस्त्याज्य एव, तत्र मुख्यार्थस्वीकारे प्रवेशानुपपत्तिप्रसङ्गात् कथञ्चिन्नेयोऽसौ इत्यभिप्रायेणाक्षिपति - **कथं तर्हीति** । यदि निरवयव एवात्मा स्वीक्रियते, कथं तर्हि प्रवेश उपपद्यते ? न

च मैवोपपादि किं न्नश्छिन्नमिति शङ्क्यम् इत्याह - **युक्तश्च प्रवेशः । श्रुतत्वात्तदेवानुप्राविशदिति ।** प्रवेशश्च श्रुत्यन्तरेष्वपि बहुशो दर्शितः 'स एष इह प्रविष्टः' (बृ. १-४-७) 'अनुप्रविश्य नामरूपे व्याकरवाणि ? (छां. ६-३-२), 'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत' (ऐ. १-३-१२) इत्यादिषु । तस्मात्प्रवेशश्रुतिरवश्यं सार्थकयितव्येत्यभिप्रायः । कथं तर्हि सार्थक्यं प्रवेशश्रुतेरित्यत्र स्वाभिप्रायमाविष्करोति-**सावयवमेवास्तु तर्हीत्यादिना** । निरवयवत्वश्रुतिर्गौणार्थत्वेन नेया बहुशः श्रुतप्रवेशश्रुतेरर्थवत्वायेत्यभिप्रायः । ननु स्वीकृतेऽपि ब्रह्मणः सावयवत्वे कथमिव प्रवेशश्रुतिरुपपद्यताम् ? तत्राह - **सावयवत्वान्मुखे हस्तप्रवेशवदित्यादि ।** हस्तस्थानीयो जीवात्मना परिणामः, मुखस्थानीयश्च नामरूपात्मकपरिणामविशेषः। तथा च जीवात्मनानुप्रवेशसंभवात् प्रवेशश्रुतिरुपपादिता भविष्यतीत्यभिप्रायः । तदेतदाक्षेप्ता प्रत्याचष्टे - **न। अशून्यप्रदेशत्वात्** इति । अस्य विवरणम् **'न हि कार्यात्मना परिणतस्य'** इत्यादि **'जीवात्मना'** इत्यन्तम् । कृत्स्नं हि ब्रह्म नामरूपात्मना परिणतम् । न च नामरूपव्यतिरिक्तः प्रदेशोऽवशिष्यते यं जीवात्मना परिणतं ब्रह्म प्रविशेत् । तस्माद् भक्षितेऽपि लशुने न शान्तो व्यधिरिति न्याय आपतेत् सावयवत्वाभ्युपगन्तुः ; तथापि प्रवेशानुपपादनादिति भावः ॥

परिणामवादी काशं कुशं वा अवलम्बयाह - **'कारणमेव चेत् प्रविशेत्'** इति। तदेतदतिसाहसं कल्पनम् । यतः कारणप्रवेशे कार्यरूपमेव विनङ्क्ष्यतीत्याह- **कारणमेव चेत् प्रविशेज्जीवात्मतां जह्यादिति ।** तथा च वृद्धिमिच्छतो मूलमपि नष्टं भवेत्तवेति भावः । श्रुत्यक्षरबाह्या चेयं कल्पनेत्याह - **'तदेवानुप्राविशदिति श्रुतेर्न कारणानुप्रवेशो ब्रह्मणः'** इति । न हि कार्यविशेषस्य कारणप्रवेशमाहेयं श्रुतिः, किं तर्हि कारणस्य कार्यविशेषम् । अतः श्रुतिप्रतीपमेवाचरितं स्यादेवं व्याकुर्वतेत्यभिप्रायः ॥

अथैकदेशी कल्पान्तरमादत्ते - **'कार्यान्तरमेव स्यादिति चेत्'** इत्यादि **आपद्यत इति चेदित्यन्तम्** । जीवस्तावदेकं कार्यम् । 'अनेन जीवेनात्मना'

(छां ६-३-२), 'यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः ....' (मुं २-१-१) इत्यादिश्रुतिप्रामाण्यात्। नामरूपात्मकं चान्यत् । 'नामरूपे व्याकरणवाणि' (छां. ६-३-२) इत्यादिश्रुतिप्रामाण्यात् । तस्मात् **'तदेवानुप्राविशत्' इति जीवात्मरूपं कार्यं नामरूपपरिणतं कार्यान्तरमेवापद्यत इति श्रुतेरर्थ इति** चेत् । तत्राहाक्षेप्ता - **'न । विरोधात्'** इति । कार्यान्तरामेव प्रवेक्ष्यति जीवः, तथा च श्रुत्यक्षराञ्जस्यं भविष्यतीति वदतो द्वेधा विरोधः प्रसज्यते । कार्यं कार्यान्तरमापाद्यते इति वदतोऽनुभवविरोधस्तावदेकः । **न हि घटो घटान्तरमापद्यते** लोके । श्रुतिविरोधोऽपरः । एवं हि **जीवस्य नामरूपकार्यव्यतिरेकानुवादिन्यः श्रुतयो विरुध्येरन्**। जीवो हि द्रष्टा, श्रोता, मन्ता, विज्ञाता चेति द्रष्टव्यश्रोतव्यमन्तव्यविज्ञातव्यरूपान्नामरूपलक्षणकार्याद् व्यतिरिच्यत इति न्यायसिद्धम् । तदेतन्न्यायसिद्धमनुवदन्ति नैकाः श्रुतयः । 'अनेन जीवेनात्मनानुप्रविश्य' (छा. ६-३-२), 'विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि संप्रतिष्ठन्ति यत्र' (प्र. ४-११), 'अयमात्मा इदं शरीरं निहत्य' (बृ. ४-४-३), 'अन्यन्नवतरं कल्याणतरं रूपं कुरुते' (बृ. ४-४-४) इत्याद्याः । तद्विरोधश्च प्रसज्यते जीवस्य नामरूपकार्यान्तरापत्तिं ब्रुवत इति 'विरोधात्' इति हेत्वर्थविवरणम् । अनिष्टापत्तिश्च स्यादस्मिन् पक्षे इति हेत्वन्तरेण समुच्चिनोति - **'तदापत्तौ मोक्षसंभवाच्च'** इति । मोक्षासंभवमेव स्फुटीकरोति - **न ही**त्यादिना **तस्करादे**रित्यन्तेन। नामरूपाभिमान एव हि जीवस्य बन्धकारणम् । रागद्वेषाद्यास्पदत्वात् । न च नामरूपाभिमानवतो नामरूपबन्धाद्विमुक्तिरस्ति स्वरूपहानिमन्तरेण तस्मान्नामरूपकार्यं चेदापद्यते जीवस्ततो ध्रुवमस्य बन्ध इति शृङ्खलापन्नस्येव तस्करस्य कुतो मोक्षप्रत्याशेत्यभिप्रायः ॥

इयत्या चिन्तया जीवात्मना परिणतस्य नामरूपप्रवेशो वा कारणब्रह्मप्रवेशो वा नोपपद्यत इति प्रतिष्ठापितम् । अथ च परिणामवादी स्वपक्षग्रहव्यसनितया प्रकारान्तरेणैव प्रवेशमुपपादयिष्यामीत्याह - **बाह्यान्तर्भेदन परिणतमिति चेत्** इति। संग्रहवाक्यं विवृणोति-**तदेव कारणम्** इत्यादिना **परिणतमिति चेत्** इत्यन्तेन । अयमभिप्रायः । मा भूज्जीवात्मना परिणतस्य नामरूपप्रवेशः, पुनः

कारणब्रह्मप्रवेशो वा । कथितदोषात् । कारणस्यैव सतो जीवात्मना नामरूपविशेषकार्यकरणसंघातात्मना च परिणाम इत्येतावदस्तु । तावतैव प्रवेश उपपादितो भवति । शरीरे अधिकरणभूते तदन्तर्जीवरूपेण स्थितेरेव प्रवेशत्वाङ्गीकारात्, नारीकेळस्यान्तरिव जलस्येति चेत् । न । यतोऽस्मिन् पक्षे एकं गृह्णतोऽपरप्रच्युतिः प्राप्नोति । परिणामस्य मुख्यत्वरक्षणेऽभिनिविशमानस्य प्रवेशस्यैव प्रहाणेरित्याह **'बहिष्ठस्य प्रवेशोपपत्तेः'** इत्यादि । निगदव्याख्यातं भाष्यम् ॥

## १३३. ब्रह्मप्रतिबिम्बवादनिरासः -

एवं ब्रह्मपरिणामवादिनि निरुत्तरीकृते अन्यो वेदान्त्येकदेशी कल्पान्तरमवलम्ब्य प्रत्यवतिष्ठते - **'जलसूर्यकादिप्रतिबिम्बवत् प्रवेशः स्यादिति चेत्'** इति । तथा चोद्भावितानां सर्वेषां चोद्यानामनवकाशः । ब्रह्मणः स्वरूपत एवावस्थानात्, प्रवेशस्यापि सूपपादनत्वादिति भावः । यद्यप्ययं पक्षः सिद्धान्तिनो न सर्वथा असंमतः। 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥' (?) इत्यादिशास्त्रप्रामाण्यावष्टम्भेन जीवस्य परमात्माभासताङ्गीकारात् । तथापि वास्तविकमेव नामरूपविकारेषु परमात्मनः प्रतिबिम्बात्मना प्रवेश इत्यभ्युपगच्छतां केषाञ्चिदयं पक्षोऽत्र निरस्यत इति ध्येयम् । निरासभाष्यम् **'अपरिच्छिन्न-त्वादमूर्तत्वाच्च'** इत्यादि **'व्यापकत्वात्'** इत्यन्तम् स्पष्टार्थम्। ब्रह्मणः प्रतिबिम्बासम्भवे हेतुरुक्तः । अथ नामरूपयोः प्रतिबिम्बाधारत्वासम्भवे हेतुमाह - **तद्विप्रकृष्टदेशप्रतिबिम्बाधारवस्त्वन्तराभावाच्च इति ॥**

परिणामवादे सर्वत्रापरिहार्यं दूषणम् अत्रापि वादें लब्धप्रसरम् अनुसंधातव्यम् यद् ब्रह्म जीवात्मना नामरूपात्मना च परिणममानं कृत्स्नमेव परिणमते इत्यकामेनाप्यभ्युपगन्तव्यं भवतीति । निरवयवत्वाद् ब्रह्मणः । तथा च मूलोच्छेदप्रसङ्गः । अपरिणतस्य ब्रह्मण एवाभावाद् ब्रह्मविद्योपदेशानर्थक्यप्रसङ्गश्च। न हि कार्यात्मना अयत्नविदितस्य वेदनमुपादिश्यमानमर्थवत्स्यात् । न च

कार्यव्यतिरिक्तं ब्रह्मावशिष्यते यस्य प्रतिबिम्बं कार्ये प्रविशेत्, यद्विद्या वा शास्त्रेणोपदिश्येतेति । अथैतद्दोषपरिहाराय, एकेनांशेन कार्यात्मना परिणमते, अपरेणांशेन स्वरूपेणावतिष्ठते - इत्यभ्युपगम्यते, तर्हि सावयवमेवाभ्युपगतं स्यात्। तत्रोक्त एव दोष अधस्तात्, अशून्यप्रदेशत्वात् प्रवेशानुपपत्तिरिति । निरवयवशब्दकोपश्च । 'निष्कलं निष्क्रियं शान्तम्' (श्वे. ३-१९) इति हि श्रूयते । सावयवस्यानित्यत्वध्रौव्यात् नित्यत्वश्रुतिकोपः, अजत्वश्रुतिकोपश्च । 'अजो नित्यः शाश्वतोऽयम्' (का. १-२-१८) इति हि श्रूयते । 'बहु स्याम्' इति श्रुतिप्रामाण्यादंशतः परिणामः, निरवयवत्वं च ब्रह्मणः । तद्वक्त्रीभ्यः श्रुतिभ्यः - इति चेत् । न । श्रुतेर्विद्यमानार्थमात्रज्ञापकत्वाद् विरुद्धार्थप्रत्यायकत्वानुपपत्तेः । अतः सर्वथापि न घटनां प्राञ्चति ब्रह्मपरिणामपक्ष इत्यवधेयम् ॥

## १३४. नवीनवेदान्त्यभिमतप्रवेशप्रकारनिरसनम् -

एतेन गोजठरगतवत्से गोत्वादिवत्सर्वव्याप्तस्यापि ब्रह्मणः प्रत्येकं सर्ववस्तुषु पुष्कलप्रतीत्यर्हस्थितिविशेष एवानुप्रवेशः इति, 'यद्यपारं जगत्सर्वं स्वोदरस्थं माहत्मनः । तथाप्येष द्वितीयेन रूपेण बहिराक्षिपेत् । रूपान्तरेणाविशच्च जगत्सर्वं जनार्दनः' इति च सर्वगतस्यापि प्रवेशं कल्पयन्तो नूतनवेदान्तिनोऽपि निरस्ता एव भवन्ति । ब्रह्मणः स्थितिविशेषप्राप्तिर्वा रूपान्तरप्राप्तिर्वा परिणाममन्तरा नोपपद्यत इति परिणामपक्षदोषादनिस्तारादित्यास्तां तावदेतत् ॥

## १३५. व्याख्यानप्रस्थानाभिमतप्रतिबिम्बवादनिरासः -

यत्तु व्याख्यानप्रस्थानावलम्बिनो वदन्ति - आकाशादेरविप्रकृष्टदेशेऽपि जलेऽमूर्तस्य प्रतिबिम्बभाववदमूर्तस्यापि ब्रह्मणोऽनिर्वाच्याविद्याप्रतिबिम्बितस्य सृष्ट्युत्तरकालमन्तःकरणादिषु प्रतिबिम्बभावसंभव इति । तद् भाष्यविरोधाद्व्याहतत्वाच्चनादेयम् । न ह्याकाशस्यैव सर्वगतस्य प्रतिबिम्बं कच्चिज्जले दृष्टचरम् । न च दृष्टान्तोदाहरणमात्रेण ब्रह्मणः प्रतिबिम्बसिद्धिर्व्यवस्थापनीया भवेत्। न चानिर्वाच्याविद्या तद्गतं ब्रह्मप्रतिबिम्बं वा शास्त्रसिद्धम्, येन दृष्टान्तस्य तत्साधकत्वं परिकल्प्येतेत्यलमसिद्धेनासिद्धं

साधयद्भिः सह विवादेन । न च शङ्कनीयम् - सिद्धान्ते वा कथं जलसूर्यकदृष्टान्तो दार्ष्टान्तिकेन सङ्गमनीयः ? तत्सङ्गतौ वा शक्योपपादनायां व्याख्यानप्रस्थानीयैः किमपराद्धमिति ? परमार्थतोऽविकृत-मेवावस्थितं सद् ब्रह्म नामरूपोपाधिसंबन्धाद्व्रजत इवोपाधिधर्मान् बिम्बमिव जले प्रतिबिम्बितम् - इत्यंशे सारूप्यं विवक्षित्वा शास्त्रीयदृष्टान्तप्रणयनोपपत्तेः । तथा हि **बादरायणीयं सूत्रम्** - 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्' (वे.सू. ३-२-२०) इति । तदेवं नास्ति सर्वथा मुख्यवृत्तेन ब्रह्मणः प्रवेश इति स्थितम् ॥

**५८. एवं तर्हि नैवास्ति प्रवेशः । न च गत्यन्तरम् उपलभामहे 'तदेवानुप्राविशत्' इति[1] श्रुतेः । श्रुतिश्च नोऽतीन्द्रियविषये विज्ञानोत्पत्तौ निमित्तम् । न च अस्माद् वाक्यात् यत्नवतामपि विज्ञानम् उत्पद्यते । हन्त तर्हि अनर्थकत्वाद् अपोह्यमेतद् वाक्यम्, 'तत्सृष्ट्वा तदेवानु-प्राविशत्' इति ॥**

### १३६. प्रवेशश्रुतेरर्थो नास्त्येवेति पूर्वपक्षोपसंहारः -

अत्र सिद्धान्त्यैकदेशी शङ्कते - **'एवं तर्हि नैवास्ति प्रवेशः'** इत्यादिना **'उत्पद्यते'** इत्यन्तेन । यद्यस्मद्वर्णितप्रकारौ द्वावपि दोषग्रस्तौ, नास्त्येव गत्यन्तरं प्रवेशवाक्यस्येति प्रवेशो नास्त्येवेति प्रापत् । ननु श्रुतिबलादेव प्रवेशोऽस्तीति निश्चीयताम् । तत्राह - **श्रुतिश्च नोऽतीन्द्रियविषये विज्ञानोत्पत्तौ निमित्तम् । न चास्माद् वाक्याद् यत्नवतामपि विज्ञानमुत्पद्यते इति** । न ह्ययं श्रद्धामात्रगम्यो विषयः, येनास्ति वेदवाक्यमितीत्येतावता श्रद्दध्याम । दृष्टार्थविषयं चेद्वाक्यं, तर्ह्यवश्यं तेन तथा ज्ञानोत्पादकेन भवितव्यं दशमवाक्यादिनेव । अन्यथा

१. 'इति च' इति चकाराधिकपाठो न युक्तः ॥

प्रामाण्यविघातात् । न त्वस्माद्वाक्याज्ज्ञानमुत्पद्यते इति परित्याज्यत्वप्रसङ्गः । अतोऽस्मदुपस्थापितप्रकारयोरन्यतरेणैव कथञ्चित्प्रवेश उपपादनीयो वाक्यप्रामाण्यं रिरक्षयिषुणेति हृद्गत आशयः ॥

प्रवेशाक्षेप्ता त्वाह - **हन्त तर्ह्यनर्थकत्वादिति** । अयं भावः । न हि गत्यन्तरं नास्तीति दुष्टमपि व्याख्यानमभ्युपगन्तव्यमिति नियन्तास्ति कश्चित् । दूषितौ च परिणामप्रतिबिम्बपक्षौ । तस्मात्तौ तावत्परित्याज्यावेव । इतो नास्त्येव चेद् गत्यन्तरं हन्त तर्हि वाक्यार्थो नास्त्येवेत्यध्यवसेयम् । किं कुर्मः ? अभूतार्थवादत्वं वा श्रुतेः समाश्रयणीयम् । 'सोऽरोदीत्' (तै.सं. १-५-२-१) इत्यादिवाक्यस्येवेति।

५९. न । अन्यार्थत्वात् । किमर्थम् अस्थाने चर्चा? प्रकृतो ह्यन्यो विवक्षितोऽस्य वाक्यस्यार्थोऽस्ति स स्मर्तव्यः । 'ब्रह्मविदाप्नोति परम् ... सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायाम्' (२-१) इति। तद्विज्ञानं च विवक्षितम्। प्रकृतं च तत् । ब्रह्मस्वरूपानुगमाय[१] चाकाशाद्यन्नमयान्तं कार्यं प्रदर्शितम् । ब्रह्मानुगमश्चारब्धः। तत्र, अन्नमयादात्मनोऽन्योन्तर आत्मा प्राणमयः । तदन्तर्मनोमयः, विज्ञानमय इति विज्ञानगुहायां प्रवेशितः। तत्र चानन्दमयो विशिष्ट आत्मा प्रदर्शितः। अतः परम् आनन्दमयलिङ्गाधिगमद्वारेणानन्दविवृद्ध्यवसान आत्मा ब्रह्मपुच्छं

१. 'अनुगम' इत्यस्यस्थाने 'अवगम' इति वा ॥

प्रतिष्ठा सर्वविकल्पास्पदो निर्विकल्पोऽस्यामेव गुहायाम् अधिगन्तव्यः इति तत्प्रवेशः प्रकल्प्यते । न ह्यन्यत्रोपलभ्यते ब्रह्म । निर्विशेषत्वात्। विशेषसम्बन्धो ह्युपलब्धिहेतुर्दृष्टः । यथा राहोश्चन्द्रार्कविशेषसंबन्धः। एवम् अन्तःकरणगुहासंबन्धो[1] ब्रह्मण उपलब्धिहेतुः । संनिकर्षात्, अवभासात्मकत्वाच्चान्तःकरणस्य । यथा चालोकविशिष्टा घटाद्युपलब्धिः एवं बुद्धिप्रत्ययालोकविशिष्टा[2] आत्मोपलब्धिः स्यात्। तस्मात्, उपलब्धिहेतौ गुहायां निहितम् इति प्रकृतमेवं तद्वृत्तिस्थानीये त्विह पुनः 'तत्सृष्ट्वा तदेवानुप्राविशत्' इत्युच्यते ।

१३८. प्रवेशवाक्यस्य सिद्धान्तिसम्मता गतिः -

तदेवं ब्रह्मणः कार्यानुप्रवेशस्य सर्वथा असंभवात् प्राप्तं वाक्यस्यानर्थक्यं परिहरति सिद्धान्ती - **'न । अन्यार्थत्वात्'** इति । तदेतद्विवरीतुकाम आह - **किमर्थमस्थाने चर्चा ?** इति । प्रवेशशब्दस्य मुख्यार्थत्वं गृहीत्वा खल्वियं चर्चा प्रतानिता । नैव त्वत्र प्रवेशो विवक्षितः, येन चर्चेयं युक्तविषये इति स्यादित्यर्थः।

---

१. 'गुहात्मसंबन्धे' वा ॥

२. 'विशिष्टघटाद्युपलब्धिः' 'विशिष्टात्मोपलब्धिः' इति समस्तपाठद्वारमयमेव (आ॥) पाठो गृहीतः ॥

कस्मिंस्तर्हि विषये चर्चा कृता स्थाने स्यात् ? इति प्रश्नमुत्तरयितुमारभते **'प्रकृतो ह्यन्यो विवक्षितोऽस्य वाक्यस्यार्थोऽस्ति स स्मर्तव्यः ।'** इति । तस्मादलं प्रकृतहानाप्रकृतप्रक्रियया प्रवेशचर्चयेत्यभिप्रायः । प्रकृतमेवार्थं विशेषतः स्मारयति - **'ब्रह्मविदाप्नोति परम्'** इत्यादिना **'प्रकृतं च तत्'** इत्यन्तेन । ब्रह्मवेदनं हि प्रकृतम्, तच्च हृदयगुहायामेव कर्तव्यम् इति च । तदेव चेह प्रकृतं न प्रवेशः । वेदनस्यैव विवक्षितत्वोपपादनाय वाक्यान्वयं प्रदर्शयन्नाह - **ब्रह्मस्वरूपानुगमायेत्यादि** । अयमभिप्रायः । ब्रह्मण आत्मत्वेन वेदितुर्हृदयगुहायां निहितत्वं बुद्धावारोपयितुम् आकाशाद्यन्नमयान्तं कार्यं प्रदर्शितम् । कार्ये हि कारणस्यानुगमः शक्यप्रदर्शन इति। अत एव हि 'तस्माद्वा एतस्मादात्मनः' इति ब्रह्मात्मनोः सामानाधिकरण्येन निर्देश उपक्रमे कृतः । **ब्रह्मानुगमश्चाऽऽरब्धः ।** अन्नमयादिष्वात्मव्यपदेशाद्धि तत्र तत्र ब्रह्मानुगमः प्रदर्शितो भवति । 'अन्योऽन्तर आत्मा प्राणमयः', 'अन्योऽन्तर आत्मा मनोमयः', 'अन्योन्तर आत्मा विज्ञानमयः' - इति च पूर्वपूर्वस्मिन् आत्ममतिं परित्याज्य स एवात्मा ब्रह्माभिन्नो विज्ञानगुहायां प्रवेशितः, तत्र हि निहितं ब्रह्मेत्युक्तमुपक्रमे इति । तत्र ब्रह्मात्मनोः सामानाधिकरण्येन निर्देशस्तावद् ब्रह्मणोऽनात्मत्वम् आत्मनश्चाब्रह्मत्वं यथा विनिवर्तितं स्यादिति । यथाहु**र्वार्तिककाराः** - 'ब्रह्मवित्परमाप्नोतीत्युक्त्वा सत्यादिलक्षणम् । प्रावेशयद् गुहां तच्च तदनात्मत्वशान्तये । अब्रह्मत्वनिवृत्यर्थं ब्रह्मात्मेति विशेषणम् । तन्निवृत्ताववाक्यार्थं कैवल्यं प्रतिपद्यते ॥' (तै.वा. २-३९१, ३९२) इति । अवाक्यार्थम् - भेदसंसर्गरहितमर्थमित्यर्थः । **तत्र च** विज्ञानमयात्मनि कर्तृलक्षणे **आनन्दमयो विशिष्ट आत्मा प्रदर्शितः** । तत्रैव हि ब्रह्मात्मैकत्वं सुखोपदेशमिति। कथं पुनस्तत्रैव सुखोपदेशमेतदिति ? **अतः परं** ह्यागामिनि ग्रन्थे **आनन्दमयलिङ्गाधिगमद्वारेण,** आनन्दमयात्मभूतस्य सुखसामान्यस्यानन्द-शब्दवाच्यस्य शतगुणोत्तरोत्तरविवृद्धिदर्शनेन ब्रह्मात्मानुगमः सुखोपप्रदर्शनो भविष्यति; तथा च **आनन्दविवृद्ध्यवसान आत्मा,** परमार्थात्मा ब्रह्मैवेति सुखोपदिष्टो भविष्यतीति । आनन्दविवृद्ध्यवसानत्वं चास्य ब्रह्मात्मनो न निरतिशयानन्दवत्त्वेन, कथं तर्हि, विकल्पभूतानां सर्वेषां लौकिकानन्द-विशेषाणामास्पदत्वेन, सर्पादिसर्वविकल्पानुगतेदंबुद्ध्यवसानत्वमिव तदास्पदरज्ज्वा

इति मत्वा आह - **सर्वविकल्पास्पदो निर्विकल्प** इति । निर्विकल्पं हि सर्वविकल्पानामास्पदमिति तेषामवसानम् । एतज्ज्ञापनार्थमेव च **'ब्रह्म पुच्छं प्रतिष्ठा'** इत्यानन्दमयस्य पुच्छप्रतिष्ठात्वेन ब्रह्म निर्दिष्टम् । न हि तत्र केवलमानन्दमयस्य पुच्छत्वेन प्रतिष्ठात्वेन वा विवक्षितं ब्रह्म, किं तर्हि, सर्वकोशान्तःस्थितस्य तस्य प्रतिष्ठात्वेन निर्दिश्यमानत्वात् अविद्यापरिकल्पितस्य सर्वस्यापि द्वैतस्यावसानत्वेनेत्यवोचाम । तदेवं यदेव ब्रह्म गुहायां वेदितव्यत्वेन प्रकृतम्, तदेवात्र विज्ञानगुहायामानन्दमयानुगतत्वेन निर्विकल्पम् सर्वास्पदत्वेनाधिगन्तव्यमिति विशेषत उच्यते प्रवेशवाक्येन । एष एव चात्र विवक्षितोऽर्थ इत्याह - **'अस्यामेव गुहायामधिगन्तव्य इति तत्प्रवेशः प्रकल्प्यते'** इति । प्रकल्प्यते इति वाचोयुक्तिस्त्वप्रविष्टस्यैव सतो विशेषात्मना विभाव्यमानत्वात् तत्प्रवेशः प्रकल्प्यते न तु मुख्यवृत्त्यैव तदेवानुप्रविशदित्युच्यते। एतच्च प्रकल्पनं सविशेषरूपस्य मिथ्याध्यारोपितस्य स्वास्पदीभूतपरमार्थ-निर्विशेषस्वरूपाव्यतिरिक्तत्वज्ञापनार्थमेव । यथोक्तं **वार्तिककारैः** - 'अप्रविष्टस्वभावस्य प्रवेशस्तेन कल्प्यते । क्षेत्रज्ञेश्वरहानेन ह्यैकात्म्यं स्यात्कथं न्विति[१]॥ (तै.वा. २-४१०) इति॥

## १३८. बुद्धिगुहाश्रितमाभासविशेषरूपम् आत्मवेदनसाधनम् -

अथ कं बुद्धिगतं विशेषमाश्रित्य तत्रैव ब्रह्मणः प्रवेशोऽयं कल्प्यत इति पृच्छायां तन्निर्णयार्थमाह - 'न ह्यन्यत्रोपलभ्यते ब्रह्म । निर्विशेषत्वात्' इति । अत्र नायं वाक्यार्थो ब्रह्मणो बुद्धेरन्यात्रानुपलभ्यत्वे निर्विशेषत्वं हेतुरिति । न हि निर्विशेषस्य ब्रह्मणो बुद्धौ तदन्यत्र वा स्वरूपेण समुपलब्धिः समस्ति । सर्वत्राप्युपलब्धेर्विशेषालम्बनत्वध्रौव्यात् । निर्विशेषत्वादुपलब्द्ध्यनर्हस्वभावस्यापि ब्रह्मण उपलभ्यत्वभ्रान्तिहेतुरन्तःकरणम्, तद्द्वारा ब्रह्मवेदनहेतुश्चेति कृत्वा तु तत्रैव प्रवेशोऽभिधीयत इत्यभिप्रायेणोच्यते 'न ह्यन्यत्रोपलभ्यते' ब्रह्मेति । उपलब्धिभ्रान्तिरेव तावत् कथं ब्रह्मणः, स्वभावादुपलब्द्ध्यनर्हस्येत्याशङ्क्य निदर्शनमुखेन तां हृदयमारोपयति - 'विशेषसंबन्धो ह्युपलब्धिहेतुर्दृष्टः । यथा

---

१. 'त्विति' इति मुद्रितपाठ इत्थं विपरिवर्तितः ॥

राहोश्चन्द्रार्कविशेषसंबन्ध’ इति । न हि छायारूपस्य राहोर्वस्तुत्वं दृश्यत्वं वा अस्ति स्वतः । अथ च चन्द्रेणार्केण वा विशेषेण संबन्धे सति दृश्यत्वभ्रान्तिरुपजायते, ‘चन्द्रः सूर्यो वा अर्धं ग्रस्तो राहुणा’ इति सविशेषव्यवहारयोग्यत्वभ्रान्तिश्च । ‘एवमन्तःकरणगुहासंबन्धो ब्रह्मण उपलब्धिहेतुः’ इति । अनुपलभ्यमपि सद्ब्रह्म, उपलभ्यत्वभ्रान्तिगोचरतापन्नं भवति । अथ कोऽयं बुद्धेरन्तःकरणस्य योग्यताविशेषो यद्बलादेवं तत्र ब्रह्मोपलब्धिभ्रान्तिर्भवतीति ? अत उच्यते - **संनिकर्षादवाभासात्मकत्वाच्चान्तःकरणस्येति** । अन्तःकरणं हि साक्षादेवात्मना अवभास्यते न तु करणान्तरद्वारेणेति तत् संनिकृष्टतरमात्मन इन्द्रियाद्यपेक्षया । अवभासात्मकं च स्वच्छस्वभावं दर्पणादिवदित्यतस्तत्रात्मचैतन्याभासोपलब्धिः संभवति । तेन हि विवेकिनामपि तत्रात्माभिमानबुद्धिर्नैसर्गिकीति । अन्तःकरणगतचैतन्याभासनिमित्तमेव तु बाह्यतरेष्विन्द्रियेषु देहेऽपि च परम्परया चिदाभासत्वमात्मबुद्धिश्च जनानाम् । तस्मात्तत्र ब्रह्मण उपलब्धिर्भवतीत्युच्यत इत्यभिप्रायः । नन्वन्तःकरणस्य देहादिभिरचेतनत्वसाम्येऽपि किं कारणं तत्रैव प्रथमत आत्माभिमानबुद्धिर्भवतीत्याशङ्क्य यथा बाह्यविषयत्वसाम्येऽपि सूर्यचन्द्रदीपाद्यालोक एव स्वान्यावभासकः, स्वभावविशेषात्, एवमन्तःकरणमपि सत्वगुणप्राचुर्यस्वभावात्प्रत्ययात्मना परिणतमात्माभिमानालम्बनं भवतीत्यभिप्रेत्याह - **‘यथा चालोकविशिष्टा घटाद्युपलब्धिः, एवं बुद्धिप्रत्ययालोकविशिष्टा आत्मोपलब्धिः स्यात्’ इति** । यद्यपि दृष्टान्ते आलोको विषयी स्वतः स्फुरणरूपः, घटादिश्च परतः प्रकाशमपेक्षते - इत्यत आलोकस्य निरपेक्षोपलभ्यता, घटादेस्त्वालोकविशिष्टस्यैवोपलभ्यता इति युक्तम्। इह पुनरात्मा विषयी न त्वन्तःकरणविषयः, नित्योपलब्धिस्वरूपश्चेति । नैव तस्य परापेक्षा स्वस्योपलब्धाविति वैषम्यम् । तथाप्यन्तःकरणप्रत्यय एवात्मोपलब्धिशब्दवाच्यस्तदनुपलब्धिनिरासको व्यवहारविषये - इति कृत्वा बुद्धिप्रत्ययालोकविशिष्टा आत्मोपलब्धिरित्युक्तमित्यदोषः। किञ्चात्मा निर्विशेषः सन् स्वरूपेण न कथञ्चित् केनचिदुपलभ्यः। बुद्धिप्रत्ययविशिष्टस्तु द्रष्टा श्रोता मन्तेत्यादिरूपेण, अयमहम् इत्यादिरूपेण चोपलभ्यते व्यवहारविषये इति कृत्वा बुद्धिप्रत्ययालोकविशिष्टा आत्मोपलब्धिरित्युक्तमित्यदोषः । न ह्यन्यथा कथमप्यात्मोपलब्धिरस्ति ‘न

विज्ञातेर्विज्ञातारं विजानीयाः' (बृ. ३-४-२), 'अविज्ञातं विज्ञातृ' (बृ.३-८-११), 'विज्ञातारमरे केन विजानीयात्' (बृ. ४-५-१५) इत्यादिश्रुतिभ्यः । तदेवं बुद्धिप्रत्ययालोकविशिष्टामात्मोपलब्धिमुपपाद्य प्रकृतां प्रवेशश्रुतिं संगमयन्नाह - **तस्मादुपलब्धिहेतौ गुहायां निहितमिति प्रकृतमेव । तद्वृत्तिस्थानीये त्विह पुनः 'तत्सृष्ट्वा तदेवानुप्राविशत् इत्युच्यते' इति ॥**

**६०. तदेवेदम् आकाशादिकारणं कार्यं सृष्ट्वा तदनुप्रविष्टमिव अन्तर्गुहायां बुद्धौ द्रष्टृ, श्रोतृ, मन्तृ, विज्ञातृ-इत्येवं विशेषवदुपलभ्यते। स एव तस्य प्रवेशः। तस्मात् अस्ति तत् कारणं ब्रह्म । अतः अस्तित्वात् 'अस्ति' इत्येवोपलब्धव्यं तत्॥१९॥**

**१३९. ब्रह्मप्रवेशस्वरूपकथनम्, ब्रह्मवेदनप्रकारनिरूपणं च -**

अथ कथं पुनर्निर्विशेषं ब्रह्म विज्ञानगुहायां राहुरिव चन्द्रार्कविशेषसंबन्धेनोपलब्धिभ्रान्तिमातनुते ? कथं वा गुहायां निहितं तदात्मत्वेन वेदनीयम् ? - इत्येतत् प्रकाशयन् परमप्रकृतं ब्रह्मास्तित्वमुपसंहरति - **'तदेवेदमाकाशादिकारणं सृष्ट्वा तदनुप्रविष्टमिव'** - इत्यादिना **'अतोऽस्तित्वादस्तीत्येवोपलब्धव्यं तत्'** इत्यन्तेन । अयमभिप्रायः । यथोपवर्णितप्रकारेणाकाशादिकार्यं विज्ञानमयान्तं सृष्ट्वा नित्याप्रविष्टस्वभावमेवावस्थितं सत् तत्कार्यमनुप्रविष्टमिव स्वच्छस्वभावायां गुहायां बुद्धौ द्रष्टृ, श्रोतृ - इत्येवमादिविशेषवत्त्वेनोपलभ्यमानं तस्मिन् विशेषरूपे एवात्मबुद्धिभ्रान्तिमुत्पादयतीति । न हि स्वभावत एव द्रष्टृत्वादिविशेषवत् तद्ब्रह्म । न च बुद्धिश्चैतन्यवती। दृग्रूपात्मच्छायायुतत्वात्तु सा द्रष्ट्रादिरूपमापन्नेति नित्यदृक्तदाभासवतोरात्मान्तःकरणयोरविवेकेनान्योन्याध्यासे हि सत्येव 'अहं द्रष्टृ, श्रोतृ, मन्तृ, विज्ञातृ' इति मिथ्यामतिर्लोकस्य भवति ।

तदेतादृशाध्यासकालेऽप्यात्मा द्रष्ट्रादिविकल्पास्पदत्वेन स्वेन नित्यचैतन्यस्वरूपेणैवावतिष्ठते इत्यन्तःकरणे या द्रष्ट्रादिरूपेणोपलब्धिर्बुद्धिदर्पणे, सा बुद्धौ प्रवेश इत्युच्यते । तस्मादस्ति तत्कारणं ब्रह्म यदित्थं प्रविष्टमिवाभासत इत्याभासास्पदत्वेन यदात्मवेदनम् , तदिदमेव गुहायां निहितत्वेन ब्रह्मणो वेदनं नाम । तथा चोक्त**मुपदेशसाहस्र्याम्** - 'दृशेश्छाया यदारूढा मुखच्छायेव दर्पणे[१]। पश्यंस्तं प्रत्ययं योगी दृष्ट आत्मेति मन्यते ॥ तं च मूढं च यद्यन्यं प्रत्ययं वेत्ति नो दृशेः । स एव योगिनां श्रेष्ठो नेतरः स्यान्न संशयः ॥' (उप.सा. १२-६, ७) इति ॥

## १३९. परमप्रकृतोपसंहारः

परमप्रकृतं त्विदम् । अनुप्रश्नानां प्रथमस्य किमस्ति नास्ति वा तद्ब्रह्म - इत्यस्य निर्धारणं प्रस्तुतम् । तत्र निर्धारणं तु अस्ति तत्कारणं ब्रह्म आकाशादिकारणत्वात्, स्वकार्ये बुद्धिगुहायां द्रष्ट्रादिविशेषवदानन्दमय-रूपेणोपलभ्यमानत्वाच्चेति । **अत अस्तित्वात्** एवं विकल्पास्पदत्वेन **अस्तीत्येवोपलब्धव्यं** तत् प्रथमतः । तस्य तत्त्वभावस्तु परस्ताद्धृदयं गमिष्यतीति भावः । 'अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः । अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति ॥' (क. २-३-१३) इति श्रुतेरिति ॥१९॥

**तदनुप्रविश्य । सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च । विज्ञानं चाविज्ञानं च। सत्यं चानृतं च सत्यमभवत् । यदिदं किञ्च । तत्सत्यमित्याचक्षते ॥२०॥**

---

१. 'दर्शने' इति पाठस्त्वित्थं परिवर्तितोऽस्माभिः । 'दर्शने' इत्येव पाठेऽपि आदर्शे इत्यर्थः करणीयः ।

## (३) अस्ति ब्रह्म नामरूपात्मकत्वात् , चेतनाचेतनविभक्तत्वेनावभासाच्च

६१. तत् कार्यम् अनुप्रविश्य, किम् ? सच्च मूर्तं, त्यच्च अमूर्तम् अभवत्। मूर्तामूर्ते हि अव्याकृतनामरूपे आत्मस्थे अन्तर्गतेन आत्मना व्याक्रियेते । व्याकृते च[१] मूर्तामूर्तशब्दवाच्ये । ते आत्मना त्वप्रविभक्त-देशकाले इति कृत्वा आत्मा ते अभवत् इत्युच्यते । किञ्च निरुक्तं च, अनिरुक्तं च । निरुक्तं नाम निष्कृष्य समानासमानजातीयेभ्यो देशकालविशिष्टतया इदं तत् इत्युक्तम् । अनिरुक्तं तद्विपरीतम्। निरुक्तानिरुक्ते अपि मूर्तामूर्तयोरेव विशेषणे । यथा सच्च त्यच्च प्रत्यक्षपरोक्षे । तथा निलयनं च, अनिलयनं च। निलयनं नीडम्, आश्रयः, मूर्तस्यैव धर्मः। अनिलयनं तद्विपरीतम्; अमूर्तस्यैव धर्मः। त्यदनिरुक्तानिलयनान्यमूर्तधर्मत्वेऽपि व्याकृत-विषयाण्येव । सर्गोत्तरकालभावश्रवणात् । त्यदिति प्राणादि, अनिरुक्तं तदेव, अनिलयनं

---

१. 'व्याकृते च' इति नास्ति वा ॥ अपेक्षितं तु ॥

च । अतो विशेषणान्यमूर्तस्य व्याकृत-विषयाण्येवैतानि। विज्ञानं चेतनम्, अविज्ञानम् तद्रहितम् अचेतनं पाषाणादि । सत्यं च व्यवहारविषयम्। अधिकारात् । न परमार्थसत्यम् ; एकमेव हि परमार्थसत्यं ब्रह्म। इह पुनर्व्यवहारविषयम् आपेक्षिकं सत्यम् । मृगतृष्णिकाद्यनृतापेक्षया उदकादि सत्यमुच्यते। अनृतं च तद्विपरीतम्। किं पुनरेतत्सर्वमभवत्? सत्यं परमार्थसत्यम्। किं पुनस्तत् ? ब्रह्म । 'सत्यं ज्ञानमनन्तं ब्रह्म' इति प्रकृतत्वात् । यस्मात् सत्त्यदादिकं मूर्तामूर्तधर्मजातं यत्किञ्चेदं सर्वम् अविशिष्टं विकारजातम् एकमेव सच्छब्दवाच्यं ब्रह्म अभवत्, तद्व्यतिरेकेणाभावान्नामरूप-विकारस्य, तस्मात् तद् ब्रह्म सत्यम् इत्याचक्षते ब्रह्मविदः ॥२०॥

**१४०. ब्रह्मणो नामरूपापत्तिरपि मायिक्येव -**

एवं सर्वसृष्टितदनुप्रवेशकल्पनेन तावद् जीवानां ब्रह्मणोऽनन्यत्वमुपक्षिप्तम्। अथेदानीं नामरूपयोरपि तदभिन्नत्वं विज्ञापयितुमाह श्रुतिः - 'तदनुप्रविश्य सच्च त्यच्चाभवत्' इति । एतावद्धीदं जगद्व्याकृतं नाम यत् कर्तृभोक्तृरूपा जीवा नामरूपे

चेति । तस्यास्य ब्रह्मणोऽनन्यत्वे प्रतिपादिते सुखेन प्रतिपन्नं भवेद् यदादौ प्रतिज्ञातम् - सत्यं ज्ञानमनन्तं ब्रह्म वेदितुर्हृदयगुहायां निहितमितीति । तदेतद्वाक्यं व्याचष्टे - **'तत्कार्यमनुप्रविश्य किम् ?'** इत्यादिना । अत्रापि न कालकृतानुक्रमो विवक्षितः, अनुप्रविश्य प्रवेशानन्तरं सच्च त्यच्चाभवदिति ; किं तर्हि सृष्टिसमकालमेव जीवात्मना अनुप्रवेशः, नामरूपात्मभावश्चेति । तत्किं परमात्मा स्वं चैतन्यस्वभावं विहायाचेतननामरूपतामाप्नोत् ? नेत्याह - **'मूर्तामूर्ते ह्यव्याकृतनामरूपे'** इत्यादिना **'आत्मा ते अभवदित्युच्यते'** इत्यन्तेन । तदेतद्व्याख्यातं पूर्वमेवास्माभिः सलिलफेनदृष्टान्तेन । **अव्याकृतनामरूपे आत्मस्थे** इति सर्वज्ञस्य परमात्मन आत्मभूते इवाविद्याकल्पितत्वादात्मैकशब्दप्रत्ययगोचरे इत्यर्थः । **अन्तर्गतेनात्मना व्याक्रियेते, व्याकृते च मूर्तामूर्तशब्दवाच्ये** इति । ताभ्यां विलक्षणस्वभावेन सर्वज्ञेन परमात्मना आकाशवदसङ्गस्वभावेनैव स्थितेन तत्तच्छब्दप्रत्ययगोचरीक्रियते, यद्यपि तदानीमपि आत्मैकशब्दप्रत्ययगोचरे अवतिष्ठेते इत्यर्थः । 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा' (छा. ८-१४-१) इति श्रुतेः । कथं तर्हि परमात्मा ते अभवदिति ? तत्राह - **'आत्मना त्वप्रविभक्तदेशकाले इति कृत्वा'** इति । अत्र 'आत्मना त्वप्रविभक्तदेशकाले' इति न समानदेशकालाधिकरणकत्वं विवक्षितम् । देशकालयोरपि व्याकृतनामरूपत्वाविशेषात् । किं तर्हि, नामरूपयोर्न ब्रह्मणोऽर्थान्तरत्वम्, व्याकृतयोरपि तयोः स्वेन प्रातीतिकरूपेण तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वात् , पारमार्थिकेन च रूपेण तदापि तदनन्यत्वादिति। यथा ह्यात्मनः स्वासांसारिकस्वभावेन स्थितस्यैव द्रष्टृश्रोतृत्वादिरूपेणावभासनं प्रवेश इत्युच्यते, तथा स्वचैतन्यस्वभावेन स्थितस्यैव मूर्तामूर्तात्मनावभासनमेव तस्य मूर्तामूर्तभवनम् इत्यभिप्रायः । तथा च प्रवेशमूर्तामूर्तभवनयोर्मृषात्मनोरेवात्रोपदेशस्य ब्रह्मणः सत्यज्ञानानन्तविशदीकरणार्थत्वात् नात्राक्षरार्थेऽतीवाभिनिवेष्टव्यमित्यभिप्रायः । यथोक्तं **वार्तिककारैः** 'मूर्तामूर्तात्मकं कार्यं यत्सृष्ट्वा प्राविशत्प्रभुः । रजतं शुक्तिकेवाऽऽत्मा तदात्मेवाभवन्मृषा ॥' (तै.वा. २-४०२) इति ॥

**सृष्ट्यादिवाक्यानामात्मैकत्वप्रतिपत्त्यर्थत्वात्तत्र निमित्तादि प्रश्नप्रतिवचनानुपपत्तिः -**

इत्थं च सृष्टिप्रवेशनामरूपापत्त्युपदेशानाम् आत्मैकत्वप्रतिपादनपरत्वात् तद्विषये प्रश्नप्रतिवचने अनुपपन्ने भवतः । किंनिमित्तेयं सृष्टिः ? परमात्मनिमित्ता चेत् कथमेकेनैव कार्यकरणसंघातशून्येन कारकाद्युपसंहारं विनैव विचित्रा जगत्सृष्टिः संभाव्येत ? किंप्रयोजनश्चायं गुरुतरसंरम्भामेतां प्रवृत्तिमारभेत ? निष्प्रयोजनश्चेत् प्रवर्तेत कथमयमुन्मत्तसमो न भवेत् ? अथात्मप्रयोजनार्थं प्रवर्तते, न तर्हि नित्यतृप्तोऽयम् । कथं च विषमां सृष्टिं विदधतोऽस्य न वैषम्यनैर्घृण्ये ? प्राणिकर्मापेक्षया सृजतीति चेत् प्राक् सृष्टेः शरीरकर्मादिविभागाभावात्किमपेक्षः सन् सृजेत् ? सृष्ट्युत्तरकालं तु शरीरादिविभागापेक्षं कर्म कर्मापेक्षश्च शरीरादिविभाग इत्यन्योन्याश्रयत्वं कथं वार्येत ? पूर्वसृष्टिगतकर्मापेक्षा चेत् सृष्टिः कथमाद्यासृष्टिः? सृष्टेरनादित्वान्नायं दोष इति चेत्, कथं नान्धपरम्परान्यायप्रसक्तिः ? किमुपादानश्चायं सृजति ? कुलालादयो हि मृदाद्युपादायैव घटादीनि सृजन्ति । अनपेक्ष्यैवोपादानं साधनान्तरं वा क्षीरादिवत् स्वयमेव चेदात्मानं चेतनाचेनात्मना परिणमयेत् ?तर्हि कथं क्षीरादिवदेव नाचेतनत्वमप्यस्य भवेत् ? किञ्चान्यत् नित्यशुद्धबुद्धमुक्तस्वभावः सन् परमात्माऽयं कथमात्मानं संसारिजीवत्वेन परिणमयन्नहितमात्मन आचरेत् स्वतन्त्रो बुद्धिपूर्वकारी च सन्नपि ? कथं वा अनित्याशुद्धनामरूपत्वेनात्मानं परिणमयेत् ? स्वभावतः परिणमयन्वा न कथं कृत्स्नश एव चेतनाचेतनात्मना विपरिणमयेत् ? तदप्यङ्गीक्रियते चेत् कथं तस्य स्वरूपेणाप्यवस्थितिरवकल्पेत ? अनवस्थितौ कथं तस्य द्रष्टव्यतोपदेशानर्थक्यप्रसक्तिर्न स्यात् ? अथ भागश एव परिणमते इत्यभ्युपगम्यते तदा न कथं निरवयवशब्दप्रकोपः ? - इत्यादीनि चोद्यानि वास्तविकपरिणामवादे लब्धप्रसराण्यपि मायिकसृष्टिवादे नैवावकाशं भजन्ते । यस्त्वीदृशानि चोद्यानि बहुशोऽनूद्य **शारीरके** परिहारोऽभिहितः, स तु मायिकं जगत्कारणत्वमङ्गीकृत्यैवेति भाष्यकृद्भिस्तत्र तत्र दर्शयित्वा द्वितीयाध्यायप्रथम-पादचरमसूत्रभाष्ये एवमुपसंहृतम् 'यस्मादस्मिन् ब्रह्मणि कारणे परिगृह्यमाणे प्रदर्शितेन प्रकारेण सर्वे कारणधर्मा उपपद्यन्ते सर्वज्ञं सर्वशक्ति महामायं च ब्रह्मेति, तस्मादनतिशङ्कनीयमिदमौपनिषदं दर्शनम्' इति । अतः सर्वमनवद्यम् ॥

## १४२. श्रुतिबलाद्विरुद्धार्थेऽपि श्रद्धा न कार्या -

ये त्वर्वाचीनवेदान्तिनो ब्रह्मणो वास्तविकमेव परिणाममङ्गीकृत्य प्रक्रियां रचयन्ति - सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणम्, स्थूलचिदचिद्वस्तुशरीरं च ब्रह्म कार्यमिति ; ते तु सर्वेषामपि परिणामपक्षदूषणानां ध्रुवं भागिनः स्युः । योऽपि ब्रह्मणो निमित्तकारणमात्रत्वमङ्गीकृत्येश्वरसृष्टिकर्तृत्वे उच्चावचान् दोषानुद्भाव्य समादधुः 'श्रुतेस्तु शब्दमूलत्वात्' (वे. सू. २-१-२७) इति सूत्राक्षरार्थमवलम्ब्य, तेऽपि 'शब्दैकप्रमाणकत्वेन सकलेतरवस्तुविसजातीयत्वादस्यार्थस्य विचित्रशक्तियोगो न विरुध्यत इति सामान्यतो दृष्टं साधनं दूषणं वा नार्हति ब्रह्म' इत्यभ्युपगच्छतां परिणामवादिनां सरणिमेवानुधावन्तो 'न युक्तियोगाद्वाक्यानि निराकार्याण्यपि क्वचित् । विरोध एव वाक्यानां युक्तयो न तु युक्तयः', 'योऽसौ विरुद्धोऽविरुद्धः' इत्याद्यश्रुतचराणि वाक्यानि श्रुतित्वेनोदाहरन्तश्च नैवोक्तदूषणजालात् प्रमुच्यन्ते । कथं हि श्रुतिरपि विरुद्धमर्थं शक्नुवीत प्रत्याययितुम्, प्रत्याययन्ती वा कथं प्रमाणं भवेत् ? न हि श्रुतिवचनं वचनमित्येतावता वस्तुविषये श्रद्धेयार्थमित्यङ्गीकार्यं स्यात् । वचनं हि नाम यथावस्थितस्यार्थस्य ज्ञापकं न तु कस्यचिदप्यर्थस्य कारकं, प्रागेव च विरुद्धार्थस्येत्यलमनया प्रासङ्गिक्या कथया । प्रकृतमेव श्रुत्यनुसारिभाष्यार्थं विमर्शयिष्यामः ॥

## १४३. सच्छब्दार्थकथनम् -

अनेकशब्दप्रत्ययगोचरयोरप्यत्र नामरूपयोर्मूर्तामूर्तात्मना द्वेधा विभागः क्रियते प्रतिपत्तिसौकर्यार्थम् । 'द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च' (बृ. २-३-१) इति श्रुत्यन्तरसंवादात् । तदनुसारेणेहापि पृथिव्यप्तेजोरूपं भूतत्रयम् सच्छब्दवाच्यं मूर्तम् । तदितरद् वाय्वाकाशरूपं त्यच्छब्दवाच्यममूर्तमिति ज्ञेयम् । पञ्चभूतानां हि सत्त्यत्समूहत्वेन सत्यशब्दवाच्यानां कार्यकरणात्मकानां कारणम्, अत एव च सत्यं ब्रह्मेत्यनुपदमेव वक्ष्यति । एवं च 'प्राणा वै सत्यं तेषामेष सत्यम्' (बृ. २-३-६) इति श्रुत्यन्तरसंवादोऽपि भविष्यतीति ॥

**सत्त्यदादीनि व्याकृतनामरूपविषयाणि विशेषणानि -**

यस्यैव जगतः सृष्टिश्चैतन्यस्वभावाद्ब्रह्मणः प्रतिज्ञाता 'सोऽकामयत बहु स्यां प्रजायेयेति' इति, तस्यैवास्य ब्रह्मणोऽनन्यत्वं प्राक्प्रतिज्ञावाक्ये सूचितमिहाविष्कृतम् 'तत्सृष्ट्वा तदेवानुप्राविशत्', 'तदनु प्रविश्य सच्च त्यच्चाभवत्' इति च । तयोरेव च प्रवेशबहुभवनयोरिदानीं प्रपञ्चः क्रियते ब्रह्मणः सत्यज्ञानानन्ततावधारणार्थम् 'निरुक्तं चानिरुक्तं च' इत्यादिना । तदेतद् व्याचष्टे **'निरुक्तं नाम'** इत्यादिना । 'इदं तत्' इति सजातीयविजातीयेभ्यो व्यावर्त्य यद्वक्तुं शक्यते तन्निरुक्तम्, तद्विपरीतं त्वनिरुक्तम् इत्यर्थः । **'देशकालविशिष्टतया'** इति तु इहेदानीं वर्तते इत्यादिरूपेण निर्वचनार्हमित्युपप्रदर्शनार्थम्, न पुनरितरत्र देशकालाविशिष्टत्वे निर्भरः । यतो वक्ति - **निरुक्तानिरुक्ते अपि मूर्तामूर्तयोरेव विशेषणे यथा सच्च त्यच्च प्रत्यक्षपरोक्षे इति** । न ह्यनिरुक्तस्य देशकालविशिष्टत्वं नास्ति । वायोराकाशदेशविशिष्टत्वात्, आकाशस्य कालविशिष्टत्वाच्च । निलयनानिलयनव्याकरणभाष्यं स्पष्टार्थम् ॥

**१४५. त्यदादीन्यत्र विशिष्याध्यात्मिकप्राणाकाशविशेषणानि -**

यद्यपि त्यदिति परोक्षम् ; सृष्टेः प्राक्कालीनत्वात् । अनिरुक्तमिति निर्वचनानर्हम्; कालदेशाप्रविभक्तत्वात् । अनिलयनमिति स्वेतराश्रयशून्यम् ; अद्वितीयत्वात् - इत्यव्याकृतात्मधर्मत्वेनापि शक्यव्याख्यानं विशेषणत्रयम् । तथा विशुद्धब्रह्मविषयत्वेनापि शक्यनयनम् । अव्याकृतात्मन एव निरस्तसर्वाध्यारोपणस्य विशुद्धब्रह्मस्वरूपत्वात्, 'एतस्मिन्नदृश्येऽनात्म्येनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते' (२-७) इत्युत्तरत्र तस्यैव विज्ञाप्यमानत्वाच्च । तथापि सृष्ट्यनन्तरं परमात्मा त्यदादिसर्वमभवत् इति श्रवणादत्र व्याकृतामूर्तविशेषणत्वेन ग्राह्यमित्याह - **'त्यदनिरुक्तानिलयनानि'** इत्यादिना **'व्याकृतविषयाण्येवैतानि'** इत्यन्तेन। **'त्यदिति प्राणादि, अनिरुक्तं तदेव, अनिलयनं च'** इति त्वाध्यात्मिकामूर्ते विशिष्य तात्पर्यं प्रदर्शयितुम्, न त्वाधिदैविकवाय्वन्तरिक्षे व्यावर्तयितुम् । 'अथामूर्तं वायुश्चान्तरिक्षं च' (बृ. २-३-३) इति श्रुत्यनुसारेण तयोरप्यमूर्तत्वेन

शक्यग्रहणत्वात्। 'सच्च त्यच्च', 'निरुक्तं चानिरुक्तं च', 'निलयनं चनिलयनं च' इति त्वाध्यात्मिके एव मूर्तामूर्तेऽत्र विशिष्य गृह्येते । आध्यात्मिकमूर्तामूर्तयोर्हि कार्यकरणात्मनोरधिकरणभूतयोर्ब्रह्मोपलभ्यते द्रष्ट्रादिविशेषरूपेणेति तत्रैव गुहायां परमात्मा सुखवेदन इति प्रतिबोधनार्थम् - इत्यभिसंधाय विशेषणत्रयनिर्वचन-फलमभिधत्ते **'अतो विशेषणान्येतानि'** इत्यादिना। अतश्चेति लुप्तचकारोऽयं निर्देशो द्रष्टव्यः । पूर्वोक्तसर्गोत्तरकालीन-सर्वभावश्रवणलिङ्गसमुच्चयार्थम् । यत आध्यात्मिकं प्राणाद्येवात्र विशिष्य विवक्ष्यते 'सच्च त्यच्चाभवत्' इत्यादिना, अत एव चैतानि त्यदादीनि विशेषणानि व्याकृतविषयाण्येवावगन्तव्यानि न त्वव्याकृताद्यर्थान्तरविषयाणीत्यभिप्रायः ॥

## १४६. चेतनाचेतनविभक्तरूपेण ब्रह्मणो बहुभावः -

अथ चेतनाचेतनादिरूपेणापि ब्रह्मैवावभासते इति दर्शयद्ग्रन्थभागं व्याख्यातुमुपक्रमते - **'विज्ञानं चेतनम्'** इत्यादिना । विज्ञानं विज्ञानवच्चेतनं जीवरूपम्, यद्रूपेण ब्रह्म सर्वं सृष्टमनुप्राविशदित्युक्तम् । अविज्ञानं विज्ञानरहितम् अचेतनं विज्ञानशब्दवाच्यजीवावभासाश्रयं नामरूपकार्यं भूतभौतिकादीत्यर्थः । पाषाणादीत्यस्योपलक्षणार्थत्वात्, यथोपवर्णितदिशा आध्यात्मिकमूर्तामूर्तभावस्यैव विशिष्य विवक्षणीयत्वाच्च । ननु कथं ज्ञानलक्षणं सद् ब्रह्म स्वविलक्षणमविज्ञान-रूपमभजत ? न हि काष्ठलोष्टपाषाणादिभौतिकमचेतनत्वेन प्रसिद्धमपि चैतन्यकार्यं भवेदिति श्लिष्यते । तत्कथमिदं विभागवचनं - विज्ञानं चाविज्ञानं चेति ? नैष दोषः। सर्वस्यापि जगतश्चैतन्यकार्यत्वाविशेषेऽपि विभाविताविभावितचैतन्य-कृताद्विशेषाद् विभागोपपत्तेः । अविभावनं तु चैतन्यस्य परिणामविशेषाद्भविष्यति। न चायं परिणामः स्वरूपस्यैव सतत्त्वतो विकारविशेषापत्तिः, किं तर्हि स्वरूपानुपम-र्देनैवानेकाकारापत्तिर्मायिकीत्युक्तम् । न चैतदसंभावितम् । प्रसिद्धं ह्येतत् स्वप्नदृश्येकस्मिन्नेव स्वरूपानुपमर्देनैवानेकाकारचेतनाचेतनाकारापत्तिर्भवतीति । श्रूयते च रथादीनामभावेऽपि स्वप्ने मायिकी विचित्रा सृष्टिः 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान् पथः सृजते' (बृ. ४-३-१०) इति । अतो न दोषः ॥

## १४७. सत्यानृतविभक्तरूपेण ब्रह्मणो बहुभावः -

अथ यदिदं सृष्टं नामरूपात्मकं तत्सर्वं सत्यानृतरूपेणापि विभज्य तदपि ब्रह्मैवाभवदित्युच्यते 'सत्यं चानृतं च' इति । तद्व्याचष्टे **'सत्यं व्यवहारविषयम्'** इत्यादिना । अत्रेयं शङ्का द्रष्टव्या - यदि नाम यथोक्तप्रकारेण ब्रह्म मृषैव विज्ञानाविज्ञानविभक्तत्वेन परिणतम्, तथाप्यविज्ञानशब्दव्यपदिष्टे अचेतने सत्यानृतविभागः कथमुपपद्येत ? न हि सत्यमेव सदनृतरूपमपि क्वचिदापद्येतेति । सैषा शङ्का पराणुद्यते 'सत्यं व्यवहारविषयम्' इति । अयमाशयः । मृषापरिणतेऽपि सदसद्विभागः संभवत्येव । भवति ह्यत्रापि स्वप्नदृष्टान्तः । **यदाहुरभियुक्ताः** 'स्वप्नवृत्तावपि त्वन्तश्चेतसा कल्पितं त्वसत् । बहिश्चेतोगृहीतं सद्दृष्टं वैतथ्यमेतयोः । जाग्रद्वृत्तावपि त्वन्तश्चेतसा कल्पितं त्वसत् । बहिश्चेतोगृहीतं सद्युक्तं वैतथ्यमेतयोः ॥' (मां.का २-९, १०) इति । अतो न चोद्यमेतत् । अत उदकादि नानाभूतं नियमेनार्थक्रियाकारित्वात् सत्यम्, मृगतृष्णिकोदकादि तु तदपेक्षया अनृतम् इति व्यवहारविषय एव सत्यानृतविभागोऽयम् । न परमार्थसत्यमिह विवक्षितम् । कुत एतत् ? **अधिकारात्** । अत्र हि व्यावहारिकयोरेव नामरूपयोः सृष्टिरधिकृता । ते च नामरूपे सत्यानृतविभक्ते प्रतिविभागं चानेकधा प्रविभक्ते चेति प्रसिद्धमेतत् । परमार्थसत्यं तु न नानाभूतम् । **'एकमेव हि परमार्थसत्यं ब्रह्म'** सत्यं ज्ञानमनन्तं चेत्युक्तलक्षणम् । न तु तस्मिन् सत्यानृतविभागः समस्ति । अतः सर्वमनवद्यमिति ॥

## १४८. अभिनववेदान्तिव्याख्यानं 'सत्यमित्याचक्षते' इत्यस्य -

ये त्वत्र सत्यानृतशब्दौ चेतनाचेतनपरत्वेन व्याकृत्य वाक्यार्थं वर्णयांबभूवुः - यस्माच्चेतनाचेतनात्मकवर्गानुप्रविष्टतया सत्यशब्दितस्य ब्रह्मण आत्मत्वम्, अत एव चेतनाचेतनात्मकं जगत् सत्यं ब्रह्मेत्याचक्षते, 'हरेर्न किञ्चिद्व्यतिरिक्तमस्ति', 'ज्योतींषि विष्णुर्भुवनानि विष्णुः' इत्याचक्षते शास्त्रदृष्टिमन्त इत्यर्थ इति । तेषां प्रकृतहानाप्रकृतप्रक्रिये दुर्वारिणे स्याताम् । 'सत्यं ज्ञानमनन्तं ब्रह्म' इति लक्षणवाक्ये हि ब्रह्मणः सत्यत्वं प्रकृतम् । तत्कथं सत्यं ब्रह्म - इत्यस्योपपादनार्थमिदं सत्यानृतविभक्तजगत्कारणत्वं प्रदर्श्यत इति युक्तम् । तत्प्रविहाय ब्रह्मणः

सत्यानृतप्रवेशेन सर्वात्मभूतत्वात् सर्वं जगत्सत्यं । ब्रह्मेत्याचक्षते इत्यप्रकृतार्थकल्पनं कथमिव भगवत्या सर्वज्ञकल्पायाः शोभते इति त एव जानीयुः । ये पुनस्त्यदादिशब्दानां चतुर्मुखप्राणलक्ष्म्याद्यश्रुतार्थत्वं कल्पयित्वा 'अतः साधुस्वरूपः सन् सत्यनामानृतादिकम् । नामानेन गतत्वादेर्यदिदं किञ्चभाषितम् । सन्निरुक्तादिशब्देन तत्सर्वं साधुतैव हि ॥ अवसादनादिहेतुत्वं साधुतैव हि सर्वशः । असाधुतावसादादिस्तत्कर्तृत्वं हि भाषितम् ॥' इति प्राहुः, ते ततोऽपि साहसिकतराः । यस्मात्साधुत्वात्सत्यत्वं ब्रह्मणः, तद्गतत्वाज्जगतोऽनृतत्वम् । अवसादादिकर्तृत्वादेव साधुत्वोपपत्तिर्ब्रह्मणः - इत्याद्यश्रुतासदर्थकल्पनेन 'सत्यं चानृतं च सत्यमभवत् । यदिदं किञ्च तत्सत्यमित्याचक्षते' इति स्पष्टतरं श्रुतं ब्रह्मणः सर्वोपादानत्वं पृष्ठतः कुर्वन्तीत्यलमश्रुतार्थकल्पनाचतुरविनिर्मितनूत्नप्रक्रियापरीक्षणायासेन ॥

**ब्रह्मणः परमार्थसत्यत्वम् -**

अथ यदुपपादनार्थमिदं सत्त्यदादिविभागेन ब्रह्मणो बहुभवनं प्रपञ्चितं तद्दर्शयद्वाक्यमवतारयन् प्रश्नमुत्थापयति - **'किं पुनरेतत्सर्वमभवत्'** इति । एतदुत्तरत्वेन 'सत्यमभवत्' इति वाक्यं व्याचष्टे **'परमार्थसत्यम्'** इति । किं पुरस्तद्यदिह सत्यशब्देन व्यपदिष्टमिति पृच्छायामाह **'ब्रह्म'** इति । कथमेतदवगम्यते ब्रह्मैवात्र सत्यशब्देनाभिहितं नार्थान्तरमिति ? प्रकरणादित्याह - **'सत्यं ज्ञानमनन्तं ब्रह्मेति प्रकृतत्वात्'** । कथं सत्यं ब्रह्म ? - इत्येतद्विवरणार्थं ह्ययं ग्रन्थभागः प्रवृत्त इत्यवोचाम । सत्यमित्युपलक्षणम् । ज्ञानमनन्तं चेत्यापि द्रष्टव्यम् । 'सोऽकामयत', 'स तपोऽतप्यत' इति च सर्वज्ञत्ववचनात्; 'इदं सर्वमसृजत', 'अभवद्यदिदं किञ्च' इति च कालाकाशादिसर्वकारणत्ववचनाच्च । 'तत्सत्यमित्याचक्षते' इत्यस्य 'सत्यमभवत्' इत्यनेन गतार्थत्वात्पौनरुक्त्यमाशङ्क्य सत्यत्वोपपादननिगमनपरत्वेन वाक्यं व्याचष्टे - **'यस्मात्'** इत्यादिना ॥२०॥

## तदप्येष श्लोको भवति ॥

### (इति षष्ठोनुवाकः)

**असद्वा इदमग्र आसीत् । ततो वै सदजायत। तदात्मानँ स्वयमकुरुत । तस्मात्तत्सुकृतमुच्यत इति ॥२१॥**

## (४) अस्ति ब्रह्म, सुकृतप्रसिद्धेः

६२. अस्ति, नास्ति - इत्यनुप्रश्नः प्रकृतः। तस्य प्रतिवचनविषये एतदुक्तम् 'आत्मा अकामयत बहु स्याम् इति'[१] । स यथाकमं च आकाशादिकार्यं सत्त्यदादिलक्षणं सृष्ट्वा तदनुप्रविश्य पश्यन् शृण्वन् मन्वानो विजानन् बह्वभवत् । तस्मात् तदेवेद-माकाशादिकारणं कार्यस्थं परमे व्योमन् हृदयगुहायां निहितं तत्प्रत्ययावभास-विशेषेणोपलभ्यमानम् अस्तीत्येवं विजानीयात् इत्युक्तं भवति । तदेतस्मिन् अर्थे ब्राह्मणोक्ते एष श्लोकः मन्त्रः भवति । यथा पूर्वेषु अन्नमयाद्यात्मप्रकाशकाः पञ्चस्वपि, एवं

---

१. अत्र इतिशब्द एको लुप्तो द्रष्टव्यः । एतादृशेषु स्थलेष्वेक एवेतिः प्रयुज्यत इति शैली भगवत इत्यावृत्त्या वा इतिशब्दो व्याख्यातव्यः ॥

## सर्वान्तरतमात्मास्तित्वप्रकाशकोऽपि मन्त्रः कार्यद्वारेण भवति ॥

### १५०. प्रवेशबहुभवनग्रन्थवाक्यार्थः -

तदेवं 'सोऽकामयत' इत्यादि 'तत्सत्यमित्याचक्षते' इत्यन्तं ग्रन्थाक्षराणि विस्तरेण व्याख्याय प्रथमानुप्रश्नस्य निर्णयप्रकारविशेषे ग्रन्थतात्पर्यं दर्शयन् वाक्यार्थमाह - **अस्ति नास्तीत्यादिना 'इत्युक्तं भवति'** इत्यन्तेन । अत्र च **'अकामयत'** इत्यनुकर्षणात्, **'आकाशादिकार्यं सत्यदादि सृष्ट्वा'** इत्यादिशब्दग्रहणाच्चैष भाष्यकाराशयोऽवगम्यते आकाशादिपूर्वपूर्वविकारात्मना अवतिष्ठमानः परमात्मैवोत्तरोत्तरं वाय्वादिविकारं सृजति, न त्वाकाशादीनि स्वयमेवेति। अचेतनानां तेषां स्वातन्त्र्येण प्रवृत्यसंभवात्, 'सोऽकामयत' इत्यभिध्यानपूर्वकं 'सच्च त्यच्चाभवत्' इत्यात्मन एव साक्षात्सर्वात्मभावदर्शनाच्चेति। तथा हि **बादरायणीयं सूत्रम्** । 'तदभिध्यानादेव तु तल्लिङ्गात्सः' (वे. सू. २-३-१३) इति । तल्लिङ्गादिति 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति' (बृ. ३-७-३) इत्यादिस्थलेषु साध्यक्षाणामेव भूतानां प्रवृत्तिदर्शनात्— इत्यर्थः । **'तदनु प्रविश्य - पश्यञ्शृण्वन्मन्वानो विजानन्'** इति व्याख्यानव्याख्येयभावो बोध्यः । द्रष्टृत्वादिरूपेणावभासनस्यैव प्रवेशशब्दार्थत्वेनावगमितत्वात् । **'तस्मात्तदेवेदमाकाशादिकारणम्'** इतीदंशब्देन परामृष्टस्य विशेषेण निर्देशः **'कार्यस्थम्'** इति । तस्य च व्याख्यानं **'परमे व्योमन् हृदयगुहायां निहितमिति'** । कथं निहितमित्येतद्विशदीकरणाय **तत्प्रत्ययावभासा-विशेषेणोपलभ्यमानमिति** । द्रष्टृश्रोत्राद्यवभासविशेषेण हृदयगुहायामनु-भूयमानत्वात् तदवभासकारणं परमार्थसत्यं ब्रह्मास्तीत्येवं विजानीयादिति प्रतिबोधनार्थः 'सोऽकामयत' इत्यादिरेतावदन्तो ग्रन्थ इत्याभिप्रायः॥

## १५१. सर्वान्तरात्मास्तित्वपरत्वेन श्लोकावतरणिका -

यथोपवर्णितार्थप्रतिपादनपरत्वेन श्लोकमवतारयति - 'यथा पूर्वेषु' इत्यादिना। यथा पूर्वेषु अन्नमयाद्यात्मपर्यायेषु तत्तदात्मयाथात्म्यप्रकाशकाः श्लोका उपन्यस्ताः 'अन्नाद्वै' (२-२), 'प्राणं देवाः' (२-३), 'यतो वाचो निवर्तन्ते' (२-४), 'विज्ञानं यज्ञं तनुते' (२-५), 'असन्नेव स भवति' (२-६) इति च, एवमत्रापि सत्त्यदादिकारणभूतस्यैव हृदयगुहायां निहितत्वेन सुवेद्यस्य परमात्मन अस्तित्व-प्रकाशकश्लोकोऽप्युपन्यस्यत इत्यर्थः । पञ्चमे पर्याये आनन्दमयपुच्छप्रतिष्ठाभूतस्यैव निर्विशेषब्रह्मणोऽस्तित्वप्रकाशनात् 'पञ्चस्वपि' इति नानुक्तानुवादः । इदानीं त्वन्नमयाद्यानन्दमयान्तपञ्चकोशविलक्षणत्वेन तस्यैव निर्विशेषब्रह्मात्मनः सर्वजगत्कारणस्य सुकृतत्वेनास्तित्वं प्रकाश्यत इत्ययं सर्वान्तरतमास्तित्वप्रकाशकः श्लोक इति विशेषः । कथमात्मास्तित्वं प्रकाशयति श्लोक इत्यत आह कार्यद्वारेणेति, कार्यं जगत्, आकाशादिनामरूपलक्षणम्, यस्मात् गृह्यते कार्यं जगन्नामरूपाभ्यां व्याकृतम्, तस्मादस्ति तत्कारणं प्रकृतित्वेनाधिष्ठातृत्वेन चेत्येवं प्रकाश्यते ब्रह्म श्लोकेनेत्यर्थः ॥

**६३. असद् वा इदम् अग्रे असीत् । असत् इति व्याकृतनामरूपविशेषविपरीतरूपम् अविकृतं[१] ब्रह्म उच्यते । न पुनरत्यन्तमेव असत्। न हि असतः सज्जन्मास्ति। इदम् इति नामरूपविशेषवद् व्याकृतं जगत् अग्रे पूर्वं प्रागुत्पत्तेः ब्रह्मैव असच्छब्दवाच्यम् आसीत् । ततः असतः वै सत् प्रविभक्तनामरूपविशेषम् अजायत उत्पन्नम् । किं ततः प्रविभक्तं**

---

१. 'अव्याकृतम्' इति वा ॥

**कार्यमिति पितुरिव पुत्रः ? नेत्याह । तत् असच्छब्दवाच्यं स्वयमेव आत्मानमेव अकुरुत कृतवत् । यस्मादेवं तस्मात् तद् ब्रह्मैव सुकृतं स्वयं कर्तृ उच्यते । स्वयं कर्तृ ब्रह्म इति प्रसिद्धं लोके सर्वकारणत्वात्। यस्माद् वा स्वयम् अकरोत् सर्वं सर्वात्मना, तस्मात् पुण्यरूपेणापि तदेव ब्रह्म कारणं सुकृतम् उच्यते । सर्वथापि तु फलसंबन्धादिकारणं सुकृतशब्दवाच्यं प्रसिद्धं लोके यदि पुण्यं यदि वा अन्यत्, सा प्रसिद्धिर्नित्ये चेतनकारणे[1] सत्युपपद्यते । तस्मादस्ति तद्[2] ब्रह्म । सुकृतप्रसिद्धेः[3] ।।२१।।**

**१५२. ब्रह्मण एव कार्यत्वं कारणत्वं च -**

ब्रह्मास्तित्वप्रकाशकः श्लोक इत्युक्तम् । तत्कथम् 'असद्वा' इति प्रणव एव विस्वरः ? इत्याशङ्क्याह **'असदितीति'** । **अविकृतमिति** नामरूपाभ्यामव्याकृतम् इत्यर्थः । 'अव्याकृतम्' इत्येव च क्वचित् पाठः । **'न पुनरत्यन्तमेवासत्'** इति । कथं ह्यत्यन्तमेवासत्त्वे 'आसीत्' इत्यस्तित्वधर्मवाचकेन व्यपदिश्येत ? न ह्यसतः सत्त्वमस्ति इति भावः । वाक्यशेषाच्च नात्यन्तमसदिहासीदित्यवगम्यते । कथम् ? न ह्यसतः सज्जन्मास्ति। वक्ष्यति चानुपदमेव 'ततो वै सदजायत' इति । न चासतः सज्जन्मः संभवति ।

---

१. 'चेतनवत्कारणे' इति आ ।।

२. तदिति नास्ति वा ।।

३. 'प्रसिद्धेरिति' इति इतिपरकः (वा।।) पाठः ।।

'कथमसतः सज्जायेत' (छां. ६-२-२) इति श्रुत्यन्तरात् । प्रतीयमानस्वरूपेण चेदं कार्यमनात्मत्वादिदानीमप्यसदेवेति न युक्तं विशिष्य वक्तुम् 'असद्वा अग्र आसीत्' इति । ब्रह्मैकमेव हि परमार्थसत् 'सत्यं ज्ञानमनन्तम्' इति प्रतिज्ञातम् 'तत्सत्यमित्याचक्षते' इत्युपसंहृतं च । अतः स्वतः सर्वदा असदेव सदिदं तत एव परमार्थसतो ब्रह्मण एव इदं सदजायत इति वक्तव्यम् । ब्रह्मात्मनैवास्य सत्त्वात् । यथोक्तं **वार्तिककारैः** — 'नामरूपात्मकं कार्यमनात्मत्वात्स्वतो ह्यसत् । यत्सदेकं परं ब्रह्म ततो वै सदजायत ॥' (तै.वा. २-४१६) इति । तस्मात् यदेव 'सत्यं चानृतं च सत्यमभवत्' इति प्रकृतं तदेवेदानीं नामरूपव्याकृतजगद्रूपेण प्रतिभासमानं प्राक्सृष्टेर्धमान्तरेण असदासीदिति व्यपदिश्यत इति साधूक्तमित्यभिप्रायेण मन्त्रप्रथमवाक्याक्षराणि व्याचष्टे — **'इदम्'** इत्यादिना **'आसीत्'** इत्यन्तेन । इदंशब्दवाच्यजगत्त्वेन प्रतिभासमानं ब्रह्म प्राक् सृष्टेर्नामरूपाभ्यामव्याकृतत्वा-दसदिवासीत् इत्यर्थः । नामरूपाभ्यां व्याकृतं हि वस्तु लोके सदित्युच्यत इति । एवं चाविद्याकल्पितेन नामरूपलक्षणेनैव व्याकृताव्याकृतात्मकेन रूपभेदेन ब्रह्म सच्छब्दवाच्यमसच्छब्दवाच्यं च न स्वत इत्याह — **'प्रगुत्पत्तेर्ब्रह्मैवासच्छब्द-वाच्यमासीत्'** इत्यादिना 'उत्पन्नम्' इत्यन्तेन । 'सदसच्चाहमर्जुन' (गी. ९-१९) इति च स्मृतिरेतदभिप्रायिकैव । स्वतस्तु 'न सत्तन्नासदुच्यते' (गी. १३-१२ इति तत्रैवोभयशब्दवाच्यत्वप्रतिषेधात् ॥

## १५३. कार्यस्य कारणानन्यत्वम् -

असतो ब्रह्मणः सदुत्पन्नमित्युक्तम् । **'किं ततः प्रविभक्तं कार्यमिति पितुरिव पुत्रः ?'** तथा च कार्यस्यान्यत्वात् 'ब्रह्मैवेदं विश्वम्' (मुं. २-२-१२), 'आत्मैवेदं सर्वम्' (छां. ७-२५-२) इत्याद्यात्मैकत्वप्रतिपादनपरश्रुत्युपरोधः, ब्रह्मणोऽनन्तत्वप्रतिज्ञोपरोधश्च । कार्यपरिच्छिन्नत्वाद्ब्रह्मणः - इति प्रष्टुरभिप्रायः । **नेत्याह तदसच्छब्दावाच्यं स्वयमेवात्मानमेवाकुरुत कृतवत्'** इति । स्वयम् इति विशेषणात्कर्त्रन्तरानपेक्षत्वम्, 'आत्मानम्' इति विशेषणादुपादानान्तरानपेक्षत्वं च प्रतीयते । तथा च पूर्वसिद्धस्यैवायमविद्याकल्पितनामरूपव्याकरणद्वारा विशेषेण विकारात्मना परिणाम इति भावः । एवं च नामरूपयोः सर्वावस्थयोः सर्वदा

ब्रह्मणैवात्मवत्त्वात्, व्यवहारविषये एव 'तदात्मानं स्वयमकुरुत' इति ब्रह्मपरिणामवचनम्, परमार्थतस्तु स्वरूपेण नित्यशुद्धबुद्धमुक्तस्वभावेनैवावस्थानात् 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने' इति सर्वनामरूपधर्मवैधुर्यवचनं चाविरुद्धम् । येषां तु ब्रह्मणः स्वरूपे एव, तत्प्रकारभूतचिदचिदंशे वा परिणामाभ्युपगमः, तेषां ब्रह्मणो नामरूपाभ्यां नित्यसंपर्कादशुद्धिर्दुर्वारैव स्यादित्युक्तम् । तत्तथैव स्थास्यति ॥

**ब्रह्मणोऽस्तित्वोपपादकत्वेन सुकृतप्रसिद्ध्युपन्यासः -**

अथेदानीं यदर्थमिदं ब्रह्मणः सदसच्छब्दवाच्यत्वमुपन्यस्तम्, तदाविष्कुर्वद्वाक्यं व्याकरोति **'यस्मादेवम्'** इत्यादिना । यस्मात् कारणाद्यथोक्तप्रकारेण प्रागसच्छब्दवाच्यं सद् ब्रह्म स्वयमेवात्मानं व्याकृतनामरूपात्मकेन रूपान्तरेण कृतवत्, तस्मात् तद्ब्रह्मैव सुकृतं स्वयंकर्तृ इत्युच्यते । स्वयं अन्यनिरपेक्षं कर्तृ ब्रह्मेति हि प्रसिद्धं लोके वेदविदाम् । सर्वकारणत्वात् स्वस्यैव कार्यं सर्वमिति कृत्वा। 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः ... अयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानि' (बृ. ४-५-११) इति श्रुत्यन्तरे सर्वस्यापि नामरूपात्मकजगतः पुरुषनिःश्वासवल्लीलान्यायेनात्मन एव सृष्ट्युक्तेः । स्वयं स्वेनैव मायया कृतत्वाद्वा कार्यात्मनो ब्रह्मणः सुकृतत्वमित्यपि शक्यं व्यख्यातुम्। 'पुरुषो वाव सुकृतम्' (ऐ. १-२-३) इति श्रुत्यन्तरभाष्ये तथाव्याख्यानदर्शनात् । स्वेनैव परमेश्वरेणात्मना निर्वृत्तत्वात् सुकृतं कार्यमुच्यते इति तु **वार्तिककाराः** । उपपत्तिं चाहुस्तथा व्याख्याने 'लोकेऽपि स्वामिना साक्षाद्यत्कृतं कर्म यत्नतः । तदेव सुकृतं प्राहुर्न तु भृत्यैस्तथा कृतम्' (तै.वा. २-४२०) इति । एवं तावत् 'तस्मात्' इत्यस्य स्वयंकृतत्वात् इति व्याख्यानं कृतं सुकृतनामनिर्वचनसूचनार्थम् । अनेन 'तस्मादेनं स्वपितीत्याचक्षते' (छां. ६-८-१), 'तस्यैतदेव निरुक्तं हृद्ययमिति तस्माद्धृदयम्' (छा. ८-३-३) इत्यादिवच्छान्दसीयं सुकृतशब्दव्युत्पत्तिरित्युक्तं भवति । अथ सुकृतशब्दस्य लोकप्रसिद्धपुण्यार्थकत्वमादायापि व्याख्यातुं शक्यं वाक्यमति दर्शयितुमुपक्रमते **'यस्माद्वा स्वयमकरोत् सर्वं सर्वात्मना'** इति । यस्मात् सर्वं कार्यरूपं वस्तु प्रतीयमानेनात्मना स्वयमेवाकरोद्ब्रह्म तस्मात् तदेव ब्रह्म सर्वकारणं

पुण्यरूपेणापि सुकृतं पुण्यम् इत्यप्युच्यते इत्यर्थः। किं तर्हि वाक्येऽस्मिन् सुकृतशब्दवाच्यम् ब्रह्मैव वा शास्त्रप्रामाण्यात्, पुण्यमेव वा लोकरूढिसमाश्रयात्? तत्राह — **सर्वथापि तु फलसंबन्धादिकारणं सुकृतशब्दवाच्यं प्रसिद्धं लोके यदि पुण्यं यदि वा अन्यदिति** इत्यादि । इदमत्राकूतम् —पुण्यमेव फलप्रदायकमिति केचित् । 'स्वर्गकामो यजेत' इति श्रुतेर्यागस्यैव स्वर्गसंबन्धादिकारणत्वेन श्रुत्युक्तत्वेऽपि क्षणिकस्य कर्मणस्तदनुपपत्तेस्तज्जन्या-पूर्वसंज्ञकस्य पुण्यस्यैव तत्सर्वं कल्पयितुं युक्तमिति । अपरे त्वीश्वरमेव पुण्यानुगुण्येन फलसंबन्धतद्भोगतज्जन्यसुखदातारं मन्यन्ते । अचेतनस्य पुण्यस्यैतत्सर्वानु-संधानानुपपत्तेरिति । तत्रेषा सुकृतप्रसिद्धिर्यदि पुण्यमालम्ब्य, तदानुगुण्येन फलादिदातारमीश्वरमालम्ब्य वा स्थिता, सर्वथापि सा प्रसिद्धिः कर्मानुरूपप्रजासृष्टिकर्तृरूपं चेतनं सर्वज्ञं विना नोपपद्यत इति सुकृतशब्दवाच्यविशेषनिर्धारणे नास्माकमत्र निर्भरः । उभयथापि कारण-ब्रह्माकाङ्क्षणाविषेशादिति । श्लोकार्थमुपसंहरति — **तस्मादिति** । स्वयं स्वेन कृतत्वेन ब्रह्मणः सुकृतत्वेन शास्त्रप्रसिद्धेः, फलसंबन्धादिकारणत्वेन लोके सुकृतप्रसिद्धेश्च अस्ति सर्वकारणं ब्रह्मेति श्लोकार्थ इत्यभिप्रायः ॥२१॥

**यद्वै तत्सुकृतम् । रसो वैसः । रसँ ह्येवायं लब्ध्वाऽऽनन्दी भवति ॥२२॥**

## (५) अस्ति ब्रह्म, रसत्वप्रसिद्धेः

**६४. इतश्चास्ति । कुतः ? रसत्वात्, कुतो रसत्वप्रसिद्धिर्ब्रह्मण इति ? अत आह- 'यद्वै तत् सुकृतम्, रसो वै सः । रसो नाम तृप्तिहेतुः, आनन्दकरो मधुराम्लादिः प्रसिद्धो लोके ।**

**रसमेव हि[१] अयं लब्ध्वा प्राप्य आनन्दी सुखी भवति। नासतः आनन्दहेतुत्वं दृष्टं लोके । बाह्यानन्दसाधनरहिता अपि अनीहा निरेषणा ब्राह्मणा बाह्यरसलाभादिव सानन्दा दृश्यन्ते विद्वांसः । नूनं ब्रह्मैव रसस्तेषाम् । तस्मात् , अस्ति तत्तेषामानन्दकारणं रसवद् ब्रह्म ॥२२॥**

**निरेषणानामपि तृप्तिहेतुत्वादस्ति ब्रह्म -**

ब्रह्मास्तित्वे संभावनायुक्तित्वेन सुकृतप्रसिद्ध्यन्यथानुपपत्तिरुपन्यस्ता । अथेदानीं विदुषामानन्दान्यथानुपपत्तिस्तदस्तित्वे युक्तित्वेनोपन्यस्यत इत्याह — 'इतश्चास्ति' इत्यादिना । अस्याभिप्रायस्तु यथैव हि लोके मधुराम्लादिलक्षणमन्नादिरसं लब्ध्वा जनस्तृप्त आनन्दी भवति । तथैवेमे विद्वांसः संन्यासिनो निरेषणा लोकत्रयसाधनीभूतपुत्राद्यानन्दसाधनरहिताः, आनन्दार्थं किमपि कर्माकुर्वन्तोऽपि तृप्ताः सानन्दाश्च दृश्यन्ते । सानन्दत्वं च तेषां रसलाभतृप्तानामिव प्रसन्नवदनत्वादिना लिङ्गेनानुमीयते । न चासद्धेतुकी तृप्तिरानन्दो वा दृष्टो लोके । अतोऽवगम्यते नूनमस्ति तेषां किञ्चिद्रसस्थानीयमाह्लादकारणमिति । तदेव चातीतमन्त्रोक्तं ब्रह्म रसो यल्लाभात्ते सुखिनो निरीहा अपीति ॥२२॥

**को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवाऽऽनन्दयाति ॥**

## (६) अस्ति ब्रह्म, कार्यकरणसंघातक्रियादर्शनात्

**६५. इतश्चास्ति । कुतः ? प्राणनादि-**

---

१. तृटितोऽयं हिशब्दः आ ॥

क्रियादर्शनात्। अयमपि हि पिण्डो जीवतः प्राणेन प्राणिति अपानेनापानिति । एवं वायवीया ऐन्द्रियकाश्च चेष्टाः संहतैः कार्यकरणैर्निर्वर्त्यमाना दृश्यन्ते । तच्च एकार्थवृत्तित्वेन संहननं नान्तरेण चेतनमसंहतं संभवति । अन्यत्रादर्शनात् । तदाह -यत् यदि एष आकाशे परमे व्योम्नि गुहायां निहितः आनन्दः न स्यात् न भवेत्, को ह्येव लोके अन्यात् अपानचेष्टां कुर्यात् इत्यर्थः । कः प्राण्यात् प्राणनं वा कुर्यात् ? तस्मात्, अस्ति तद् ब्रह्म यदर्थाः कार्यकरणप्राणनादिचेष्टाः । तत्कृत एव चानन्दो लोकस्य । कुतः ? एष ह्येव पर आत्मा आनन्दयाति आनन्दयति सुखयति लोकं धर्मानुरूपम् । स एवात्मा आनन्दरूपः अविद्यया परिच्छिन्नो विभाव्यते प्राणिभिरित्यर्थः ॥२३॥

### १५६. कार्यकरणानां संहत्यकारित्वं ब्रह्मास्तित्वगमकम् -

यथा विद्वदानन्दहेतुत्वेन ब्रह्मास्तित्वमनुमीयते, एवं कार्यकरणसंघातक्रिया-सामान्यानुमितप्राणिसुखहेतुत्वेनापि ब्रह्मास्तित्वमनुमीयत इत्यभिदधद्ग्रन्थभागं व्याख्यातुमुपक्रमते — 'इतश्चास्ति' — इत्यादिना । तदेव प्रश्नपूर्वकं स्फुटयति 'कुतः? प्राणनादिक्रियादर्शनात्' इति । अस्यैव विवरणार्थं शिष्टं भाष्यम्

**'अयमपि हि पिण्डः'** इत्यादि । जीवतः प्राणिनः पिण्डः कार्यकरणराशिः **'प्राणेन प्राणिति, अपानेनापानिति'** । श्रुत्युक्तप्राणनापाननक्रिया प्रदर्शनार्था इति मत्वा व्याचष्टे **'एवं वायवीया ऐन्द्रियकाश्च चेष्टा'** इति। तेन वाचा अभिव्याहरति, पाणिना गृह्णाति, पद्भ्यां गच्छति, पायुना विसृजति, उपस्थेनानन्दयति, चक्षुषा पश्यति, श्रोत्रेण शृणोति, घ्राणेन जिघ्रति, जिह्वया रसयति, त्वचा स्पृशति, अन्तःकरणवृत्तिभिश्च यथायथं मनुते, बोधति, चेतयते, अहङ्करोति चेति तास्ताः क्रियाः करोतीत्यपि द्रष्टव्यम् इत्यर्थः । ताश्चेमाः प्राणनादिक्रिया न प्रत्येकं निष्पाद्यन्ते, किं तर्हि **'संहतैः करणैर्निर्वर्त्यमाना दृश्यन्ते'** । तच्चैतत् संहननं न तस्य तस्य करणस्यार्थायैव, अपि तु **'एकार्थवृत्तित्वेन'** । न हि चक्षुः स्वार्थमात्रं संपादयितुं रूपं पश्यति, श्रोत्रं वा स्वार्थमात्रं संपादयितुं श्रृणोति; किं तर्हि —यथा मधुकराः प्रत्येकं स्वस्वक्रियां निर्वर्तयन्तोऽपि मधुनिष्पादनार्थमेव संभूय यत्नवन्तो भवन्ति, एवम् — एकस्यैवार्थस्यान्ततो निष्पादनार्थं सर्वाण्यप्येतानि करणानि संभूय प्रवर्तन्ते। तद्यथा — दूराच्छब्दं श्रुत्वा तद्दिशि दृष्टिं प्रसार्य स्यादाम्रफलमद इत्यनुमाय पद्भ्यां तत्र गत्वा पाणिना तदादाय घ्राणेन तद्गन्धमाघ्राय छुरिकया फलं शकलीकृत्यैकैकशः शकलानि मुखे प्रक्षिपति, जिह्वया च तद्रसमास्वाद्य भक्षयित्वा तृप्तिं भजते कश्चित्; तत्रैवमाम्रफलभक्षणेन तृप्त्यासादनरूपैकार्थवृत्तित्वेन **श्रोत्रादीनां संहननं नान्तरेण चेतनमसंहतं संभवति । अन्यत्रादर्शनात्** । न ह्यचेतनानि स्तम्भकुड्यादीनि प्रासादादिभावेन संहन्यमानानि स्वस्वार्थनिष्पादनायैव संहन्यन्ते, अपि तु स्तम्भकुड्याद्यसंहतस्य स्वामिन एवार्थायेति प्रसिद्धम् । तद्वदिहापीत्यवगम्यते ॥

तदेतच्छ्रुत्यक्षरेण स्पष्टं भविष्यतीत्याह —**तदाहेत्यादिना** । 'यदेष आकाश आनन्दो न स्यात्' इत्येतद् व्याचष्टे — **यत् यदि एष आकाशे परमे व्योम्नि गुहायां निहित आनन्दो न स्यात्** इत्यादिना । तदेतद्व्याख्यातं पूर्वमेव प्रवेशश्रुतिविवरणव्याजेन। यस्मादस्ति विज्ञानगुहायाम् आनन्दो निहितः, अत एव सर्वो लोकः प्राणिति, अपानिति, ऐन्द्रियकाश्च चेष्टाः करोति तल्लाभायेत्यभिप्रायः। **सूत्रभाष्ये** त्वेतद्वाक्यस्थाकाशशब्दो ब्रह्मपरतया गृहीतः । तेनास्यैकवाक्यता-नयनचिन्तां भृगुवल्लीभाष्यव्याख्याने 'परमे व्योमन् प्रतिष्ठिता' (३-६) इति

वाक्यभाष्यार्थविमर्शनावसरे वर्तयिष्याम इति क्षन्तव्यः कालविलम्बोऽयं तत्वजिज्ञासुभिः । व्योमशब्दार्थस्तु विचारितः प्रागेव (पृ. ५०) 'परमे व्योमन्' इत्यस्य व्याख्यानावसर इत्यास्तामेतत् तावत् । अस्तु निहितो गुहायामानन्द इति ; ब्रह्मास्तित्वस्य किमायातम् ? तत्राह— **'तस्मादस्ति ब्रह्म यदर्थः कार्यकरणचेष्टाः। तत्कृत एव चानन्दो लोकस्य'** इति । ननु कार्यकरणसंघातस्वाम्यर्थास्ताश्चेष्टा इति युक्तम्, कथं ब्रह्मार्था उच्यन्ते ? अन्यद् हि ब्रह्म अन्यश्च देहादिसंघातस्वामीति । न। ब्रह्मण एवात्मत्वात् । 'तत्सत्यं स आत्मा' (छा. ६-८-७) इति हि विज्ञायते । स एव चात्मानन्दरूप इति तदर्था एव क्रियाः सर्वा इति न विरुध्यते । तत्कृत एवानन्दो लोकस्येति कुतः ? तत्राह —**एष ह्येव पर आत्मा आनन्दयाति आनन्दयति सुखयति लोकं धर्मानुरूपम् ।** उक्तमेतत् प्रागेव (पृ १२५) यदानन्दरूपमेव सत् परं ब्रह्म धर्मेण प्रत्युपस्थाप्यमाने प्रियवस्तुन्यन्तःकरणवृत्तिविशेषे अभिव्यज्यते, तदेव विषयसुखमिति मन्यते लोक इति । तदाह —**'स एवात्मानन्दरूपोऽविद्यया परिच्छिन्नो विभाव्यते प्राणिभिरित्यर्थ** इति । यद्यपि परमात्मायम् अजाव्ययस्वभावोऽनन्तानन्दरूपश्च परमार्थतः, तथापि जीवा देहेन्द्रियान्तःकरणरूपोपाधिधर्माध्यारोपेण तमेवानन्दं सुखदुःखविभक्तं तत्तन्निमित्तेन तदा तदा जातं नष्टं चेति मिथ्यैव विभावयन्ति । अत एव तेषामानन्दप्राप्त्यर्थं कार्यकरणचेष्टापेक्षेत्युपपद्यत इत्यभिप्रायः ॥

## १५७. परव्याख्यानदूषणम् -

एतेन यद्व्याचक्रुः केचित् — यद्ययमपरिच्छिन्नानन्दरसः परमात्मा न स्यात् सांसारिकमापवर्गिकं वा सुखं कः प्राप्नुयात् ? अत एष ह्येवानन्दयति । अतस्तस्य सर्वविधानन्दहेतुत्वात् प्राप्यत्वमिति, तदेतच्छ्रुत्यक्षरबाह्यत्वेन त्याजितं भवति । न हि सुखप्राप्तिमन्तरेण परमात्मा न स्यादिति, सुखहेतुत्वात् परमात्मा प्राप्य इति वा वेदे प्रतिपाद्यते, किं तु प्राणिप्रवृत्तिर्नियतं दृश्यमाना आनन्दास्तित्वं गमयतीति । 'कः प्राण्यात् यद्येष आनन्दो न स्यात्' इति हि श्रुतिः ' प्राणिति च सर्वः, अतोऽस्त्यानन्दो यदर्थं सर्वः प्रवर्तते' इत्यर्थे पर्यवसायिनी । 'एष ह्येवानन्दयाति' इति हिशब्दस्तु 'रसं ह्येवायं लब्ध्वानन्दी भवति' इति पूर्ववचनसिद्धमेवानुवदतीति

न हेतुसमर्पक इति । यश्चान्यैरुत्प्रेक्षितोऽर्थः 'रसँ्ह्येवायं लब्ध्वा' इति प्रभृत्येतदन्तग्रन्थस्य – 'सुखं लब्ध्वा हि कुरुते लोकचेष्टां जनार्दनः । अल्पात्सुखादल्पकर्मा पूर्णानन्दाद्धि सर्वकृत् ॥ तत्पूर्णानन्ददेवेन कारितः प्राणिति स्फुटम् । सर्वलोकः स एवैक आनन्दयति चाखिलम् ॥' इति, स चानूदितमात्र एव श्रुत्यननुगुणत्वेन विज्ञायत इति न तत्र किञ्चिद्वक्तव्यं शब्दप्रमाणकैरित्युपरम्यते॥

## १५८. श्रुत्रौ गम्यमानो जीवेश्वरभेदोऽत्र लोकसिद्धानुवादेन -

ननु भवतां वा श्रुत्यक्षरानुगुण्यं कथम् ? 'यद्येष आकाशो आनन्दो न स्यात्, तर्हि को ह्येवान्यात्, कः प्राण्यात् ?' इति हि ब्रुवती श्रुतिः प्राणनादिकर्मवद्भ्यो जीवेभ्यः कर्मफलदातारमानन्दरूपं परमेश्वरमन्यमेवाह । 'एष ह्येवानन्दयति' इति चानन्दयिता परमात्मा, आनन्दस्य लब्धा तु जीव इत्याचष्टे । 'रसं ह्येवायं लब्ध्वा आनन्दी भवति' इति पूर्वमप्युक्तम् । तदेतदाञ्जस्येन न संगच्छत इवात्मैकत्ववादिमते। 'ब्रह्मविदाप्नोति परम्' (२-१) इति चाप्यस्य ब्रह्मण आप्तुरन्यत्वे एव मुख्यार्थत्वेन गृहीतं भवेदिति भाति । तत्कथमेतदिति ?

अत्रोच्यते । 'ब्रह्मविदाप्नोति परम्' इति वाक्यं तावद् ब्रह्मप्राप्तिमेवाह । ततोऽन्यस्य परस्य निरतिशयस्यासंभवादिति सर्वसंप्रतिपन्नमेतत् । तत्र ब्रह्मवेदनमात्रेण साधनान्तरनिरपेक्षेण ब्रह्मप्राप्तिवचनात्, 'ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३-२-९) इति च श्रुत्यन्तरबलाच्चाविद्यानिवृत्तिरेव ब्रह्मप्राप्तिरित्युपचर्यत इत्युपगन्तव्यमित्यावेदितं प्राक् । 'तस्माद्वा एतस्मादात्मन' इति ब्रह्मण एव चात्मशब्देन व्यपदेशात्, अन्नमयादिषु चात्मबुद्धिनिवर्तनाय – 'अन्योऽन्तर आत्मा प्राणमयः' (२-२) इत्यादिना 'अन्योऽन्तर आत्मा आनन्दमयः' (२-५) इति यावत् – अन्यमन्यं तत्तदन्तरमात्मानं ग्राहयन्ती श्रुतिर्ब्रह्मण एव मुख्यम् आत्मत्वं प्रदर्शयितुं प्रवृत्तेति गम्यते । आत्मशब्दानुगमात् सर्वत्र । आनन्दमयस्य पुरुषविधत्वोपवर्णनप्रस्तावे चान्ते 'आनन्द आत्मा' 'ब्रह्म पुच्छं प्रतिष्ठा' इति ब्रह्मण एवात्मत्वेन प्रतिष्ठात्वेन चाख्यानात् ब्रह्मात्मनोरेकत्वमेव विवक्षतीति निश्चीयते । 'असन्नेव स भवति । असद्ब्रह्मेति वेद चेत्' (२-६) इति ब्रह्मणोऽसत्वाशङ्की स्वात्मन एवासत्त्वमाशङ्कते; ब्रह्मण एवात्मत्वात् – इति ब्रुवत्याः श्रुतेर्ब्रह्मात्मैकत्वमेव विवक्षितमित्यवगम्यते ।

'यो वेद निहितं गुहायाम्' (२-१) इति मन्त्रेण हृदयगुहायां निहितत्वेनोपवर्णितस्य पुनरपि 'तदेवानुप्राविशत्' (२-६) इति प्रत्यभिज्ञानात् हृदयस्थितात्मत्वेनैव ब्रह्मणो वेद्यत्वं शिष्यत इति निश्चीयते । मुख्यप्रवेशस्य सर्वथा अनुपपन्नत्वात् — इत्यवोचाम। पुनरप्येतस्मिन्ननुप्रश्नापाकरणग्रन्थप्रवाहे परमार्थसत्यस्य ब्रह्मणो विज्ञानाविज्ञानादि-सर्वात्मकत्वं, स्वयंकृतत्वेन रसत्वप्रसिद्ध्या आनन्दकारणत्वेन च तस्यैव सर्वान्तरात्मनो ब्रह्मण अस्तित्वं च लोकबुद्धिमनुसृत्याप्यनुमापयन्ती श्रुतिर्ब्रह्मात्मैकत्वमेव हृदये निधापितवतीति गम्यते । तस्मात् त्यजेदेकं कुलस्यार्थे इति न्यायेन, सामर्थ्यलभ्यो भेद एकोऽत्र परित्यक्तव्यः । यथोक्तबहुयुक्तिविरोधात्। प्रकरणमेवानुसृत्य कार्यकरणसंघातप्रवृत्त्यन्यथानुपपत्त्या प्राणिसुखहेतुब्रह्मास्तित्व-साधनपरत्वेनैव ग्रन्थो व्याख्येयः । 'एष एव ह्यानन्दयति' इति श्रुतं तु 'रसं ह्येवायं लब्ध्वानन्दी भवति' इत्यस्यानुवादेन लोकसिद्धभेदमाश्रित्य ब्रह्मणोऽस्तित्वोप-पादनाय, अविद्यावस्थायां जीवात्मपरमात्मनोर्लब्धृलब्धव्यविभागमङ्गीकृत्य — इति न किञ्चिद्विरुध्यते । वस्तुतस्तु परमात्मनो नास्त्येवान्यो जीवः 'नान्योऽतोस्ति द्रष्टा' (बृ. ३-७-२३) इत्यादिश्रुतेरिति सर्वमिहानवद्यम् ॥२३॥

**यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्ये निरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते। अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति। तत्त्वेव भयं विदुषोऽमन्वानस्य ॥२४॥**

## (७) अस्ति ब्रह्म, भयाभयहेतुत्वात्

६६. भयाभयहेतुत्वाद्विद्वदविदुषोरस्ति तद्ब्रह्म ॥

## १५९. आगामिग्रन्थसंबन्धः

उत्तरग्रन्थसंबन्धमाह **'भयाभयहेतुत्वात्'** इति । विद्यमानं हि वस्तु भयहेतुरभयहेतुर्वा स्यात् । तच्चैतदुभयहेतुत्वमस्ति ब्रह्मणीत्यस्ति तद्ब्रह्मेत्यवगम्यत इत्यभिप्रायः । ननु विदिते ब्रह्मणोऽस्तित्वे तद्भयहेतुरभयहेतुर्वेति निश्चीयेत । अत्र तावदस्तित्वमेव ब्रह्मणि सिषाधयिषितमिति कथं ब्रह्मणो भयादिहेतुत्वं सिद्धवदुपन्यस्यते ? न हि अनिश्चितसद्भावे पर्वते जातुचिद्धूमवत्त्वं वह्न्यनुमिति-हेतुत्वेनोपन्यस्यत इति । नैष दोषः । सामान्यतोऽनुमितास्तित्वस्यैव ब्रह्मत्वावगमात्। यथा हि विद्वदानन्दप्राणिचेष्टादिलिङ्गेनास्तित्वमवगमितं ब्रह्मणः - अस्ति किमपि विद्वदानन्दहेतुभूतम्, प्राणिचेष्टादिप्रयोजनं वा इति-ततश्च यथानुमितस्यैव हेतोर्ब्रह्मत्वमवगमितम्, एवमत्राप्यस्ति किमपि तत्तादृशं तत्त्वं यदाश्रित्य केचिन्निर्भयाः, यतश्चान्ये सभया इति समान्यतो दृष्टमाश्रित्यैव यस्यास्तित्वमनुमीयते, तस्यैव हि ब्रह्मत्वमवगम्यत इति । न च कथमेकस्यैव वस्तुनो भयाभयोभयहेतुत्वमिति शङ्कनीयम् । विद्याविद्याविभागात् यथासंभवमुभयस्याप्युपपन्नत्वात् । दृष्टं हि लोके एकस्या एव रज्ज्वाः सतत्त्वविदुषोऽभयहेतुत्वं सर्पत्वेन द्रष्टुश्चाविदुषो भयहेतुत्वं चेति। तद्वदिहापि भविष्यति । विशदयिष्यते भाष्यकृतैवैतदनुपदमिति नैवात्र किञ्चिच्चोद्यमवतरति ॥

## १६०. वार्तिककारप्रस्थानम् -

वार्तिककारास्तु ग्रन्थमेनम् 'उताविद्वान्' (२-६) इति प्रश्नापाकरणार्थत्वेनैव नीतवन्तः । 'अस्तित्वे हेतवः सम्यग्ब्रह्मणोऽभिहिता यतः । उताविद्वानिति प्रश्नः श्रुत्याऽऽविष्क्रियतेऽधुना ॥ विद्वानेवैति तद्ब्रह्म ह्यभयं भयहेतु यत् । तमोमात्रावरुद्धत्वात्ताप्राप्तेर्नान्यदस्ति हि ॥ व्यवधानं हि यद्यस्मात्तत्तन्मोहैकहेतुकम्। यस्मात्तस्मादविद्यैव मोक्षाप्तेर्व्यवधिर्भवेत् ॥' (तै. वा. २-४३४, ६, ७) इति । तत्र यद्यपि 'अभयं प्रतिष्ठां विन्दते' इति वाक्यं विदुषो ब्रह्मप्राप्तेरभिधायकमिति वक्तुं शक्यम्, तथापि 'अथ तस्य भयं भवति' इत्यविदुषो भयहेतुत्वमेव साक्षादभिदधद्वाक्यं दृष्ट्वा तदानुलोम्येन पूर्वस्मिन्नपि वाक्ये 'अभयं प्रतिष्ठां विन्दते' इत्यत्र विदुषोऽभयहेतुप्रदर्शकत्वेनैव भाष्यानुसारतो व्याख्यातुं स्वरसतरमिति भाति

मम मन्दमतेः । सर्वथा तु भयाभयहेतुत्वं ब्रह्मणो वार्तिककाराणामिति संमतम् 'दृश्यादिगुणहीनेऽस्मिन्निरविद्यो यदाऽभयम् । साक्षाद्वेत्ति तदैवायमभयं विन्दते परम्॥' (तै.वा. २-४५६), 'निर्भयोऽपि स्वतोऽविद्वानेकं सन्तमनेकधा । प्रकल्प्याविद्यायाऽऽत्मानं तमेव भयमाप्नुयात्'' ।। (२-४६६) इति च वचनादित्यलमत्र प्रस्थानभेदे सूक्ष्मेक्षिकया ॥

**६७. सद्वस्त्वाश्रयणेन ह्यभयं भवति, नासद्वस्त्वाश्रयणेन भयनिवृत्तिरुपपद्यते। कथमभयहेतुत्वमिति ? उच्यते । यदा हि एव यस्मात् एष साधकः, एतस्मिन् ब्रह्मणि । किंविशिष्टे ? अदृश्ये । दृश्यं नाम द्रष्टव्यं, विकारः। दर्शनार्थत्वाद् विकारस्य । न दृश्यम् अदृश्यम् । अविकार इत्यर्थः । एतस्मिन् अदृश्ये अविकारे, अविषयभूते । अनात्म्ये अशरीरे । यस्माददृश्यम् तस्मादनात्म्यम्। यस्मादनात्म्यं तस्मात् अनिरुक्तम् । विशेषो हि निरुच्यते । विशेषश्च विकारः । अविकारं च ब्रह्म । सर्वविकारहेतुत्वात् । तस्मात् अनिरुक्तम् । यत एवं तस्मात् अनिलयनम्। निलयनं नीडः आश्रयः । न लिनयनम् अनिलयनम्, अनाधारम्। तस्मिन्नेतस्मिन् अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने सर्वकार्य-**

धर्मविलक्षणे ब्रह्मणि-इति वाक्यार्थः। अभयम् इति क्रियाविशेषणम्। 'अभयाम्' इति वा लिङ्गान्तरं परिणम्यते। प्रतिष्ठां स्थितिम् आत्मभावं विन्दते लभते। अथ तदा स तस्मिन् नानात्वस्य भयहेतोः अविद्याकृतस्य अदर्शनात् अभयं गतो भवति। स्वरूपप्रतिष्ठो ह्यसौ यदा भवति तदा नान्यत् पश्यति, नान्यच्छृणोति, नान्यद्विजानाति। अन्यस्य हि अन्यतो भयं भवति। नात्मन एवात्मनो भयं युक्तम्। तस्मादात्मैवात्मनोऽभयकारणम्। सर्वतो हि निर्भया ब्राह्मणा दृश्यन्ते सत्सु भयहेतुषु। तच्चायुक्तम् असति भयत्राणे ब्रह्मणि। तस्मात् तेषाम् अभयदर्शनात् अस्ति तदभयकारणं ब्रह्मेति। कदासौ अभयं गतो भवति साधकः? यदा नान्यत् पश्यति, आत्मनि च अन्तरं भेदं न कुरुते, तदा अभयं गतो भवति इत्यभिप्रायः॥

**१६१. अभयहेतोरस्तित्वोपपादनम् -**

विदुषामभयहेतुत्वादस्ति ब्रह्मेत्यवगन्तव्यम् इति श्रुत्यर्थं प्रदर्शयन्, अभयहेतोरस्तित्वमेव तावदुपपादयति — 'सद्वस्त्वाश्रयणेन हि' इत्यादिना। तत्राभयं नाम भयनिवृत्तिः। न चासतो निवर्तकत्वं कथञ्चिदुपपद्यते। सत एव हि कारकत्वं सर्वत्र। अन्यथा असतः सर्वत्र सुलभत्वात् सर्पादिनिवारणे दण्डाद्यन्वेषणा न भवेदित्यभिप्रायः॥

विदुषोऽभयहेतुत्वं ब्रह्मणि कथं दृश्यत इत्येतत्प्रश्नोत्तरत्वेन श्रुतिमवतारयति — **कथमि**त्यादिना । यदैव अदृश्यत्वादिगुणके ब्रह्मण्यात्मभावेन निष्ठां लभते तदैवाभयं गच्छतीति श्रुतितात्पर्यं प्रदर्शयिष्यन् श्रुत्यक्षराणि व्याकर्तुमुपक्रमते **यदा** —हीत्यादिना॥

## १६२. ब्रह्मणोऽदृश्यत्वादिधर्मकत्वम् -

'एतस्मिन्' इति ब्रह्मैव परामृश्यते । प्रकृतत्वात् । ब्रह्मास्तित्वोपपिपादयिषयैव हि प्रकृतः 'सोऽकामयत' इत्यादिर्ग्रन्थप्रवाहः । तन्मध्यपतितं चेदमदृश्यादिवाक्यमिति। एवं च 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने' इति ब्रह्मण एवैतानि विशेषणानि, न तु सत्त्यदादिभाववाक्ये इवामूर्तविशेषणानीत्यभिसन्धाय तथैव व्याचष्टे **'किं विशिष्टे?'** इत्यादिना। दृश्यत्वं करणगोचरत्वं कार्यधर्मः । तदाह **'दृश्यं नाम द्रष्टव्यं, विकारः'** इति । कथमिदं गम्यते विकार एवात्र दृश्यशब्दार्थ इति ? तत्राह **दर्शनार्थत्वाद्विकारस्येति** । आत्मा नित्यदृग्रूपत्वादशृश्यः सन् दर्शनगोचरतापत्त्या स्वरूपप्रतिख्यापनाय नामरूपे व्याकुर्वन् विविधरूपभागभवदिति हि श्रूयते 'रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय' (बृ. २-५-१९) इति । तस्मान्नामरूपविकारस्यैव दर्शनार्हत्वात् दृश्यं विकारः । तद्विलक्षणमदृश्यं ब्रह्मेत्यर्थः । एवं चाविषयत्वं प्रतिपादितं भवतीत्याह **अदृश्ये, अविषयभूते इति**। एवम् 'अनात्म्ये' इति शरीराद्वैलक्षण्यं द्योतयितुमित्याह **अनात्म्ये अशरीरे इति** । अनिरुक्ते इत्येतदन्तविशेषणानां हेतुहेतुमद्भावं दर्शयति —**यस्माददृश्यं तस्मादनात्म्यम्, यस्मादनात्म्यं तस्मादनिरुक्तम् इति** । कथमनिर्वाच्यं ब्रह्मेत्यत आह —**विशेषो हि निरुच्यते। विशेषश्च विकारः । अविकारं च ब्रह्म । सर्वविकारहेतुत्वात्। तस्मात् अनिरुक्तम्** । निर्विशेषत्वादेवानिरुक्तमिति यावत् । अथ 'अनिलयनम्' इति विशेषणं निर्वक्तुकामोऽदृश्यत्वादिधर्मकत्वादेवानिलयनत्वं सिध्यतीति तावदाह **यत एवं तस्मादनिलयनमिति** । कथमेतत् ? **निलयनं नीड आश्रयः । न निलयनम् अनिलयनम् अनाधारम्।** दृश्यत्वादिधर्मकं हि वस्तु तत्तद्गुणानामाधारो भवति, न तु सर्वथा निर्धर्मकम् । अदृश्यत्वादिलक्षणकं चेदमिति

न कस्यचिदाधारो भवितुमर्हतीति भावः। नन्वाकाशादि सर्वमूर्तामूर्तकारणं ब्रह्मेत्युक्तम्। कारणं च स्वकार्यस्याधारभूतमिति प्रसिद्धम् । तत्कथमनिलयनमिति? श्रृणु तद्यथेति। मूर्तामूर्ते ह्यव्याकृतनामरूपे ब्रह्मण आत्मभूते इवाविद्याकल्पिते तत्त्वान्यत्वाभ्यामनिर्वचनीये स्वान्तर्गतेनात्मना व्याकृते तेनाप्रविभक्तदेशकाले इति कृत्वा आत्मा ते अभवदित्युक्तम् । तेन यद्यद् दृश्यं सात्म्यं निरुक्तं च तत्तत् सर्वं ब्रह्मैवेति निलयनमपि भवति ब्रह्म सर्वमूर्तामूर्तधर्माणाम् अविद्यादृष्ट्या । इह पुनः परमार्थदृष्ट्या ब्रह्मस्वरूपेण सर्वमूर्तामूर्तसाक्षित्वात् 'अदृश्यमनात्म्यमनिरुक्तम्', असङ्गित्वाच्च नैव मूर्तामूर्तसंसृष्टं जातुचिदिति कृत्वा अनिलयनमित्युच्यते । वस्तुतो मूर्तामूर्तयोः सदा ब्रह्मचैतन्यव्याप्तत्वात् तद्व्यतिरेकेणाभावाच्च मृगतृष्णिकोदकादीनामिवोषरादिभ्य इति। अतो न विरोधः । अत एव **भागवती स्मृतिः** — 'न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् । भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥' (गी. ९-५) इति । अतो न विरोधः । **वार्तिककारास्तु** प्रकारान्तरेणापि अदृश्यादिग्रन्थं व्याख्याय दृश्यादिशब्दानां मूर्तामूर्तपरत्वपक्षे निलयनशब्दो मूर्तामूर्तवासनापरत्वेन नेय इत्याहुः 'अस्मिन् पक्षे तु निलयो वासनानिलयो भवेत् । एवं च नेति नेतीति साक्षात्स्याद्ब्रह्मदर्शनम् ॥' (तै.वा. २-४५१) इति । अत्रायं तेषामभिप्रायः — अदृश्यादिशब्दैरेव मूर्तामूर्ते निषिध्य अनिलयनशब्दं मूर्तामूर्तवासनानिषेधपरत्वेनैव व्याचक्षीत । श्रुत्यन्तरे अमूर्तरसत्वेन तस्या अपि निर्देशदर्शनात् । एवं हि मूर्तामूर्ततद्वासनारहितं ब्रह्मेत्यत्र तात्पर्यवत्या 'नेति नेति' (बृ. २-३-६) इति श्रुत्या अस्या अपि श्रुत्या एकवाक्यता भविष्यतीति। भाष्ये **अनाधारम्** इत्यस्यायमर्थः। नाधारभूतं परमार्थतो ब्रह्म कस्यचिदपि सत्त्यच्छब्दवाच्ययोर्मूर्तामूर्तयोर्विकल्पमात्रत्वादात्मव्यतिरेकेण सत्त्वाभावान्न ताभ्यामाधेयवत्वं ब्रह्मणः । यथा देवदत्तस्य स्वप्नप्रतीतपुत्राभ्यां न पुत्रवत्वं तद्वदित्यर्थः। अथवा 'न निलयनं अनिलयनम् अनाधारम्' इति ग्रन्थाक्षराणि न निलयनमाधारान्तरमस्त्यस्येति अनिलयनम् अनाधारम् इत्यध्याहारेण — योजनीयानि। यदा तु यथा मूर्तामूर्तयोर्ब्रह्माधारत्वेनैव स्थितिर्न स्वतः, न तथा परमार्थसत्यस्य ब्रह्मणोऽन्याधारापेक्षा स्थितिरित्युक्तं भवति । तथा च 'स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि यदि वा न महिम्नीति' (छा. ७-२४-१),

'पुरुषान्न परं किञ्चित्' (का. १-३-११), 'यस्मात्परं नापरमस्ति किञ्चित्' (श्वे. ३-९) इत्यादिश्रुत्यन्तरसंवादो भविष्यतीति ज्ञेयम् । सर्वथापि तु सर्वमूर्तामूर्तधर्मः प्रतिषिध्यत अदृश्यादिग्रन्थेनेत्याह — **सर्वकार्यधर्मविलक्षणे ब्रह्मणीति वाक्यार्थ इति** । अत्र 'कार्यधर्मविलक्षणे' इति भाष्यं यथा नामरूपलक्षणं कार्यं नित्यं ब्रह्मणैवात्मवत्, न जातुचिदपि ततः प्रविभक्तम्, नैवं ब्रह्म नामरूपात्मकम् ; नामरूपविलक्षणेनैव प्रज्ञानघनस्वरूपेण सदा स्थितत्वात् — इत्यभिप्रायकम् । न तु कार्यधर्मविलक्षणं कारणधर्मवदिति । कार्यस्य कारणादनन्यत्वेन प्रत्याख्याने कारणस्य कारणत्वस्याप्यपगमध्रौव्यात् । 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्' (बृ. २-५-१९) इति ब्रह्मव्यतिरिक्तस्य कारणस्य कार्यस्य च समं प्रतिषेधाच्च श्रुत्यन्तरे ॥

## १६३. ब्रह्मणि विदुषोऽभयप्रतिष्ठा -

'अभयं प्रतिष्ठां विन्दते' इत्यत्र पदानामन्वयमाह अभयमिति क्रियाविशेषणमिति। 'अभयं यथा स्यात्तथा प्रतिष्ठां विन्दते यदैव' इति योजना। अभयम् इति लाभक्रियाविशेषणाभिप्रायस्तु —यद्यपि सर्वस्यापि जन्तोर्ब्रह्मणि प्रतिष्ठा विद्यत एव । ब्रह्मणः स्वभावेनैव सर्वात्मत्वात्, स्वभावस्य चापायासंभवात्। तथापि 'अदृश्यत्वादिधर्मकोऽहमद्वितीयः परमात्मा' इति वेदनाभावेनाविद्वान् स्वात्मनि द्वैतं भयकारणं पश्यतीति न सोऽभयं तत्र प्रतिष्ठां विन्दते । 'अथ हेन्द्रोऽप्राप्यैव देवानेतद्भयं ददर्श' (छां. ८-९-१) इति श्रुत्यन्तरात् । अयं तु विद्वान् अदृश्यत्वादिगुणकं ब्रह्म स्वात्मभावेन पश्यन्नैव भयकारणं पश्यतीति **'अभयं प्रतिष्ठां विन्दते'** इत्युपपन्नमिति । योजनान्तरमाह — **'अभयाम्' इति लिङ्गान्तरं परिणम्यत इति** । 'अभयम्' इति नपुंसकलिङ्गप्रयोगश्छान्दसः सन् प्रतिष्ठाविशेषणत्वाय 'अभयाम्' इति स्त्रीलिङ्गत्वेन विपरिणम्यत इत्यर्थः । अत्र तु 'यदैवायं साधकः सम्यग्ज्ञानेनाविद्यां विधूय यथोक्तविशेषणे ब्रह्मण्यभयां प्रतिष्ठां विन्दते, तदैवाभयं गतो भवतीति योजना । विशेषणाभिप्रायस्तु — अविदुषामपि जन्तूनां सुषुप्तप्रलययोः समाधौ वा कारणे ब्रह्मणि लये सति यद्यपि तत्र भयरहिता प्रतिष्ठा, तथापि सा अनात्यन्तिकत्वादेव सभयत्वान्न व्यावर्तते । विदुषः

पुनरदृश्यत्वादिविशेषणकनित्यनिरवस्थब्रह्मण्येव स्वाभाविकी प्रतिष्ठेति युक्तं तस्या अभयत्वमिति । अत्र 'अदृश्यादिधर्मके ब्रह्मणि प्रतिष्ठां विन्दते' इत्यनेन सप्तमीप्रयोगेण 'पीठे प्रतिष्ठां विन्दते' इतिवदधिकरणाधिकर्तव्यतारूपा प्रतिष्ठाऽसौ इति मा भूत्कस्यचिदपि मतिः, तथा हि संयोगस्य विप्रयोगान्ततावश्यं-भावादनात्यन्तिकप्रतिष्ठात्वप्रसङ्गः स्यादित्यभिप्रायेण प्रतिष्ठाशब्दं व्याकरोति — **प्रतिष्ठाम् आत्मभावं विन्दते लभते इति** । प्रकर्षेण स्थानमवस्थितिः प्रतिष्ठा। तां प्राप्नोतीत्यर्थः । अयमाशयः । ब्रह्म ह्यात्मभूतमेवास्य साधकस्येति न कदाचिदस्य ब्रह्मण्यवस्थानं नास्ति । अविद्यायोगेन तु स्वप्नजागरितयोर्बुद्ध्याद्युपाधिसंपर्कवशात् पररूपापत्तिरिव भवतीति स्वरूपात् प्रच्युत इव, सुषुप्त्यादौ चोपाध्युपशमात् स्वरूपापत्तिरिव भवतीति तत्र प्रतिष्ठित इव चेत्येवमविद्यावस्थायां ब्रह्मण्यवस्थानं वस्तुसदपि न ध्रुवमिति कृत्वा न प्रकृष्टत्वं तस्य । तदपेक्षया विद्यया स्वात्मत्वेन ब्रह्म विदितवतस्त्ववस्थानस्यात्यन्तिकत्वात् प्रकृष्टत्वमिति ॥

## १६४. अदृश्यत्वादिधर्मकत्वेऽपि न ब्रह्मणोऽपरमार्थता -

ननु दृश्यत्वादिसर्वमूर्तामूर्तधर्मविवर्जितत्वे ब्रह्म नैव परमार्थः स्यात् । अदृश्यत्वादिविशेषणेन हि शून्यमेव व्यावर्णितं स्यात्, दृश्यत्वादिधर्मयुक्तत्वेन मृषैव प्रतीयत इति विकल्पमात्रं वा । तत्कथं तत्र साधकस्य प्रतिष्ठा भवेदिति ? नैतच्चोद्यमत्रावतरति । उक्तोत्तरत्वात् । प्रतिष्ठां प्रकर्षेण स्थितिम् आत्मभावं विन्दते — इत्युक्तोत्तरमेतत् । न हि प्रत्यगात्मव्यतिरिक्ते ब्रह्मण्यदृश्यत्वादिगुणके प्रतिष्ठात्रोपदिश्यते येनैतच्चोद्यं स्यात्, किं तर्हि स्वात्मत्वेनैव दृश्यत्वादिरहितब्रह्मवेदनरूपा प्रतिष्ठेत्युक्तम् । न चात्मनोऽन्यस्य ब्रह्मत्वं युक्तम्। तस्य निरात्मकत्वे अपरमार्थत्वध्रौव्यात् । न चादृश्यत्वादिधर्मकमित्येतावता शून्यत्वं विकल्पत्वं वा ब्रह्मणः शक्यशङ्कम् । शून्यविकल्पयोरपि परमार्थमकल्पितं चात्मानमनालम्ब्य सिद्ध्यभावात् । आत्मन एव चात्र ब्रह्मत्वोपदेशात् । तदुक्तं **वार्तिके** 'दृश्यादिप्रतिषेधोक्त्या प्रतीचि ब्रह्म बोध्यते । न तदन्यत्तदन्यस्य परमार्थात्मता कुतः ॥ न नञर्थो विकल्पो वा परमार्थमकल्पितम् । असंप्रविश्य संसिद्धिं लभते क्वचिदन्यतः ॥' (तै.वा. २-४५३, ४५४) इति ।

तस्मान्मूर्तत्वनिषेधेनैव तदास्पदं परमार्थं साधकस्यात्मभूतं ब्रह्म सेत्स्यतीत्यचोद्यमेतद्, दृश्यत्वादिमूर्तामूर्तधर्म-विवर्जितत्वे ब्रह्म नैव परमार्थः स्यादिति ॥

## १६५. अद्वैतब्रह्मणो विद्वदभयहेतुत्वोपपत्तिः

अथेदानीं विद्वांसं प्रत्यभयहेतुत्वं ब्रह्मणो दर्शयन् 'अथ सोऽभयं गतो भवति' इति वाक्यं व्याचष्टे — **अथ तदेत्यादिना** । यथोक्तविशेषणेऽद्वये ब्रह्मणि यदा ह्येवमभयं प्रतिष्ठां विन्दते तदैवाभयं गतो भवति । अभयं हि नानात्वरहितं यथा तथा प्रतिष्ठामगमदसौ । **भयहेतोर्नानात्वस्याविद्याकृतस्यादर्शनात्, अभयं गतो भवति** शास्त्राचार्योपदेशजनितविद्यया अविद्याया विनिवर्तितत्वात् — इत्यर्थः । तथापि कथमभयप्राप्तिरित्यतः प्रतिष्ठासतत्त्वमाविष्करोति **स्वरूपप्रतिष्ठो ह्यसौ यदा भवतीत्यादिना** । स्वरूपं हि भूमाख्यं ब्रह्म यत्र नान्यदर्शनमस्ति । 'यत्र नान्यत्पश्यति' (छां. ७-२४-१) इति श्रुतेः । न च स्वरूपप्रतिष्ठत्वेऽपि कथं भयनिवृत्तिरिति चोदनीयम् । **अन्यस्य ह्यन्यतो भयं भवति नात्मन एवात्मनो भयं युक्तम्** । 'द्वितीयाद्वै भयं भवति' (बृ. १-४-२) इति द्वितीयस्यैव भयहेतुत्वश्रवणात्, तदेतत्प्रेयः' (बृ. १-४-८) इत्यादिना चात्मनः परमप्रेमास्पदत्वश्रणवात् । तथैवानुभवाच्च । **तस्मादात्मैवात्मनोऽभयकारणम्।** यस्मात्स्वरूपप्रतिष्ठस्य भयहेतोरन्यदर्शनस्याभावः, तस्मात् आत्मैव स्वरूपाव्यतिरेकेण दृष्टं ब्रह्मैव आत्मनः स्वस्य विदुषः, अभयकारणम् इत्यर्थः ॥

अत्र **केचित्** अन्यथा पाठं कल्पयित्वा अन्यथैव वाक्यार्थं वर्णयन्ति । कथम्? 'तस्मादनात्मैवात्मनो भयकारणम्' इति पाठः । अनात्मनो हि द्वितीयाद्भयं युक्तम् न त्वात्मन इत्युपपादितं यस्मात् तस्मादिति संगतिः । अत्र 'तस्मादात्मैवात्मनोऽभयकारणम्' इति बहुषु पुस्तकेषूपलभ्यमानः पाठोऽसङ्गत इव भाति । न ह्यात्मैवात्मनोऽभयकारणम् इति निश्चिते पुनरपि ब्रह्मास्तित्वे शङ्का समुन्मिषति येन तदस्तित्वमुत्तरत्र ग्रन्थे साध्येतेति । अत अनात्मैवात्मनो भयकारणमित्येव भाष्यपाठः स्यादिति तेषामाशयः । वयं तु पश्यामो नायं साधुरभ्यूह इति । कुतः ? प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गात् । प्रकृतं हि ब्रह्मणो

विद्वदभयहेतुत्वोपपादनम् । तत्र चात्र हेतुरुपन्यस्तः 'स्वरूपप्रतिष्ठो ह्यसौ' इत्यादिना। तच्च प्रकृतं हापितं स्यादेवं पाठकल्पने । न चात्मानात्मनोरन्यतरस्य भयकारणत्वं निर्धार्यत्वेन प्रकृतम्, येन 'अनात्मैवात्मनो भयकारणम्' इत्यवधार्येत । यत्तूच्यते आत्मैवात्मनोऽभयकारणमिति निश्चिते पुनरपि ब्रह्मास्तित्वे न शङ्का समुन्मिषतीति तद्भाष्यार्थसंगत्यनभिज्ञतामूलम् । इत्थं ह्यत्र भाष्यसंगतिः । यदैवोक्तलक्षणे ब्रह्मणि प्रतिष्ठामात्मभावं विन्दते तदैवास्याभयगमनमित्यत्रोपपत्तिरुक्ता । सा चोपसंह्रियते 'तस्मादात्मैवात्मनोऽभयकारणम्' इति । अत एव च ज्ञानिनां सर्वतो निर्भयत्वं दृश्यमानं तद्धेतुत्वेन ब्रह्मणोऽस्तित्वं कल्पयतीति तु परमप्रकृतमेवोपसंह्रियते सर्वत्र हीत्यादिवाक्ये इति । उत्तरत्र चाविद्वद्वाक्ये एवमेवोपपत्तिपूर्वकमुपसंहरिष्यति 'तस्मादात्मैवात्मनो भयकारणम्' इति । अतस्तदानुरूप्येणेहापि 'तस्मादात्मैवात्मनोऽभयकारणम्' इत्येव स्याद्भाष्यकारीयः पाठ इति श्लिष्यते । तस्मात् प्रकृतहानाप्रकृतप्रक्रियावारणाय, विद्वदविद्वद्वाक्यानुरूप्याय च वरं बह्वनुरोधेन यथाश्रुतपाठ एव स्वीकृतः, न त्वन्यः कल्पित इत्यलमतिप्रपञ्चेन ॥

**१६६. अभयहेतुर्ब्रह्म -**

यत एवं ब्रह्मण्यभयप्रतिष्ठायां प्राप्तायामेव अभयं गतो भवति न नाप्राप्तायाम्, तस्मात् ज्ञानिनां निर्भयत्वं दृश्यमानं तद्धेतुं ब्रह्मास्तित्वमनुमापयतीत्याह — **सर्वतो हीत्यादिना** । लौकिकदृष्ट्या नैकेषु भयहेतुषु सत्सु सर्वतोऽपि निर्भयाः सर्वस्मादप्यभीता दृश्यन्ते ब्राह्मणा ब्रह्मविदः । **तच्चायुक्तमसति भयत्राणे ब्रह्मणि**। न ह्यसति भयनिवृत्तिहेतौ भयनिवृत्तिरुपपद्यते । **तस्मात्तेषामभयदर्शनादस्ति** ब्रह्मेति। **'कदासावभयं गतो भवति'** इत्यादि **'अभिप्राय'** इत्येतदन्तं यथोपपादितार्थस्य संक्षिप्योपसंहारः अन्यादर्शनेऽभयमिति, तद्वैपरीत्येन अन्यदर्शने भयम् इत्युत्तरवाक्येनान्वयप्रदर्शनार्थः ॥

## ६८. यदा पुनरविद्यावस्थायां हि यस्मात् एषः अविद्यावान् अविद्यया प्रत्युपस्थापितं वस्तु तैमिरिकद्वितीयचन्द्रवत् पश्यति, आत्मनि च

एतस्मिन् ब्रह्मणि उत अपि अरम् अल्पमपि अन्तरं छिद्रं भेददर्शनं कुरुते । भेददर्शनमेव हि अन्तरकरणम्[१] । अल्पमपि भेदं पश्यति इत्यर्थः । अथ तस्माद् भेददर्शनाद् हेतोः, अस्य[२] भेददर्शिनः आत्मनो भयं भवति । तस्मादात्मैवात्मनो भयकारणम् अविदुषः । तदेतदाह -तत् ब्रह्म तु एव भयं भेददर्शिनो विदुषः । 'ईश्वरोऽन्यो मत्तः, अहमन्यः संसारी इत्येवंविदुषः, भेददृष्टम् ईश्वराख्यं तदेव ब्रह्म अल्पमपि अन्तरं कुर्वतः भयं भवति। एकत्वेन अमन्वानस्य । तस्मात्, विद्वानपि अविद्वानेवासौ योऽयम् एकमभिन्नम् आत्मतत्त्वं न पश्यति । उच्छेदहेतुदर्शनात् हि उच्छेद्याभिमतस्य भयं भवति । अनुच्छेद्यो हि उच्छेदहेतुः । तत्रासति उच्छेदहेतौ, उच्छेद्ये न तद्दर्शनकार्यं भयं युक्तम् । सर्वं च जगत् भयवद् दृश्यते। तस्मात्, जगतो भयदर्शनात्, गम्यते नूनं तदस्ति भयकारणम् उच्छेदहेतुरनुच्छेद्यात्मकम्, यतो जगद्बिभेतीति॥२४॥

---

१. 'भयकारणम्' वा ॥ २. तस्य इति वा ॥

## १६७. अविदुषो भयहेतुर्ब्रह्म -

विद्यावस्थायां स्वात्मभूते ब्रह्मणि प्रतिष्ठितस्य तदात्मभूतं ब्रह्माभयकारणं भवति । विदुषस्तस्मिन् भेददर्शनाभावात् इत्युक्तम् । अथैतद्वैपरीत्येनाविदुषः सति भेददर्शने तदेवात्मभूतं ब्रह्म भयकारणं भवतीति प्रदर्शयितुमारब्धां श्रुतिं व्याकरोति — **'यदा पुनः'** इत्यादिना **'अविदुष'** इत्यन्तेन । यस्यामवस्थायाम् एतस्मिन् ब्रह्मणि स्वल्पमप्यन्तरं भेदं कुरुते । तदास्य भयं भवतीत्युक्तम् । सर्वमूर्तामूर्तधर्मवर्जिते ब्रह्मणि निर्विभागे कथमन्तरकाणम् ? इत्याशङ्क्य अविद्याप्रत्युपस्थापितभेदाभासं पश्यन्निव यद्विकल्पयति तदेवान्तरकरणमित्यभिप्रायेण द्वितीयचन्द्रदर्शनवदिति दृष्टान्तानयनम् । अभिप्रायमेव स्फुटयति — **भेददर्शनमेव ह्यन्तरकरणमिति ।** भेददर्शनमिव भेददर्शनमित्यपि द्रष्टव्यम् । अविद्यामानवस्तुनो दर्शनस्याप्यनुपपत्तेः । 'यत्र हि द्वैतमिव भवति तदितरं इतर पश्यति' (बृ. ४-५-१५) इति द्वैतमात्रस्य तद्दर्शनस्य चाविद्यावस्थाप्रतिबद्धत्वेनैव ज्ञापनाच्छ्रुत्यन्तरे । **अथ तस्माद्भेददर्शनाद्धेतोः, अस्य भेददर्शिन आत्मनो भयं भवतीति** भयप्राप्त्युपपत्तिप्रदर्शनम्। **तस्मादात्मैवात्मनो भयकारणम्** इत्युपसंहारः पूर्ववत्। तस्मात् एकरसेऽपि ब्रह्मण्यविद्यया द्वितीयदर्शनाद्भयप्राप्त्युपपत्तेः, आत्मैव स्वरूपव्यतिरेकेण दृष्टं ब्रह्मैव, आत्मनः स्वस्याविदुषः, भयकारणम् इत्यर्थः । एतदर्थे वाक्यशेषाक्षराण्यनुकूलयन् तात्पर्यकथनपूर्वकम् उत्तरवाक्यमवतारयति — **तदेतदाह तद् ब्रह्म त्वेवेत्यादिना एकत्वेनामन्वानस्येत्यन्तेन** । यद्यपि ब्रह्मास्यात्मैव न चात्मन एवात्मनो भयं युक्तम्, तथाप्यविद्यावशात् प्रविभक्तत्वेन ब्रह्म पश्यतस्तदेव तु भयकारणं भवतीत्यर्थः। विदुष इत्यस्य व्याख्यानम् **ईश्वरोऽन्यो मत्तोऽहमन्यः संसारीत्येवंविदुषो भेददर्शिन इति ॥**

## १६८. ईश्वरस्य भयकारणत्वोपपत्तिः-

ननु कथमीश्वराख्यं ब्रह्म भयकारणम् ? न हीश्वरात्, श्रुतिविहितादीश्वरोपासनाद्वा, उपासकानां भयं शङ्क्यम् । ईश्वरस्यानीश्वरत्वप्रसङ्गात्, भयकारणविधात्र्याः श्रुतेः प्रामाण्योत्सादप्रसङ्गाच्चेति चेत्, **भेददृष्टम् ईश्वराख्यं तदेव**

**ब्रह्माल्पमप्यन्तरं कुर्वतो भयं भवत्येकत्वेनामन्वानस्य** इत्येवेहि । कथं त्वीश्वरमीश्वरत्वेन पश्यन् अविद्वानिति ? तत्र श्रृणु । **विद्वानप्यविद्वानेवासौ योऽयमेवमभिन्नमात्मतत्त्वं न पश्यति** । कथं पुनरीश्वरस्य दयालोरुपासनादि-फलदातुर्भयहेतुत्वं भवेदिति ? तत्रोत्तरम् उच्छेदहेतुदर्शनाद्धि **उच्छेद्याभिमतस्य भयं भवतीति** । अयं भावः । यद्यपीश्वरः कर्मोपासनादिफलहेतुः, तथापि तत्फलस्योच्छेदहेतुरपि स एव भवितुमर्हति । न हि परिमितकालोपभोग्य-फलदातुरीश्वरस्य सङ्कल्पमन्तरेण तत्फलं विनश्यति । तथा चाहं कालपरिच्छिन्न-कर्मादिफलवान् कालपरिच्छिन्नायुश्च । उच्छेद्यं कर्मादिफलम् , उच्छेद्यश्चाहम् — इत्यभिमन्यमानस्य ह्यवश्यम् उच्छेदहेतुरीश्वरो भयकारणत्वेनाभ्युपगन्तव्यः । तस्मादीश्वरत्वेन दृष्टं ब्रह्मापि भयहेतुरेवेति नानुपन्नमित्यास्तां तावत् ॥

**१६९. अस्ति ब्रह्म, भयसामान्यकारणत्वात्**

तदर्थं भेददर्शिनो भयहेतुत्वं ब्रह्मण उपपादितम्, तदिदानीं प्रदर्शयति — **अनुच्छेद्यो ह्युच्छेदहेतुरित्यादिना** । न तावन्मृत्व्यादिः स्वातन्त्र्येणोच्छेदहेतुः । स्वयमप्युच्छेद्यत्वात् । उच्छेद्यत्वं च तस्य भयदर्शनाल्लिङ्गादनुमीयते । उच्छेद्याभिमतस्य हि भयं भवतीति । अतः सर्वथा अनुच्छेद्यात्मकं सर्वोच्छेदकारणमस्ति मृत्व्यतिरिक्तमिति तावदभ्युपगन्तव्यम् । अन्यथा तस्याप्युच्छेद्यत्वे उच्छेदकपरम्पराया अविश्रान्तेरनवस्थादोषस्य दुर्निवारणत्वात् । अस्त्वेवमपि, ततः किमायास्यति-इत्याशङ्क्याह — **तत्रासत्युच्छेदहेतौ अनुच्छेद्ये, न तद्दर्शनकार्यं भयं युक्तम् । सर्वं च जगद् भयवद् दृश्यते । तस्माज्जगतो भयदर्शनाद् गम्यते नूनं तदस्ति भयकारणम् उच्छेदहेतुरनुच्छेद्यात्मकं यतो जगद्बिभेतीति** । एवं च विद्वदभयहेतुरस्ति किञ्चिदिति सामान्यतो दृष्टेनानुमानेन यथा अभयहेतुब्रह्मास्तित्वमवगम्यते, एवमविद्वद्भयहेतुब्रह्मास्तित्वमपीत्युक्तं भवति ॥२४॥

**तदप्येष श्लोको भवति ॥**

**(इति सप्तमोऽनुवाकः)**

**भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चम इति ॥२५॥**

## भयहेतुश्लोकभाष्यम्

६९. तत् एतस्मिन्नप्यर्थे एष श्लोको भवति। भीषा भयेन अस्मात्, वातः पवते । भीषा उदेति सूर्यः । भीषा अस्मात्, अग्निश्च इन्द्रश्च । मृत्युर्धावति पञ्चम इति । वातादयो हि महार्हाः स्वयम् ईश्वराः सन्तः पवनादिकार्येषु आयासबहुलेषु नियताः प्रवर्तन्ते । तद् युक्तं प्रशास्तरि सति अन्यस्मिन्[१] नियमेन तेषां प्रवर्तनम्। तस्मात्, अस्ति भयकारणं तेषां प्रशास्तृ ब्रह्म यतस्ते भृत्या इव राज्ञः अस्माद्[२] ब्रह्मणो भयेन प्रवर्तन्ते । तच्च भयकारणम् अनन्दं ब्रह्म ॥२५॥

१७०. श्लोकावतरणिका

भयाभयकारणत्वादस्ति ब्रह्मेत्युक्तम् । तत्राभयकारणत्वसंग्राहकस्य

---

१. 'यस्मात्' इति वा ॥ पाठोऽनपेक्षितोऽत्र ॥

२. 'यस्मात्', 'यच्च' इति विपरिवर्त्य मीमांसावाक्यावतरणिकात्वेन नीतमिदं वाक्यद्वयं कैश्चित् । तस्य तु पाठस्य साधुत्वासाधुत्वे ग्रन्थशोधकैरेव निर्णेये ॥

श्लोकस्य, उपनिषदन्त एवानन्दमीमांसानन्तरमुदाहर्तव्यत्वात्, भयकारणत्वसंग्राहक एव श्लोकस्तावदुदाह्रियत इति मत्वा व्याचष्टे — तदेतस्मिन्नप्यर्थे इति । अस्त्यनुच्छेद्यात्मकं ब्रह्म सर्वोच्छेदहेतुत्वेन भयकारणमित्येतस्मिन्नेवार्थे संनिहिततरत्वेन प्रकृते — इत्यर्थः । यथा सुकृतप्रसिद्धेर्ब्रह्मास्तित्वपरः श्लोकः, एवं भयकारणत्वाद् ब्रह्मास्तित्वपरोऽपि श्लोक इति 'अपि' शब्दार्थः ॥

१७१. श्लोकाभिप्रायवर्णनम्

**अस्मादिति** । प्रकृतात् अदृश्यत्वादिगुणकात् स्वात्मत्वेनाविदिताद्-ब्रह्मरूपादित्यर्थः । भयेनैव वातः पवते, सूर्य उदेत्यस्तमेति च नियमितकाले, अग्निश्चेन्द्रश्च स्वे स्वे कर्तव्ये दहनवर्षणादिलक्षणे नियतं व्याप्रियेति इति कथमिदं गम्यते ? तत्राह — **वातादयो हि महार्हा** इत्यादिना **नियमेन तेषां प्रवर्तन**मित्यन्तेन। यथा राजनि प्रशासितरि सत्येव भृत्यास्तद्भयेन स्वस्वकर्तव्येषु नियमेन प्रवर्तन्ते, एवं वातादयोऽपि महावीर्याः स्वतन्त्रा अपि कस्माच्चिदन्यस्मात् प्रशासितुर्भीता इव प्रवर्तन्ते । तदेतदन्यथानुपपद्यमानमवगमयति नूनं तदस्ति तेषां भयकारणमिति इत्यभिप्रायः । **तच्च भयकारणमानन्दं ब्रह्मेति**। तद्धि सर्वथाऽनुच्छेद्यम् इति भावः। रसलाभप्राणनादिचेष्टानुमितानन्दः स्वरूपत्वेन ज्ञातोऽभयकारणम्, तथाऽविज्ञातस्तु भयकारणमिति प्रकृतमिति स्मरणार्थम् 'आनन्दं ब्रह्म इति विशेषणम् । उत्तरार्धं च। आनन्दस्य हि मीमांसा आरभ्यतेऽनुपद-मेवेति ॥२५॥

**सैषानन्दस्य मीमाँसा भवति । युवा स्यात्साधु युवाध्यायकः । आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः। ते ये शतं मानुषा आनन्दाः । स एको मनुष्य-**

गन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहस्य। ते ये शतं मनुष्यगन्धर्वाणामानन्दाः। स एको देवगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवगन्धर्वाणामानन्दाः। स एकः पितृणां चिरलोकलोकानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं पितृणां चिरलोकलोकानामानन्दाः। स एक आजानजानां देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतमाजानजानां देवानामानन्दाः। स एकः कर्मदेवानां देवानामानन्दः। ये कर्मणा देवानपियन्ति। श्रोत्रियस्य चाकामहतस्य। ते ये शतं कर्मदेवानां देवानामनन्दाः। स एको देवानामनन्दः। श्रोत्रियस्य चाकामहतस्य ते ये शतं देवानामानन्दाः। स एक इन्द्रस्यानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतमिन्द्रस्यानन्दाः। स एको बृहस्पतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं बृहस्पतेरानन्दाः। स एकः प्रजापतेरानन्दः।

**श्रोत्रियस्य चाकामहतस्य । ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य ॥२६॥**

## ब्रह्मानन्दमीमांसावतरणिका

**७०. तस्यास्य ब्रह्मण आनन्दस्य सैषा[१] मीमांसा विचारणा भवति । किम् आनन्दस्य मीमांस्यमिति ? उच्यते । किमानन्दो विषयविषयिसंबन्धजनितो लौकिकानन्दवत्, आहोस्वित् स्वाभाविकः ? - इत्येवमेषा आनन्दस्य मीमांसा ॥**

### १७२. मीमांसाविषय

'आनन्दस्य' इति योऽयं पूर्वं 'यदेष आकाश आनन्दो न स्यात्' (२-७) इत्यत्र (२३) स्थितः, इदानीं च भयाभयहेतुत्वेन परामृष्टः, स एव ब्रह्मानन्द इह विवक्षित इत्यभिसंधिना व्याचष्टे – **तस्यास्य ब्रह्मण आनन्दस्येति** । मीमांसाविषयं प्रश्नपूर्वकमाविष्करोति — **किमानन्दस्य मीमांस्यमित्यादिना, एषा आनन्दस्य मीमांसेत्यन्तेन** । लौकिक आनन्द इन्द्रियतदर्थसंयोगजनित इति प्रसिद्धम् । तद्वदानन्दशब्दाभिधेयत्वेनायमप्यानन्दः किं तथैव स्यात् अथवा स्वाभाविकः — ब्रह्मणः स्वरूपभूत एव न किञ्चिन्निमित्तजन्यः ? — इति मीमांस्यत इत्यर्थः । उपलक्षणमेतत् । किमयं लौकिकानन्दवत् संवेद्यः, उत नेत्यपि द्रष्टव्यम् ॥

---

१. 'आनन्दस्य एषा' इत्येव मुद्रितपुस्तकेषु दृश्यते । मूलस्थः 'सा' इत्ययं शब्दो लेखकप्रमादेन त्रुटितः स्यादिति 'सैषा' इत्येव पाठो धृतोऽस्माभिः ॥

७१. तत्र लौकिक आनन्दो बाह्याध्यात्मिकसाधनसंपत्तिनिमित्त उत्कृष्टः स य एष निर्दिश्यते ब्रह्मानन्दानुगमार्थम् । अनेन हि प्रसिद्धेनानन्देन व्यावृत्तविषयबुद्धिगम्य आनन्दोऽनुगन्तुं शक्यते । लौकिकोऽप्यानन्दो ब्रह्मानन्दस्यैव मात्रा ; अविद्यया तिरस्क्रियमाणे विज्ञाने उत्कृष्यमाणायां चाविद्यायां ब्रह्मादिभिः कर्मवशाद् यथाविज्ञानं विषयादिसाधनसंबन्धवशाच्च विभाव्यमानश्च लोके अनवस्थितो लौकिकः संपद्यते । स एवाविद्याकामकर्मापकर्षेण मनुष्यगन्धर्वाद्युत्तरोत्तरभूमिषु अकामहतविद्वच्छ्रोत्रियप्रत्यक्षो विभाव्यते शतगुणोत्तरोत्तरोत्कर्षेण यावद् हिरण्यगर्भस्य ब्रह्मण आनन्द इति । निरस्ते त्वविद्याकृते विषयविषयिविभागे विद्यया, स्वाभाविकः परिपूर्ण एक आनन्दोऽद्वैतो भवतीत्येतमर्थं विभावयिष्यन् आह –॥

१७३. लौकिकानन्दविशेषैर्ब्रह्मानन्दानुगमः-

ब्रह्मानन्दमीमांसा चेत् प्रस्तुता किमनेन लौकिकानन्देन

व्यावर्णितेनेत्याशङ्क्याह — **तत्रैत्यादि** । तत्र ब्रह्मानन्दमीमांसायां प्रक्रान्तायां लौकिक आनन्दो बाह्याध्यात्मिकसाधनसंपत्तिनिमित्तः साधुयौवनाधीतवेदत्वाद्याध्यात्मिकसंपत्तिनिमित्तः, वित्तपूर्णसर्वपृथिव्यादिबाह्यसाधनसंपत्तिनिमित्तश्च य उत्कृष्टः सार्वभौमाद्यानन्दः, स एष निर्दिश्यते **ब्रह्मानन्दानुगमार्थम्** । अनुगमप्रकारश्च श्रुत्यैव प्रदर्शयिष्यतेऽनुपदमेवेत्यभिप्रायः । **यत्तु व्याख्यानम्** लौकिक आनन्दः क्वचित्काष्ठां प्राप्तः, सातिशयत्वात् परिमाणवदिति ब्रह्मानन्दानुमानार्थो लौकिकोपन्यास इत्यर्थः इति । तदसत् । अनुमितस्य ह्यानन्दस्य ध्रुवं परोक्षत्वं लौकिकानन्दापेक्षया परिमितत्वं चापद्येत । न चैतदिष्टम् । ब्रह्मानन्दस्य निरपेक्षस्वाभाविकानन्दत्वेनैवेह निर्दिदिक्षितत्वादिति । 'लौकिक आनन्दः क्वचित्काष्ठां प्राप्तः' इति प्रतिज्ञाया हिरण्यगर्भानन्दविषयत्वेनैव सावकाशत्वाच्च। वक्ष्यति हि 'स एको ब्रह्मण आनन्दः' इति । यत्तु **वार्तिकद्वयम्** 'निष्ठां सातिशयं यस्मात् स्वतोऽनतिशयात्मनि । गच्छदीक्षामहे यस्मादेवमानन्द ईक्ष्यताम् । येयं सातिशया सङ्ख्याऽसङ्ख्येयार्थावसायिनी । यथैवमस्मदानन्दः स्यात्परानन्दनिष्ठितः' (२-४९१, ४९२) इति, तत्तु नानुमानोपन्यासार्थम्, किं तर्हि, 'ब्रह्म पुच्छं प्रतिष्ठा' (२-५) इतिवाक्यभाष्यप्रदर्शितविधया अविद्याकल्पितद्वैतविषयकानन्दानां सर्वेषां निर्विशेषब्रह्मानन्दः प्रतिष्ठा — इति जिज्ञासुबुद्धिमारोपयितुम् । एतदेव हि प्रतिज्ञातं समनन्तरपूर्ववार्तिके 'उत्कृष्यमाणेनानेन ह्यस्मद्गोचरवर्तिना । असाधनमसाध्यं तमानन्दं व्याचचक्ष्महे' (२-४९०) इति । अतो बाह्याध्यात्मिकसाधननिमित्तलौकिकानन्दनिर्देशस्यास्य ब्रह्मानन्दानुगमार्थत्वमेव 'तत्सत्यमित्याचक्षते' (२-६), 'यदेष आकाश आनन्दो न स्यात्' (२-७) इत्यादिवाक्यानां ब्रह्मणः सत्यत्वानुगमार्थत्ववत् । दर्शयति हि पदेपदे श्रुतिः 'श्रोत्रियस्य चाकामहतस्य' इति ब्रह्मानन्दस्यानुगमम् । किञ्चायमनुमित्सितत्वेनाभिमतो ब्रह्मानन्दः सर्वथा अविषयः । अतोऽपि नात्रानुमानप्रवृत्तिः । अनुमित्सोरप्यात्मत्वात् । न चानुमानेनाप्ययमेवागमाऽर्थो भाष्योक्तो दृढीक्रियत इति प्रत्यवस्थातव्यम् । 'परिमाणवत्' इति दृष्टान्तोपादानात्। परिमाणस्यापि च पक्षसजातीयत्वात् । तस्माद्ब्रह्मानन्दानुगमार्थ एव लौकिकानन्दनिर्देशोऽयं नानुमानोपन्यासार्थ इत्यलं पल्लवितेन ॥

अनुगमप्रकारमेव विवृण्वन्नाह — **अनेन** हीत्यादिना **ब्रह्मण आनन्द** इत्यन्तेन। न ह्यत्राप्रस्तुतो ब्रह्मानन्दव्यतिरिक्तत्वेन लौकिकानन्दः प्रपञ्च्यते येन प्रस्तुतपरित्यागाप्रस्तुतप्रक्रिये आशङ्क्येयाताम्, किं तर्हि ब्रह्मानन्द एव वेषान्तरेण सर्वजनप्रत्यक्षः । तस्योत्कर्षापकर्षवत्त्वेन विभाव्यमानत्वं तूपाध्युत्कर्षापकर्षनिमित्तम्। स चोपाध्युत्कर्षादिरविद्याकृत इति विज्ञाते स्वाभाविक एवायं ब्रह्मानन्दो लौकिकेष्वप्यानन्दविशेषेष्वनुगत इत्यवगम्यते । **अन्यथा हि व्यावृत्तविषयबुद्धिगम्यः-व्यावृत्ताः** सर्वे बाह्यविषया यस्या विद्वद्बुद्धेः सकाशात्, तन्मात्रगम्यो ब्रह्मानन्दो नावगम्येत लौकिकैः — इत्यत उत्तरोत्तरमुत्कृष्यमाणलौकिकानन्दानुगतत्वेनैव तावत्स ब्रह्मानन्दो विभावयिष्यते । स एष ब्रह्मानन्दस्यानुगमो नाम । एतदर्थमेव चानन्दमयात्मनः पुरुषविधत्वोपवर्णनप्रस्तावे 'आनन्द आत्मा' इति श्रुत्या लौकिकं सुखसामान्यं तदात्मत्वेनोपदिष्टमिति भगवता भाष्यकारेण स्पष्टीकृतम् इत एवाकृष्य तदेतदाह —**लौकिकोऽप्यानन्द** इत्यादिना। ब्रह्मानन्दस्यैव मात्रा कला । तत्र ब्रह्मानन्दस्यैवाविद्यावशाल्लौकिकता तारतम्यं चेत्याह —**ब्रह्मादिभिः कर्मवशाद्यथाविज्ञानं विषयादि-साधनसंबन्धवशाच्च विभाव्यमानश्च लोकेऽनवस्थितो लौकिकः संपद्यत** इति । ब्रह्मादिषु स्थावरान्तेषु विभाव्यमानं सुखापकर्षतारतम्यम्, अविद्याकामोत्कर्षवशात् तत्तद्बाह्याध्यात्मिकसाधनसंबन्धापकर्षवशात्, अधर्मरूपकर्मोत्कर्षवशाच्चेत्यभिप्रायः। एतद्विपर्ययेण स एव लौकिकानन्दो ब्रह्मानन्दमात्राभूतः-अविद्याकामापकर्षतारतम्येनोत्कृष्यमाणो-दृश्यते तत्तसाधनोत्कर्षवशाच्च यावद्धिरण्यगर्भस्यानन्द इत्याह — **स एवेति** । अत्र **'अकामहतविद्वच्छ्रोत्रियप्रत्यक्षः'** इति लौकिक एवानन्दो निर्दिश्यते । असावेव ह्युत्तरोत्तरं शतगुणोत्कर्षं लभमानः पूर्वपूर्वस्मिन् विषयभोगे विरक्तेन प्रत्यक्षमनुभूयते इति वक्ष्यति। अतोऽकामहतप्रत्यक्ष इत्युक्तम् । 'विद्वत्प्रत्यक्षः' इति तूपासनातिशयबलादुत्तरोत्तरानन्दो विभाव्यत इत्युपदेशार्थम् । 'श्रोत्रियप्रत्यक्ष' इति च तत्तत्कर्मनिष्ठासंपत्त्यनुगुण आनन्दानुभव इति सूचनार्थम् । एवं च कर्मविद्याविशेषादकामहतत्वाच्च लोके विभाव्यमान आनन्दो ब्रह्मानन्दस्यैव मात्रेति

शक्यते ब्रह्मानन्द अनुगन्तुमित्यभिप्रायः । यत्वत्र **केचित्** विद्वत्पदं ब्रह्मसाक्षात्कारवत्परमिति । तदसत् । लौकिकानन्दोत्कर्षेण ब्रह्मानन्दानुगम-दर्शनप्रस्तावे ब्रह्मसाक्षात्कारस्यानवसरप्राप्तत्वात् । तस्मादुपासनाविशेषवत्परमेवेदं विद्वत्पदम् भाष्यकारैरेवमेव व्याख्यास्यमानत्वाच्चेति तथैव व्याख्यातमस्माभिः ॥

## १७४. ब्रह्मानन्दस्य साक्षादवाप्तिर्विद्यया -

तदेवं 'स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य ।' इत्येतावत्पर्यन्तग्रन्थस्य पिण्डितार्थमुक्त्वा 'स यश्चायम्' इति वाक्यस्यापि तमाह — **निरस्ते त्वविद्याकृत** — इत्यादिना **अद्वैतो भवतीत्यन्तेन** । य एवासौ लौकिकानन्द उत्कर्षापकर्षं भजत इवाविद्यया विभाव्यते, स एवायं विद्यया निरस्ते विषयविषयिविभागादिद्वैते स्वाभाविकब्रह्मानन्दत्वेनावगम्यत इत्यर्थः । यत्वत्र **केषाञ्चिद्व्याख्यानम्,** साधनसंपत्तिकृतविशेषोपहितस्वरूपानन्दो विषयः, तदनुभविता जीवो विषयी, तयोर्विभागो मूलाविद्याप्रयुक्तः । तस्मिन्नविद्याकृते ब्रह्मात्मैक्यविद्यया निरस्ते सति य आनन्दः समाधावभिव्यज्यते, स एव स्वाभाविकः परिपूर्ण एकरूपो ब्रह्मानन्द इत्यवगतो भवतीत्यर्थः — इति। तदनादेयम् । श्रुतिभाष्याक्षरबाह्यत्वात्, प्रकृतार्थविरुद्धत्वाच्च । न हि जीवतद्विषयानन्दविभागो मूलाविद्याकृत इति — स च मूलाविद्याकृतो विभागो विद्यया निरस्य इति वा, स्वाभाविकानन्दः समाधावभिव्यज्यत इति वा-इह वृत्तवर्तिष्यमाणग्रन्थभागे, तद्भाष्येऽन्यत्र वा प्रस्थानत्रयभाष्ये उपदिष्टमुपलभ्यते । तस्माच्छ्रुति-भाष्याक्षरबाह्यमेतद् व्याख्यानम्। प्रकृतार्थविरुद्धं चैतत् । प्रकृतं हि ब्रह्मानन्दस्य स्वाभाविकत्वोपवर्णनम् । स चेदानन्दः समाधौ कादाचित्क्यामेवावस्था-यामभिव्यज्येत, तर्हि ध्रुवं स्यादस्वाभाविकत्वं तस्येति। न च विद्योत्पत्तिरविद्यानिवृत्तिर्वा समाधावेवेति शक्यं कल्पयितुम् । अविद्याया जाग्रदवस्थामनुभूयमानाया अवस्थान्तरे समाधौ विनिवर्त्यत्वकल्पनानुपपत्तेः । किञ्चान्यत्, समाधौ चेद् विषयविषयिविभागनिरासो ब्रह्मानन्दानुभवश्च तर्हि नासावात्यन्तिको भवेत्, यतः प्रबोधे पूर्ववत्सविभागो भवत्येवेति, भक्षितेऽपि लशुने न व्याधिशान्तिरिति न्याय आपतेत् । तस्मात् सर्वथा हेयमेतद्व्याख्यानम् ।

भाष्याक्षरानुगुणं तु व्याख्यानमित्थं करणीयम् । लौकिकानन्दो बाह्याध्यात्मिकसंपत्तिनिमित्तत्वाद् ग्राह्यग्राहकरूपविषयेन्द्रियविभागमपेक्षते । स च विभागो जाग्रत्स्वप्नयोरेव विभाव्यते । सुषुप्तिसमाध्यादौ तु निरायासमेव स्वरूपानन्दो निर्विकल्पोऽनुभूयत इति सार्वजनीनमेतत् । तस्माद्विषयविषयिसंयोगेनानन्दानुभवो नात्मस्वभावः, किं त्वात्मानात्मनोरितरेतराध्यासरूपाविद्याकृत इति गम्यते । अध्यासभावे भावात्, तदभावेऽभावाच्च । तदेवं ब्रह्मानन्दः स्वाभाविकः साधकात्मरूप एव सन्नपि, अन्तःकरणनैर्मल्यविशेषादेव नूत्नतयाभिव्यक्त इवोत्कर्षापकर्षवानिव च विभाव्यते इति यदा विवेकेनात्मवस्तुस्वरूपनिर्धारणलक्षणया विद्यया निर्धार्यते, तदा अविद्याकृतविषयविषयिविभागो निरस्तो भवति, मिथ्यात्वेन निश्चितो भवति । आनन्दश्च स्वाभाविकः, आत्मनः स्वभाव एव नत्वागन्तुकः; परिपूर्णः, न तूत्कर्षापकर्षभाक्त्वेन परिमितः; एकः, न तु विविधप्राणिषु विविधत्वेन संवेद्यः; अद्वैतश्च, न तु सजातीयविजातीयस्वगतविभागसह इत्यनुभवारूढो भविष्यतीति । एतच्च सर्वम् उत्तरत्र भाष्य एव स्फुटीभविष्यतीत्यलमतिप्रपञ्चेन ॥

**७२. युवा प्रथमवयाः । साधु युवेति । साधुश्चासौ युवा चेति यूनो विशेषणम् । युवापि असाधुर्भवति, साधुरप्ययुवा । अतो विशेषणम् 'युवा स्यात् साधु युवा' इति । अध्यायकः अधीतवेदः । आशिष्टः, आशुतमः[१] । दृढिष्ठः दृढतमः । बलिष्ठः बलवत्तमः । एवम् आध्यात्मिकसाधनसंपन्नः । तस्येयं पृथिवी उर्वी सर्वा वित्तस्य वित्तेन उपभोगसाधनेन**

---

१. 'आशास्तृतमः' इत्येव आ ॥ वा ॥ पाठः ॥ क्षिप्रकार्यातिशायित्वादाशिष्ठोऽसौ इति वार्तिकमनुसृत्य 'आशुतमः' इति पाठ एव धृतः ॥

दृष्टार्थेन, अदृष्टार्थसाधनेन[१] च कर्मसाधनेन, संपन्ना पूर्णा स्यात्[२] । राजा पृथिवीपतिरित्यर्थः । तस्य च य आनन्दः स एको मानुषः मनुष्याणां प्रकृष्टः एक आनन्दः । ते ये शतं मानुषा आनन्दाः । स एको मनुष्यगन्धर्वाणामानन्दः । मानुषानन्दात् शतगुणोत्कृष्टो मनुष्यगन्धर्वाणामानन्दो भवति । मनुष्याः सन्तः कर्मविद्याविशेषाद् गन्धर्वत्वं प्राप्ता मनुष्यगन्धर्वाः । ते हि अन्तर्धानादिशक्तिसंपन्नाः सूक्ष्मकार्यकरणाः । तस्मात् प्रतिघाताल्पत्वं तेषाम् , द्वन्द्वप्रतिघातशक्तिसाधनसंपत्तिश्च । ततः अप्रतिहन्यमानस्य प्रतीकारवतो मनुष्यगन्धर्वस्य स्याच्चित्तप्रसादः । तत्प्रसादविशेषात् सुखविशेषाभिव्यक्तिः । एवं पूर्वस्याः पूर्वस्या भूमेरुत्तरस्यामुत्तरस्यां भूमौ प्रसादविशेषतः शतगुणेनानन्दोत्कर्ष उपपद्यते ।

**१७५. आनन्दोत्कर्षगणनार्थं मानुषानन्दस्यैकत्वेन ग्रहणम् -**

लौकिकानन्देन मानुषानन्दादारभ्य यावद्धिरण्यगर्भानन्दम् उत्तरोत्तरभूमिकासु

१. अदृष्टार्थेन इति वा ॥

२. मुद्रितपुस्तकेषु त्रुटितमिदं पदम् ॥

साधनसंपत्तिविशेषनिमित्ताच्छतगुणोत्कर्षवता, तत्र तत्राकामहतश्रोतित्रयप्रत्यक्षत्वेन विभाव्यमानेन ब्रह्मानन्द अनुगतो भवतीत्येतमर्थं विभावयिष्यन् भगवान्वेद आहेत्युक्तम् । तमेव विभावनप्रकारं प्रपञ्चयन् श्रुत्यक्षराणि व्याचष्टे – **'युवा प्रथमवया'** इत्यादिना । मानुषानन्दभाष्यं स्पष्टार्थम् । **एक आनन्द इति** । समग्रबाह्याध्यात्मिकसाधनसंपन्नस्य मनुष्यस्य यः प्रकृष्टो मानुषानन्दः स एक इत्युत्तरभूमिकागतानन्देयत्तागणनार्थं मूलमानत्वेन गृह्यत इत्यर्थः । एतदपेक्षया हि शतगुणेनोत्कृष्टो मनुष्यगन्धर्वानन्दः परिगण्यत इति ॥

**१७६. उत्तरोत्तरभूमिकास्वानन्दस्योत्कृष्टतरत्वे प्रयोजनम् -**

मनुष्यगन्धर्वाणां शतगुणोत्कर्षवत्त्वे तावदुपपत्तिमाह — **ते हीत्यादिना** । ये द्वन्द्वैः प्रतिहन्यन्ते तत्सहनशक्तितत्प्रतीकारपर्याप्तकर्मोपासनारूपसाधनरहिताश्च ते मनुष्याः परिमितानन्दवन्तः । मनुष्यगन्धर्वास्तु तदुभयसंपन्नत्वात् प्रसन्नतरचित्ता इति मानुषानन्दाच्छतगुणोत्तरानन्दभाज इति श्लिष्यत इत्यभिप्रायः । **'तस्मात्'** इत्यन्तर्धानादिशक्तिसंपन्नत्वात्, सूक्ष्मकार्यकरणवत्त्वाच्चेत्यर्थः । तदुभयं हि तेषां द्वन्द्वाप्रतिघाते तत्प्रतीकारवत्वे च हेतुरिति । ततश्च चित्तप्रसादः । एवं चित्तप्रसादस्योत्तरोत्तराभिवृद्धेरुत्तरोत्तरभूमिकामारूढानां देवगन्धर्वप्रभृतीनां पूर्वपूर्वभूमिकास्थितापेक्षया शतगुणोत्तरानन्दवत्त्वमवकल्पत इत्येतामुपपत्तिमतिदिशति — **एवमिति** ॥

**७३. प्रथमं त्वकामहताग्रहणं मनुष्यविषयभोगकामानभिहतस्य श्रोत्रियस्य मनुष्यानन्दात् शतगुणेनानन्दोत्कर्षो मनुष्यगन्धर्वेण तुल्यो वक्तव्य इत्येवमर्थम्। 'साधुयुवाध्यायकः' इति श्रोत्रियत्वावृजिनत्वे गृह्येते । ते ह्यविशिष्टे सर्वत्र । अकामहतत्वं तु**

**विषयोत्कर्षापकर्षतः सुखोत्कर्षापकर्षाय विशेष्यते । अतोऽकामहतग्रहणं तद्विशेषतः शतगुणसुखोत्कर्षोपलब्धेरकामहतत्वस्य परमानन्दप्राप्तिसाधनत्वविधानार्थम् ॥**

**१७७. अकामहतत्वं परमानन्दप्राप्तिसाधनम् -**

ननु 'श्रोत्रियस्य चाकामहतस्य' इत्येतद् द्वितीयपर्यायप्रभृत्येव श्रूयते, न प्रथमत एव । तत्र किं नु कारणमिति पृच्छायामाह — **प्रथमं त्विति** । साधुयुवाध्यायकसार्वभौमानन्दे विरक्तस्यैव श्रोत्रियस्य मनुष्यगन्धर्वतुल्यानन्दोत्कर्षानुभव इति विवक्षया प्रथममकामहतग्रहणं न कृतमित्यर्थः । श्रोत्रियस्य चाकामहतस्य मनुष्यगन्धर्वानन्द इति ब्रुवाणया श्रुत्या तावदुक्तं भवति यावदुक्तं भवति यथोक्तसार्वभौमानन्दभोगे यस्य श्रोत्रियस्य कामोऽस्ति तस्य तत्तुल्यानन्दो भवत्येव, यस्तु श्रोत्रियस्तादृशमानुषानन्दोपभोगकामेन नोपहन्यते तेन मनुष्यत्वकोटिमतीतेन मनुष्यगन्धर्वतुल्यानन्दः प्रत्यक्षमुपलभ्यत इतीत्यभिप्रायः । तर्हि केवलश्रोत्रियग्रहणमपि किं न कृतं प्रथमपर्याये इत्याशङ्क्य कृतमेव तच्छब्दान्तरेणेत्याह — **साधुयुवाध्यायक इति श्रोत्रियत्वावृजिनत्वे गृह्येते इति** । 'साधुयुवा' इत्यनेनावृजिनः साधुकारी गृह्यते, 'अध्यायकः' इत्यनेन च श्रोत्रिय इति भावः । ते हि श्रोत्रियत्वावृजिनत्वे **अविशिष्टे सर्वत्र** पर्यायेषु । श्रोत्रियग्रहणस्योपलक्षणार्थत्वात् । न हि तत्र श्रोत्रियः शास्त्रोक्तकारी न त्वसाववृजिनोऽपाप इति शक्यं कल्पयितुम् । निषिद्धसेविनः शतगुणोत्तरानन्दभाक्त्वासंभवात् । 'यश्च श्रोत्रियोऽवृजिनोऽकामहतः' (बृ. ४-३-३३) इत्यवृजिनस्यापि श्रुत्यन्तरे स्वशब्देनोपात्तत्वाच्चेत्यभिप्रायः । तर्ह्यकामहतत्वमपि तथैव किं न स्यादित्याशङ्क्य तत्र विशेषमाह — **अकामहतत्वं तु विषयोत्कर्षापकर्षत** इत्यादिना । मनुष्यगन्धर्वानन्दकामिनः श्रोत्रियस्य कामविषयस्योत्कर्षात्सुखोत्कर्षः, तदपेक्षया मानुषानन्दमात्रकामिनस्तु कामविषयस्यापकर्षात्सुखापकर्ष इत्येतज्ज्ञापनार्थम् अकामहतस्येति

मनुष्यगन्धर्वानन्दभाग्विशेष्यत इत्यर्थः । एवं चाकामहतत्वग्रहणमत्रोत्तरोत्तरानन्दस्योत्कृष्टतरत्वे प्रयोजकं दर्शयत् सर्वथा कामप्रमोके सति ब्रह्मस्वरूपपरमानन्दप्राप्तिर्भवतीति सूचनेन तदर्थमिहामुत्रफलभोगविरागसाधनविधानार्थमपि भवति । 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥' (का. २-३-१४) इति श्रुतेः। 'प्रजहाति यदा कामान्सर्वान् पार्थ मनोगतान् । आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥' (२-५४) इति स्मृतेश्चेत्यभिप्रेत्याह — **'अतोऽकामहतग्रहणम्'** इत्यादि **परमानन्दप्राप्तिसाधनविधानार्थमित्यन्तम्** ॥

**७४. व्याख्यातमन्यत् । देवगन्धर्वा जातित एव । चिरलोकलोकानाम् इति पितृणां विशेषणम् । चिरकालस्थायी लोको एषां पितृणां ते चिरलोकलोका इति । आजान इति देवलोकः । तस्मिन् आजाने जाता आजानजा देवाः, स्मार्तकर्मविशेषतो देवस्थानेषु जाताः । कर्मदेवाः ये वैदिकेन कर्मणा अग्निहोत्रादिना केवलेन देवानपियन्ति। देवा इति त्रयस्त्रिंशद्धविर्भुजः । इन्द्रस्तेषां स्वामी । तस्याचार्यो बृहस्पतिः ॥ प्रजापतिः, विराट् त्रैलोक्यशरीरः। ब्रह्मा, समष्टिव्यष्टिरूपः संसारमण्डलव्यापी । यत्रैते आनन्दभेदा एकतां गच्छन्ति, धर्मश्च तन्निमित्तः, ज्ञानं च तद्विषयम्, अकामहतत्वं च निरतिशयं यत्र, स एष**

**हिरण्यगर्भो ब्रह्मा । तस्यैष आनन्दः श्रोत्रियेण, अवृजिनेन, अकामहतेन च सर्वतः प्रत्यक्षम् उपलभ्यते । तस्मात्, एतानि त्रीणि साधनानि इत्यवगम्यते। तत्र श्रोत्रियत्वावृजिनत्वे नियते, अकामहतात्वं तूत्कृष्यते इति प्रकृष्टसाधनता अवगम्यते ॥२६॥**

### १७८. आनन्दोत्कर्षकाष्ठा

'ते ये शतं मनुष्यगन्धर्वाणामानन्दाः' इत्याद्या प्रजापत्यानन्दमानन्दोत्कर्षक-वाक्यजातं द्वितीयपर्यायभाष्येणैव व्याख्यातप्रायम् इत्याह — **व्याख्यातमन्यदिति।** भाष्यपदानि तु कानिचिद्व्याख्यास्यामः । वाक्यार्थस्य सुस्पष्टत्वात् । देवागन्धर्वा जातित एवेति कल्पादावेव गन्धर्वा जाता इत्यर्थः, न तु मनुष्यगन्धर्ववत् कल्पमध्ये साधनबलाद्गन्धर्वतां प्रतिपन्नाः । चिरकालस्थायी यावत्कर्मफलक्षयं स्थिर इत्यर्थः। स्मार्तकर्मविशेषतः वापीकूपतटाकादिनिर्माणरूपकर्मतः । वैदिकेन केवलेनेति विद्यासमुच्चयरहितेनेत्यर्थः । समुच्चयस्य ब्रह्मलोकप्राप्त्यर्थत्वात् । देवानपियन्ति देवसायुज्यं गच्छन्तीत्यर्थः । त्रयस्त्रिंशद्धविर्भुज इति । अष्टौ वसवः, एकादश रुद्राः, द्वादशादित्याः, इन्द्रः, प्रजापतिश्चेति त्रयस्त्रिंशत् । तत्रेन्द्रप्रजापत्योः पृथक्संकीर्तनात् तदप्यतः कर्मसाधनविशेषस्य प्रकर्षतारतम्यमपेक्षत इति गम्यते ॥

अथ व्याकृतजगत्युपलभ्यमानस्यानन्दोत्कर्षस्य परां काष्ठां दर्शयितुमाह श्रुतिः 'ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण आनन्दः' इति । तदेतद्व्याचष्टे — **ब्रह्मा समष्टिव्यष्टिरूपः संसारमण्डलव्यापीति** । 'वायुः' 'सूत्रं' 'सत्यं' 'हिरण्यगर्भः' इति पर्यायशब्दा यस्य वाचकाः स ब्रह्मात्र विवक्षितः । स च ब्रह्मा अध्यात्माधिभूताधिदैवतविभागेन सर्वं संसारमण्डलं ब्रह्माण्डं व्याप्य स्थित इति विविधा या अष्टिर्व्याप्तिः सा तस्यैव । तथा केवलेन सूत्रात्मना या समष्टिः संव्याप्तिः,

अपि तस्यैवेति समष्टिव्यष्टिरूपो ब्रह्मा । तममुमेव 'ब्रह्म ज्येष्ठमुपासते' (२-६) देवा तदात्मभूताः सन्त इत्युक्तं विज्ञानमयश्लोके । तस्यास्य ब्रह्मण आनन्दः प्रजापतेरपेक्षया शतगुणोत्कर्षवान् । न च ततः परमानन्दोत्कर्षोऽस्त्युपलभ्यमानो व्याकृते जगति । किञ्च, **यत्रैते आनन्दभेदा एकतां गच्छन्ति ।** मानुषानन्दाद्यास्तस्यैव व्यष्टित्वात्तत्रान्तर्गता भवन्ति । **धर्मश्च** तदानन्दनिमित्तो निरतिशयः, ज्ञानं च तद्विषयकम्, अकामहतत्वं च तदर्वागानन्दविशेषेषु सुविरक्तत्वरूपं **निरतिशयं यत्र, स एष हिरण्यगर्भो ब्रह्मा** विवक्षितोऽत्र । 'ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः। ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयम् ॥' (?) इति स्मृतेरित्यर्थः । तदेवं सर्वोत्कृष्टमानन्दं परोक्षत उपदिश्य ब्रह्मानन्दानुगमार्थं तदध्यक्षयति श्रुतिः — श्रोत्रियस्य चाकामहतस्येति । तद्व्याचष्टे — **तस्यैष आनन्दः श्रोत्रियेणावृजिनेनाकामहतेन च सर्वतः प्रत्यक्षमुपलभ्यत इति।** एवं श्रोत्रियस्यावृजिनस्य, सर्वतः हिरण्यगर्भापेक्षया निकृष्टे भोगे सर्वत्र विरक्तत्वेनाकमाहतस्य हैरण्यगर्भ आनन्दः सर्वातिशायी प्रत्यक्षमनुभूयते यस्मात्, **तस्मादेतानि त्रीणि** श्रोत्रियत्वावृजिनत्वाकामहतत्वाख्यानि परमानन्दप्राप्ति-साधनानीत्यवगम्यते ˙ प्रतिपर्यायं तदुल्लेखाभ्यासादिति भावः । तत्र त्रिषु मध्ये अकामहतत्वस्य विशेषमाह — **तत्रेत्यादिना** ॥

### १७९. आनन्दोत्कर्षश्रुतेरर्वाचीनवेदान्तिव्याख्यानं तद्दूषणं च -

अत्र 'स एको ब्रह्मण आनन्दः' इति परस्यैव ब्रह्मणो ब्रह्मविदाप्नोति परम्- इति प्रकृतस्यानन्दो विवक्षित इतीच्छन्ति केचित् । 'श्रोत्रियस्य चाकामहतस्य' — इति मुक्तस्यापि स आनन्दोऽस्तीत्वेवंपरं वाक्यमिति च । तदसत् । 'ते ये शतम्' इति परिगणितस्य परब्रह्मानन्दत्वानुपपत्तेः । न च 'इषुवद्गच्छति सविता' इतीषुसाम्यप्रतिपादकवचनस्य मान्द्यनिवृत्तिपरत्ववत्, 'ते ये शतम्' इति प्रजापत्यानन्दापेक्षया आधिक्यमात्रविवक्षणाददोष इति शङ्क्यम् । 'ते ये शतम्' इयस्य प्रतिपर्यायमभ्यस्तस्य चरमपर्याय एव गौणार्थतास्वीकारे ग्रन्थशैलीप्रक्रमभङ्गापत्तेः । अथ ब्रह्मोपासनाया ब्रह्मविदाप्नोतीति प्रक्रान्ताया अत्रानिर्देशे प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गात् तत्परिहारार्थं प्रक्रमभङ्गः सोढव्यः,

ब्रह्मानन्दस्योपासना फलत्वेनोपसंहारलाभं च दृष्ट्वा — इति मन्यसे, एवमपि ब्रह्मानन्दस्यैतदपेक्षया आधिक्यकथनेनैवेयत्ताप्रसञ्जनं दुर्वारं स्यात्तव । तथा च 'यतो वाचो निवर्तन्ते' इति श्रुतिरुपरुध्येतेति लशुनभक्षणन्यायग्रस्तो भवेः । 'श्रोत्रियस्य चाकामहतस्य' इत्यत्र च मुक्तग्रहणे प्राजापत्यपर्यन्तानामानन्दानां मुक्तश्रोत्रियस्यापि सत्त्वकथनमागममात्रगम्यमनुभवासिद्धमुक्तं स्यादिति श्रोत्रियस्य चाकामहतस्येत्य-सकृदभ्यासो व्यर्थप्रयास एव पर्यवस्येदित्यलं श्रुतिबाह्यकल्पनाव्यसनेन ॥

## १८०. आनन्दतारतम्यश्रुतेर्व्याख्यानान्तरं तन्निरासश्च -

अपरेऽपि नवीनप्रक्रियाकल्पनाव्यसनिनः पश्यन्ति । 'अथ सोऽभयं गतो भवति' (२-७) इति मुक्तिप्रस्तावात् 'सैषानन्दस्य मीमांसा' इति मुक्तानन्दो मीमांस्यते। 'श्रोत्रियस्य चाकामहतस्य' इति सर्वत्र विशेषणाच्च । न ह्यमुक्तस्य अकामहतत्वं मुख्यं भवति, न च मुख्यश्रोत्रियता । 'यस्य श्रुतिफलं पूर्णं स श्रोत्रिय उदाहृतः । स हि मुक्तोऽकामहतः स हि कामैर्न हन्यते । यस्य कामास्तु सत्याः स्युः स हि कामैर्न हन्यते ॥' — इत्यादि । तदिदं सर्वथा विसंगतं निष्प्रयोजनं चेति नः प्रतिभाति । कस्मात् ? यदा ह्येवैष एतस्मिन्नदृश्यत्वादिगुणकेऽभयं प्रतिष्ठां विन्दते 'अथ सोऽभयं गतो भवति' इति वाक्यं तावत् यदा हरौ अभयत्वेन ज्ञानेन तिष्ठति, तदा हरिं गच्छेत्' इति व्याख्यातं भवद्भिः । भयार्थसंग्राहकश्लोकार्थश्च वाय्वादयो देवा विद्वांसोऽपि भीताः विष्णोः प्रीत्यर्थं स्वकर्म कुर्वन्तीति विवृतः । अथास्मिन् समनन्तरवाक्ये तु 'सैषानन्दस्य मीमांसा भवति' इत्यत्र मुक्तानन्दो मीमांस्यत इत्युच्यत इति किं केन संगतम् ? पूर्वत्र हि भयाभयप्राप्तिविवेकः प्रकान्तः, इदानीं तु सैषा मीमांसा इत्यानन्दं तच्छब्देन परामृश्य मीमांस्यत इति कथं न जरद्गवादिवाक्योपमता? किञ्च 'ब्रह्मविदाप्नोति परम्' इति ब्राह्मणवाक्यव्याख्यानमन्त्रस्थस्य 'सोऽश्नुते सर्वान् कामान् सह । ब्रह्मणा विपश्चिता' इति वाक्यस्यार्थः, 'स्वयोग्यं ब्रह्मविद्भुङ्क्ते विरिञ्चेन परेण च । ब्रह्मणा सह तद्वश्यः सुखमेव न दुष्कृतम् ॥' इति विना प्रमाणं संकोचितः। न हि विरिञ्चेन परेण ब्रह्मणा च सह तद्वश्येन सुखप्राप्तिः परप्राप्तिरिति मन्त्राक्षरैर्गम्यते। तत्रैवं कृतं स्वव्याख्यानं परिरक्षितुकामैरिदानीम् 'आनन्दस्य मीमांसा' इति सामान्येन प्रस्तुतापि मुक्तानन्दमीमांसात्वेन विपरिणम्यते । परम् एवमपि न दोषान्निस्तारोऽस्ति।

न हि परप्राप्त्युपपादनस्य मुक्तानन्दतारतम्यविवरणं कथमप्युपकाराकम् इत्येवमपि विसंगतैव मीमांसा । न च 'तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्' इत्यैहिकभोगसामग्रीपूर्णस्य श्रुतः 'स एको मानुष आनन्दः' इति मुक्तचक्रवर्तेरानन्द इति संगतं वचः । न च 'श्रुतिफलं पूर्णं यस्य स श्रोत्रियः' इति व्युत्पत्तिर्वैयाकरणसंमता श्रुत्यनुगृहीता वा । नापि 'यस्य कामास्तु सत्याः स्युः स हि कामैर्न हन्यते' इति व्याप्तिरस्ति । 'यस्य कामाः सत्याः स ध्रवं फलमश्नुते' इति स्यात्, न तु 'यस्य कामाः सन्ति स कामानुपहत' इति, स 'मुख्यवृत्तेन मुक्तशब्दवाच्य' इति वा विप्रतिषिद्धं शक्यं प्रतिज्ञातुम्। श्रुत्यन्तरं तु 'अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति' (बृ. ४-४-६) इति सर्वथाप्यकामस्यैव ब्रह्माप्ययमुक्तिमाहेत्येवमपि विसंगतमिदं कल्पनमित्यलं श्रुतियुक्तिबहिष्कृतपूर्वापरासंगतप्रक्रियायाः परीक्षणेनेत्युपरम्यते ॥

**स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः ॥२७॥**

## आनन्दमीमांसाफलम्

**७५. तस्य अकामहतत्वप्रकर्षतश्चोपलभ्यमानः श्रोत्रियप्रत्यक्षो ब्रह्मण आनन्दः, यस्य परमानन्दस्य मात्रा एकदेशः 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ. ४-३-३२) इति श्रुत्यन्तरात् । स एष आनन्दः, यस्य मात्राः[१] समुद्राम्भस इव विप्रुषः प्रविभक्ताः यत्रैकतां गताः, स एष**

---

१. 'मात्रा' इत्येव मुद्रित पुस्तकेषु ।

# परमानन्दः स्वाभाविकः। अद्वैतत्वात् । आनन्दानन्दिनोश्च अविभागोऽत्र ॥

## १८१. स्वाभाविकब्रह्मानन्दवाक्यव्याख्यानार्थमवतरणिका -

हिरण्यगर्भानन्दपर्यन्तं सातिशयानन्दस्योत्तरोत्तरमकामहतत्वोत्कर्षहैतुकीं परिमाणतः परां काष्ठां प्रदर्श्य, यस्यानुभवारूढत्वापादनायायमानन्दोत्कर्षप्रपञ्चः कृतस्तमर्थात् सिद्धं निरपेक्षं परमानन्दं स्वरूपतो निर्दिदिक्षु शास्त्रं प्रववृते — 'स यश्चायम्' — इत्याद्यम् । तदेतदवतारयन्नाह — **तस्येत्यादिना** । तस्य हिरण्यगर्भस्य आनन्दः श्रोत्रियप्रत्यक्षत्वेन निर्दिष्टः यस्य मात्रा, **स एष परमानन्दः** स्वाभाविक इति योजना । तस्यैव परमानन्दस्य विशेषणान्तरमिति ज्ञापनार्थं स एष आनन्द इत्यनुकर्षणम् । यत्रानन्दे व्यावहारिका आनन्दविशेषाः समुद्राम्भस इव विप्रुषोऽविद्यया प्रविभक्ता मात्रा इव सन्तो विद्यया एकतां गच्छन्तीवेत्यर्थः । 'समुद्राम्भस इव विप्रुषः' इत्युपमादानं तु न पारमार्थिकांशत्वकल्पनार्थम्, किं तर्ह्येकत्वप्रत्ययार्थम् । यथा विप्रुषो जलकणाः समुद्राद्विक्षिप्ताः समुद्रजलेनैकत्वप्रत्ययार्हाः । तेषां जलत्वाविशेषात्, पुनः समुद्रजलं संविशतां तदविशेषापत्तेश्च । एवमविद्याप्रत्युपस्थापितोपाधियोगात् सार्वभौमाद्यानन्दमात्रा विषयेन्द्रियसंयोगकाले परमानन्दाद्विभक्ता इव, परस्परं पृथक्तां गता इव, उत्कर्षापकर्षभावं गता इव चावभासमाना अपि, विद्यया प्रविलापित्वेष्वविद्याकृतोपाधिष्वेकतामविशेषतामापद्यन्त इव चेति तेनैकत्वप्रत्ययार्हा इत्यभिप्रायः । एतेन 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ. ४-३-३२) इति श्रुत्युदाहरणमपि व्याख्यातं वेदितव्यम् । भूतानां तैरुपजीव्यानन्दमात्राणां चाविद्याप्रत्युपस्थापितोपाधिप्रविभागमात्रहेतुत्वाद् वास्तविकमात्रात्वमविवक्षितमिति। अत एव हि **स्मृतिः** 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' (गी. १३-१६) इति । तदेतदाह — **स एष परमानन्दः स्वाभाविकः । अद्वैतत्वात्। आनन्दानन्दिनोश्चाविभागोऽत्रेति** । अत्रानन्दस्य परमत्वमुक्तं न स्वेतरानन्दापेक्षया अधिकपरिमाणत्वमभिप्रेत्य, अपि त्विन्द्रियविषय-

संयोगजनितत्वेन विभाव्यमानानामाविद्यकविषयानन्दानां परमार्थस्वभाव-विजिज्ञापयिषया, आविद्यकात्मनां परमार्थस्वरूपनिर्दिदिक्षया 'परमात्मा' इति यद्वदिति मत्वा आह — **स्वाभाविक** इति। 'अद्वैतत्वात्' इति तु मध्यमणिन्यायेन स्वाभाविकत्वे आनन्दानन्दिनोरविभागे च हेतुसमर्पकमिति ज्ञेयम् ॥

परमानन्दनिर्देशः —

**७६. तदेतन्मीमांसाफलमुपसंह्रियते - 'स यश्चायं पुरुषे' इति । यो गुहायां निहितः परमे व्योम्नि आकाशादि कार्यं सृष्ट्वा अन्नमयान्तं तदेवानुप्रविष्टः, स 'यः' इति निर्दिश्यते[१]। कोऽसौ ? अयं पुरुषे । यश्चासावादित्ये । यः परमानन्दः श्रोत्रियप्रत्यक्षो निर्दिष्टः, यस्यैकदेशं ब्रह्मादीनि भूतानि सुखार्हाण्युपजीवन्ति स यश्चासावादित्ये इति निर्दिश्यते । स एकः । भिन्नप्रदेशस्थघटाकाशाकाशैकत्ववत्। ननु तन्निर्देशे 'स यश्चायं पुरुषे' इत्यविशेषतोऽध्यात्मं न युक्तो निर्देशः । 'यश्चायं दक्षिणेऽक्षन्' इति तु युक्तः । प्रसिद्धत्वात् । न पराधिकारात्। परो ह्यात्मा अत्राधिकृतः 'अदृश्येऽनात्म्ये' (२-७), 'भीषास्माद्वातः**

---

१. निश्चीयते इति वा ॥

पवते' (२-८), 'सैषानन्दस्य मीमांसा' (२-८) इति । न हि अकस्मात् अप्रकृतो युक्तो निर्देष्टुम् । परमात्मविज्ञानं च विवक्षितम् । तस्मात् पर एव निर्दिश्यते 'स एकः' इति । नन्वानन्दस्य मीमांसा प्रकृता। तस्या अपि फलम् उपसंहर्तव्यम् । अभिन्नः स्वाभाविक आनन्दः परमात्मैव, न विषयविषयि-संबन्धजनित इति । ननु तदनुरूप एवायं निर्देशः 'स यश्चायं पुरुषे, यश्चासावादित्ये, स एकः' इति भिन्नाधिकरणस्थविशेषोपमर्देन । नन्वेवमपि आदित्यविशेषग्रहणम् अनर्थकम् । नानर्थकम्[१]। उत्कर्षापकर्षापोहार्थत्वात् । द्वैतस्य हि मूर्तामूर्तलक्षणस्य पर उत्कर्ष सवित्रभ्यन्तर्गतः । स चेत् पुरुषगत-विशेषोपमर्देन परमानन्दमपेक्ष्य समो भवति, न कश्चिदुत्कर्षोऽपकर्षो वा तां गतिं गतस्य-इति 'अभयं प्रतिष्ठां विन्दते' इत्युपपन्नम् ॥२७॥

**१८२. उत्तरवाक्यसंबन्धः —**

आनन्दोत्कर्षपरम्पराग्रन्थस्य स्वाभाविकपरमानन्दानुगमार्थतां दर्शयित्वा

---

१. इदं वाक्यं त्रुटितम् आ ॥

सर्पादिविकल्पानां रज्ज्वाद्यास्पदत्ववदाविद्यकानां व्यावहारिकानन्दविशेषाणां विकल्पानां यदास्पदं, स एव ब्रह्मानन्दोऽत्र सर्वत्रानुगत इत्युपपादितम् । तदिदं नास्मदभ्यूहमात्रम्, किं तु समनन्तरवाक्यगम्यमपीति तद्वचनमवतारयति — **तदेतन्मीमांसाफलमुपसंह्रियते, स यश्चायं पुरुष इतीति ।** यदेतदुपदर्शितमस्माभिः, हिरण्यगर्भानन्दान्ता लौकिकानन्दविशेषा यत्रैकतां गच्छन्ति स एष परमानन्दोऽत्रानुगन्तव्य इति, तदेतत् 'सैषानन्दस्य मीमांसा भवति' — इत्यारभ्य 'श्रोत्रियस्य चाकामहतस्य' इत्येतत्पर्यन्तं प्रवर्तिताया मीमांसायाः फलस्योपसंहाररूपेण श्रुत्यपि शिष्यत इत्यर्थः । यद्यपि 'युवा स्यात्' इत्यादिवाक्येषु न प्रत्यक्षत आनन्दो मीमांसित उपलभ्यते, मनुष्यगन्धर्वाद्यानन्द-विशेषाणामुत्तरोत्तरोत्कर्षप्रपञ्चमात्रस्यैव दर्शनात्तत्र, तथापि दतेतत्प्रपञ्चनं मीमांसात्वेनैव प्रतिज्ञातमिति सोऽयमानन्दोत्कर्षप्रपञ्चो यथोक्तमीमांसागर्भितत्वेनैव विवक्षित इति गम्यते । 'रसो वै सः । रसं ह्येवायं लब्ध्वानन्दी भवति' इत्यादिना ब्रह्मस्वरूपस्य निरुपाधिकानन्दत्वप्रदर्शनार्थमेव प्रवृत्तत्वाद्वाक्यसंदर्भस्य । लौकिकानन्दविशेषोदाहरणं तु तेनैव ब्रह्मानन्दस्यानुगमार्थमित्युक्तम् । तस्मात्साधूच्यते आनन्दमीमांसाफलमत्रोपसंह्रियत इति ॥

## १८३. स यश्चायमित्यादिवाक्यार्थः —

किमिदं फलमुपसंह्रियमाणमित्येतत्प्रदर्शनार्थं पदार्थस्फुटीकरणं तावदारभते — **यो गुहायामित्यादिना । भिन्नप्रदेशस्थघटाकाशाकाशैकत्ववदित्यन्तेन।** यः परमात्मा सत्यज्ञानानन्तलक्षणो गुहानिहितत्वेन मन्त्रोपदिष्टः, यश्च 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति ब्राह्मणेन व्याख्यातः, स एवाकाशादिकार्यधर्मविलक्षणो 'स यश्चायं पुरुषे' इति निर्दिश्यते । यश्चासौ 'स एको मानुष आनन्दः' इत्यारभ्य शतगुणोत्तरोत्तरोत्कर्षेण दर्शितस्य लौकिकानन्दस्य परमास्पदत्वेनोपलिलक्षयिषितः, 'स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य' इति वाक्योपदर्शितादित्यान्तर्गतहिरण्यगर्भानन्दवाक्येन, स एव मनुष्यगन्धर्वादिहिरण्यगर्भान्तोपाधिधर्मविलक्षणोऽदृश्यत्वादिधर्मको 'यश्चासावादित्ये' इति निर्दिश्यत इत्यर्थः । अत एवात्रादित्यपुरुषस्याविवक्षितत्वं

द्योतयितुं विशिनष्ट्याचार्यः, **'यः परमानन्दः श्रोत्रियप्रत्यक्षो निर्दिष्टः, यस्यैकदेशं ब्रह्मादीनि भूतानि सुखार्हाण्युपजीवन्ति'** इति। श्रोत्रियप्रत्यक्षत्वेन निर्दिष्ट आदित्यपुरुषानन्दः परमार्थतः परमानन्द एवेत्यभिप्रायेण। 'अथ स एकः' इत्येतद्व्याकुर्वन् वाक्यार्थमाह — **स एक इत्यादिना** । एवं चाविवक्षितसर्वोपाधित्वात् पुरुषस्थादित्यस्थपरमात्मनः स्वेनैव रूपेण सत्यज्ञानानन्तलक्षणेनैकत्वं वाक्यार्थः **'स एकः'** इत्यनेनोच्यते । **भिन्नप्रदेशस्थघटाकाशाकाशैकत्ववत्** । भिन्नदेशस्थभिन्नस्वभावघटाभ्यामुपहितत्वाद् भिन्नत्वेन भिन्नस्वभावत्वेन चाभासमानस्याकाशस्यैकत्वं यथा ज्ञाप्यते 'एतस्मिन् घटे य आकाशः, यश्चामुष्मिन्, स एक एवाकाशः' इत्यनेन वाक्येन, एवमेवेहापि 'स यश्चायं पुरुषे यश्चासावादित्ये' स एक एवानन्दस्वरूपः परमात्मा इत्यात्मैकत्वं ज्ञाप्यत इत्यभिप्रायः । अत्राकाशदृष्टान्तेनेदमपि दर्शितं भवत्याचार्येण यदत्र 'पुरुषे' 'आदित्ये' इति च पुरुषादित्ययोराधेयभावेनावस्थितिस्तत्परिच्छिन्नत्वं वा ब्रह्मणो न विवक्ष्यते श्रुत्या । न हि निरवयवस्यासंसर्गिण आकाशस्यापि घटशरीरादिष्वाधेयभावेनावस्थितिस्तदवच्छिन्नत्वं वा अवकल्पते, किमुताकाशादिसर्वकारणस्य ब्रह्मण इति । तस्मात् 'स यश्चायं पुरुषे' इत्यादिना न शरीरादावधिकरणे स्थितिरुच्यते, येन तत्परिच्छिन्नत्वमपि शङ्क्येत, किं तर्हि, तदूव्यतिरिक्तत्वमेव 'पाषाणेषु वृक्षः' इति यद्वत् । 'तदेवानुप्राविशत्' इति तु तत्र विशेषरूपेणोपलभ्यत्वमभिप्रेत्येत्यवोचाम। एतदेवाभिप्रेत्य **वार्तिककारा** अप्याहुः — 'आधेयार्थप्रधानेयं सप्तमी पुरुषात्परा। योऽयमित्यादिना यद्वच्छ्रुतिरेवं प्रवादिनी[१]॥' (तै.वा. २-५२७) इति । पुरुषशब्दात्परा सप्तमीविभक्तिरियम् आधेयात्मप्रधानैव, न तु शरीरमाधारत्वेनापि विवक्षिति । आधारार्थत्वनिराकरणेन केवलाधेयपरता तु सप्तम्याः 'योऽयं विज्ञानमयः प्राणेषु' (बृ. ४-३-७) इति श्रुताविवात्रापीति वार्तिकार्थः ॥

## १८४. अत्र हिरण्यगर्भैकत्वमविवक्षितम् —

अत्रादित्यस्थस्य हिरण्यगर्भत्वं वा पुरुषस्थस्य विज्ञानात्मत्वं वा न

१. 'योऽयमित्यादिना तद्वच्छ्रुतिरेवं प्रमादिनी' इति आ ॥ पाठ एवं विपरीवर्त्य धृतोऽत्र॥

निर्दिदिक्षितम् । नापि तावत्रैकस्यैव सगुणब्रह्मणोंऽशत्वेनोपासनायोपदिदिक्षितौ 'तद्यत्तत्सत्यमसौ स आदित्ये य एष मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् पुरुषः' (बृ. ५-५-२) इत्यादिश्रुत्यन्तरे इव । उपासनाया अप्रकृतत्वात् । किं तर्हि, निर्धूताखिलोपाधेर्ब्रह्मणोऽद्वैतत्वाद्वेदितुरात्मत्वेनोपदेश इष्टः । सर्वस्याप्युपनिषद-स्तत्प्रतिपादनेनैवोपक्षयात् । तमिमं रहस्यमजानन् यथाश्रुतग्राही चोदयति — **ननु तन्निर्देश इत्यादिना** । यद्यादित्यपुरुषविज्ञानमयात्मनोरेकत्वं विवक्षितम्, तर्हि 'यश्चायं दक्षिणेऽक्षन्' इत्येव निर्देष्टुं युक्तो विज्ञानमयः । तथा हि **श्रुत्यन्तरे** तथैव प्रसिद्धेस्तत्प्रत्यभिज्ञापनं कृतं स्यादिति भावः । सिद्धान्ती तु यद्यपि 'दक्षिणेऽक्षन्' इति निर्दिष्टस्यापि तदुपलक्षितसाक्षित्वेन ग्रहणे आदित्यपुरुषसाक्षिणा तदैक्यं स्वाभीष्टं सेद्ध्येदेव, तथापि तु 'स यश्चायं पुरुषे' इति पुरुषशब्दग्रहणस्य 'अन्नात्पुरुषः' (२-१), 'स वा एष पुरुष विध एव' (२-२) इत्यादिस्थलपरामर्शकत्वे शरीरादिसर्वोपाधिरहितसाक्ष्युपलक्षकत्वेन समञ्जसतरत्वमस्तीत्यभिप्रायेणा-परब्रह्मोपासनपरत्वमेव प्राधान्येन निरस्यन्नाह — **'न । पराधिकारात्'** इत्यादिना **'स एकः इति'** इत्यन्तेन । पराधिकारं स्फोरयति — **परो ह्यात्मात्राधिकृत** इत्यादिना **मीमांसेतीत्यन्तेन** । अयमभिप्रायः । श्रुत्यन्तरे हि सत्याख्यस्य ब्रह्मणो हिरण्यगर्भस्यैकस्यैव संस्थानविशेषौ, आदित्यमण्डले दक्षिणेऽक्षिण चेति स्थानविशेषयोरुपास्यत्वेनोपक्षिप्तौ । तस्य हि व्याहृतिशरीरत्वसाम्येऽपि स्थानविशेषोपनिबन्धेन 'तस्योपनिषदहरिति', 'तस्योपनिषदहमिति' — इति च द्वे उपनिषदावुपदिष्टे — इत्येकस्यैव द्वेधानु-संधातव्यत्वसिद्ध्यर्थं युक्तस्तत्र 'दक्षिणेऽक्षन्' इति स्थानविशेषनिर्देशः । इह पुनर्नापरं ब्रह्मोपास्यत्वेन निर्दिश्यते, अपि तु पर एवात्मा निरुपाधिक आनन्दरूपो ज्ञेयत्वेनाधिक्रियते । तथा हि 'अदृश्येऽनात्म्ये ....' इति दृश्यत्वादिपररूपप्रतिषेधेनैव तमुपदिश्य तन्निष्ठस्याभयप्राप्तिं 'भीषास्माद्वातः पवते' इत्यादिना तदविदुषः संसारभयं च दर्शयति। 'सैषाऽऽनन्दस्य मीमांसा भवति' इति च लौकिकानन्द-विशेषेष्वनुगमदर्शनाय तमेवानुवर्तयतीति परमात्मन एवेदं प्रकरणमित्यवगम्यते । नन्वस्त्वेवम् । तथाप्यत्र वाक्ये हिरण्यगर्भ एव यश्चासावादित्ये इति निर्दिश्यताम् ; तत्र को दोषः ? तत्राह — **न ह्यकस्मादप्रकृतो युक्तो निर्देष्टुमिति**। 'स यश्चायम्',

'यश्चासौ' इति प्रकृतपरामर्शकत्वेन संभवन्त्योः सर्वनामश्रुत्योर्विनैव कारणं किमिति श्रुत्यन्तरोक्तो हिरण्यगर्भो दक्षिणाक्षिपुरुषो वात्रोपास्यत्वेनानेतव्यः? —इति पृष्टो भवान् किमाचष्टाम् ? तस्मात्पर एवाऽऽत्मा निरुपाधिको निर्दिश्यतेऽत्रेति युक्त एवायं 'स यश्चायं पुरुषे' इत्यविशेषतोऽध्यात्मं निर्देश इति ॥

## १८५. ज्ञेयब्रह्मवाक्यमिदं स यश्चायमिति, नोपासनावाक्यम् —

नन्वस्तु पर एवात्र प्रकृत इत्यपि । तथापि स एवात्रोपास्यत्वेन निर्दिश्यत इति किं न स्यात् ? न च 'नेदं यदिदमुपासते' (के. १-५) इति परस्य ध्यानकर्मता निषिद्धेति शङ्क्यम् । इदमित्युपास्यत्वं न ब्रह्मणः परमार्थस्वरूपमित्येवंपरत्वात् तच्छ्रुतेः । 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत' (प्र. ५-५) इति परब्रह्मणोऽपि श्रुत्यन्तरे ध्यातव्यत्वेनोपदिश्यमानत्वाच्चेति । तत्राह **परमात्मविज्ञानं च विवक्षितमिति** । अयमाशयः । भवतु श्रुत्यन्तरे परस्यापि ब्रह्मणो ध्येयत्वमुपदिष्टम् । 'अभिध्यायीत' इति ध्यानविधानात्, 'त्रिमात्रेणोमित्येतेनैवाक्षरेण' इत्युपासनालम्बनत्वेन प्रणवस्योपदेशाच्च । इह तु परमात्मनो विज्ञानमेव विवक्षितम्, न तूपासनम् । तद्विधेर्लिङ्गस्य वा अदर्शनादिति ॥

## १८६. प्रस्थानान्तरेणोपनिषद् उपासनपरत्वशङ्का तद्दूषणं च —

ये तु प्रस्थानान्तरावलम्बिनः प्रक्रियां कल्पयन्ति — वेदनोपासनादि-शब्दानामेकार्थत्वात् 'आप्नोति परम्' इति परस्य ब्रह्मणः प्राप्यत्वकथनात्, तत्क्रतुन्यायेन ब्रह्मण एवोपास्यत्वमिति 'ब्रह्मविदाप्नोति परम्' (१-१) ब्रह्मोपासनमेवेह विहितमिति । 'अभयं प्रतिष्ठां विन्दते' (२-७) इत्यस्य निरन्तरस्मृतिलक्षणां निष्ठां लभते — इत्यर्थताम्, 'एतस्मिन्नुदरमन्तरं कुरुते' इत्यस्य च प्रतिष्ठाशब्दवाच्यध्यानविच्छेदं कुरुते — इत्यर्थतां कल्पयन्ति । 'स यश्चायं पुरुषे यश्चासावादित्ये स एकः' इति प्रकृतवाक्यस्य च आदित्यमण्डलान्तर्वर्ति कमनीयविग्रहयुक्तो यः पुण्डरीकाक्षो नारायणः स एव हृदयगुहावर्तिविज्ञानमयादन्तरः। ततश्च तादृशविग्रहविशिष्टत्वेन हृदयगुहावर्तिनो भगवतो ध्यानं कर्तव्यमिति तात्पर्यमभ्यूहन्ते । तेषामुपासनाविधिसिद्धौ वेदनादिशब्दानामुपासनपरत्वम्,

वेदनादिशब्दानां चोपासनपरत्वे सिद्धे तद्बलेनोपासनाविधिकल्पन-मित्यन्योन्याश्रयदोषो दुर्वारणः । न हि ज्ञानवेदनादिशब्दा लोके उपासनावाचकत्वेन प्रसिद्धाः, येनाविशेषण तेषां सर्वत्र तद्वाचकत्वं वेदेऽपि प्रत्यभिजानीमहि । न च विद्युपास्तिध्यायत्यादीनां नियमेनैकस्मिन्नेवार्थे वेदनोपदेशपरवाक्येषु प्रयोग उपलभ्यते। यत्र तु विद्युपास्त्योरव्यतिरेकेण प्रयोगो दृश्यते तत्रोपासनैव विवक्षितेति प्रकरणविधायकशब्दादिभिरवगम्यते इत्यकिञ्चित्करः सोऽत्र । अपि च सर्वत्र ज्ञानवेदनादिशब्दानामुपासनापरत्वमेवाभ्युपगच्छतां वेदे कुत्रापि वस्तुतन्त्रं ज्ञानं तैः शब्दैर्न निर्दिष्टमिति प्राप्नुयात् । ततश्च 'तद्धास्य विजज्ञौ' (छा. ६-१६-३), 'आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्' (बृ. २-४-५) इत्यादिस्थलेष्वपि तैः शब्दैरुपासनमेव ग्रहीतव्यं स्यात् । तच्चानिष्टमिति स्पष्टम्। तस्मात् 'ब्रह्मविदाप्नोति परम्' (१-१) इत्यत्र ब्रह्मविदिति विदिनोपक्रम इतीयता नोपासनावगन्तुं शक्यते । विधायकशब्दाभावात् । 'असन्नेव स भवति । असद्ब्रह्मेति वेद चेत्' (२-६) इत्यत्रेव वेदनशब्दस्य वस्तुतन्त्रज्ञानपरत्वस्वीकारे बाधकाभावाच्चेति मन्तव्यम् । ननु ब्रह्मणः प्राप्यत्वकथनादेव तस्योपासनात्र विधीयत इति गम्यत इत्युक्तम् । तदुरुक्तम् । 'सोऽश्नुते सर्वान् कामान्' इति सर्वकामावाप्तिफलस्य श्रुत्यैव वक्ष्यमाणत्वात् 'आप्तकाम आत्मकामो न तस्य प्राण उत्क्रामन्ति' (बृ. ४-४-६) इति, 'पर्याप्तकामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामाः' इति च ब्रह्मात्मताप्रप्त्या इहैव कामावाप्त्युपपत्तौ तत्प्राप्त्यर्थमदृष्टफलक-ब्रह्मोपासनकल्पनानुपपत्तेः । 'अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते' (का. २-३-१४) इति च श्रुत्यन्तरे वस्तुनन्त्रविद्ययेहैव ब्रह्मप्राप्तिश्रवणात् परप्राप्त्यर्थं लोकान्तरगमनाकाङ्क्ष्युपासनामुखोदीक्षणाप्रसक्त्यभावाच्च । 'यो वेद निहितं गुहायाम्' इत्यत्रापि वेदनस्योपासनपरत्वे निश्चायकप्रमाणाभावात् । 'पश्यत्स्विहैव निहितं गुहायाम्' (मुं. ३-१-७) इति सावधारणश्रुत्यन्तरसामर्थ्यादिहैव गुहायां निहितं यो वेद तस्यैतत्फलमिति मन्तुमुचितत्वाच्च । यस्तु 'एतमानन्दमयमात्मानमुपसंक्रामति' इति वाक्यशेषबलाल्लोकान्तरगमन-मार्गाकाङ्क्षास्तीति दुराग्रहः, तं तद्व्याख्यानावसर एवोच्चाटयिष्यामः । अतो न परप्राप्तिकथनसाहचर्यादपि विधिरत्रोपासनं वक्तुं शक्नोतीति स्थितम् ॥

नतराम् 'अभयं प्रतिष्ठां विन्दते' इति सामान्येनोपात्तः प्रतिष्ठाशब्दोऽभयगमन-फलहेतुत्वेन श्रुतो निरन्तरस्मृतिनिष्ठामभिधातुं शक्नोति । स्मृतिसन्तानादिनिरपेक्षाणां रज्ज्वादिवस्तुतत्वज्ञाननिष्ठानामपि कल्पितसर्पादिभयनिवृत्त्या अभयप्रतिष्ठितत्व-दर्शनात्तादृशेनैव ज्ञानेनेहापि प्रतिष्ठालाभोपपत्तेः । तस्मान्नायं स्मृतिसंतानस्य विधिः, अन्यस्य वा । विधायकशब्दाश्रवणाच्च । आनन्दरूपब्रह्मास्तित्वे हेतुसमर्पकत्वं द्योतयता हिशब्देन युक्तस्यास्योपासनादिविधिपरत्वे मानाभावाच्च । अत एव च 'उदरमन्तरं कुरुते' इत्यत्र प्रयुक्तो निरुपपदोऽन्तरशब्दो ध्यानविच्छेदं वक्तुं न पारयति। उक्तनीत्या ध्यानस्यात्राप्रकृतत्वात् । तदेवं श्रुतेः प्रकरणस्य लिङ्गस्य वाक्यशेषस्य वा अभावे कथमिव कल्प्येत केनापि सचेतसा 'स यश्चायम्' इत्यादिवाक्यमेतदुपासनपरमिति? अभ्युपगतेऽप्युपासनपरत्वे कथंतरामिदमवगम्येत यदिहादित्यपुरुषश्छान्दोग्योद्गीथविद्यावाक्यगतहिरण्यश्मश्रुत्वादियुतः पुण्डरीकाक्षो नारायण एव परामृष्ट इति । आदित्यरवश्रवणमात्रेण चेत्तथा कल्प्येत, ननु तर्हि व्यर्थः संयोगरूपचोदनाख्याविशेषाद्विद्यैक्यप्रत्यभिज्ञानप्रयासो वृद्धानाम् । यतः सर्वत्र यस्मात्कस्माच्चिदपि शब्दसाम्यात्सुखेनैव शक्यमध्यवसातुं विद्यैक्यं भवदीयचिन्तासरण्या विनैव संयोगादिगवेषणप्रयत्नेन । तत्रैवं स्थिते सर्वस्या उपनिषद उपासनपरत्वेन व्याख्यानस्यासामञ्जस्ये, यदेते वावदूका हठादत्र जिग्राहयिषन्ति 'सत्यं ज्ञानमनन्तं ब्रह्म' (२-१), 'आनन्दो ब्रह्म' (३-६) इत्यादिषु स्वरूपानुसंधानम्, 'तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्चत्यच्चाभावात् ...... सत्यं चानृतं च सत्यमभवत्' (२-६) — इत्यादिभोक्तृशरीरतया भोग्यभोगोपकरणशरीरतया चानुसंधानम् इति त्रिविधमनुसंधानमिति । तच्च स्वरूपेणानुसंधानमादित्यमण्डलान्तर्वर्ति पुण्डरीकाक्षविग्रहविशिष्टतया चोक्तं भवतीति च । तत्र विधिगन्धविरहितेष्वपि वस्तुनिर्देशवृत्तान्तकथनवेषवाक्येषु कथमिवानुसंधानविधानमभिसंदधते ते ? — इत्यत्र वाक्यार्थमीमांसाकुशला एव प्राड्विवाका भवितुमर्हन्तीत्यलं प्रासङ्गिक्या अभिनववेदान्तिसोपज्ञ-प्रक्रियाविमर्शनकथया विस्तृतया ॥

## १८७. आनन्दमीमांसाफलोपसंहारोऽप्यत्रैव —

इयता वाक्यविचारभाष्येण तावदुक्तं भवति यावदुक्तं भवति स यश्चाय-मितिवाक्यं सर्वस्या अप्यानन्दवल्ल्या अर्थमुपसंहरतीति । परमात्मा सत्यज्ञानानन्दलक्षणोऽद्वैतो वेदितुरात्मैवेति हि कृत्स्नवल्ल्यर्थ इति । एवं परमप्रकृतोपसंहारकत्वेन व्याख्याते वाक्ये समनन्तरवाक्यसंदर्भप्रकृता आनन्दमीमांसा न कटाक्षितेति भ्रमं वारयितुं शङ्कामुन्मेषयति — **नन्वित्यादिना न विषयविषयिसंबन्धजनित** इत्यन्तेन । सैषा आनन्दस्य मीमांसा भवतीत्युपक्रान्तम्। तस्या अपि फलमुपसंहरणीयम् । अन्यथा हि शतगुणोत्तरोत्तरोत्कर्षवत्त्वेन प्रदर्शितो लौकिकानन्दः, 'स एको ब्रह्मण आनन्दः' इत्यत्रैव सावधिकः पर्यवस्येत् तथा च मीमांसा ब्रह्मानन्दानुगमसाधनमिति न स्यादिति भावः। कथं पुनर्मीमांसाफलमुपसंहरणीयमित्याशङ्क्य तदाह — **अभिन्नः स्वाभाविक आनन्दः परमात्मैव न विषयविषयिसंबन्धजनित इतीति ।** नायं परमानन्द आनन्दिनो भिन्नः, न च विषयकरणसंबन्धेन जनयित्वा प्राप्यः, किं तर्हि स्वाभाविक एव । कथमिदं गम्यते स्वभाव एवायमानन्दलिप्सोरिति ? तत्रोत्तरम् — परमात्मैवेति । परमात्माव्यतिरिक्तत्वात् साधकस्यात्मभूत एव सन्नयमानन्दोऽविद्यामात्रेण व्यवहितत्वाद्विद्यया लब्धव्यो भवतीत्यभिप्रायः । तदेवं मीमांसाफलमुपसंहर्तव्यम्, तत्कथमत्र त्यक्तम् ? — इति पृष्टः सिद्धान्तीभवत्येषोऽपि यथोपवर्णितवाक्यार्थान्तर्भूत एव; अतो न पृथगुपसंहरणीय इत्याह — **ननु तदनुरूप एवायमित्यादिना उपपन्नम्** इत्यन्तेन । अयं स यश्चायमितिनिर्देशः, तदनुरूप एव। यथोपवर्णितानन्दस्वरूपनिर्धारणानुगुण एव । कथम् ? यतोऽयं भिन्नाधिकरण-स्थविशेषोपमर्देन निर्देशो भवति, अतोऽभिन्नत्वं तावदुपसंहृतम् इत्याशयः। शङ्का — भवतु भिन्नत्वनिराकरणमनेन । एवमपि 'यश्चासावादित्ये' **इत्यादित्य-विशेषग्रहणमनर्थकम्** । न चेदमुपासनपरं वाक्यमित्यङ्गीकुरुते भवान् । येन तत्स्थानग्रहणमर्थवत्स्यादपीति भावः । सिद्धान्ती स्वाभिप्रायमाविष्करोति **'नानर्थकम् । उत्कर्षापकर्षापोहार्थत्वात्' इति** । आदित्ये हि मूर्तामूर्तलक्षणयोर्ब्रह्मरूपयोः पर उत्कर्षः श्रूयते 'एतस्य सत एष रसो य एष तपति'

(बृ. २-३-२), 'त्यस्यैष रसो य एष एतस्मिन् मण्डले पुरुषः' (बृ. २-३-३) इति च । तथा पुरुषगतस्तदपकर्षोऽपि श्रूयते 'अथाध्यात्मम्' इति प्रकृत्य 'एतस्य सत एष रसो यच्चक्षुः' (बृ. २-३-४), 'एतस्य तस्यैष रसो योऽयं दक्षिणेऽक्षन् पुरुषः' (बृ. २-३-५) इति च । ब्रह्मण उपाधिभूतयोर्हि मूर्तामूर्तयोः कार्यकरणविभागेनैवं दर्शितः सवितर्युत्कर्षः, दक्षिणाक्ष्युपलक्षिते शरीरे चापकर्षः । इह च — 'स एकः प्रजापतेरानन्दः .... स एको ब्रह्मण आनन्दः' इति साधनोत्कर्षवशादुत्कृष्यमाणो लौकिकानन्दो यत्र पर्यवस्यति स सवित्रन्तर्गतपुरुषलभ्य इत्युक्तम् । स चोत्कृष्टतमो लौकिकानन्दः — तदेवानुप्राविशत्' (२-६) इति श्रुत्युपदर्शितपुरुषगतापकर्ष-विशेषोपमर्देन तस्याप्युपाधेराकाशादिसर्वकारणब्रह्ममायाविसृष्टत्वाविशेषमालक्ष्य विद्यया प्रविलापनेन, परमानन्दमपेक्ष्य परमानन्दस्वरूपेण निर्धार्यमाणः — समो भवतीत्युक्तमत्र 'स एकः' इति । एवं चेत् पुरुषेऽपकृष्टमूर्तामूर्तविशेषयुतो य आत्मनः आनन्दः, स एवादित्ये उत्कृष्टमूर्तामूर्तविशेषयुतः स्थित इत्युक्तं भवतीति, तां गतिं गतस्य परमात्माभिन्नपरमानन्दस्वाभाव्यं विद्यया प्राप्तस्य न कश्चिद्बाह्याभ्यन्तर-साधनोत्कर्षो वा आदित्यपुरुषस्येव, अपकर्षो वा मानुषसंसारिण इव । अत एव चायमदृश्यानात्म्यत्वादिधर्मविशिष्टे आनन्देऽभयं प्रतिष्ठां विन्दते-निकृष्टजीवानामवि क्षुद्रानन्दप्राप्त्युत्कण्ठानां तदपोहशङ्कारूपं भयं वा, सगुणविद्याबलान्मुक्तानामिव स्वात्मव्यतिरिक्तेश्वरायत्ततारूपं भयं वा तस्य न विद्यते इति 'अभयं प्रतिष्ठां विन्दते' इति वचनमुपपन्नं भवतीत्यर्थः । तस्मात् स्वाभाविकानन्दस्वरूपनिर्धारणार्थत्वेन मीमांसाफलोपसंहारार्थमपि वाक्यं भवतीत्यभिप्रायः ॥

## १८८. द्वैतोपमर्दज्ञानविषये चोद्यपरिहारौ —

अत्र परिचोदयन्ति केचित् । यदेतन्महता परिकरबन्धेन प्रतिज्ञातम् सत्यज्ञानादिलक्षणं निर्विशेषं ब्रह्म पुरुषे आदित्ये चैकमेवेति ज्ञेयमुत्कृष्टाप-कृष्टद्वैतोपमर्देनेति, तदेतदतिसाहसमिति नः प्रतिभाति । कुतः ? यस्मात् कृत्स्नोत्कर्षापलक्षणद्वैतोपमर्दस्यास्य ज्ञाता क इत्येव तु दुर्निरूपम् । न हि तावत्संसारी तज्ज्ञाता भवितुमर्हति । कृत्स्नस्य संसारस्याविद्याध्यस्तत्वाभ्युपगमात् संसारिणोऽप्युपमृद्यपक्षत्वात् । न हि स्वज्ञानोपमृद्ये द्वैतसंसारेस्वयमन्तर्गत

इत्यनुन्मत्तवचनं स्यादिति । न च ब्रह्मैव तज्ज्ञात्रिति श्लिष्यते । तस्यापि खलु ज्ञातृत्वस्याध्यस्तत्वे निवर्तकज्ञानस्वरूपज्ञातृत्वं स्वनिवर्त्यान्तर्गतमिति व्याहताङ्गीकारप्रसङ्गः । अनध्यस्तत्वे तु तन्निवर्तकाभावाद् द्वैतावशेषः । निवर्तककल्पने वा तस्यापि निवर्तकान्तरापेक्षेत्यनवस्थैव स्यादिति द्वैतोपमर्देन निर्विशेषं ब्रह्म ज्ञातव्यमिति प्रतिज्ञामात्रं स्यात् । न च भवान् ब्रह्मणः स्वाभाविकमेव ज्ञातृत्वमभ्युपैति । ज्ञानमात्रं ब्रह्मेत्यभिनिविष्टत्वादिति ॥

अत्रोच्यते । स्यादेवं ज्ञातृज्ञानादिविभागापेक्षा यत्र तत्त्वत एवाज्ञातं वस्तु ज्ञात्रा विज्ञातुमिष्टं भवेत् । यत्र पुनः स्वयंप्रकाशस्यैवानन्यापेक्षस्यात्मनो ज्ञातृत्वादिविभागरहितस्यैव भ्रान्त्या विजिज्ञासितत्वम्, तत्राज्ञाननिह्नवव्यतिरेकेण न किञ्चिदन्यदपेक्ष्यते । न हि तत्त्वत एवात्मा अज्ञातो ज्ञातव्यो वा अभ्युपगम्यते । ज्ञानाज्ञानयोरपि साक्षित्वात्तस्य नित्यज्ञानस्वरूपस्य । न हि ज्ञानाज्ञानव्यवहारात्प्रागेव सिद्ध आत्मा ज्ञानापेक्षया सिध्यतीति युज्यते । तस्मादविद्याध्यासनिषेधकज्ञानेनैव निष्कृष्य स सर्वसाक्षी तेनैवानन्यानुभवरूपेण सोऽहमिति ज्ञायत इत्यनवद्यम् । यथाहुर्**वार्तिककाराः** 'निष्कृष्याविद्योत्सङ्गस्थात्तत्साक्षिणमनात्मनः । साक्षात्तेनैव तं विद्युः प्रात्यक्ष्यात्सोऽयमित्यः ॥' इति 'अकामहत इत्येवं निरविद्योऽभिधीयते । तस्यामसत्यां तद्ब्रह्म स्वयमेवानुभूयते ॥ अज्ञातं ज्ञायते यत्र प्रमातृत्वाद्यनिह्नवात्। तत्र मानान्तरापेक्षा न स्वतोऽवगमात्मके ॥ प्रमैवात्मात्मिका यत्र त्वनन्यानुभवात्मिका। नात्र मानान्तरापेक्षा सैवानस्तमितोदिता ॥' (तै.वा. २-५२३, ५२४, ५२५, २५६) इति च । आत्मैवानुदितानस्तमितप्रमास्वरूप इति न तत्र मानान्तरात्प्रमोदयापेक्षेति वार्तिकाभिप्रायः । ननु चास्त्वेवमविद्याध्यासोपमर्दानन्तरमनन्यापेक्षेति । तदेव तूपमर्दज्ञानं कस्य कथमिति खलु चोदितमस्माभिरिति चेत् । अत्र ब्रूमः । यस्यैव त्वविद्याध्यासः, तस्यैव तु तदुपमर्दज्ञानमपीति किमत्र कथमित्याक्षिप्यते ? यथैव ह्यध्यासस्तथैव चास्योपमर्द इति न किञ्चिच्चित्रम् । ननु संसारी स्वयमध्यस्तत्वात् स्वयं स्वज्ञाननिवर्त्यान्तर्गतः कथं भवेदित्याक्षिप्तमस्माभिः। बाढमाक्षिप्तम् । तत्तु दुराक्षिप्तम् । न हि ब्रह्मणोऽन्यः संसारी नाम कश्चनाभ्युपेतोऽस्ति योऽध्यासोपमर्देनोपमृदितः स्यादिति शङ्क्येत 'नान्योऽतोस्ति द्रष्ट .....' (बृ. ३-७-११) इत्यादिश्रुत्या ब्रह्मणोऽन्यस्यद्रष्टृश्रोत्रादिलक्षणस्य संसारिणो निषेधात् ।

इहापि च 'तत्सृष्ट्वा तदेवानुप्राविशत्' (२-६) इति स्रष्टुर्ब्रह्मण एव जीवभावेन कार्यप्रवेशश्रवणाच्च। ब्रह्मण एव तर्हि द्वैतदर्शनलक्षणाविद्याभ्रम इति जातम् । न जातम् । यतो जीवस्यैव तावदविद्यया संसारित्वं स्वरूपेण त्वसंसारिब्रह्माव्यतिरेक एवेत्युक्तम् । न तर्हि कस्यचिदप्यविद्याभ्रमःइति — चेत् । ओमिति ब्रूमः । एष एवार्थो बोध्यतेऽत्र 'स यश्चायं पुरुषे । यश्चासावादित्ये स एकः' इति । ज्ञातश्चेदयमर्थो भवता, तर्हि नैवास्ति कस्यचनाक्षेपस्यावसरः । अथ न ज्ञातः । स त्वमस्यामवस्थायां बोध्यसे, नासि संसारी त्वम्, किं तर्हि नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मैवेति । न चैतावता तव संसारिबुद्धिकाले परमार्थज्ञानेन तदपगमकाले वा तव परमार्थस्वरूपस्य कश्चन विशेषः स्यात् । रज्ज्वा इव स्वरूपस्य सर्पबुद्धितदपगमकालयोरिति सर्वमनाकुलम् ॥२७॥

**स य एवंवित् । अस्माल्लोकात् प्रेत्य । एतमन्नमयमात्मानमुपसंक्रामति । एतं प्राणमयमात्मानमुपसंक्रामति । एतं मनोमयमात्मानमुपसंक्रामति । एतं विज्ञानमयमात्मानमुपसंक्रामति । एतमानन्दमयमात्मानमुपसंक्रामति ॥२८॥**

## ब्रह्मविद्याफलम्

**७७. अस्तिनास्तिइत्यनुप्रश्नो व्याख्यातः। कार्यरसलाभप्राणनाभय प्रतिष्ठाभयदर्श-नोपपत्तिभ्योऽस्त्येव तदाकाशादिकारणं ब्रह्म इत्यपाकृतोऽनुप्रश्न एकः । द्वौ अन्यौ अनुप्रश्नौ**

**विद्वदविदुषोर्ब्रह्मप्राप्त्यप्राप्तिविषयौ । तत्र विद्वान् समश्नुते न समश्नुते इत्यनुप्रश्नोऽन्त्यः । तदपाकरणाय उच्यते । मध्यमोऽनुप्रश्नोन्त्यापाकरणादेव अपाकृत इति तदपाकरणाय न यत्यते ॥**

## १८९. वृत्तग्रन्थार्थनुद्रवणम् -

वृत्तानुद्रवणपूर्वकमुत्तरग्रन्थावतारः करणीयः संबन्धस्य सुखग्रहणायेत्यभिप्रायेण गतार्थं संगृह्णाति — **अस्ति नास्तीत्यादिना अनुप्रश्न एक** इत्यन्तेन । अयमभिप्रायः । आनन्दमयात्मनः प्रतिष्ठात्वेन श्रावितस्य ब्रह्मणः सर्वद्वैतावसानस्थानत्वमुपश्रुत्य 'नैव स्याद्ब्रह्म, सर्वव्यवहारातीतत्वात्' इति संभावितां स्थूलबुद्धिशङ्कां वारयितुम् अस्तीत्येवोपगन्तव्यं ब्रह्म । तद्विद्यया पुरुषार्थप्राप्तेः, तदविद्यया चानर्थागमात् — इत्युपदिष्टम् 'असन्नेव स भवति' (२-६) इत्यादिना श्लोकेन । तदनु च शिष्यस्यानुप्रश्ना उपन्यस्ताः । विदुषोऽविदुषश्च उभयोरप्यात्मत्वेन स्थितं हि ब्रह्मेति तद्विद्वानिवाविद्वानपीह जानीयाद्, व्यवहरेच्चेदं तद्ब्रह्मेति । न तु तदस्ति । अतः कथं नु घटते 'असन्नेव स भवति । असद्ब्रह्मेति वेद चेत्' इत्युक्तिरित्यर्थतः प्राप्ता ब्रह्मास्तित्वे शङ्का एका । अस्ति चेद् विदुषोऽविदुषश्च समं कारणत्वाद्ब्रह्मणो विद्वानिवाविद्वानपि प्राप्नुयादेव ब्रह्म शरीरपातानन्तरम् इति संभाव्यते। तत्किं वस्तुतः सोऽश्नुते उत नाश्नुते ? इति द्वितीया शङ्का । नोचेदश्नुते तर्हि विद्वानप्यश्नुत इति कथम् ? इति तृतीया । ता एताः शङ्का अनुसृत्याचार्योक्तिमनु त्रयः प्रश्नाः कृताः शिष्येण । तत्रास्तित्वनास्तित्वानुप्रश्नापाकरणायैव तावत् प्रयत्नः कृत एतावता ग्रन्थसन्दर्भेण । अवधृते हि ब्रह्मास्तित्वे तत्प्राप्त्यप्राप्तिशङ्का समुन्मिषेदिति । यद्यप्याचार्यदृष्ट्या नैवावकाशोऽस्ति शङ्कायाः ब्रह्मास्तित्वे । 'यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' (बृ. ३-४-१) इति श्रुत्युक्तदिशा ब्रह्मणः साक्षात्स्वात्मत्वेन सर्वदैवापरोक्षत्वात् । तथाप्यपोढसर्वविशेषात् किमदः स्याद्ब्रह्म नाम ? — इत्यविद्याकल्पितनामरूपविशेषाकारापहृतबुद्धीनामात्माप्यसदिव

प्रतिभातीति युक्त एवानुप्रश्नः शिष्यस्येति सोऽयमनुप्रश्नो विद्वदविदुषोः प्राप्त्यप्राप्तिविकल्पप्रश्नाभ्यामर्थात्सिद्ध एव प्रथमतोऽपाकृत इति । **तत्र कार्यरसलाभप्राणनाभयप्रतिष्ठाभयदर्शनोपपत्तिभ्योऽस्त्येव तदाकाशादिकारणं ब्रह्मेत्यपाकृतोऽनुप्रश्नः ।** निर्विशेषत्वादगृहीतमपि ब्रह्मास्तीत्यवगन्तव्यम् । जगत्कारणत्वात्, कार्यस्य च जगतो ग्रहणात्, रसलाभ इव लौकिकानां वीतरागाणामानन्दहेतुत्वात्, कार्यकरणचेष्टायास्तदर्थत्वात्, तन्निष्ठानामभयहेतुत्वात्, तदविदुषां भयदर्शनहेतुत्वाच्चेत्येताभिरुपपत्तिभिर्ब्रह्मास्तित्वावगमनेन प्रथमप्रश्नोऽयं निर्णीत इत्यर्थः ॥

## १९०. द्वितीयानुप्रश्नानादरणेन तृतीयस्यैव निर्णेयत्वेन स्वीकारे हेतुः -

अथ तृतीयोऽनुप्रश्नो विद्वत्प्राप्त्यप्राप्तिविषयको निर्णीयत इत्याह **तत्र विद्वानित्यादिना उच्यत** इत्यन्तेन । 'ब्रह्मविदाप्नोति परम्' इति विदुष एवादौ ब्रह्मप्राप्तेः प्रतिज्ञातत्वात्, विद्वद्गतानुप्रश्नापाकरणमेव शिष्टयोः प्राथम्यमर्हतीति भावः। ननु शिष्यानुप्रश्नप्रस्तावेऽविद्वत्कर्तृकप्राप्तिरेव प्रथममाशङ्क्य पृष्टा । तत्किं स एवानुक्रमो नाद्रियते निर्णयकालेऽपि ? तत्राह — **मध्यमोऽनुप्रश्न** इत्यादि । विदुष एव प्राप्तिरिति निर्णीते खल्वविद्वत्वादेवेतरस्य न प्राप्तिरित्यर्थात्सिध्यतीति मध्यमोऽनुप्रश्नो न पृथङ्निर्णयप्रयत्नमपेक्षत इत्यर्थः । उपलक्षणमेतत् । यतो लाभान्तरमप्यस्त्यन्त्यप्रश्नसयैवाग्रतोऽपाकरणेन । कथम् ? अविद्यामात्रव्यवहिता हि ब्रह्मप्राप्तिः। आत्मत्वे सति सर्वेणापि नित्यप्राप्तत्वाद्ब्रह्मणः । अतः सुषुप्तिमरणादिषु कारणे लये सति प्राप्तेऽपि ब्रह्मणः पुनःप्रबोधपुनर्जन्मादिषु ततः प्रच्युतिरपि स्यादविदुषः। अविद्याया अनपोदितत्वात् । तस्मान्नैवास्त्यविदुष आत्यन्तिकी ब्रह्मप्राप्तिः क्वचिदपीत्येतदपि विद्वत्प्राप्त्यनुप्रश्ननिर्णयेनैव सेत्स्यतीति तृतीयोऽपि सन्ननुप्रश्नो द्वितीयत्वेनापाकरणायोपादीयत इति द्रष्टव्यम् ॥

**७८. स यः कश्चित् एवं यथोक्तं ब्रह्म उत्सृज्योत्कर्षापकर्षम् अद्वैतं 'सत्यं ज्ञानमनन्तमस्मि' इत्येवं वेत्तीति एवंवित् ।**

एवंशब्दस्य प्रकृतपरामर्शार्थत्वात् । स किम्? अस्माल्लोकात् प्रेत्य । दृष्टादृष्टेष्टविषयसमुदायो हि अयं लोकः । तस्मादस्माल्लोकात् प्रेत्य प्रत्यावृत्य निरपेक्षो भूत्वा, एतं यथाव्याख्यातम् अन्नमयमात्मानमुपसंक्रामति। विषयजातम् अन्नमयात्पिण्डात्मनो व्यतिरिक्तं न पश्यति। सर्वं स्थूलभूतम् अन्नमयमात्मानं पश्यतीत्यर्थः। ततोऽभ्यन्तरम् एतं प्राणमयं सर्वान्नमयात्मस्थम् अविभक्तम्। अथैतं मनोमयम्, विज्ञानमयम् आनन्दमयमात्मानम् उपसंक्रामति । अथादृश्येऽनात्म्येऽनिरुक्तेऽनिलयने अभयं प्रतिष्ठां विन्दते ॥

## १९१. सर्वस्याप्यविशेषेण ब्रह्मज्ञानमात्रेण ब्रह्मप्राप्तिः-

अविद्वानमुं लोकं प्रेत्य कश्चित्समश्नुते उत नेत्यनुप्रश्ने शिष्यस्यायमभिप्राय आसीत्, यत्सर्वकारणत्वाद् ब्रह्मणः सर्वेऽपि तदश्नुत एवास्माल्लोकात् प्रेत्य देहपातानन्तरम् । कार्यस्य हि कारणे लयेऽवश्यंभाविनी कारणप्राप्तिः । घटादिषु तथा दर्शनात् । तथा च यदि विद्वांस्तदश्नुते । अविद्वानप्यवश्यं तदपिगच्छन्नश्नुत एवेति वक्तव्यमिति । अत एव ह्यविद्वानपि कश्चिदमुं लोकं प्रेत्य गच्छत्युत नेत्यादावेवानुप्रश्नमुपन्यस्तवान् ॥

आचार्यस्तु शिष्यस्य भ्रमं निवारयन्नाह — न कोऽपि ब्रह्मणो व्यतिरिक्तस्ततो विप्रकृष्टो वा, येनेत्थं ब्रह्मप्राप्तिगतानुप्रश्नः स्यात् । अज्ञः परं स्वात्मभूतमपि ब्रह्म स्वस्मादन्यन्मन्यते, बाह्यविषयापहृतबुद्धित्वात् । अत एव हि भवानप्येवं पृच्छसि,

किमविद्वानपि प्रेत्य तद्ब्रह्म गच्छति किं वा न गच्छतीति । वस्तुतस्तु न ब्रह्मातिदूरं कस्माच्चिदपि पुरुषात्, येन प्रेत्य गन्तव्यं स्यात् । स्वात्मनोऽनन्यत्वादेव । वेदितव्यं तु भवति तथात्वेनेति 'यो वेद निहितं गुहायाम्' (२-१) इत्युच्यते । सा च विद्या न ज्ञानेन ब्रह्मणो विषयीकरणम् । स्वात्मत्वेनाविषयत्वात्, अत्यन्तप्रसिद्धत्वाच्च । अविद्याध्यारोपितोत्कर्षापकर्षविप्रकर्षसंनिकर्षादितारतम्यनिराकरणमात्रं तु कर्तव्यं ब्रह्मणीत्यभिप्रायेणोपसंहृतम् 'स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः' इति । तदेतत्सर्वमभिसंधायाह भाष्यकारः — **स यः कश्चिदित्यादि** । यः कश्चिन्मनुष्योऽल्पवीर्योऽपि महावीर्यदेवर्ष्यादिवदेव यथोक्तं परमानन्दरूपं ब्रह्म, **उत्सृज्योत्कर्षापकर्षम्** । नास्त्यस्य ब्रह्मणः स्वरूपत उत्कर्षोऽपकर्षो वा देवादिषु मनुष्येषु वा । एकस्यैव सर्वभूतेषु सममनुप्रविष्टत्वात् । उत्कर्षादितारतम्यं त्वविद्याध्यारोपितम्-इति विद्यया निराकृत्येत्यर्थः । अद्वैतं सत्यं ज्ञानमनन्तं परमानन्दरूपमहमस्मीत्येवं वेत्तीति एवंवित् । कथमिदमवगम्यते यथावर्णित-प्रकारमेवात्र वेदनं विवक्षितं न तूपासनारूपमिति ? **एवंशब्दस्य प्रकृतपरामर्शकत्वात्** । प्रकृतं ह्यानन्दस्य परमात्मनः पुरुषे आदित्ये चैकत्वं न तस्योत्कर्षोऽपकर्षो वास्तीति । अतोऽवगच्छाम उत्कर्षापकर्षोत्सर्जन-पूर्वकमेकत्वावधारणलक्षणमेवात्र वेदनं विवक्षितमितीत्यभिप्रायः ॥

## १९२. विद्वान् सर्वैषणात्यागेन ब्रह्म प्राप्नोति —

**स किम् ?** एवंवित् किंफलमश्नुते ? — इति फलविषयकोऽयं प्रश्नः । तदुत्तरत्वेन 'अस्माल्लोकात् प्रेत्य' इत्येतद्वाक्यमवतार्य व्याचष्टे — **दृष्टादृष्ट-बिषयसमुदायो ह्ययं लोकः । तस्मादस्माल्लोकात् प्रेत्य प्रत्यावृत्य निरपेक्षो भूत्वेति** । ननु शिष्यः पृष्टवान् (२-६) प्रेत्य कश्चिदमुं लोकं गच्छति समश्नुते उत नेति । तत्रामुं लोकमित्यस्य प्रतिद्वन्द्वित्वेन 'अयं लोक' उपन्यस्त इति भाति 'अस्माल्लोकात्' इति । तत्कथमिहाप्रकृतदृष्टादृष्टेष्टविषयसमुदाय आनीयते लोकशब्दार्थत्वेन ? नैष दोषः । यस्मादनुप्रश्नसमयेऽपि 'अमुं लोकम्' इति परमात्मानमेव लोकमभिप्रैति शिष्यः । आत्मलोकादन्यस्य तत्राप्रकृतत्वात् । इदं तु सत्यं यत् 'प्रेत्य' इत्यनेन मृत्वेत्येवार्थो विवक्षितः पृच्छकेनेति । यतो

विदुषोऽविदुषश्चाविशेषेण ब्रह्मप्राप्तिमाकाङ्क्षति सः । सामान्यं हि ब्रह्मोभयोरपि तयोः, आकाशादिकारणत्वात्। कार्यस्य च कारणापिगमने सति तत्प्राप्तिर्ध्रुवा इति खलु तस्याभिप्राय इति । प्रकृतं तु 'स य एवंवित्' इत्यादि यथोपवर्णितनीत्या शिष्यभ्रमनिरासाय प्रवृत्तस्याचार्यस्य वचनमिति नात्र कारणाप्ययः प्राप्तिहेतुत्वेनाभिप्रेयते । आत्यन्तिकी हि ब्रह्मप्राप्तिर्विद्यामेवापेक्षते । अविद्यामात्रव्यवहितत्वात् तत्प्राप्तेः । सा च विद्या न बाह्यसाध्यसाधनवासितधिया लभ्येत्यशेषैषणात्याग एवात्र कर्तव्य इति विद्याङ्गत्वेन तं विवक्षित्वा विद्याफलत्वेनापि श्रावयतीति युक्तम् 'पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' (बृ. ४-४-२२, ३-५-१) इति श्रुत्यन्तरेणैकार्थ्याय । एतदनुगुण एव चायं लोकोऽत्र विवक्षणीयो न केवलमिहलोकः। प्रत्यक्षादिप्रमाणसंनिधापित एव सर्वो दृष्टादृष्टेष्टविषयसमुदाय इति 'अयं लोकः' इतीदमा निर्देशो न विरुध्यत इति सर्वमवदातम् ॥

## १९३. मतान्तरेण प्रेत्यशब्दव्याख्यानं, तद्दूषणं च —

यत्वत्रोत्प्रेक्षणं **केषांचित्** 'अस्माल्लोकात् प्रेत्य' इत्यनेन सर्वेषां ब्रह्मविदामर्चिरादिरुक्तो भवतीति । तत्सर्वथोपेक्ष्यम् । अत्र मार्गश्रवणस्यैव मृग्यत्वात्। न च 'प्रेत्य' इति प्रायणरवमात्रादर्चिरादिमार्गः सेत्स्यति । अतिप्रसङ्गात् । उपनिषदो मार्गानपेक्षवस्तुतन्त्रब्रह्मविद्यापरत्वस्योपपादित्वाच्च । न च भवद्व्याख्यानेऽप्यतिप्रसङ्गो दुर्वारणः; न हि प्रेत्येति बाह्यैषणापरित्यागार्थे प्रयोगः क्वचिच्छ्रुत्यन्तेषु दृष्टचर इति शङ्क्यम् । 'श्रोत्रस्य श्रोत्रं ..... चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति' (के. १-२) इत्यत्र तथाप्रयोगदर्शनात् । न च तत्राप्यर्चिरादिमार्गेण गत्वेत्यर्थः स्वीक्रियत एवास्माभिरिति प्रत्यवस्थेयम् । न हि नारायणस्य श्रोत्रादिप्रेरकत्वज्ञानमात्रेणार्चिरादिमार्गः प्राप्यत इति तवाप्यभिमतम् । न च तत्रोपासना प्रस्तुतास्ति । प्रवर्तकचेतनविशेषबुभुत्सुप्रश्नस्योत्तरत्वेनैव त्वयापि व्याख्यानादित्यलं श्रुत्यक्षराञ्जस्यप्रकरणादिकमनादृत्य यथेष्टव्याख्यानव्यसनिभिर्विवादेन ॥

## १९४. कोशपञ्चकसंक्रमणप्रकारः —

तत्रैवं व्यावृत्तविषयतृष्णस्य ब्रह्मप्राप्तिप्रकारं प्रपञ्चयति — **एतं यथाव्याख्यातमन्नमयमात्मानमुपसंक्रामतीत्यादिना** । अत्र चैवंवित्त्वानन्तरमस्माल्लोकात्प्रायणम्, तदनन्तरं च क्रमेणान्नमयाद्युपसंक्रमणमिति कालकृतः क्रमो न विवक्षितः, एवंवित्त्वानन्तरं प्राप्ताद्वैतभावस्य कर्तव्यानवशेषात्; किं तर्हि, अनेनान्नमयाद्युपसंक्रमणक्रमेणानन्दमयमात्मानमुपसंक्रामति, तत एव चैवंविद्भवतीति प्रतिपत्तिक्रमोऽवसेयः । अन्नमयाद्युपसंक्रमणक्रमप्रपञ्चस्तु जिज्ञासुः पूर्वोक्तक्रमेण विचार्य पूर्वं पूर्वं कोशमुत्तरस्मिन्नुत्तरस्मिन्प्रविलाप्य कोशपञ्चकमतीत्यैवोत्कर्षापकर्षरहितं परमानन्दं ब्रह्मप्राप्नोतीत्यभिप्रायेण । प्रथमं तावदन्नमयमाधिभौतिकाधिदैविकस्थूलरूपाव्यतिरिक्तोपाधिकमेव स्वात्मानं विजानाति । ततस्तदभ्यन्तरं समष्टिप्राणमयम्, आत्मत्वेनाध्यवसाय तस्मिन् पूर्वपर्यायगतमन्नमयं प्रविलापयति । एवं मनोमनयं, विज्ञानमयम्, आनन्दमयं च क्रमेणोपसंक्रम्य तत्तत्त्वमभिविज्ञायान्ततः सर्वप्रतिष्ठाभूते ब्रह्मणि सर्वं द्वैतं प्रविलाप्य यथोक्तरीत्यापरमानन्दे अदृश्यत्वादिधर्मकेऽभयं प्रतिष्ठां विन्दते — इत्यभिप्रायः । तदुक्तं वार्तिके — 'गत्वेहान्नमयात्मानं तत्कार्यं यद्वदत्यगात् । अन्नेनान्नमयं तद्वद्विद्वान् प्राणमयात्माना ॥ तस्यापि ह्यन्तरात्मानमही रज्जुमिव स्वतः । मनोमयात्मना बाह्यमुपसंक्रामतीश्वरः ॥ पूर्वपूर्वप्रहाणं स्यादुत्तरोत्तरगामिभिः । दृश्यादृश्यादिहीनेऽथ प्रतिष्ठां विन्दतेऽभयम् ॥' (तै.वा. २-५४७, ५४८, ५४९)॥

## १९५. संक्रमणश्रुतेर्व्याख्यानान्तरं तद्दूषणं च -

'आनन्दमयमात्मानमुपसंक्रामति' इति मुक्तिदशायां जीवब्रह्मणोरुपास्योपासकयोर्भोक्तृभोग्यभावप्रतिपादनात्, मुक्तौ ब्रह्मैक्यपक्षो व्युदस्तो भवति । 'एतमन्नमयमात्मानम्' इत्यादि पञ्चस्वपि पर्यायेषु एतच्छब्दः परमात्मपरः । 'अन्नमयप्राणमयमनोमयविज्ञानमयशब्दास्तत्तच्छरीरकपरमात्मपरा' इति च **केचित्**। सर्वोऽपि विद्वान् अस्माल्लोकात् प्रेत्यान्नमयादिसमष्टिव्यष्टिविभूतिकं निरतिशयानन्दं परमात्मानं भोग्यभूतं भोक्ता सन्ननुभवतीति प्रश्नस्योत्तरमुक्तं भवतीति किल तेषां श्रुतितात्पर्यवर्णनम् । सर्वमेतदसत् । कथं कृत्वा ? उपनिषद उपासना-

परत्वस्योपक्रमादिविमर्शनेन निराकृतत्वात् । आनन्दमयस्याब्रह्मत्वस्याप्युपपादितत्वात् । उपसंक्रमणशब्दस्य भोगार्थे क्वचिदपि लोके वेदे वा प्रयोगाभावात्। मुक्तौ जीवः परमात्मानमुभुङ्क्ते इति क्वचिदपि वेदान्तेष्वश्रवणात् । भोग्यस्य भोक्तुरात्मत्वेन चिन्तयितुमप्यशक्यत्वात् । 'भोक्ता भोग्यं प्रेरितारं च मत्वा' (श्वे. १-१२) 'पृथगात्मानं प्रेरितारं च मत्वा' (श्वे. १-६) इति च परमात्मनो भोक्तृभोग्योभयवैलक्षण्येन श्रुतस्य भोग्यत्वासंभवाच्च । तस्मादानन्दमयमात्मानमुपसंक्रामतीति मुक्तिदशायां जीवब्रह्मणोरुपास्योपासकयोर्भोक्तृभोग्यभावः प्रतिपाद्यत इत्येतदसत् । एवम् 'एतमन्नरमयमात्मानमित्यादिषु पञ्चस्वपि पर्यायेषु एतच्छब्दः परमात्मपरः' इत्येतदप्यसत् । कुतः ? समीपतरवस्तुवर्तिन एतच्छब्दस्य जिज्ञासोरात्मवाचकत्वं परित्यज्यकालान्तरे देशान्तरे प्राप्यस्य परमात्मनो वाचकत्वेन स्वीकारस्यान्याय्यत्वात् । श्रुतिवैरूप्यप्रसङ्गाच्च । 'स वा एष पुरुषोऽन्नरसमयः' इत्यत्र तावदन्नरसमयशब्दः शरीरपर इत्युभयसिद्धम् । ततश्च यथैव भाष्योपप्रदर्शितन्यायेनाविद्याकृतपञ्चकोशेषु क्रमक्रमेणात्मबुद्ध्यपनयनेन विद्यया सर्वान्तरतमं ब्रह्म वेदितुः प्रत्यगात्मत्वेन दिदर्शयिषु शास्त्रम् पूर्वस्मिन् पूर्वस्मिन् कोशे आत्मबुद्ध्यपनयनार्थम् 'अन्योऽन्तर आत्मा प्राणमयः' इत्यादिनोत्तरमुत्तरं कोशमात्मत्वेन ग्राहयांचकार, तथैवेहाप्युपसंक्रमणशब्देन ब्रह्मात्मप्रतिपत्तिक्रममुपसंहरतीत्यानुरूप्यमुपक्रमोपसंहारयोरिति स्थिते अप्रकृतोपासनाकल्पनया तस्याः कालान्तरोपभोग्यफलं प्रकल्प्य श्रुतिवैरूप्यप्रसञ्जनं न युक्तमिति ॥

## १९६. अन्नमयादिशब्दास्तच्छरीरकपरमात्मपरा इति न सम्यक् -

यत्पुनरन्नमयादिशब्दास्तच्छरीरकपरमात्मवाचका इति तदतिदवीयः । न हि परमात्मनः क्वचिदपि श्रुत्यन्तेषु विज्ञानमयशरीरकत्वं प्रतिपाद्यते । ननु 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः' (बृ. ३-७-३, ३-७-७) **इत्यारभ्य** प्रवृत्तं वाजसनेयिब्राह्मणम्'[१] अधिदैवतमधिलोकमधिवेदमधियज्ञमधिभूतमध्यात्मं च

१. इदमन्तर्यामिब्राह्मणम् माध्यन्दिनपाठानुसारेण तृतीयाध्याये पञ्चमम् । इह ग्रन्थशरीरे काण्वपाठानुसारेण सङ्ख्याः प्रथमतो दत्ताः । तदनु माध्यन्दिनपाठानुसारेण । केवलमाध्यन्दिनपाठस्तु बृ.मा. इत्येवं सङ्केतितः ॥

समस्तचिदचिदन्तरवस्थितः सर्वनियन्ता सर्वचिदचिच्छरीरकः सर्वस्यात्मा इति स्पष्टं ब्रूते । तत्र हि 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृतः' (बृ.मा. ३-७-३०) इत्यन्तर्यामिणो विज्ञानमयशरीरकत्वमपि पठितं दृश्यते । न । अतत्परत्वात् । 'य इमं च लोकं च परं च लोकं सर्वाणि च भूतान्यन्तरो यमयति' (बृ. ३-७-१, ३-७-३), तम् 'अन्तर्यामिणं ब्रूहि' (बृ. ३-७-१, ३-७-६) इत्युद्दालकेन पृष्टस्य याज्ञवल्क्यस्योत्तरमिदं ब्राह्मणमन्तर्यामिस्वरूपसमर्पणपरं न परमात्मनः शरीरवत्त्वेऽपि व्याप्रियते। न हि परमात्मनः शरीरत्वं वास्तवमस्ति नास्तीति शङ्का प्राप्ता, येन तस्य शरीरवत्वं प्रतिपाद्यते । शरीरत्वस्य प्रतिपाद्यमानत्वे हि तस्यान्तर्यामिस्वरूपसमर्पणं तच्छरीरवत्त्वावधारणं चेति वाक्यं भिद्येतेति । ननु च सर्वनियन्तृत्वसिद्ध्यर्थमेव चिदचिच्छरीरकत्वं कल्पनीयम् । शरीरस्य हि तद्व्यतिरिक्तात्मनियाम्यत्वं दृष्टमिति। अतो न वाक्यभेद इति चेत् । न । एकस्मिन्नेव शरीरे नियन्ता परमात्मा नियाम्यो विज्ञानात्मा चेति द्वयोर्द्रष्ट्रोरनुपपत्तेः । न हि द्वौ द्रष्टारावनुभूयेते शरीरे केनचित् । श्रुतिविरोधाच्च । 'नान्योऽतोऽस्तिद्रष्टा' (बृ. ३-७-२३), 'नान्योऽस्ति द्रष्टा' बृ. ३-७-३१) इति प्रतिषिध्यते ह्यस्मिन्नेव ब्राह्मणेऽन्तर्यामिणोऽन्यो द्रष्टेति । नियन्त्रन्तरप्रतिषेधार्थमेतद्वचनमिति चेत् । न । नियन्त्रन्तराप्रसङ्गात् । अविशेषश्रवणाच्च । न हि सर्वनियन्तुरन्यो नियन्ताऽस्तीति प्रसङ्गोऽस्ति येन तत्प्रतिषेधार्थं वचनमिति स्यात्। न चात्र 'नान्योऽतोस्ति नियन्ता द्रष्टा' इत्यादिविशेषरूपेण द्रष्टा निषिध्यते । किन्तु 'नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञाता' (बृ. ३-७-२३) इति **काण्वपाठे**, 'नान्योऽस्ति द्रष्टा नान्योऽस्ति श्रोता नान्योऽस्ति मन्ता नान्योऽस्ति विज्ञाता' (बृ.मा. ३-७-३१) इति **माध्यन्दिन**पाठे च द्रष्टृश्रोतृमन्तृविज्ञातृसामान्यं हि निषिध्यते । इत्थं च न नियन्तव्यविज्ञानात्मापेक्षयापि शरीरशरीरिभावः प्रकल्प्यो भवति । ननु तवापि कथं नियन्तव्याभावे नियन्तृत्वसिद्धिः? न ह्येकस्यैव नियन्तृत्वं नियाम्यत्वं चावकल्पत इति । अत्रोच्यते। अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्तोऽयं विज्ञानात्मान्तर्यामिणोर्भेदो न पारमार्थिक इत्यस्माकमदोषः ॥

वास्तविकशरीरात्मभावाङ्गीकारे त्वेकस्मिन्नेव शरीरे आत्मद्वयाभ्युपगमप्रसङ्गाच्छ्रुतियुक्तिविरोधोऽनिवार्य एव स्यात् । किञ्च लोके शरीरिणः शरीरनिमित्तः सुखदुःखभोगः सर्वत्र दृष्ट इति परमात्मनोऽपि तथैव समस्तचिदचिच्छरीरनिमित्ते सुखदुःखे प्रसज्येयातां वास्तवशरीरशरीरिभावमभ्युपगच्छताम् । 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' (छा. ८-१२-१) इति न्यायोपबृंहितश्रुतिविरोधश्च। कर्मारब्धदेहविषयैव श्रुतिर्न्यायश्चायम् । कर्मबन्धविमुक्तस्य विज्ञानात्मनः सशरीरस्यैवापुरुषार्थगन्धाभावात् । नित्यनिरस्तकर्मसंबन्धगन्धस्य सशरीरस्यापि परमात्मनोऽपुरुषार्थगन्धाप्रसङ्ग इति चेत् । न । मुक्तस्याप्यानन्दभोगमभ्युपगन्तुस्तव मुक्तस्य प्रियासंस्पर्शानङ्गीकारानुपपत्तेः । 'भीषास्मादग्निश्चेन्द्रश्च ' (तै. २-८) इत्यादिश्रुतिदर्शितजगद्व्यापारवर्जितस्य मुक्तस्यापि नियन्तृकृतभयानिवारणाच्च । एवं चाङ्गीकृत्यापि वास्तवं शरीरशरीरिभावं परमात्मनः शरीरप्रयुक्तः सुखदुःखभोगप्रसक्तिर्दुर्वारैव । शरीरिसामान्यस्यापुरुषार्थसंपृक्तत्वध्रौव्यात् । न तु श्रुतिविहितं शरीरित्वमद्यापि सिद्धम् । 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥' (का. १-२-२२) इति श्रुतिविरुद्धश्चायं शरीरत्वाभ्युपगमः । यत्तूक्तसर्वदोषजातपरिजिहीर्षया लोकसिद्धं भोगायतनत्वं शरीरलक्षणत्वपदात् प्रच्याव्य 'यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यम् तच्छेषतैकस्वरूपं च तत्तस्य शरीरम्' — इत्यभिनवलक्षणप्रणयनम्, तदप्यभिलषितसिद्धिनिबन्धना वस्त्ववस्थितिरित्यभिनिवेशादेवेति गम्यते । यतस्तत्रापि किं चिदचितोः परमात्मशरीरत्वं तयोराधेयत्वविधेयत्वशेषत्वनिबन्धनम्, किं वा आधेयत्वादीन्येव शरीरत्वनिबन्धनानीत्येतन्न निर्णीतं स्यात्। तत्र, अन्तर्यामिब्राह्मणमिदं शरीरशरीरिभावप्रतिपादकमित्यास्थीयते चेत्, नियाम्यत्वमेव निमित्तीकृत्य शरीरशरीरिभाव इति कल्पितं स्यात् । तथा च 'अन्तर्यामिणं ब्रूहि', 'स त आत्मा अन्तर्याम्यमृतः' — इति च प्रश्नप्रतिवचने नान्तर्यामिस्वरूपसमर्पणपरे इति मूलोच्छेदिपाण्डित्यं प्रसज्येत । अथ शरीरशरीरिभावमेव निमित्तीकृत्यान्तर्यामित्वं तत्र प्रदर्श्यत इत्युररीक्रियेत, तर्हि शरीरशरीरिभाव एव किंलक्षणकः, कुतः प्रमाणादायातश्चेति वक्तव्यं भवतीत्युभयंतःपाशा रज्जुः ॥

अपि च सर्वमेतदंतर्यामिब्राह्मणैदंपर्यानभिज्ञताप्रकटनमात्रं यद्वर्ण्यते नियाम्यत्वादिनिबन्धनं विज्ञानात्मनः शरीरत्वमित्यादि । यतोऽत्र नियन्तृत्वं वा शरीरित्वं वा नोद्दालकेन पृष्टम्, न च याज्ञवल्क्येनोत्तरितम् । उद्दालको ह्यागमतोऽन्तर्यामिणमवगत्यैव जल्पन्यायेन याज्ञवल्क्यं परीक्षार्थं पृच्छति 'तदहं वेद तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वांस्तं चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यतीति' (बृ. ३-७-१, ३-७-४) इति हि विज्ञायते । तदत्र 'यथैव वायुर्वै गौतम तत्सूत्रम्' (बृ ३-७-२, ३-७-६) इति सूत्रस्वरूपं वायुरिति विशेषेण नर्दिष्टम्, एवमेवात्राप्यन्तर्यामिस्वरूपं विशेषेणैव निर्देष्टव्यम्, न पुनः पृथिव्यादिनियन्तृत्वरूपेण तच्छरीरकत्वेन वा यथाह भवान् । कतमोऽयमन्तर्यामी य उभावपि लोकौ सर्वाणि च भूतान्यन्तरो यमयतीति पृष्टेन 'अयमसौ' इति खलु वक्तव्यम् । न चास्ति ब्राह्मणे काचन वचनव्यक्तिर्यया प्रतीयाम यदयम् अन्तर्यामी सर्वशरीरतया सर्वस्यात्मेति वा, सर्वनियन्तृतया सर्वशरीरक इति वा । अन्यथैव तु दृश्यते प्रतिपर्यायं प्रतिवचनम् अन्तर्यामिस्वरूपविशेषसमर्पकम् 'एष त आत्मा अन्तर्याम्यमृतः' (बृ. ३-७-३), 'स त आत्माऽन्तर्याम्यमृतः' (बृ.मा. ३-७-७) इति वैवंरूपम् । न च 'एष त आत्मा', 'स त आत्मा' इति व्यतिरेकविभक्तिनिर्दिष्टत्वमात्रेण जीवस्यात्मा अन्योऽत्रोपदिश्यत इति शक्यं कल्पयितुम् । न ह्यात्मन अन्य आत्मा चिन्तयितुमपि शक्यते । आत्मनोऽन्यस्यानात्मताध्रौव्यात् । तस्मात् 'इदं तस्य स्वरूपम्' इतिवदभेदे एव भेदोपचारोऽयं द्रष्टव्यः । तत्रैवं स्थिते ननु महदेतल्लिङ्गमुद्दालकस्य प्रष्टुः परमार्थात्मानमेव तत्संनिहिततममन्तर्यामिणं मन्यते याज्ञवल्क्य इत्यत्र, यदसौ 'एष त आत्मा अन्र्याम्यमृतः' इति सर्वत्राभ्यस्योत्तरयतीति ? चिच्छरीरकत्वनिबन्धनत्वे हि नियन्तुरात्मत्वस्य विवक्षिते 'यस्य पृथिवीदेवता शरीरमन्तर्यामिणः स तस्या आत्मा' इत्येवं वदेत्, न तत्प्रतीपम् 'एष त अन्तर्याम्यमृतः' इति । तस्मात् प्रतिपर्यायं 'यस्य पृथिवी शरीरम्' इति तत्तच्छरीरकत्वविशेषेऽपि 'एष त आत्मा' इत्येव सर्वत्राभ्यासादवगम्यतेऽयं याज्ञवल्क्यस्याभिप्रायः 'यथैवैष स्वसांनिध्य-मात्रेणोद्दालकस्य तव शरीरकरणनियन्तायम्, एवमेव पृथिव्यादीनामपि तत्तच्छरीरकरणैरेव शरीरकरणवानयं तत्तद्व्यापारेषु नियन्ता, न त्वस्यासाधारणं शरीरं करणं वा तन्नियमनेऽपेक्ष्यत इति । एवं च श्रुत्यन्तरमप्यनुगृहीतं भविष्यति

'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः' (श्वे. ३-१९) इत्यादि । तस्मादसदेवैतद् गीयते सर्वशरीरकतया सर्वात्मत्वमस्मिन् ब्राह्मणे प्रतिपाद्यत इतीत्यलमतिप्रपञ्चेन ॥

## १९७. संक्रमणश्रुत्यर्थविमर्शोपसंहारः

तदेवमुपनिषद उपासनापरत्वस्यासिद्धत्वात्, परमात्मविज्ञानात्मनोः शरीरात्मभावस्य कल्पनामात्रत्वात्, आनन्दमयस्य कार्यात्मत्वेनैवोपपादित्वात्, 'अस्माल्लोकात् प्रेत्य' इति देहपातोत्तरकालेऽर्चिरादिमार्गेण गतिर्वा, एतमानन्दमयमात्मानमुपसंक्रामतीत्यन्नमयादिशरीरकपरमात्मप्राप्तिक्रमेण परब्रह्मप्राप्तिर्वा, तथाप्राप्तस्यैव परमानन्दभोगो वा, अर्वाचीनवेदान्तिमतमालम्ब्य न कल्पनीयः श्रेयस्कामैः । यथाभाष्यमेव तु सर्वस्या उपनिषदो ब्रह्मज्ञानपरत्वात्, ब्रह्मण एव परमानन्दस्वरूपत्वात्, लौकिकानन्देष्वपि परमानन्दस्य शक्यानुगमत्वात्, सर्वैषणापरित्यागपूर्वकं पञ्चकोशतत्त्वविमर्शक्रमेण हित्वोत्कर्षापकर्षं सत्यं ज्ञानमनन्तं परमानन्दरूपं ब्रह्मैवास्मीति तस्मिन्नेवाभया निष्ठा संपादनीयेत्येव संक्रमणश्रुत्यर्थ इति सर्वं शिवम् ॥

# चिन्ताः संक्रमणकर्ता कः, कथं वा संक्रामति ?

७९. तत्रैतच्चिन्त्यम् । कोऽयमेवंवित्, कथं वा संक्रामतीति ? किं परस्मादात्मनोऽन्यः संक्रमणकर्ता प्रविभक्तः, उत स एवेति ? किं ततः ? यद्यन्यः स्यात्, श्रुतिविरोधः 'तत्सृष्ट्वा तदेवानुप्राविशत्' (२-६), 'अन्योऽसावन्योऽहमस्मीति न स वेद' (बृ. १-४-१०), 'एकमेवाद्वितीयम्' (छा. ६-२-१), 'तत्त्वमसि' (छा. ६-८-७) इति । अथ स

एवानन्दमयमात्मानमुपसंक्रामतीति, कर्म-कर्तृत्वानुपपत्तिः। परस्यैव च संसारित्वम्, पराभावो वा । यद्युभयथा प्राप्तो दोषो न परिहर्तुं शक्यत इति, व्यर्था चिन्ता । अथान्यतरस्मिन् पक्षे दोषाप्राप्तिः, तृतीयो वा पक्षो[१] अदुष्टः, स एव शास्त्रार्थ इति व्यर्थैव चिन्ता । न । तन्निर्धारणार्थत्वात् । सत्यं प्राप्तो दोषो न शक्यः परिहर्तुम् ; अन्यतरस्मिन्, तृतीये वा पक्षेऽदुष्टे अवधृते व्यर्था चिन्ता स्यात् । न तु सोऽवधृत इति तदवधारणार्थत्वादर्थवत्येवैषा चिन्ता । सत्यम्, अर्थवती चिन्ता । शास्त्रार्थत्वादर्थवत्येवैषा चिन्ता । शास्त्रार्थावधारणार्थत्वात् । चिन्तयसि च त्वम्, न तु निर्णेष्यसि । किं न निर्णेतव्यम् इति वेदवचनम् ? न । कथं तर्हि ? बहुप्रतिपक्षत्वात्। एकत्ववादी त्वम्, वेदार्थपरत्वात् । बहवो हि नानात्ववादिनो वेदबाह्यास्त्वत्प्रतिपक्षाः । अतो ममाशङ्का[२] न

१. 'तृतीये वा पक्षे अदुष्टे स एव शास्त्रार्थ इति व्यर्थैव चिन्ता' वा ॥ 'तृतीये वा पक्षे अदुष्टेऽवधृते व्यर्था चिन्ता' आ ॥

२. 'ममशङ्का' वा ॥

**निर्णेष्यसीति। एतदेव मे स्वस्त्ययनम् यन्माम् एकयोगिनम् अनेकयोगिबहुप्रतिपक्षमात्थ । अतो जेष्यामि सर्वान्, आरभे च निन्ताम् ॥**

**१९८. चिन्ताया विषयः प्रयोजनं च -**

अथ संक्रमणशब्दार्थस्य संक्रमणकर्तुश्च सतत्त्वं विवेचयितुमुपक्रमते तद्व्याजेन सर्वमेव शास्त्रार्थं निर्णेष्यन्—**तत्रैतच्चिन्त्यम् । कोऽयमेवंवित्, कथं वा संक्रामतीति।** 'ब्रह्मविदाप्नोति परम्', 'यो वेद निहितं गुहायाम्' (२-१) इति च ब्रह्म स्वबुद्धिगुहायां निहितं यो वेद स परं पुरुषार्थमाप्नोतीत्युपक्रमे प्रतिज्ञातम् । य एवंवित् स 'एतमानन्दमयमात्मानमुपसंक्रामतीति चेहोपसंहृतम् । तत्र वेदकसतत्त्वं वेदनसतत्त्वं च न निर्धारितमिति तन्निर्धारणार्थं चिन्ता प्रतायत इत्यर्थः । ननु संदिग्धं सप्रोजनं च विचारणीयम् । इह संशय एव तावन्न विद्यत । कथम् ? यो हि परमपुरुषार्थमभिकाङ्क्षति, स एवात्र वेदने कर्ता भवितुमर्हति । न हि प्रयोजनमनुद्दिश्य प्रवृत्तिरस्ति-इत्याशङ्क्य, एवंविद्विषये तावत्संशयं स्पष्टयन्नाह—**किं परस्मादात्मनोऽन्यः संक्रमणकर्ता प्रविभक्तः, उत स एवेति ।** अयमभिप्रायः। सत्यम्, पुरुषार्थाभिकाङ्क्ष्येव विविदिषुर्भवितुमर्हति । स पुनः किं वेदनीयपरमात्मनोऽन्यः प्रविभक्त एव सन् वेदनेन तं प्राप्नोतीत्युच्यते, किं वा स एवेतीदं तु न निर्धारितम् । अथाक्षेप्ता चिन्ताप्रयोजनं पृच्छति — किं तत? इति । अन्य एव वा भवत्वेवं वित्, स एव वा, किं प्रयोजनं स्यादनेन चिन्तितेन ? ननु परप्राप्तिरुभयथाप्यविशिष्टं फलम्? —इत्याशयः । सिद्धान्ती प्राह **यद्यन्यः स्याच्छ्रुतिविरोधः, ..... अथ स एव .... कर्मकर्तृत्वानुपपत्तिरिति ।** अन्य एवैवंवित् संक्रमणकर्ता चेति यदि कल्प्यते, तदा यद्यपि परप्राप्तिः संभवेत्, 'तत्सृष्ट्वा तदेवानुप्राविशत्' (२-६) इति परस्यैव, जीवात्मनानुप्रवेशं ब्रुवती श्रुतिः कदर्थिता स्यात् । तथा 'अन्योऽसौ ....' (बृ. १-४-१०) इति भेदनिन्दाश्रुतिश्च । इयं हि श्रुतिर्भिन्नत्वेन वेदनमवेदनमेवेति ब्रूते 'न स वेद' इति । तथा 'एकमेवाद्वितीयम्' (छा. ६-२-१) इति श्रुतिविरोधश्च स्यात् । अद्वितीयं ब्रह्म सद्वितीयं चेति हि

विप्रतिषिद्धम्। एवं 'तत्त्वमसि' (छा. ६-८-७) इतिश्रुतिरपि विरुध्यते जीवस्यान्यत्वकल्पनापक्षे। तस्मान्न तावदयमेवंविद् ब्रह्मणोऽन्य इति प्राप्तम्। अस्तु तर्हि पर एवायं वेदिता संक्रमणकर्ता चेति। तत्रायं दोषः — कर्मकर्तृत्वानुपपत्ति-रेकस्यैवेति। न हि स एव संक्रमणकर्ता, स एव च संक्रमणकर्मेति संभवति। किञ्चैवं **परस्यैव च संसारित्वं पराभावो वा**। यदि हि पर एव चिदात्मना कार्यं प्रविष्टः, स एव च ब्रह्मवेदनेनानन्दमयमुपसंक्रामतीति कल्प्यते। तर्हि पर एव जीवात्मना संसरतीति प्राप्नोति। तच्चानिष्टम्। न हि स्वतन्त्रः सन् कश्चिद्बन्धनागारं प्रविशति, दु खमनुभवेयमिति संकल्पयन्। परस्यासंसारित्ववादिनीभिः श्रुतिभिर्विरोधश्चैवंकल्पयितुः स्यात्। अथवा पर एव नास्तीति प्राप्नोति परस्य जीवात्मता स्वीकर्तुः। एतच्चानिष्टम्। एतस्मिन् हि कल्पे संसारी जीवः किंकर्मकवेदनेन किंकर्मकं संक्रमणं कुर्यात्, संसारिव्यतिरेकेण वेद्यस्य संक्रमितव्यस्य वा अभावे ? तस्ताम् पर एवायमेवंविदिति पक्षोऽपि सदोष एवेति प्रतिभाति। तस्माच्छ्रुत्यर्थनिर्धारणार्थं चिन्ता कर्तव्येत्यभिप्रायः ॥

एतदेवार्थवत्त्वं चिन्तायाः स्फुटयितुमाक्षेपमुत्थापयति — **यदि**त्यादिना **व्यर्थैव चिन्ते**त्यन्तेन। अयमाक्षेप्तुरभिप्रायः। सर्वत्र हि संशयो मीमांसायामेवमर्थमुपन्यस्यते यथान्यतरकोटेर्निर्दुष्टत्वावधारणेन किञ्चन प्रयोजनं स्यादिति। अत्र तु भवानुभयथापि दोषमेवाह, न च तृतीयं निर्दुष्टं पक्षं प्रदर्शयति। न चाशक्यपरिहारे दोषे चिन्तया कश्चनार्थः सिध्येदिति व्यर्था चिन्ता। अथ तृतीयोऽस्ति निर्दुष्टः पक्ष इति मन्यते, तर्हि स एव शास्त्रार्थ इति किं वृथाचिन्तया? — इति। सिद्धान्ती त्वदुष्टपक्षनिर्धारणार्थत्वादेवार्थवती चिन्तेत्याह — **न। तन्निर्धारणार्थ**त्वादिना, **अर्थवत्येषा चिन्ते**त्यन्तेन। अथ प्रकरणान्तरेण चिन्ताया व्यर्थतामाहाक्षेप्ता — **सत्यमर्थवती चिन्ते**त्यादिना **ममाशङ्कां न निर्णेष्यसी**त्यन्तेन। अयमत्र चिन्तानारम्भवादिनोऽभिप्रायः। बहवो हि द्वैतवादिनः कथं त्वयैकेन जेतव्या भवेयुः ? तेषां पराजयाभावे वा कथं प्रकृतशास्त्रार्थनिर्णयः स्यात् ? अतो निष्फलैवेयं चिन्ता। अनिर्णायकत्वात्। तदलं द्वैतनिराकरणार्थं वृथाप्रयासेन परद्वेषकरेणेति। अत्र 'नानात्ववादिनो वेदबाह्या' इति न केवलं

सौगतादयो वेदप्रामाण्यमनङ्गीकुर्वाणाः, किं तु वैदिकंमन्यां अपि सर्वे द्वैतवादिनो गृह्यन्ते । द्वैतवादो हि सर्वथा परित्याज्यः । कुदृष्टिदूषितत्वात् । 'या वेदबाह्याः स्मृत्यो याश्च काश्च कुदृष्टयः । सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ॥' (मनु. १२-९५) इति हि मानवं वचनमिति । सिद्धान्ती त्वाह **एतदेव मे स्वस्त्ययनमित्यादि** । कल्याणं हि ममैतद्वचनमाह भवान्, यतो बहुप्रतिपक्षत्वादेव मम चिन्तेयं सार्थिकेति भविष्यति । विप्रतिपत्तिस्थाने हि चिन्ता कर्तव्या । किञ्च बहवो हि मत्प्रतिपक्षा नानात्ववादिनो अनेकयोगिनः भिन्नभिन्नप्रस्थानमवस्थिता पक्षप्रतिपक्षग्रहणेनान्योन्यं जेतुमीहन्ते इत्यत एव द्वैतस्य न सर्वसंप्रतिपन्नरूपत्वमिति स्थास्यति । तैः परस्परविरुद्धपक्षग्राहिभिरन्योन्यस्मिन् पक्षे दुरुद्धारान् दोषानुद्भावयद्भिः खलु द्वैतमात्रस्य युक्त्यसहत्वमेवार्थादङ्गीकृतं भवत्यनिच्छद्भिरपीत्यतोऽपि संभाव्यते एकत्ववादिनो मम जेतृत्वम् । अत एवमप्यारभ्यैव चिन्ता-इत्यभिप्रायः ॥

**८०. स एव तु स्यात् । तद्भावस्य विवक्षितत्वात् । तद्विज्ञानेन परमात्मभावो ह्यत्र विवक्षितः 'ब्रह्मविदाप्नोति परम्' इति । न ह्यन्यस्य अन्यभावापत्तिरुपपद्यते । ननु तस्यापि तद्भावापत्तिरनुपपन्नैव । न । अविद्याकृत-तादात्म्यापोहार्थत्वात्[1] । या हि ब्रह्मविद्यया**

---

१. यत्तु 'अविद्याकृतानात्मापोहार्थत्वात्' इति पाठान्तरकल्पनम्, तत् 'अविद्याकृतस्य अन्नादिविशेषात्मन आत्मत्वेनाध्यारोपितस्यानात्मनोऽपोहार्था' इति विवरणवाक्य-संगतिमनालोच्येति भाति । यत्कारणम् अविद्याकल्पितानात्मनोऽपोहो नात्र विवक्षितः, कस्य तर्हि, आत्मत्वेनाध्यारोपितस्य तस्य । अतोऽविद्याकृतस्य विशेषात्मतादात्म्यस्यापोहार्थस्तद्भावापत्त्युपदेश इति यथाश्रुतपाठोऽपि संगमयितुं शक्यं इति प्रतीमः ॥

स्वात्मप्राप्तिरुपदिश्यते, सा अविद्याकृतस्य अन्नादिविशेषात्मन आत्मत्वेनाध्यारोपितस्यानात्मनोऽपोहार्था । कथमेवमर्थवता अवगम्यते? विद्यामात्रोपदेशात् । विद्यायाश्च दृष्टं कार्यम् अविद्यानिवृत्तिः । तच्चेह विद्यामात्रम् आत्मप्राप्तौ साधनमुपदिश्यते । मार्गविज्ञानोपदेशवत् इति चेत् । तदात्मत्वे विद्यामात्रसाधनत्वोपदेशोऽहेतुः । कस्मात् ? देशान्तरप्राप्तौ मार्गविज्ञानोपदेशदर्शनात् । न हि ग्राम एव गन्ता इति चेत् । न । वैधर्म्यात् । तत्र हि ग्रामविषयं ज्ञानं नोपदिश्यते, तत्प्राप्तिमार्गविषयमेवोपदिश्यते विज्ञानम् । न तथेह ब्रह्मविज्ञानव्यतिरेकेण साधनान्तरविषयं विज्ञानमुपदिश्यते । उक्तकर्मादिसाधनापेक्षं ब्रह्मविज्ञानं परप्राप्तौ साधनमुपदिश्यत इति चेत्। न । नित्यत्वान्मोक्षस्य इत्यादिना प्रत्युक्तत्वात् । श्रुतिश्च । 'तत्सृष्ट्वा तदेवानुप्राविशत्' (२-६) इति कार्यस्थस्य[१] तदात्मत्वं दर्शयति ॥

---

१. 'कार्यस्य' इति वा ॥

## १९९. ब्रह्मप्राप्तिरित्यन्नमयाद्यात्मबुद्धिनिवृत्तिर्विवक्षिता -

एवं चिन्ताया आरम्भणीयत्वमुपपाद्य निर्दुष्टपक्षं दिदर्शयिषुः सिद्धान्तेनैव तावदुपक्रमते — **स एव तु स्यादिति** । किमत्र गमकमित्याशङ्क्याह — **तद्भावस्य विवक्षितत्वादिति** । अस्य विवरणम् — **तद्विज्ञानेन परमात्मभावो ह्यत्र विवक्षितो ब्रह्मविदाप्नोति परमितीति** । परमात्मविज्ञानेन विज्ञाता परमात्मैव भवतीति विवक्षितम् ब्रह्मविदाप्नोति वाक्येन । 'ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३-२-९) इति श्रुत्यन्तरैकार्थ्यात्, न तु तदाप्तिरेवात्र विवक्षितेति भावः । ननु तथापि परस्मादन्य एव तद्विज्ञानेन तद्भावमापद्यत इति किं न स्यात् ? तत्राह — न ह्यन्यस्येत्यादि । किं सोऽन्यः स्वरूपनाशादुत्तरकाले परमात्मभावमापद्यते, किं वा स्वरूपस्थित एव ? न तावदाद्यः कल्पः संभवति । स्वरूपनाशे स्वस्यैवाभावात् कस्य परात्मतापत्तिरुच्येतेति । नापि द्वितीयः कल्पः । स्वरूपे तिष्ठति, परभावमापद्यते चेति हि विप्रतिषिद्धमिति । तस्मान्नान्यस्यान्यात्मता कथञ्चिदपि संभवतीत्यभिप्रायः । तत्र पूर्ववादी शङ्कते — **ननु तस्यापीति** । स खलु तद्भूत एवेति कथं तद्भावमाप्स्यतीत्युच्यते ? न हि भूतस्यैव भविष्यत्ता कांक्षणीया भवेत् । अतो मुख्यप्राप्तिरेवात्र आप्नोतिशब्देन विवक्षितेत्यस्तु, न तु तद्भावापत्तिः। तथा च वेदनशब्देनोपासनं विवक्षित्वा अर्चिरादिमार्गेण ब्रह्मप्राप्तिरित्येव वाक्यार्थः सुकल्प्यो भविष्यतीति हार्दो भावः। सिद्धान्ती तु प्राह — **न । अविद्याकृत-तादात्म्यापोहार्थत्वादिति** । तदेतद्विवृणोति — **या हीत्यादिना अपोहार्थेत्यन्तेन** । अयमाशयः । न तावन्मुख्या प्राप्तिरिह विवक्षितेति कल्पयितुं शक्यम् । ब्रह्मणः सर्वगतत्वात्, 'एतस्मादात्मनः' (२-१) इत्यात्मानन्यत्व-श्रवणाच्च। आत्मनश्च नित्यप्राप्तत्वात् । एकस्यैवाप्नोतिकर्म-कर्तृत्वानुपपत्तेश्चागौणप्राप्त्यनुपपत्तिः। तस्मात् प्राप्तिरिह गौणी स्वीकार्या । तथा च व्याख्यातमस्माभिः दशमस्य नवसंख्येयगणनव्यग्रचेतसः स्वरूपसत्त्वज्ञानवद् अविद्याकल्पितान्नमयादिबाह्यात्मासक्तचेतस्तदात्मभावं प्राप्तस्यैव मयादिकल्पितविशेषात्मस्वात्मभावस्याविद्याप्राप्तस्यापोह एव ब्रह्मविद्यया ब्रह्मात्मभावप्राप्तिरित्युपचर्यत इति श्लिष्यते । एवं च तस्यैव तद्भावापत्तिरित्यपि

तद्भावापत्तिरिव, न त्वेव मुख्या विवक्षितेति नास्मिन् पक्षे क्वचिदपि प्राप्तिक्रियां प्रति कर्मकर्तृत्वदोषः । अतद्बुद्धिनिवृत्तेरेव वेदनात्प्राप्तिवाचोयुक्त्या अभ्युपेतत्वादिति॥

**२००. प्राप्तिशब्दस्योक्तार्थत्वे विद्यामात्रोपदेशो लिङ्गम् -**

ननु गौणमुख्यार्थयोर्मुख्ये संप्रत्ययो न्याय्यः । तत्कथमिह प्राप्तिशब्दस्य मुख्यवृत्तेः प्रच्याव्य गौण्यां व्यवस्थापनम्? इति शङ्कते — कथमेवमर्थता अवगम्यत इति । सिद्धान्ती तु ब्रह्मविद्याव्यतिरेकेण प्राप्त्यर्थयत्नान्तरोपदेशाभाव एवात्र गमकमित्याह — **विद्यामात्रोपदेशात् इति** । ननु विद्ययैव सा मुख्या प्राप्तिरित्यस्त्वित्याशङ्क्य प्रत्याह — **विद्यायाश्चे**त्यादिना, **उपदिश्यत** इत्यन्तेन। प्रयत्नान्तरमविधाय केवलैव विद्योपदिश्यते प्राप्त्यै । विद्या तु नैव पुरुषं कुत्रचित् कार्ये प्रवर्तयति, निवर्तयति वा कुतश्चित् । अविद्यानिवर्तनमात्रेण तु यथावस्थितवस्तुनोऽभिव्यञ्जिका सा । अतोऽवगम्यते अविद्यामात्रव्यवहितो ब्रह्मात्मास्वाविद्याकल्पितान्नमयादिभावापोहेनैव प्राप्यते ब्रह्मविद्यया, न तु वेदितारं क्वचित्प्राप्तिसाधने नियुज्येत्यर्थः ॥

अथ मुख्याप्तिवादी विद्यामत्रोपदेशेऽपि स्वेष्टसिद्धिं शङ्कते दृष्टान्तावलम्बनेन — **मार्गविज्ञानोपदेशवदिति चेदिति** । अस्य विवरणम् — **तदात्मत्व** इत्यादि **चेदि**त्यन्तम् । अयमभिप्रायः । विद्यामात्रोपदेशाद् ब्रह्मात्मभाव उपदिश्यत इति नावगन्तुं शक्यते । मार्गोपदेशेऽप्युपदेश्येन ग्रामस्य प्राप्तव्यत्वावशेषवद् ब्रह्मस्वरूपोपदेशान्तरमपि ब्रह्मणः प्राप्तव्यत्वावशेषे बाधकाभावादिति । उक्त दृष्टान्ते हि यथा गन्ता ग्राममार्गोपदेशज्ञानवान् गन्तव्यग्रामाद्भिन्नः, तथेहापि प्राप्ता प्राप्तव्यब्रह्मणो भिन्नइत्यप्युपपद्यत इति भावः । नैतदुदाहरणं विद्यामात्रोपदेशलिङ्गबाधकम् । दृष्टान्तदार्ष्टान्तिरयोवैषम्यदृष्टेरित्याह सिद्धान्ती — **न वैधर्म्यादिति**। अस्य विवरणम् — **तत्र हि ग्रामविषयं विज्ञानमि**त्यादिना **उपदिश्यत** इत्यन्तेन । दृष्टान्ते ग्रामस्वरूपमात्रं नोपदिश्यते, किन्तु तत्प्राप्तिसाधनम्। इह पुनर्ब्रह्मस्वरूपमेवोपदिश्यते, तद्वेदनमात्रेण च तत्प्राप्तिः फलत्वेन निर्दिश्यत इति

विषमो दृष्टान्त इत्यर्थः । दृष्टान्ते ग्रामस्वरूपोपदेशे सत्यपि तत्प्राप्त्यर्थं यत्नान्तरमाकाङ्क्ष्येतैव । ग्रामस्य परोक्षत्वेन देशकालव्यवहितत्वात् । इह पुनर्ब्रह्मण एव वेदितुरात्मत्वेन नित्यापरोक्ष्यात् नित्यप्राप्तत्वाच्च न यत्नान्तरमाकाङ्क्ष्यमस्तीत्यपि द्रष्टव्यम् ॥

यत्नान्तरानुपदेशोऽसिद्ध इत्याह मुख्यप्राप्तिवादी — उक्तकर्मादिसाधनापेक्षमित्यादि चेदित्यन्तम् । काम्यनिषिद्धवर्जनपुरःसरं नित्यं नैमित्तिकं कर्मानुष्ठातव्यम्। संहितोपनिषदुक्तानि प्रणवाद्युपासनानि च । तत्समुच्चितमेव च ब्रह्मविज्ञानं परप्राप्तौ साधनत्वेनेहानन्दवल्ल्यामुपदिश्यत इत्यभ्युपगन्तव्यम् । पूर्वत्र विहितस्य त्यागे कारणाभावादयमर्थोऽवसीयत इति भावः । अत्रोत्तरम् — न नित्यत्वान्मोक्षस्येत्यादिना प्रत्युक्तत्वादिति । शीक्षावल्ल्यन्ते हि चिन्ता प्रतानिता विद्याकर्मणोस्तत्कार्यविवेकार्थम् । तत्र केवलेभ्यः कर्मभ्यः परं श्रेय इत्ययं पक्षो 'न। नित्यत्वान्मोक्षस्य' इत्यनेन कर्मकार्यस्यानित्यत्वप्रसिद्धिमाश्रित्य मोक्षस्य कर्मकार्यत्वेऽनित्यत्वं प्रसज्येतेति दूषितः । (शी.भा.भा. ६१) एवं तर्हि विद्यासहितेभ्यः कर्मभ्यः स्यान्मोक्ष इत्युद्भाविता तु शङ्का 'न । आरभ्यस्यानित्यत्वादित्युक्तो दोषः' (शी.भा.भा. ६२) इति स्मारणेन निवारिता। एतेन विद्याकर्मणोः संहतयोर्मोक्षारम्भकत्वं प्रत्युक्तम्' (शी.भा.भा. ६३) इति विकल्पान्तरमप्युक्तन्यायातिदेशेन निरस्तम् । विद्याकर्मणोः संहतयोर्मोक्षप्रतिबन्धहेतुनिवर्तकत्वं च 'न । कर्मणः फलान्तरदर्शनात्' (शी.भा.भा. ६३) इति कर्मफलभूतोत्पत्तिसंस्कारादिविपरीतत्वान्मोक्षस्य न तत्रापि कर्मापेक्षेत्युक्तम्। 'विरोधादेव च विद्या मोक्षं प्रति न कर्माण्यपेक्षते' (शी.भा.भा. ६६) इति च सर्वथा कर्मापेक्षा दूरीकृता । तदेतत्सर्वमिहाप्यनुसंधेयमितिभावेन 'इत्यादिना प्रत्युक्तत्वात्' इत्यादिशब्दोपादानमिति ध्येयम् ॥

## २०१. अभेदपक्षः साक्षाछ्रुत्यनुगृहीतः

अपि च न वयं केवलं 'ब्रह्मविदाप्नोति परम्' इति विद्यामात्रोपदेशानुपपत्त्यैव स एव स्यादिति कल्पयामः । यावता साक्षाछ्रुत्यनुगृहीतश्चायं कल्प इत्याह — **श्रुतिश्च ..... तदात्मत्वं दर्शयतीति** । प्रवेशश्रुतिग्रहणं प्रदर्शनार्थम् ।

'एकमेवाद्वितीयम् (छां. ६-२-९), 'एकधैवानुद्रष्टव्यम्' (बृ. ४-४-२०), 'तत्त्वमसि' (छां. ६-८-७) इत्याद्यात्मैकत्ववादिन्यः, 'न स वेद' (बृ. १-४-१०), 'मृत्योः स मृत्युमाप्नोति' (बृ. ४-४-१९) इत्यादिभेददर्शनापवादिन्यश्च श्रुतयोऽत्र साक्षात् प्रमाणमित्यपि द्रष्टव्यम् । यत्पुनराशङ्क्यते परस्यैव संसारित्वं पराभावो वा एकत्वपक्षे इति । तदसत् । परप्रतिपादकशास्त्रे जाग्रति पराभावाशङ्कानुपपत्तेः । परसंसारित्वस्यानभ्युपगमाच्च । न हि वयं परस्य संसारित्वं शिष्मः, किं तर्हि संसारिणः कल्पितसंसारापोहेन परत्वमिति ॥

**८१. अभयप्रतिष्ठोपपत्तेश्च । यदि हि विद्यावान् स्वात्मनोऽन्यन्न पश्यति, ततः 'अभयं प्रतिष्ठां विन्दते' (२-७) इति स्यात् । भयहेतोः परस्यान्यस्याभावात् । अन्यस्य चाविद्याकृतत्वे विद्यया अवस्तुत्वदर्शनोपपत्तिः । तद्धि द्वितीयस्य चन्द्रस्यासत्त्वं[१] यदतैमिरिकेण चक्षुष्मता न गृह्यते । नैवं न गृह्यत इति चेत् । न सुषुप्त[२] समाहितयोरग्रहणात् । सुषुप्तेऽग्रहणम् अन्यासक्तवदिति चेत् । न । सर्वाग्रहणात् । जाग्रत्स्वप्नयोरन्यस्य ग्रहणात् सत्त्वमेवेति चेत् । न । अविद्याकृतत्वाज्जाग्रत्स्वप्नयोः । यदन्यग्रहणं जाग्रत्स्वप्नयोः, तदविद्याकृतम् । अविद्याभावे[१] अभावात्**

१. 'चन्द्रस्य सत्त्वम्' आ ॥; गृहीतस्तु वा ॥

२. 'सुप्त' इति वा ॥

**सुषुप्ते अग्रहणमपि अविद्याकृतमिति चेत् । न। स्वाभाविकत्वात्। द्रव्यस्य हि तत्त्वम् अविक्रिया। परानपेक्षत्वात्। विक्रिया न तत्त्वम्। परापेक्षत्वात् । न हि कारकापेक्षं वस्तुनस्तत्त्वम्। सतो विशेषः कारकापेक्षः । विशेषश्च विक्रिया । जाग्रत्स्वप्नयोश्च ग्रहणं विशेषः । यद्धि यस्य नान्यापेक्षं स्वरूपम्, तत्तस्य तत्त्वम् । यदन्यापेक्षम्, न तत् तत्त्वम्[२]। अन्याभावे अभावात् । तस्मात् स्वाभाविकत्वात् जाग्रत्स्वप्नवत् न सुषुप्तेः विशेषः ॥**

**२०२. अभेदपक्षे एवाभयप्रतिष्ठोपपत्तिः -**

तदेवं विद्यामात्रोपदेशान्यथानुपपत्त्या कार्यस्थस्य तदात्मतायाः श्रुतिबोधितत्वाच्चैवंवित् पर एवेति प्रतिष्ठापितम् । अथात्र पुनरन्वारम्भेण श्रुतार्थापत्त्यन्तरमुपन्यस्यत्यात्मैकत्वमनुभवारूढं करिष्यन् — **अभयप्रतिष्ठोपपत्तेश्चेति।** उपपत्तिमेव स्फुटीकुर्वन् संग्रहवाक्यं विवृणोति **यदि** हीत्यादिना । यावद्धि वेदितुरन्यस्य परस्य सद्भावस्तावद्भयस्यानिवृत्तिः । द्वितीयस्यैव भयहेतुत्वात् । यदि पुनर्विदुषोऽनन्य एव पर इति, तदा स विद्वानात्मनोऽन्यन्न पश्यतीत्यभयप्रतिष्ठा उपपद्यते। श्रुता चाभयप्रतिष्ठा विदुष इति तदुपपत्त्यर्थं तस्य द्वितीयादर्शनं कल्पनीयम्। ननु सति परस्मिन्नन्यस्य कथं तददर्शनम् शक्यकल्पनम् ? तत्राह — **अन्यस्य**

---

१. विद्याभावे इति वा ॥ पाठापेक्षया अयमेव गरीयान् ॥

२. 'तत्तत्वम्' इति 'तस्य तत्त्वम्' इति वा अपेक्षितमिति भाति ॥

**चाविद्याकृतत्वे विद्यया अवस्तुत्त्वदर्शनोपपत्तिरिति** । न वस्तुवृत्तेन विद्यमानस्यैवेश्वरस्यान्यस्य द्वितीयत्वमिह वार्यते, किं तर्हि तस्याविद्यमानं द्वितीयत्वमेव । तच्चाविद्याकृतमिति विद्यया तदवस्तुत्वदर्शनोपपत्तिरित्यर्थः । अविद्याविद्यमानस्यावस्तुत्वे दृष्टान्तः **तद्धि द्वितीयस्य चन्द्रस्यासत्त्वं यदतैमिरिकेण चक्षुष्मता न गृह्यत इति** । असत्त्वमिति अवस्तुत्वं, प्रतिभासमात्रशरीरत्वमिति यावत्। एक एव हि चन्द्रः सद्वितीयवत् प्रतिभासते तिमिरदोषवशात् । एवमविदुषोऽप्यात्मन एकस्यैव सतः सद्वितीयत्वं मिथ्यैवावभासते अविद्यातिमिरवशात् । यथैव तैमिरिकदृष्टं द्वितीयं चन्द्रमतैमिरिकोऽन्यश्चक्षुष्मान् निषेधति 'नास्त्ययं द्वितीयश्चन्द्रः, एक एव त्वयं चन्द्रः परमार्थत' इति । तथैव अविद्यावदृष्टं द्वितीयमात्मानं विद्वान् निषेधति 'नास्त्ययं द्वितीय आत्मा, एक एवासौ परमात्मा त्वदभिन्नो यस्मादित्थं त्वमविद्याभ्रान्त्या बिभेषि' इति । अतो न विरोध इत्यभिप्रायः ॥

## २०३. अद्वैतानुभवप्रदर्शनम् -

ननु दृष्टान्ते द्वितीयचन्द्रश्चक्षुष्मद्भिर्न गृह्यत एवेति तदसत्त्वमुपपद्यते । इह तु नास्त्येव कस्यचिदपि द्वितीयादर्शनम् । विद्वन्मूर्धाभिषिक्तस्यापि यावज्जीवं द्वैतदर्शनस्यानिवारणीयत्वादिति शङ्कते - **नैवं न गृह्यत इति चेदिति** । तामेतां शङ्कामद्वैतावस्थानिदर्शनादेव परिहरति — **न । सुषुप्तसमाहितयोरग्रहणादिति**। यद्यप्यात्मनः सद्वितीयत्वमेव जाग्रत्स्वप्नयोर्गृह्यते, तथापि देहेन्द्रियादिष्वहंममाभिमानवतामेव तद्ग्रहणमित्यविद्याकृतं तत्। उक्ताभिमानाभावे सति सुषुप्ते कस्यापि द्वितीयग्रहणाभावात् । योगिनां च समाधौ भक्तिध्यानप्रणिधानाद्यनुष्ठानकाले तदग्रहणात् । तस्मादनुभवापलापिनां वचनमेतन्न गृह्यते द्वितीयाभाव इतीत्यभिप्रायः। अद्वैतानुभवावस्था नाम नास्त्येवेति युक्त्यवष्टम्भात् प्रत्यवतिष्ठते — **सुषुप्तेऽग्रहणमन्यासक्तवदिति चेदिति** । उपलक्षणमेतत्समाधेरपि । यथेषुकारो जाग्रदपीष्वासक्तमनस्तयां नान्यान्विषयानीक्षते, एवं सुषुप्तोऽपि विश्रान्त्यनुभवव्यग्रमनस्तया द्वितीयं न गृह्णाति, समाहितोऽप्यात्मध्यानासक्ततया द्वितीयं न गृह्णाति । तस्मादसदेतत्सुषुप्तादौ द्वितीयं न गृह्यत इतीत्याशयः ।

तदेतत्प्रत्याचष्टे-**न । सर्वाग्रहणादिति** । अयमभिप्रायः । यदि हि तत्रावस्थायमसौ किञ्चिद् गृह्णीयात्, तर्हि भवेदपि तदासक्तमनस्तया द्वैतं न गृह्णातीति। न त्वेतदस्ति । सुषुप्तं हि नाम सर्वाग्रहणावस्था । सुप्तोत्थितोहि सर्वे नियमेन वक्ति न किञ्चिद् गृहीतं तदानीं मयेति । तथा समाधितो व्युत्थितोऽपि । ध्यानव्यग्रस्तु तत्र संप्रजानात्येव ध्येयमिति नैव तस्य समाधिः प्राप्ता इत्यन्यदेतत्। तस्मान्नेषुकारन्यायोऽत्रावकाशं लभत इति । ये तु केचिन्नवीनवेदान्तिनः प्राहुः सुषुप्तोऽपि करणकलेबरसंबन्धाविनिर्मुक्त एव । आयस्तसर्वकरणो हि आश्वासनाय ब्रह्मणि तदापीतो भवतीति 'सता सोम्य तदा संपन्नो भवति' (छां. ६-८-१), 'प्राज्ञेन संपरिष्वक्तः' (बृ. ४-३-२१) इत्यादिश्रुत्यक्षरावष्टम्भा जीवपरयोर्भेदमेव कल्पयन्तः, ते सार्वत्रिकसौषुप्तानुभवापलापिन इत्यनादरणीयाः । न हि सुषुप्तौ परमसमाधौ वा जीवपरयोर्भेदः केनाप्यनुभूतचरः । न च सति वास्तविके भेदे तत्र तद्विज्ञाने किञ्चित्कारणमस्ति । न चायस्तकरण इत्यतो न विज्ञायत इति युक्तम् । केनापि भेदाविज्ञाने तथा कल्पनस्यैवानवसरत्वात् । न च 'प्राज्ञेन संपरिष्वक्तः' (बृ. ४-३-२१) 'सता सोम्य तदा संपन्नः' (छां. ६-८-१) इति च व्यतिरेकविभक्तिनिर्देश एव तत्र प्रमाणमिति प्रत्युत्थातव्यम् । 'सलिल एको द्रष्टाऽद्वैतो भवति' (बृ. ४-३-३२) इति । 'स्वं ह्यपीतो भवति' (छां. ६-७-१) इति च श्रुत्यैवात्मनोऽद्वैतं रूपं पारमार्थिकं सुषुप्ते — इत्युद्घोषणात् । सर्वकरणकलेबरसंबन्धराहित्यस्य सर्वैरनुभूयमानत्वाच्च तत्र । तस्मात्सुषुप्तसमाध्योरग्रहणात् द्वितीयस्यासत्वमिति स्थितम् ॥

## २०४. सुषुप्तस्य द्वैताग्रहणं स्वाभाविकम् -

तदेवं सुषुप्ते द्वितीयाग्रहणान्न सद्वितीयत्वमात्मनः स्वभाव इत्युपपद्यते विदुषोऽभयप्रतिष्ठा, भयहेतोरविद्याकृतत्वादित्युपसंहृतम् । तत्र सिद्धान्त्याशयमजानन् क्वचिद् द्वैतस्याग्रहणमात्राद् द्वैतस्यासत्वमुक्तमिति भ्रान्तः शङ्कते — **जाग्रत्स्वप्नयोरन्यस्य ग्रहणात्सत्त्वमेवेति चेदिति** । सुषुप्तेऽग्रहणाच्चेद् द्वैतस्यासत्वं ब्रूषे, तर्हितरोरवस्थयोर्ग्रहणात् तत्सत्त्वमेव किं न ब्रूया इति शङ्कितुराशयः। न वयं क्वचिदग्रहणमात्रेण द्वैतस्यासत्त्वं ब्रूमः, अपि तु द्वैतस्याविद्याकृतत्वात् । अविद्या

च शरीरेन्द्रियादिष्वहंममेति मिथ्याभिनिवेशः । द्वैतस्याविद्याकृतत्वमेव कथमवधृतम्? तत्राह — **अविद्याभावेऽभावादिति** । सुषुप्तिसमाध्योर्हि यथोक्ताया अविद्याया अभावे सति नैवास्ति द्वैतग्रहणमिति तस्याविद्याकृतत्वं सेत्स्यति । एतदभिप्रायेण हि तैमिरिकचन्द्रोदाहरणमानीतमिति भावः । अविद्यासतत्त्वमविद्वान् शङ्कते — **सुषुप्तेऽग्रहणमप्यविद्याकृतमिति चेदिति।** अपीत्यङ्गीकारवादेन । द्वैतस्य वस्तुत्वमुपपादयन् हि पूर्ववादी द्वैतग्रहणस्याविद्याकृतत्वं नैवानुमन्यते । तस्य मते हि जाग्रति द्वैतग्रहणं स्वभावः, सुषुप्तेऽग्रहणं तु करणानां श्रान्तत्वाद्व्यापारोपसंहारादेव सेत्स्यतीत्यभिनिवेशः । अतः सुषुप्तेऽग्रहणमेव भवत्वविद्याकृमिति ; इतरयोस्तु स्थानयोर्ग्रहणस्याविद्याकृतत्वे मानं नास्ति, सार्वजनीनस्य ग्रहणस्याविद्याकृतत्वानुपपत्तेरिति हृदि स्थितो भावः । 'अपि' इति तु प्रौढिवादेन पक्षान्तरमङ्गीकृत्य । यदि जाग्रतस्वप्नयोर्ग्रहणमविद्याकृतं मन्यसे, भवत्वेवम् । तदानीं तु सुषुप्तेऽग्रहणस्याप्यविद्याकृतत्वं त्वया अकामेनाप्यङ्गीकर्तव्यं भवति । सुषुप्तं हि नामायस्तकरणस्यावस्थेति तत्राविद्यास्तित्वशङ्का दुरपह्नवा । तस्माद्यदि नाम द्वैतग्रहणस्याविद्याकृतत्वं दिदर्शयिषितं भवता, ततः प्रदर्श्यतां किञ्चिदवस्थान्तरम्, न तु सुषुप्तस्याविद्यारहितत्वं नः प्रापयितव्यमिति । तत्र सिद्धान्ती सुषुप्तेऽग्रहणस्याविद्याकृतत्वशङ्कां वारयितुं सुषुप्तावस्थास्वरूपं विविच्य दर्शयितुमुपक्रमते — **न । स्वाभाविकत्वादिति** । अस्यैव संग्रहवाक्यस्य विवरणम् — **द्रव्यस्य** हीत्यादिना **'न सुषुप्ते विशेष'** इत्यन्तेन । अग्रहणमविद्याकृतमिति वदता खल्वविद्यया अग्रहणं जायत इत्युक्तं भवति । तत्र का नामाविद्या, कथं च सा अग्रहणं जनयतीति वक्तव्यम् । ननूक्तम् आयस्तकरणत्वाद् द्वैतं न गृह्णाति सुषुप्त इति । तत्किमनायस्तकरणोऽपि सुषुप्तः कश्चन संभाव्यते यस्तत्र द्वैतं गृह्णीयात् ? न हि शरीरेन्द्रियसंबन्धः सुषुप्तेन केनाप्यनुभूतचरः । ननु 'सोऽहम्' इति प्रत्यभिज्ञानात्स एवायं सुप्तः प्रबुद्धश्चैत्यवगम्यते । मैवं वादीः । 'स एवाहं सशरीरेन्द्रियः सुप्त इदानीं च प्रबुद्धः' इति कस्यचिदपि प्रत्यभिज्ञानाभावात् । प्रत्यभिज्ञाने हि सुप्तप्रबुद्धयोरेकत्वमात्रं भासते न शरीरेन्द्रियवत्त्वमपि । न च शरीरेन्द्रियवानहमिदानीमिति केनापि शक्यशङ्कः सौषुप्तानुभव इति यत्किञ्चिदेतत्। नन्वेवं सुषुप्तमात्रस्य मुक्तत्वं भवेत् । ततश्च मोक्षार्थसाधनविधानमनर्थकं स्यात् ।

न। मिथ्याज्ञानकृतत्वाद्बन्धस्य सम्यग्ज्ञानेन मिथ्याज्ञाननिरसनमन्तरेण कस्यापि मुक्तिप्रत्याशाभावात् । 'ब्रह्मैवेदं विश्वम्' (मुं. २-२-११), 'तत्त्वमसि' (छां. ६-८-७) इति च श्रुतिः प्रतिबोधयति सर्वान् । स एव च श्रुत्यर्थः परमार्थः । अथ चैनं परमार्थं न सर्वोऽपि विजानाति, किन्तु मनुष्येषु सहस्रेषु कश्चिदेव पुरुषधौरेय इति न मोक्षसाधनोपदेशस्यानर्थक्यम् , नापि सुप्तमात्रस्य मुक्तत्वं शक्यशङ्कम् । तस्मादग्रहणं नाम नात्मनोऽपूर्वोर्यं धर्मो जायमानः, किं तर्हि स्वभाव एवायं तदद्वैतत्वकृतः । न ह्यात्मन आत्मत्वमद्वितीयत्वं वा परापेक्षया जनयितव्यम् । तदेव हि तस्य तत्त्वम्। 'द्रव्यस्य ह्यविक्रिया तत्त्वम् । परानपेक्षत्वात्' । द्वितीयग्रहणं त्वात्मनः परापेक्षया जायमाना विक्रिया । अतस्तन्न तस्य तत्त्वम् । 'न हि कारकापेक्षं वस्तुनस्तत्त्वम्' ''ति प्रतिज्ञाय तत्सिद्ध्यर्थमुपसंहारे प्रोक्तम् **'यद्धि यस्य नान्यापेक्षं स्वरूपं तत्तस्य तत्त्वम् , यदन्यापेक्षं न तत् तत्त्वम् । अन्याभावेऽभावात्'** इति । अत्र विवक्षितार्थमनादृत्य मृदादेः कारकापेक्षं घटादिरूपं कारकाभावेऽपि तिष्ठतीति नायं वस्तुतत्त्वनिर्धारणे साधको नियम इति कुचोद्यं नोत्थापनीयम् । यस्मात् कारकापेक्षं रूपं न वस्तुनस्तत्त्वमिति प्रतिज्ञानोक्तदृष्टान्तेनापि बाध्यते । मृदो हि कारकापेक्षं घटादिरूपं न मृदस्तत्वम् कारकापेक्षविशेषत्वात् । कारकानपेक्षं यथास्थितमेव तु मृत्त्वं तस्यास्तत्त्वम् । अविकृतस्वभावत्वात् इति युक्तेर्निरातङ्कत्वात्। एवं 'यद्यस्यान्यापेक्षं रूपं न तत्तस्य तत्त्वम् । अन्याभावेऽभावात्' — इत्यपि सुस्थमेव। यदपेक्ष्यैव हि मृदादेर्घटादिरूपं तिष्ठति, तस्य मृदवयवसंहननकालादृष्टादेरभावे घटादिरूपस्याप्यभावान्न तद्रूपं मृदस्तत्त्वम् । अनन्यापेक्षं मृत्त्वमेव तु तस्यास्तत्त्वम् — इति तत्रापि वदितुं शक्यत्वात् । तस्मात् परस्मात्कारणात्प्रतीयमानो वस्तुनो विशेषो न तस्य तत्त्वमिति सम्यगेवोक्तमिति मन्तव्यम् ॥

किं पुनस्तत् परं कारणं यदपेक्षया भवति द्वितीयग्रहणमिति ? एतदुक्तं पूर्वमेव, देहेन्द्रियादिष्वहंममाभिमानकृतं यत् प्रमातृत्वम्, तत्परं कारणं यदपेक्षया द्वैतं गृह्यते स्वप्नजागरितयोरिति । स्वप्ने तावन्नास्ति शरीरेन्द्रियसंघातसंबन्धः पारमार्थिक आत्मन इति सर्वसंप्रतिपन्नमेतत् । अथ च तत्संबन्धाभिनिवेशादेव केवलं तत्र द्वैतग्रहणं भवति, क्रियाकारकफलव्यवहारश्च प्रवर्तते यावत्स्वप्नमित्यविवादम् । जागारितेऽपि तथैव स्यादिति श्लिष्यते । तस्माद्यदपेक्षया भवति द्वैतग्रहणं विशेषो

जाग्रत्स्वप्नयोः, सा अविद्या । तस्या अभावे सुषुप्तिसमाध्योर्द्वैतग्रहणाभावात् । तत्र तदग्रहणं तु न परापेक्षो विशेषः, किं तर्हि स्वभाव एवायमात्मन इति सिद्धम्॥

## २०५. अविद्याविशेषवादिमतस्यात्रानवकाशः -

अत्र **केचिद्** वदन्ति । न किल यथोक्तात्मानात्मेतरेतराध्यासरूपाविद्यामात्राद् द्वैतग्रहणम् , कथं तर्हि, एतदविद्याकारणं मूलाविद्या नाम काचिदस्त्यात्माश्रिता तमावृत्य द्वैतविक्षेपं कुर्वतीति तत्कृतमेवेदं द्वैतग्रहणम् । सुषुप्ते किल मूलाविद्याया विक्षेपशक्त्युपसंहारेऽपि तस्या आवरणशक्तिर्वरीवर्त्येव । अतोऽस्ति तत्राप्यवस्थायां जीवपरयोर्भेदः । तत्र जीवब्रह्मविभागानभ्युपगमे किल ब्रह्मण्येव सौषुप्ताविद्यासांकर्यं स्यादिति । तस्मादसंप्रज्ञातसमाध्याद्यवस्थान्तर एव सर्वद्वैतनिवृत्तिरिति ते मन्यन्ते। यथा चास्य वादस्य श्रुतियुक्त्यनुभवबाह्यत्वं तथा प्रतानितमेवान्यत्रेतीहोपरम्यते । सुषुप्तावग्रहणं स्वाभाविकमेव नाविद्याकृतमिति प्रकृतभाष्यविरोधस्तु स्फुट एवेति न किञ्चिदत्र वक्तव्यमस्तीत्यफलं स्वयंमृतमाराणप्रयासेन ॥

## २०६. सुषप्तिनिदर्शनभाष्यस्य गौडपादीयप्रस्थानेनाविरोधः -

नन्वियं सुषुप्ते द्वैताग्रहणस्य स्वभाविकत्वोक्तिः सांप्रदायिकमतविरुद्धेव प्रतिभाति । यत्कारंण वेदान्तार्थसंप्रदायविदग्रेसरा एवं प्राहुः । 'द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः । बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते' (मां. का. १-१३) इति । तत्त्वाग्रहणं हि निद्रा द्वैतग्रहणप्रसवस्य बीजमिति कृत्वा बीजनिद्रोच्यते। तत्त्वाग्रहणं चाविद्यैवेति सुषुप्ते द्वैताग्रहणस्याप्यविद्याकृतत्वमवारणीयं संप्रदायाध्वनि संचरता । तत्कथमिह तद्विरोधेन प्रस्थानान्तरमेवास्थितमाचार्येणेति? नैष दोषः । सुषुप्तात्मन एवात्र तुरीयत्वेन विवक्षितत्वात् । बाढम्, अध्यारोपितान्यथा-ग्रहणयोर्विश्वतैजसयोरपेक्षया अध्यारोपिताग्रहणस्य प्राज्ञस्य बीजनिद्रायुतत्वमप्यस्ति; परमार्थात्मनस्तु सर्वसाक्षिणो जाग्रत्स्वप्नसुषुप्तिषु त्रिष्वपिग्रहणाग्रहणविवर्जितत्वमेव स्वाभाविकं सवितुरिवाहोरात्रविवर्जितत्वम् । नित्यचैतन्याद्वयदृक्स्वभावत्वात् । तत्र जाग्रत्सवप्नयोरध्यारोपितप्रमातृत्वमप्यवभासत इति न सुविवेचनोऽयं तुरीयस्वभावः। सुषुप्ते पुनः स्वयं विलुप्तप्रमातृत्वादिविभागे सुविवेचनोऽयमिति कृत्वा, आचार्येणेह

सुषुप्तापदेशेन तुरीयस्वभाव एवापाकृतः । नहि जाग्रत्स्वप्नापेक्षया सुषुप्तेः सुषुप्त्यवस्थात्वं शक्यकल्पनम् । न हि तत्र कश्चित्कालिको विशेषोऽस्ति येन तस्यावस्थात्वमाञ्जसं स्यात् । अतः स्वप्रधानदृष्ट्या वीक्षितस्य सुषुप्तात्मनः सर्वोपाधिविवर्जिततुरीयात्मनो व्यतिरिक्तत्वं नास्त्येवेति स्थिते नैव विरुध्यते सुषुप्तेऽग्रहणमात्मस्वभाव एवेत्युक्तिः। गौडपादाचार्यैस्तु माण्डूक्यश्रुत्यनुसारेण सुषुप्तावस्थामापेक्षिकीमङ्गीकृत्यैव प्राज्ञतुर्ययोर्वैलक्षण्यमुक्तम् । अत एव हि तैरग्रहणान्यथाग्रहणयोर्विपर्यासमात्रत्वात् तत्क्षये तुरीयनिश्चय इत्युक्तम् 'अन्यथागृह्णतः स्वप्नो निद्रा तत्त्वमजानतः । विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥' (मां. का. १-१५) इति । अपि चात्मनस्तुरीयस्वभावस्य ग्रहणमिवाग्रहणमपि नैवाञ्जस्या वृत्त्या समस्ति । ग्राह्यद्वितीयस्यैवाभावात् । सुषुप्तात्मत्वेन विभाविते तु तस्मिन्नग्रहणमध्यारोपयन्त्यज्ञाः। यथा जाग्रत्स्वप्नयोर्द्वितीयमगृह्णात्, न तथेहायं गृह्णातीति । तमिमं तेषां भ्रमं निरसितुमेवेयं वाचोयुक्तिः सुषुप्तसमाहितयोरग्रहणादिति। श्रुत्यनुसारी चायं द्वितीयग्रहणनिषेधः । एवं हि श्रुतिः 'यद्वैतन्न पश्यति पश्यन् वै तन्न पश्यति । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् । न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्' (बृ. ४-३-२३) इत्याद्या । अयमत्र श्रुत्यभिप्रायः । यथा ह्यविलुप्तप्रकाशस्वभाव एव सविता प्रकाश्याभावे न प्रकाशयतीत्युच्यते, न तु तावता तस्य प्रकाशस्वभाव्यापायो भवेत् , एवमयमप्यात्मा नित्याविलुप्तग्रहणस्वभाव एव सन् द्वितीयं न गृह्णातीत्युच्यते । ग्रहीतव्यस्य द्वैतस्याभावादेवेति । तदेतदेवाहात्राचार्योऽपीति सर्वं निरवद्यम् ॥

**८२. येषां पुनरीश्वरोऽन्य आत्मनः कार्यं चान्यत्, तेषां भयानिवृत्तिः । भयस्यान्यनिमित्तत्वात् । सतश्चान्यस्य आत्महानानुपपत्तिः । न चासत आत्मलाभः सापेक्षस्यान्यस्य भयहेतुत्वमिति चेत् । न । तस्यापि तुल्यत्वात्। यद्धर्माद्यनुसहायीभूतं नित्यमनित्यं वा**

**निमित्तमपेक्ष्यान्यद् भयकारणं स्यात्, तस्यापि तथाभूतस्यात्महानाभावाद् भयानिवृत्तिः । आत्महाने वा सदसतोरितरेतरापत्तौ सर्वत्र अनाश्वास एव ॥**

**२०७. द्वैतिपक्षे भयनिवृत्त्याकाङ्क्षा नैवास्ति -**

तदेवं विदुषः स्वात्मनोऽन्यस्येश्वरस्य ततोऽन्यस्य कार्यस्य जगतो वा परमार्थतोऽभाव एव, तयोरन्यत्वेन विभाव्यमानत्वं त्वविद्यया — इति स्वपक्षे विद्यया अन्यस्य भयहेतोर्निवृत्तौ 'अभयं प्रतिष्ठां विन्दते' (२-७) इति श्रुत्युपदेशोऽर्थवान् भवेदित्युपपादितम् । अथैतद्व्यतिरेकेण स्वात्मनोऽन्यस्येश्वरस्य कार्यस्य च जगतो वस्तुसत्त्वमेव यदा स्वीक्रियते तदा तस्मिन् पक्षे समुदाहृतश्रुतिः कदर्थिता स्यादिति प्रदर्शयितुमुपक्रमते — **येषां पुनरिति** । कुत एतदित्यत आह — **भयस्यान्य-निमित्तत्वादिति** । नन्वन्यस्य निमित्तस्य प्रहाण्यैव भयं निवर्तिष्यते । तत्राह — **सतश्चान्यस्यात्महानानुपपत्तिः । न चासत आत्मलाभ** इति । अयमाशयः । किं तावद्भयनिमित्तमभिमतमायुष्मतः ? सन्त्येवाध्यात्मिकाधिभौतिकाधिदैविकानि जन्ममृत्युजरारोगचोरव्याघ्राशनिवातादीनि निमित्तानि भये । ईश्वरश्च कर्मानुसारेण फलदातेति चेत् । किमेतानि निमित्तानि वस्तुसन्ति, किं वा असन्ति ? न तावदसन्ति । अनभ्युपगमात् । न च वस्तुसन्ति । वस्तुसतो नाशानुपपत्तेर्भयस्य नित्यसत्त्वप्रसङ्गादिति ॥

नन्वेतानि निमित्तानि कर्मानुसारीण्येव भयोत्पादकानि न स्वतः । तथा परमेश्वरोऽपि । ततोऽधर्मादिनिवृत्त्या भयस्यापि निवृत्त्युपपत्तिः स्यादिति पूर्ववादिशङ्कामुत्थापयति — **सापेक्षस्यान्यस्य भयहेतुत्वमिति चेदिति** । तदेतत्प्रत्याह — **न । तस्यापि तुल्यत्वादिति** । **अभिप्रायं विवृणोति — यद्धर्माद्यनुसहायीभूतं नित्यमनित्यं वा निमित्तमपेक्ष्य अन्यद्भयकारणं स्यात् तस्यापि तथाभूतस्यात्महानाभावाद्भयानिवृत्तिरिति** । भयकारणं

हि धर्माधर्मरूपं[१] ह्यनुसहायीभूतमपेक्षते इति वक्तव्यम् । तच्च कर्मरूपं चेदनित्यम् अपूर्वरूपं चेन्नित्यम् । उभयथापि तदपेक्ष्य यदन्यद्भयकारणं कल्प्यते तस्यापि तथाभूतस्य सापेक्षस्य सत्त्वादेवात्महानाभावाद् विनाशासंभवाद् भयानिवृत्तिरेव । न हि तावदीश्वरस्य फलदातुरभावः, कर्मापूर्वस्य वा आत्महानं भवेत् । अनभ्युपगमात्। न च कर्मणः । सतोः प्रवर्तकयो रागद्वेषयोः कर्मप्रवृत्त्यवश्यंभावात्। नापि रागद्वेषयोरात्महानम् । तयोर्जीवस्वभावत्वादिति भावः । ननु रागद्वेषौ न जीवस्य स्वभावः । अनाद्यविद्यानिमित्तौ हि तौ । पुण्यकर्मभिस्तोषितस्येश्वर-स्यानुग्रहाज्जीवस्य स्वात्मज्ञाने जाते भयहेतुकर्मनाशः, ततश्च मोक्ष इति न कश्चिद्दोष इति चेत् । अत्र प्रष्टव्योऽसि । अविद्यारागद्वेषादयो भयनिमित्तानुसहायीभूताः परमेश्वरश्च किं सद्रूपाः किं वा असद्रूपा इति ? असद्रूपाश्चेत् तर्ह्यविद्याकल्पितमेव निमित्तमित्यस्मद्वर्त्मनि प्रविष्टस्त्वम् । अथ सद्रूपाः, न तर्हि तेषामात्महानम्, अत्यन्तासतो मोक्षस्यात्मलाभो वा शक्यशङ्कः । 'नासतो विद्यते भावो नाभावो विद्यते सतः' इति न्यायात् । तस्मन्निमित्तस्य वस्तुसद्रूपत्वे आत्महानानुपपत्तिरिति स एव दोषः पुनरावर्तते सहायसापेक्षनिमित्तवादेऽपि । अथ वैयात्यात् सतोऽप्यात्महानमप्यभ्युपगच्छसि, तत्रोच्यते — **आत्महाने वा सदसतोरितरेतरापत्तौ सर्वत्रनाश्वास एवेति** । सतो भयस्य भयनिमित्तस्य वा आत्महानेऽभ्युपगम्यमाने सदप्यसत्त्वमापद्यत इत्युक्तं स्यात् । ततश्च सर्वत्राविश्वास एव । शास्त्रं प्रमाणभूतमपि कदाचित्प्रामाण्यं जह्यात्, तथेश्वरस्याप्य-नीश्वरत्वमात्महानं वा, मोक्षो नित्योऽप्यनित्यो भवेत् । यदि विद्यमानं भयमभयं भवेत् तर्ह्यभयरूपो मोक्षोऽपि भयं भवेदिति सर्वत्र लैकिके शास्त्रीये च व्यवहारे साधनफलसंबन्धव्यवहारे कुत्रचिदपि विस्रम्भो न भवेत् । इदमित्थमिति निश्चितमप्यतथाभवेदिति महदनिष्टमापद्येत । तस्माद्वस्तुनः वेदितुरन्यस्मिन् ईश्वरे, कार्ये वा जगत्यभ्युगम्यमाने भयनिवृत्तिः सर्वथा नाकाङ्क्षितव्येति 'अभयं प्रतिष्ठां विन्दते' इति श्रुतिरप्रमाणीकृतैव भवेदस्मिन् पक्षे — इत्यभिप्रायः ॥

१. 'धर्माद्यनुसहायीभूतम्' इति मुद्रितकोशानुसारेणेदं लिखितम् । तत्र 'धर्माकरणाधर्माचरणरूपम्' इत्यर्थो बोध्यः ॥

## २०८. द्वैतिव्याख्यानदूषणम् —

एतेन येऽपि श्रुत्यर्थमन्यथैव कल्पयन्ति स्वमनीषिकया 'यदेतस्मिन् परे विष्णौ उदरं जीवगत्वतः । भेदं करोति तेनैव भयमस्य महद्भवेत् ॥ इत्युक्तः परो विष्णुरेभ्य उच्चः स एव तु । त उदा जीवसङ्घाः स्युरुदरं तद्गतान्तरम् ॥ तदेव ब्रह्म भयकृद्विदुषोऽविदुषस्तथा । विदुषोऽल्पभयं कुर्याद्यावन्मुक्तिं व्रजत्यसौ । अथाभयं भवेद्ब्रह्म यस्य मुक्तस्य सर्वदा ॥ तस्माद्वाय्वादयो देवा विद्वांसोऽपि विशेषतः । भीताः स्वकर्म कुर्वन्ति विष्णोः प्रीत्यर्थमञ्जसा ॥' इति । तेषां तु मतमतीव हेयमित्युक्तं भवति । न हि विष्णौ उदाशब्दवाच्यजीवगतो भेद उदरशब्दवाच्योऽस्तीति कोऽपि मतिं करोति स्वप्नेऽपि, येन तस्य महद्भयं श्रुतिर्ब्रूयात् । न च विदुषोऽविदुषश्चभयं तुल्यवत्कुर्वन्नीश्वरो नैर्घृण्यदोषग्रस्तो विदुषोऽल्पभयं कुर्वन्वा वैषम्यदोषभाजनं भवन् वस्तुत ईश्वरो भवेत् । न च वाय्वादयो भीता एव स्वकर्मकुर्वन्तो विद्वांसः स्युरिति वा अनुन्मत्तः कल्पयेत् । तथा हि विद्वांसोऽप्यविद्वांसः स्युरिति तेषां मुक्तिप्रत्याशा वा, मुक्तानां भयनिवृत्तिः स्यादिति श्रद्धा वा कथं समुदियात्? इति ॥

**८३. एकत्वपक्षे पुनः सनिमित्तस्य संसारस्याविद्याकल्पितत्वाददोषः । तैमिरिकदृष्टस्य हि द्वितीयचन्द्रस्य नात्मलाभो नाशो वा अस्ति । विद्याविद्ययोस्तद्धर्मत्वमिति चेत् । न । प्रत्यक्षत्वात् । विवेकाविवेकौ रूपादिवत् प्रत्यक्षावुपलभ्येते अन्तःकरणस्थौ । न हि रूपस्य प्रत्यक्षस्य सतो द्रष्टृधर्मत्वम् । अविद्या च स्वानुभवेन निरूप्यते[1] 'मूढोऽहम्,**

---

१. 'रूप्यते' इति वा ॥

**अविविक्तं मम विज्ञानम्' इति । तथा विद्याविवेकोऽनुभूयते । उपदिशन्ति चान्येभ्य आत्मनो विद्यां बुधाः । तथा च अन्ये अवधारयन्ति । तस्मान्नामरूपपक्षस्यैव विद्याविद्ये । नामरूपे च नात्मधर्मौ । (आकाशो वै नाम[1]) 'नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' (छां. ८-१४-१) इति श्रुत्यन्तरात् । ते च पुनर्नामरूपे सवितर्यहोरात्रे इव कल्पिते न परमार्थतो विद्यमाने ॥**

### २०९. द्वैतस्य विकल्पनामात्रत्वम् -

तदेवम् 'अभयं प्रतिष्ठां विन्दते' इत्येतद्वचनं नाञ्जसं भवेद् येषां वेदितुरन्य ईश्वर इत्यतः परः एव स्यादेवंविदिति व्यतिरेकमुखेनाप्युपपादितम् । अथ स्वपक्षमेवोपसंहरत्यन्वारम्भेण तत्र वादिसंभावितं दोषान्तरं परिहरिष्यन् — **एकत्वपक्षे पुनः सनिमित्तस्य संसारस्याविद्याकल्पितत्वाददोष इति ।** परमात्मा ह्येकः परमार्थ इत्यातिष्ठमानानामस्माकं मते हि संसारभयस्य तन्निमित्तस्य च द्वितीयस्य अविद्याकल्पितत्वाभ्युपगमात् । न सतोऽन्यस्य द्वितीयात्महानमसतश्च मोक्षरूपाभयस्यात्मलाभो वा स्वीकृतः स्यादित्यर्थः । ननु भवत्पक्षेऽपि भयनिमित्तस्येश्वरस्य नाशः, अभयस्य चाविद्यमानस्योत्पत्तिरित्युक्तदोषो दुर्निवारण एवेति शङ्कायामाह — **तैमिरिकस्य हि द्वितीयचन्द्रस्य नात्मलोभो नाशो वा अस्तीति ।** न हि द्वितीयचन्द्रो वस्तुत एवोत्पद्यते तिमिरदोषादिति वा, वस्तुत एव च तन्नाशो भवति वितिमिरस्येति वा अभ्युपगम्यते केनचित् । अविद्याविकल्पनामात्रत्वाद् द्वितीयचन्द्रस्य । 'नास्त्यभूद्वा द्वितीयश्चन्द्रः,

---

१. कोष्ठान्तर्भावितग्रन्थो न सर्वकोशेषुः; एकस्मिन्नेव तु दृश्यत इति ज्ञायते ॥

तिमिरदोषनिमित्तेन तु मया विकल्पित एष' इति हि वितिमिरेण विज्ञायते । एवमेवेहापि वेदितुरप्यस्य भयनिमित्तस्य विकल्पनामात्रत्वात् तस्य नाशो वा, अविद्यमानस्याभयस्योत्पत्तिर्वा समस्तीत्यभिप्रायः ॥

## २१०. द्वैतदर्शननिवृत्तिविषये एकदेशिमतद्वयं तद्दूषणं च -

ननु द्वैतदर्शनस्य वस्तुसत्त्वे तद्विनाशानुपपत्तिः । उक्तदोषानुषङ्गात् । अवस्तुत्वे तु द्वितीयचन्द्रवदेव विकल्पनामात्रत्वात् परमार्थदोषनिमित्तत्वमायाति । दृष्टान्ते परमार्थतिमिरदोषकृतत्वाद् द्वितीयचन्द्रस्य । ततश्च तस्य वेदान्तवाक्यजन्यज्ञानमात्रादनिवृत्तिरिति प्राप्नोति । न ह्याप्तोपदेशमात्राद् द्वितीयचन्द्रनिवृत्तिरस्तीति चेत् — अत्राहुरस्मदीयाः केचित् । अस्त्येवात्रापि कारणाविद्याख्यो दोषः । न च तस्य परमार्थत्वमप्यभ्युपगन्तव्यं भवतीत्युक्तदोषापत्तिः । अभ्युपगम्यते हि तस्य यावद्व्यवहारं सत्त्वम् । ब्रह्मविद्यया तु तस्य विनिवृत्त्युपपत्तिः । ब्रह्मसमानपरमार्थसत्त्वानभ्युपगमात् । तद्विनिवृत्त्यैव च द्वैतदर्शनस्यात्यन्तिकी निवृत्तिः। अत एव सुषुप्ते विलीनस्यापि तस्य पुनरप्युत्थितस्यानुवृत्तिरवकल्पते। सुषुप्ते द्वैतदर्शनमूलभूताया अविद्यायाः सत्त्वादिति । अपरे त्वेतां मूलाविद्यामनभ्युपयन्तोऽप्याहुः । सुषुप्ते द्वैतदर्शनविक्षेपमात्रं निवृत्तं तत्संस्कारोऽग्रहणं च नैव निवृत्ते इति द्वैतदर्शनस्योपपत्तिः सुप्तोत्थितस्य । अत एव च किल निश्चितेऽपि वाक्यप्रमाणादद्वैततत्त्वे, अनादिमिथ्यादर्शनाभ्यासोपचितनिरूढनिबिडतत्संस्कारसामर्थ्यानुद्वैतदर्शनानुवृत्तिः । तन्निवृत्तये वाक्यजन्यतत्त्वदर्शनाभ्यासोऽपेक्ष्यते तत्त्वसाक्षात्कारार्थम् । तमन्तरेण ह्यनाहितविद्यापटुसंस्कारस्य तत्त्वनिश्चयेऽपि मिथ्यार्थप्रतिभासानुवृत्तिरेव स्यादिति । तत्र निरस्त एव तावन्मूलाविद्यावादः प्राक्। न च द्वितीयचन्द्रदर्शनं वास्तविकं, येन तदर्थं कारणगवेषणमाञ्जसं स्यात् । न हि स्वाप्नतैमिरिकस्य द्वितीयचन्द्रदर्शनं केनचित्पारमार्थिकेन दोषेण सञ्जातः स्यादिति विवेकिभिः कल्प्यते । न च जागरितदर्शनस्य ततो विशेषः संभाव्यते । स्वप्नेपि जाग्रद्वदेव 'अहमिमं द्वितीयचन्द्रं पश्यामि' इत्यभिनिवेशदर्शनात् । सर्वं ह्येतद्विकल्पनामात्रं न तथ्यत एव द्वितीयचन्द्रस्योत्पत्तिर्नाशो वा समस्तीत्युक्तम् । तन्न प्रस्मर्तव्यम् । न च द्वितीयपक्षो क्षोदक्षमः । मिथ्याज्ञानं वा तत्संस्कारो वा सर्वा

हि सा अविद्यैवेति विद्यया तद्बाधे सति तदेकदेशावशेषकल्पनानुपपत्तेः । सुषुप्तौ च प्रथमपक्षाभ्यूहितमूलाविद्याया वा द्वितीयपक्षकल्पितमिथ्याज्ञानसंस्कार-सचिवाग्रहणलक्षणाविद्याया वा अवशेषो यथा सर्वथा न संभवति, तथा प्रतिपादितमधस्तात् सौषुप्ताग्रहणभाष्यार्थविमर्शनावसरे — इति नावशिष्यते तत्र वक्तव्यं किञ्चित् । न च वाक्यमात्रान्नोत्पद्यत एव विद्या । येन वाक्यज्ञानाभ्यासादिसाधनान्तरं मृग्येत । दशमवाक्यादिवात्राप्यविद्या-निवर्तकविद्योत्पत्त्युपपत्तेः । वेदितुरात्मत्वे सति नित्यापरोक्षस्य परमात्मनस्तज्ज्ञापन-व्यतिरेकेणान्यापेक्षणे कारणाभावाच्चेति । तस्माद्वेदितुरन्यत्वेन दृष्टस्य द्वितीयस्य विकल्पनामात्रत्वात्, विकल्पनायाश्चोत्पत्तिविनाशयोरनाशङ्क्यत्वात्, नैकत्वपक्षे द्वैतीयीकपक्षे इव सत आत्महानिर्वा असत आत्मलाभो वा स्वप्नेऽपि कल्पयितुं शक्यत इति सर्वं सुस्थम् ॥

## २११. विद्याविद्यसतत्त्वविमर्शः -

ननु द्वितीयचन्द्रस्य विकल्पनामात्रत्वम् , विकल्पना चाविद्येति विद्यया तन्निवृत्त्युपपत्तिरित्युक्तम् । तत्र कथमेतावता द्वैतिपक्षोक्तदोषान्निस्तारो भवेत् ? अविद्यया द्वैतदर्शनः सन् पुरुषो बद्धः संसरति, एकत्वविद्यया चाविद्यां विधूय मुक्तो भवतीति खलूक्तं भवति भवता । तत्र यथैव परेषां भयनिमित्तस्य सतो निवृत्त्यनुपपत्तिः, अभयस्य चासत उत्पत्त्यनुपपत्तिश्च चोद्यत, तथैव भवतोऽप्यविद्याया बन्धनिमित्तभूताया विनिवृत्त्यनुपपत्तिः विद्यायाश्च तन्निवर्तिन्या उत्पत्त्यनुपपत्तिश्चेति घट्टकुटीप्रभातमेव । न हि विद्याविद्ये विनिवर्त्यविनिवर्तिके न स्त एवेत्यनुमन्तये भवान् । तदा हि शास्त्रानारम्भ एव प्रसज्येतेति शङ्कते — **विद्या-विद्ययोस्तद्धर्मत्वमिति चेदिति** । यदापि द्वैतदर्शनतन्निवृत्त्योर्विकल्पमात्रत्वम्, तदापि तद्धेतुभूतयोर्विद्याविद्ययोरात्मधर्मत्वमवश्याश्रयणीयं भवेत् । अन्यथा, एकत्वपक्षस्यैवानुत्थानादिति भावः ॥

अस्याः शङ्कायाः परिहारः — न। प्रत्यक्षत्वादिति । संग्रहवाक्यस्य विवरणं तु **विवेकाविवेकौ रूपादिवदित्यादि विद्याविद्ये** इत्येतदन्तम् । विद्या हि नाम विवेकः, विविच्यात्मानात्मनोः स्वरूपनिर्धारणम्; आत्मा देहाद्यहङ्कारपर्यन्तस्य

सर्वस्य साक्षी स्वरूपतः सत्यज्ञानानन्तानन्दलक्षणं निर्विशेषं ब्रह्मैवेति, अनात्मत्वेन विभाव्यमानं तु मायास्वप्नगन्धर्वनगरादिवदनृतमेव सत्यवदाभासमानमिति च निश्चयः। अविद्या त्वविवेकः, एतयोरेवात्मानात्मनोर्विविच्य निश्चयाभावादित-रेतरतद्धर्माध्यासलक्षणं मिथ्याध्यवसानं स्वाभाविकं लोकस्य । तावेतौ विद्याविद्यापराभिधानौ विवेकाविवेकौ प्रत्यक्षावुपलभ्येते अन्तःकरणस्थौ, साक्षादनुभूयेते आत्मना, चक्षुरादिना रूपादिवत्। अत्र दृष्टान्तेन विवक्षितमंशं स्फोरयति — **न हि रूपस्य प्रत्यक्षस्य सतो द्रष्टृधर्मत्वमिति**। न हि रूपादीनां विषयधर्मत्वेन प्रत्यक्षं निरूप्यमाणानां विषयिद्रष्टृधर्मत्वं कश्चिदध्यवस्यति 'अहमेवैवं रूपवान्, शब्दवान्, स्पर्शवान्' इत्यादिप्रकारेण; 'इदं वस्तु दृश्यमानरूपादिमत्' इत्येव तु सर्वोऽध्यवस्यति । विषयधर्मत्वेनैव नियमेन संवेद्यत्वाद्रूपादीनाम् । एवं नियमेनान्तःकरणस्थत्वेन संवेद्ये विद्याविद्ये कथं वेदितुर्धर्मत्वेन शक्ये अध्यवसातुम्? किञ्चान्यत्, यद्येते आत्मनः स्वरूपभूते एव सवितुः प्रकाशवत्, तर्हि नैनयोः संयोगवियोगौ स्याताम् । भवतस्तु। तत्कथमित्यत आह — **उपदिशन्ति चान्येभ्य आत्मनो विद्यां बुधाः । तथा चान्येऽवधारयन्तीति** । उपदिष्टस्य शिष्यस्य विद्यया संयोगो भवति, अविद्यया च वियोग इति प्रसिद्धमेतत् । तदेवं संयोगवियोगदर्शनादेवैते न सवितुः प्रकाशवदात्मनो धर्मभूते इत्यवगम्यते इत्याह — **तस्मान्नामरूपपक्षस्यैव विद्याविद्ये** इति ॥

नन्वस्तु नामरूपपक्षनिवेश्ये एव ते इति, तथापि कथं तयोर्नात्मधर्मत्वम्? न हि नामरूपे आत्मनोऽन्यत्र जातुचिद् दृष्टचरे इत्याशङ्क्य स्वाभिप्रायं विशदयति — **नामरूपे च नात्मधर्माविति** । अत्र च प्रमाणम् 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा' (छां. ८-१४-१) इति । इयं हि श्रुतिः 'ते यदन्तरा' इति नामरूपाभ्यामर्थान्तरभूतमात्मानं व्यपदिशति। प्रसिद्धं चेदं नामरूपे व्याकृते आत्मचैतन्यविषयभूते एवानुभूयेते इति । एतेनेदमपि चोद्यमपास्तं भवति विद्याविद्ययोर्विषयधर्मत्वे 'अहं विद्वान्', 'अहमविद्वान्' इत्यहंमाकारप्रतीतिः कथम्? इदमाकारप्रतीतिरेव हि विषयस्य युक्तेति । अहमोऽपि हि साक्षिचैतन्यविषयत्वेनैवानुभवः इति । अतो विषयभूते ते नामरूपे न कथञ्चन स्वविषयिणो धर्मौ भवितुमर्हत इति सिद्धम् ॥

## २१२. विद्याविद्ये आत्मनि कल्पिते -

हन्त तर्हि विषयिण आत्मनस्ते अन्ये एवेति बहु समञ्जसं कल्पितम् । यतस्तत्परिच्छिन्नं ब्रह्म कथं सत्यं ज्ञानमनन्तं च प्रतिज्ञायेतेत्यहो वृद्धिमिच्छतस्तव मूलमपि नष्टमिति चेत् । तत्र समाधिः — **ते च नामरूपे सवितर्यहोरात्रे इव कल्पिते न परमार्थतो विद्यमाने इति** । अयं भावः । सत्यमेवं स्यात्, यद्येते नामरूपे स्वातन्त्र्येणैवात्मनः प्रविभक्ते वस्तुसती स्याताम् । न चैतदस्ति । न ह्यात्मनस्ते तत्त्वतो वस्त्वन्तरे, अपि तु तत्त्वान्यत्वाभ्यामनिर्वचनीये सलिलत्वतदन्यत्वाभ्यामनिर्वचनीयफेनबुद्बुदादिवदित्यवोचाम । इदं च तयोर्व्याकृतावस्थामपेक्ष्योक्तम् । सुषुप्तप्रलयाद्यवस्थासु हि ते अव्याकृते आत्मनैकतामेव गच्छतः । अव्याकृतफेनादीव सलिलेनेति परमार्थतो नैव स्त इति प्रसिद्धम् । एवं विद्याविद्ययोरप्यात्मदृश्यत्वाविशेषात्, नामरूपपक्षत्वे सति नैवात्मसत्ताव्यतिरिक्तं परमार्थसत्त्वं तयोः शक्यशङ्कमिति ते **सवितर्यहोरात्र इवात्मनि कल्पिते** इत्यूरीकर्तव्यम् । न हि सवितरि नित्यप्रकाशस्वभावे रात्रिसंसर्गः शक्यशङ्कः, कुत एव रात्रिविगमनिमित्ताद्विभाव्योऽहःसंपर्कः ? अथ च जना व्यवहरन्ति 'सविता दृश्यतेऽहन्येव न रात्राविति'। स त्वहोरात्रव्यवहारो न नित्यप्रकाशस्वभावस्य सवितुरपेक्षया, किं तु तत्प्रकाश्यभूमिष्ठाद्यपेक्षयेति स्पष्टमेव। एवं 'मूढोऽहं नात्मानं विविक्तमवेदिषम्, इदानीं तु वेद्मि, इति च विद्याविद्याव्यवहारोऽन्तःकरणोपाधिकप्रमात्रपेक्षयैव । न पुनर्नित्यज्ञान-स्वभावस्यात्मनोऽपेक्षयेति सिद्धं विद्याविद्ये अपि कल्पिते एवेति । अतो न ताभ्यामात्मनः सत्यज्ञानानन्तस्वाभाव्यस्य किञ्चिद्भवतीति ॥

इदं त्विह रहस्यम् । यद्यप्यविवेकात्मिका अविद्या विवेकात्मिका च विद्या न केवलस्यात्मनो भवितुमर्हतः । आत्मनः कूटस्थनित्यचैतन्यस्वाभाव्यात् । नापि केवलस्यान्तःकरणस्य । तस्या अचेतनत्वात् । तथाप्यन्तःकरणतोऽविविक्तस्वभाव एवात्मनि प्रमातृतां गते विद्याविद्ये दृश्येते इत्यन्तःकरणे ते अध्यारोप्येते वेदान्ताभियुक्तैरात्मनो नित्यशुद्धबुद्धमुक्तस्वभावतां प्रदर्शयितुम् । अन्तःकरणाभावे सुषुप्तिसमाध्यादावदर्शनादिति ॥

**२१३. प्रसङ्गादेकदेशीयकल्पितप्रस्थाननिराकरणम् -**

अत्र **केचित्** — यद्यविद्या अन्तःकरणस्था, न तर्हि सा आत्माश्रया स्यादिति भीताः प्रक्रियान्तरं प्रकल्प्य भाष्यार्थमेवं व्याचख्युः । चिन्मात्रतन्त्रा अनादिरनिर्वाच्याविद्या अन्तःकरणरूपेण परिणमते । तच्चान्तःकरणं तामससात्त्विकावस्थाभेदेन भ्रान्तिसम्यग्ज्ञानाकारेण परिणमते । तस्मिन् प्रतिबिम्बितश्चिद्धातुः स्वेनोपाधिधर्मेणैव भ्रान्तः सम्यग्दर्शीति च व्यवह्रियते । अतो न तत्त्वतो विद्याविद्यावत्त्वमात्मन इति । तत्र यदि तावदियं चित्तन्त्रा अविद्या नामरूपबीजादव्याकृतादिशब्दवाच्यादभिन्ना, तर्हि सैवात्मानात्माविवेक-लक्षणाविद्याकल्पितेति नाविद्याभ्रान्तिकल्पिका । अथान्यैव सेत्युच्यते, न तर्हि तस्या अस्तित्वे, स्वपरिणामभूतान्तःकरणपरिणामेन भ्रान्त्यादिरूपधारणे च प्रमाणमस्तीत्यभित्तिचित्रमेतत् स्यात् । अकल्पितायास्तस्या एवंपरिणामशालित्वे विद्यया तद्बाधानुपपत्तिश्च स्यात् । भाष्याक्षरबहिर्भूतं चैतत्साङ्ख्यसगोत्रं प्रस्थानमित्यलं सुस्फुटदोषस्यास्य विमर्शनप्रयासेनेत्युपरम्यते ॥

**८४. अभेदे 'एतमानन्दमयमात्मान-मुपसंक्रामति' इति कर्मकर्तृत्वानुपपत्तिरिति चेत् । न । विज्ञानमात्रत्वात् संक्रमणस्य । न जलूकादिवत् संक्रमणम् इहोपदिश्यते, किं तर्हि विज्ञानमात्रं संकमणश्रुतेरर्थः । ननु मुख्यमेव संक्रमणं श्रूयते उपसंक्रामतीति इति चेत् । न । अन्नमये अदर्शनात् । न ह्यन्नमयम् उपसंक्रामतो बाह्यादस्माल्लोकात् जलूकावत् संक्रमणं दृश्यते, अन्यथा वा । मनोमयस्य बहिर्निर्गतस्य**

**विज्ञानमयस्य वा पुनः प्रत्यावृत्त्य[1] आत्मसंक्रमणम् इति चेत् । न । स्वात्मनि क्रियाविरोधात् । अन्योऽन्नमयमन्यम् उपसंक्रामति इति प्रकृत्य मनोमयो विज्ञानमयो वा स्वात्मानमेवोपसंक्रामतीति विरोधः स्यात् । तथा नान्दमयस्य आत्मसंक्रमणमुपपद्यते । तस्मान्न प्राप्तिः संक्रमणम्, नाप्यन्नमयादीनामन्यतमकर्तृकम् । पारिशेष्यात्, अन्नमयाद्यानन्दमयान्तात्मव्यतिरिक्तकर्तृकं ज्ञानमात्रं च संक्रमणम् उपपद्यते ॥**

**२१४. संक्रमणमत्र न मुख्यम्, किं तु ज्ञानरूपम् -**

'स य एवं वित् .... एतमानन्दमयमात्मानमुपसंक्रामति' इति वाक्यो कोऽयमेवंवित् परामृष्ट इत्येतद् विमृश्य निर्धारितम् पर एवायमेवंवित्, नान्य इति । अथेदानीं कथं संक्रामतीत्येतन्निर्णेतुकामः पूर्ववादि शङ्कामभेदपक्षगतामुत्थापयति — **अभेदे 'एतमानन्दमयमात्मानमुपसंक्रामति' इति कर्मकर्तृत्वानुपपत्तिरिति चेदिति।** स एव चेत्परमात्मा आनन्दमयः, तत्र कथं स एव स्वमात्मानमुपसंक्रामेत् ? — इति शङ्कितुराशयः । तदेतत् प्रत्याह — **न । विज्ञानमात्रत्वाद् संक्रमणस्येति ।** अस्यैव वाक्यस्य विवरणम् — **जलूकावदित्यादि ॥**

---

१. 'प्रत्यावृत्त्या' वा ॥

पूर्ववादी शङ्कते — **ननु मुख्यमेव संक्रमणं श्रूयते** । पादविक्षेपकर्मणः क्रामतेरुपोपसृष्टस्य गमनपूर्वकप्राप्तिरेव मुख्योर्थः । तं विहाय किमिति गौणोऽर्थः कल्प्यते ? मुख्यार्थस्वीकारेण हि अस्माल्लोकात् प्रेत्य संक्रामतीति मुख्यार्थानुगमश्चानुगृह्येत । अतस्तदानुगुण्येन 'तत्सृष्ट्वा तदेवानुप्राविशत्' (२-६) इति श्रुत्यर्थोऽत्र प्रत्यभिज्ञायत इति प्रकल्प्यताम् । अन्यथा वा । ब्रह्मविदाप्नोतीति च ब्रह्मोपासनानियोग एव स्वीक्रियताम् । एवं हि मुख्यसंक्रमणश्रुतिर्न हापिता स्यादिति । तामेतां शङ्कां प्रत्याचष्टे — **न । अन्नमयोऽदर्शनादिति** । न तावन्नियोगोऽत्र स्वीकार्यः । एतमानन्दमयमात्मानमुपसंक्रामतीतीहस्थस्यैवानन्दमयात्मनो संक्रमणकर्मत्वेन श्रूयमाणत्वात् । न च बाह्याल्लोकादागत्य तत्प्राप्तिरभिप्रेता स्यात् । तददर्शनादित्यभिप्रायः । अदर्शनमेव स्पष्टयति — **न ह्यन्नमयमुपसंक्रामत** इत्यादिना **अन्यथा वे**त्यन्तेन । अन्नमयमात्मानमुपसंक्रामतीत्यत्र तावत् संक्रमणं प्राप्तिरिति नावकल्पते । न ह्यस्माल्लोकाद् बाह्यात्प्रेत्य संक्रामतीत्यत्र शरीरमेतत् प्राप्य बाह्यलोकमाश्रयान्तरं मुञ्चतीति वा, शाखामृगवत्ततोऽत्र चङ्क्रमत इति वा, नीडमिव पक्षी प्रविशतीति वा, शक्यं कल्पयितुम् । अन्नमय एव स्थितस्य कथमपि तत्संक्रमणानुपपत्तेरित्यभिप्रायः । अथ पूर्वपादी प्रकारान्तरेणैव मुख्यसंक्रमणमुपपादयिष्यामीति प्रत्यवतिष्ठते — **मनोमयस्य बहिर्निर्गतस्य विज्ञानमयस्य वेत्यादिना चेदित्यन्तेन** । मनोमयो विज्ञानमयो वा, एवं संक्रामतीति कल्प्यताम् । तस्य च देहाद्बहिर्विषयान्तरगमनसंभवात्, ततः पुनः प्रत्यावृत्यान्नमयात्मप्राप्तिरपि मुख्या समुपपद्यत इत्यभिप्रायः । यद्यपि 'स य एवंवित्' इत्युपक्रम्य प्रकृतोपदिष्टज्ञानवतः फलमेवोपदेष्टव्यं न त्वन्नमयप्राप्तिमात्रम्, तथापि स्वात्मभूतस्याप्यन्नमयस्य मुख्यप्राप्तिरेवंविधा नाशक्योपपादनेति संभवनार्थमेवमुक्तम् । एवमेव ब्रह्मोपासकोऽस्माल्लोकात् प्रेत्य कथञ्चित्स्वात्मानमप्यन्नमयादिक्रमेण प्राप्स्यतीत्याशयोऽत्रकल्पनीयः । सिद्धान्ती तु यद्यप्यन्नमयप्राप्तिरेवं कथञ्चिदुपपादनीया भवेत्, तथाप्येवंविदो मनोमयविज्ञानमयान्यतरत्वे मुख्यं स्वात्मसंक्रमणं न संभवतीति चोदितदोषतादवस्थ्यमाह — **न । स्वात्मनि क्रियाविरोधादिति** । प्रक्रमभङ्गश्चैवं प्राप्नोतीत्याह — **अन्य** इत्यादिना । अन्यो

मनोमयो विज्ञानमयो वा बहिर्निर्गतस्तः पर्येत्य स्वात्मनोऽन्यमन्नमयात्मानुपसंक्रामतीति मुख्यसंक्रमणोपपादनं प्रक्रम्य मनोमयो विज्ञानमयो वा स्वात्मानमेव मनोमयं विज्ञानमयं वोपसंक्रामतीति गौणोपसंक्रमणमङ्गीकर्तुः प्रतिज्ञाहानिमात्रं फलेन्नेष्टसिद्धिरिति भावः । अथैतद्दोषपरिजिहीर्षया आनन्दमय एवैवंवित्त्वेन स्वीक्रियते, तदापि दोषादनिस्तार एवेत्याह — **तथेति** । तस्मान्मुख्यसंक्रमणवादः सर्वथाप्यनुपपन्न इत्युपसंहरति — **तस्मान्न प्राप्तिः संक्रमणमि**त्यादिना । का तर्हि संक्रमणोपदेशस्य गतिरिति पृच्छायामाह — **पारिशेष्यादि**त्यादि **उपपद्यत** इत्यन्तम्। इह खलु 'ब्रह्मवित्' 'एवंवित्' इति च मुख्यं वेदनं ब्रह्मात्मत्वज्ञानम्, संक्रमणं तु गौणमिति वा, वेदनमुपासनं संक्रमणं तु प्राप्तिरूपं मुख्यमिति वा द्वौ पक्षौ संभावनीयौ। तत्र द्वितीयः पक्षः सावद्यत्वेन परित्यक्त इति प्रथम एव परिशिष्यते । तदनुगुणमेव च व्याख्यातमस्माभिरित्याह — **अन्नमयाद्यानन्दमयान्तव्यतिरिक्तकर्तृकं ज्ञानमात्रं च संक्रमणमुपपद्यत इति** ॥

**८५. ज्ञानमात्रत्वे च आनन्दमयान्तःस्थस्यैव सर्वान्तरस्य आकाशाद्यन्नमयान्तं कार्यं सृष्ट्वा अनुप्रविष्टस्य हृदयगुहाभिसंबन्धादन्नमयादिष्वनात्मसु आत्मविभ्रमः संक्रमणेन, आत्मविवेकविज्ञानोत्पत्त्या,[१] विनश्यति । तदेतस्मिन् अविद्याविभ्रमनाशे संक्रमणशब्द उपचर्यते । न ह्यन्यथा सर्वगतस्य आत्मन संक्रमणम् उपपद्यते । वस्त्वन्तराभावाच्च । न च स्वात्मन एव संक्रमणम् । न हि जलूका आत्मानमेव संक्रामति ॥२८॥**

१. 'संक्रमणात्मकविवेकविज्ञानोत्पत्त्या' वा ॥

## २१५. संक्रमणशब्दस्य ज्ञानार्थत्वे न काचिदनुपपत्तिः -

ननु गौणपक्षे वा कथं सक्रमणमुपपद्यते ? न ह्यात्मा स्वात्मानमेव जानातीति युज्यते । अन्यो ह्यन्यं जानीयादिति । तत्राह — **ज्ञानमात्रत्वे त्वित्यादिना उपचर्यत** इत्यन्तेन । आनन्दमयान्तःस्थितस्यैव तद्व्यतिरिक्तस्य सतः परमात्मनो नित्यशुद्धबुद्धमुक्तस्वभावस्य — आकाशाद्यन्नमयान्तं यथोपवर्णितं कार्यं सृष्ट्वा तदेवानुप्रविष्टस्य — द्रष्टृत्वश्रोतृत्वादिविशेषधर्मवत इव विभाव्यमानस्य, अन्नमयादिष्वनात्मस्वात्मविभ्रमः स्यात् कोशात्मनोरविवेकात् । तस्यैव च यथाप्रदर्शितानुक्रमेण कोशात्मविवेचनपूर्वकं तयोः स्वरूपावधारणेन संक्रमणेन नित्यप्राप्तस्यैवात्मनः प्राप्तिः स्यात् । यद्यपि केनापि ज्ञानेन नात्मा साक्षाद्विषयीक्रियते अयमसाविति, तथापि यथोक्ताविद्याभ्रमनाश एव संक्रमणं विज्ञानम् — इति चोपचर्यते । स्वयंप्रकाशस्य तस्यानात्मप्रमेयवदागन्तुकविज्ञानापेक्षणात्स्वावभासार्थमिति न किञ्चिदिहानुपपन्नमित्यभिप्रायः । अत्र च 'एतमन्नमयमात्मानमुपसंक्रामति' इत्याद्यनुक्रमोपदेशस्त्वात्मन्यध्यारोपितपञ्चकोशात्मभावभ्रान्तिमशेषतो व्यपोहयत्येवंविदिति ज्ञापनार्थं, न त्वेष एवानुक्रमोऽवश्यमाश्रयणीयोऽविद्याविभ्रमध्वस्तावित्यभिप्रायेणेति सर्वमनवद्यम् ॥

## २१६. संक्रमणवाक्यार्थोपसंहारः -

कस्मात्पुनरेवं वक्ररीतिरनुस्रियते संक्रमणस्य गमनपूर्वकप्राप्तिरूपमेव मुख्यं संक्रमणं किमिति नाश्रीयत इत्याशङ्क्य मुख्यसंक्रमणासंभवमुपपादितं स्मारयति वाक्यार्थविचारमुपसंहरन् — **न ह्यन्यथेति** । देशकालादिव्यवहितं ह्यन्यद्वस्त्वन्येन संक्रम्यत इत्युपपादितम् । अयं तु सर्वगतः परमात्मा वेदितृस्वरूपाव्यतिरिक्तस्तद्व्यतिरिक्तो वा कथं संक्रंस्यत इति भावः । न च स्वरूपाव्यतिरिक्तोऽन्यदेव यत्किञ्चित्संक्रमिष्यतीति शक्यशङ्कमित्याह — **वस्त्वन्तराभावाच्चेति** । न ह्यद्वितीयपरमात्मनोऽन्यद्विद्यते यत्संक्रामेदित्यर्थः । तर्हि स्वात्मन एव स्वेन संक्रमणमस्त्वित्यत आह — न चेति । कुत एतत् ? अत्रोत्तरम् — **न हि जलूका आत्मानमेव संक्रामति** न जलूका स्वात्मानं संक्रामन्ती दृष्टा । संक्रमितुं शक्ष्यति

वा। कर्मकर्तृत्वविरोधादित्युक्तम् । न चात्मा सावयवो येनावयवान्तरेण स्वावयवान्तरं संस्प्रक्ष्यति । तदेवं सर्वगतत्वाददद्वितीयत्वान्निरवयवत्वाच्च स्वात्मसंक्रमणं परसंक्रमणं वा मुख्यं कथमपि न शक्यसंभावनमित्यतो यथोक्तविद्याविभ्रमनिवर्तनमेव संक्रमणशब्दार्थः । भवति च श्रुत्यन्तरं ब्रह्मैव स्वात्मवेदनात्पुरुषार्थभाग्भवतीत्यस्मिन्नर्थे — 'ब्रह्म वा इदमग्र आसीत् । तदात्मानमेवावेदहं ब्रह्मास्मीति । तस्मात्तत्सर्वमभवत्' (बृ. १-४-१०) इति । तस्मात्परात्मैवोपाधिनिमित्तमुत्कर्षापकर्षं प्रविहायात्मानमेव विदन् अन्नमयाद्यानन्दमयान्तात्मभावभ्रमं व्युदस्य स्वात्मन्येवावतिष्ठते इति यावदुक्तं भवति तावदुक्तं भवति । 'एवंवित्संक्रामतीति' वाक्येनेति सिद्धम् ॥२८॥

तदप्येष श्लोको भवति ॥

(इत्यष्टमोऽनुवाकः)

**यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह ।**
**आनन्दं ब्रह्मणो विद्वान् । न बिभेति**
**कुतश्चनेति ॥२९॥**

## आनन्दवल्ल्यर्थसंग्राहकश्लोकः

८६. तस्मात् सत्यं ज्ञानमनन्तं ब्रह्मेति यथोक्तलक्षणात्मप्रतिपत्त्यर्थमेव बहुभवनसर्गप्रवेशरसलाभाभयसंक्रमणादि परिकल्प्यते ब्रह्मणि सर्वं व्यवहारविषये[१], न तु परमार्थतो निर्विकल्पे ब्रह्मणि कश्चिदपि विकल्प

---

१. 'सर्वव्यवहारविषये' इति आ ॥ वा ॥ मुद्रितपाठ एवं परिवर्तितोऽस्माभिः ॥

**उपपद्यते। तमेतं निर्विकल्पमात्मानम् एवं क्रमेणोपसंक्रम्य विदित्वा न बिभेति कुतश्चन, अभयं प्रतिष्ठां विन्दते इत्येतस्मिन्नर्थेऽपि एष श्लोको भवति । सर्वस्यैवास्य प्रकरणस्य आनन्दवल्ल्यर्थस्य संक्षेपतः प्रकाशनायैष मन्त्रो भवति ॥**

**२१७. सर्वोऽपि व्यवहारो ब्रह्मण्येव कल्पितः -**

[illegible]आह । नन्वात्मा कथं स्वात्मानमेव संक्रामेदिति चोदितं मया । तस्य कः समा[illegible] ? न चाविषयमेव ब्रह्म वेदनस्य, अविद्याभ्रमापोहमात्रं तु विद्येत्युपर्चत इत्युत्तरेण चोद्यं विनिवारितं भवेत् । एवं हि ब्रह्मण्येवाविद्येति ब्रह्मैवाविद्यावदिति चासमञ्जसं कल्पितं स्यात् । न च स्वयं प्रकाशं ब्रह्माभ्युपगच्छता तस्मिन्नविद्याविषयत्वं तदाश्रयत्वं वा कल्पयितुं शक्यम् । न च ब्रह्मणोऽन्योस्ति यस्याविद्याभ्रमस्तदपोहो वा कल्प्येत । एवं च ब्रह्मविद्योपदेश एवानर्थकः स्यादित्यहो मूलोच्छेदि पाण्डित्यमिति । एतच्छङ्काशमनव्याजेन सर्वमपि वल्ल्यर्थं संगृह्योपसंहरति — **तस्मादित्यादिना उपपद्यत** इत्यन्तेन ॥

अयमभिप्रायः । सत्यमेवं स्याद् यदि वयं विद्याविद्ये पारमार्थिके अभ्युपगच्छेम । कल्पिते तु ते सवितर्यहोरात्रे इव, न परमार्थतो विद्यमाने इत्यावेदितं प्राक् । किञ्च न केवलं विद्याविद्ये किं तु सर्वमेवोपनिषदुपदिष्टं ब्रह्मण्येव कल्प्यते व्यवहारविषये । सत्यं ज्ञानमनन्तमद्वितीयं ब्रह्म बहु स्यां प्रजायेयेत्यकामयत । अतप्यत च तपः । सर्वमाकाशादिकार्यं सृष्ट्वा तदेवानुप्राविशत्, सच्च त्यच्चाभवच्च। एव स्वयं सृष्टं ब्रह्मैव रसो नाम । तल्लाभार्थं विविधजन्तुरूपेण प्राणनादिव्यापारं करोति। तं चानन्दमविदित्वा भेददृष्ट्या भयभाग्भवति । सम्यग्वेदनेन तु क्रमेण कोशपञ्चकसंक्रमणपूर्वकं स्वस्मिन्नेवाभयं प्रतिष्ठां विन्दते — इत्येवमादि यद्यदुपदिष्टं तत्सर्वमिष्यते ब्रह्मण्येव कल्पितमिति । सर्वो हि व्यवहारो लौकिको वैदिकश्च ब्रह्मण्येव

कल्पित इति किमिदं चोद्यते ब्रह्मण्यविद्याकल्पनमसमञ्जसमिति ? न च कल्पितेन विकल्पेन ब्रह्मणः किञ्चिदपि दुष्यति । मृगमरीचिकाजलेनेवोषरप्रदेशस्य । अतो न चोद्यावकाश इति ॥

## २१८. परमार्थतस्तु ब्रह्म नित्यनिर्विकल्पम् -

नन्वेवं कल्पनाविषयत्वमपि यावत्तावद्ब्रह्मण्यभ्युपगन्तव्यम्, कल्पनाकर्तृत्वं च, ततोऽन्यस्य वस्तुतोऽभावादिति चेत् । अत्राभिधीयते । न वस्तुवृत्तेनैवैतेषां विकल्पानां कल्पितत्वमस्ति, किं तु **यथोक्तात्मलक्षणप्रतिपत्त्यर्थं शास्त्रेण परिकल्प्यते। यथाहुर्वार्तिककाराः** — 'तस्मात्सत्यमनन्तं यत्सर्वदाऽविकलेक्षणम्। तदस्मीति प्रबोधार्थं बहु स्यामिति कल्प्यते ॥' (तै.वा. २-५९२) इति । नन्वेवमपि प्रबोधाप्रबोधशास्त्रादिविकल्पोऽस्तीत्यङ्गीकरणीयं स्यात् । नैवम्। कल्पितत्वतद्विनिवृत्त्यादीनामप्युपदेशार्थत्वात् । तदुक्तमभियुक्तैः — 'विकल्पो विनिवर्तेत कल्पितो यदि केनचित् । उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥' (मां.का. १-१८) इति । तदेतत्सर्वमभिसंधायाहाचार्यः — **न तु परमार्थतो निर्विकल्पे ब्रह्मणि कश्चिदपि विकल्प उपपद्यत इति** । एतेन शास्त्रोपदेशानर्थक्यादिचोदनमप्यपहस्तितं भवति — व्यवहारविषये शास्त्रोपदेशादीनां ब्रह्मणि विकल्पितत्वाभ्युपगमात्, परमार्थतस्तदभावाच्चेति ॥

## २१९. श्लोकावतरणिका -

निर्विकल्प एव सन् ब्रह्मात्मा व्यवहारविषये आकाशादि कोशपञ्चकान्तं सृष्ट्वा तत्प्रविष्टस्तदात्मत्वभ्रमेण संसरति । शास्त्राचार्योपदेशेन तु थयोपवर्णितक्रमेणान्नमयादिकमुपसंक्रम्य स्वात्मानमेव विदित्वा न बिभेति कुतश्चन, द्वितीयस्य भयहेतोरभावादभयं प्रतिष्ठां विन्दत इति सर्ववल्ल्यर्थः । तदप्येतस्मिन्नर्थे एष श्लोको वक्ष्यमाणमन्त्रो भवतीति श्लोकावतरणिकावाक्यार्थः । पूर्वं तत्तत्कोशयाथात्म्यप्रकाशकाः श्लोको तत्र तत्राम्नाताः । एष तु **सर्वस्यैवास्य प्रकरणस्यानन्दवल्ल्यर्थस्य प्रकाशनायेति विशेषः ॥**

८७. यतः यस्मात् निर्विकल्पात्, यथोक्तलक्षणात्, अद्वयानन्दात्मनः, वाचः अभिधानानि द्रव्यादिसविकल्पवस्तु-विषयाणि वस्तुसामान्यान्निर्विकल्पेऽद्वयेऽपि ब्रह्मणि प्रयोक्तृभिः प्रकाशनाय प्रयुज्यमानानि। अप्राप्य अप्रकाश्यैव; निवर्तन्ते स्वसामर्थ्याद् हीयन्ते। मन इति प्रत्ययो विज्ञानम्। तच्च यत्राभिधानं प्रवृत्तमतीन्द्रियेऽप्यर्थे तदर्थे च[१] प्रवर्तते प्रकाशनाय । यत्र च विज्ञानम् तत्र वाचः प्रवृत्तिः । तस्मात् सहैव वाङ्मनसयोरभिधान-प्रत्यययोः प्रवृत्तिः सर्वत्र । तस्माद् ब्रह्मप्रकाशनाय सर्वथा प्रयोक्तृभिः प्रयुज्यमाना अपि वाचो यस्मात् अप्रत्ययविषयात् अनभिधेयात्, अदृश्यादि-विशेषणात्, सहैव मनसा विज्ञानेन सर्वप्रकाशनसमर्थेन निवर्तन्ते तं ब्रह्मण आनन्दं श्रोत्रियस्यावृजिनस्याकामहतस्य सर्वैषणा-

१. 'तदर्थे' इति चरहितपाठेनैवालमिति भाति । तदर्थे स्वयं चेति (वा॥) पाठो युक्त इति । ग्रन्थशोधकैर्निर्णेयमेतत् ।

विनिर्मुक्तस्यात्मभूतं विषयविषयिसंबन्धविनिर्मुक्तं स्वाभाविकं नित्यम् अविभक्तं परमानन्दं ब्रह्मणो विद्वान् यथोक्तेन विधिना न बिभेति कुतश्चन । निमित्ताभावात् । न हि तस्माद्विदुषोऽन्यद् वस्त्वन्तरमस्ति भिन्नं यतो बिभेति । अविद्यया यदा 'उदरमन्तरं कुरुते । अथ तस्य भयं भवति' (२-७) इति ह्युक्तम्[१] । विदुषश्च अविद्याकार्यस्य तैमिरिकदृष्टद्वितीयचन्द्रवन्नाशाद् भयनिमित्तस्य 'न बिभेति कुतश्चन' इति युज्यते । मानोमये चोदाहृतो मन्त्रः । मनसो ब्रह्मविज्ञानसाधनत्वात् तत्र ब्रह्मत्वमध्यारोप्य तत्स्तुत्यर्थं 'न बिभेति कदाचन' (२-४) इति भयमात्रं प्रतिषिद्धम् । इहाद्वैतविषये 'न बिभेति कुतश्चन' इति भयनिमित्तमेव प्रतिषिध्यते ॥२९॥

२२०. ब्रह्मानन्दस्य सर्ववागगोचरत्वम् -

उक्तमेवार्थमुपजीव्य श्लोकं व्याचष्टे — **यतो यस्मान्निर्विकल्पात्** इत्यादिना **स्वासामर्थ्याद्धीयन्ते** इत्यन्तेन । यत एवं परमार्थतो ब्रह्म निर्विकल्पम्, अत एवास्मात् सत्यं ज्ञानमन्तमिति यथोक्तलक्षणात्, अद्वयानन्दात्मनः वाचः अभिधानानि तमभिधातुमसमर्थानि निवर्तन्ते इत्यर्थः । नन्वस्ति चेदानन्दः

१. 'इति हि युक्तम्' वा ॥

कस्मात्तमभिधातुमसमर्था वाचः ? अथ सर्वथा असमर्था एव तत्र, तर्हि निःस्वभाव एव स इत्याशङ्क्य परिहरति — **द्रव्यादिसविकल्पवस्तुविषयाणीत्यादिना।** द्रव्यगुणक्रियाजातिसंबन्धा हि वाचामभिधेयाः । तत्र द्रव्यत्वाद्यन्यतमेऽपि प्रवृत्तिनिमित्ते विकल्पेऽसति कथमिव वाक्प्रवृत्तिर्भवेत् ? सर्वथा निर्विकल्पकस्त्वयं ब्रह्मानन्दः । तस्माद्युक्तमत्र वाचः स्वसामर्थ्याद्धीयन्त इति । ननु विप्रतिषिद्धमिदं ब्रह्मानन्द इत्युच्यते, न च वाचां प्रवृत्तिरत्रेति । नैष दोषः । आनन्दादिवाग्भिरप्यध्यारोपितनामरूपद्वारेणैव तन्निर्देशात्। वस्तुत आनन्दत्वादि विकल्पानामप्यात्मन्यभावात् । कथं तर्हि शास्त्राचार्यादिप्रयोक्तृभिस्तत्र निर्विकल्पेऽपि विकल्पावबोधकानन्दादिशब्दाः प्रयुक्ता भवन्तीति ? वस्तुसामान्यादिति ब्रूमः । यद्यदस्ति वस्तु तत्तत्प्रकाशनाय प्रयुज्यन्तेऽभिधानानि लोके । ततश्च लोकसिद्धवस्तुभिः सामान्यादस्तित्वावगमनार्थं 'सत्यम्' 'ज्ञानम्' 'आनन्दः' इत्यादयः शब्दाः प्रयुज्यन्ते नामरूपोपाधिकृतं मिथ्यारूपमपितद्धर्मवत्परिकल्प्य । तदेवं वस्तुसामान्यात् प्रयुज्यमानास्ता निर्विकल्पं ब्रह्म अप्राप्य तदप्रकाश्यैव निवर्तन्ते स्वसामर्थ्याद्धीयन्त इत्युक्तम् । सविकल्पे हि तासां प्रकाशनसामर्थ्यमिति । ननु तर्हि वरमप्रयुक्ता एव ताः । समर्थक्रियाकारित्वाभावात् । तत्र किमिति शास्त्रमाचार्यो वा व्यर्थप्रयासे वाक्प्रयोगे प्रवर्तत इति ? न व्यर्थः प्रयासोऽयम् । अस्तित्वागमनप्रयोजनवत्त्वात् । आनन्दादयो हि शब्दाः प्रयुज्यमानाः अस्ति ब्रह्मानन्दो नाम यस्मिन्नवतिष्ठमानोऽभयं प्रतिष्ठा विन्दते इत्येवमस्तित्वावगमनरूपप्रयोजननिर्वर्तका भविष्यन्ति । जाते त्वस्तित्वागमे आनन्दशब्दवाच्यत्वमेव तस्येति शङ्कावारणाय 'अदृश्येऽनात्म्ये .....' इत्यादिना तदपोद्यते इत्येवमध्यारोपापवादाभ्यां नित्यसिद्धे तस्मिन्नवस्थितिरापाद्यत इति निरवद्यम् । ननु चादृश्यादिशब्दानां दृश्यत्वादिनिषेधमात्रपर्यवसायित्वे सति केन शब्देनात्मानन्दो निर्दिश्यत इति भवता वक्तव्यम् । न तावदानन्दशब्देन । तस्याप्यस्तित्वावगमनार्थमध्यारोपेण प्रवृत्तिरिति भवतैवोक्तत्वात् । न च निर्विकल्पादिशब्दैः । तेषामपि केनचिद्विकल्पेन विशिष्टस्यैव विकल्पान्तरनिषेधद्वारेणैव बोधकत्वात् । न ह्यनवगतविकल्पे वस्तुनि सर्वे विकल्पा

निषिध्यन्त इत्यर्थवत् स्याद्वच इति । तन्न । सर्वथा प्रकाशनसामर्थ्यहीनत्वेन निवर्तितासु सर्वासु वाक्षु श्रोतुर्मनसः सर्ववागगोचरात् वैमुख्ये सत्यात्मन्येव विश्रान्त्युपपत्तेः । आत्मैव चात्र सर्ववागगोचरो ब्रह्मानन्दोऽभिप्रेत इति। स्वयंसिद्धस्य तस्यान्येन प्रकाशनं नाकाङ्क्ष्यते । अदृश्यादिशब्दैस्तु दृश्यत्वादिविकल्प-निषेधेनैवोपलक्ष्यते ब्रह्मानन्द इति सर्वथाप्यर्थवदिदं वचो 'यतो वाचो निवर्तन्त इति' इत्यलं पल्लवितेन ॥

## २२१. ब्रह्मानन्दस्य सर्वप्रत्ययागोचरत्वम् -

ननु यदि वाचामप्रवृत्तिर्ब्रह्मणि तर्हि मनस एव केवलस्य तत्र प्रवृत्तिरित्यस्तु। वचोविशेषैर्दुर्निरूपाणामपीक्षुसिताखर्जूरमध्यादिमाधुर्यविशेषाणां मनसा सुसंवेद्यत्वदर्शनादित्याशङ्क्य श्रुतिराह — 'अप्राप्यमनसा सह' इति । तदेतद् व्याख्यातुमारभते — **मन इति प्रत्ययोविज्ञनमित्यादिना** । अत्र मनःशब्देन न वृत्तिमतोऽन्तःकरणस्य निर्देशः, किं तर्हि मनोवृत्तेर्वस्तुपरिच्छेदिन्यास्त-त्तदाकारापन्नायाः प्रत्ययविज्ञानापरपर्यायाया इत्यर्थः । तच्च विज्ञानं यत्रैवाभिधानं प्रवृत्तमिन्द्रियगोचरेऽतीन्द्रिये वा तत्रैव प्रवर्तते प्रकाशनाय । यस्य यस्यार्थस्य प्रकाशनाय या या वाचः प्रयुज्यन्ते तास्तास्तत्तदाकारमेव विज्ञानं श्रोतॄणां मनस्युत्पादयन्तीति प्रसिद्धं लोके । न पुनर्वाचामगोचरे कस्मिंश्चिदपि मनसः प्रवृत्तिर्दृष्टचरी । यत्तूदाहरणमिक्षुसितादिमाधुर्यविशेषाणाम्, तत्रापि लौकिकानां विशेषवाचकशब्दाप्रतिभाने 'इक्षुमाधुर्यम्', 'सितामाधुर्यम्' — इत्येवं सविशेषणप्रयोगेनैव माधुर्यविशेषो निरूप्यत इति नैतत्केवलमनोगोचरवस्तूदाहरणम्। एवं यत्र विज्ञानं तत्र वाचः प्रवृत्तिरपि ज्ञेया । एवं च यत्राभिधानविषयत्वं तत्र विज्ञानस्य प्रवृत्तिः, यत्रैव च विज्ञानविषयत्वं तत्रैव वाचः प्रवृत्तिरिति **सहैव वाङ्मनसयोरभि-धानप्रत्यययोः प्रवृत्तिः सर्वत्र** । तस्मात् सर्वथाप्यविषयादात्मानन्दात्तयोः सहैव निवृत्तिरित्येतद् 'अप्राप्य मनसा सह' इत्येषा श्रुतिराचष्टे — इत्यर्थः ॥

## २२२. ब्रह्मानन्दस्यासाधारणविशेषणानि -

'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति वाक्यस्य यथाव्याख्यातस्य

पिण्डितार्थम् 'यस्मादप्रत्ययविषयात्, अनभिधेयात्, अदृश्यादिविशेषणात्, सहैव मनसा विज्ञानेन सर्वप्रकाशनसमर्थेन निवर्तन्ते तं ब्रह्मण आनन्दम्' इत्यनूद्य तस्यैवानन्दस्य विशेषणान्तराणि संगृह्णाति ब्रह्मानन्दविदो भयहेत्वभावोपपादकानि — **श्रोत्रियस्यावृजिनस्याकामहतस्य सर्वैषणाविनिर्मुक्तस्यात्मभूतमि**त्यादिना **अविभक्तमि**त्यन्तेन । अयमभिप्रायः । आनन्दमीमांसायां मनुष्यगन्धर्वानन्दमारभ्य हिरण्यगर्भानन्दपर्यन्तं प्रतिपर्यायं निर्दिश्यमान आनन्दोऽधराधरभूमिका गतानन्दकामानभिहतस्य श्रोत्रियस्यावृजिनस्य विदुषः प्रत्यक्ष इति यद् वर्णितम्, तदेतत् सर्वत्रानुगतो निरुपाधिको ब्रह्मानन्दः सर्वैषणाविनिर्मुक्तस्यैव श्रोत्रियस्यावृजिनस्येति ज्ञापनार्थम् । स च ब्रह्मानन्दस्तद्विदुषो आत्मभूत एव न तु लौकिकानामिव संवेद्यानन्दः । 'रसं ह्येवायं लब्ध्वानन्दी भवति' इत्यत्रेवानन्दानन्दिनोर्भेदाभावात् । कथं तर्ह्यस्यानन्दशब्दव्यपदेश्यत्वम् ? न ह्यलब्धव्यस्यानन्दत्वं युक्तमिति । तत्राह — **विषयविषयिसंबन्धविनिर्मुक्तमिति** । न हि यत्नलभ्यत्वं तदलभ्यत्वं वा आनन्दशब्दप्रवृत्तौ निमित्तम् । किं तर्हि दुःखायासविधुरत्वमेव तत् । लौकिकास्तु भोगा विषयेन्द्रियसंबन्धायासजन्या दुःखयोनयश्चेति न तज्जनितसुखे आनन्दशब्दः समञ्जसः । अयं त्वात्मस्वरूपत्वादेव नायासजन्यो दुःखोदर्को वेति युक्तमस्यैव मुख्यवृत्तेनानन्दशब्दव्यपदेश्यत्वमिति भावः । न चैवं शब्दव्यपदेश्यत्वे वाङ्निवृत्तिश्रुतिविरोधशङ्कापिशाचीपुनरावर्तेति भेतव्यम् । वस्तुसामान्यादित्यादिना (पृ. २९२) पूर्वमेव विहितोच्चाटनत्वात्तस्याः । न च दुःखायासविधुरत्वस्य काष्ठलोष्टादिष्वपि दर्शनात् नैतच्छब्दप्रवृत्तिनिमित्तमित्युत्थातव्यम् । दुःखायासप्रसक्तेरेवाभावात्काष्ठादिषु । अविद्याप्रसक्तदुःखायास एवात्मनि तत्प्रतिषेधसंभवादिति । नन्वीदृशं दुःखायासवर्जितत्वमात्मनः कुत इत्यत आह —**स्वाभाविकमिति** । स्वो भावः स्वरूपमेवेदं नागन्तुकमित्यभिप्रायः । स्वरूपमपि सत्स्वनाशान्नश्येद् वह्नेरिवौष्ण्यादीत्यत उक्तम् — **नित्यमिति** । न ह्यात्मनः सत्यज्ञानानन्तलक्षणस्य काले नाशः संभावनीयः, कालस्यापि कारणत्वादात्मन इति भावः । ननु कालाकाशादीनामप्यन्येभ्यो विभक्तानां कार्यत्ववदात्मनोऽपि कालाकाशादिभ्यो विभक्तत्वाद् घटादिवत्कार्यत्वं किं न स्यादित्यत आह **अविभक्तमिति** । न ह्यात्मनः स्वतो विभक्तत्वमस्ति । सैन्धवघन-

वदेकरसत्वात्। नापि परतः । सर्वकारणत्वे सति सर्वानन्यत्वदित्यभिप्रायः ॥

## २२३. ब्रह्मानन्दस्य वेद्यत्वं कीदृशम् ?-

यथोपवर्णितमानन्दं विदुषः फलमाह श्रुतिर्न बिभेति कुतश्चनेति । तदेतद् व्याचष्टे — **परमानन्दं ब्रह्मणो विद्वान् यथोक्तविधिना न बिभोति कुतश्चन। निमित्ताभावादिति** । अत्रप्रत्ययविषयस्याविभक्तस्यापि वेदनं कथमिति कुचोद्यमधस्ताद्वर्णितानभिधेयाभिधानव्याहतिचोदननिरासनयेव निरसनीयम् । आत्मनः सर्वथाप्यवेद्यत्वेन निरस्तेषु सर्वेषु प्रत्ययेषु सर्वप्रत्ययोगचराद्वैमुख्ये सति वेदितुर्मनसः स्वात्मन्येवाद्वितीये विश्रान्तिर्वेदनत्वेनोपचर्यते न तु साक्षाद्वेदनकर्मत्वमेवात्र विवक्षितम् । न हि नित्यज्ञानाभिन्नस्यानन्दस्य स्वान्यकृतवेदनप्रकाशाकाङ्क्षणमस्तीति । किञ्च सर्वत्र बाह्यार्थप्रमेयेषु यैव वेदनफलत्वेनाभिमन्यतेऽवगतिः, 'घटमिदानीं वेद्मि' इत्यादिषु स्थलेषु, सैव स्वतःसिद्धवेदितुरात्मनोऽनन्या अवगतिरिह वेद्यब्रह्मानन्दत्वेनोपदिश्यत इति न सा अन्येन वेदनेन विषयीकरणमाकाङ्क्षते । यथोक्तं वार्तिककारैः 'परागर्थप्रमेयेषु या फलत्वेन संमता । संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ॥' (सं.वा. १५९) इति। किं चान्यत् । सत्यज्ञानानन्तस्वभावाद् ब्रह्मात्मन एव सर्वमाकाशादिकार्यं संभूतमिति न ततो व्यतिरिक्तमन्यदभिधानमभिधेयं वा बुद्धिर्बोद्धव्यं वा विद्यते, येन परमार्थतो वेद्यवेदितृविद्याविभागः शङ्क्येत । तस्माद् यथा रज्जुरेव सर्पबुद्ध्या गृह्यतेऽभिधीयते च सर्पशब्देन, एवं ब्रह्मानन्द एव वाङ्मनस्त्वेन तद्गोचरत्वेन च विकल्प्यत इति तादृशसर्वविकल्पनिवृत्तिरेव तूपचर्यते विद्येति । तदेतदेवोच्यते यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह । आनन्दो ब्रह्मणो विद्वानितीत्यतोऽपि न कुचोद्यावसर इति ध्येयम् ॥

**'यथोक्तेन विधिना'** इति तु 'स य एवंवित्' इति प्रभृति 'एतमानन्दमयमात्मानमुपसंक्रमति' इत्येतदन्तभाष्यार्थस्मारणार्थम् । तत्रोक्तप्रकारेणोत्सृज्योत्कर्षापकर्षमविद्याप्रत्युपस्थापितोपाधिजनितम्, अन्नमयाद्यानन्दमयान्तेष्वात्मभावभ्रमं व्युदस्याद्वैतं परमानन्दं ब्रह्मणो विद्वान् वक्ष्यमाणफलमाप्नोतीति संबन्धः ॥

## २२४. ब्रह्मानन्दविदो भयहेत्वभावः -

इयता भाष्येण 'आनन्दं ब्रह्मणो विद्वान्' इत्यन्तो मन्त्रभागो व्याख्यातः । अथैवमानन्दं विदुषः फलमभिव्याहरद्वाक्यं व्याख्यातुमुपक्रमते —**न बिभेति कुतश्चन। निमित्ताभावादिति । तदेतद्विवृणोति न** हीत्यादिना **युज्यत** इत्यन्तेन । अस्यायमभिप्रायः । इह खलु चैत्रादन्यस्मात् पृथग्भूताद् व्याघ्रतस्करादेर्भयं भवति। न तु तथा अस्माद्विदुषोऽन्यत् पृथग्भूतं विद्यते, यस्मादसौ बिभीयात् । तस्य हि सर्वमात्मैव परमानन्दरूपं ब्रह्म संवृत्तम् । न च स्वस्मादेव स्वस्य भयं समस्ति । अतो न बिभेति कुतश्चनेत्युच्यते । भयनिमित्तस्यान्यस्य अभावादिति । तथेह मैत्राद् वस्त्वन्तरादेव परमार्थसतो व्याघ्रादेर्भयं तस्य भवति । न तु तथा तस्माद्विदुषो वस्त्वन्तरमस्ति यतोऽसौ बिभीयात् । भासमानस्य सर्वस्यापि ह्यनात्मनो स्वाप्नव्याघ्रादिवत्, आदर्शादिगतप्रतिबिम्बवच्च प्रतिभासमात्रशरीरत्वेन निर्धारितत्वात् तेन । न च स्वविषमसत्ताकाद् स्वस्मादन्यत्वानन्यत्वाभ्यामनिर्वचनीयाद् वस्त्वाभासात् स्वस्य भयं समस्ति । अतो न बिभेति कुतश्चनेत्युच्यते । भयनिमित्तस्य वस्त्वन्तरस्याभावादिति । इतश्च । इह खलु शान्तस्वभावस्य अविशावकस्य स्वभिन्नस्वभावात् क्रूरात् सिंहाद् भयं भवति। न तु तथा तस्माद्विदुषो भिन्नो विरुद्धस्वभावोऽन्यो हेतुरस्ति यस्मादसौ बिभीयात् । सर्वस्यापि अतोऽपि स्वात्मभूतपरमानन्दस्वभावत्वेनाध्यवसितत्वात्तेन । अतोऽपि न बिभेति कुतश्चनेत्युच्यते। भयनिमित्तस्य भिन्नस्याभावादिति । नन्वेवमविदुषोऽपि वस्तुवृत्तेन अन्यद्वस्त्वरं भिन्नलक्षणं नास्त्येवेति स्थिते कुतस्तस्यापि भयाशङ्का ? अथास्य भयनिमित्तं सम्भावितं, तत एव विदुषोऽपि कुतस्तन्न स्यादिति ? सत्यम्, अविदुषोऽपि नास्त्येव वस्तुतो भयनिमित्तम् । अथ च सोऽविद्यया स्वाभाविकात् स्वात्मभूतात् परमानन्दादन्यदात्मनो रूपं मन्यमानः, स्वस्मादन्यद्वस्त्वन्तरं भिन्नलक्षणं द्वैतं प्रकल्प्य ततो बिभेति । विद्वांस्तु विद्यासामर्थ्यात् 'अहमेवेदं सर्वमानन्दैकरसं ब्रह्म, मत्स्वरूपातिरिक्तत्वेनाभासमानं तु द्वैतं तैमिरिकदृष्टद्वितीयचन्द्रवत् सर्वथा सर्वदापि नास्त्येव' इत्यवधारितवानिति न बिभेति कुतश्चनेति वैषम्यम् । तथा हि न्यायोपबृंहितं श्रुत्यन्तरम् 'कस्माद्ध्यभेष्यत् द्वितीयाद्वै भयं भवति' (बृ. १-४-२) इति ॥

श्लोकस्य पौनरुक्त्याशङ्कां परिहरति — **मनोमये चेत्यादिना** । मनोमयो हि वेदात्मा । वेदविद्यायाश्च परंपरया परब्रह्मविज्ञानसाधनत्वात् तस्मिन् ब्रह्मत्वमध्यारोपितं 'लाङ्गलं जीवनम्' इतिवत् । एवमध्यरोपितब्रह्मभावान्मनोमयाद् वाचो मनसा सह निवर्तन्त इत्युक्तं वाङ्मनसयोः स्वविषयत्वासंभवमालक्ष्य । तस्य च वेदात्मब्रह्मण आनन्दं विद्यानन्दं विद्वान् कदाचनाविद्वल्लोक इव न बिभेति, 'ब्रह्मज्ञानसाधनं वेदविद्यामवाप्तवानहमतो मे नास्ति लौकिकानामिव भयम्' इति निर्विशङ्कं तिष्ठतीति । स एष वेदविद्याधिगमहेतुकमानन्दमनुभवतो भयाभाव उक्तो मनोमयात्मस्तुत्यर्थम् । साधनस्तुत्या हि साध्यापि ब्रह्मप्राप्तिः स्तुता स्यादिति कृत्वा। न त्वसौ भयाभाव आत्यन्तिकः । भयहेतुभूतयोर्धर्माधर्मयोरनिवृत्तत्वात् । इह पुनरद्वैतब्रह्मानन्दविद्याविषये तत्रेव न केवलं भयमात्रं प्रतिषिध्यते, अपि तु **भयनिमित्तमेव प्रतिषिध्यते** । अतो न पौनरुक्त्यमित्यभिप्रायः । 'कुतश्चनेति' इतीतिशब्दस्तु श्लोकसमाप्त्यर्थः ॥२९॥

**एतँ ह वाव न तपति । किमहँसाधु नाकरवम् । किमहं पापमकरवमिति । स य एवं विद्वानेते आत्मनँ स्पृणुते । उभे ह्येवैष एते आत्मानँ स्पृणुते । य एवं वेद ॥३०॥**

## ब्रह्मानन्दविदो भयनिमित्तं नास्त्येव

**८८.** नन्वस्ति भयनिमित्तं साध्वकरणं पापक्रिया च । नैवम् । कथमिति? उच्यते । एतं यथोक्तमेवंविदम् ह वाव इत्यवधारणार्थौ। न तपति नोद्वेजयति, न संतापयति। कथं पुनः

साध्वकरणं पापक्रिया च न तपतीति ? उच्यते। किं कस्मात् साधु शोभनं कर्म नाकरवं न कृतवानस्मीति पश्चात्संतापो भवति आसन्ने मरणकाले। तथा किं कस्मात् पापं प्रतिषिद्धं कर्म अकरवं कृतवानस्मीति च नरकपतनादिदुःखभयात् तापो भवति । ते एते साध्वकरणपापक्रिये एवमेतं[१] न तपतः । यथा अविद्वांसं तपतः । कस्मात् पुनर्विद्वांसं न तपत इति ? उच्यते । स य एवं विद्वान् एते साध्वसाधुनी तापहेतू इति (?)[२] आत्मानं स्पृणुते प्रीणयति[३] बलयति वा । परमात्मभावेन उभे पश्यतीत्यर्थः। उभे पुण्यपापे हि यस्मात् एवमेष विद्वान् एते आत्मानम् आत्मरूपेणैव[४], पुण्यपापे स्वेन विशेषरूपेण शून्ये कृत्वा आत्मानं स्पृणुत एव । कः ? य एवं वेद । यथोक्तम् अद्वैतमानन्दं ब्रह्म वेद । तस्य

---

१. 'एतम्' इत्येव मूलम् । भाष्ये 'एनम्' इति मुद्रितपुस्तकेषूपलभ्यते ॥

२. 'इति' पदं किमर्थमिति न विज्ञायते । केचित्तु 'इतिशब्दः प्रकारवचनः। अकरणकरणद्वारा तापहेतुत्वेनोक्ते इत्यर्थ' इति स्थितस्य गतिं कथञ्चित् कल्पयाञ्चक्रुः। तत्समालोचनार्हम् ।

३. 'प्रीणाति' इति वा ॥ ४. 'आत्मानात्मरूपेणैव' इति वा ॥

**आत्मभावेन दृष्टे पुण्यपापे निर्वीर्ये अतापके जन्मान्तरारम्भके न भवतः ॥**

**२२५. विदुषोऽधर्मादिभयनिमित्ताभावः -**

आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेत्ययुक्तम् । 'पुण्याकरणात् स्वर्गादिफलाद्वश्चितोऽस्मि ; पापकरणाच्च नरकभागी स्याम्' इति पश्चात्तापस्यावश्यंभावित्वात् सर्वजन्तूनाम् इत्याशङ्कामुत्थापयति — **नन्वस्ति भयनिमित्तमित्यादिना** । एतत्समाधानत्वेनोत्तरवाक्यं व्याख्यानायादत्ते **नैवम्** । **कथमिति ?** उच्यते एतमित्यादिना स्पष्टार्थं भाष्यम् ॥

आनन्दगुणकब्रह्मोपासनेन सर्वक्लेशभयात्यन्तिकनिवृत्तिर्भवतीति केचिदिहेच्छन्ति । तदसत् । प्रकरणस्योपासनापरत्वे मानाभावस्योपपादितत्वात् । यदपि व्याख्यानम् स्वर्गादिहेतुकं सुकृतं नाकार्षमिति चिन्ता एनं ब्रह्मविदं न बाधते, स्वर्गादिलोकेच्छाया अभावादिति । तदपि न क्षोदक्षमम् । उपासनारूपसाधुकरणे सति किमहं साधु नाकरवमिति पश्चात्तापानुपपत्तेः । अद्वैतानन्दविदुषस्तु विद्यास्तुत्यर्थं सर्वं भविष्यति । कथम् ? साध्वसाधुनोः पुण्यपापयोरात्मत्वेनैव दर्शनाद्भयहेतुत्वानुपपत्तिः । आत्मनोऽन्येन विशेषरूपेण दृष्टं हि सर्वं भयहेतुर्भवति । 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद' (बृ. २-४-६) इति श्रुतेः । अयं तूभे साध्वसाधुनी परमात्मभावेनैव पश्यन् स्वेन विशेषरूपेण शून्ये कृत्वा ब्रह्मविद्यया स्वात्मन्येव प्रविलाप्य तिष्ठतीति 'आत्मानं स्पृणुते', आत्मानं प्रीणयति बलयति वेति नास्य कश्चिद्भयहेतुः । न ह्यात्मरूपापन्ने पुण्यपापे जन्मान्तरारम्भकत्वेन भयहेतुर्भवेतामिति भाष्यार्थसारः ॥

न बिभेति कुतश्चनेति भयहेतुः प्रतिषिध्यत इत्युपलक्षणमेतत् । यथैव भयहेतुदर्शनं नास्ति तथैव भयदर्शनं स्वात्मनि भयेन विक्रियमाणस्वभावतादर्शनमपि नास्तीति द्रष्टव्यम् । अद्वितीयात्मभावेनैव सर्वस्य दृष्टत्वादिति ॥३०॥

**इत्युपनिषत् ॥३१॥**

## आनन्दवल्ल्या उपसंहारः

**८९. इतीयम् एवं यथोक्ता अस्यां वल्लयां ब्रह्मविद्या उपनिषत् । सर्वाभ्यो विद्याभ्यः परमरहस्यम् दर्शितम् इत्यर्थः । परं श्रेयोऽस्यां निषण्णमिति ॥३१॥**

इति श्रीमत्परमहंसपरिव्राजकाचार्य गोविन्दभगवत्पूज्यपादशिष्य श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्भाष्ये आनन्दवल्लीभाष्यम्

### २२६. ब्रह्मविद्यास्तुत्या ग्रन्थोपसंहारः -

येयं ब्रह्मविद्या अजाद्वयानन्दतत्त्वप्रकाशिनी अस्याम् आनन्दवल्ल्यामुक्ता, सेयमुपनिषत् । **सर्वाभ्यो विद्याभ्यः परमरहस्यम्** । यद्यपि या काचिदपि विद्या रहस्यमेव अनधिकारिभ्यो गोपनीया । गुरोर्व्यर्थप्रयासो मा भूत्, दुरुपयुक्ता वा मा भूदविवेकिभिरिति; तथापीयं विद्या सर्वाभ्योऽपि विद्याभ्यः परमरहस्यम्, अत्यन्तमेव गोपनीया, अधिकारिभ्य एव विधिवदुपसन्नेभ्यः प्रदातव्येत्यर्थः । सगुणविद्यापि यस्मै कस्मैचन न देयेति विज्ञायते 'इयं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्याय वाऽन्तेवासिने नान्यस्मै कस्मैचन' (छां. ३-११-५, ६) इति, किमु वक्तव्यमियं परब्रह्मविद्या न देयेति । अत्यन्तसूक्ष्मविषयत्वाच्च न सर्वेषां शक्याधिगमेत्यतोऽपि परमरहस्यभूतेयम् । 'न हि सुविज्ञेयमणुरेषधर्मः' (क. १-१-२१) इति श्रुत्यन्तरात् । तदितं परमरहस्यं मुमुक्षुजनहिताय 'दर्शितम्' इति श्रुतिवाक्यशेषो द्रष्टव्यः । इदं च रहस्यत्ववचनं ब्रह्मविद्यास्तुतये यथा कृतादरा भवेयुरधिकारिणोऽस्याः श्रवणमननादाविति । उपनिषण्णमस्यां परं श्रेय इति वा उपनिषच्छब्दनिर्वचनान्तरमुपनिषदः । 'ब्रह्मविदाप्नोति परम्' (२-१) इति हि प्रतिज्ञामुपक्रमे । तदिहोपनिषच्छब्दोच्चारणेन संगृहीतमिति गम्यते । हेत्वर्थको वा इतिः । यतोऽस्यां परं श्रेयो निषण्णम्, अत इयम् उपनिषत् परमरहस्यमिति । न हि परमश्रेयोमूलाद्विज्ञानादन्यद् परमहस्यमस्तीति सर्वं शिवम् ॥३१॥

# अथानन्दवल्लीसारः

## अत्रत्याः सङ्ख्या उपनिषद्खण्डपरामर्शकाः ॥

परं ब्रह्म विविदिषुणा सर्वदेवतात्मकपरब्रह्माराधकेन भवितव्यम् । परविद्याविघ्नप्रशमनार्थं स्वस्याचार्यस्य च अधीतस्य वीर्यवत्तायै विद्याप्रदातुर्गुरोर्मनः-शान्त्यनुवृत्तिसिद्ध्यर्थं च परमेश्वरप्रार्थनापरेण च भवितव्यम्-इत्यभिप्रायेण शान्तिद्वयपाठः ॥

१. 'ब्रह्मविदाप्नोति परम्' इत्यशेषानर्थबीजस्याज्ञानस्य निरुपाधिकब्रह्मविद्यया नाशं तद्द्वारेण परब्रह्मप्राप्तिं च सूत्रयद् वाक्यं ब्रह्मविद्यायाः ग्रन्धप्रयोजने ज्ञापयति । अस्य च सूत्रस्य संक्षेपतोऽर्थविवरणं 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिकया ऋचा क्रियते । सत्यज्ञानानन्तलक्षणं ब्रह्म स्वहृदयाकाशस्थ-बुद्धिगुहायां निहितमिति यो वेद तस्य सर्वकामप्राप्तिर्ब्रह्मप्राप्त्या भवतीति तदर्थः । अस्यैवार्थस्य विस्तरेण निर्णयार्थमुत्तरग्रन्थप्रवृत्तिः ॥

२-३. तत्र कथं सत्यं ज्ञानमनन्तं च ब्रह्मेत्याकाङ्क्षायाम् आनन्त्यं ताव-दाकाशादिविकल्पकारणत्वादित्याह । 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति ब्रह्मात्मनोः सामानाधिकरण्येनोपदेशस्तु वेदितुरात्मैव परमार्थतो ब्रह्मेति बुबोधयिषया । तत्राकाशाद्यन्नरसविकारभूतसर्वप्राणिपर्यन्तं ब्रह्मवंश्यमेवेति कथयितव्ये 'स वा एष पुरुषोऽन्नरसमयः' इति पुरुषस्यैव विशिष्य ग्रहणं तस्यैव कर्मज्ञानयोरधिकारप्रदर्शनार्थम् । तस्यैव हि पुरुषस्य 'यो वेद निहितं गुहायाम्' इति ब्रह्मविद्याधिकारः सूत्रित इति ॥

३-१४. स च पुरुषः प्रायेण बाह्यविषयाकारापहृतबुद्धित्वान्न सहसा सर्वान्तरं प्रत्यगात्मानं स्वात्मतया वेदितुमलमिति तस्यान्नमयप्राणमयमनोमय-विज्ञानमयानन्दमयाख्येषु पञ्चकोशेष्वध्यारोपितामात्मबुद्धिं क्रमेणापनयति श्रुतिः 'अन्योऽन्तर आत्मा प्राणमयः' (१-२) इत्यादिना । तत्रान्नमयादिषु परिच्छिन्नेषु स्थितामात्मधियम् अद्वितीयात्मवेदनसौकर्यार्थं तत्तत्कारणेषु समष्ट्यन्नाद्युपाधिक-

ब्रह्मसु प्रसार्य 'अन्योऽन्तर आत्मा प्राणमयः' इत्यादिना पूर्वपूर्वकोशात् सूक्ष्मतरमुत्तरोत्तरमवतारयत् तत्र तत्रात्मत्वं ग्राहयति शास्त्रं पूर्वपूर्वतरस्य स्थूलतरस्य तत्र प्रविलापनार्थम् । एवं च विराड्वायुवेदात्मसमष्टिविज्ञानात्मसर्वोत्कृष्टानन्दात्माभिन्नतां वेदितुरात्मनोऽवगमय्य चरमस्यानन्दमयस्यापि सर्वद्वैतावसानभूतम्, सर्वानन्दविशेषविकल्पास्पदमद्वैतमेव ब्रह्म प्रतिष्ठात्वेनोपदिशति, ब्रह्मणः परमार्थानन्त्यविज्ञानोपसंहारार्थम् । अत्र च 'सर्वं वै तेऽन्नमाप्नुवन्ति' (२-२), 'सर्वमेव त आयुर्यन्ति' (२-३), 'न बिभेति कदाचन' (२-४), 'सर्वान्कामान् समश्नुत इति' (२-५) इति चावान्तरवाक्यैरन्नब्रह्माद्युपासनानां दृष्टं फलं कीर्त्यते, शरीरपातानन्तरमुपासकानां तत्तद्ब्रह्मात्मभावापत्तिश्चाभिप्रेयते । तदेतद् विराडाद्यनन्यात्मताज्ञानस्तुत्यर्थं च भवतीति ज्ञेयम् ॥

१४-१५ तदेवमन्नमयाद्यानन्दमयान्तानामुत्तरोत्तरस्मिन्नात्मबुद्धिसंचारणेन प्रविलापितानाम् अपरमार्थत्वात्, आनन्दमयस्य प्रतिष्ठात्वेनोपदिष्टं विधूतपञ्चकोशोपाधिकं परमार्थत्वात्, परमार्थात्मभूतं परं ब्रह्म नास्त्येव निर्विशेषत्वे सति सर्वव्यवहारागोचरत्वादित्याशङ्क्येत । तामेतामाशङ्कामपनेतुं श्रुतिर्ब्रह्मास्तित्वनास्तित्वप्रतिपत्त्योः फलभेदकथनेन तदस्तीत्येवोपगन्तव्यमित्यस्मिन्नर्थे मन्त्रमुदाहरति। 'यो ब्रह्म नास्तीति वेद स पुरुषार्थात्प्रतिहन्यते । पुरुषार्थसाधनभूतवर्णाश्रमादिव्यवस्थालक्षणस्य सन्मार्गस्याश्रद्दधानतया असत्पुरुष इति विनिन्द्यते च शिष्टैर्लोके । यः पुनरस्ति ब्रह्मेति वेद, स परमार्थसद्ब्रह्मात्मतामापन्नो जिज्ञासुभिर्ब्रह्मवदेव विज्ञेयो भवति । सत्पुरुषत्वेन महीयते च शिष्टैः । अतो ब्रह्मास्तीत्येव प्रतिपत्तव्यम्' - इति मन्त्रार्थः ॥

१६-२४ प्रत्यस्तमितसर्वविशेषत्वाद्ब्रह्मणः तदस्ति वा न वा, अस्तित्वेऽपि तस्य, विदुष इवाविदुषोऽप्यात्मत्वात् अविद्वानपि तदश्नुते न वा, अविदुषस्तदप्राप्तौविदुषोऽपि तदप्राप्तिरेवेति किं न स्यात् ?-इति शिष्यशङ्कोत्थापितान् अनुप्रश्नानुद्भाव्यश्रुतिर्ब्रह्मास्तित्वप्रतिपादनेनैव प्रथममनुप्रश्नं निर्णयति । तथा ब्रह्मणः सत्यत्वं च द्रढयति । (१) तत्रास्ति तावद्ब्रह्म सत्यज्ञानलक्षणम्, यस्माद् 'बहु स्यां प्रजायेय' इति संकल्प्य सृज्यमानरचनादिविषयमालोच्येदं सर्वं जदगसृजत । सृष्ट्वा

च तदेव जगदनुप्रविष्टमिवान्तःकरणे द्रष्टृ श्रोतृ मन्तृ विज्ञातृ इति चैवं विशेषवदुपलभ्यते। तस्मादस्ति तत्कारणं चेतनं ब्रह्मेत्यवगम्यते । (२) सृष्टं च मूर्तामूर्तलक्षणं जगत् तस्माद्ब्रह्मणो व्यतिरेकेण नास्त्येवेति तदेव सर्वमिदमभवदित्युच्यते। अत एव तद्ब्रह्मैव परमार्थसत्यमित्याचक्षते ब्रह्मविदः । (३) यस्मात् प्राक्सृष्टेरसदिवासीत्, सृष्टेरूर्ध्वं च व्याकृतनामरूपत्वात्सद्व्यवहारार्हमभवत्, तस्मादेवंरीत्या आत्मानमेव स्वयं रूपान्तरेण कृतवदिति कृत्वा तत्सुकृतमुच्यते । सुकृतशब्दवाच्यपुण्यरूपेणाप्यात्मानं कृतवदिति वा सुकृतमुच्यते कारणं ब्रह्म । तदेवं स्वयंकृतत्वात् फलसंबन्धकारणसुकृतत्वेन प्रसिद्धेर्वा अस्ति ब्रह्मेत्यवगम्यते । (४) तदेवकृतं ब्रह्मसुमधुरादि रस इव लौकिकानामानन्दहेतुर्ब्रह्मविदाम् । यतस्ते निरेषणा अपि सदा सानन्दा दृश्यन्ते इत्यतोऽप्यस्ति तेषामानन्दहेतुर्ब्रह्मेत्यवगम्यते । (५) प्राणिनां कार्यकरणसंघातस्य वायवीयाः प्राणनादयः ऐन्द्रियकाश्च दर्शनादिव्यापारा आनन्दार्थाः, नासंहतं चेतनमन्तरेणोपपद्यन्त इत्यतोऽप्यस्ति तदसंहतं चेतनात्मकं ब्रह्म यत्कृत एव चानन्दो लोकस्येति गम्यते । (६) भयाभयहेतुत्वाच्च । सर्वतो निर्भया हि विद्वांसो दृश्यन्ते सत्स्वपि भयहेतुषु । तन्नूनमस्ति तदानन्दरूपं ब्रह्माभयकारणं तेषाम्, यदविज्ञानाद्भयं लोकस्य वाय्वादिदेवतारूपस्यापीति गम्यते ॥

२५. तस्यास्य ब्रह्मानन्दस्य मीमांसा कर्तव्या भवति-किमयं लौकिकानन्दवदेव विषयविषयिसंयोगजनितः, आहोस्वित्स्वाभाविकः?-इति । तत्र लौकिकानन्द एव तावन्न वस्तुतो विषयविषयिसंबन्धजनितः । यतोऽसौ मनुष्यगन्धर्वानारभ्य यावद्धिरण्यगर्भमुत्तरोत्तरभूमिकासु मनुष्याद्यधराधरभूमिकागतविषयभोगौदासीन्ये सति तत्तच्छतगुणोत्तरत्वेन विभाव्यते । श्रोत्रियत्वेन च तत्तद्विषयभोगकामानभिहतस्य तदुत्तरभूमिगतैस्तुल्य आनन्दोऽनुभूयते । तस्मादकामहतत्वोत्कर्षत एवानन्दोत्कर्षदर्शनान्न लौकिकोऽपि वषियविषयिसंपर्कजनितः । अविद्यया तिरस्क्रियमाणेपरमार्थविज्ञाने स एवैकः परमानन्दो यथाविज्ञानं विषयादिसाधनसंबन्धवशाद्विभाव्यमानो विषयविषयिसंपर्कजनितत्वेन, उत्कर्षापकर्षवत्त्वेन च गृह्यते भ्रान्तैर्लोकैरित्यवगम्यते । तस्मात्, यश्चायं पुरुषे निकृष्टोपाधौ प्रविष्ट इव विभाव्यमानः परमात्मा, यश्चासौ आदित्ये सर्वोत्कृष्टोपाधौ

हिरण्यगर्भे, स एष एव परमानन्दरूपो यः सत्यज्ञानानन्तब्रह्मत्वेन लक्षणवाक्ये निर्दिष्टः। उपाधेर्मूर्तामूर्तलक्षणस्य ब्रह्मण्येव सर्वत्राविद्याविकल्पितत्वात्, उपहिते च कुत्रापि विशेषाभावादित्यवगन्तव्यम् ॥

२६. एतावता ग्रन्थेन ब्रह्मास्तित्वमुपपादितम् । अथाधुना अपोढसर्वविशेषं सत्यं ज्ञानमनन्तं ब्रह्म यथोपवर्णितप्रकारेण विद्वान् अस्माल्लोकाद् दृष्टादृष्टेष्टविषयात् प्रत्यावृत्य, अन्नमयाद्यानन्दमयान्तानुपसंक्रामति । तेषां सतत्त्वं निर्विशेषानन्दरूपं ब्रह्माहमेवेति विजानन् तस्मिन्नभयं प्रतिष्ठां विन्दते-इत्युक्त्या विद्वानेव तद्ब्रह्माश्नुते इत्यन्त्यानुप्रश्नस्यापाकरणं क्रियते । अर्थादविद्वान्न तदश्नुते, अविद्याकल्पित-पञ्चकोशात्मभावभावितत्वात्-इति मध्यमप्रश्नोऽप्यपाकृतो भवति॥

२७-२९. तदेतत् सत्यं ज्ञानमनन्तमिति यथालक्षणं बहुभवनसर्गप्रवेश-रसलाभकार्यकरणसंघातचेष्टाभयप्रतिष्ठासंक्रमणादिविकल्पाध्यारोपेण प्रतिपादितं परं ब्रह्म सर्वस्यात्मभूतं निर्विकल्पत्वाद् वाङ्मनसयोरगोचरं यः स्वात्मानुभवेन वेत्ति 'अयमहमस्मि नित्यविगलितविषयविषयिसंबन्धः स्वाभाविकपरमानन्दरूपः परमार्थात्मा सर्वस्यापि' इति, स कुतश्चन न बिभेति । न च तस्य पुण्याकरण-पापाचरणनिमित्तसंतापसंभवोऽस्ति । पुण्यपापयोरपि तेन स्वात्मरूपेणैव दर्शनात्-इतीदमत्रानन्दवल्ल्यां प्रदर्शितमद्वितीयब्रह्मात्मविद्यारूपं परमरहस्यमिति सर्वं शिवम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य गोविन्दभगवत्पूज्यपादशिष्य
श्रीमच्छङ्करभगच्चरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन
श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां
तैत्तिरीयभाष्यार्थविमर्शिन्यां आनन्दवल्लीभाष्यार्थविमर्शनम् ॥

॥ ॐ ॥

# तैत्तिरीयोपनिषदि

## भृ गु व ल्ली

### वल्लीसंबन्धः

१०. सत्यं ज्ञानमनन्तं ब्रह्म, आकाशादिकार्यम् अन्नमयान्तं सृष्ट्वा तदेवानुप्रविष्टं विशेषवदिवोपलभ्यमानं यस्मात्, तस्मात्, सर्वकार्यविलक्षणम् अदृश्यादिधर्मकमेवानन्दम्। 'तदेवाहम्' इति विजानीयात्। अनुप्रवेशस्य तदर्थत्वात्। तस्य, एवं विजानतः शुभाशुभे कर्मणी जन्मान्तरारम्भके न भवतः — इत्येवम् आनन्दवल्ल्यां विवक्षितोऽर्थः। परिसमाप्ता च ब्रह्मविद्या। अतःपरं ब्रह्मविद्यासाधनं तपो वक्तव्यम्, अन्नादिविषयाणि चोपासनान्यनुक्तानि — इत्यत इदमारभ्यते ॥[१]

---

१. आनन्दवल्ल्यादाविवात्रापि 'सह नाववतु' इत्यादिशान्तिम् अध्येतारः पठन्ति। मुद्रितश्चायं शान्तिपाठः प्रचलितपुस्तकेषु। भाष्यवार्तिककाराभ्यामपरामृष्टत्वात्तु नायमारण्यकभाग इति कृत्वा, इह न निवेशित इत्याकलनीयम् ॥

## भाष्यार्थविमर्शिनी

### २२७. वृत्तार्थसंक्षेपः -

ॐ नमो भगवते वरुणाय ब्रह्मविद्याचार्याय भृगवे च ॥

विमृष्ट आनन्दवल्लीभाष्यार्थः । अथेदानीं भृगुवल्लीभाष्यार्थं यथाशक्ति विमृशामः । आनन्दवल्ल्या अस्या वल्ल्याः संबन्धं वक्तुं वृत्तार्थमनुद्रवति — **'सत्यं ज्ञानमनन्तम्'** इत्यादिना **'विवक्षितोऽर्थः'** इत्यन्तेन । यत्कारणम् उक्तलक्षणं ब्रह्म आकाशाद्यन्नमयान्तं सृष्ट्वा तदेव कार्यमनुप्रविष्टमिव, विज्ञानोपाधिवशाद् द्रष्टृत्वश्रोतृत्वादिविशेषवदिवोपलभ्यते निर्विशेषमेव सत्, तस्मात् सर्वकार्यविलक्षणं सर्वचेतनाचेतनविलक्षणम्, अदृश्यत्वादिधर्मकं निर्विशेषमेवानन्दरूपं ब्रह्म । तत्र सत्यज्ञानानन्तविशेषणानामपि न सत्यत्वादिविशेषधर्मवत्त्वमस्ति । परस्परनियम्यनियामकत्वे सति व्यभिचरत्स्वरूपानृतादिव्यावृत्तस्यादिशब्दोपलक्षितवस्तुस्वरूपमात्रसमर्पकत्वावगमात् । तथा आनन्दशब्दस्यापि न प्रियमोदादिविशेषवदानन्दवद्वाचकत्वम्, किंतु सर्वलौकिकास्पदब्रह्मानन्दविकल्पास्वरूपमात्रलक्षकत्वम् ॥ 'यदीदृशम् अवाङ्मनसगोचरं ब्रह्म, तदेवाहमस्मि' इति विजानीयात् स्वात्मानुभवं संपादयेत् । जगत्सृष्टेः, तदनुप्रवेशस्य च, पञ्चकोशविवेकेन तस्मिन्नेव निर्विशेषे ब्रह्मणि स्वात्मभावावगमार्थं चित्तावतारोपायमात्रत्वेनोपदेशात् । तस्य, एवं विजानतः, 'परं ब्रह्मैव निर्विशेषमहमस्मि' इति परात्मानं स्वसंवेद्यतामापादितवतः, शुभाशुभे कर्मणी पुण्यपापे जन्मान्तरारम्भके सदसद्योनिजन्मनिमित्ते न भवतः । विद्यया तयोरप्यापादितस्वात्मरूपत्वात् इत्ययमानन्दवल्ल्यां विवक्षितोऽर्थः । अन्यत्सर्वमविवक्षितम् । अद्वितीयब्रह्मविज्ञानाङ्गत्वेनैवोपदेशात् तस्येत्यभिप्रायः ॥

### २२८. वर्तिष्यमाणार्थसंक्षेपः -

अथ किमवशिष्यते प्रतिपादनीयं यदुत्थापयत्युत्तरं ग्रन्थमिति ? तत्राह **'अतः परं ब्रह्मविद्यासाधनं तपो वक्तव्यम्'** इति । यद्यपि पञ्चकोशविवेचनमप्यात्मनो यथोक्तब्रह्माभिन्नताविज्ञानाय साधनमेव, तथापि तादृशविचारसामर्थ्याधायकं तप

एवेति तदुपदेशः कर्तव्योऽविशिष्यत इत्यर्थः । अन्नादिविषयाणि चोपासनान्यनुक्तानि वक्तव्यानि । तान्यपि मध्यमाधिकारिणामुपकाराय भविष्यन्ति । मुख्यादिकारिणां तु अन्नादिसंस्तवद्वारेण ब्रह्मोपलब्धिद्वारत्वावधारणार्थानि चेति भावः । एवं चावशिष्टार्थकथनार्थं ग्रन्थारम्भ इत्याह - **इत्यत इदमारभ्यत** इति ॥

## भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति ॥१॥

## पितापुत्रसंवादतात्पर्यम्

**९१. आख्यायिका विद्यास्तुतये । प्रियाय पुत्राय पित्रा उक्ता इति ॥**

**२२९. आख्यायिकार्थः -**

ननु तर्ह्यवशिष्टमेव तपआदि कथ्यताम्, किमनेन भृगुर्वै इत्याख्यायिकाया आरम्भेणेति ? तत्राह — **विद्यास्तुतय इति** । वेदान्तपठितानीदृशान्याख्यानानि पारिप्लवप्रयोगार्थान्येव ; ततश्च न वेदान्तानां विद्याप्रधानत्वमिति सेत्स्यति । तेषामपि मन्त्रवत् प्रयोगशेषत्वात् — इति केचित् कर्मजडाः । तदसत् । अश्वमेधे 'मनुर्वैवस्वतो राजा', 'यमो वैवस्वतो राजा' इत्येवमादीनामेव केषाञ्चिदाख्यानानां विशिष्य पारिप्लवे विनियोगदर्शनात् । अतः संनिहितविद्याप्रतिपादनोपयोगितैवैषाम् आख्यानानां स्वीकार्या । प्रकृते च 'भृगुर्वै वारुणिः' इत्याद्या आख्यायिका विद्यास्तुतये भविष्यति । प्रियाय पुत्राय भृगवे वरुणेन पित्रा हितैषिणा प्रोक्तेयं विद्या। अतो हितेप्सुभिर्ग्राह्येति — इत्यभिप्रायः । आचारप्रदर्शनार्थं च भविष्यतीत्यपि द्रष्टव्यम् । प्रियाय पुत्राय वा योग्यायान्तेवासिने वा वक्तव्येयम्, न यस्मै कस्मैचिदिति॥

## भृगोरुपसत्तिः ।

**९२. भृगुर्वै वारुणिः । वैशब्दः**

**प्रसिद्धानुस्मारकः। 'भृगुः'-इत्येवंनामा प्रसिद्धोऽनुस्मार्यते । वारुणिः । वरुणस्य अपत्यं वारुणिः । वरुणं पितरं ब्रह्म विजिज्ञासुः, उपससार उपगतवान्, 'अधीहि भगवो ब्रह्म' इत्यनेन मन्त्रेण अधीहि अध्यापय। कथय-इत्यर्थः[1] ॥**

**२३०. ब्रह्मजिज्ञासार्थं गुरूपगमनमवश्यं करणीयम् -**

आचारमेव श्रुत्यभिप्रेतं स्फुटीकरोति — **पितरं ब्रह्मविजिज्ञासुः, उपससार उपगतवानिति** । 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः' (मुं. २-१-१२) इति श्रुत्यन्तरमत्रानुसंधेयम् । 'भृगुर्वै, इति प्रसिद्धार्थानुस्मारकेण निपातेनैतद्द्योतयति भृगुर्हि प्रख्यातवैभवो गोत्रप्रवर्तको महर्षिः । सोऽपि पितरमुपगम्यैव ब्रह्म विजिज्ञासितवानित्यत उपगमनविधिः सर्वत्रेष्ट इति । कथमुपससार ? 'अधीहि भगवो ब्रह्म' इत्यनेन मन्त्रेण । मन्त्रपूर्वकं कर्तव्यं गुरूपसदनम्, न च ब्रह्मतत्त्वमविज्ञाय मध्ये उपरमेत — इति यत्नातिशयमादर्तव्यं प्रतिबोधयत्याचार्यो 'मन्त्रेण' इति ॥

ननु कथमधीहि ब्रह्मेति पप्रच्छ ? न हि ब्रह्मेति कश्चन पदार्थो लोके प्रसिद्धः — इति चेत् । नैष दोषः । ब्रह्मवित्परमपुरुषार्थमाप्नोतीति शिष्टप्रवादं श्रुतवान् भृगुस्तत्स्वरूपविशेषं विज्ञातुकामः पप्रच्छ । यथा श्रुत्यन्तरे 'श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति' (छां. ७-१-३) इति नारद इति ॥१॥

**तस्मा एतत्प्रोवाच । अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति । तँ होवाच । यतो**

१. नास्तीदं वाक्यम् आ ॥

वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति ॥२॥

## पितुर्वरुणस्योत्तरम्

९३. स च पिता विधिवदुपसन्नाय तस्मै पुत्राय एतद् वचनं प्रोवाच-'अन्नं प्राणं चक्षुः श्रोत्रं मनोवाचम्' इति । अन्नं शरीरम्, तदभ्यन्तरं च प्राणमत्तारम्। उपलब्धि-साधनानि[1] चक्षुः श्रोत्रं मनो वाचम्-इत्येतानि ब्रह्मोपलब्धौ द्वाराणि उक्तवान् । उक्त्वा च द्वारभूतान्येतान्यन्नादीनि तं भृगुं ह उवाच ब्रह्मणो लक्षणम्। किं तत् ? यतः यस्माद् वा इमानि ब्रह्मादीनि स्तम्बपर्यन्तानि भूतानि जायन्ते । येन जातानि जीवन्ति प्राणान् धारयन्ति, वर्धन्ते। विनाशकाले च यत् प्रयन्ति तद् ब्रह्म प्रतिगच्छन्ति, अभिसंविशन्ति तादात्म्यमेव प्रतिपद्यन्ते । उत्पत्तिस्थितिलयकालेषु यदात्मतां न जहति भूतानि, तदेतद् ब्रह्मणो

---

१. 'अनन्तरम् उपलब्धिसाधनानि' वा ॥

**लक्षणम्। तद् ब्रह्म विजिज्ञासस्व। विशेषेण ज्ञातुमिच्छस्व[1]। यदेवंलक्षणं ब्रह्म तदन्नादिद्वारेण प्रतिपद्यस्व इत्यर्थः । श्रुत्यन्तरं च 'प्राणस्य प्राणमुत चक्षुशश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुस्ते निचिक्युर्ब्रह्म पुराणमग्र्यम्[2]' (बृ. मा. ४-२-२१) इति ब्रह्मोपलब्धौ द्वाराण्येतानीति दर्शयति ॥**

## २३१. ब्रह्मोपलब्धिद्वारम्

'नापृष्टः कस्यचिद् ब्रूयात्' इति न्यायमनुसृत्य भृगोः प्रश्नः पूर्वमुपदर्शितः। अथाचार्यस्याप्ययमेव नियमो यन्न्यायप्राप्तस्य सच्छिष्यस्य परमार्थतत्त्वोपदेशेन तारणम् इत्येतन्न्यायं दर्शयन्नाह – **स च पिता विधिवदुपसन्नाय तस्मै पुत्रायैतद्वचनं प्रोवाचेत्यादि प्रतिपद्यस्वेत्यर्थ** इत्यन्तम् । वचनमुदाहरति 'अन्नं प्राणम्' इत्यादि। तत्र पदार्थांस्तावदाह – 'अन्नं शरीरम्' इत्यदिना । वाक्यार्थमाह – 'इत्येतानि ब्रह्मोपलब्धौ द्वाराणि उक्तवान्' इति । कार्यकरणसंघातद्वारेणैव सर्वप्रत्यगात्मभूतं ब्रह्म विजिज्ञासीत । 'आत्मन्येवात्मानं पश्येत्' '(बृ.मा. ४-२-२८) इति श्रुत्यन्तरात् इत्यभिप्रायः । अस्मिन् हि कार्यकरणसंघाते ब्रह्म निहितं गुहायामिति तत्रैव तद्विजिज्ञासितव्यमिति भावः ॥

## २३२. इमानि भूतानीत्यत्र भूतशब्दार्थः -

कुत्र विज्ञेयं ब्रह्मेतीदमुपदिश्याथ किल्लँक्षणं तदित्येतदुपदेष्टुकाम आह पिता।

---

१. मुद्रितपुस्तकेषु 'इच्छस्व' इत्यात्मनेपदप्रयोग एव दृश्यते । तत्कुत इति न विज्ञायते॥

२. 'पुराणमव्ययम्' आ ॥

तदेतदवतारयति — **उक्त्वेति** । अथेदानीं लक्षणवाक्यं प्रश्नपूर्वकमवतारयति — **किं तदित्यादिना** । इमानि भूतानीत्यत्र किमाकाशादीनि विवक्षितानि, किं वा प्राणिजातानीति विशये — उभयमेव यद्यपि हृदि स्थितं तथापि — प्राधान्यतो जीवा एवात्र विवक्षिताः, जीवैरेव कार्यकरणसंघतेऽन्विष्य स्वात्मत्वेन विजिज्ञासितव्यतया ब्रह्मण इहोपदेशात् इतिभावेनाह — **'यतो यस्माद्वा इमानि ब्रह्मादीनि स्तम्बपर्यन्तानि भूतानि जायन्त'** इत्यादिना **'प्रतिपद्यन्त'** इत्यन्तेन । न हि जीवाः परब्रह्मानतिरिक्तस्वभावाः, स्वतो जायन्ते म्रियन्ते वा; अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातोपाध्यनुरोधित्वेन तु तेषां जननमरणादिसकलसंव्यवहारः। यथाहु**र्वेदान्तार्थसंप्रदायविद आचार्याः** 'आत्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितिः । घटादिवच्च संघातैर्जातावेतन्निदर्शनम्॥' (गौ.का. ३-३) 'मरणे संभवे चैव गत्यागमनयोरपि। स्थितौ सर्वशरीरेषु ह्याकाशेनाविलक्षणः ॥' (गौ.का. ३-९), 'संघाताः स्वप्नवत्सर्वे आत्ममायाविसर्जिताः' (गौ.का. ३-१०) इति च । यथा ह्याकाशो घटाकाशादिरूपेण घटादिरूपेण च जायते, एवंपरमात्मापि जीवरूपेण जीवोपाधिभूतसंघातरूपेण च जायते माययैव । अत उपाधिकृत एव जननमरणस्थित्यादिव्यवहारो घटाकाशादीनामिव जीवानाम् — इति कारिकाणामर्थः ॥

## २३३. भूतानां ब्रह्मकारणकत्वावधारणं कथम् ? -

ननु भूतानि स्वस्वकारणेभ्यो जायमानानि प्रत्यक्षं दृश्यन्ते तत्कथमिदमुच्यते ब्रह्मणो भूतजन्मेति ? नैष दोषः । तत्तद्विकारात्मनावस्थितस्य ब्रह्मण एव सर्वत्र कारणत्वोपपत्तेः । न ह्यचेतनानाम् आकाशादिभूतानां भौतिकानां वा शरीराणां प्राण्युपाधिभूतानां स्वतन्त्रा प्रवृत्तिरूपपद्यते । 'यः पृथिव्यां तिष्ठन्... यः पृथिवीमन्तरो यमयति' (बृ. ३-७-३) इत्येवंजातीयकश्रुतिभ्यः साध्यक्षाणामेव भूतानां प्रवृत्तेरवगमात् । इहापि 'सच्च त्यच्चाभवत् । विज्ञानं चाविज्ञानं च' (२-६), 'तदात्मानं स्वयमकुरुत' (२-७) इति च ब्रह्मण एव सर्वात्मभावकथनाच्च । तस्मात्, परमकारणापेक्षया 'यतो वा इमानि भूतानि जायन्ते' इत्यवधारणमविरुद्धमिति मन्तव्यम् ॥

## २३३ (अ). जातानि जीवन्तीत्यस्यार्थः -

येन जातानि जीवन्ति 'प्राणान्धारयन्ति' इति भाष्यात् प्राणिरूढेरेवोन्मेषो न महाभूतविषयकरूढेरिति नात्राकाशादिप्रसक्तिरिति केचित् । तदसत् । प्राण्युत्पत्तेः प्रथमतः स्फुरणेऽपि तदुत्पत्त्यर्थमेव महाभूतानामप्युत्पत्तेरुक्तनीत्या अपेक्षितत्वात्। सर्वस्यापि जगतो ब्रह्मण एव जन्मस्थितिभङ्गोक्त्या ब्रह्मस्वरूपसमर्पणपरवाक्ये आकाशादिपरिवर्जनस्यानिष्टत्वाच्च । न हि प्राणिलक्षणभूतजन्मादिकारणत्व-कीर्तनमात्रात्परब्रह्मस्वरूपसमर्पणं सेत्स्यति निराबाधम् । न च प्राणिलक्षणानां भूतानां ब्रह्मण्येव नियमेन स्थितिस्तस्मिन्नेव च लयो लोकसिद्धः । अविद्याप्रत्युपस्थापित-महाभूततदारब्धशरीरोपाधिकभूतजन्मादिकारणत्वग्रहणे तु कृत्स्नजगज्जन्मादि-कारणत्वस्य लाभात्तादृशस्य कारणत्वस्यागमैकसमधिगम्यं ब्रह्म प्रविहाय नान्यत्र संभावना भवति । तस्मादाकाशादिकृत्स्नजगत्कारणे एव भूतानां स्थितिं विवक्षुराह पिता 'येन जातानि जीवन्ति' इतीति युक्तम् । एवं च, आकाशाद्यन्नमयात्मान्तसृष्टिं वदन्त्या आनन्दवल्ल्या अस्य लक्षणवाक्यस्यैकवाक्यतापि भविष्यति । अत एव भगवान् भाष्यकारोऽपि 'जीवन्ति प्राणान् धारयन्ति' इत्यक्षरार्थमुक्त्वापि 'वर्धन्ते' इति विवक्षितमार्थिकार्थमप्याह । तेन हि जीवत्यर्थान्तर्भूतानेवान्यानपि भावविकारान् मन्यत इति गम्यते । जन्मना लब्धसत्ताकस्य हि धर्मिणोऽन्ये विकारा विनाशान्ता इति। तस्मान्मन्यामहे युक्तमिह भूतानीति जीवानां प्राधान्येन ग्रहणमाकाशादि-भूतानामप्युपलक्षणार्थमिति ॥

तस्मात्, 'येन जातानि जीवन्ति' इति, स्थावरजङ्गमात्मकानि भूतानि संहतप्राणादिविलक्षणेनैव येन जीवनक्रियां कुर्वन्ति, प्राणान् धारयन्ति; आकाशादिभूतान्यपि स्वरूपेण स्वारब्धभौतिकवस्त्वादिरूपेण च स्थितानि येनैव जीवन्ति, लब्धस्थितिकानि वृद्धिपरिणत्यादिविकारान् भजन्ते इत्यर्थः । येनैव संकलमिदं जगद्धार्यते — इति यावत् ॥

## २३४. ब्रह्मणो भूतसंवेशनस्थानत्वम् -

न केवलं भूतानां ब्रह्मण एव लब्धसत्तास्थितिकत्वम्, तेषां प्रलयोऽपि

तत्रैवेत्याह भगवान् वरुणः 'यत्प्रयन्त्यभिसंविशन्ति' इति । तद्व्याचष्टे — **विनाशकाले यत् प्रयन्ति यद् ब्रह्म प्रतिगच्छन्ति अभिसंविशन्ति, तादात्म्यमेव प्रतिपद्यन्ते इति** । प्रतिगच्छन्ति सन्ति यद्ब्रह्मैव अभिसंविशन्ति आभिमुख्येन सम्यक्प्रविशन्ति फेनबुद्बुदादिकमिव जलम्, तादात्म्यमेव प्रतिपद्यन्ते। ताद्रूप्यमेव प्राप्नुवन्तीत्यर्थः। न मूषकादिरिव बिलादिकं स्वं रूपं रक्षित्वैव विशन्तीति भावः। यद्यपि 'यतो वा .... जायन्ते' इत्यत्रैव भूतानां ब्रह्मप्रकृतिकत्वमुक्तकल्पम्, 'जनिकर्तुः प्रकृतिः' (पा. १-४-३०) इति स्मरणात्, तथापि 'येन जीवन्ति' इत्यस्य यन्निमित्तं तेषु जीवनं स्थितिः — इत्यर्थकत्वात् निमित्तोपादानोभयकारणसाधारणत्वं तत्र भातीति प्रकृतित्वमेवेह ब्रह्मणः प्रधानतया अभिप्रेतमिति विवक्षया 'प्रयन्त्यभिसंविशन्ति' इत्युक्तम् । न हि घटादयो विनश्यन्तः कुलालादिकं निमित्तकारणमभिसंविशन्तीति। निमित्तत्वं तु 'यतो वा' इत्यवधारणादधिष्ठानान्तरानुपदेशाच्चावगम्यत इति बोध्यम् ॥

**२३५. लक्षणवाक्यार्थः -**

ननु, 'अधीहि भगवो ब्रह्म' इति ब्रह्म पृष्टं मया । तज्जिज्ञासोर्मम किं भूतजन्मस्थितिभङ्गेनोपदिष्टेन ? ' इत्याशङ्क्य त्वज्जिज्ञासितकथनार्थमेवेदं भूतजन्मादिकारणमुपदिष्टमिति पिता प्राह 'तद्विजिज्ञासस्व । तद्ब्रह्मेति' । तद्व्याख्यास्यन् लक्षणवाक्यस्यैदंपर्यं तावदाह —**उत्पत्तिस्थितिलयकालेषु यदात्मतां न जहति भूतानि तदेतद्ब्रह्मणो लक्षणम् । तद्ब्रह्म विजिज्ञासस्व विशेषेण ज्ञातुमिच्छ (स्व) इति** । अयमभिप्रायः । नेदं लक्षणवाक्यं ब्रह्मणो जगज्जन्मादिकारणत्वं धर्मत्वेन प्रदर्शयितुं प्रवृत्तम् । न हि तद्गुणा विजिज्ञासितम्, किं तर्हि यददो भूतजन्मादिकारणत्वकथनव्याजेन कृत्स्नजगदात्मत्वं सामान्येनोपदिष्टं मया, तदेव तु ब्रह्मणो लक्षणं यत्पृष्टं भवता । तदेव च ब्रह्म भवतोऽप्यात्मा । तस्माद् यदात्मतां त्रिष्वपि सृष्ट्यादिकालेषु सर्वमिदं जगन्न जहाति भवांश्च, तद्ब्रह्म विशेषेण 'इदमहम्' इति ज्ञातुमिच्छेति । न ह्याकाशादिकं जगदिदं तत्त्वत एव ब्रह्मणोऽजस्वभावाज्जातमित्युपपद्यते, तत्त्वत एव ब्रह्मणो जातः सन् जीवः पुनरपि मृतस्तत्प्रयन्नभिसंविशति तेनैकीभवतीति वा । अतो ब्रह्मणो जगज्जन्माद्युपदिश्यमानं

मायिकमेव । तस्य सार्वदिकं तत्त्वं तु ब्रह्मैव, घटशरावादेरिव तदुपादानकारणं मृदादि। अविद्यया तु तद्विलक्षणमात्मानं विभावयमानोऽयं जीवो यथावस्थितं ब्रह्मैव स्वात्मत्वेन विदित्वा कथं नु नाम कृतकृत्यो भवेदित्युपदिश्यते जगज्जन्मादिकारणत्वं ब्रह्मणोऽत्र यथा श्रुत्यन्तरे 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' (छां. ६-८-७) इति । **तदुक्तमागमार्थसंप्रदायविद्भिराचार्यैः** — 'न कश्चिज्जायते जीवः संभवोऽस्य न विद्यते । एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते ॥' (गौ. का. ३-४८), 'अजातस्यैव भावस्य जातिमिच्छन्ति वादिनः । अजातो ह्यमृतो भावो मर्त्यतां कथमेष्यति ॥' (गौ.का. ३-२०) इति, 'सृष्टिर्या चोदितान्यथा। उपायः सोऽवताराय नास्ति भेदः कथञ्चन ॥' (गौ.का. ३-१५) इति च । एवं च भूतजन्मादिकारणत्वोपदेशव्याजेनेदमुपदिष्टं पित्रा — ब्रह्मादिस्थावारान्तेषु भूतेषु जन्मस्थितिप्रलयं गच्छत्स्विव विभाव्यमानेषु यत्तदात्मभूतं तत्त्वं स्वरूपं किञ्चिदपि नातिक्रामति, तद्ब्रह्मेति ज्ञेयम् । यदेवंलक्षणं कृत्स्नजगदात्मभूतं मिथ्याप्रतीत-जगदुत्पत्तिस्थितिहानिभिः सातत्येन प्रतिभासमानैर्नित्यासंस्पृष्टं स्वयमुत्पत्तिस्थिति-विनाशविधुरं कूटस्थं तिष्ठति, तद्विशेषेण जिज्ञासितुं प्रयतस्वेति । यदाहु**र्वार्तिककाराः** — 'उत्पत्तिस्थितिनाशेषु ब्रह्मादिस्थावरावधि । नात्येति ब्रह्मरूपं यत्तद्ब्रह्मेति प्रतीयताम् ॥ विजिज्ञासस्व तद्ब्रह्म यदेवंलक्षणं भवेत् । अनुत्पन्नमहीनं च जगदुत्पत्तिहानिभिः ॥' (तै.वा. भृ. १२, १३) इति ॥

## २३६. ब्रह्म चान्नादिद्वारेणैव प्रतिपत्तव्यम् -

यदात्मतयैव तिष्ठन्ति नित्यदा भूतानि तद्ब्रह्म विजिज्ञासस्व, विशेषेण ज्ञातुं यतस्वेत्युक्तम् । कथं कुत्र नु तद्विजिज्ञासितव्यमित्याशङ्कापरिहारत्वेन पूर्वोक्तं ब्रह्मोपलब्धिद्वारं स्मारयति — **'यदेवंलक्षणं ब्रह्म तदन्नादिद्वारेण प्रतिपद्यस्वेत्यर्थः'** इति । कथमिदमन्नादि ब्रह्मोपलब्धौ द्वारं स्यादित्यतस्तद्विशदीकरणायाह — **श्रुत्यन्तरं चे**त्यादि **दर्शयती**त्यन्तम् । अयमाशयः । वरुणवाक्ये 'अन्नं प्राणम्' इत्यादिना द्वितीयान्तेनान्नादीनां निर्देशादेतद्गम्यते-अन्नादिद्वारेणान्नादेरप्यन्नादिभूतं सर्वकार्यकरणविकल्पास्पदं ब्रह्म वेदितव्यमिति ; तथा हि श्रुत्यन्तरसंवादोऽपि स्यादिति। श्रुतेरर्थस्तुप्राणस्य

प्राणनादिवृत्तिमतोऽपि प्राणभूतं ब्रह्म । तच्चैतन्यात्मज्योतिषावभास्यमानो हि प्राणः सर्वं स्वकार्यं निर्वोढुमीष्ट इति । एवं चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रं च ब्रह्म । ब्रह्मशक्त्यधिष्ठितानां हि चक्षुरादीनां दर्शनादिसामर्थ्यमिति । एवमन्नस्यान्नम् । अन्नकार्यस्यास्य शरीरस्य भोगाधिष्ठानत्वं यदनुग्रहेण, तन्मुख्यमन्नं ब्रह्म । तच्चैतन्यानवभास्यत्वे तस्य भोगाधिष्ठानत्वापायात् । मनसो मनः संकल्पादिव्यापारवन्मनो यच्चैतन्यावभासबलात् स्वकार्यं निर्वर्तयितुं शक्नोति, तद्ब्रह्मैव मनः परमार्थतः । एवं येऽन्नप्राणचक्षुरादीनां प्रत्यगात्मानं विदुः, त एव पुराणमग्र्यं सर्वकारणं सर्वस्याप्यात्मभूतं ब्रह्म निचिक्युः निश्चयेन ज्ञातवन्त इति । तदेवमन्नादिद्वारेण तेषां प्रत्यगात्मभूतं ब्रह्मेति प्रतिपद्यस्वेति वरुणस्याकूतम् । यद्यपि सर्वस्यैवास्य जगत आत्मा ब्रह्म, तथाप्यन्नादिरूपेण स्थिते, निसर्गत एव आत्मबुद्ध्यारोपस्थाने, संघाते एव तत्प्रत्यगात्मतया ब्रह्म प्रथमतो द्रष्टव्यम् । ततः सर्वस्याप्यात्मा अयमेव नान्यदतो व्यतिरिक्तमणुमात्रमप्यस्तीति प्रतिपद्यते । 'आत्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति' (बृ. ४-४-२३) इति श्रुतेः — इति *भावेन अन्नादिद्वारेण प्रतिपद्यस्वेत्युक्तमिति ध्येयम् ॥२॥*

## स तपोऽतप्यत ॥३॥

## तपसो ब्रह्मविद्यासाधनत्वम्

**९४. स भृगुः, ब्रह्मोपलब्धिद्वाराणि ब्रह्मलक्षणं च श्रुत्वा पितुः, तपः ब्रह्मोपलब्धिसाधनत्वेन अतप्यत तप्तवान् । कुतः पुनरनुपदिष्टस्यैव तपसः साधनत्वप्रतिपत्तिर्भृगोः ? सावशेषोक्तेः । अन्नादिब्रह्मणः प्रतिपत्तौ द्वारं, लक्षणं च यतो वा इमानीत्यादि उक्तवान् । सावशेषं हि तत् ।**

साक्षाद् ब्रह्मणोऽनिर्देशात् । अन्यथा हि स्वरूपेणैव ब्रह्म निर्देष्टव्यं जिज्ञासवे पुत्राय 'इदमित्थं रूपं ब्रह्म' इति । न चैवं निरदिशत्, किं तर्हि, सावशेषमेवोक्तवान् । अतोऽवगम्यते नूनं साधनान्तरमप्यपेक्षते पिता ब्रह्मविज्ञानं प्रतीति । तपोविशेषप्रतिपत्तिस्तु सर्वसाधकतमत्वात् । सर्वेषां हि नियतसाध्यविषयाणां साधनानां तप एव साधकतमं साधनम् इति (हि)[१] प्रसिद्धं लोके । तस्मात् पित्रा अनुपदिष्टमपि ब्रह्मविज्ञानसाधनत्वेन तपः प्रतिपेदे भृगुः । तच्चतपो बाह्यान्तःकरणसमाधानम् । तद्द्वारकत्वाद् ब्रह्मप्रतिपत्तेः । 'मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः । तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते ॥' (मौ.ध. २५०-४) इति स्मृतेः ॥

२३७. ब्रह्मजिज्ञासोर्विशिष्टसाधनमपेक्षितम् -

पितुरुपदेशानन्तरं भृगुणा यदनुष्ठितं तत्कथयच्छ्रुतिवाक्यं व्याचष्टे **'स भृगुरित्यादिना 'तप्तवान्'** इत्यन्तेन । तत्र वरुणेन अन्नादि द्वाराण्युपदिष्टानि, ब्रह्मलक्षणं च । न तु तपः । कुतस्तर्हि तपसोऽनुष्ठेयत्वप्रतिपत्तिर्भृगोरित्याशङ्कते — **कुतः पुनरिति** । परिहरति — **सावशेषोक्तेरिति** । तद्विवरणम् **अन्नादीत्यादि,**

१. अयं हिशब्दस्त्यक्तुं शक्यः । मुद्रितपुस्तकेषु तु दृश्यते ।

**इत्थंरूपं ब्रह्मेतीत्यन्तम्** । ब्रह्म हि अन्नादिद्वारेण प्रतिपत्तव्यम्, जगज्जन्मादिकारणत्वात्तदात्मत्वलक्षणोपेतं ब्रह्मेति च — इत्येतावन्मात्रमुक्तवान् पिता न तु 'इदं तदीदृशम्' इति विशिष्य । तस्मात्स्वरूपेण विशेषतो ब्रह्मप्रतिपत्तिरवशिष्यते तावत् । ननु विशेषतोऽप्युक्तवानेव 'अन्नं प्राणम्' इत्यादि । न । अविवक्षितत्वात्। न ह्यन्नादेर्ब्रह्मत्वमत्र विवक्षितम् । ब्रह्मणोऽनेकत्वप्रसङ्गात्। अस्ति तदेकं ब्रह्म यद्विज्ञानात्परमपुरुषार्थो भवतीत्युपश्रुत्य हि तद्विशेषजिज्ञासया पितरमुपससार भृगुः 'अधीहि भगवो ब्रह्म' इति । तत्कथं तस्मै जिज्ञासवे प्रियपुत्राय 'अन्नं प्राणम्' इत्याद्यनेकरूपं ब्रह्मेत्युपदिशेत् पिता ? न चानेकात्मकमेव ब्रह्माभिप्रेतम् । अनवधारणात् । न ह्यनेकमेव ब्रह्म इत्यवधारयन्ति । प्रत्युत अन्नाद्युपदेशानन्तरमनुपदमेव 'यतो वा' इत्यादिना एकमेव तु ब्रह्म भूतजन्मादिकारणत्वेन निर्देक्ष्यति। अतः सावशेषमेव तस्य वचनमिति गम्यते ॥

## २३८. तपस एवापेक्षितसाधनत्वनिर्धारणे उपपत्तिः -

अस्त्वेवं सावशेषत्वं पितुरुक्तेः । ततः किं सिध्यतीत्यत आह **अतोऽवगम्यते नूनं साधनान्तरमप्यपेक्षते पिता ब्रह्मविज्ञानं प्रतीति** । 'यद्यप्यहं ब्रह्मजिज्ञासुर्ब्रह्मज्ञानार्थमेवासादितशिष्यगुणः पितरमुपसन्नः, तथापि जिज्ञासोरपेक्षितं साधनान्तरमप्यस्तीति नूनं मन्यते पिता, यदन्तरेण न प्रतिपत्तिरस्ति; अतस्तच्चोदनार्थं ब्रवीति 'तद्विजिज्ञासस्व । तद्ब्रह्म' इति, न तु स्वयमेव तदित्थमिति कथयति —'' इति मन्यते भृगुरित्यर्थः ॥

नन्वेवमपि कथं तप एव स साधनविशेष इति प्रतिपन्नवान् ? तत्रोत्तरम् — **'तपोविशेषप्रतिपत्तिस्तु'** इत्यादि, **प्रतिपेदे भृगुरित्यन्तम्** । नियमेन साध्यं साधयतामुपायानां तप एव साधकतमत्वेन प्रसिद्धं शिष्टानां लोके ! 'यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्च दुष्करम् । सर्वं तु तपसा साध्यं तपो हि दुरतिक्रमम् ॥' (मनु. ११-२३८) इति स्मृतेः । दुरतिक्रममिति दुर्लङ्घ्यशक्तिकम् । नियमेन फलदायीति यावत्। श्रुतेश्च 'तपसा देवा देवतामग्र आयन् तपसर्षयः सुवरन्वविन्दन् तपसा सपत्नान् प्रणुदामारातीस्तपति सर्वं प्रतिष्ठितं तस्मात्तपः परमं वदन्ति' (तै. ना. ७९) इति । उपपत्तिमुपसंहरसि 'तस्मात्, पित्रानुपदिष्टमपि ब्रह्मविज्ञानसाधनत्वेन तपः प्रतिपेदे भृगुः' इति ॥

**२३९. ब्रह्मप्रतिपत्तिसाधनत्वेनाभिमतस्य तपसः स्वरूपम् -**

तत्र किंरूपं तपोऽत्राभिप्रेतम् ? इत्यत आह — तच्च तप इत्यादि । यद्यपि कायक्लेशप्रधानं कृच्छ्रचान्द्रायणाद्येव मुख्यवृत्तेन तपश्शब्दवाच्यम् 'तपो नानशनात्परं यद्धि परं तपस्तद्दुर्धर्षम्' (तै.ना. ७८) इत्यादिश्रुतेः; तथापि न तस्य साक्षाद् विज्ञानसाधनत्वमस्मि । न च वेदान्तविचारे विशेषतोऽधिकृतानां तुरीयाश्रमिणां कृच्छ्रादि विहितमस्ति । निवृत्तिधर्मैकनिष्ठत्वात् तदाश्रमस्येत्यभिप्रेत्याह — 'ब्रह्मान्तःकरणसमाधानम्' इति । कथमेतदवगम्यते ? तत्राह — तद्द्वारकत्वाद्ब्रह्मप्रतिपत्तेरिति । तस्मिन् सत्येव ब्रह्मविज्ञाने योग्यो भवति यतः, इत्यर्थः। बाह्यकरणानां समाधानं विषयेषु विक्षिप्तस्य मनसस्ततो व्यावृत्तिपूर्वकमिन्द्रियाणामुपरमः । अन्तःकरणस्य तु समाधानं विषयचिन्तनादितो व्यावर्त्य स्वात्मन्येव निधानम् — इति विवेकः । ननु करणसमाधानस्य तपःशब्दशब्दितत्वं कुतोऽवगतम् ? इत्याशङ्क्य तत्र प्रमाणभूतां **स्मृतिम्** उदाहरति — 'मनसश्च' इत्यादिकाम् । तत्र हि करणसमाधानं परमतपस्त्वेन संस्तुतमिति भावः । श्लोके समाधानार्थक ऐकाग्र्यशब्दः । तच्चेदमैकाग्र्यं न भावनापराभिधानमुपासनम्, किं तर्हि तत्वदिदृक्षया प्रणिधानमिति 'तद्द्वारकत्वाद् ब्रह्मप्रतिपत्तेः' इति भाष्यसामर्थ्यादवसीयते । 'दृश्यते त्वग्र्यया बुद्ध्या' (का. १-३-१२) इति श्रुतेश्च। अनेन च तपसा **भवगद्गीताद्युपदर्शितो**ऽमानित्वादि-ज्ञानसाधनगणः सर्वोप्युपलक्षितो वेदितव्यः । यत्त्वत्र वार्तिककारैर्व्याख्यानान्तरम् 'अन्वयव्यतिरेकादिचिन्तनं वा तपो भवेत्' । अहं ब्रह्मेति वाक्यार्थबोधायालमिदं यतः ॥' (तै.वा ३-१९) इति तद् 'विजिज्ञासस्व' इत्युपदेशेनैव गतार्थमिति मम मन्दमतेर्भाति । उत्तरत्र 'तपसा ब्रह्म विजिज्ञासस्व' इति तपस एव विजिज्ञासासाधनत्वेन पुनःपुनरुपदेशदर्शनात् । तस्मात् 'तप आलोचने' इति स्मरणात् इति प्रणिधानपूर्वकमानसालोचन एव पर्यवसास्यतीति कृत्वात्र करणैकाग्र्यमेव प्राधान्येन धृतं भाष्यकारैरित्यवधेयम् ॥३॥

# स तपस्तप्त्वा ॥

## (इति प्रथमोऽनुवाकः)

**अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति ॥४॥**

## अन्ने ब्रह्मत्वनिश्चयः

**९५. स च तपस्तप्त्वा, अन्नं ब्रह्मेति व्यजानात् विज्ञातवान् । तद्धि यथोक्तलक्षणोपेतम् । कथम् ? अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति । तस्मात्, युक्तमन्नस्य ब्रह्मत्वम्-इत्यभिप्रायः ॥**

**२४०. समष्टिरूपमेवान्नादिकमत्रोपदिष्टम् -**

'स तपस्तप्त्वा' इत्यादिभाष्यस्य अयमर्थः । स भृगुर्यथावर्णितैकाग्र्यपूर्वकं कुत्रेदं जगज्जन्मादिहेतुत्वलक्षणं वर्तेत ? — इति पर्यालोच्य अन्नादिद्वारकत्वं च ब्रह्मविज्ञानस्य स्मृत्वा अन्नं ब्रह्मेति व्यजानात्-इति । अन्नमिति नान्नरसमयं शरीरमत्र ग्रहीतव्यम् । तस्य यथोक्तलक्षणानुपेतत्वात् । किं तर्हि, अन्नमयकोशतत्त्वप्रतिपादक-श्लोकोक्तं सर्वान्नमयकारणं समष्टिभूतलक्षणं विराडुपाधिभूतम् । तद्धि सर्वस्य शरीररूपस्यान्नस्यान्नमिति । प्रथमतरोपदिष्टं ब्रह्मप्रतिपत्तिद्वारम् । अतो यथोक्तलक्षणत्वात्, अन्नं ब्रह्मेति व्यजानात् भृगुरिति मन्तव्यम् । एवं ह्यस्य ग्रन्थस्य 'अन्नाद्वै प्रजाः प्रजायन्ते' (२-२) इत्यनेनैकार्थ्यं भवति । एवम् उत्तरेष्वपि पर्यायेषु प्रणादीनां समष्ट्युपाधीनामेव ग्रहणम् । तत्र तत्र तत्तदुपाधिसहितमेवात्मानं ब्रह्मेति

व्यजानादिति च वाक्यार्थोऽवसेयः । एवं यावन्निरुपाधिकप्रत्यगात्माभिन्नाद्वितीयानन्दस्य ब्रह्मत्वेनाधिगमः । तदर्थमेव ह्यत्राविद्याकल्पितस्य पूर्वस्य पूर्वस्योपाधेरुत्तरस्मिन्नुत्तरस्मिन् प्रविलापनं तपसा क्रियते विशुद्धब्रह्मात्माधिगमपर्यन्तम् — इति सर्वमानन्दवल्ल्युक्तनीत्या (२५ पु. ८०) अत्राप्यनुसंधेयम्। तदेतदाहुर्**वार्तिककाराः** — 'उक्तान्यन्नमयादीनि यानि तेषां तु कारणम् । अन्नादि प्रतिपत्तव्यं न हि कार्येऽस्ति लक्षणम् । शुङ्गं ह्यन्नमयाद्येतदन्नादेरुपजायते । कार्यप्रविलयश्रुत्या कारणानन्दमेत्यतः । कार्याणि कारणेष्वेवं तानि चैवोत्तरोत्तरम्। प्रविलाप्य परानन्दं यायाद्वाचामागोचरम् ॥' (तै.वा. ३-२३, २४, २५) इति ॥४॥

**तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तँ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति ॥**

**भृगोर्ब्रह्मप्रतिपत्तिक्रमः**

**९६. स एवं तपस्तप्त्वा अन्नं ब्रह्मेति विज्ञाय लक्षणेन उपपत्त्या च, पुनरेव संशयमापन्नो वरुणं पितरमुपससार 'अधीहि भगवो ब्रह्म' इति । कः पुनः संशयहेतुरस्येति? उच्यते । अन्नस्य उत्पत्तिदर्शनात् । तपसः पुनःपुनरुपदेशः साधनातिशयत्वावधारणार्थः। यावद् ब्रह्मणो लक्षणं निरतिशयं न भवति, यावच्च जिज्ञासा न निवर्तते, तावत् तप एव ते साधनम् । तपसैव ब्रह्म विजिज्ञासस्व-इत्यर्थः । ऋज्वन्यत् ॥**

## २४१. भृगोः पुनरप्युपगमने कारणम् -

**'स एवं तपस्तप्त्वा'** इत्यादिभाष्यवाक्यस्यायमर्थः । लक्षणेन 'यतो वा' इत्याद्युक्तरूपेण उपपत्त्या च सर्वम् अन्नात्मकम् अन्नमयशरीरत्वेन आत्मा सर्वस्य च मम च — इति परामर्शरूपया अन्नं ब्रह्मेति तपः पूर्वकं निर्धार्य पुनरपि तत्र लक्षणस्य कृत्स्नतया समन्वयाभावमालक्ष्य तस्य ब्रह्मत्वे संशयमापन्नो भृगुः । न हि स्वयमुत्पत्तिमत् सर्वोत्पत्तिकारणमित्युपपद्यत इति । अतः किमप्यतोऽन्यद् ब्रह्म भवितुमर्हतीति पुनरपि पितरमुपगतवान् 'अधीहि भगवो ब्रह्म' इति । परमार्थतः किं ब्रह्म तद्ब्रवीतु मां भगवानिति । एवमुत्तरेष्वपि पर्यायेषु पुनरेव पितरमुपससारेत्यादि वाक्यार्थः यथायथं संशयोत्थानपूर्वकम् उन्नेयः ॥

## २४२. पितुः प्रतिवचनम् -

पिता तु 'न मया वक्तव्यमवशिष्यते । उक्तं हि मया 'अन्नं प्राणम्' इत्यादिना ब्रह्मप्रतिपत्तिद्वारम् । लक्षणं च ब्रह्मणः । अतस्तेनैव द्वारेण उक्तलक्षणलक्षितं किं स्यादिति मनस ऐकाग्र्येण पर्यालोच्य त्वयैव निर्धार्यमस्ति ब्रह्म । जिज्ञासोः प्रत्यगात्मत्वात्तस्य'' इत्याशयेन तपसा ब्रह्म जिज्ञासस्वेत्याह । तत्र तपसः साधनत्वेनावगतस्यैव पुनरुपदेशः किमर्थं इत्यत्राह भगवान् भाष्यकारः — **तपसः पुनःपुनरुपदेशः साधनातिशयत्वावधारणार्थः** इति । अवधारणार्थत्वमेव विवृणोति — **यावद्ब्रह्मण इत्यादि** । तदेतल्लक्षणं यावन्निरतिशयं न भवति, नास्त्यतः परं परमार्थात्मभूतं सर्वस्येति, यावन्नाध्यवसायो भवति, यावच्च तत्र संशयाभावात् ततोऽन्यदपि भवेत्किञ्चिज्ज्ञेयमिति मतिर्न भवति, तावत्तप एव ते साधनं नान्यदुपदेष्टव्यं तत्रावशिष्यते साधकतरम्-इत्यभिप्रायकोऽयं 'तपसा' इत्यादि भूयो भूय उपदेश इत्यर्थः । एवं च 'तपो ब्रह्म' इत्यनेनैवावगम्यते । ब्रह्म प्रतिपत्तिकारणेषु तप एव निरतिशयमिति तद् ब्रह्म-इत्यर्थकत्वात् तद्वाक्यस्य ॥

**स तपोऽतप्यत ॥६॥**

स तपस्तप्त्वा ॥

(इति द्वितीयोऽनुवाकः)

प्राणो ब्रह्मेति व्यजानात् । प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते । प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्तीति ॥७॥

तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तँ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति ॥

स तपोऽतप्यत ॥९॥

स तपस्तप्त्वा ॥

(इति तृतीयोऽनुवाकः)

मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते । मनसा जातानि जीवन्ति । मनः प्रयन्त्यभिसंविशन्तीति ॥१०॥

तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार ।
अधीहि भगवो ब्रह्मेति । तँ होवाच। तपसा
ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति ॥

स तपोऽतप्यत ॥१२॥

स तपस्तप्त्वा ॥

(इति चतुर्थोऽनुवाकः)

विज्ञानं ब्रह्मेति व्यजानात् । विज्ञानाद्ध्येव
खल्विमानि भूतानि जायन्ते। विज्ञानेन
जातानि जीवन्ति । विज्ञानं
प्रयन्त्यभिसंविशन्तीति ॥१३॥

तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार ।
अधीहि भगवो ब्रह्मेति । तँ होवाच । तपसा
ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति ॥१४॥

स तपोऽतप्यत ॥१५॥

स तपस्तप्त्वा ॥

(इति पञ्चमोऽनुवाकः)

**आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति ॥१६॥**

**२४३. आनन्दब्रह्मपर्यायपर्यन्तस्य ग्रन्थस्य समुदितार्थः -**

यथैव स भृगुः, अन्नब्रह्मविज्ञानानन्तरं तस्योत्पत्तिमत्त्वदर्शनाद् यथोक्तलक्षणासंपन्नतामालक्ष्य पुनरेव पितरमुपजगाम, पिता च 'तपस्यैव ब्रह्म विजिज्ञासस्व' इत्युपदिक्षत्, तथैव प्राणस्यापि मनःपारतन्त्र्यमालक्ष्य तस्मिन्नपि जगदात्मता न संभवतीति मत्वा पुनरपि पितरमुपजगाम । तेन चोपदिष्टं तप एवानुष्ठाय मनसोऽपि करणत्वेन कर्तृभूतविज्ञानपरतन्त्रत्वात्, अब्रह्मत्वं मत्वा पुनरपि परमार्थं ब्रह्मजिज्ञासुरभूत् । तदनन्तरं तपस्तप्त्वा विज्ञानस्यापि 'महद्यक्षं प्रथमजम्' (बृ. ५-४-१) इत्यादिश्रुतिविज्ञापितं जन्मवत्त्वं मनसि कृत्वा तत्राप्यपरितुष्यन् पितरं यथापूर्वं प्रार्थयामास 'अधीहि भगवो ब्रह्म' इति । तदापि 'तपसैव ब्रह्म विजिज्ञासस्व' इत्युक्तस्तपोऽतप्यत यावत्परमानन्दब्रह्मविज्ञानम् इत्यवशिष्टग्रन्थार्थ इत्यभिप्रायेणाह ऋज्वन्यदिति ॥

## आख्यायिकातात्पर्यम्

**९७. एवं तपसा विशुद्धात्मा प्राणादिषु साकल्येन ब्रह्मलक्षणमपश्यन् शनैरन्तरनुप्रविश्य अन्तरतममानन्दं ब्रह्म विज्ञातवांस्तपसैव साधनेन भृगुः । तस्मात् ब्रह्मविजिज्ञासुना बाह्यान्तःकरणसमाधान-**

**लक्षणं परमं तपः साधनमनुष्ठेयम्-इति प्रकरणार्थः ॥**

**२४४. तपः परमं साधनम् -**

बाह्यान्तःकरणसमाधानरूपं तप एव भृगोः साधनमभूद् यस्मात्, तस्मात् तदेवानुष्ठेयं तत्तजिज्ञासुभिरित्यत्र आख्यायिकायाः परमं तात्पर्यम् । तथा हि श्रुत्यन्तरम् 'नाशान्तो नासमाहितः । नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्' (का.१-२-२४) इति ॥

**२४५. आनन्दो ब्रह्मेति पञ्चकोशविलक्षणं निर्विशेषं ब्रह्म विवक्षितम् -**

समाहितमनसा अन्नादिद्वारेण यथोक्तलक्षणं ब्रह्म विज्ञायत इत्युक्तम् । तत्रान्तरमन्तरं प्राणादिकम् आत्मत्वेन प्रतिपन्नः पूर्वं पूर्वं तत्र प्रविलापयन् क्रमेण सर्वान्तरं ब्रह्म प्रतिपेदे आनन्दवल्ल्युक्तेन क्रमेण इति द्योतयितुं **'शनैः शनैरन्तरनुप्रविश्य'** इत्युक्तम् । अन्नं प्राणं चक्षुः श्रोत्रम् इत्यादि तूपदिष्टं द्वारं च कार्यकरणसंघात एव पञ्चकोशात्मकम्, यस्मिन्नात्ममतिरज्ञानाम् । बुद्धिसंस्कारतारतम्यापेक्षया कश्चिदन्नमात्मानमभिमन्यते । कश्चित्तदन्तरं प्राणम्, कश्चित्ततोऽन्तरं मनः, कश्चितु ततोऽप्यन्तरं विज्ञानम् । अन्नमयादीनां सतत्त्वं यथाक्रमं विराड्वायुवेदात्महिरण्यगर्भरूपं ब्रह्म — इत्यवोचामानन्दवल्लीभाष्यविमर्शे । अत्र तु आनन्दमयस्य सतत्त्वमपि विज्ञानब्रह्मण्येव कथञ्चिदन्तर्भूतं बोध्यम् । फलभोक्तृत्वस्यापि कर्त्राश्रितत्वोपलब्धेः । 'आनन्दो ब्रह्मेति व्यजानात्' इत्यनेन तु न सविशेषात्मा ग्रहीतव्यः, नापि संवेद्यं सुखम् । प्रियमोदादिविशेषाश्रवणात्, एतस्मिन्नेव ब्रह्मविद्याया परिसमाप्तिदर्शनात्, श्रुत्यन्तरे 'नान्यद्विजानाति' (छा. ७-२४-१) इति विज्ञानप्रतिषेधाच्च । आत्मस्वरूपान्वाख्यानमात्रं त्वेतत् 'आनन्दो ब्रह्म' इति । तदाह — **अन्तरतममानन्दं ब्रह्म विज्ञातवांस्तपसैव साधनेन भृगुरिति ॥**

## २४६. लक्षणवाक्यविषये वादिविकल्पाः, तद्विमर्शश्च -

लक्षणवाक्ये 'यतो वा इमानि भूतानि जायन्ते' इत्यत्र लक्षणत्रयं परस्परनिरपेक्षं निर्दिष्टमिति केचिन्मन्यन्ते । त्रयं मिलितमेकमेवेदं लक्षणमभिन्ननिमित्तोपादानतया अद्वितीयं ब्रह्मोपलक्षणम् — इत्यन्ये । जगदुपादानं चात्र शुद्धं ब्रह्म, ईश्वररूपं, जीवरूपं वेति विकल्प्य तत्रापि विप्रतिपद्यन्ते वादिनः । किञ्च ब्रह्म माया चेत्युभयं कारणमित्येके; ब्रह्मैवोपदानं माया तु द्वारकारणमित्यन्ये, मायैवोपादानं ब्रह्म तु तदधिष्ठानत्वेनोपादानमित्युपचर्यते-इत्यपि केचित् । तदेवं विविधवादिविकल्पनं भृगुवरुणसंवादस्य ब्रह्मस्वरूप निर्धारणपरत्वं प्रस्मृत्येति स्पष्टम् । न हि ब्रह्मलक्षणं विजानीयाम् इति भृगुरुपागच्छत् पितरम्, केवले ब्रह्मणि पृष्टे तत्र जगत्कारणत्वमपि प्रतिपादयिष्यामीति प्रावर्तत वा तत्पिता । न च मायाब्रह्मणोरन्यतरस्य जगत्कारणत्वमधिजिगंस्यतेऽत्र, येन तन्निर्धारणार्था वाक्यप्रवृत्तिः स्यादिति । तस्मान्न जगज्जन्मादिकारणत्वं ब्रह्मणोऽसाधारणधर्मत्वेन विवक्षितं वरुणेन, किं तर्हि, जगज्जन्माद्यास्पदत्वकथनेन सर्वस्य चेतनाचेतनात्मकस्य जगत आत्मत्वेनैवोपदिदिक्षितं ब्रह्म, तदधिगमार्थमेव चान्नादीनि ब्रह्मात्मोपलब्धौ द्वाराणि निर्दिष्टानि-इति युक्तम् । तथा हि व्याख्यातं भाष्यकारैरिति ॥

## २४७. अविद्योपादानकजगद्वाद्यभिमतलक्षणद्वयविमर्शः -

एतेन, इदमप्यपास्तं यद्वर्णयन्ति केचिद् व्याख्यातारः । ब्रह्मलक्षणं किल द्विविधम्, स्वरूपलक्षणं तटस्थक्षणं चेति । तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणम्, यथा सत्यादिकम् । 'सत्यं ज्ञानमनन्तं ब्रह्म' (२-१), 'आनन्दो ब्रह्मेति व्यजानात्' (३-६) इत्यादिश्रुतेः । स्वरूपस्य स्ववृत्तित्वाभावेन कथं लक्षणत्वमिति तु न शङ्क्यम् । स्वस्यैव स्वापेक्षया धर्मधर्मिभावकल्पनया लक्ष्यलक्षणत्वसंभवात् । तटस्थलक्षणं नाम यावल्लक्ष्यकालमनवस्थितत्वे सति यद् व्यावर्तकं तदेव । यथा जगज्जन्मादिकारणत्वम् । अत्र जगत्पदेन कार्यजातं विवक्षितम् । कारणत्वं कर्तृत्वम्। अतोऽविद्यादौ नातिव्याप्तिः । कर्तृत्वं च तदुपादानगोचरापरोक्ष-ज्ञानचिकीर्षाकृतिमत्त्वम्। ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे 'यः सर्वज्ञः सर्ववित्' (मुं. १-१-९) इत्यादिश्रुतिर्मानम् । तादृशचिकीर्षासद्भावे च

'सोऽकामयत' (२-६) इत्यादिश्रुतिर्मानम् । तादृशकृतौ च 'तन्मनोऽकुरुत' (बृ. १-२-१) इत्यादिवाक्यम्। ज्ञानेच्छाद्यन्यतमगर्भलक्षणत्रितयं विवक्षितम् । अन्यथा व्यर्थविशेषणत्वापत्तेः। एवं जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः । एवं च लक्षणानि नव संपद्यन्ते। ब्रह्मणो जगज्जन्मादिकारणत्वे च 'यतो वा इमानि भूतानि जायन्ते' । इत्यादि-श्रुतिर्मानम् । यद्वा निखिलजगदुपादानत्वं ब्रह्मणो लक्षणम् — इति वर्णयन्ति ।

सर्वं त्वेतदभित्तिचित्रम् । यतो नात्र 'यतो वा' इत्यादिवाक्ये जगतो जन्मादिकं तादर्थ्येनैव श्राव्यते । कथं तर्हि, ब्रह्मस्वरूपाधिगमोपायत्वेन । नापि ब्रह्मणो जगदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वमस्तीति कल्पनं प्रमाणवत् । न चोदाहृतश्रुतयस्तत्र मानं भवेयुः । तथा हि । 'यः सर्वज्ञः' (मुं १-१-९) इति श्रुतिस्तावत् तस्मादेव ब्रह्मणः सर्वमेतज्जायत इत्याह, न पुनर्ब्रह्मणो जगदुपादान-विषयकं ज्ञानमस्तीति । न च 'सोऽकामयत' (२-६) इति वचनं जगदुपादानगोचरचिकीर्षासद्भावमाह । यतस्तत्र 'बहु स्याम् इत्यात्मन एवोपादानत्वमकामयत — इत्यक्षरार्थो भवति । अस्य च वचनस्यैदंपर्यम् आनन्दवल्ल्यां भाष्यकारैरन्यथैव वर्णितमिति स्फुट एव भाष्यविरोधोऽत्र । 'तन्मनोऽकुरुत' (बृ. १-२-१) इति तु मृत्युशब्दवाच्यहिरण्यगर्भस्य मनोऽभिव्यञ्जकत्वमाह, नैव तु ब्रह्मणो जगदुपादानगोचरकृतिमत्त्वमाचष्टे । न च ब्रह्मणो जगज्जन्मादिकर्तृत्वे ब्रह्मातिरिक्तस्याविद्यादेर्जगदुपादानत्वे वा प्रकृतं लक्षणवाक्यं प्रमाणं भवितुमर्हति । 'आनन्दो ब्रह्मेति व्यजानात्' इति निर्णयवाक्ये कर्तृत्वगमकस्य शब्दस्य कस्यचिपदप्यभावात् । अभ्यूहितेऽपि तादृशशब्दस्य, सविशेषण एवात्र विवक्षितत्वापत्त्या अपसिद्धान्तप्रसङ्गात् । नापि निखिलजगदुपादानत्वं ब्रह्मणो लक्षणमिति पक्षान्तरकक्षीकरणेन उक्तदोषान्निस्तारो भवेत् । तटस्थलक्षणमन्वयाभावस्त्वभ्यधिको दोषः समापतेत् । न हि निखिलजगदुपादानत्वे लक्षणत्वेनोपात्ते यावल्लक्ष्यकालमनवस्थितत्वे सति व्यावर्तकत्वं तस्य संस्यात् । लक्ष्यस्य ब्रह्मणः कालातीतत्वात्, लक्षणस्य च व्यावर्त्यासंभवाच्चेति । यच्चोच्यते सत्यादिकं ब्रह्मणः स्वरूपलक्षणम् । स्वस्यैव स्वापेक्षया धर्मधर्मिभाव कल्पनया लक्ष्यलक्षणत्वसंभवादिति । तदपि न शुध्यति।

आनन्दादेर्हि ब्रह्मणः पृथगवभासाभ्युपगमे 'आनन्दो ब्रह्मेति व्यजानात्' इति वाक्यस्यानन्दधर्मकानन्दो ब्रह्मेति व्यजानात् — इत्यनिष्टार्थपर्यवसानप्रसङ्गात् । अनभ्युगमे चानन्दस्य स्वरूपलक्षणत्वासिद्धेः । किञ्चान्यत्, स्वस्यैव स्वापेक्षया धर्मधर्मिभावकल्पना किमवलम्ब्य क्रियते, किं प्रयोजना च ? — इति वक्तव्यम्। न तावद् भवदभिमतजगदुपादानभूताविद्यामवलम्ब्य कल्पना क्रियेत । तथा सति लक्षणस्य तटस्थलक्षणविशेषात् स्वरूपलक्षणत्वप्रतिज्ञाहानिप्रसङ्गात् । न चान्यथा समस्ति कल्पना । न च ब्रह्मणः स्वरूपनिर्धारणे प्रकृते तस्य निर्विशेषत्वव्याहन्तृ-धर्मधर्मिभावकल्पनया लक्षणप्रणयनस्य किञ्चित् प्रयोजनं संभावयाम इत्यलं तार्किकैः सह सन्धिकरणेन श्रौतं लक्षणमन्यथयद्भिर्विवादेन ॥

## २४८. सूत्रतद्भाष्ययोः कीदृशं ब्रह्मलक्षणमभिप्रेतम् ?-

ननु भवत्पक्षस्य वा कथं निर्दोषत्वम् ? सर्वथापि हि जगज्जन्मादि-कारणत्वस्यालक्षणत्वं वदतः । सूत्रभाष्यकाराभ्यां व्यक्तं विरोधः प्रसज्यते । कथम्? सूत्रकारस्तावत् 'अथातो ब्रह्मजिज्ञासा' (वे. सू. १-१-१) इति जिज्ञासाकर्तव्यत्वोपदेशमुखेन ब्रह्ममीमांसामारभमाणो 'जन्माद्यस्य यतः' इति (वे.सू. १-१-२) तल्लक्षणमसूत्रयत् । भाष्यकारश्च 'किलँक्षणं पुनस्तब्रह्मेत्यत आह भगवान्' इति लक्षणप्रतिपादनपरत्वं सूत्रस्य द्रढयति स्म । समन्वयाध्याये च 'आकाशस्तल्लिङ्गात्' (वे. सू. १-१-२२) इत्येवमादिस्थलेषु तत्र तत्र जगत्कारणत्वमेव ब्रह्मलिङ्गत्वेनोररीकृतम् । भाष्यकारश्च 'परस्माद् हि ब्रह्मणो भूतानामुत्पत्तिरिति वेदान्तेषु मर्यादा' इत्याचक्षाणो तदेवानुमोदते । तच्च कारणत्वं निमित्तोपादनोभयाविशिष्टमिति 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (वे. सू. १-४-२३) इति स्पष्टयामास सूत्रकृत् । भाष्यकारश्च तत् सूत्रं व्याख्यत् 'प्रकृतिश्च उपादानकारणं च ब्रह्माभ्युपगन्तव्यं निमित्तकारणं च' इति । तदेवं गते किमिदमुच्यते जगज्जन्मादिकारणत्वं न ब्रह्मणो लक्षणमिति ?

अत्राभिधीयते । न ब्रूमो 'यतो वा इमानि' इत्यादि ब्रह्मणो न लक्षणमिति, अनेन वाक्येन जगज्जन्मादिकारणत्वं ब्रह्मणो नोच्यत इति वा ; किं तर्हि, नेदं लक्षणं ब्रह्मणो वास्तविकधर्मत्वेन विवक्ष्यते श्रुतौ सूत्रभाष्ययोर्वा — इति । श्रुतौ तावत्

ब्रह्मस्वरूपं जिज्ञासवे उपायत्वेनोपदिष्टमिदमिति गम्यते 'आनन्दो ब्रह्मेति व्यजानात्' (३-६) इत्यनेनैकार्थ्याय । 'अधीहि भगवो ब्रह्मेति', 'तद्विजिज्ञासस्व, तद्ब्रह्मेति' इति प्रश्नप्रतिवचनाभ्यां च ब्रह्मस्वरूपमेवात्र निर्दिधारयिषितं न ब्रह्मधर्म इति गम्यते। सूत्रे च यद्यप्यक्षरार्थमात्रग्रहणे यज्जगज्जन्मादिकारणत्वविशिष्टं तद्ब्रह्म — इत्यपि वाक्यस्य तात्पर्यमवसातुं शक्यते, तथापि 'शास्त्रयोनित्वात्, (वे. सू. १-१-३) इत्युत्तरसूत्रसामर्थ्यान्नेदं कारणत्वलिङ्गेन ब्रह्मानुमानम्, अपि तु 'श्रुतौ जगज्जन्मादिकारणत्वेन यत्समर्प्यते तदेव ब्रह्म' इत्येतावान्मात्राभिप्रायकम् इत्यवगम्यते। भाष्यकारस्तु यद्यपि सूत्रं लक्षणप्रतिपादकमाचष्टे, तथापि नात्र लक्षणं वास्तविकब्रह्मधर्मत्वेन विवक्षति । यतोऽस्य सूत्रस्य विषयवाक्यत्वेनैतदेव भृगुवल्लीवाक्यमुदाहरन् बभाषे — ''किं पुनस्तद्वेदान्तवाक्यं यत्सूत्रेणेह लिलक्षयिषितम्? 'भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति' इत्युपक्रम्याह 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व । तद्ब्रह्मेति' (३-१) तस्य च निर्णयवाक्यम् 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति', (३-६) अन्यान्यप्येवंजातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाण्युदाहर्तव्यानि'' इति ॥ अतः स्वरूपसमर्पणपरमेवेदं लक्षणं न धर्मसमर्पणपरमिति मन्यते भाष्यकार इति सिद्धम्॥

ननु चैवमपि 'सर्वज्ञस्वरूपकारणविषयाणि' इति वदन् कारणत्वमप्यनुमोदत एव भाष्यकार इत्यापन्नम् । तत् किमिति प्रद्विष्यते जगत्कारणत्वरूपं ब्रह्मलक्षणमिति? न वयं जगत्कारणत्वं द्विष्मो यथोपदिष्टं श्रुतौ सूत्रभाष्ययोर्वा । श्रुतौ हि तावत् 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यव्यभिचरत्स्वरूपत्वलक्षणं सत्यत्वं ब्रह्मणः प्रतिज्ञाय 'सच्च त्यच्चाभवत् .... सत्यं चानृतं च सत्यमभवत् । यदिदं किं च । तत्सत्यमित्याचक्षतेख (२-६) इति स्वात्मरूपमजहदेव सत्यं ब्रह्म सत्त्यदादिरूपमभवदिति कथनेन मायिकमेव ब्रह्मणो जगत्कारणत्वमिति प्रतिपादितम्। सूत्रेष्वपि 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (वे.सू. २-१-१४) इत्यादिषु श्रुतियुक्त्यवष्टम्भेन कार्यरूपं जगत्प्रतीतरूपेण वाचारम्भणमात्रत्वान्मायिकमेव; स्वरूपेण तु

कारणाद्ब्रह्मणोऽनन्यत्, तथैवोपलब्धेः — इति निरूपितम् । **भाष्यकारोऽपि** 'न तु शब्दादिमत्कार्यं कारणात्मना हीनं प्रागुत्पत्तेरिदानीं वा अस्ति' (सू. भा. २-१-७) इति ब्रुवन् कार्यस्य जगतः कारणात्मत्वमेवावधारयन् मायिककारणत्वमेवानुमोदते ब्रह्मणः । तदनुसारेणैवेहाप्यस्माभिरजाद्वयब्रह्मण आकाशादिकारणत्वं मायिकमेवेति वर्णितम् । नन्वस्माभिरप्येवमेवाभिधीयते 'उपादानत्वं जगदध्यासाधिष्ठानत्वम्, जगदाकारेण परिणममानमायाधिष्ठानरूपं वा' — इति वदद्भिः । नैतदस्ति । यत्कारणम् अध्यासस्याप्यविद्योपादानकत्वम्, मायायाश्चाविद्यापराभिधानायाः परिणामित्वम्, तद्द्वारा तदधिष्ठानस्योपादानत्वोपचारः — इत्यादि-बह्वसमञ्जसाभ्युपगमाद्भवद्भिः । अस्माभिः पुनः 'अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेनतत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते । पारमार्थिकेन च रूपेण सर्वव्यवहारातीतमपरिणतमवतिष्ठते' (सू.भा. २-१-२७) इत्यादिभाष्यमनुसरद्भिः, आत्मानात्मान्योन्याध्यासरूपाविद्याप्रत्युपस्थापितमायानिमित्तरूपभेदेनैव कारणत्वमभ्युपगम्यत इति महद्वैषम्यम् । तस्मात् 'यतो वा' इत्यादिलक्षणवाक्यं मायिककारणत्वमुपायत्वेनाङ्गीकृत्य सर्वमिदं जगत्सृष्टिस्थितिप्रलयाख्यासु तिसृष्वपि मायिकावस्थासु ब्रह्मात्मत्वं न व्यभिचरतीति ज्ञापयति । मायामात्रं ह्येतद् यत्परब्रह्मणोऽवस्थात्रयात्मना अवभासनं रज्वा इव सर्पादिभावेनेति । ब्रह्मणः सत्यज्ञानानन्दादिरूपबोधकं तु वाक्यं साक्षात् तत्स्वरूपं समर्पयति, न तु धर्मधर्मिभावादिकल्पनादिद्वारेण । यदेव हि परमार्थसत्यं ब्रह्म निर्विशेषम्, तदेव ज्ञानमानन्दरूपं च । न सत्यत्वादिविशेषवत्त्वमीषदपि सहते ब्रह्म कथञ्चनेति । प्रत्यस्तमितसर्वविशेषब्रह्मज्ञानेनैवाभयप्रतिष्ठाफलोपदेशदर्शनात् — इत्यलमतिप्रपञ्चेन॥

## २४९. लक्षणद्वयस्य ब्रह्मस्वरूपाधिगमनप्रकारभेदः -

तदेवमेकस्यैवाद्वितीयस्य सतो ब्रह्मणोऽविद्याकल्पितनामरूपमायावशेनैव जगत्कारणत्वं, सत्यज्ञानानन्दादिरूपत्वं तु स्वरूपेण — इति स्थितम् । तत्र कारणत्वं मायोपाधिद्वारेणोपदिश्यमानं सर्वस्यापि ब्रह्मात्मत्वबोधनेन ब्रह्मस्वरूपे चित्ताव-तारणार्थम्, सत्यज्ञानानन्दादिरूपत्वं तूपदिश्यमानं सकलेतरव्यावर्तकत्वेन

ब्रह्मस्वरूपसमर्पणार्थम् — इति विवेकः । यत्तुः 'आनन्दादयः प्रधानस्य' (वे. सू. ३-३-११) इत्यस्य व्याख्याने भाष्यकार वचनम् 'आनन्दादयः प्रधानस्य ब्रह्मणो धर्माः सर्वे सर्वत्र प्रतिपत्तव्याः' इति, तत्र सत्यज्ञानानन्दादिशब्दैर्व्यावहारिकमेव सत्यत्वादिकं धर्मरूपं विवक्षितमिति मन्दमतीनां भ्रान्तिनिरसनाय तत्तद्धर्माध्यारोपापोहनक्षमतत्तच्छब्देन विशेषणात् लक्षणया ब्रह्मस्वरूपमेव प्रतिपत्तव्यमित्यभिप्रायेण आनन्दादयो न स्वरूपाद्व्यतिरिक्ता धर्माः, किं तु ब्रह्मैवानन्दादिरूपम्, नात्र धर्मधर्मिभेदो विद्यत इत्यवधारणार्थमानन्दादय एव धर्मा इत्युच्यते तप एव धनमृषीणामितिवदुपचारेणेति बोध्यम् । यथा च सत्यज्ञानादिशब्दैर्ब्रह्मस्वरूपाधिगमः तथावर्णितमानन्दवल्ल्यां सत्यज्ञानादि-लक्षणभाष्ये इति तद्विमर्शत एवाधिकमवगन्तव्यम् । न हि वस्तुवृत्तेनैव सत्यत्वज्ञानत्वानन्दरूपत्वादिधर्मभेदाः शक्यन्ते संभावयितुं निरवयवे निरञ्जने ब्रह्माणि, स्वच्छतैकस्वभावे इव स्फटिके हरितनीललोहितादिलक्षणधर्मभेदाः । तस्मात्, यथैव 'अक्षरधियां त्ववरोधः' (वे.सू. ३-३-३३) इति सूत्रव्याख्याने स्थूलत्वादिनिषेधानामपि ब्रह्मविशेषणत्वेन व्यपदेशः, तथैवेहाप्यानन्दादीनां धर्मत्वेन व्यपदेश उपचारमात्रेण — इति सन्तोष्टव्यम् ॥

## २५०. नवीनवेदान्तिप्रक्रिया, तद्विमर्शश्च -

एवं स्थिते यदत्र नवीनवेदान्तिनः केचिद् विकल्पयन्ति, जगत्कारण-त्वलक्षणमेतद् विभूतिविशिष्टब्रह्मनिष्ठम् । सत्यज्ञानादिलक्षणं तु विशेष्यनिष्ठम् । यद्यपि सत्यज्ञानादिवाक्यादेवेश्वरस्वरूपं लक्षितं भवेत् । सर्वज्ञत्वाद्य-साधारणधर्मप्रतिपादनात्; तथापि गुणापेक्षया बहिष्ठाया विभूतेरुपास्यान्तर्भावो न प्रतीयेतेति तदनादृत्येह सर्गादिविषयविभूत्या स्वरूपं लक्ष्यते । तथा हि सर्गाद्यौपयिकसर्वज्ञत्वादिगुणानामपि जिज्ञास्यान्तर्भावः सिध्यति, विभूतेश्च जिज्ञास्यान्तर्भावः । प्रयन्तीति प्रलयवाक्यस्य यच्छब्देन मुक्तिप्राप्यस्य ब्रह्मणो विवक्षितत्वान्नित्यविभूतेर्जिज्ञास्यत्वसिद्धिरिति । तत् केवलं स्वाभिलषित-सिद्धिनिबन्धनां वस्त्ववस्थितिमभिप्रेत्य । न हि ब्रह्मस्वरूपमात्रे प्रश्नप्रतिवचनाभ्यां प्रतिपिपादयिषितत्वेनावगम्यमाने कारणत्वविशिष्टमपि तद् विवक्षितमिति कल्पने

मानमस्ति । न च 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्यानन्दरूपब्रह्मणोऽपि जगत्कारणत्वेनैवोपदेशस्तत्र मानम्-इति शङ्क्यम् । यथोक्तनीत्या मायिककारणत्वेनैव तदुपलक्षितब्रह्मस्वरूपमात्रसमर्पणार्थत्वसंभवे कारणत्वविशिष्टत्वेनापि निर्देशकल्पनस्य किञ्चिद् गमकं पश्यामः । स्वरूपमात्रवेदनेनैव फलप्राप्तिकीर्तनदर्शनात् । न च सर्वेष्वपि वेदान्तेषु 'जगज्जन्मादिकारणत्वविशिष्टं ब्रह्म' — इत्येवञ्जातीयकं लक्षणवाक्यम् । 'सत्यं ज्ञानमनन्तं ब्रह्म' (२-१), 'विज्ञानमानन्दं ब्रह्म' (बृ. ३-९-२८-७), 'प्रज्ञानघन एव' (बृ. ४-५-१३), 'अयमात्मा ब्रह्म सर्वानुभूः' (बृ. २-५-१९) — इत्येवमेव तु स्वरूपेण लक्षितं दृश्यते एवेति चेत् । नेति ब्रूमः । 'इति शान्त उपसीत .... स क्रतुं कुर्वित' (छां. ३-१४-१) इति वाक्यशेषेणोपासनाविधिप्रधानत्वावगमाद् वाक्यस्य ब्रह्मस्वरूपनिरूपणपरत्वाभावात् । न च तद्वदिहस्वरूपावधारणव्यतिरेकेण कश्चिदुपासनविधायकः शब्द उपलभ्यते । 'आनन्दाद्धि' इति प्रसिद्धवज्जगज्जन्मादि-कारणत्वमनूद्य 'तस्मादानन्दो ब्रह्म' इति स्वरूपसमर्पणेनैव तूपक्षीणं वाक्यम् । तस्मान्न विभूतिविशिष्टपरमुपासनाविधानपरं वेत्यवगम्यत इति । यदप्याहुः — सत्यज्ञानानन्दामलत्वानन्तत्वानि ब्रह्मस्वरूपनिरूपणगुणाः । तैश्च 'यतो वा इमानि' इत्यादिना जगत्कारणतयोपलक्षितं ब्रह्म स्वरूपतो निरूप्यत इत्युपास्यब्रह्म-स्वरूपावगमाय सर्वासु विद्यासु ते अनुवर्तन्ते । ये तु निरूपितस्वरूपस्य ब्रह्मणः कारुण्यादयो गुणाः प्रतिपन्नाः, तेषां गुण्यपृथक्स्थितत्वेऽपि प्रतीत्यनुबन्धित्वाभावात्, ये यत्र श्रुतास्ते तत्रोपसंहार्या इति । तदपि स्वाभिलषितसिद्धिनिबन्धनं कल्पनामात्रम् — इत्येतेनैवावगम्यते । निरूपकगुणविशिष्टं सत्यज्ञानानन्दादिरूपं ब्रह्मेति क्वचिदप्यश्रवणात्, कारुण्यादि गुणगन्धस्याप्यनाम्नानाद् वेदान्तेषु ब्रह्मस्वरूपनिरूपणप्रस्तावे । ब्रह्मस्वरूपप्रतिपादनप्रधानेषु वाक्येषु, उपासनाया अर्थान्तरस्य वा अश्रुतत्वाच्च-इत्यलं श्रुतिबाह्यकुदृष्टिक्रियापरीक्षणायासेन॥६-२६॥

**सैषा भार्गवी वारुणी विद्या । परमे व्योमन् प्रतिष्ठिता । स य एवं वेद प्रतितिष्ठति ।**

**अन्नवानन्नादो भवति । महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान् कीर्त्या॥१७॥**

(इति षष्ठोऽनुवाकः)

## ब्रह्मविद्याफलम्

९८. अधुना आख्यायिकातोऽपसृत्य[1] श्रुतिः स्वेन वचनेन आख्यायिकानिर्वृत्तमर्थम्[2] आचष्टे । सैषा भार्गवी भृगुणा विदिता वरुणेन प्रोक्ता वारुणी विद्या परमे व्योमन् हृदयाकाशगुहायां परम आनन्देऽद्वैते प्रतिष्ठिता परिसमाप्ता, अन्नमयादात्मनोऽधि प्रवृत्ता । य एवमन्योऽपि तपसैव साधनेन अनेनैव क्रमेण अनुप्रविश्य, आनन्दं ब्रह्म वेद, स एवं विद्याप्रतिष्ठानात् प्रतितिष्ठति आनन्दे परमे ब्रह्मणि । ब्रह्मैव भवतीत्यर्थः । दृष्टं च फलं तस्योच्यते-अन्नवान् । प्रभूतम् अन्नम् अस्य विद्यते इत्यन्नवान् । सत्तामात्रेण तु सर्वो हि

१. 'आख्यायिकां चोपसंहृत्य' वा ॥

२. 'निर्वत्यम्' इति वा ॥ पाठो न साधुः ॥

**अन्नवानिति विद्यया विशेषो न स्यात् । एवम् अन्नमत्तीति अन्नादः । दीप्ताग्निर्भवतीत्यर्थः । महान् भवति। केन महत्त्वमिति ? अत आह- प्रजया पुत्रादिना पशुभिः गवाश्वादिभिः, ब्रह्मवर्चसेन शमदमज्ञानादिनिमित्तेन तेजसा। महान् भवति कीर्त्या ख्यात्या शुभप्रचारनिमित्तया[१] ॥**

## २५१. उत्तरवाक्यसंबन्धः -

'आनन्दो ब्रह्मेति व्यजानात्' इत्यन्ताख्यायिकासिद्धमेवार्थं किमिति पुनराचष्टे श्रुतिरिति ? अत उत्तरं वाक्यव्याख्यानावतरणिकाव्याजेन कथयति — **अधुनेत्यादिना आचष्टे** इत्यन्तेन । 'आनन्दो ब्रह्मेति व्यजानात्' इत्याख्यायिकान्तर्गतं वाक्यम्' इदानीं तु श्रुतिराख्यायिकातः किं सिद्धमिति विवृणोतीत्यतो न पुनरुक्तता — इति भावः । 'आख्यायिकातोऽपसृत्य' इति । आख्यायिकायाः परिसमाप्तत्वात्, ततः प्रतिनिवृत्य । कथावेषं प्रविहायेत्येतत् । 'स्वेन वचनेन' । श्रुतिरूपमेवास्थायेत्यर्थः। 'आख्यायिकानिर्वृत्तम्,' तत्र निष्पन्नं निर्मथितार्थम् — आचष्टे इत्यर्थः ॥

## २५२. ब्रह्मविद्यास्वरूपम् -

अथ कोऽयमत्राख्यायिकायां निर्वृत्तोऽर्थ इति ? तमाह — **सैषा भार्गवीत्यादिना** । या सा वरुणेनान्नादिद्वारेण यतो वेत्यादिलक्षणवाक्येन शिष्टा, या चैषा भृगुणा 'आनन्दो ब्रह्म' इति विशिष्य निश्चिता, सैषा भार्गवी वारुणी विद्या। भृगुवरुणसंवादतो निष्पन्नेयं ब्रह्मविद्या **परमे व्योमन्** हृदयाकाशगुहायां **परमानन्देऽद्वैते प्रतिष्ठिता परिसमाप्ता । अन्नमयात्मनोऽधि प्रवृत्ता ।**

---

१. 'शुभाचारनिमित्तया' वा ॥

अन्नमयात्मसतत्त्वपरिशीलनमधि तदुपरि सूक्ष्मसूक्ष्मतरक्रमेण प्राणमयादि-सतत्त्वपरिशीलने प्रवृत्ता । पर्यन्ते हृदयाकाशगुहायां यः स्थितः परम आनन्दः, तत्र प्रविष्टमिव द्रष्टृश्रोत्रादिविशेषरूपेण विभाव्यमानोऽपि स्वरूपेणैवाद्वैतेनावतिष्ठमानः, तस्मिन्नानन्दे प्रतिष्ठिता परिसमाप्ता। तं हि परमानन्दं तपसा ब्रह्मेत्यध्यवसितवान् भृगुः — इत्यभिप्रायः ॥

अथवा परमे व्योमन् आकाशवत् परमसूक्ष्मे सर्वव्यापकेऽसङ्गे परमानन्दरूपे परमात्मनि प्रतिष्ठिता — इत्यपि व्योमशब्दं परमात्मपरमेव गृहीत्वा व्याख्यातुं शक्यत इदं वाक्यम् । तथा हि सूत्रभाष्यस्थवाक्यान्तरेणैतस्यैकवाक्यता संभवति 'ब्रह्मण्यपि क्वचित्प्रयुज्यमानो दृश्यते यत्र वाक्यशेषवशादसाधारणगुणश्रवणाद्वा निर्धारितं ब्रह्म भवति । यथा 'यदेष आकाश आनन्दो न स्यादिति', 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' इति चैवमादौ'' (सू.भा. १-१-२२) इत्यनेन। यद्यपीह सूत्राभाष्योदाहृतस्यैव वाक्यस्य प्रकारान्तरेण भाष्यं प्रववृते, 'यद्येष आकाशे परमे व्योम्नि गुहायां निहित आनन्दो न स्यात्' (२-७) इति वैयधिकरण्येन पदान्वयं स्वीकृत्य 'हार्दे व्योम्नि या बुद्धिर्गुहा तस्याम्' इति गुहानिहितवाक्यभाष्यानुसारेण। तथाप्यत्र 'हृदयाकाशगुहायां परम आनन्दे' इति प्रयोगेणेदं सूच्यते यत्, सर्वत्रापि गुहायां यन्निर्दिष्टं परमं व्योम तत्सर्वप्रत्यगात्मभूतं ब्रह्मैवेति । तथा च व्याख्यातं गुहानिहितवाक्यमस्माभिः (पृ. ५०) । अस्मिन् पक्षे तु 'यदेष आकाश आनन्दो न स्यात्' (२-७) इति वाक्यम् आकाशवत्स्वर्गतः परमात्मा आनन्दरूपो यदि न स्यादिति सामानाधिकरण्येनापि योजयितुं शक्यत एवेति बोध्यम् । अमुमेव च व्याख्यानं **वार्तिककारा** अनुमोदन्ते — 'युष्मदस्मद्विभागोऽयं यत्र व्यावर्ततेऽञ्जसा। स आत्मा तत् परं व्योम तत्र विद्या प्रतिष्ठिता ॥' (तै.वा. ३-३४) इति । एवं च सर्ववेदान्तसिद्धं ब्रह्मात्मैक्यमेवात्रोपसंहृतं भवति । यदप्याहु**र्वार्तिककाराः** 'आत्मता ब्रह्मणो यत्र आत्मनो ब्रह्मता तथा । अहं ब्रह्मेत्यवाक्यार्थमेवं वाक्यात्प्रपद्यते॥' (तै.वा. ३-३५) इति । आकाशवन्निरन्तरस्य ब्रह्मण एव वेदितुरात्मत्वे, प्रत्यगात्मनोऽन्यस्य च ब्रह्मणोऽभावे 'आनन्दो ब्रह्मेति व्यजानात्' इति वाक्यात्, भेदसंसर्गविधुरमवाक्यार्थं परमार्थतत्त्वमिति प्रतिपद्यत इत्येतत्परमव्योमवाक्येन प्रख्यापितं भवति — इति वार्तिकाभिप्रायः ॥

## २५३. ब्रह्मविद्यायाः परमफलम् -

सेयं भृगुणा वरुणादधिगता विद्या परमे व्योम्नि अद्वितीयानन्दरूपे प्रतिष्ठितेति युक्तम् । भृगोर्महावीर्यत्वात् । ततः किं स्यादधुनातनानां हीनवीर्याणाम् अस्मदादीनामिति ? अत्रोत्तरत्वेन **'य एवं वेद'** इति वाक्यमवतार्य व्याचष्टे — **'य एवमन्योऽपि तपसैव साधनेन, अनेनैव क्रमेणानुप्रविश्य आनन्दं ब्रह्म वेद'** तस्यैतत् फलं भवतीति । अन्योऽप्यैदंयुगीनो यदि मनइन्द्रियैकाग्र्यलक्षणेन तपसा विशुद्धसत्त्वः सन्, अनेनैव क्रमेण अन्नादिब्रह्मोपलब्धिद्वारमाश्रित्य यथोक्तलक्षणं कुत्र कार्त्स्न्येन स्यादिति समालोचयेत्, स प्राणमन-आदिकमन्तरमन्तरमनुप्रविश्य तत्र साकल्येन ब्रह्मलक्षणाभावं पश्यन् सर्वान्तरं परमानन्दमेव ब्रह्मत्वेनावश्यं विद्यात् — इत्यभिप्रायः। ततस्तस्य किं फलेदिति ? अत आह — **'स एवं विद्याप्रतिष्ठानादित्यादि, ब्रह्मैव भवतीत्यर्थ** इत्यन्तम्। एवं समालोचनेन आनन्द एवाद्वैते ब्रह्मणि यदा विद्या प्रतिष्ठिता भवति, तदा सर्वसंशयविनिवृत्त्या सोऽप्यानन्दे परमे ब्रह्मणि प्रतितिष्ठति । उक्तं हि 'ब्रह्म पुच्छं प्रतिष्ठा' (२-५) इति। तस्मिन्नेवादृश्यानात्म्यत्वादिधर्मके ब्रह्मणि 'अभयं प्रतिष्ठां विन्दते' । अयमहमस्मि तद्ब्रह्म — इत्यात्मभावं प्रतिपद्यत इत्यर्थः । तदाह — 'ब्रह्मैव भवतीत्यर्थ' इति ॥

## २५४. ब्रह्मविदो दृष्टं फलम् -

सेयं ब्रह्मण्यात्मभावेन प्रतिष्ठा विद्यायाः परमं फलम् । 'ब्रह्मैव सन् ब्रह्माप्येति' (बृ. ४-४-६), 'ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३-२-९) इति च श्रुत्यन्तरात् । अथास्य लौकिकदृष्ट्या फलान्तरमपि भवतीत्याह — **दृष्टं च फलं तस्योच्यत इति**। नन्वानन्दो ब्रह्मेति विज्ञानस्य दृष्टमेव फलम् अभयप्रतिष्ठालाभरूपमपि । बाढम् । तत्तु शास्त्रदृष्टं फलम् । इदं तु लोकदृष्टम्, अतो 'दृष्टं च फलम्' इत्युच्यत इत्यदोषः ॥

फलश्रुतिव्याख्यामुपक्रमते — **अन्नवानित्यादिना** । मतुप्प्रत्ययस्य प्रभूतत्वं

विवक्षितोऽर्थ इति कथमवगम्यते ? तत्राह — सत्तामात्रेण तु सर्वो ह्यन्नवानिति विद्याया विशेषो न स्यात्' इति । एवम् 'अन्नादो भवति' इति । केवलात्तृत्वं सर्वस्याप्यस्तीति विद्याया विशेषो न स्यादित्यतोऽन्नादशब्दस्यापि विशेषार्थमाह — 'दीप्ताग्निर्भवतीति'। 'महान् भवति' इत्यादिभाष्यं स्पष्टार्थम् ॥

**२५५. अन्नान्नादत्वादि कया प्रणाड्या फलम् ? -**

एतच्च दृष्टं फलं ब्रह्मविदो जीवन्मुक्तस्यापि, अविद्यालेशवशाद् द्वैताभासं पश्यतो नानुपपन्नमिति **केचित्** । 'अन्नाद्युपासकानां वा फलमेतदिहोच्यते । न्यायं नावाप्तकामानामन्नादिफलकीर्तनम् ॥' (तै.वा. ३-३८) इति तु **वार्तिककाराः** । वक्ष्यमाणान्नान्नादत्वोपासनाफलमेतदित्यपि **केचित्** । वयं त्वेवमुत्पश्यामः । अविद्यालेशवादस्यानुपपन्नत्वात्, अन्नाद्युपासनाविधेरत्रादर्शनात्, वक्ष्यमाणान्नान्नादत्वोपासनायाश्च तत्र तत्रैव फलसंकीर्तनाच्च नैते व्याख्यानप्रकारा अत्र समञ्जसा इति । कथं तर्हि 'दृष्टं फलम्' इति भाष्यम् ? न हि कृतकृत्यस्य ब्रह्मविदोऽवाप्तकामस्य दृष्टफलप्रत्याशा समस्ति, न च ब्रह्मविदि यथोक्तमन्नान्नादत्वादि नियमेन दृश्यत इति चेत् । अत्र ब्रूमः । यद्यपि ब्रह्मविदवाप्तकामः, तथापि ब्रह्मविदो विभूतिकीर्तनमिदं विद्यास्तुत्यर्थं भविष्यति । यत्र जनकादितुल्ये ब्रह्मविदि प्रभूतान्नान्नादत्वपुत्रपशुब्रह्मवर्चसकीर्त्यादिकं दरीदृश्यते 'तदेतस्या एव ब्रह्मविद्याया महिमा । यत्रापि संन्यस्तसर्वकर्मणि ब्रह्मनिष्ठे तन्न दृश्यते, तत्रापि जगति यत्रकुत्रचिदपि दृष्टा अन्नान्नादत्वादिसमृद्धिस्तस्यैव विदुषः । सर्वात्मत्वात्तस्य' इति विद्या स्तूयते । सेयं विभूतिरप्रार्थितापि विदुषः स्वयमेव फलतीतिकृत्वा फलमित्युपचर्यत इति सर्वं समञ्जसमिति ॥१७॥

# अन्नं न निन्द्यात् । तद्व्रतम् ॥ १८॥

## अन्ननिन्दानिषेधः

### ९९. किञ्च अन्नेन द्वारभूतेन ब्रह्म विज्ञातं

**यस्मात्, तस्माद्गुरुमिव अन्नं न निन्द्यात् । तत् अस्यैवं ब्रह्मविदो व्रतमुपदिश्यते । व्रतोपदेशोऽन्नस्तुतये । स्तुतिभाक्त्वं चान्नस्य ब्रह्मोपलब्ध्युपायत्वात् ॥**

**२५६. अन्ननिन्दानिषेधस्य प्रयोजनम् -**

'अन्नं प्राणम्' इत्यादिना ज्ञानद्वारत्वेनोपदिष्टमन्नं वरुणेन तदेव चान्नं द्वारीकृत्य परं ब्रह्म विज्ञातवान् भृगुः । **तदेवं द्वारीभूतेन ब्रह्मविज्ञातं यस्मात्, तस्माद्गुरुमिवान्नं न निन्द्यात्** । यथा हि गुरौ ब्रह्मतत्त्वोपदेष्टरि ज्ञानिना कृतकृतत्येनापि कृतज्ञतया पूज्यबुद्धिः क्रियते, एवमन्नं ब्रह्मविज्ञानद्वारभूतं न निन्द्यात्। श्रेष्ठं वा प्राप्तमन्नम् अवरं वा, पूज्यबुद्ध्यैव स्वीकार्यम् —इत्येवं तदन्नानिन्दनं ब्रह्मविदो व्रतमुपदिश्यत इत्याह — **किञ्चेति** । ननु किमर्थं व्रतोपदेशो ब्रह्मविदः ? न हि स विधिनिषेधकिङ्कर इति ? अत आह — **व्रतोपदेशोऽन्नस्तुतये । स्तुतिभाक्त्वं च ब्रह्मोपलब्ध्युपायत्वात् इति** । अयमभिप्रायः । यद्यपि ब्रह्मवित् सर्वं ब्रह्मेत्येव पश्यति । तथा चान्नमपि तद्दृष्ट्या ब्रह्मैवेति तस्यान्नं न निन्द्यादित्युपदेशोऽनवसरप्राप्त इव ; व्रतमास्थित इवैव हि स सर्वमन्नादिकं पूज्यबुद्ध्यैव गृह्णातीति । तथापि मुक्तेष्वादिप्रवृत्तिवत् प्रारब्धकर्मप्रवृत्तिप्राबल्यवशात् तत्र प्राप्तं ज्ञानप्रवृत्तिदौर्बल्यम्, तस्मिन् पक्षे 'अन्नं गुरुमिव पूजयेत्' इति नियमोपदेशो युज्यत एव व्यवहारदृष्ट्या । स चोपदेशोऽन्नस्तुतये जिज्ञासूनामन्नद्वारेण ब्रह्मोपलब्धौ प्रयत्नानुष्ठानप्ररोचनार्थम् । अन्नब्रह्मोपासकस्य विधानार्थं च भविष्यतीत्यर्थवानेवेति ॥ १८ ॥

**प्राणो वा अन्नम् । शरीरमन्नादम् । प्राणे शरीरं प्रतिष्ठितम् । शरीरे प्राणः प्रतिष्ठितः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने**

**प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान् कीर्त्या ॥१९॥**

(इति सप्तमोऽनुवाकः)

## प्राणशरीरयोरन्नान्नादत्वभावना

१००. प्राणो वै अन्नम् । शरीरान्तर्भावात् प्राणस्य यत् यस्यान्तः प्रतिष्ठितं भवति, तत् तस्यान्नं भवतीति । शरीरे च प्राणः प्रतिष्ठितः । तस्मात् प्राणोऽन्नम्, शरीरमन्नादम् । तथा शरीरमप्यन्नम्, प्राणोन्नादः । कस्मात्? प्राणे शरीरं प्रतिष्ठितम् । तन्निमित्तत्वात् शरीरस्थितेः । तस्मात् तदेतदुभयं शरीरं प्राणश्च अन्नमन्नादश्च । येनान्योन्यस्मिन् प्रतिष्ठितम्, तेनान्नम् । येनान्योन्यस्य प्रतिष्ठा, तेनान्नादः । तस्मात् प्राणः शरीरं चोभयम् अन्नमन्नादं च । स य एवमेतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नान्नादात्मनैव । किञ्च, अन्नवानन्नादो भवति -इत्यादि पूर्ववत् ॥

## २५७. अन्नान्नादोपासनप्रकरणस्यैदम्पर्यम् -

अथान्नप्राणादीनां द्वारत्वेनोक्तानां ब्रह्मवदेव विज्ञेयत्वं मा प्रापदिति तेषामविद्याकृतपञ्चभूतात्मकत्वात्, न परमार्थब्रह्मत्वम्, अत एव तदुपहितस्यात्मनो न परमार्थतः संसारित्वम् — इत्युपसंहरिष्यन्ती श्रुतिः प्राणशरीरादेरन्नान्नादिभावं तावदुपस्थापयति, तेषां कार्यभूतानामेवान्नान्नादत्वे विज्ञाते कारणस्य ब्रह्मणोऽसंसारित्वं सुबोधं यथा स्यादिति । मन्दाधिकारिणां शरीरप्राणादिषु यथायथमन्नान्नादभावेनोपासनां च विधत्तेऽवान्तरतात्पर्येण । तथा हि तेषामन्नान्नादभावे मनसि स्थिरीकृते, नात्मनि भोज्यभोक्तृत्वमस्तीति स्फुटं स्यादिति। यथैव ह्यतीतानन्तरवल्ल्यां पञ्चकोशविवेकेन सर्वद्वैतप्रतिष्ठाभूतब्रह्मात्मोपदेशे महातात्पर्यवत्यपि, अन्नाद्युपासनं फलोपदेशसहितं विहितवति अवान्तरतात्पर्येण, एवमेवेहापीदमन्नान्नादत्वोपासनमनुक्रमत इति ध्येयम् ॥

## २५८. प्राणशरीरयोरन्नान्नादत्वम् -

तत्र प्राणशरीरयोस्तावदन्नान्नादभावमुपपादयति — **प्राणो वै अन्नम्** इत्यादिना, **उभयमन्नमन्नादं च**ेत्यन्तेन । शरीरे प्राणः प्रतितिष्ठत इति तावत्प्रसिद्धम्। शरीरान्तर्भावात् प्राणस्य । कथं शरीरान्तर्भावमात्रेणान्नत्वं प्राणस्येत्यतो हेतुप्रतिपादकत्वेन 'शरीरे प्राणः प्रतिष्ठितः' इति वाक्यं योजयन् अन्नशब्दप्रवृत्तिनिमित्तं तावत् स्फोरयति यद्यस्यान्तः प्रतिष्ठितं भवति, तत् तस्यान्नं भवतीति। नायमभिप्रायः — प्राणः शरीरेऽन्तरेव भवतीति; शरीरं व्याप्यापि तस्य व्यापारदर्शनात्। किं तर्हि, शरीरमधिष्ठायैव लब्धस्थितिको भवति, न तदन्तरेण तस्य स्थितिरस्तीति । शरीरमधिष्ठायैव हि लोके अन्नाद्यं शरीरपुष्टितुष्ट्यादि-हेतुर्भवतीति प्रसिद्धम् । तद्वत् प्राणोऽपीत्यतः प्राणः शरीरस्यान्नमित्युपचर्यत इति भावः । तस्माद्युक्तं प्राणो वै शरीरस्यान्नम्, शरीरं च प्राणान्नात् — इति । एवं प्राणे शरीरं प्रतिष्ठितम् । कस्मात् कारणात् ? प्राणनिमित्तत्वात् शरीरस्थितेः । न तु नियमेन प्रणाधिकरणकत्वाच्छरीरस्य । प्राणं विनापि मृतशरीरस्य सद्भावदर्शनात् — इति भावः । तस्मात्, शरीरमप्यन्नं प्राणस्य, स च प्राणः शरीरान्नाद इति ॥

'तदेतदन्नमन्ने प्रतिष्ठितम्' इत्येतद् व्याकरोति — **तस्मात्तदेतदुभयं शरीरं प्राणश्चे**त्यादिना **तेनान्नाद** इत्यन्तेन । उपपादितप्रकारेण उभयस्याप्यन्नत्वात्, अन्नमन्ने प्रतिष्ठितम् । यत् प्रतिष्ठितं तदन्नम्, यस्मिंश्च प्रतिष्ठितं तदन्नादम् — इत्युच्यते । उभयस्य त्वन्नत्वमविशिष्टम् । अन्योन्यस्यान्योन्यस्मिन् प्रतिष्ठितत्वात् । उपलक्षणं चैतत् । उभयस्यान्नादत्वमविशिष्टमित्यपि द्रष्टव्यम् । तदाह — **'येनान्योन्यस्मिन् प्रतिष्ठितं तेनान्नम्, येनान्योन्यस्य प्रतिष्ठा तेनान्नादः'** इति । अन्यस्मिन् प्रतिष्ठितत्वादन्नत्वम्, स्वयमन्यस्य प्रतिष्ठात्वात् अन्नादत्वमित्यर्थः । फलितमुपसंहरति — **तस्मात् प्राणः शरीरं चोभयमन्नमन्नादं चेति** ॥

अथेदानीं प्राणशरीरयोरन्नान्नादत्वेनोपासनमुपदिश्य तत्फलं च कथयति श्रुतिः । तदाह — **स य एवमेतदन्नमन्ने प्रतिष्ठितं वेदेति** । यथोक्तप्रकारेणोपासीनस्यैतत्फलम् — **प्रतितिष्ठत्यन्नान्नादात्मनैवेति** । अन्नवाय्वात्मनैवेत्यर्थः । दृष्टं च फलमाह — किं चेत्यादिना । पूर्ववदिति । प्रभूतान्नवान् दीप्ताग्निश्च भवतीत्यादि पूर्ववत् । सर्वं योजनीयम् इति शेषः ॥१९॥

## अन्नं न परिचक्षीत । तद्व्रतम् ॥२०॥

## आपो वा अन्नम् । ज्योतिरन्नादम् । अप्सु ज्योतिः प्रतिष्ठितम् । ज्योतिष्यापः प्रतिष्ठिताः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान् कीर्त्या ॥२१॥

(इत्यष्टमोऽनुवाकः)

## अब्ज्योतिषोरन्नान्नादत्वोपासनम्

**१०१. अन्नं न परिचक्षीत न[1] परिहरेत्। तद्व्रतम् । पूर्ववत् स्तुत्यर्थम् । तदेवं शुभाशुभकल्पनया अपरिगृह्यमाणं[2] स्तुतं महीकृतमन्नं स्यात् । एवं यथोक्तम् उत्तरेष्वपि 'आपो वा अन्नम्' इत्यादिषु योजयेत् ॥**

### २५९. अन्नापरिहारोपदेशतात्पर्यम् -

**अन्नं न परिचक्षीत, न परिहरेत्** । दोषबुद्ध्या इति शेषः । **तद्व्रतं पूर्ववत् स्तुत्यर्थम् इति** । अत्रापि पूर्ववद् ब्रह्मविद्यास्तुत्यर्थं सधकानां व्रतोपदेशार्थं चेत्युभयमपि द्रष्टव्यम् । तेन ब्रह्मविदो नियमोपदेशः, साधकस्य जिज्ञासोः प्राणशरीरयोरन्नान्नादभावे मनः स्थिरीकरणोपदेशः, उपासकानां विधिश्चेत्येतत्सर्वं सिध्यति । नन्वपरिहारमात्रेण कथमन्नं स्तुतं स्यादित्यत आह-**तदेवं शुभाशुभेत्यादि**। न केवलमपरिहारोऽत्रोपदिष्टः, किं तर्हि 'शुभमेतदाददानि, अशुभमेतत् परिहराणि' इति शुभाशुभदृष्टिर्नान्ने करणीयेत्युपदिश्यते । सर्वं त्वन्नं ब्रह्मबुद्ध्यैव ग्राह्यं ब्रह्मविदा; साधकेन चाशुभबुद्ध्या अन्नकुत्सनं परित्याज्यम् — इत्युपदिष्टं भवति । एवं ह्यन्नं स्तुतं महीकृतं स्यादिति । अत्र भक्ष्याभक्ष्यविभागोऽपि न कार्य इति नोपदिश्यते, किं तु यथोपपन्नं श्रेष्ठमवरं वा पूज्यबुद्ध्यैव ग्राह्यम्; प्राणशरीरयोरन्नान्नादभावेनोपासीनस्येदं व्रतं भवतीति ॥

### २६०. अपां ज्योतिषश्चान्योन्यान्नत्वम् -

भाष्ये 'आपो वा अन्नम्' इत्यादीनि वाक्यानि किमिति न व्याख्यास्यन्ते ? तत्राह — **एवं यथोक्तमुत्तरेष्वापो वा अन्नमित्यादिषु योजयेत्** । येनान्यस्मिन्

१. 'न च' इति (आ॥) मुद्रितपाठे चोऽधिकः ॥

२. 'अपरिह्रीयमाणम्' वा ॥

ज्योतिषि प्रतिष्ठिताः, तेन तस्यान्नभूता आपः ; येन तस्य प्रतिष्ठाभूताः, तेन तस्यान्नादरूपाः। एवं ज्योतिरप्यन्नान्नादरूपं प्रत्येतव्यम् । पीतानामपां जाठराग्निना जरणादपां ज्योतिरन्नत्वम्, ज्योतिष अन्नादत्वं च । अपां तेजःकारणत्वात्, तच्छमनहेतुत्वाच्च तेजसोऽन्नत्वम्, अपामन्नादत्वं च । य एवमुभयस्यान्नान्नादरूपत्वमुपास्ते, स अपां ज्योतिषश्चाधिष्ठातृदेवतारूपेण अन्नान्नादात्मनैव प्रतितिष्ठति। किञ्च, प्रभूतान्नवान् दीप्ताग्निश्च भवति प्रजापशुब्रह्मवर्चसकीर्तिभिश्च महान् भवतीति दृष्टं च फलं तस्य भवति — इति योजयेत् । एवं 'पृथिवी वा अन्नम्' इत्यादिवाक्येष्वपि द्रष्टव्यम् — इत्यभिप्रायः । अतः सूह्यं सर्वमिति न व्याख्यातमिति भावः ॥२१॥

## अन्नं बहु कुर्वीत । तद्व्रतम् ॥२२॥

## अन्नस्य बहुकरणं व्रतम्

### १०२. 'अप्सु ज्योतिः' इत्यब्ज्योतिषोरन्नान्नादगुणत्वेनोपासकस्य अन्नस्य बहुकरणं व्रतम् ॥

**२६१. अन्नस्य बहुकरणोपदेशः -**

अप्सु ज्योतिरित्याद्युक्तरीत्या अपां ज्योतिषश्चान्योन्यान्नान्नादगुणत्वेनोपासकस्य, अन्नस्य बहुकरणं व्रतम् — इति भाष्यव्याख्यानादिदं सूचितं — यदुत्तरोत्तरं व्रतं पूर्वपूर्वनिर्दिष्टोपासकस्योपदिष्टमिति । ब्रह्मविदस्तु तत्र तत्रान्नान्नादबुद्धिनियम आत्मन्यसंसारिब्रह्मानुसंधानफलको भविष्यतीति ज्ञेयम् । बहुकरणमिति कुटुम्बादिभरणार्थं पर्याप्तप्रमाणेन संग्रहणम् । बहुमाननं वा । संग्रहस्योत्तरत्रोपदेक्ष्यमाणत्वात् ॥२२॥

## पृथिवी वा अन्नम् । आकाशोऽन्नादः । पृथिव्यामाकाशः प्रतिष्ठितः । आकाशे पृथिवी

**प्रतिष्ठिता । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान् कीर्त्या ॥२३॥**

(इति नवमोऽनुवाकः)

**२६२. पृथिव्यादिकमत्र मुख्यत अध्यात्मिकं विवक्षितम् -**

'पृथिवी वा अन्नम्' इत्यादि व्याख्यातप्रायमिति भाष्येणोपेक्षितम् । अत्र 'आपो वा अन्नम् । ज्योतिरन्नादम् । पृथिवी वा अन्नम् । आकाशोऽन्नादः' इत्यब्जोतिःपृथिव्याकाशा अध्यात्मकार्यकरणसंघातानुप्रविष्टा एव प्राधान्यतो ग्राह्याः । प्राणशरीरसमभिव्याहारसामर्थ्यात् । तद्ग्रहणं च — 'अन्नं प्राणम्' इति वरुणोक्तब्रह्मोपलब्धिद्वारैः पञ्चभूतारब्धैःरात्मन एव ब्रह्मत्वेन विजिज्ञापयिषितत्वात् — अन्नप्राणादीनामपि ब्रह्मत्वं स्यादिति भ्रान्तिनिवारणार्थम् — इत्यवोचाम (पृ. 340) गृहीतानां त्वेतेषामाध्यात्मिकाब्ज्योतिरादीनामाधिदैविकैरभेदोऽपि विवक्षणीयः । एवमेव हि सर्वस्यापि कार्यस्यान्नान्नादत्वज्ञापनात् प्रत्यगात्मनोऽसंसार्यद्वितीयब्रह्मत्वमध्यवसितं भवेदिति ॥

**२६३. पृथिवी वा अन्नमित्यादेर्व्याख्यानं सुगमम् -**

पृथिवी शरीरारम्भकं भूतम् । तस्य चाध्यात्मिकाकाशाश्रितत्वात्तदन्नत्वम् । आकाशस्य च पार्थिवशरीरान्तःप्रतिष्ठितत्वेन विभाव्यमानत्वात्तदन्नत्वम् । एवमाधिदैविकयोरपि पृथिव्याकाशयोरन्योन्यान्नत्वं यथायोगमूह्यम् । फलं चान्नान्नादोपासकस्य ॥२३॥

**न कञ्चन वसतौ प्रत्याचक्षीत । तद्व्रतम् ॥२४॥**

**तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्। अराध्यस्मा अन्नमित्याचक्षते ॥२५॥**

## बह्वन्नसंपादने हेतुद्वयम्

१०३. तथा पृथिव्याकाशोपासकस्य। वसतौ वसतिनिमित्तं कञ्चन कश्चिदपि न प्रत्याचक्षीत । वसत्यर्थमागतं न निवारयेत् इत्यर्थः । वासे च दत्ते अवश्यं हि अशनं दातव्यम् । तस्माद् यया कया च विधया येन केन च प्रकारेण बह्वन्नं प्राप्नुयात्। बह्वन्नसंग्रहं कुर्यात्-इत्यर्थः । यस्मादन्नवन्तो विद्वांसः, अभ्यागतायान्नार्थिने, अराधि संसिद्धम् अस्मै अन्नम् इत्याचक्षते । न नास्तीति प्रत्याख्यानं कुर्वन्ति । तस्माच्च हेतोः 'बह्वन्नं प्राप्नुयात्' इति पूर्वेण संबन्धः ॥

**२६४. बह्वन्नसंपादने प्रयत्न आस्थेयः -**

पृथिव्याकाशयोरन्नान्नादत्वेनोपासकस्य अभ्यागताय वसतिदानम् अवश्यकरणीयम्— इत्येतद्व्रतम् । भाष्ये 'तद्व्रतम्' इत्येतत् पूर्ववदिति कृत्वा उपेक्षितम्। लेखकप्रमादेन त्रुटितं वेत्यूह्यते । 'वसत्यर्थमागतं न निवारयेदित्यर्थः' इति । 'नात्र वासावकाशो विद्यते' इति न ब्रूयात्, यथा कथञ्चित्तस्यार्थाय

वसत्यवकाशं प्रकल्पयेत्-इत्यभिप्रायकमेतद्वाक्यम् । वसतिप्रत्याख्याननिषेधोऽयं न स्वार्थः, तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयादित्यत्रैव तु परमं तात्पर्यमिति द्रष्टव्यम् । अन्नान्नादोपासनानुगुणं हि व्रतमुपदेष्टव्यमन्नस्तुतये । अतो बह्वन्नसंपादने हेतुरेवायमिति तदुपपादनार्थमाह — **वासे च दत्तेऽवश्यं ह्यशनं दातव्यमिति ।** मूलेऽपि हेत्वर्थ एवायमुपदेश इति सूच्यते 'तस्मात्' इति । अतो बह्वन्नं प्राप्नुयात् — इत्येव व्रतोपदेशः श्रुतिहृदयस्थ इति ज्ञेयम् । **येन केन च प्रकारेणेति ।** 'स्ववर्णाश्रमविहितेन' इति शेषः । न केवलमतिथिसत्कारस्यावश्यकरणीयत्वात्, किं तु शिष्टाचारानुसरणहेतोश्च बह्वन्नं संपादयेदित्याह यस्मादन्नवन्तो **विद्वांस** इत्यादिना । स्पष्टार्थं भाष्यम् ॥२५॥

**एतद्वै मुखतोऽन्नँ राद्धम् । मुखतोऽस्मा अन्नँ राध्यते । एतद्वै मध्यतोऽन्नँ राद्धम् । मध्यतोऽस्मा अन्नँ राध्यते । एतद्वा अन्ततोऽन्नँ राद्धम् । अन्ततोऽस्माऽन्नँ राध्यते । य एवं वेद ॥ २६ ॥**

### अन्नदानमाहात्म्यम्

१०४. अपि च, अन्नदानस्य माहात्म्यमुच्यते । यथा यत्कालं प्रयच्छत्यन्नम्, तथा तत्कालमेव प्रत्युपनमते । कथमिति ? तदेतदाह-एतद्वै अन्नं मुखतः प्रथमे वयसि, मुख्यया वा वृत्त्या पूजापुरःसरम्, अभ्यागताय

अन्नार्थिने राद्धं संसिद्धम्। प्रयच्छतीति वाक्यशेषः। तस्य किं फलं स्यादिति ? उच्यते। मुखतः मुख्ये पूर्वे वयसि, मुख्यया वा वृत्त्या, अस्मै अन्नदाय अन्नं राध्यते । यथादत्तम् उपतिष्ठत इत्यर्थः । एवं मध्यतः मध्यमे वयसि, मध्यमेन वा[1] उपचारेण; तथा अन्ततः, अन्ते वयसि जघन्येन वोपचारेण[2] परिभवेन । तथैव अस्मै राध्यते संसिध्यति अन्नम् । य एवं वेद य एवमन्नस्य यथोक्तं माहात्म्यं वेद, तद्दानस्य यथोक्तं फलम् उपनमेत् [3]॥

२६५. अन्नदानस्य दातृवयःसत्कारानुगुणं फलम् -

स्पष्टार्थं भाष्यम् । मुखतः, मध्यतः, अन्ततः — इति त्रेधा विभागो दातृवयोऽवस्थापेक्षया वृत्त्यपेक्षया वेति विकल्प्य बोध्यः । यस्मिन् वयसि यथा वा उपचारप्रकारवृत्त्या दीयतेऽन्नम्, तस्मिन्नेव वयसि, तयैव वा वृत्त्या, तस्य तद्दानप्रतिफलमुपतिष्ठत इति वाक्यार्थः । अत्रान्नदानमाहात्म्यकथनमुपासकानाम्, अन्ने पूज्यबुद्ध्युत्पादानार्थं प्रासङ्गिकम् । प्रकृतं त्वाकाशान्तेषु यथायथम् अन्नान्नादत्वबुद्ध्युपदेशनमेवात्रोपसंहृतमिति ज्ञेयम् ॥२६॥

---

१. अत्रापि उपक्रमानुसारेण 'वा' इति भाव्यमिति भाति ॥

२. अत्रापि 'वा' इत्यस्य स्थाने 'च' इति लिखितमिति कृत्वा परिवर्तितम् । वार्तिकेऽपि 'वयोवस्था त्रिधा वा स्यात्' (तै.वा. ३-४४) इति विकल्प एवादृतः ॥

३. 'तद्दानस्य च फलम्, तस्य यथोक्तं फलमुपनमते' इत्याधिकं वा ॥

**क्षेम इति वाचि । योगक्षेम इति प्राणापानयोः। कर्मेति हस्तयोः । गतिरिति पादयोः । विमुक्तिरिति पायौ । इति मानुषीः समाज्ञाः । अथ दैवीः । तृप्तिरिति वृष्टौ । बलमिति विद्युति। यश इति पशुषु। ज्योतिरिति नक्षत्रेषु। प्रजातिरमृतमानन्द इत्युपस्थे । सर्वमित्याकाशे ।।२७।।**

ब्रह्मोपासनाप्रकाराः

१०५. इदानीं ब्रह्मण उपासानप्रकार उच्यते । क्षेम इति वाचि । क्षेमो नाम उपात्तपरिरक्षणम् । ब्रह्म वाचि क्षेमरूपेण प्रतिष्ठितम् इत्युपास्यम् । योगक्षेम इति योगः अनुपात्तस्योपादानम् । तौ हि योगक्षेमौ प्राणापानयोः[१] सतोर्भवतो यद्यपि, तथापि न प्राणापाननिमित्तावेव, किं तर्हि ब्रह्मनिमित्तौ; तस्माद् ब्रह्म योगक्षेमात्मना प्राणापानयोः प्रतिष्ठितम् इत्युपास्यम् । एवम् उत्तरेष्वन्येषु तेन तेनात्मना ब्रह्मैवोपास्यम्। कर्मणो

१. एतदनन्तरं 'बलवतोः' इत्यधिकं वा ॥

**ब्रह्मनिर्वर्त्यत्वात् हस्तयोः कर्मात्मना ब्रह्म प्रतिष्ठितम् इत्युपास्यम्। गतिरिति पादयोः । विमुक्तिरिति पायौ । इत्येता मानुषीः, मनुष्येषु भवाः, मानुष्यः समाज्ञाः, आध्यात्मिक्यः समाज्ञाः, ज्ञानानि, विज्ञानानि । उपासनानीत्यर्थः ॥**

### २६६. ब्रह्मोपासनाविधिग्रन्थस्य संबन्धः -

अथ ब्रह्मोपासनाविधाभेदा उपन्यस्यन्ते । तदाह — **इदानीमित्यादि** । अत्राप्युपासनेऽवान्तरं तात्पर्यमवसेयम् । ब्रह्मप्रकरणत्वात्त्वस्य — ब्रह्मैव तेन तेनात्मना अवस्थितमिति वागादीनामब्रह्माणां तत्तद्धर्मकत्वम्, न तु स्वातन्त्र्येणैवेति — ब्रह्मविभूतिप्रदर्शनार्थमप्येतद्भविष्यति महातात्पर्येण — इति बोध्यम्॥

### २६७. आध्यात्मिकोपासनानि-

**क्षेम इति वाचि** । उपात्तवस्तुपरिरक्षणं वाक्पूर्वकव्यवहाराद् भवतीति ब्रह्म वाचि क्षेमरूपेण प्रतिष्ठितमित्युपास्यम् । न तु स व्यवहारो ब्रह्मानुग्रहरहितायां केवलायां वाच्यायत्त इति ध्येयम् — इतिभावः । 'वाचो ह वाचम्' (के. १-२) इति श्रुत्यन्तरात् । अत्र वागादौ क्षेमत्वादिबुद्धिः कार्येति कल्पयन्ति **केचित्** । तदनादरणीयम् । वागादीनां क्षेमादिसाधनत्वेन लोके प्रसिद्धत्वादेव तत्र विध्यनपेक्षणात् । अनात्मनां वागादीनां परमात्मानुग्रहमन्तरेण तत्तत्कार्यनिर्वहणक्षमत्वबुद्धेर्विपरीतप्रतिपत्तित्वात् तत अनर्थप्राप्तिध्रौव्यात्, अयथार्थग्राहकत्वेन श्रुतेरप्रामाण्यप्रसङ्गाच्च तादृशविधेरेवानुपपत्तेश्च । तस्मात्, यथार्थप्रतिपत्तिं कारयदेव शास्त्रं श्रेयःकारणमित्यतो यथाभाष्यमेव व्याख्यानं ग्राह्यम्। अप्रकृतत्वात्, अप्रयोजनत्वाच्च वागाद्युपासनस्य । न हि वागादीन्यत्र

कयाचित्संगत्या प्राकरणिकानीति शक्यं कल्पयितुम्, येन तदुपासनं विधेयं स्यात्। न च वागादीनां क्षेमत्वेनोपासनेन किञ्चित्प्रयोजनमस्ति । प्रत्युतानर्थकरमेतदुपासनं यथोक्तनीत्या । ब्रह्म तु ज्ञेयत्वेन प्रकृतम् । उपदिष्टं च वरुणेन, अन्नादिवागन्तोपलब्धिद्वारेण । प्रयोजनं चास्ति तदुपासनेन, यथोपासनं फलं क्षेमादिलक्षणं ब्रह्मानुगृहीतम्; ब्रह्मैवाध्यात्मम् अधिदैवं च तत्तद्विभूतिमदिति ज्ञानेन परम्परया ब्रह्मविज्ञानलक्षणं च — इत्यलं कुदृष्टयाश्रयणव्यसनेन । प्रकृतोपासनावाक्यव्याख्यानमेवानुसरामः ॥

अनुपात्तस्योपादानम् उपात्तस्य रक्षणं च सर्वप्रवृत्तिनिमित्तप्राणापानयोः सतोरेव भवति, नाप्राणतोऽनपानतो वा — इति प्रसिद्धं लोके । परं प्राणापानयोरपि ब्रह्माश्रितयोरेव तादृशप्रवृतौ सामर्थ्यमिति, पर्यवसानतो ब्रह्मनिमित्तावेव योगक्षेमावित्याह — **तौ हि योगक्षेमौ** इत्यादि **तस्माद्ब्रह्म योगक्षेमात्मना प्राणापानयोः प्रतिष्ठितमित्युपास्यम्** इत्यन्तम् । 'न प्राणेन नापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ' (का. २-२-५) इति श्रुत्यन्तरात् । अत्र सर्वत्र 'बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् । बलं बलवतां चाहम्' (गी. ७-१०,११) इत्यादिभगवद्गीतोपदेशनीत्या तत्तद्विभूतियुतं ब्रह्मैवेति ध्येयमित्यभिप्रेत्याह — **एवमुत्तरेष्वन्येषु तेन तेनात्मना ब्रह्मैवोपास्यमिति** । एवं चात्र न वागादिप्रतीकोपासनमिदं ब्रह्मदृष्ट्या, किं तर्हि क्षेमादिविभूतिरूपेण ब्रह्मैवावस्थितमिति ध्यानमिति पर्यवस्यति । शिष्टं स्पष्टार्थं भाष्यम् ॥

**१०६. अथ अनन्तरं दैवीः दैव्यः, देवेषु भवाः समाज्ञा उच्यन्ते । तृप्तिरिति वृष्टौ । वृष्टेरन्नादिद्वारेण तृप्तिहेतुत्वाद् ब्रह्मैव तृप्त्यात्मना वृष्टौ व्यवस्थितम् इत्युपास्यम्। तथा अन्येषु तेन तेनात्मना ब्रह्मैवोपास्यम् । तथा बलरूपेण विद्युति । यशोरूपेण पशुषु । ज्योतीरूपेण**

**नक्षत्रेषु । प्रजातिः, अमृतम् अमृतत्वप्राप्तिः पुत्रेण ऋणविमोक्षद्वारेण, आनन्दः सुखम् इत्येतत्सर्वम् उपस्थनिमित्तम् । ब्रह्मैवानेनात्मना उपस्थे प्रतिष्ठितम् इत्युपास्यम् । सर्वं हि आकाशे प्रतिष्ठितम् । अतो यत्सर्वमाकाशे, तद् ब्रह्मैव इत्युपास्यम् ॥**

२६८. आधिदैविकोपासनानि -

'अथ दैवीः' इत्येतदपि मानुषीरितिवत् प्रथमान्तत्वेन विपरिणमय्य व्याख्येयमित्याह — **दैवी दैव्य इति** । 'दैव्य' इत्यधिदैवतान्युपासनानि प्राधान्येन अत्रोपदिश्यन्ते । 'आनन्द इत्युपस्थे' इत्यन्तिमं तूपासनं 'विमुक्तिरिति पायौ' इत्येतदनन्तरमेव द्रष्टव्यम् । आध्यात्मिकत्वात् । **तृप्तिरिति वृष्टौ** । 'उपास्यं ब्रह्म' इति शेषः । अत्रापि सर्वत्र 'एवं ब्रह्मैव तत्तद्विभूतिमत्त्वेन स्थितम्' इति चिन्तनीयमित्याह — **तथा अन्येषु तेन तेनात्मना ब्रह्मैवोपास्यमिति** । विमृष्टो वाक्यार्थः । **तथा बलरूपेण विद्युति, यशोरूपेण पशुषु, ज्योतीरूपेण नक्षत्रेषु** । 'उपास्यं ब्रह्म' इति शेषपूरणम् । प्रजातिः पुत्रपौत्रादिः; अमृतम् अमृतप्राप्तिः; पुत्रोत्पत्त्या पितृऋणविमोक्षद्वारेण ; आनन्दः सुखम् — इति रूपत्रयेण ब्रह्मैवोपस्थे प्रतिष्ठितम् — इत्युपास्यम् । 'सर्वमित्याकाशे' इत्येतद् व्याकरोति — सर्वं ह्याकाशे इति । आकाशे यत्सर्वं प्रतिष्ठितं तद् ब्रह्मैव — इत्युपास्यम् । एवं च यत्किञ्चिद् दृश्यते श्रूयतेऽपि वा विभूतिलक्षणम्, तत्सर्वं ब्रह्मैव — इत्युपास्यमित्युक्तं भवति । तथा हि ब्रह्मणः सर्वात्मकत्वे बुद्धिः सुखमवतार्यते जिज्ञासोरिति ॥

**तत्प्रतिष्ठेत्युपासीत । प्रतिष्ठावान् भवति । तन्मह इत्युपासीत । महान् भवति । तन्मन**

इत्युपासीत । मानवान् भवति । तन्नम इत्युपासीत । नम्यन्तेऽस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान् भवति । तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियन्ते द्विषन्तः सपत्नाः । परि येऽप्रिया भ्रातृव्याः ॥२८॥

१०७. तच्च आकाशं ब्रह्मैव । तस्मात् तत् सर्वस्य प्रतिष्ठा इत्युपासीत। प्रतिष्ठागुणोपासनात् प्रतिष्ठावान् भवति । एवं पूर्वेष्वपि[1] यद् यदधीनं[2] फलम् तद् ब्रह्मैव । तदुपासनात् तद्वान् भवतीति द्रष्टव्यम् । श्रुत्यन्तराच्च 'तं यथायथोपासते तदेव भवति' (शत. १०-५-२-२०) इति। तन्मह इत्युपासीत । महः महत्त्वगुणवत्, तदुपासीत। महान् भवति । तन्मन इत्युपासीत । मननं मनः। मानवान् भवति । मननसमर्थो भवति । तन्नम इत्युपासीत । नमनं नमः, नमनगुणवत्त-दुपासीत। नम्यन्ते प्रह्वीभवन्ति अस्मै उपासित्रे

१. 'सर्वेष्वपि' इति वा ॥ पाठतो वरमयं गृहीतः ॥

२. 'यद्यत्राधिगतं' वा ॥

कामाः काम्यन्त इति । भोग्या विषयाः इत्यर्थः । तद् ब्रह्मेत्युपासीत । ब्रह्म परिवृढतमम् इत्युपासीत ब्रह्मवान् तद्गुणो भवति । तद्ब्रह्मणः परिमर इत्युपासीत। ब्रह्मणः परिमरः, परि म्रियन्तेऽस्मिन् पञ्च देवता विद्युत्, वृष्टिः, चन्द्रमाः, आदित्यः, अग्निः-इत्येताः[1] अतो वायुः परिमरः । श्रुत्यन्तरप्रसिद्धेः । स एष (एवायम्)[2] वायुराकाशेनानन्य इत्याकाशो ब्रह्मणः परिमरः। तमाकाशं[3] वाय्वात्मानं ब्रह्मणः परिमरः इत्युपासीत । पर्येनं[4] एवंविदं प्रतिस्पर्धिनः द्विषन्तः । अद्विषन्तोऽपि सपत्ना यतो भवन्ति, अतो विशेष्यन्ते 'द्विषन्तः' सपत्नाः इति । य[5] एनं द्विषन्तः सपत्नाः ते, परिम्रियन्ते प्राणान् जहति। किञ्च, ये च अप्रिया अस्य भ्रातृव्याः, अद्विषन्तोऽपि, ते च परिम्रियन्ते ॥

---

१. 'इत्येता इत्यतो' इत्येव लिखितं स्यान्मूलभाष्ये ॥

२. धनुश्चिह्नान्तर्गतभागाभावेऽपि न क्षतिः । वा ॥ पाठे तु 'एषः' इति नास्ति । तत्र 'एवायम्' इत्यस्तु ॥

३. 'तस्मादाकाशं' वा ॥ इतोऽवगम्यते आकाशस्यैवैतानि ब्रह्माभिन्नस्योपासनानीति ॥

४. नास्ति 'परि' इति वा ॥ अपेक्षितं तु ॥  ५. नास्त्येतत् वा ॥

**२६९. ब्रह्माभिन्नाकाशोपासनप्रकारास्तत्फलं च -**

अथाकाशमेव विविधगुणवत्त्वेनोपासितव्यतया उपदिशति श्रुतिः, 'तत्प्रतिष्ठेत्युपासीत' इत्यादिभिर्विधानैः । पूर्वस्मिन् वाक्ये 'सर्वमित्याकाशे' इत्याकाशे स्थितं सर्वं ब्रह्मैवेत्युपास्यम् इति सामान्यतो विहितम् । इदानीं तु तदेवाकाशं विविधगुणविशेषवत्त्वेनोपासीतेति विधीयत इति विशेषः । तत्र केवलाकाशोपासनानयनम् अप्रकृतप्रक्रिया स्यादिति मत्वा व्याचष्टे **तच्चाकाशं ब्रह्मैवेति।** आकाशात्मना स्थितं ब्रह्मैवेति चिन्तनपूर्वकं तत् प्रतिष्ठादिगुणवदित्युपासीतेत्यर्थः। **तस्मात् तत्सर्वस्य प्रतिष्ठेत्युपासीतेति** तु, यस्माद् 'ब्रह्म पुच्छं प्रतिष्ठा' (२-५) इति सर्वस्य प्रतिष्ठात्वेन स्थितं ब्रह्म, तस्मात् तदभिन्नाकाशमपि प्रतिष्ठागुणवत् तद्ब्रह्मानुग्रहेणैव, तस्मात् सा प्रतिष्ठा ब्रह्मैवेत्युपासीत — इत्यभिप्रायेण । एवमाकाशस्य प्रतिष्ठागुणोपासनात् प्रतिष्ठावान् भवत्युपासकः । आकाशो यथा वाय्वादीनां प्रतिष्ठा भवति, एवम् अयमपि सर्वभोगसंपदां प्रतिष्ठा भवतीत्यर्थः । पूर्वेषु 'क्षम इति वाचि' इत्यादिष्वप्येवं द्रष्टव्यम् इत्यतिदिशति — **एवं पूर्वेष्वपि यद् यदधीनं फलमित्यादिना ।** एवं पूर्वेष्वपि वागादिषु यदधीनं यत् फलम् — यथा वागधीनः क्षेमः — तद् ब्रह्मैव । तस्य क्षेमादेरुपासनात् तद्वान् क्षेमादिमान् भवति इति द्रष्टव्यमित्यर्थः । अत्र 'उपासीत' इति श्रुतं पूर्वत्रापि द्रष्टव्यम् । प्रतिष्ठावान् भवतीति गुणोपासनानुगुणं फलमत्र; तत्रापि क्षेमादि भवतीति द्रष्टव्यमिति भावः । गुणोपासनानुगुणं फलं भवेदित्यत्र श्रुत्यन्तरप्रमाणमप्यस्तीत्याह — **श्रुत्यन्तराच्चेति।** 'तमेतमग्निरित्यध्वर्यव उपासते यजुरिति । एष हीदं सर्वं युनक्ति । सामेति छन्दोगा एतस्मिन् हीदँ सर्वं समानम् । उक्थमिति बह्वृच एष हीदं सर्वमुत्थापयति। यातुरिति यातुविद एतेन हीदं सर्वं यतम् । विषमिति सर्पाः सर्प इति सर्पविद ऊर्गिति देवा रयिरिति मनुष्या मायेत्यसुराः स्वधेति पितरो देवजन इति देवजनविदो रूपमिति गन्धर्वा गन्ध इत्यप्सरसः । तं यथा यथोपासते तदेव भवति । तद्धैनान् भूत्वाऽवति। तस्मादेनमेवंवित्सर्वैरेवैतैरुपासीत। सर्वं ह्यैतद्भवति । सर्वं हैवमेतद्भूत्वाऽवति ॥ (शत.ब्रा. १०-५-२-२०) । इति हि पूर्णं वाक्यं यथागुणोपासनं फलमाहेत्यर्थः । एवं ब्रह्मैवाकाशरूपापन्नं मह इत्युपासीत — इत्यादिभाष्यार्थोऽपि प्रत्येतव्यः ।

आकाशो ब्रह्म । परिवृढतमत्वात् स्वकार्यापेक्षया। तद्गुणकोपासनाद् बृहत्तमो भवति स्वानपेक्ष्य । **तद्ब्रह्मणः परिमर इत्युपासीत ।** ब्रह्मणः परिमरः । परिम्रियन्तेऽस्मिन् पञ्च योऽयं पवते । तमेताः पञ्च देवता विद्युदादय इति वायुः परिमरः । श्रुत्यन्तरप्रसिद्धेः। 'अयं वै ब्रह्म' देवताः परिम्रियन्ते विद्युद् वृष्टिश्चन्द्रमा आदित्योऽग्निः' (ऐ.ब्रा. ४०-५-२८) इति हि श्रुत्यन्तरम् । अतो वायोर्ब्रह्मणः परिमरगुणकत्वं प्रसिद्धम् । तदेतद् ब्रह्मणः परिमरत्वं वायोराकाशेनानन्यस्य इत्याकाश एवात्र ब्रह्मणः परिमरः । **तमाकाशं वाय्वात्मानं ब्रह्मणः परिमर इत्युपासीत।** ब्रह्माभिन्नमाकाशम् इति पूर्ववदिहापि ज्ञेयम् । फलं च पूर्ववत् । यद्यपि 'यो ह वै ब्रह्मणः परिमरं वेद पर्येनं द्विषन्तो भ्रातृव्याः परि सपत्ना म्रियन्ते' (ऐ.ब्रा. ४०-५-२८) इति कर्मविशेषस्यैतत्फलं श्रुत्यन्तरे श्रुतम्, तथाप्यस्याप्यैतद् भवति । वचनात्। विशेषं चाह — **किञ्च ये चाप्रिया अस्य भ्रातृव्या इत्यादिना ।** सर्वमप्येतत् फलजातं ब्रह्माभिन्नत्वादेवाकाशस्य तदुपासनात् सेत्स्यतीति ब्रह्मविभूतिदर्शनमप्येतद् भविष्यतीति प्रकरणार्थो ज्ञेयः ॥

## अन्नान्नादत्वोपदेशस्य परमतात्पर्यम् आत्मनोऽसंसारित्वे

**१०८. 'प्राणो वा अन्नम् । शरीरमन्नादम्' (३-७) इत्यारभ्य आकाशान्तस्य कार्यस्यैव अन्नान्नादत्वमुक्तम्। उक्तं नाम, किं तेन ? तेनैतत् सिद्धं भवति कार्यविषय एव भोज्यभोक्तृत्वकृतः[१] संसारो न त्वात्मनि-**

१. 'भोज्यभोक्तृत्वकृतः' इत्येव मुद्रितपुस्तकेषु पाठः । परं 'भोज्यं भक्ष्ये' (पा. ७-३-६९) इत्यनुशासनात्, अत्र चान्नशब्दस्य भक्ष्यमात्रत्वस्याविवक्षणात् 'भोग्यभोक्तृत्वकृतः' इति भाव्यमिति भाति । 'प्रसिद्धो ह्ययं भोक्तृभोग्यविभागो लोके' (सू.भा. २-१-१३) इति सूत्रभाष्ये एवमेव प्रयोगो दृश्यते ॥

इति। आत्मनि तु भ्रान्त्या उपचर्यते। नन्वात्मापि परमात्मनः कार्यम्, ततो युक्तस्तस्य संसार इति । न । असंसारिण एव प्रवेशश्रुतेः 'तत्सृष्ट्वा । तदेवानुप्राविशत्' (२-६), इत्याकाशादिकारणस्य ह्यसंसारिण एव परमात्मनः कार्येऽनुप्रवेशः[१] श्रूयते। तस्मात् कार्यानुप्रविष्टो जीव आत्मा पर एवासंसारी 'सृष्ट्वा अनुप्राविशत्' इति समानकर्तृकत्वोपपत्तेश्च[२] । सर्गप्रवेशक्रिययोश्चैकश्चेत् कर्ता, ततः क्त्वाप्रत्ययो युक्तः। प्रविष्टस्य तु भावान्तरापत्तिरिति चेत् । न । प्रवेशस्यान्यार्थत्वेन प्रत्याख्यातत्वात्। 'अनेन जीवेन' (छां. ६-३-२) इति विशेषश्रुतेर्धर्मान्तरेणानुप्रवेश इति चेत् । न । तत् त्वमसीति पुनस्तद्भावोक्तेः । भावान्तरापन्नस्यैव, तदपोहार्था संपदिति चेत्[३]। न। 'तत्सत्यं स आत्मा तत्त्वमसि' (छां. ६-१६-३) इति

१. 'कार्येष्वनुप्रवेशः' वा ॥

२. 'समानकर्तृत्वोपपत्तेः' इति मुद्रितः पा ॥

३. तत्त्वमसीत्याद्येतदन्तं वाक्यद्वयं नास्ति वा ॥

सामानाधिकरण्यात् । दृष्टं जीवस्य संसारित्वमिति चेत् । न । उपलब्धुरनुपलभ्यत्वात् । संसारधर्मविशिष्ट आत्मा उपलभ्यत इति चेत् । न । धर्माणां धर्मिणोऽव्यतिरेकात् कर्मत्वानुपपत्तेः । उष्णप्रकाशयोर्दाह्यप्रकाश्यत्वानुपपत्तिवत् । त्रासादिदर्शनाद् दुःखित्वाद्यनुमीयत इति चेत् । न । त्रासादेर्दुःखस्य चोपलभ्यमानत्वान्नोपलब्धृधर्मत्वम् । कापिलकाणादादितर्कशास्त्रविरोध इति चेत् । न । तेषां मूलाभावे वेदविरोधे च भ्रान्तत्वोपपत्तेः । श्रुत्युपपत्तिभ्यां च सिद्धम् आत्मनोऽसंसारित्वम् ॥

**२७०. आत्मा न संसारी परमार्थतः, कारणब्रह्मानन्यत्वात् -**

एवं तावत्प्रमाणादीनामन्नान्नादत्वोपासनमुपदिष्टम् ; ब्रह्मोपासनं च विविधं 'क्षेम इति वाचि' इत्यादिना अवान्तरतात्पर्येण । परमतात्पर्यं तु तत्राप्यसंसार्येकात्मोपदेश एव । तदेतद्दर्शयितुं चिन्तामारभते — **'प्राणो वा अन्नम्'** इत्यादिना । कार्यस्यैवान्नान्नादत्वमुक्तं न कारणस्य ब्रह्मणः; तथा च ब्रह्माभिन्नस्यात्मनोऽसंसारित्वं श्रुत्यभिमतमिति गम्यते — इति हार्दो भावः । तदेतदसंजानानः, जनान् वा आत्मनोऽपि कार्यत्वमभिसंदधानः, आक्षिपति — उक्तं नाम किं तेनेति । न किमपि तेन सेत्स्यति । न हि कार्यस्यान्नान्नादत्वोक्त्या कारणस्य किमपि भवेदिति, आत्मनोऽपि कार्यत्वाविशेषात् तस्यापि भोग्यभोक्तृत्वमस्त्येवेति न यथोक्तश्रुतिवशाद्भवतः किमपि सेत्स्यतीति वा, पूर्वपक्षिणो भावः । सिद्धान्ती

स्वहृत्स्थं भावम् आविष्करोति — **तेनैतत्सिद्धं भवती**त्यादिना **आत्मनि तु भ्रान्त्या उपचर्यते** इत्यन्तेन । अयमाशयः । सर्वत्र कार्ये अनात्मन्येव भोक्तृभोग्य-भावदर्शनात्, कार्योपाधिवशादेवात्मन्यपि भोग्यभोक्तृत्वकृतः संसारो भ्रान्त्या उपचर्यते लौकिकैः । वस्तुतस्तु आत्मा विषयी सन् नैव विषयधर्मभूतसंसारवानिति ॥

**२७१. आत्मा न कार्यान्तर्गतः, प्रवेशश्रुतेः -**

ननु जीवात्मनोऽपि कार्यकुक्षिप्रविष्टा एव 'यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाक्षराद् विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति ॥' (मुं. २-१-१), 'सर्व एव आत्मानो व्युच्चरन्ति' (बृ.मा. २-१-२३) इति च श्रुत्यन्तरात् । अतः कार्यस्यैवान्नान्नादत्वमुक्तमकिञ्चित्करम् इति शङ्कते — **नन्वात्मापि परमात्मनः कार्यं ततो युक्तस्तस्य संसार इति** । परिहरति — **न । असंसारिण एव प्रवेशश्रुतेरिति** । अस्य विवरणम् **'तत्सृष्ट्वा'** इत्यादिना **जीव आत्मा पर एवासंसारी**त्यन्तेन । इदमाकूतम् — न तावद् विस्फुलिङ्गश्रुतिवशाज्जीवस्योत्पत्तिः शङ्कनीया । इह परमात्मनोऽसंसारिण एव कार्यकरणसंघाते प्रवेशोपदेशदर्शनात् इति । ननु स एवेहानुप्रविष्ट इति कथं ज्ञायते ? तत्राह — **सृष्ट्वानुप्राविशदिति समानकर्तृकत्वोपपत्तेश्चेति** । न केवलं प्रवेशश्रवणलिङ्गात्, किं तर्हि, एककर्तृकत्वद्योतकत्वाश्रुतिबलाच्च — इति चशब्दार्थः । न हि 'भुक्त्वा व्रजति स्म' इति समानकर्तृकप्रयोगे अन्योऽभुङ्क्त, अन्य एव त्वव्रजत् — इति कल्पयितुं शक्यत इति भावः । **सर्गप्रवेशक्रिययोश्चैकश्चेत् कर्ता, ततः क्त्वाप्रत्ययो युक्तः** । समानकर्तृकयोरेव हि क्रिययोः क्त्वा स्मर्यते — इत्याशयः ।

ननु च 'समानकर्तृकयोः पूर्वकाले' (पा. ३-४-१२) इति पूर्वकालिकक्रियायाः क्त्वाप्रत्ययविधानात् पूर्वमसंसार्यासीत्, प्रविष्टस्तु संसार्यभूत् इत्येवार्थः किं न स्यात्, 'अपथ्यं सेवित्वा रुग्णोऽभूत्' इतिवत् ? इति शङ्कते — **प्रविष्टस्त्विति** । तदेतत् प्रत्याचष्टे — **न । प्रवेशस्येति** प्रवेशश्रुतिर्नैव मुख्यप्रवेशे तात्पर्यवती, किं तर्हि परमानन्दो निर्विकल्पोऽस्यामेव विज्ञानगुहायाम् अधिगन्तव्य इत्यभिप्रायेण (५९, पृ. १७७) प्रवेशमेव प्रत्याचष्टे । अतो मुख्यप्रवेशमादाय

भावान्तरापत्तिकल्पनमयुक्तम् इत्यभिप्रायः । नन्वेवमपि प्रवेशश्रुतिविरोधपरिहाराय श्रुत्यन्तरसिद्धा जीवोत्पत्तिः किं निराक्रियते ? उदाहृतं हि श्रुत्यन्तरं 'तथाक्षराद् विविधाः सोम्य भावाः प्रजायन्ते' (मुं. २-१-१) इत्यादि । तद्विरोधपरिहाराय समानकर्तृकप्रवेशश्रुतिरेव किमिति अस्मदुक्तप्रकारेण न नीयते ? प्रविष्टस्य तु भावान्तरापत्तिः इत्यस्मदूरीकृतव्याख्यानावलम्बेन हि जीवात्मनः कार्यत्वमेव सिध्यति। न च भवदुक्तं प्रवेशप्रत्याख्यानमेव संगतम्, नास्मदुक्तरीत्या भावान्तरापत्त्या प्रवेशोपपादनम् — इत्यत्र नियामकमस्ति । प्रत्युत जीवस्य संसारित्वग्राहक-प्रत्यक्षादिप्रमाणविरोधात्, श्रुत्यन्तरविरोधाच्च जीवात्मनोऽकार्यत्वमनुपपन्न-मित्येवास्थातुं युक्तम् — इति नः प्रतिभाति । किञ्चान्यत् । 'तदेवानुप्राविशत्' इतीयं श्रुतिः प्रविष्टस्य भावान्तरापन्नत्वे तदनापन्नत्वे च समा । विनिगमनाविरहात् । अस्ति तु अन्या श्रुतिरस्मदुक्ताभिप्रायमेव विशिष्यानुगृह्णन्ती इत्यभिसन्धिः शङ्कते — **'अनेन जीवेन'** (छा. ६-३-२) **इति विशेषश्रुतेरित्यादिना** । शङ्कां परिहरति सिद्धान्ती — **न। तत्त्वमसीति पुनस्तद्भावोक्तेरिति** । इदमत्राकूतम् । न तावज्जीवस्य मुख्यमेव जन्म संभवति । 'न जायते' (का. १-२-१८), 'स वा एष महाजन आत्मा' (बृ. ४-४-२२) इत्यादिश्रुतिभिर्जन्मनिषेधात् । देहाश्रये तु जन्ममरणे नैवास्य मुख्यवृत्त्या भवितुमर्हतः । शरीरसंबन्धादन्यत्र तयोरस्यादर्शनात्। जन्मान्तरगतेष्टानिष्टप्राप्तिपरिहारोपदेष्टृविधिनिषेधशास्त्रप्रामाण्यान्यथानुपपत्तेश्च जीवस्य नित्यत्वमवगम्यते। तस्मात्, जीवस्य श्रूयमाणौ उत्पत्तिप्रलयौ घटाकाशाद्युत्पत्तिप्रलयवद् गौणौ प्रत्येतव्यौ । **यथाहुर्वेदान्ताभियुक्ताः** — 'मरणे संभवे चैव गत्यागमनयोरपि । स्थितौ सर्वशरीरेषु ह्याकाशेनाविलक्षणः॥' (गौ.का. ३-९) इति । तदेवम्, उत्पत्तिश्रुतिस्तावद् गौण्येवेति नासंसारित्वप्रतिपादक-प्रवेशश्रुतेस्तया विरोधः शङ्कनीयः । न चेयं प्रवेशश्रुतिर्मुख्य प्रवेशपरा इत्यत्र गमकमस्ति । न च 'अनेन जीवेनानुप्रविश्य' (छा. ६-३-२) इति विशेषश्रुतिर्ब्रह्मणो धर्मान्तरेणानुप्रवेशं ब्रूते — इति कल्पयितुं शक्यते । 'तत्त्वमसि' (छा. ६-८-७, ६-९-४, ६-१३-३) इति पुनस्तस्यैव प्रविष्टस्य भूयोभूयस्तद्भावोक्तेः । न हि प्रविष्टस्य संसारित्वधर्मवत्त्वेऽभीष्टे 'तत्त्वमसि' इति तवदस्थस्यैव सद्ब्रह्मात्मता उपदिश्यमाना प्रमाणवती, अर्थवती वा स्यादिति ॥

ननु तत्त्वमसीति जीवस्यासंसारित्वमिह नोपदिश्यते किं तु संसारित्व-बुद्ध्यपोहार्था सद्बुद्धिरादिश्यते । शालग्रामादिषु विष्णुत्वादिबुद्धिवत् । सद्बुद्धिसंपादनेन अदृष्टं फलं स्यादित्यर्थवत्त्वं च स्यादुपदेशस्य इति शङ्कान्तरमुत्थाप्य परिहरति — **भावान्तरापन्नस्यैव तदपोहार्था संपदि**त्यादिना **सामानाधिकरण्या**दित्यन्तेन। अयमभिप्रायः । प्रतिमादिषु विष्णुबुद्धावादिश्यमानायामपि 'प्रतिमेयम्' इति बुद्धिर्न व्याहन्ते । 'शास्त्रचोदितस्त्वहम् अत्र विष्णुत्वं संपादयामि' इत्येव तु साधकस्तत्र प्रवर्तते । फलं चादृष्टं यथोपदिष्टं देहपातानन्तरं प्राप्स्यति । अत्र पुनः 'तत्सत्यं स आत्मा तत्त्वमसि' (छा. ६-१६-३) इति मतिनयनाविद्यापट्टकबन्धम् अपनीय गन्धाराभिजनपुरुषदृष्टान्तेन 'तव सद्ब्रह्मात्मत्वमेव सत्यं न संसारित्वम्, स एव तु तव परमार्थात्मा, त्वमिदानीमेव तदसि' इत्याह 'न तु कालान्तरे तद् भविष्यसि' इति। 'तद्धास्य विजज्ञौ' (छा. ६-१३-३) इति च, उपदेशसकालमेव श्रोता 'सद्ब्रह्मैवाहमसि' इति विज्ञातवान् इति श्रूयते । अतो महद् वैषम्यम् । न चात्र 'मनो ब्रह्मेत्युपासीत ..... आकाशो ब्रह्मेति' (छां. ३-२८-१) इत्यादिवद् दृष्टिक्षेपमात्रपरत्वमध्यवसीयते । 'उपासीत' इत्यादिशब्दाभावात्, इतिपरकोपदेशानुपलम्भाच्च । अतः, तत्त्वमसीत्यबाधितसामानाधिकरण्योपदेशात्, असंसारित्वोपदेश एवायम्,न संपन्मात्रमिति सिद्धम् । जीवस्य वास्तविककार्यत्वे तस्य विनाशध्रौव्यात् 'न जीवो म्रियते' (छा. ६-११-३) इत्यस्यामेवोपनिषद्युप-दिश्यमानं प्रामाण्याद् विहन्येन । तस्मात्, नायमात्मा कार्यकुक्षौ शक्यनिवेशनः। 'तत् सृष्ट्वा तदेवानुप्राविशत्' (२-६) इति परस्यैव प्रवेशश्रवणात्, असंसार्येव परमात्मायम् । न च 'पूर्वकाले योऽसंसार्यासीत्, स एव तु प्रविष्टः संसार्यभूत्' इति कालभेदेन श्रुतेः सामञ्जस्यं शक्यकल्पनम् । आत्मनः कालातीतत्वात् । काल्पनिककालमादायापि क्त्वाप्रत्ययप्रयोगोपपत्तेः, तत्त्वमसीत्यादिसामानाधि-करण्योपदेशार्थम् अविकृतस्यैवासंसारिब्रह्मणः प्रवेशकल्पनमिदं जीवात्मनस्तदभेदप्रतिपादनाय — इति स्वीकार्यम् । तस्मात्, साधूक्तं कार्यविषय एव भोग्यभोक्तृत्वकृतः संसारः, आत्मनि तु भ्रान्त्या उपचर्यत इति — इति सर्वमवदातम् ॥

## २७२. आत्मनः संसारित्वे न प्रत्यक्षादि प्रमाणम् -

ननु प्रत्यक्षत एव सिद्धं संसारित्वम्, 'अहं दुःखी' इति दर्शनस्य सार्वजनीनत्वात् । तस्यास्य प्रमाणसिद्धस्य श्रुतिमात्रामाश्रित्यापलापः साहसमिव भाति, इति शङ्कते — **दृष्टं जीवस्य संसारित्वमिति चेत् इति** । अस्याः शङ्कायाः परिहारः — **न । उपलब्धुरनुपलभ्यत्वादिति** । अस्य प्रत्यक्षस्य तर्कापरिशुद्धत्वाद् भ्रान्तित्वमवसेयम् । यस्मिन् हि दुःखमुपलभ्यते शिरउरआदौ, तस्यैव शिरआदेर्दुःखित्वमस्ति; यस्तु तदुपलभते, तस्योपलब्धृत्वादेवानुपलभ्यत्वम् इति युक्तम् । अत आत्मनः संसारित्वं दृश्यत इत्यनुपपन्नम् इत्यभिप्रायः । दृश्याद् दुःखिनोऽन्यत्वादेव हि द्रष्टुरात्मनोऽसंसारित्वमिति युक्तम् इति भावः । यदुक्तमुपदेशसाहस्र्याम् — 'शिरोदुःखादिनात्मानं दुःख्यस्मीति हि पश्यति । द्रष्टान्यो दुःखिनो दृश्याद्द्रष्टृत्वाच्च न दुःख्यसौ ॥' (उप. १६-८) इति । ननु यद्यपि केवलस्यात्मन उपलभ्यत्वमनुपपन्नम् तथापि दुःखादिधर्मसंबन्धात् स उपलभ्यो भवेत्। यथा राहुश्चन्द्रादिसंबन्धात् इति शङ्कते — **संसारधर्मविशिष्ट आत्मा उपलभ्यत इति चेत्** इति । एतदप्यसदित्याह — न । धर्माणां धर्मिणोऽव्यतिरेकात् कर्मत्वानुपपत्तेरिति । न हि संसारिधर्माः संसारिणोऽन्याः स्वतन्त्राः, यथा राहोश्चन्द्रादिः, किं तु नित्यापृथग्भूताः, उत्पलनैल्यादिवत् । तस्मान्नात्मा स्वयमुपलभ्यते, धर्मयोगात्तूपलभ्यते — इत्यनुपपन्नम् इत्यभिप्रायः । किञ्च, आत्मनो धर्मा आत्मनैवोपलभ्यन्त इत्येतदपि न युक्तिमत् । न हि स्वधर्माः स्वाव्यतिरिक्ताः सन्तः स्वेनैव विषयीक्रियन्ते केनचित् । न चात्मधर्मा आत्मनो व्यतिरिक्ताः स्वतन्त्रा एव सन्तीत्यभ्युपगम्यते आत्मनः सुखदुःखादिधर्मवत्त्वाभ्युपगन्तृभिः । तदपृथग्भूता इत्येव तूपगम्यन्ते, उत्पलादीनां नैल्यादिवत् । तस्मात् कर्मत्वानुपपत्तिरात्मधर्माणाम्। **उष्णप्रकाशयोर्दाह्यप्रकाश्यत्वानुपपत्तिवत्** । न ह्यग्निः सर्वधर्मभूतमुष्णं स्वयं दहति, स्वप्रकाशं च प्रकाशयति — इति क्वचिद् दृष्टमुपपन्नं वा । तस्मात्, असदेतत् स्वधर्मविशिष्ट आत्मा स्वेनैवोपलभ्यत इति । सुखदुःखादयोऽनात्मधर्माः, उपलभ्यमानत्वात्, रूपादिवत् — इत्येव तु कल्पयितुं युक्तम् इति भावः ॥

प्रत्यक्षासिद्धमपि संसारधर्मवत्त्वम् अनुमानात् सेत्स्यतीति शङ्कते पूर्ववादी —

**त्रासादिदर्शनाद् दुःखित्वाद्यनुमीयत इति चेत्** इति । देवदत्तो व्याघ्रचोररोगजरामरणादिभ्यस्त्रस्यति, तानि द्वेष्टि, परिहर्तुं यतते च । अतोऽवगम्यते नूनं तानि तस्य दुःखप्रदानीति । तदेवं त्रासादिलिङ्गाद् दुःखीत्यनुमीयत आत्मा । एवं हर्षरत्युपादानयत्नेभ्यः स्त्रीमाल्यादीनां तस्मै सुखप्रदत्वमप्यनुमीयत इति द्रष्टव्यम्। यद्यपि त्रासादयोऽपि व्याघ्रादिदर्शनात्, तत्तच्छब्धश्रवणात्, तत्तत्स्मरणाद् वा संजातेभ्यो मुखविवर्णतागात्रकम्पनस्वेदतत्परिहारसाधनान्वेषणपलायनादिभ्यो लिङ्गेभ्य उन्नेया एव, न तु साक्षादैन्द्रियकाः, तथापि तेष्वेव लिङ्गेषु त्रासादित्वमध्यारोप्य, तदनुमितत्रासादीन् हेतूकृत्य दुःखित्वमनुमीयत इति कृत्वा वा 'त्रासादिदर्शनात्' इत्युक्तम् इत्यदोषः। तदेवं त्रासादिलिङ्गेनात्मनः संसारधर्मवत्त्वमनुमीयते । अतस्तस्यासंसारित्वज्ञानमप्रमाणम् इति चेत्—इति शङ्काग्रन्थाभिप्रायः ॥

शङ्कां परिहरति—**न । त्रासादेर्दुःखस्य चोपलभ्यमानत्वान्नोपलब्धृ-धर्मत्वमिति ।** यथा हि रूपादयो विषयेषूपलभ्यमानास्तद्धर्मा एव, न तूपलब्धुर्भवन्ति, एवं सुखदुःखरागद्वेषभयादयोऽप्यन्तःकरणाश्रयत्वेनैवोपलभ्य-मानास्तद्धर्मा एव भवितुमर्हन्ति, न तूपलब्ध्रात्माश्रयाः । यथोक्तनीत्या कर्तृकर्मत्वविरोधात् इति भावः। **यदुक्तमन्यत्र** 'रूपसंस्कारतुल्याधी रागद्वेषौ भयं च यत् गृह्यते धीश्रियं तस्माज्ज्ञाता शुद्धोऽभयः सदा' (उप. १५-१३) इति ॥

## २७३. आत्मनोऽसंसारित्वं न तर्कविरुद्धम् -

ननु च, आत्मधर्माणाम् आत्मकर्मत्वमनुपपन्नम् इत्ययुक्तम् । चक्षुर्वत्तदुपपत्तेः। यथा हि चक्षुः स्वगतवेदनां स्वयमेवानुभवति, एवमात्मापि स्वधर्ममुपलभेतेति किं चित्रम् ? किञ्च, आत्मा उपलब्धृत्वादेवानुपलभ्य इत्येतदप्ययुक्तमभ्यधायि । अहमिति स्वयंग्राह्यत्वस्य प्रत्यक्षसिद्धत्वात् ।·तस्मात्, तर्कपराहतमिदम् आत्मनस्तद्धर्माणां चानुपलभ्यत्वस्वीकरणम् । अत एव हि तर्कशास्त्रविदः संसारिणमेवात्मानं ग्राहयन्ति । तद्विरुद्धं चेद् भवतः श्रुतिव्याख्यानम् । अतोऽन्यथैव प्रवेशश्रुतिर्नेतव्या यथा तर्कविरोधा न प्रसजेत् इति शङ्कते—**कापिलकाणादादि-**

**तर्कशास्त्रविरोध इति चेत्** इति । ते हि कापिलाः पुरुषस्य नित्यानुमेयस्य भोक्तृत्वमिच्छन्ति । **काणादा**श्चात्मानं मानसप्रत्यक्षविषयं मन्वानाः सुखदुःखादयो नव गुणा आत्मसमवयिन इत्याचक्षते । एवमन्येऽपि तार्किका आर्हतादयः संसारिणमेवात्मानमूरीकुर्वन्ति । तच्छास्त्रविरुद्धमिदं दर्शनम् इति पूर्वपक्षिणोऽभिप्रायः। उपलक्षणमिदम् । मीमांसका वैदिका अप्यहंप्रत्ययविषयमेवात्मानं कर्तृभोक्तृरूपं चाभ्युपगच्छन्ति । तच्छास्त्रविरुद्धं चेदमसंसार्यात्मदर्शनम् इत्यपि द्रष्टव्यम् ॥

तदेतत् प्रतिवक्ति — न । **तेषां मूलाभावे वेदविरोधे च भ्रान्तत्वोपपत्तेरिति**। अयमाशयः । नेदमयुक्तिमद् दर्शनम् । उपलब्धुरनुपलभ्यत्वादितियुक्तेरपरिपन्थित्वात्। यत् तावदुच्यते चक्षुर्वत् तदुपपत्तिरिति । तदयुक्तम् । वैषम्यात् । चक्षुर्हि सावयवत्वेनानेकात्मकत्वात्, करणान्तरसंहतत्वाच्च स्वगतवेदनां स्वयं संवेदयेत् — इति युक्तम् । आत्मा पुनरुपलब्धा नैवानेकात्मकः, निष्कलत्वात् । न च संहतः केनचित् । उपलब्धृत्वात् कार्यकरणसंघातस्य । तदर्थत्वाच्च संघातकार्यस्य — इति वैलक्षण्यम् । **तदुक्तमन्यत्र** — 'चक्षुर्वत् कर्मकर्तृत्वं स्याच्चेन्नानेकमेव तत् । संहतं च ततो नात्मा द्रष्टृत्वात् कर्मतां व्रजेत् ॥' (उप. १६-१०) इति । यत् पुनरुच्यते कापिलकाणाददितर्कशास्त्रविरोध इति । नायं दोषः । तेषां कापिलादीनां मूलाभावात्। न ह्यात्माद्यतीन्द्रियार्थान् मूलभूतवेदमन्तरेण कश्चिदुपलभत इति शक्यं संभावयितुम् परस्परविरोधादेव च तार्किकाणां भ्रान्तत्वोपपत्तिः । न हि परस्परविरुद्धानि सर्वाण्यपि तार्किकदर्शनानि सम्यग्दर्शनानि स्युः । श्रुतिविरोधाच्च तेषां भ्रान्तत्वं स्फुटम् । न च तर्कशास्त्रविरुद्धत्वाच्छ्रौतदर्शनमेव भ्रान्तमिति किं न स्यात्, विरुद्धाव्यभिचारित्वादुभयोः — इति प्रत्यवस्थातव्यम् । श्रुतेः स्वतःप्रामाण्यात्, उपपत्त्युपबृंहितत्वाच्च प्रबलत्वात्, तद्विरोधे संभावितदोषस्य तार्किकदर्शनस्यैव भ्रान्तत्वोपपत्तेः, इत्याह**श्रुत्युपपत्तिभ्यां च सिद्धमात्मनोऽसंसारित्वमिति**। तस्मात् भोक्तृत्वाभ्युपगमो भ्रम एव **कापिलानाम्** । शुद्धस्यासङ्गस्यात्मनः सुखदुःखसंस्पर्शानुपपत्तेः । तथा **वैशेषिकाणामपि**.

इच्छादिगुणसमवेतत्वाभ्युपगमो भ्रम एव । भिन्नजातीयानां स्पर्शादिहीनानाम् आत्मनां मनआदिभिः संयोगानुपपत्तौ इच्छाद्युत्पत्त्यसंभवात् । गुणानाम् आत्मना अयुतसिद्धत्वस्य अभ्युपगममात्रत्वात्, समवायलक्षणसंबन्धस्याप्यनुपपन्नत्वाच्च — इति मन्तव्यम् ॥

ननु च कापिलादीनां मूलाभावे वेदविरोधे च भ्रान्तत्वमित्यस्तु नाम । **मीमांसकानां** तु वैदिकानां कथं भ्रान्तत्वं स्यात् ? ते ह्यहंप्रत्ययगम्यत्वमात्मन आश्रित्य संसारित्वं तस्यावयन्ति । श्रुतिश्च प्रत्यक्षमात्मनः कर्मतत्फलसंबन्धं प्राह। तत् कथं प्रत्यक्षापलापः, प्रत्यक्षश्रुतितिरस्कारश्च भवतां शोभत इति चेत् । अत्र ब्रूमः। यत् तावदुच्यते अहंप्रत्ययगम्यत्वमात्मनः प्रत्यक्षतो दृष्टमिति । तत्र यस्याहंप्रत्ययगम्यत्वं दृष्टम्, तस्य दुःखित्वमप्यस्तु । येन तु तद् दृष्टम्, तस्य दुःखिद्रष्टुः कथं दुःखित्वम् ? — इति प्रष्टव्यास्ते अहंप्रत्ययगम्यमात्मानं मन्यमानाः। तस्मात्, देहदाहादिषु 'अहमेव दग्धः' इत्यादिस्थलेष्विव मिथ्यात्मन एव दुःखित्वम्, न परमार्थात्मनः — इत्येव युक्तम् । न ह्यस्पर्शोऽदेहश्चात्मा तथ्यत एव दह्येतेति । किञ्च, योऽयम् अहंप्रत्ययगम्यत्वेन दृश्यते, स देहादिसंहत एव कश्चित्, अविद्यया परम् आत्मत्वेन परिगृहीत इति निश्चीयते । सुषुप्तादौ देहित्वादिबुद्ध्यपाये अहमभिमानस्याप्यपायदर्शनात् । तेनैव चाहंकर्त्रा सर्वाः क्रियाः क्रियन्ते, तत्फलं च स एवाश्नातीत्यतः, श्रुत्युपदिष्टः कर्तृत्वभोक्तृत्वसंबन्धोऽपि तस्योपपद्यते । यस्तु तस्य द्रष्टा, स नैव कर्ता नापि भोक्ता— इत्यहंप्रत्ययविमर्शेनापि निश्चीयते । 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति' (मुं. ३-१-१) इति श्रुतेः । तस्मात् वैदिकमानिभिर्मीमांसकैरपीदमभ्युगन्तव्यं यदात्मनोऽहमभिमानिन एव दुःखित्वम्, दुःखिदर्शिनोऽपि दुःखित्वाग्रहस्तु भ्रमजन्य एवेति । **तदेतदुक्तमन्यत्र** 'दुःखी स्याद्दुःख्यहं मानाद्दुःखिनो दर्शनान्न वा । संहतेऽङ्गादिभिर्द्रष्टा दुःखी दुःखस्य नैव सः ॥' (उप. १६-९) इति । तस्मात्, सम्यगेवोक्तं श्रुत्युपपत्तिभ्यां च सिद्धम् आत्मनोऽसंसारित्वमिति — इत्यलमतिविस्तरेण ॥२८॥

## स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः ॥२९॥

## आत्मन एकत्वादेव चासंसारित्वम्

**१०९. एकत्वाच्च । कथमेकत्वमिति? उच्यते । 'स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः ।' इत्येवमादि पूर्ववत् सर्वम् ॥**

### २७४. आत्मन एकत्वम् असंसारित्वं च श्रुतियुक्तिसिद्धम् -

ननु 'अनश्नन्नन्योऽभिचाकशीति' इति श्रुतिः परमेश्वरविषया, 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इति तु जीवात्मविषया — इत्यन्यथापि श्रुतिव्याख्यानसंभवात् कथमात्मनः संसारित्वप्रत्याख्यानं सुष्ठु स्यात् ? श्रूयत एव तु जीवात्मनः कर्मकर्तृत्वं तत्फलभोगार्थं संसरणं च 'काममय एवायं पुरुष इति स यथा कामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्मकुरुते तदभिसंपद्यते' (बृ. ४-४-५), 'प्राप्यन्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे ॥' (बृ. ४-४-५) इति च । किञ्च, पर एवात्मा कार्यमनुप्रविष्ट इत्यङ्गीकारे परस्यैव संसार इत्यनिष्टमापतति । उपपत्तिश्च या प्रदर्शिता उपलब्धुरनुपलभ्यत्वाद-संसारित्वमिति, सा प्रत्यक्षविरोधे सति नादर्तव्या भवति । न ह्ययं संसारः सर्वलोकप्रत्यक्षो न कस्यचिदपीत्युपपद्यते इत्याशङ्क्य समनन्तरोत्तरश्रुत्यैव समाधत्ते **एकत्वाच्चेति** । न केवलम् अविकृतस्यैव ब्रह्मणः कार्यानुप्रवेशश्रुतेरुपपत्तेश्च, अपि तु परमार्थत आत्मैकत्वाच्च नात्मनः संसारित्वम् इत्यर्थः । तत्रात्मैकत्वमेव कथम्? इत्याशङ्क्य श्रुत्युदाहरणम् — **उच्यत** इति ॥

ननु श्रुतिरज्ञातज्ञापयित्री न साक्षाद्वस्तुधर्मस्यापोढ्री कर्त्री वा । तत् कथं 'स एकः' इति श्रुतिमात्रेण यथावस्थितमात्मनः संसारित्वमपह्नोतुं शक्येत ? इत्याशङ्क्याह — **इत्येवमादि पूर्ववत् सर्वमिति** । स यश्चायं पुरुषे द्रष्टृश्रोत्राद्यात्मना अन्तरनुप्रविष्ट इव विभाव्यते, यश्चासौ आदित्यान्तर्गतत्वेन निरतिशयानन्दः श्रूयते, अकामहतश्रोत्रियस्य प्रत्यक्षश्च भवति, स एक एव परमानन्दः, योऽयम् 'आनन्दो ब्रह्मेति व्यजानात्' इत्याख्यातः । घटकरकाकाश-

योर्महाकाशरूपेणैकत्ववदिदमवगन्तव्यम् । घटकरकयोरप्याकाशकार्यत्वात् तदनन्यत्वेन आकाशाद्वैतत्वं यथा, तथा आनन्दात्माद्वैतत्वं चेत्यादि सर्वं पूर्ववदवगन्तव्यम् । अथवा प्राणशरीरज्योतिःपृथिव्याकाशानाम् अन्नान्नादभावेन स्थितानामपि ब्रह्मकार्यत्वेन तदन्यत्वात्, वागाद्याकाशान्तेष्वाध्यात्मिकाधिदैविकेषु तत्तद्विभूतिमत्त्वेन विविधं भासमानमपि, ब्रह्म स्वेन पारमार्थिकरूपेण सदा सर्वत्र सत्यज्ञानानन्दघनेनैकरूपमेवावतिष्ठते । तथा च निकृष्टोपाधिकत्वात् संसारित्वेन विभाव्यमाने पुरुषे वा, निरतिशयोत्कृष्टोपाधिकत्वात् विद्याकर्मफलत्वेन श्रूयमाणे आदित्यपुरुषे वा । न कश्चन विशेषो वस्तुतः । तदुपाध्योरविद्याप्रत्युपस्थापितत्वात्, उभयोरप्येकस्यैव निरुपाधिकस्य सत्यज्ञानानन्दस्वरूपब्रह्मण आत्मत्वादिति पूर्ववल्लीगतैक्यवाक्यव्याख्यानुरूपेण (पृ. 235) इदमपि वाक्यं प्रकरणानुगुणं व्याख्येयम् — इत्यभिप्रायः । 'इत्येवमादि सर्वम्' इत्यादिशब्देन 'स य एवंवित्' इत्याद्युत्तरवाक्यगतमप्यन्नमयसंक्रमणादि सर्वं पूर्ववदेव आनन्दवल्लीभाष्योक्तप्रकारेण (पृ. 239) व्याख्येयम् इत्यभिप्रायो द्रष्टव्यः ॥

एतदुक्तं भवति । न वेदवाक्यमित्येतावता सर्वं श्रद्धेयमिति ब्रूमः । किं तु, अनधिगताबाधितार्थबोधकत्वादेव प्रमाणत्वेन श्रुतिमुदाहरामः । न ह्यहंकर्तृव्यतिरेकेण योऽसौ तत्साक्षी, नासौ नास्ति नाधिगम्यत इति वा शक्यं वदितुम् । सर्वस्यान्तरात्मत्वात् । आत्मनश्च निराकर्तुमशक्यत्वात्, य एव निराकर्ता तस्यैवात्मत्वात् । न चास्य संसारित्वं शक्यं केनचिद् दर्शयितुम् । अहंप्रात्ययिसंसारिणोऽपि तदुपलभ्यत्वात् । अत एव नास्यानेकत्वं शक्यते चिन्तयितुमपि । कालदेशोपाधिकृतानेकसंख्याया अपि तदुपलभ्यत्वात् । 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणाश्च ॥' (श्वे. ६-११) इति श्रुतेश्च । न चैतावता संसारस्य श्रुतिप्रत्यक्षपरिप्रापितस्यापलापो भविष्यति । अविद्याकल्पिताहंप्रत्ययिगम्यात्म-विषयत्वेन तस्यान्यथैव नीतत्वात् । तस्मात्, सर्वथाप्यात्मन एकत्वम्, असंसारित्वं च श्रुत्युपपत्तिपरिशुद्धम् । ये पुनर्जीवेश्वरभेदमास्थाय 'अनश्नन्नन्योऽभिचाकशीति' (मुं. ३-२-१) इति श्रुतिमन्यथैव नेतुं प्रयतन्ते, ते श्रुत्युपपत्ती बाधमाना अनवधेयवचनाः, पूर्ववल्ल्यां संक्रमणकर्तृस्वरूपनिर्धारणभाष्ये कृतप्रति-

विधानाश्च — इति न तान् प्रति किञ्चिद् वक्तव्यमवशिष्यत इत्युपरमामः ॥२९॥

**स य एवंवित् । अस्माल्लोकात् प्रेत्य । एतमन्नमयमात्मानमुपसंक्रम्य । एतं प्राणमयमात्मानमुपसंक्रम्य । एतं मनोमयमात्मानमुपसंक्रम्य । एतं विज्ञानमयमात्मानमुपसंक्रम्य । एतमानन्दमयमात्मानमुपसंक्रम्य । इमाँल्लोकान् कामान्नी कामरूप्यनुसञ्चरन् । एतत् साम गायन्नास्ते ॥३०॥**

## आत्मज्ञस्य कृतकृत्यता

**११०. अन्नमयादिक्रमेण आनन्दमयमात्मानम् उपसंक्रम्य एतत् साम गायन् आस्ते ॥**

'सत्यं ज्ञानम्' (२-१) इत्यस्या ऋचोऽर्थो व्याख्यातो विस्तरेण तद्विवरणभूतया आनन्दवल्ल्या । 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' (२-१) इति । तस्य[१]

१. 'इत्येतस्य' इत्येव भाष्यकारैर्लिखितं लेखकप्रमादेन 'इति तस्य' इति परिवर्तितमिति भाति ॥

फलवचनस्य अर्थविस्तारो नोक्तः । के ते, किंविषया वा सर्वे कामाः ? कथं वा ब्रह्मणा सह समश्नुते इत्येतद् वक्तव्यम्-इतीदमिदानीम् आरभ्यते । तत्र पितापुत्राख्यायिकायां पूर्वविद्याशेषभूतायां तपो ब्रह्मविद्या-साधनमुक्तम् । प्राणादेराकाशान्तस्य च कार्यस्य अन्नान्नादत्वेन विनियोगश्चोक्तः । ब्रह्मविषयोपासनानि च। ये च सर्वे कामाः प्रतिनियतानेकसाधनसाध्याः आकाशादि-कार्यभेदविषयाः, एते दर्शिताः । एकत्वे पुनः कामकामित्वानुपपत्तिः । भेदज्ञानस्य सर्वस्य आत्मभूतत्वात् । तत्र कथं युगपद् ब्रह्मस्वरूपेण सर्वान् कामान् एवंवित् समश्नुत इति ?

उच्यते । सर्वात्मत्वापत्तेः[१] । कथं सर्वात्मत्वापत्तिरिति ? आह-पुरुषादित्य-स्थात्मैकत्वविज्ञानेन, अपोह्योत्कर्षापकर्षौ, अन्नमयाद्यात्मनो[२]ऽविद्याकल्पितान् क्रमेण संक्रम्यानन्दमयान्तान्, सत्यं ज्ञानमनन्तं ब्रह्म,

१. 'सर्वात्मत्वोपपत्तेः' इति वा ॥

२. 'अन्नमयादीन् आत्मनः' इति वा ॥

अदृश्यादिधर्मकं स्वाभाविकमानन्दम्, अजममृतमभयमद्वैतं, फलभूतमापन्नः, इमान् लोकान् भूरादीन् 'अनुसंचरन्' इति व्यवहितेन संम्बन्धः । कथम् अनुसंचरन् ? कामान्नी । कामतोऽन्नमस्येति कामान्नी, तथा कामतो रूपाण्यस्येति कामरूपी । अनुसंचरन्, सर्वात्मना इमान् लोकान् आत्मत्वेनानुभवन्। किम् ? एतत् साम गायन् आस्ते। समत्वाद् ब्रह्मैव साम सर्वानन्यरूपं गायन् शब्दयन्, आत्मैकत्वं प्रख्यापयन् लोकानुग्रहार्थं तद्विज्ञानफलं च अतीव कृतार्थत्वं गायन् आस्ते तिष्ठति ॥

२७५. 'स य एवंवित्' इत्यादेः संबन्धः -

'एवमादि पूर्ववत्' इत्युक्तमेवानुसंधाय संक्रमणकर्तुः सामगानं विवरीतुं तदवधिकवाक्यजातस्य समुदितार्थमाह — **अन्नमयादिक्रमेणानन्दमयमात्मानमुपसंक्रम्य इति** । तत्तत्कोशे आत्ममतिमपोह्य, उत्तरस्मिन्नुत्तरस्मिन् प्रविलाप्य अन्तिमकोशमप्यतीत्य आनन्दं ब्रह्मेति विज्ञाय — इत्येतत् ॥

ननु सर्वमप्येतदानन्दवल्ल्या गतार्थम्, तत्र किमवशिष्यते यदर्थमिदमारभ्यते? — इति शङ्कासमाधानार्थम्, अतीतवल्ल्यर्थं तावदनुद्रवति — **सत्यं ज्ञानमित्यादिना।** कथं सत्यं ज्ञानमनन्तं च ब्रह्म ? कथं च निहितं गुहायां परमे व्योम्नि ? इत्येषोऽर्थो व्याख्यातः पूर्ववल्ल्याम् — इत्यर्थः । एवं च किमवशिष्टम् ? तदाह — **सोऽश्नुते** इत्यादिना **फलवचनस्य विस्तारो नोक्त** इत्यन्तेन । ननु

किं तदत्र विद्यते यद् विस्तरेण वक्तव्यमिति ? तत्राह 'के ते, किंविषया वा सर्वे कामाः, कथं वा ब्रह्मणा सह समश्नुत इत्येतद् वक्तव्यम्' अस्यां वल्ल्याम् । अस्त्वेवम्, एतत्पर्यन्तमिह किमुक्तम्? इत्यत उत्तरम्— **तत्रेत्यादि दर्शिताः'** इत्यन्तम्। एतद्वल्लीपरामृष्टा भार्गवी वारुणी विद्या नापूर्वा । पूर्ववल्ल्युक्ताया एवानुवादात् । तत्रानुक्तं तु ब्रह्मविद्यासाधनं तपोऽत्रोपदिष्टमाख्यायिकायाम् । प्राणादेरन्नान्नादत्वेन विनियोगश्चात्रोक्तः; स चात्मनो भोक्तृभोग्यभावव्यावृत्त्यर्थमेवेत्यवोचाम । ब्रह्मविषयोपासनानि, ब्रह्माभिन्नाकाशविषयाणि चोक्तानि बहुप्रकाराण्युपासनानि, तत्तत्फलप्राप्तिकामानां कृते । भाष्ये **'आकाशादिकार्यविषयाणि'** इत्यादिशब्दस्तु आकाशाभिन्नवायोरपि परिमरगुणत्त्वस्योपसंग्रहार्थः । तानि च फलानि यद्यपि प्रतिनियतानेकोपासनरूपसाधनसाध्यानि, तथापि ब्रह्मविदोऽपि ते भवन्ति 'सर्वान् कामान्' इत्यृगुक्तसर्वकामप्रदर्शनार्थानि — इत्युक्तम्। अतः 'सर्वान् कामान् सह समश्नुते ब्रह्मणा' इत्येतदुपपादयितव्यं परिशिष्टमिति भावः ॥

## २७६. फलवचने 'सह समश्नुते' इत्येतदुपपादयितव्यम् -

ननु किमस्ति तत्रोपपादयितव्यम् इत्याक्षिपन् स्वाभिप्रायं विवृणोति शङ्कावादी — **एकत्वे पुनः कामकामित्वानुपपत्तिरिति** । 'यो वेद निहितं गुहायाम् इति ब्रह्मण एवात्मत्वं विवक्षितमित्युक्तम् । ब्रह्मणश्च 'अदृश्येऽनात्म्ये' (२-७) इत्यादिना निर्विशेषत्वमवगमितम् । तत्रैकस्मिन् निर्विशेषे ब्रह्मात्मनि कथं कामकामिभावः ? अनात्मक्षेत्र एव हि सर्वे कामा इति 'प्राणो वा अन्नम्' (३-७) इत्यादिना विज्ञापितम्। नन्वेतद्दोषपरिहाराय 'ब्रह्मणा सह' इत्यन्वयं कृत्वा ब्रह्मणा सहितः सर्वान् कामान् भुङ्क्ते — इत्येव व्याख्यायताम् । न । 'स यश्चायं पुरुषे । यश्चासावादित्ये स एकः' इति परेतरभेदस्य कण्ठरवेण निराकृतत्वात् । ननु ब्रह्मरूपेणैव सर्वान् कामान् विषयभूतान् समशिष्यते । तत्र का वा अनुपपत्तिरिति ? **न । भेदजातस्य सर्वस्यात्मभूतत्वात्** । न हि भेदजातं ततोऽन्यत्, येन तदनात्मज्ञ इव समश्नुवीत। 'तदात्मानं स्वयमकुरुत' (२-७) इत्यनात्मन आत्मानन्यत्वमुंक्तम् । तत्रैवं सति कः किमश्नुवीत ? 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्'

(बृ. ४-५-१५) इति श्रुत्यन्तरात् । तदेतदाह — **तत्र कथं युगपद् ब्रह्मस्वरूपेण सर्वान् कामान् एवंवित् समश्नुत इति** ॥

**२७७. विदुषः सर्वकामावाप्तिः सर्वात्मत्वात् -**

तामेतां शङ्कां परिहरति — उच्यते । **सर्वात्मत्वापत्तेः — इति**। 'समश्नुत इत्युच्यते ?' इत्येतदन्तो वा शङ्काग्रन्थः सर्वात्मत्वापत्तेरित्येतावन्मात्रं परिहारग्रहणकवाक्यम् । सर्वात्मत्वमेव कथम् इति प्रश्नमुद्भाव्य तदुत्तरत्वेन 'इमाँल्लोकान्' इत्यादिश्रुतिवाक्यमवतारयति — **पुरुषादित्यस्थात्मैकत्वविज्ञाने-नेत्यादि। अद्वैतं फलभूतमापन्न** इत्यन्तं व्याख्यातमधस्तात् ॥

अत्र **केचित्**, अविद्यालेशेन द्वैतावभासमनुभवन् विद्वान् 'सर्वस्यात्माहम्' इति मन्यमानः, अणिमाद्यैश्वर्यभुजां योगिनां यत्कामान्नत्वं कामरूपत्वं च तन्ममैवेति पश्यन् युगपत् सर्वान् विषयानन्दान् अश्नत इत्युपचर्यते — इति व्याचक्षते । तदसत्। विदुषोऽप्यविद्यालेशसद्भावे विद्याया अद्वैतानन्दावबोधकत्वे प्रमाणाभावप्रसङ्गात्। विद्याविद्ययोस्तमःप्रकाशवद्विरुद्धस्वभावयोः सहभावस्य मनसा चिन्तयितुमप्यशक्यत्वात् । स्वोदयमात्रेणाविद्यां निरवशेषं विनाशयन्त्येव हि विद्या नाम। यथोक्तं **गीताभाष्ये** — 'योऽयं लौकिको वैदिकश्च व्यवहारः स उत्पन्नविवेकज्ञानस्य स्थितप्रज्ञस्य अविद्याकार्यत्वादविद्यानिवृत्तौ निवर्तते । अविद्यायाश्च विद्याविरोधान्निवृत्तिः' (गी.भा. २-६९) इति । तस्मात्, एकत्वविदोऽप्यविद्यालेशस्तत्कृतव्यवहारो वा न शक्यशङ्कः । कथं तर्हि तस्य सर्वकामावाप्तिरिति ? सर्वात्मत्वादित्यवेहि । सर्वेषामात्मभूतो ह्यसौ ; तथा कामानामपि — इति न पृथगस्त्यवाप्तव्यता कामानाम् । अकामयमानो ह्यसौ । आत्मरूपेण सर्वस्यापि नित्याप्तत्वे कामयितव्याभावात् । तथा च **श्रुत्यन्तरम्** । 'अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामः' (बृ. ४-४-६) इति। आत्मैव कामाः सर्वेऽस्येत्यत आप्तकाम इति श्रुतेरर्थः ॥

कथं तर्हि 'कामान्नी कामरूप्यनुसंचरन्' इति श्रुतिः ? अत्राह — **इमाँल्लोकानित्यादिना आत्मत्वेनानुभवन्नित्यन्तेन** । अयं भावः । नास्यात्मनो

व्यतिरिक्ता लोकाः, आप्तव्यमन्यं रूपं सञ्चरणं वा । सर्वं ह्यस्याद्वैतानन्दात्मैवाभूदिति यत्र कुत्रचिल्लोके योगिषु देवेषु वा कामान्नत्वं कामरूपत्वं वा प्राप्तम्, तद् यथाप्राप्तमेवानूद्यते श्रुत्या, सर्वमप्यस्यैव विदुष इति सर्वात्मभावस्तुतये; न पुनर्विदुषोऽपि द्वैतान्नरूपाद्यनुसंधानमस्तीति, यथाहुरविद्यालेशवादिन इति । 'अनुसञ्चरन्' इति चैवमेव व्याख्येयम् । 'अपाणिपादो जवनो ग्रहीता' (श्वे. ३-१९) इतिवत् सर्वव्यवहारस्याप्युपपत्तेः । न ह्यानन्दमयान्तकोशपञ्चक-मुपसंक्रान्तवतः पुनरपि सञ्चरणादिकं यथाश्रुतं संभवतीति ॥

## २७८. विदुषो ब्रह्मरूपसामगानम् -

तदेवं भूरादीन् इमान् सर्वान् लोकान् आत्मत्वेनानुभवन् असौ जीवन्मुक्तं स्वदृष्ट्या अजामृताभयब्रह्मानन्दरूपेण सदा तिष्ठन्, कथं व्यवहरति लोकदृष्ट्या ? इत्यत्र श्रुतिराह — **'एतत् सामगायन्नास्ते'** इति । **तद् व्याचष्टे समत्वाद् ब्रह्मैव साम सर्वानन्यरूपं गायन् शब्दयन्** इत्यादिना **तिष्ठतीत्यन्तेन** । यद्यपि 'एतत् वक्ष्यमाणं साम गीत्यात्मकं मन्त्रं गानं कुर्वन्' इति यथाश्रुतोऽर्थः, तथापि साम्नोऽप्यस्य समस्वरूपब्रह्मख्यापनादेव सामत्वम्। प्रकृतं त्विहाद्वयं समं ब्रह्मैवानन्दरूपम् — इति तदेवात्र साम विवक्षितम् । तच्च गायत्यसौ, उत्कर्षापकर्षहीनं समं सर्वेषु भूतेष्वानन्दरूपं ब्रह्माहमेव - इत्यात्मैकत्वं सर्वदा शब्दयन् लोकानुग्रहार्थं प्रख्यापयन् आस्ते । ब्रह्मविदोऽत्यन्तकृतार्थताख्यापनेन हि साधकलोकसंग्रहः कृतः स्यात् । स्वस्य तु सर्वथा कृतार्थत्वात् नास्त्येवान्यत् किमपि कृत्यम् इत्यभिप्रायः ॥३०॥

**हा३वु हा३वु हा३वु । अहमन्नमहमन्नमहमन्नम् । अह-मन्नादो३ऽहमन्नादो३ऽहमन्नादः । अहँ-श्लोककृदहँ श्लोककृदहँ श्लोककृत् । अहमस्मि प्रथमजा ऋता३स्य । पूर्वं**

देवेभ्यो अमृतस्य ना३ऽभायि । यो मा ददाति स इदेव मा३ऽऽवाः । अहमन्नमन्न-मदन्तमाद्मि । अहं विश्वं भुवनमभ्यभवाम् । सुवर्न ज्योतीः ॥३१॥

विदुषो ब्रह्मात्मैकत्वप्रख्यापनप्रकारः

१११. कथम् ? हा३वु, हा३वु, हा३वु । अहो इत्येतस्मिन्नर्थे अत्यन्तविस्मय-ख्यापनार्थम् । कः पुनरसौ विस्मय इति ? उच्यते । अद्वैत आत्मा निरञ्जनोऽपि सन्, अहमेवान्नम्, अन्नादश्च । किञ्च, अहमेव श्लोककृत् । श्लोको नाम अन्नान्नादयोः संघातः । तस्य कर्ता चेतनावान् । अन्नस्यैव वा परार्थस्य अन्नादार्थस्य सतोऽनेकात्मकस्य पारार्थ्येन हेतुना संघातकृत् । त्रिरुक्ति-र्विस्मयत्व[१]ख्यापनार्था । अहमस्मि भवामि प्रथमजाः प्रथमजः प्रथमोत्पन्नः । ऋतस्य सत्यस्य मूर्तामूर्तस्यास्य जगतः, देवेभ्यश्च पूर्वम् अमृतस्य नाभिः अमृतत्वस्य नाभिर्मध्यम् । मत्संस्थममृतत्वं प्राणिनाम् इत्यर्थः ॥

१. 'विस्मयख्यापनार्थम्' इति त्वरहितोऽपि पाठो यद्यस्ति, तेनैवालमिति भाति ॥

**२७९. महाश्चर्यब्रह्मरूपता विदुषः -**

'हा३वु' इति स्तोभः, अहो इत्यस्मिन्नर्थे । अत्यन्तविस्मयख्यापनार्थम् । 'त्रिरुक्तिः' इति शेषः । स्तोभ एव हि विस्मयार्थः । कः पुनरसौ विस्मय इति ? सार्वात्म्यप्राप्तिकृत इति केचित् । तन्न सुन्दरमिति भाति । कुतः ? नित्यप्राप्तस्य सार्वात्म्यप्राप्तिरेव तु विस्मयकरीति युक्तं यतः । तथा ह्याह भगवान् 'आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः । आश्चर्यवच्चैनमन्यः श्रृणोति श्रुत्वाऽप्येनं वेद न चैव कश्चित् ॥' (गी. २-१९) इति । किंकृतस्तर्ह्यसौ विस्मय इति ? **उच्यते । अद्वैत आत्मा निरञ्जनोऽपि सन्, अहमेवान्नम्, अन्नादश्च इति ।** अद्वैते ह्यात्मनि अन्नान्नादविभाग एव तावदनुपपन्नः । निरञ्जने त्वन्नादत्वं न कथमप्युपपद्यते। अथ चान्नमन्नादश्च — इत्येष विस्मयः । इदं च लोकदृष्ट्या । वस्तुतस्तु , नित्याद्वैतनिरञ्जनस्वरूप एवाहम्, अन्नान्नादविभागस्तु युक्तिहीनप्रकाशोऽविद्या-कृतमायया — इति हृदयम् । किञ्च, एषोऽन्यो विस्मयः । यतोऽहमेव श्लोककृत् । **श्लोको नामान्नान्नादयोः संघातः**, तस्य कर्ताप्यहमेव चेतनावान् इति । न हि चेतनावन्तं सर्वज्ञमन्तरेण अयं भोग्यभोक्त्रोर्नित्यसंबन्धोऽन्येन केनचिद् देहादिसंहतेन संसारिणा, अचेतनेन वा शक्यसंपादनः । अनेककर्तृभोक्तृसंयुक्तश्चायं प्रपञ्चः । तेषां भोग्यफलसंयोगः कृतकर्मानुरूपफलदातारं चेतनावन्तमपेक्षते । न च स्वभावेनैवैतत् संस्यात् । विशिष्टदेशकालनिमित्तानाम् इहोपादानदर्शनात् । तदेवं श्लोककरणं उदासीनवत् स्थितस्यैव मम तत्तत्कृतक्रियानुगुणफलदातृत्वम् इतीदमप्याश्चर्यमेव — इत्यभिप्रायः । इदमपि लोकदृष्ट्या । वस्तुतस्तु, अयस्कान्तादिवत् प्रवृत्तिरहितेनैव सांनिध्यमात्रेणाविद्याप्रत्युपस्था-पितनामरूपमायावेशवशेन संघातकृत्त्वम् — इति हृदयम् । 'प्राणो वा अन्नम् । शरीरमन्नादम् । .... तदेतदन्नमन्ने प्रतिष्ठितम्' (३-७) इत्यादिश्रुतिमाश्रित्य 'अहं श्लोककृत्' इत्यस्यान्या व्याख्या — **अन्नस्यैव वा परार्थस्य अन्नादार्थस्य सतोऽनेकात्मकस्य पारार्थ्येन हेतुना संघातकृत्** इति । न ह्यन्नस्यैवाचेतनस्य स्वातन्त्र्येण शरीरेन्द्रियमनआदिरूपेण परिणामः, जीवार्थत्वेन शरीरादीनाम् संहत्यकारित्वं वा घटमानम् । अतोऽहमेव चेतनावान्, तस्य

परिणामपारार्थ्यप्रवृत्त्युभयकृत् इति पूर्ववद् विस्मयस्तत्परिहारश्चानुसंधेयः ॥

## २८०. 'अहमन्नम्' इत्यादेस्त्रिरुक्त्यभिप्रायः -

'अहमन्नम्', 'अहमन्नादः', 'अहं श्लोककृत्' इति चैषां त्रिस्त्रिरुक्तिः किमर्था? तत्राह — **त्रिरुक्तिर्विस्मयख्यापनार्थेति** । वार्तिके तु त्रिरुक्तेरन्यथापि व्यख्या कृता — 'त्रिरुक्तिश्चादरार्थेयमहमन्नमितीष्यते । अश्रद्दधानलोकस्य प्रतिपत्त्यर्थमुच्यते ॥' (तै.वा. ३-८३) इति । तदपि युज्यत एव । 'सत्यं सत्यं पुनः सत्यम्' इत्यादिवच्छ्रद्धादार्ढ्यार्थम् अहमन्नमित्यादित्रिर्वचनम् — इति विज्ञातुं शक्यत्वात् । विस्मयरूपोऽर्थस्तु 'हा३वु' इति स्तोभेनैव गतः — इति तत्पक्षे व्याख्येयम् । अत्यन्तविस्मयख्यापनार्था त्रिरुक्तिः, जिज्ञासुजनकौतूहलविवृद्ध्यर्थमिति भाष्यमतमपि नानुपपन्नम् इत्यलमतिसूक्ष्मेक्षिकया ॥

## २८१. ब्रह्माभिन्नस्य विदुषः सर्वात्मकता

अन्यदपि विस्मयकारणमिदमुच्यते 'अहमस्मि प्रथमजा' इत्यादि । तद् व्याचष्टे — **अहमस्मि भवामीत्यादिना** । 'स यो हैतं महद् यक्षं प्रथमजं वेद सत्यं ब्रह्मेति ....' (बृ. ५-४-१), 'आप एवेदमग्र आसुस्ता आपः सत्यमसृजन्त' (बृ. ५-५-१) इति च श्रुत्यन्तरात्, अव्याकृतमूर्तामूर्तात्मकस्य जगतो व्याकरणद्वारा हिरण्यगर्भस्य सर्वप्रथमं जन्मेत्यवगतम् । सोऽपि कार्यब्रह्मात्मकः प्रथमजोऽहमेव, नित्याजाद्वितीयब्रह्मणाऽभिन्न एव सन् — इति विस्मयः । वस्तुतस्तु, सत्यस्य मूर्तामूर्तलक्षणस्य मत्स्वरूपे ब्रह्मण्येवाविद्याध्यारोपितत्वात्, ममाव्ययात्मत्वमव्याहतम् — इति हृदयम् । अथवा अन्नादरूपोऽपि सन्, अहं मूर्तामूर्तस्य जगतः प्रथमज इति विस्मयः । वस्तुतस्तु अन्नान्नादादेरविद्याकल्पितत्वात्, अन्नान्नादभावरहितोऽहम् । 'न तदश्नाति किञ्चन न तदश्नाति कश्चन' (बृ. ३-८-८) इति श्रुत्यन्तरात् — इति हृदयम् इति व्याख्येयम् । तथा च **वार्तिकम्** 'मूर्तामूर्तात्मकस्यास्य ह्यन्नान्नादत्वरूपिणः । अतद्वानग्रजोऽहं **वै न** तदश्नाति हि श्रुतिः ॥' (तै.वा. ३-८४) इति । अथान्यदपि विस्मयकारणमाचष्टे **देवेभ्यश्च पूर्वमिति**। 'ब्रह्म प्रजापतिं प्रजापतिर्देवान्' (बृ. ५-५-१) इति श्रुत्यन्तरात्

हिरण्यगर्भसृष्टौ विराट्पुरुषो देवानसृजतेति देवेभ्यः पूर्वः सः। 'अदृश्येऽनात्म्ये' (२-७) इत्यादि श्रुतेः सर्वमूर्तामूर्तधर्मविवर्जितोऽपि सन् प्रथमशरीर्यहम् इति विस्मयः। पूर्ववत् परिहारः ॥

देवेभ्यः पूर्वम् — इत्यनेनोपलक्षणभूतेन सर्वं देवादिकमपि कार्यरूपमहमेवेत्युक्तं वेदितव्यम् । अद्वितीयब्रह्मण एवाविद्याप्रत्युपस्थापिततत्तदुपाधिद्वारा तत्तद्व्यपदेशभाक्त्वात् । तदभिन्नत्वाच्च विदुषः । तथा हि श्रुत्यन्तरम् 'एष ब्रह्म एष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्चमहाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वदेजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत्किञ्चेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरं सर्वं तत् प्रज्ञानेत्रं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म' (ऐ. ३-३) इति सर्वात्मकत्वं ब्रह्मणो ब्रूते ॥

## २८२. ब्रह्मण एव सर्वामृतत्वकारणत्वम् -

तदेवम् उपाधिद्वारेण सर्वात्मकत्वं ब्रह्माभिन्नस्य विदुषो वर्णयित्वा, अथेदानीमविद्यानिमित्तानामुपाधीनां विद्यया प्रविलये सति तस्यैव सर्वमोक्षकारणत्वमाह — 'अमृतत्वस्य नाभायि' इति । 'नाभिः' इत्यस्यैव गानकृतो विकारः श्रुतौ 'नाभायि' इति । न केवलं देवेभ्य आपेक्षिकामृतत्वस्य नाभिर्मध्यम्, चक्राराणामिव तन्नाभिराश्रयः ; किन्तु मुख्यामृतत्वस्यापि सर्वेषामित्यभिप्रेत्याह — **मत्संस्थममृतत्वं प्राणिनामित्यर्थ इति** । मदधीनं मोक्षाख्यममृतम् । आत्मबुद्धिप्रकाशनद्वारेणाहमेव मोक्षमाणानां परमानन्दात्मन्यवस्थानरूपममृतत्वमनुगृह्णामि — इत्यभिप्रायः । 'तँ ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये' (श्वे. ६-१८) इति श्रुत्यन्तरात् । 'ददामि बुद्धियोगं तं येन मामुपयान्ति ते', 'अज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥' (गी. १०-१०,११) इति स्मृतेश्च ॥

## अज्ञानामन्नदानादानयोः फलम्

**११२. यः कश्चित्, मा माम् अन्नम् अन्नार्थिभ्यो ददाति प्रयच्छति अन्नात्मना ब्रवीति (?), स इत् इत्थम्[१] एवमविनष्टं यथाभूतम् आवाः । अवतीत्यर्थः । यः पुनरन्यो माम् अदत्वा अर्थिभ्यः काले प्राप्ते अन्नम् अत्ति तम् अन्नम् अदन्तं भक्षयन्तं पुरुषम् अहम् अन्नमेव संप्रति अद्मि भक्षयामि ॥**

**२८३. अन्नदानितददानिनोरनुगुणं फलम् -**

**यः कश्चिन्मामन्नमित्यादिभक्षयामीत्यन्तभाष्यस्यायमर्थः ।** योऽनात्मज्ञोऽन्नार्थिभ्योऽतिथिभ्यो 'ब्राह्मणादिपात्रे देशे काले च अन्नदानं महाफलम्' इति बुद्ध्या अन्नं ददाति, स इत्थं ददन्मामेव ददाति वस्तुतः — इति तस्य तत्फलमवश्यं भवति । सोऽन्नमित्थम् एवमेव **अविनष्टं यथाभूतमिति** । 'आवाः' इत्यस्य कालपुरुषव्यत्ययेन अवतीत्यर्थोऽवसेयः । तस्य काले अवश्यमन्नं तथैवोपतिष्ठत इत्यर्थः । तेन स आत्मानमप्यवति इति द्रष्टव्यम् । अत्र 'प्रयच्छति' इत्यनन्तरम् 'अन्नात्मना ब्रवीति' इत्यधुनातनपुस्तकेषूपलभ्यते । स पाठो मूलभाष्ये स्थितो वा न वेति न विज्ञातुं पार्यते । यदि स्थितः, तर्हि 'अन्नं राद्धम्' इत्यादिरूपेण ब्रवीति — इत्यर्थः प्रकल्प्यः । एतेन **'यः पुनरन्यो मामदत्वार्थिभ्यः.काले प्राप्ते'** इत्यादिभाष्यमपि व्याख्यातं भवति । अन्नमतिथ्यादिभ्योऽदत्वैव य आत्मार्थमेवान्नं पचते भक्षयति च सोऽन्नं नावति, आत्मानं च नावति । यस्मादहं तद्दृष्ट्या केवलमन्नं भूत्वा तमात्मंभरिणं संप्रति भक्षणकाले एव भक्षयामि । तदन्नं पापकारणं भूत्वा तं विनाशयतीत्येतत् । 'केवलाघो भवति केवलादी'

---

१. 'इत्थमेवेत्यर्थः' वा ॥

(तै. ब्रा. २-८-८-३), 'भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्' (गी. ३-१३) इत्यादि श्रुतिस्मृतिभ्यः ॥

### विदुषोऽन्नत्वोक्तिर्ब्रह्मभावस्तुतये

११३. अत्राह । एवं तर्हि बिभेमि सर्वात्मत्वप्राप्तेर्मोक्षात् । अस्तु संसार एव। यतो मुक्तोऽप्यहम् अन्नभूत आद्यः[१] स्याम् अन्यस्य । एवं मा भैषीः । संव्यवहारविषयत्वात् सर्वकामाशनस्य । अतीत्यायं संव्यवहारविषयमन्नान्नादिलक्षणमविद्याकृतं विद्यया ब्रह्मत्वमापन्नो विद्वान् । तस्य नैव द्वितीयं वस्त्वन्तरमस्ति यतो बिभेति । अतो न भेतव्यं मोक्षात् । एवं तर्हि किमिदमाह 'अहमन्नमहमन्नाद' इति ? उच्यते । योऽयम् अन्नान्नादिलक्षणः संव्यवहारः कार्यभूतः, स संव्यवहारमात्रमेव, न परमार्थवस्तु । स एवंभूतोऽपि ब्रह्मनिमित्तो ब्रह्मव्यतिरेकेणासन्निति कृत्वा ब्रह्मविद्याकार्यस्य ब्रह्मभावस्य स्तुत्यर्थमुच्यते 'अहमन्नमहमन्नमहमन्नम् । अहमन्नादोऽहमन्नादोऽहमन्नादः' इत्यादि । अतो भयादिदोषगन्धोऽप्यविद्यानिमित्तोऽविद्योच्छेदाद्

---

१. 'अद्यः' वा ॥

**ब्रह्मभूतस्य नास्तीति । अहं विश्वं समस्तं भुवनम् भूतैः संभजनीयं ब्रह्मादिभिः, भवन्तीति वा अस्मिन् भूतानीति भुवनम्-अभ्यभवाम् अभिभवामि परेणेश्वरेण स्वरूपेण ॥**

**२८४. विद्वद्दृष्ट्या अन्नान्नादिव्यवहारो नास्त्येव ब्रह्मणः पृथक् -**

अत्राह । सिद्धान्त्यभिमतं सर्वकामावाप्तिसतत्त्वमविजानन् शङ्कत इत्यर्थः। एवं तर्हि, यद्यहं मुक्तोऽन्नान्नादादिभावमापद्येय, **बिभेमि सर्वात्मत्वप्राप्तेर्मोक्षात्। अस्तु संसार एव** । मुक्तोऽप्यहमन्नभूत आद्यः स्यामन्यस्य । इदानीं हि संसार्यवस्थायामहमन्नाद एव न त्वाद्यः; मुक्तस्त्वेतद्वेरूपेण अन्यस्य भक्ष्योऽपि भवेयम् — इत्यभिप्रायः । सिद्धान्तीस्वाशयं विवरिष्यन्नाह — **एवं मा भैषीः । संव्यवहारविषयत्वात् सर्वकामाशनस्य** । संव्यवहारमात्रमालम्ब्य सर्वात्मभावेन सर्वकामावाप्तिः प्रदर्शिता, अन्नान्नादत्वोक्त्या । यथा आकाशो नील इति संव्यवहारमात्रम् आकाशस्य सर्ववर्णरहितस्य विदुषामपि, तद्वदित्यभिप्रायः । का तर्हि वस्तुस्थितिः ? तत्राह — **अतीत्यायमित्यादिना यतो बिभेतीत्यन्तेन।** अविद्यया रज्जुं सर्पत्वेन गृहीत्वा यथा कश्चित् ततो बिभेति स्म, विद्यया तु तस्या रज्जुत्वमवगत्यापि संव्यवहरेत् 'रज्जुः सर्पोऽभवदिति', न च तावन्मात्रेणास्य भयं भवति; एवमयमद्वयब्रह्मापन्नो विद्वानाह 'अहमन्नम्' इत्यादि । न च तावताऽस्य आद्यत्वमपि स्यात् । न ह्यस्ति परमार्थतः स्वव्यतिरिक्तमन्नमन्नादो वा यतोऽयं बिभीयात् — इत्यर्थः।

**२८५. अन्नान्नादसामगानस्य तात्पर्यम् -**

एवं तर्हि नैवास्त्यन्नान्नादभावो विदुषः । ततश्च सर्वात्मभावाभाव एवेत्यापन्नमिति वृद्धिमिच्छतो मूलमपि नष्टम् इत्याक्षिपति — **एवं तर्हि किमिदमाह अहमन्नमहमन्नाद इति** । अन्नान्नादभावः सामगानोक्त उपपन्न एव प्रकारान्तरेणेति स्वाशयमाविष्करोति सिद्धान्ती — **योऽयमन्नान्नादिलक्षणः संव्यवहार**

**इत्यादिना इत्यादीत्यन्तेन** । अयमाशयः । अन्नान्नादिभावोऽयं न परमार्थः, किं तर्हि संव्यवहारमात्रमेवेति यदुक्तं तन्नापह्नुमहे । परं तस्य न शशशृङ्गादितौल्यमिति ब्रूमः। सर्वो ह्ययं व्यवहारः कार्यभूतो विकल्पमात्रत्वात् । निमित्तं किञ्चिदपेक्षते । मिथ्या विकल्पस्य निर्निमित्तत्वानुपपत्तेः । तत्र ब्रह्मैवास्य निमित्तम् — इत्यङ्गीकर्तव्यम्। 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' (२-१), 'इदं सर्वमसृजत' (२-६) इति च ब्रह्मण एव तत्कारणत्वावगमात् । अतो ब्रह्मानन्योऽयं तद्व्यतिरेकेण नास्त्येवेति कृत्वा ब्रह्मैव सर्वात्मकम् — इत्युच्यते । 'सच्च त्यच्चाभवत्' (२-६) इति ह्युक्तम्। तदेतादृशं सर्वात्मभावं विवक्षित्वा आह श्रुतिः 'अहमन्नमहमन्नमहमन्नम्' इत्यादि । तच्चैतत् सर्वात्मकत्वमुक्तं सर्वकामावाप्तिप्रदर्शनेन **ब्रह्मविद्याकार्यस्य ब्रह्मभावस्तुत्यर्थम्** । न च ब्रह्मभावो वस्तुत एव विद्याकर्यम्, येन तस्यानित्यता शङ्क्येत । अविद्यानिवृत्तिद्वारा विद्याज्ञाप्यत्वादेव तु नित्यसिद्धस्यापि तस्य विद्याकार्यत्ववाचोयुक्तिः — इति सर्वमवदातमिति ॥

## २८६. विद्या सर्वद्वैतविलापिनी -

तदेवं मुक्तस्य भयशङ्काव्याधिं भिषजित्वा तत्र हेतुसमर्पकत्वेनैवोत्तरं वाक्यमवतारयति — **अतो भयादिदोषगन्धोऽप्यविद्यानिमित्तोऽविद्योच्छेदाद् ब्रह्मभूतस्य नास्तीतीति** । अतः, कथितनयेन भयहेत्वन्नान्नादत्वादेः संव्यवहारमात्रत्वात्, परमार्थवस्तुत्वाभावे सति, भयादिसर्वसंसारदोषगन्धोऽपि नास्ति मुक्तस्य । संव्यवहारामात्रस्य दोषस्य वस्तुसंस्पर्शानुपपत्तेः — इत्यर्थः । अतः किं फलतीति ? उच्यते । इत्यहं विश्वं **भुवनं अभिभवामि, उपसंहरामि** । अभ्यभवाम् इति कालस्याविवक्षितत्वात्। कथमिति ? परेणेश्वरेण स्वरूपेण पारमार्थिकेनाद्वैतब्रह्मरूपेण, नित्यनिरस्तसर्वप्रपञ्चेन — इत्यर्थः । अभिभवामीत्यपि संव्यवहारमात्रमिति भावः। न हि नित्यनिरस्तस्यैव विश्वस्य वास्तविकाभिभवापेक्षास्ति । अत एवोक्तं वार्तिके 'सत्यज्ञानादिरूपोऽहमविद्योत्थमशेषतः । अहं ह्यभिभवाम्येको दिनकृच्छार्वरं यथा' (तै. वा. २-८८) इति । भुवनशब्दस्य प्रपञ्चवाचित्वं व्युत्पादयन् प्रकृतार्थे तमनुकूलयति — भुवनं भूतैः संभजनीयं ब्रह्मादिभिरिति । ब्रह्मादिस्तम्बपर्यन्तानि

भूतानि हीमं द्वैतप्रपञ्चं वनन्ति, स्वस्वकर्मफलाश्रयत्वेन संभजन्त इति । भूधातोर्निष्पन्नत्वं स्वीकृत्य व्युत्पत्त्यन्तरम् — **भवन्तीति वा अस्मिन् भूतानीति भुवनमिति** । न हि भूतानि अविद्याकृतद्वैतजगदनाश्रित्य सत्तां लभन्ते, इत्यविद्याकृत एव तेषामन्नान्नादादिभावः । विद्यया च तस्योच्छेदाद् ब्रह्मभूतस्य विदुषस्तु पारमेश्वरेण सर्वस्वतन्त्रेण स्वरूपेणैव स्थितस्य तद्दोषगन्धोऽपि नास्तीति युक्तमुक्तं विश्वं भुवनमभिभवामीति — इत्यभिप्रायः ॥

## मुक्तस्य नित्यचैतन्यस्वरूपता

**११४. सुवर्न ज्योतीः । सुवरादित्यः, नकार उपमार्थे । आदित्य इव सकृद्विभातम् अस्मदीयं ज्योतीः[१] ज्योतिः । प्रकाश इत्यर्थः ॥**

**२८७. मुक्तस्य स्वरूपम् -**

किं तत् पारमेश्वरं रूपं मुक्तस्य येन विश्वं भुवनं नित्याभिभूतमेव तिष्ठतीति? तत्राह श्रुतिः 'सुर्वन् ज्योतीः' इति । तद्व्याकरोति — **सुवरादित्यः, नकार उपमार्थे इति** । सुवरिति व्याहृतिरिहादित्यपरतया प्रयुक्ता इति सामर्थ्याद् गम्यते । नकारश्चोपरिष्टात् प्रयुक्त उपमार्थो वेदे इत्यर्थः । वाक्यार्थमाह — **आदित्य इव सकृद्विभातमस्मदीयं ज्योतीः, ज्योतिः । प्रकाश इत्यर्थः इति** । ज्योतिरिति दीर्घश्छान्दसः । यथा आदित्यो नित्यज्योतिःस्वरूप एवेति ज्योतिरिति दीर्घश्छान्दसः। यथा आदित्यो नित्यज्योतिःस्वरूप एवेति न तस्य क्वचिदपि तमःसंस्पर्शसंभवः, एवमहं नित्यचैतन्यप्रकाशब्रह्मस्वरूप एवेति न मयि क्वचित् किञ्चित् कथाञ्चिदपि, अविद्यातमःसंस्पर्शसंभव इत्यभिप्रायः । यत्तु केषाञ्चिदभ्यूहः — विश्वं भुवनमभ्यभवामिति प्रलयकाले विश्वमभिभूतवानस्मीत्यर्थः। सुवर्न ज्योतीरिति च कमनीयदेदीप्यामानशरीरो भवतीति । तज्जरद्गवादिवाक्यवदनन्वितम्, अपार्थकं च

---

१. 'ज्योतिः' इति आ ॥ न साधुः, मूलाननुरोधित्वात् ।

यत्किञ्चिदिति स्फुटत्वादुपेक्ष्यम् । प्रकृतं ह्यन्नान्नादतच्छलोकत्वरूपेण संस्थितिर्मुक्तस्य। सा च यथाश्रुतानिष्प्रपञ्चानन्दब्रह्माभिन्नस्य नोपपद्यत इत्युपपादनीया। उपपादिता च भाष्यकारैर्नित्योपसंहृतविश्वभुवनस्यापि संव्यवहारमात्रालम्बनेन सर्वात्मभावप्रकाशिका विद्यास्तुतिरियमिति । तदनुगुणमिह व्याख्यातव्यं 'सुवर्न ज्योतीः' इति ।न च कमनीयशरीरत्वादि तदनुगुणम् । नित्यचैतन्यप्रकाशे तु तमःसंस्पर्शसंभावोपपादनाय आदित्यप्रकाशोपमादानम् इत्युपपद्यते । अतो यथाभाष्यमेव सम्यग्व्याख्यानमिति ॥

**य एवं वेद । इत्युपनिषत् ॥३२॥**

**११५. इति वल्लीद्वयविहिता उपनिषद् परमात्मज्ञानम्। ताम् एतां यथोक्ताम् उपनिषदं शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा भृगुवत् तपो महदास्थाय य एवं वेद, तस्येदं फलं यथोक्तम् । ओमिति [1]॥**

इति श्रीमत्परमहंसपरिव्राजकाचार्य गोविन्दभगवत्पूज्यपादशिष्य श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्भाष्ये भृगुवल्लीभाष्यम् ॥

तैत्तिरीयभाष्यं च संपूर्णम् ॥

**२८८. ब्रह्मविदुषः परमपुरुषार्थप्राप्तिरिति वल्लीद्वयार्थोपसंहारः -**

अथ 'य एवं वेद' इत्यस्यार्थं विवृणोति — **तामेतामित्यादिना** । वल्लीद्वये यथानिरूपिताम् एताम् उपनिषदं ब्रह्मविद्यारूपं यो वेद । किं पुरुषबुद्ध्यभ्यूहमात्रेण? नेत्याह — शान्तो दान्त इत्यादि । 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति' (बृ. ४-४-२३) इति श्रुत्यन्तरात् सर्वधर्मान्

१. 'यथोक्तमोक्ष इति' वा ॥

परित्यज्य बहिरन्तःकरणानामैकाग्र्येणात्मानमेव निदिध्यास्य यः स्वसंवेद्यतामापादयेत् — इत्यर्थः । तदेतदिहाप्युक्तमिति स्मारयति — 'भृगुवत् तपो महदास्थाय' इति । तपसश्च महत्त्वं बाह्यतपोऽपेक्षया विज्ञानेऽन्तरङ्गत्वम् । भृगुवदिति वतिप्रत्ययादानात् तपोऽनुष्ठानांशे भृगोरुदाहरणं न तु तेनेव महर्षिणैव भाव्यं साधकेनेति मन्तव्यम् ; 'यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्' (बृ. १-४-१०) इति ऋष्यादीनामिव मनुष्याणामपि तुल्यवत् फलप्राप्तिश्रवणाच्छ्रुत्यन्तरे । 'तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति' (बृ. १-४-१०) इति कालसङ्कोचाभावेन इदानींतनानामपि सर्वात्मभावानुज्ञानाच्च । अतो यः कश्चिदेवं तपसा एतामुपनिषदं वेद तस्येदं फलं यथोक्तम् । कामान्नकामरूपवत्त्वेन सर्वलोकसंचरणसामर्थ्यं, अन्नान्नादश्लोककृत्स्वरूपं च सर्वात्मत्वं पञ्चकोशातीतनित्यचैतन्यप्रकाशाभिन्न-परामात्मन्येवावस्थितस्य इत्यर्थः । यद्यपि य एवं 'यदिदं संव्यवहारमात्रम् अन्नान्नादरूपं विश्वं तदहमेव नित्यनिवृत्तविश्वभुवनः शुद्धसच्चिदानन्दरूप इति' वेद, स यथोक्तन्यायेन पञ्चापि केशानुपसंक्रम्य कृतकृत्यो भवति — इति प्रथमवाक्यार्थं प्रदर्श्य 'इत्युपनिषत्' इत्यस्य परिसमाप्ता ब्रह्मविद्या — इत्यपि व्याख्यातुं शक्यते, तथापि वल्लीद्वयस्यैकस्मिन्नेव परमात्मज्ञाने तात्पर्यम्, तद् विदितवत एव च यथोक्त-परमपुरुषार्थः — इति ज्ञापनार्थं वाक्यद्वयमेवं व्यत्यस्तक्रमेण व्याख्यातमिति ध्येयम् ॥

इदानीं ब्रह्मविद्याप्रकाशकवल्लीद्वयभाष्यसमाप्तौ मङ्गलमाचरति, उपनिषत्समाप्तिं च सूचयति — ओमितीति ॥

# अथ भृगुवल्लीसारः

अस्या वल्ल्या आनन्दवल्लीशेषत्वात् तत्र प्रतिपादितैव ब्रह्मविद्या पितापुत्राख्यायिकामिषेणानूद्यते । तच्छेषेण तत्साधनं फलं च निर्दिश्यते ॥

१-२. प्रख्यातमहिमा भृगुः स्वपितरं वरुणमुपागच्छत् 'अधीहि भगवो ब्रह्म' इति मन्त्रेण । स च पिता शरीरप्राणचक्षुःश्रोत्रमनोवाग्रूपाणि ब्रह्मोपलब्धिद्वाराण्यादावुपदिश्य 'यदेव जगज्जन्मस्थितिप्रलयकारणत्वेन सर्वस्यात्मभूतम्, तद् विजिज्ञासस्व; तदेव ब्रह्म' इत्यब्रवीत् ॥

३-१६. भृगुस्तु कुत्रैतल्लक्षणं परिपूर्णं भवेदिति विजिज्ञासमानो मनइन्द्रियैकाग्र्यरूपं तपस्तप्त्वा अन्नमयं शरीरं तावद् ब्रह्मेति व्यजानात् । अथ तस्योत्पत्तिदर्शनात् लक्षणसमन्वयं तत्र साकल्येनापश्यन्, पुनः पितरमुपससार 'अधीहि भगवो ब्रह्म' इति । पित्रा तपस्यैव ब्रह्म विजिज्ञासस्व — इत्युक्तः पुनरपि तपस्तप्त्वा प्राणं ब्रह्मेति व्यजानात् । परं तत्राप्यतृप्तः पितुरुपदेशेन तप एव तप्त्वा क्रमेण मनो विज्ञानं च ब्रह्मेति विज्ञाय, पर्यन्ततः सर्वान्तरमानन्दं ब्रह्मेत्यध्यवस्यत्॥

१७. य एवं वरुणोक्तं ब्रह्मोपलब्धिद्वारं ब्रह्मलक्षणं च मनसि कृत्वा भृगुवदेव तपसा अनेनैव क्रमेणेमम् अद्वैतमानन्दं ब्रह्मेति विजानीयात्, स तस्मिन्नेव ब्रह्मणि प्रतितिष्ठति । प्रभूतान्नवान्, दीप्ताग्निरन्नादश्च भवति, प्रजापशुब्रह्मवर्चसैः कीर्त्या च महान् भवति — इति दृष्टमपि फलं तस्य भवेद्, यदि स गृहस्थः स्यात् ॥

१८ - २४. अन्नस्य ब्रह्मविज्ञाने प्रथमद्वारत्वात्, गुरुमिव भावयेत् अन्नम्, न चान्नं निन्द्यात्, अन्नब्रह्मोपासकः । शरीरप्राणयोरन्योन्यस्मिन् प्रतिष्ठितत्वात् तयोरन्योन्यम् अन्नत्वमन्नादत्वं चास्तीत्युपास्यम् । पात्रस्थमन्नं न परिहरेत् — इति च तस्योपासकस्य व्रतम् । एवम् आपः ज्येतिश्चान्योन्यमन्नान्नादभावेन वर्तन्ते । अन्योन्यस्य अन्योन्यस्मिन् प्रतिष्ठितत्वादेवेत्युपास्यम् । एवमुपासकस्य च व्रतमिदम् अन्नं बहुकुर्वीतेति । एवमेव पृथिव्याकाशौ परस्परमन्नान्नादभावेन तिष्ठत इत्युपासनीयम् । उपासकेन वसत्यर्थमागतानाम् अनिराकरणं, तदर्थं येन केन चोपायेन

बह्वन्नप्राप्तिश्च — इत्येतद् व्रतमिवानुष्ठेयम् । अन्नदानस्य च परोऽयं महिमा यदेतद् यः कश्चिद् यस्मिन् वयसि यथा च वृत्त्या ददाति, तस्मै तस्मिन् वयसि तथैव वृत्त्या अन्नमुपतिष्ठत इति । यथोपवर्णितनीत्या अन्नान्नादभावोऽयं प्राणशरीरादीनां कार्यभूतानामेवानात्मनां संबन्धो यस्मात्, तस्मान्नात्मनि परमार्थतो भोग्यभोक्तृत्वकृतः संसारधर्मोऽस्ति । उपाध्यविवेकाद् भ्रान्त्यैव तु तस्मिन्नुपचर्यत इति जिज्ञासुभिरवधेयम् ॥

२५-२६. स्वरूपेण ब्रह्म सर्वसंसारधर्मविमुक्तं यद्यपि, तथापि यत्र यत्रानात्मक्षेत्रे यद् यदधीनं फलम्, तत्तद् ब्रह्मैवेति ध्येयम् । ब्रह्मसांनिध्यानुग्रहमन्तरेण अनात्मनां तत्तत्फलप्रदानसामर्थ्याभावात् । अत एव वाचि क्षेमरूपेण ब्रह्म प्रतिष्ठितम् इत्युपासनीयम्, प्राणापानयोर्योगक्षेमरूपेणावस्थितमिति — इत्येतान्याध्यात्मिकोपासनानि । तथा तृप्तिरिति वृष्टौ बलरूपेण विद्युतीत्येवमादीन्याधिदैविकानि विधीयन्ते शास्त्रे । किं बहुना, यद् यत् सर्वगते आकाशे वैभवमुपलभ्यते, तत्सर्वं ब्रह्मैवेत्युपास्यम् ॥

२७ - २९. वस्तुतस्तु कोप्युत्कर्षोऽपकर्षो वा अस्ति ब्रह्मणि । उत्कर्षादेरविद्याप्रत्युपस्थापितोपाधिकृतत्वात् । स्वयं तु ब्रह्म सर्वत्रैकमेव परमानन्दरूपम् — इति यो वेद, स आनन्दवल्ल्युक्तान्नमयादिकोशान् क्रमेणोपसंक्रम्य तत्तत्सतत्त्वं विज्ञाय, तस्मिन्नेव ब्रह्मणि परमानन्दरूपे आत्मभावेन प्रतितिष्ठति । सर्वथा कृतकृतश्च सः । स एव च सर्वस्यात्मेति कामान्नी कामरूपी सर्वलोकसञ्चारी संव्यवहारमात्रेण, स्वरूपे एव स्थितोऽपि । यद्यद्दरीदृश्यतेऽन्नान्नादभावेन तत्संघातकरत्वेन च, तत्सर्वं चैदत् ब्रह्मवित्स्वरूपमेव परमार्थतः । स एव सर्वप्रथमजो ब्रह्मा । देवानां पिता विराट्पुरुषश्च इति किं वक्तव्यं तस्य वैभवम् !

अन्नभूतं ब्रह्म यो दद्यात् काले देशे च पात्रभूतेभ्योऽतिथ्यादिभ्यः, तेन सर्वपुरुषार्थरक्षणं कृतं भवति । यः पुनरदत्वा केवलमात्मार्थं पाचयत्यन्नम्, तमन्नभूतं ब्रह्म भक्षयदिव प्रत्यवायभागिनं करोति व्यवहारविषये । तदेवं संव्यवहारे अन्नान्नादादिसर्वात्मभावमापन्नोऽपि विद्वान् परमार्थदृष्ट्या नित्यनिरस्तसकलभेदप्रपञ्चः कूटस्थचिदानन्दरूपेणैवावतिष्ठत इत्यहोऽस्य महिमा !

३०. एवं वल्लीद्वयनिरूपिताम् एतां ब्रह्मविद्यां यः कश्चिद् भृगुवदेव महत्तप अनुष्ठायस्व संवेद्यतामापादयति, तस्य यथोक्ता ब्रह्मात्मनाऽवस्थितिः सर्वात्मता च सिध्येदिति सर्वं शिवम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य गोविन्दभगवत्पूज्यपादशिष्य
श्रीमच्छङ्करभगच्चरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन
श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां
तैत्तिरीयभाष्यार्थविमर्शिन्यां भृगुवल्लीभाष्यार्थविमर्शनम् ॥

संपूर्णश्चायं ग्रन्थः ॥

# अनुवाकवर्णानुक्रमणिका

आनन्दाश्रममुद्रितोपनिषत्पुस्तकस्वीकृतानुक्रमानुसारेणैवात्रानुवाकसंख्या दत्ता । अध्येतृणमप्यनुवाकगणनाक्रमे विप्रतिपत्तिदर्शनात्, तैत्तिरीयोपनिषद्वाक्यानां परामर्शार्थं यस्य कस्यचन संख्यानुक्रमस्यावश्याश्रयणीयत्वात् एतस्मिन् पुस्तके अयं सङ्ख्याक्रमोऽनुस्रियते न तु स एव समीचीनतम इति कृत्वेति बोध्यम् । प्रत्यनुवाकम् आद्यन्तावधी अत्र सूच्यते । शीक्षावल्लीपृष्टसंख्यास्तु तत्पुस्तकस्था एवेत्यवधेयम्॥


| अनुवाकः | वल्ली | अनु. | पृष्टम् |
|---|---|---|---|
| अन्नं न निन्द्यात् .... महान् कीर्त्या ॥ | ३ | ७ | 337 |
| अन्नं परिचक्षीत .... महान् कीर्त्या ॥ | ३ | ८ | 341 |
| अन्नंबहु कुर्वीत .... महान् कीर्त्या ॥ | ३ | ९ | 343 |
| अन्नं ब्रह्मेति व्यजानात् .... स तपस्तप्त्वा ॥ | ३ | २ | 319 |
| अन्नाद्वै प्रजाः .... तदप्येष श्लोको भवति ॥ | २ | २ | 77 |
| असद्वा इदमग्र आसीत् .... तदप्येष श्लोको भवति ॥ | २ | ७ | 192 |
| असन्नेव स भवति .... तदप्येष श्लोको भवति ॥ | २ | ६ | 129 |
| अहं वृक्षस्य रेरिवा .... वेदानुवचनम् ॥ | १ | १० | 44* |
| आनन्दो ब्रह्मेति व्यजानात् .... महान् कीर्त्या ॥ | ३ | ६ | 324 |
| ऋतं च स्वाध्यायप्रवचने च .... तद्धि तपः ॥ | १ | ९ | 41* |
| ओमिति ब्रह्म .... ब्रह्मैवोपाप्नोति ॥ | १ | ८ | 39* |
| न कञ्चन वसतौ प्रत्याचक्षीत .... इत्युपनिषत् ॥ | ३ | १० | 344 |
| पृथिव्यन्तरिक्षं .... स्पृणोतीति ॥ | १ | ७ | 36* |
| प्राणं देवा अनुप्राणन्ति .... तदप्येष श्लोको भवति॥ | २ | ३ | 90 |
| प्राणो ब्रह्मेति व्यजानात् .... स तपस्तप्त्वा ॥ | ३ | ३ | 332 |
| ब्रह्मविदाप्नोति परम् .... तदप्येष श्लोको भवति ॥ | २ | १ | 7 |
| भीषास्माद्वातः पवते .... तदप्येष श्लोको भवति ॥ | २ | ८ | 217 |
| भूर्भुवः सुवरिति .... बलिमावहन्ति ॥ | १ | ५ | 26* |
| भृगुर्वै वारुणिः .... स तपस्तप्त्वा ॥ | ३ | १ | 317 |

| अनुवाकः | वल्ली | अनु. | पृष्टम् |
|---|---|---|---|
| मनो ब्रह्मेति व्यजानात् .... स तपस्तप्त्वा ॥ | ३ | ४ | 322 |
| यतो वाचो निवर्तन्ते .... तदप्येश श्लोको भवति ॥ | २ | ४ | 106 |
| यतो वाचो निवर्तन्ते .... इत्युपनिषत् ॥ | २ | ९ | 287 |
| यश्छन्दसामृषभो .... प्रमापद्यस्व ॥ | १ | ४ | 19* |
| विज्ञानं ब्रह्मेति व्यजानात् .... स तपस्तप्त्वा ॥ | ३ | ५ | 323 |
| विज्ञानं यज्ञं तनुते .... समश्नुत इति ॥ | २ | १२ | 110 |
| वेदमनूच्याचार्योऽन्तेवासिनम् .... एतदुपास्यम् ॥ | १ | ११ | 46* |
| शं नो मित्रः .... ओं शान्तिः शान्तिः शान्तिः ॥ | १ | १ | 11* |
| शं नो मित्रः .... ओं शान्तिः शान्तिः शान्तिः ॥ | १ | १२ | 2 |
| शीक्षां व्याख्यास्यामः .... शीक्षाध्यायः ॥ | १ | २ | 14* |
| स य एषोऽन्तर्हृदय आकाशः .... प्राचीनयोग्योपास्व॥ | १ | ६ | 31* |
| सह नाववतु .... ओं शान्तिः शान्तिः शान्तिः ॥ | २ | १ | 5 |
| सह नौ यशः .... सुवर्ग्येण लोकेन ॥ | १ | ३ | 15* |


अत्रावधेयमेतत् - 'शं नो मित्रः' इति शीक्षावल्लीद्वादशानुवाकत्वेन सायणाचार्यैः परिगणितः कुत्र भगवत्पादैर्निवेश्यत इति संशयस्थानमेतत् । 'सह नाववतु' इत्येतत् प्रथमानुवाकत्वेन, ब्रह्मविदाप्नोति च द्वितीयानुवाकत्वेन परिगणिता आनन्दाश्रममुद्रितसायणभाष्ये । विशेषस्तु भाष्यार्थविमर्शिन्यां शान्तिपाठचर्चातोऽवगन्तव्यः । पश्यन्तु भूमिकामपि ॥

* These are from Shikshavalli

# उपनिषत्खण्डसूची

भाष्योपनिषत्संबन्धस्फुटनार्थं व्याख्याने प्रकल्पितानामुपनिषत्खण्डानाम् आद्यन्तावधी निर्दिश्येतेऽस्यां सूच्याम् । पूर्णस्तु खण्डस्तत्तत्पत्रपृष्टे द्रष्टव्यः ॥


| खण्डः | वल्लीखण्डसंख्ये | पृष्टसंख्या |
|---|---|---|
| अथातोऽनुप्रश्नाः । .... समश्नुता ३ उ ॥ | २-१७ | 139 |
| अन्नं न निन्द्यात् । .... तद्व्रतम् ॥ | ३-१८ | 337 |
| अन्नं न परिचक्षीत । .... तद्व्रतम् ॥ | ३-२० | 341 |
| अन्नं बहु कुर्वीत । .... तद्व्रतम् ॥ | ३-२२ | 343 |
| अन्नवान् अन्नादो भवति .... महान् कीर्त्या ॥ | ३-१८ | 333 |
| आपो वा अन्नम् । .... महान् कीर्त्या ॥ | ३-२९ | 341 |
| इत्युपनिषत् ॥ | २-३९ | 299 |
| एतँ ह वाव न तपति । .... य एवं वेद ॥ | २-३० | 297 |
| एतद् वै मुखतोऽन्नं राद्धम् । .... य एवं वेद ॥ | ३-२६ | 346 |
| को ह्येवान्यात् कः प्राण्यात् । .... एष ह्येवानन्दयाति ॥ | २-२३ | 199 |
| क्षेम इति वाचि । .... सर्वमित्याकाशे ॥ | ३-२७ | 348 |
| तत् प्रतिष्ठेत्युपासीत । .... भ्रातृव्याः ॥ | ३-२८ | 351 |
| तत् सृष्ट्वा । तदेवानुप्राविशत् ॥ | २-१९ | 166 |
| तदनुप्रविश्य । .... सत्यमित्याचक्षते ॥ | २-२० | 182 |
| तदप्येष श्लोको भवति । अन्नाद् वै .... तदुच्यत इति ॥ | २-४ | 77 |
| तदप्येष श्लोको भवति । असद्वा इदमग्र .... तदुच्यत इति ॥ | २-२१ | 191 |
| तदप्येष श्लोको भवति । असन्नेव स भवति । .... विदुरिति ॥ | २-१५ | 129 |

| खण्डः | वल्लीखण्डसंख्ये | पृष्टसंख्या |
|---|---|---|
| तदप्येष श्लोको भवति । | | |
| प्राणं देवा .... सर्वायुषमुच्यत इति ॥ | २-६ | 90 |
| तदप्येष श्लोको भवति । | | |
| भीषास्माद् वातः .... पञ्चम इति ॥ | २-२५ | 216 |
| तदप्येष श्लोको भवति । | | |
| यतो वाचो निवर्तन्ते .... कदाचनेति ॥ | २-९ | 106 |
| तदप्येष श्लोको भवति । | | |
| यतो वाचो निवर्तन्ते .... कुतश्चनेति ॥ | २-२९ | 287 |
| तदप्येष श्लोको भवति । | | |
| विज्ञानं यज्ञं .... समश्नुत इति ॥ | २-१२ | 110 |
| तद् विज्ञाय । पुनरेव वरुणं .... ब्रह्मेति ॥ | ३-५ | 320 |
| तद् विज्ञाय । पुनरेव वरुणं .... ब्रह्मेति ॥ | ३-८ | 322 |
| तद् विज्ञाय । पुनरेव वरुणं .... ब्रह्मेति ॥ | ३-११ | 323 |
| तद् विज्ञाय । पुनरेव वरुणं .... ब्रह्मेति ॥ | ३-१४ | 323 |
| तस्मा एतत् प्रोवाच .... तद् ब्रह्मेति ॥ | ३-२ | 308 |
| तस्माद् यया कया च विधया | | |
| .... अन्नमित्याचक्षते ॥ | ३-२५ | 345 |
| तस्माद् वा एतस्मात् प्राणमयात् । | | |
| .... प्रतिष्ठा ॥ | २-८ | 99 |
| तस्माद् वा एतस्मादन्नरसमयात् | | |
| .... प्रतिष्ठा | २-५ | 84 |
| तस्माद् वा एतस्मादात्मन आकाशः संभूतः । | | |
| .... पृथिवी ॥ | २-२ | 55 |
| तस्माद् वा एतस्माद्विज्ञानमयात् । | | |
| .... प्रतिष्ठा ॥ | २-१४ | 115 |

| खण्डः | वल्लीखण्डसंख्ये | पृष्ठसंख्या |
|---|---|---|
| तस्माद् वा एतस्मान्मनोमयात् । .... प्रतिष्ठा ॥ | २-११ | 107 |
| तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥ | २-७ | 95 |
| तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥ | २-१० | 107 |
| तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥ | २-१६ | 137 |
| तस्यैष एव शारीर आत्मा । यः पूर्वस्य ॥ | २-१३ | 115 |
| न कञ्चन वसतौ प्रत्याचक्षीत । तद् व्रतम् ॥ | ३-२४ | 344 |
| पृथिवी वा अन्नम् । .... महान् कीर्त्या ॥ | ३-२३ | 343 |
| पृथिव्या ओषधयः । .... प्रतिष्ठा ॥ | २-३ | 70 |
| प्राणो वा अन्नम् । .... महान् कीर्त्या ॥ | ३-१९ | 338 |
| ब्रह्मविदाप्नोति .... विपश्चितेति ॥ | २-१ | 7 |
| भृगुर्वै वारुणिः । .... भगवो ब्रह्मेति ॥ | ३-१ | 307 |
| य एवं वेद । इत्युपनिषत् ॥ | ३-३२ | 382 |
| यदा ह्येवैष .... भयं विदुषोऽमन्वानस्य ॥ | २-२४ | 204 |
| यद् वै तत् सुकृतम् । .... आनन्दी भवति ॥ | २-२२ | 198 |
| स तपस्तप्त्वा । अन्नं ब्रह्मेति .... प्रविशन्तीति ॥ | ३-४ | 318 |
| स तपस्तप्त्वा । आनन्दो ब्रह्मेति .... प्रविशन्तीति ॥ | ३-१६ | 323 |
| स तपस्तप्त्वा । प्राणो ब्रह्मेति .... संविशन्तीति ॥ | ३-७ | 322 |
| स तपस्तप्त्वा । मनो ब्रह्मेति .... संविशन्तीति॥ | ३-१० | 322 |
| स तपस्तप्त्वा । विज्ञानं ब्रह्मेति .... संविशन्तीति ॥ | ३-१३ | 323 |
| स तपोऽतप्यत | ३-३ | 315 |

| खण्डः | वल्लीखण्डसंख्ये | पृष्टसंख्या |
|---|---|---|
| स तपोऽतप्यत | ३-६ | 321 |
| स तपोऽतप्यत | ३-९ | 322 |
| स तपोऽतप्यत | ३-१२ | 323 |
| स तपोऽतप्यत | ३-१५ | 323 |
| स य एवं वित् । .... एतमानन्दमयमात्मानमुपसंक्रामति ॥ | २-२८ | 246 |
| स य एवं वित् । .... साम गायन्नास्ते ॥ | ३-३० | 367 |
| स यश्चायं पुरुषे । .... स एकः ॥ | २-२७ | 233 |
| स यश्चायं पुरुषे । .... स एकः ॥ | ३-२९ | 364 |
| सेषानन्दस्य मीमांसा भवति । .... ब्रह्मण आनन्दः ॥ | २-२६ | 218 |
| सैषा भार्गवी वारुणी विद्या । .... प्रतिष्ठिता ॥ | ३-१७ | 333 |
| सोऽकामयत । .... किञ्च ॥ | २-१८ | 142 |
| हा३वु हा३वा हा३वा । .... सुवर्न ज्योतीः ॥ | ३-३१ | 372 |

# अथ परिशिष्टम्

## १. भाष्यस्थमुख्यशब्दसूची

### अत्र दत्ताः सङ्ख्याः भाष्यभागपरामर्शिन्यः

**अक्षरविषशस्मृत्यावृत्तिः** (न तु मन्त्रावृत्तिः), ३५
**अचित्, अचेतनम्** (मृत्पाषाणदिवत् चैतन्यरहितम्) ११, ५२, ६१
**अज्ञानम्** (अविद्या), ३
**अत्ता** (शरीराभ्यन्तरः प्राणः), ९३
**अदृष्टार्थम्** (पारलौकिकभोगार्थम्), ७२
**अधिकारविरोधः** (प्रकरणविरोधः), ४२
**अनन्तम्** (न कुतश्चित् प्रविभक्तम्) ११, १२, २०
**अनृतम्** (व्यभिचरत्स्वरूपम्), १०, १३, २०;
(व्यावहारिकसत्यात् विपरीतम्, प्रतिभासमात्रशरीरम्) ६१
**अन्तःकरणम्** (संकल्पादिवृत्तिमत्करणम्), ३४
**अन्तःकरणगुहा** (बुद्धिलक्षणा गुहा), ५९
**अन्नमयः अन्नरसमयः** (अन्नरसविकारभूतं शरीरम्, आत्मत्वेन लौकिकैर्विभावितानां कोशनामन्यतमम्), २, २२, २५, २७, ४०, ७६,७८
**अन्नब्रह्मवित्** (समष्ट्यन्नं ब्रह्मत्वेनोपासिता), २६
**अन्नान्नादौ** (भोग्यं भोक्तृ च, यद् यस्मिन् स्थितं तदन्नम्, यस्मिन् अधीनं तत् सोऽन्नादः), १००, १०१, १०२, १०८, ११०, १११
**अपमृत्युः** (प्राप्तादायुषः प्रागेवाक्रममाणो मृत्युः), ३२
**अभिधानानि** (वाचकशब्दाः), ८७
**अमृतत्वम्** (मोक्षः) १०६, १११
**अयं लोकः** (दृष्टादृष्टेष्टविषयजातम्) ७८
**अवाच्यः** (अपदार्थः), १६
**अवाक्यार्थः** (साक्षाद्वाक्यविषयः, आत्मा), १६
**अविद्या, अविद्याविभ्रमः** (मिथ्याज्ञानम्) ७, ६५, ६८, ७१, ८३, ८५

**अविद्याकल्पित, अविद्याकार्य, अविद्याकृत** (द्वैतम्), ४४, ४५, ६७
(आत्मानः), ८०, ११०; (संसारः) ८३; (कोशाः), २५, ३१
(देहादितादात्म्यम्) ८०, (द्वितीयम्), ८९; (जाग्रत्स्वप्नौ), ८९;
(अन्नान्नादत्वम्), ११३

**अविद्याकामकर्माणि** (संसारहेतुभूतानि), ७१

**अविद्यानिवृत्तिः** (संसारकारणाज्ञाननाशः), ४, ८०

**अविद्यावस्था** (बन्धावस्था), ६८

**अविद्यावान्, अविद्वान्** (आत्मज्ञानहीनः), ४९, ६६, ६८, ७७, ८८

**अव्याकृतम्** (गुहाशब्दवाच्यम., भूतसूक्ष्मम्), १७, ६३

**अव्याकृतनामरूपे** (प्रलये अव्यक्तरूपेण स्थिते), ६१

**असत्** (अविद्यमानम्), ४६, ५१; (अव्याकृतावस्थं ब्रह्म), ६३

**असद्** (अपुरुषार्थसंबन्धी) ४६

**असौ लोकः** (परमात्मा), ४९

**आकाशः** (पञ्चभूतानामाद्यः), १७, २०, २१, ३१, ४९, ६०; (त्रिविधः), १७

**आकाशादिभूतारब्धाः** (पञ्चकोशा), ३१

**आत्मा** (स्वरूपम्), १४, १५, २१, ३१, ४४; (अङ्गानां मध्यम्), २४, २९
(आत्मत्वेन कल्पितः कोशः), २८, ३४, ३७, ३९, ४०, ४३, ४८

**आत्मचैतन्यम्** (आत्मस्वरूपभूता ज्ञप्तिः), ३५

**आत्मभावः** (स्वात्मत्वाभिनिवेशः), ४०, ६७

**आत्मविद्या** (ब्रह्मात्मनः सम्यग्ज्ञानम्) २

**आत्मविवेकविज्ञानम्** (आत्मत्वेनाभिमतेभ्यः कोशेभ्यो विविच्य
परमार्थात्मविज्ञानम्), ८५

**आत्मैकत्वम्** (नानात्वप्रत्याख्यानेन सर्वत्र स्थितस्यात्मन एकत्वम्),११०

**आत्यन्तिकः संसाराभावः** (पुनरावृत्तिरहितो मोक्षः), ४

**आनन्दः** (सुखसामान्यम्) ४४; (ब्रह्मणः स्वरूपभूतं सुखम्),
४४, ६५, ६९, ७०, ७५

**आनन्दमयः** (विद्याकर्मफलभूतः कोशः), ४३, ४४, ४८, ५९, ७८

**आप्यम्** (साधनेन लभ्यम्), ७
**आपेक्षिकं सत्यम्** (मिथ्यावस्त्वपेक्षया सत्यत्वेन व्यवह्रियमाणम्), ६१
**इन्द्रः** (देवानाम् अधिपतिः), ४०, ६९, ७४
**ईश्वरः** (महासामर्थ्यवान्), ६९, (जीवानां भयहेतुः, परमात्मा), ६८, ८२
**उपनिषत्** (ब्रह्मविद्या), ११५
**उपसन्नः** (शिष्यत्वेनोपगतः), ९३
**उपाधिः** (वस्तुस्वरूपेऽप्रविष्टं सत् तज्ज्ञापकम्), १५, १८
**उपासनम्** (ध्यानम्), ३, ४०, १०५, १०७
**एकार्थवृत्तित्वम्** (एकप्रयोजननिर्वर्तकत्वम्), ६५
**कर्मकर्तृत्वम्** (एकस्यैव युगपत् क्रियाकर्तृत्वम्, तत्कर्मत्वं च), ७९, ८४
**कामाः** (भोगाः), १८, ४०, ११०; (इच्छादिदोषाः), ५२
**कारणं ब्रह्म** (जगत्कारणं निर्विशेषं ब्रह्म), ५७, ६०
**कार्यकरणानि** (देहेन्द्रियाणि), ६५, ७२
**कार्यात्मा** (कार्योपाधिरात्मा), ४२
**गुहा** (बुद्धिः, विज्ञानम्), १७, ५९, ६०, ६२ (अव्याकृताकाशम्), १७
**घटाकाशाकाशैकत्वम्** (भिन्नयोरिव दृश्यमानयोरेकत्वे दृष्टान्तः), ७६
**जलसूर्यकः** (सूर्यप्रतिबिम्बः, जीवरूपस्य दृष्टान्तः), १८, ५७
**जीवः** (प्राणधारणकर्ता, संसारी), १४, ५७, १०८
**ज्ञानम्** (चैतन्यम्), ११; (अन्तःकरणवृत्तिः), १२; (अवबोधक्रिया), ११
    १५; (ज्ञानफलम्), ११; (उपासनम्), ४३
**ज्ञानशब्दवाच्यम्** (ज्ञानशब्देन साक्षादुच्यमाना बुद्धिवृत्तिः), १६
**ज्ञानाभासः** (ज्ञानवदाभासमाना बुद्धिवृत्तिः), १६
**ज्येष्ठम्** (भूतेभ्यः पूर्वमुत्पन्नम् अन्नम्), २५; (प्रथमजं, हिरण्यगर्भसलक्षणंब्रह्म),४०
**तपः** (ज्ञानम्), ५४, ५५; (कृच्छ्रादिलक्षणम्), ५४, (बाह्यान्तःकरणसमाधानम्),
    ९४, ९५, ९६,९७, ११०, ११५
**तर्कशास्त्राणि** (कापिलादीनि), १०८
**तैमिरिकः** (नेत्रदोषवान्, अनेकचन्द्रदर्शी), ६८, ८३

**त्रिविधम् आनन्त्यम्** (देशतः; कालतः; वस्तुतश्च), २०
**दमः** (बाह्येन्द्रियनिग्रहः), ९८
**दृतिः** (भस्त्रिका वायुपूर्णा, कोशानां पूवपूर्वस्योत्तरोत्तरपूर्णत्वे दृष्टान्तभूता), २८
**दृष्टादृष्टेष्टविषयसमुदायः** (ऐहिकपारत्रिकभोगसमुदायः), ७८
**दृष्टार्थम्** (ऐहिकप्रयोजनवत्), ७२
**द्वितीयचन्द्रः** (मिथ्याप्रतीतेर्दृष्टान्तः), ६८, ८३
**नामरूपे** (ब्रह्मणा व्याक्रियमाणे), ५३, ६१, ६३
**निरञ्जनः** (निर्लेपः); १११
**निरेषणाः** (लोकत्रयेऽपि विरक्ताः), ६४
**निर्विकल्पः** (जातिद्रव्यगुणादिविकल्परहितः), ५९, ८६, ८७
**निर्विशेषम्** (जात्यादिविशेषरहितम्), ५९
**पञ्चकोशाः** (आनन्दमयादय आनन्दमयान्ताः), ४४
**पञ्चकोशातिगः** (पञ्चकोशविलक्षणः, परमात्मा), ३१
**पर आत्मा, परमात्मा** (परमार्थतोऽपि आत्मा सर्वेषाम्, ब्रह्म), ७६, ७९
**परं श्रेयः** (मोक्षः), ८९
**परम्** (निरतिशयं फलम्, ब्रह्मैव), ६
**परमं व्योम** (अव्याकृतम्), १७; (हार्द व्योम), १७
**परमार्थब्रह्म, परं ब्रह्म** (अन्नब्रह्मादिवन्न कल्पितम्), ४४
**परार्थः** (इतराधीनः), १०
**पारिशेष्यम्** (विकल्पान्तराणामसंभवे यदवशिष्यते तत्स्वीकाररूपो न्यायः), ८४
**पुरुषः** (शिरःपाण्याद्याकृतिमान्), २२
पुरुषविधः (शिरआदिभिः पुरुषाकारः), २८, २९
**पुरुषार्थः** (भोगमोक्षौ), ४६
**प्रकृतसंख्यापूरणः** (दशमः), ७
**प्रजाः** (प्राणिनः), २५
**प्रजापतिः** (विराट्पुरुषः), ७४
**त्यगात्मा** (अन्तरतम आत्मा, स्वरूपं सर्वस्य), ८, २४, २७

**प्रत्ययावभासः** (प्रत्ययस्थः चैतन्याभासः), ६२
**प्रथमजः** (हिरण्यर्भोपाधिभूता बुद्धिः, हिरण्यगर्भः), ४०
**प्रथमजम्** (भूतानां कारणम् अन्नम्), २५
**प्रवर्तकदोषाः** (कामादयः), ५२
**प्राणः** (क्रियाप्रधानो वाय्वात्मा), ३०; (प्राणवृत्तिविशेषः), २९
**प्राणमयः** (वायुविकारः कोशः), २८, २९, ३१, ५९, ७८
**बाह्यसंख्येयाः** (बहिष्ठा नवपुरुषाः), ७
**बुद्धिः** (निश्चयात्मकम् अन्तःकरणम्), १६, ३८
**ब्रह्म** (परमं ज्ञेयम्), ६, १८, २३, ४४, ४६, ४७, ९३, ९५, ९६, १०५, १०६, १०७
**ब्रह्मणः परिमरः** (देवतापरिमरणस्थानम्, वायुः), १०७
**ब्रह्मवर्चसम्** (शमादिनिमित्तं तेजः), ९८
**ब्रह्मवित्** (ब्रह्मविज्ञानवान्), ६, ४९, ९९
**ब्रह्मविद्या** (ब्रह्मवस्तुविज्ञानम्, उपनिषच्छब्दवाच्यम्), ४, ८९, ९०, ११३
**ब्रह्मा** (हिरण्यगर्भः), ७४
**ब्रह्मानन्दः** (ब्रह्मस्वरूपभूतं सुखम्), ७१
**ब्रह्मोपलब्धिद्वाराणि** (शरीरप्राणादीनि), ९३, ९४
**ब्रह्मोपलब्ध्युपायः** (अन्नम्), ९९
**भूतमात्राः** (पञ्चभूतांशाः), ७
**भूतानि** (प्राणिनः), २५, ९३, ९५
**महत्तत्त्वम्** (हिरण्यगर्भोपाधिरूपा बुद्धिः), ३९
**मनः** (प्रत्ययः, विज्ञानम्, अभिधानसहचरम्), ८७
**मनोमयः** (संकल्पविकल्पात्मा मनोविकारः, वेदात्मा), ३४, ३६, ३८, ४१, ५९
**महद् ब्रह्म** (हिरण्यगर्भः), ४०
**मानसो जपः** (ऋग्लक्षणमन्त्रावृत्तिः), ३५
**मूर्तामूर्ते** (मूर्तं पृथिव्यादिभूतत्रयम्, अमूर्तं वाय्वाकाशौ), ६१, १११
**मृगतृष्णाम्भः, मृगतृष्णिका** (असत्यदार्थोदाहरणम्), १३, ६१
**मूषानिषिक्तद्रुतताम्रप्रतिमावत्** (यथा प्रतिमा मूषाकारमन्वाकारं धत्ते तद्वत्), २४, २८

**यजुः** (मन्त्रविशेषः), ३५ (मनोवृत्तिविशेषः), ३५ (वृत्तिविशेषोपहितं चैतन्यम्), ३५
**योगः** (समाधानम्), ३९
**रसादिभावः** (अन्नस्य रसादिरेतोऽन्तररूपेण परिणामः), २५
**राहोश्चन्द्रार्कमसंबन्धः** (विशेषसंबन्धस्य अरूपोपलब्धिहेतुत्वे दृष्टान्तः), ५९
**लक्षणम्** (सर्वतो व्यावर्तको धर्मः), ९
**लौकिकं ज्ञानम्** (अन्तःकरणवृत्तिरूपम्) १२
**लौकिकानन्दः** (विषयसुखम्), ७१
**वन्ध्यासुतः** (असत्पदार्थस्योदाहरणम्), १३
**वायुः** (आधिदैविकः), १०७, (आध्यात्मिकप्राणप्रकृतिभूतः), २९
**विकल्पः** (एवं नैवम् इत्यादिरूपं विकल्पनम्), ८६
**विकारः** (कार्यम्), ६१
**विज्ञानम्** (अनुभवपर्यन्तं ज्ञानम्), ४, १७, ५८, ५९, ७६, ८०, ८४, ११०(अन्तःकरणवृत्तिः, आत्मचैतन्यव्याप्तस्तदाभासश्च), १५, (ब्रह्मस्वरूपभूतं चैतन्यम्) १५, (उपासना) ७१
**विज्ञानमयः** (निश्चयविज्ञानैर्निर्वर्तितः), ३८, ३९९, ४०, ४१, ५९, ७८
**विद्या** (ब्रह्मज्ञानम्) ७, २३, ८०, ८३, ९१, ९८ (निश्चयरूपोऽन्तःकरणधर्मः), ३८, (उपासनम्), १, ३२, ४३
**विद्यावान्, विद्वान्** (ज्ञानी), ४९, ६६, ६८, ७७, ८७, ८८
**विधूतसर्वोपाधिविशेषात्मदर्शनम्** (निर्विशेषात्मज्ञानम्), ३
**विशेषणम्** (सजाजीयेभ्यो व्यावर्तको धर्मः), ९, १०
**विशेषवत्** (जात्यादिविकल्पवत्), ६०,
**वृत्तिः** (भाष्यम्) १९, ५९, (प्राणादिः), २९, (मनोबुद्ध्यादिः), ३५
**शब्दानुगमः** (प्रतिपादकशब्दानुवृत्तिः), १६
**श्रवणग्रहणधारणाभ्यासः** (श्रवणमनननिदिध्यासनानि), ५०
**शशश्रृङ्गम्, शशविषाणम्** (असत्पदार्थस्य दृष्टान्तः), १३
**शाखाचन्द्रनिदर्शनम्** (शाखादि निमित्तीकृत्य चन्द्रावगमनम्), २४
**शारीर आत्मा** (शरीरत्वेन कल्पिते भावे आत्मबुद्धिः, कोशः), ३३, ३७, ४१, ४८

**श्रुत्युपपत्ती** (अनुभवपर्यन्तं शास्त्रं युक्तिश्च), १०८
**संव्यवहारः** (प्रतीतिः शब्दप्रयोगश्च), ५३, ११३
**संहतानि** (परार्थत्वेन संभूय कार्यकारिणि), ६५
**सत्तासामान्यम्** (द्रव्यगुणकर्मस्वनुगता जातिः), १६
**सत्यम्** (अव्यभिचरत्स्वरूपम्), १०
**संनिपत्योपकारकम्** (साक्षादुपकारम्), ३५
**सन्मात्रम्** (सदेव, जात्यन्तरवस्तुसंभेदरहितम्), ११
**सन्मार्गः** (शिष्टाचारः), ४७
**समष्टिव्यष्टिरूपः** (समष्टिरूपेण कार्यब्रह्मलोके, व्यष्टिरूपेण च सर्वेषु भूतेषु स्थितः, हिरण्यगर्भः), ७४
**सर्वगतम्** (सर्वत्र व्याप्तम्), ८, ३१
**सर्वज्ञम्** (सर्वप्रकाशकज्ञानरूपम्), १५, १८
**सर्वप्रवृत्तिबीजम्** (सांनिध्यमात्रेण सर्वव्यापारहेतुभूतम्), ४६
**सर्वविकल्पास्पदम्** (द्वैतकल्पनाधारम्), ४६, ५९
**सर्वविशेषप्रत्यस्तमितम्** (जात्यादिविशेषरहितम्), १६, ४६
**सर्वात्मकम्** (सर्वस्य स्वरूपम्, सर्वेणानन्यं वा), ४, ७, ३१
**सर्वात्मत्वम्, सर्वात्मभावः** (सर्वभूतात्मत्वम्), ८, ११३
**सर्वानन्यम्** (सर्वस्वरूपम्), ११०
**सर्वान्तरः, सर्वान्तरतमः** (सर्वप्रत्यगात्मभूतः), ६७
**सविकल्पवस्तूनि** (जात्यादिमत्वात् शब्दप्रवृत्त्यर्हाणि), ८७
**साधुमार्गः** (शिष्टाचारः), ४७
**साम** (गीतिरूपा ऋक्, समं ब्रह्म), ११०
**स्वरूपप्रतिष्ठः** (स्वे रूपे संस्थितः), ६७
**स्वाभाविकम्** (स्वरूपभूतम्), ३१, ७०, ७१, ७६, ८७, ११०
**हिरण्यगर्भः** (निरतिशयधर्मादिमान् ब्रह्म), ७४
**हृदयाकायः** (हृदयावच्छिन्नोऽवकाशः, ब्रह्म), १७

## २. विमर्शिनीगतमुख्यविषयसूची

संख्याः पत्रापदर्श्वसूचकाः द्र. - द्रष्टव्यम् ।


अक्षरम् (परमात्मा) . 104

अक्षरविषयस्मृतिसंतानं न मन्त्रावृत्तिः, 104

अग्रहणम् (सुषुप्तिसमाध्योः), 269-272

अज्ञानम् (आत्मानात्मनोरन्योन्याध्यासः । द्र. अविद्या), 10

अदृश्यत्वादिधर्मकस्य न शून्यत्वम् , 211-212

अदृश्यादिशब्दोपलक्षितो ब्रह्मानन्दः, 293

अद्वितीयस्य जगत्कारणत्वम् , 64

अद्वैतत्वम् (ब्रह्मणः), 53

अद्वैतावस्था (सुषुप्तिसमाधिरूपा), 268-269

अधीहीति मन्त्रः, 307

अध्यासः, तदुपमर्दश्च, 245-246

अध्यारोपापवादः, 292

अनन्तत्वम्, 57

अनृतम् (मिथ्याभूतं कार्यम्) 59, (मृगतृष्णिकोदकादि), 190

अन्नमयस्य विराडभेद, 80

अन्नमयादित्वम् अविद्याकृतम्, 73

अन्नमयादीनां स्वोत्तरसर्वकोशैः पूर्णत्वम् , 89

अन्नश्लोकस्यान्नमयपरत्वं कथम् ?, 79-80

अन्नादीनां समष्ट्यन्नादिरूपत्वम्, 319-320

अन्नान्नादिभावोऽविद्याकृतः, 380

अन्नान्नादोपासनाविधितात्पर्यम्, 340

अपदार्थत्वमवाक्यार्थत्वं च (ब्रह्मणः), 45, 46

अपरं ब्रह्म, 10, (द्र. सोपाधिकं ब्रह्म)

**अविद्या** (अध्यासः), 10, 18, 128, 134, 152, 153

**अविद्याकल्पित, अविद्याकृत, अविद्याप्रत्युपस्थापित** (अध्यस्तः) (नामरूपे), 11, 76, 150, 160, 161, 185, 196, 208, (द्वैतम्), 129, 130, 131, (कोशाः) 86, 87, 131, 244, (उपाधयः) 162, (कार्यकरणसंघातः) 43, 255, (भेदः) 216, (अन्नमयादितादात्म्यम्) 263-264, (ब्रह्मणो रूपभेदः) 162, 164, (भूतानि) 311, (अन्नान्नादभावः)381,

**अविद्यादशायां ब्रह्मैवात्मा सर्वस्य**, 93

**अविद्यानिवृत्तिः**, 12-13, 17, 19

**अविद्याध्यारेपितनिराकरणमेव ब्रह्मज्ञानम्** , 211

**अविद्याश्रयः**, 163, 288

**अविद्यामात्रव्यवहिता प्राप्तिः**, 251

**अविद्यावस्था** (व्यवहारावस्था), 211

**अव्याकृतम्** (जगतो नामरूपबीजम्), 20, 47, 48, 185, 196

**अस्तित्वावगमनाय शब्दप्रयोगो ब्रह्मणि**, 281

**अस्माँल्लोकात् प्रेत्य-इत्यस्यार्थः**, 250-251

**आकाशादिकारणत्वं ब्रह्मणः**, 64

**आकाश आनन्दो यदि न स्यात्-इत्यस्यार्थः**, 201, 335

**आत्मत्वोक्तिः** (कोशेषु), 86, 89

**आत्मभाविता बुद्धिः** (अनात्मसु), 76

**आत्मा** (सर्वस्यापि, ब्रह्म), 62-64

आत्मन्येव दृश्यत्वादिनिषेधः, 63, आत्मनि भोग्यभोक्तृत्वविभागः, 357 तस्य संसारित्वं निष्प्रमाणकम्; 361-362, तस्यासंसारित्वं न तर्कविरुद्धम्, 362-364, आत्मबुद्धिः कोशेषु 86, 87, 93, 96, 97

**आत्मानन्दः** (सर्वशब्दानिर्देश्यः कथं गम्यते?) 293-294

**आनन्त्यम्** (ब्रह्मणः, त्रिविधम्) 57-60

**आनन्दशब्दप्रवृत्तिनिमित्तम्**, 294,

**आनन्दमयः** (कोशः) 121, (तत्पुच्छं ब्रह्म) 127-129,
(तस्याद्वैतावसानकत्वम्) 130,
**आनन्दादयो न ब्रह्मधर्माः**, 330-331
**आनन्दीभवति** (इत्यत्र जीवेश्वरभेदः), 203-204
**आनन्दो ब्रह्म इति न सविशेषम्**, 325
**ईश्वरः** (तस्य भयकारणत्वोपपत्तिः), 215-216
**उपदेशसाहस्री**,40, 41, 43, 55, 63, 64, 97, 182, 361
**ऐकाग्र्यम्** (मनसः इन्द्रियाणां च), 318
**कामाः** (इच्छाः काम्याः विषयाश्च), 53, 54, 115, 149, 150
कामाप्ति वचनाभिप्रायः, 53
**कारणत्वं** (ब्रह्मणः, मायिकम्), 27
**कार्यकरणानां संहतानां चेष्टा**, 200-202
**कार्यब्रह्म** (हिरण्यगर्भः), 9
**कार्यस्यानृतत्त्वम्**, 59
**कालाकाशयोरन्तवत्त्वम्** , 57-58
**कोशाः**, 93; तेषां स्वोत्तरसर्वकोशपूर्णत्वम्, 93,
तेष्वात्मबुद्ध्यारोपप्रयोजनम्, 86-88, तत्संक्रमणप्रकारः, 252
कोशसंक्रमणं तत्तज्ज्ञानरूपम् ,283-285
**गुहा** (बुद्धिः) 47,48 , (अव्याकृताकाशम्) 48,
**गौडपादीयकारिकाः**, 27, 61, 72, 88, 129, 289, 311, 314, 359,
**गौणी** (ब्रह्माप्तिः), 19
**घटाकाशाकाशैकत्वदृष्टान्तः**, 238,
**चेतनाचेतने** (ब्रह्मैव परमार्थतः), 189
**जगत्** (तस्याद्वितीयब्रह्मानन्यत्वम्), 62
**जगत्कारणस्य चैतन्यत्वम्** (कामयितृत्वात्) , 149, (तपःकर्तृत्वात्), 164

**जीवः** (न ब्रह्मणः कार्यम्), 358-360

**ज्ञातृज्ञेयादिपदार्थाः**, 47

**ज्ञातृज्ञेयादिसंव्यवहारभाक्त्वं ब्रह्मणः**, 162

**ज्ञानत्वं ब्रह्मणः**, 28-31, 38-41, 42-43

**तपः** (ब्रह्मणः) 163 (मनइन्द्रियाणामैकाग्र्यं ज्ञानसाधनम्), 317-318, 321, 325

**तार्किकाः**, 58, 362-363

**तैमिरिकद्वितीयचन्द्रः**, 268

**त्रिविधमानन्त्यम्**, द्र, आनन्त्यशब्दः

**दशमदृष्टान्तः**, 18

**देशकालौ** (तयोर्नामरूपत्वम्), 160, 185

**द्वितीयग्रहणे कारणम्**, 271

**द्वैतिपक्षे ईश्वराद् भयं दुर्वारणम्**, 215-216

**द्वैतोपमर्दज्ञाता**, 244-246

**द्वैतस्य नोत्पत्तिर्नाशो वा**, 277-278

**नामरूपमाया** (नामरूपात्मिका माया), 165

**नामरूपव्याकरणम्** , 150-158, 184-185

**नामरूपे** (अविद्याकल्पिते), 150

**निरुपाधिकं ब्रह्म**, 11

**परप्राप्तिः पराप्तिः** (ब्रह्मभावः), 18, 19, 52

**परमं व्योम** (अव्याकृतम्) , 48 (हार्दाकाशः), 48 (साक्षिचैतन्यम्), 50
(परमानन्दरूपः, परमात्मा) , 335

**परविद्या** (ब्रह्मविद्या), 10

**परमात्मन एव तत्तद्विकारात्मना कारणत्वम्** , 64

**परस्य न संसारित्वम्** , 52, 53, 150

**पाठान्तरविमर्शः**, 3, 13, 25, 36, 49, 50, 58, 59, 95, 122, 126, 196, 212

**पुरुषस्य श्रैष्ठ्यम्** , 74-75

**पुच्छब्रह्मश्लोकः** (तदनन्तरम् आनन्दमय परामर्शः कथम् ?), 138

**पृथिवी वा अन्नम्** (इत्यादिवाक्येषु अध्यात्मिक पृथिव्यादयः), 344

**प्रमातृत्वम्** (यत्कारणं द्वैतदर्शनम्), -----

**प्रवेशवाक्यार्थः**, 170-179

**ब्रह्म** (परमात्मतत्त्वम्), बृहत्तमं सत्य ज्ञानानन्तलक्षणम् , 16, तदभावलक्षणा अविद्या, 17, तल्लक्षणार्थता सत्यादिविशेषणानाम् , 23, वेदितुरात्मा, 35, तस्य सर्वज्ञता, 41, तस्य सत्यादिशब्द लक्ष्यत्वे आक्षेपपरिहारौ, 44, तस्य भेदसंसर्गविधुरत्वम्, 46, 178, तस्य बुद्धिगुहायामुपलभ्यत्वम्, 48, 179, 181 तन्न नारूपपक्षस्य, 162, 210-211

**ब्रह्मणः कामाः** (संसारिकामेभ्यो तेषां वैलक्षण्यम्), 150-151 ब्रह्मस्वरूपाः, 149, न तैः प्रवर्त्यते ब्रह्म, तेषां तु तत् प्रवर्तकम् , 149-151; कामवत् तत्तपोऽपि मायिकम्, 163-164 ; मायिकं तस्य स्रष्टृत्वम्, 164-166, मायिक एव सृष्टौ तत्प्रवेशः , 169-170, तथैव नामरूपापत्तिः, 184-185, 186 प्राणिनाम् अमृतत्वं ब्रह्मायत्तम् , 376

**ब्रह्मणः कार्ये प्रवेशः** (बुद्धिगुहायामुपलभ्यत्वम्), 177-181

**'ब्रह्मणा सह' इत्यत्र सहशब्दार्थः**, 52, 370

**ब्रह्मणि सत्यादिशब्दप्रवृत्तिः**, 45

**ब्रह्मणः सर्वविकल्पास्पदत्वम्**, 179

**ब्रह्मणो जगत्कारणत्वोपपत्तिः**, 148-149

तस्यैव तत्तद्विकारापन्नस्य कारणत्वम्, 63, 311

**ब्रह्मलक्षणम्** , (तत्स्वरूपम्), 23

**ब्रह्मलक्षणवाक्यार्थः** (यतो वा इत्यस्य), 313-314

अस्मिन् वाक्ये वादिविकल्पाः, 326

**ब्रह्मविदो व्रतोपदेशः**, 338

**ब्रह्मशब्दः**, 16, 34

**ब्रह्मसाक्षात्कारः**, 18

**ब्रह्मानन्दः**, तदनुभवः, 224-225, तस्यासाधारणविशेषणानि, 293-294, तस्य वेद्यत्वम्, 295, तद्विदो भयहेत्वभावः, 296-297

**ब्रह्मानुगमः**, (कार्ये) 178

**भगवद्गीता** , 109, 120, 125, 126, 128, 134, 136, 150, 209

**भाष्याशयः**, शान्तिद्वयविषये, 2-6

**भेदसंसर्गविधुरं ब्रह्म**, 336

**मतान्तराणां विमर्शः**

१. आनन्दमयब्रह्मवादिनां वृत्तिकाराणां मतम् , 110-119, 151

२. परिणामवादिनाम् (प्राचीनानाम्), 170-172

३. प्रतिबिम्बवादिनां (प्राचीनानाम्), 173-175

४. ईश्वरप्रत्यभिज्ञावादिनाम् , 156-158

५. विशिष्टाद्वैतिनाम् , 42, 52, 97, 101, 120, 161, 174, 190, 196, 202, 231-232, 240-242, 251, 252-253, 299, 331-332, 381, 382

६. माध्वानाम् , 100, 173, 190, 202, 231-232, 276, 366

**मनसोऽप्यगोचरम् ब्रह्म**, 293

**महत्तत्त्वम्** , 11

**मायाशक्तिः** (सत्यसृष्टिकारिणां मते), 155

**मायिकं कारणत्वं ब्रह्मणः**, 329-330

**मिथ्याज्ञानकृतो बन्धः**, 271

**यजुरादीनां मानसत्वम्** , 103-106

**यथागुणोपासनं फलम्** , 85, 95, 110

**रसादिक्रमेण परिणामोऽन्नस्य** , 72

**लक्षणं ब्रह्मणः**, 23-25, 326-331

**लौकिकानन्दः**, तस्य सतत्त्वम्, 125-127, तस्य तारतम्यम्, 220,
तद्विशेषैर्ब्रह्मानन्दानुगमः, 221-222

**वाक्यमात्रादपि ज्ञानोत्पत्तिः**, 279

**वार्तिककाराः**, 4, 6, 9, 11, 13, 15, 19, 34, 45, 46, 50, 61, 70, 71, 73, 81, 96, 67, 107, 122, 131, 133, 134, 142, 165, 166, 178, 179, 185, 196, 197, 209, 211, 222, 238, 245, 289, 295, 320, 335, 337, 375

**वार्तिकमतविमर्शः**, शिरआदिकल्पना, 81, एष एव शारीर आत्मा, 96-97
अभयप्रतिष्ठा, 205-206, तपः, 318, अन्नान्नादिविचारफलम् 337

**विज्ञानस्य कर्तृत्वम्** , 113-114

**विज्ञानमयस्य हिरण्यगर्भादनन्यत्वम्** , 114-115

**विद्या**, (न ज्ञानेन विषयीकरणं ब्रह्मणः), 250

**विद्यविद्ये**, 245, 279-281

**विद्या सर्वद्वैतविनाशिनी**, 380

**विद्वान्**, तस्य कामान्तत्वं कामरूपत्वं च, 372, महाश्चर्यरूपता, 374-376,
तेन सामगानम् , 372 तस्य अभयप्रतिष्ठा, 210-211

**विषयविषयिविभागः** (आनन्दस्य), 223

**वृत्तिकाराः**, (द्र. मतान्तरशब्दः)

**वेदितुरात्मत्वेऽपि जिज्ञास्यत्वं ब्रह्मणः**, 35

**व्यवहारविकल्पस्य ब्रह्मनिमित्तकत्वम्** , 380

**व्याकृतत्यदादीनि** , 188-189

**व्याकृताव्याकृतात्मकरूपभेदो ब्रह्मणः**, 195-196

**व्याख्यानप्रस्थानानि** - शान्तिद्वयव्याख्यानम् , 6-7 , सत्यज्ञानादि-
लक्षणवाक्यव्याख्यानम्, 20, अन्नाद्युपासनाविधिव्याख्यानम् , 82,
ब्रह्मानन्दानुमानम्, 221, विषयविषयिविभागजन्यत्वमानन्दस्य, 224-225,
जीवन्मुक्तेऽप्यविद्यालेशः, 337,371 अविद्याप्रतिबिम्बितं ब्रह्म, 174,

अविद्याकारणदोषः, 278-279, अविद्योपादानकोऽध्यासः,281, अविद्योपादानकं जगत्, 326-327, तटस्थलक्षणं स्वरूपलक्षणं च ब्रह्मणः,326, 'यतो वा इमानि' इत्यत्र भूतशब्दार्थः, 312-313

**व्योम**, (अव्याकृतम्) 48, हार्दाकाशः, 48, साक्षिचैतन्यम्, 50, आनन्दस्वरूपं ब्रह्म, 335

**शब्दप्रवृत्तिनिमित्तरहितं ब्रह्म**, 291-292

**शब्दात् स्वार्थप्रतीतः, अर्थान्तरनिवृत्तिः**, 33-34

**शास्त्रोपदेशानर्थक्यम्** , 289

**शुक्तिरजतादीनां विकल्पमात्रत्वम्** , 143, 145, 150

**श्रवणग्रहणधारणाभ्यासाः**, 15

**श्रुत्या ब्रह्मबोधनप्रकारः**, 45

**संव्यवहारार्थं सर्वकामाशनम्** , 379

**संसारबीजम्**, 10

**संक्रमणशब्दार्थः**, 283-287

**समाधिः**, 224

**सर्वज्ञता ब्रह्मणः**, 41-42

**सर्वकामावाप्तिर्विदुषः**, 52, 54

**सलिलफेनवत्** (अनिर्वचनीये नामरूपे), 150

**साध्यसाधने**, (विद्या, परप्राप्तिश्च), 14

**सृष्टिश्रुतिः**, (एकत्वबोधनार्था), **परमेशितुः सृष्टिः**, 150-151

**हिरण्यगर्भः**, 110, 114, 130, 231

# माण्डूक्यरहस्यविवृतिः
## श्री गौडपादकारिकाव्याख्या
## श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिविनिर्मिता

सुविदितमिदं वेदान्ताभियुक्तवचनं 'माण्डूक्यमेवालं मुमुक्षूणां विमुक्तये' इति। तस्या अस्या अत्यन्ताल्पाकाराया अप्युपनिषदोऽनल्पगम्भीरार्थाया अभिप्रायाविष्करणे नास्ति श्रीशङ्करभाष्यसहितसर्ववेदान्तार्थसारसंग्रहभूत-श्रीमद्गौडपादीयप्रकरणचतुष्टय समानं साधनान्तरमिति च । तस्यास्य सकल-त्रय्यन्तग्रन्थरत्नमालिकानायकसरणेरभूतपूर्वव्याख्याविशेषशाणोल्लीढस्य चमत्कृतिमनायासेन जिज्ञासुमतिनयनाह्लादकरीं कर्तुकामैः श्री सच्चिदानन्देन्द्र-सरस्वतीभिरियं माण्डूक्यरहस्यविवृतिर्विरचिता विराजते।

अन्वर्थाभिधानायामस्यां व्याख्यायां माण्डूक्योपनिषदि गर्भीकृतानि नैकानि रहस्यानि श्रीगौडपादसंमतवेदान्तप्रक्रियानुसारेण तथा विवृतानि यथा मोक्षमाणानां जिज्ञासूनामस्याः श्रवणमननाभ्यां छिद्येरन् सर्वसंशयाः भिद्येत च हृदयग्रन्थिरात्मसत्यानुबोधेन । श्रीशङ्करभगवत्पादभाष्यवाक्यार्थश्च प्रतिपदं प्रस्थानत्रयभाष्यान्तरवाक्यान्तरसंगानेन मतान्तरव्याख्यान्तरदोषाविष्करणपूर्वकं तथा व्याकृतो यथा विशुद्धसंप्रदायाध्वनः पारं तितीर्षतां निर्विघ्ना गतिः सिध्येत् । विशिष्य च अलातशान्तिप्रकरणे अर्वाचीनग्रन्थतत्त्वशोधकोत्थापितमतान्तर-संक्रान्तिशङ्कानिरसनपूर्वकं विशिष्टा गौडपादसंमतैव वेदान्तप्रक्रिया प्रदर्शिता पूर्वतनप्रकरणत्रयप्रक्रियया एकवाक्यतां गमिता च । आङ्ग्लभाषामय्या गैर्वाणवाणीमय्या च भूमिकया श्रीगौडपादाचार्यसंमताया वेदान्तप्रक्रियाया असाधारणं स्वरूपं माहायानिकप्रक्रियावैलक्षण्यप्रदर्शनपूर्वकं हृदयंगमं कृतम् ।

तदस्य ग्रन्थराजस्य महिमातिशयानुभवाह्लादं पुस्तकपाठनेनैव पूर्णतया-लभेयुर्वेदान्तरसिका इति किमत्रातिप्रपञ्चनेनेति विरम्यते ॥

## अध्यात्मप्रकाशकार्यालये प्रकाशिताः

# संस्कृतग्रन्थाः

अध्यात्मप्रकाशकार्यालयप्रकाशितेषु उपनिषद् शांकरभाष्येषु विशेषोऽयं यत् (१) 'विषयानुसारेण प्रविभक्तग्रन्थशरीरत्वम्', (२) तत्तद्विभाग प्रतिपाद्यविषय सूचकशिरोलेख-निवेशः, (३) पाठान्तरनिर्देशभाष्यान्तर संवादादिस्थलसूचनापूर्वकं हितमिताधष्टिप्पणदानम्, (४) विचार प्रचोदिका पीठिका, (५) उपनिषन्मूलस्य स्थूलाक्षरैः भाष्यस्य मध्यगात्राक्षरैः, उपनिषत्सारादि परिशिष्टभागस्य च सामान्य सूक्ष्माक्षरैः - इति चैवं विविधगात्रस्फुटाक्षरै-रङ्कनं च इति । सुन्दर अक्षरैः शुक्लमसृणपत्रे मुद्रापितानामप्येषां पुस्तकानां गात्राकारानु गुण्येन परिमित मूल्येनैव वितरणे प्रयत्नः कृतः । सर्वत्र टिप्पणं व्याख्यानादिकं च नूत्नतया श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिरनुगृहीतम् ।।

### 1. ईशावास्योपनिषत् - (पु. 56) III — 20/-

सभाष्यटिप्पणयुता । उपनिषदो माध्यन्दिनपाठः जिज्ञासूपयोगि मन्त्रानुक्रमणिका शब्दसूच्यादिसमेता विचारप्रचोदकपीठिकायुता च ।।

### 2. केनोपनिषत् (पु. 131) I — 40/-

ईशावास्यभाष्यवदेव सर्वपरिकरोपेतम् । परिशिष्टे सार्थभाष्यस्थमुख्यशब्द-वर्णानुक्रमेण दत्ताः । अत्र भाष्यहृदयविसंवादिटीकाभिप्रायाः समालोचिताः। पदवाक्य-भाष्ययोश्चैककर्तृकत्वमसंभावितमिति सविमर्शं पीठिकायामुपपादितं च ।।

### 3. काठकोपनिषद्भाष्यम् (पु. 189) I — 25/-

केनभाष्यवत् सर्वपरिकरोपेतम् ।

### 4. मुण्डकोपनिषद्भाष्यम् (पु. 152) I — 20/-

कठभाष्यवत् सर्वपरिकरोपेतम् । पीठिकायां न केवलं भाष्यविषयविवेचनम्, किं तु भाष्यतट्टीकाकारयोः मतभेदविमर्शन च कृतमत्र ।।

**4a. ऐतरेयोपनिषत् – पूर्वार्धं – उत्तरार्धं (पु. 191) I** **60 /-**

ऐतरेयद्वितीयारण्यकस्य प्रथमाध्यायत्रयेण सह श्री शङ्करभाष्यसंयुता । ऐतरेयद्वितीयारण्यके ४-५-६ अध्यायाः । विस्तृतभूमिकाभागेनोपेतेयं उपनिषत् सभाष्यटिप्पणियुता । अन्ते च उपनिषदः अकारादिक्रमेण मन्त्रानुक्रमणिका, भाष्यस्थमुख्य-शब्दानां सूचीयुता च । सर्वस्याः उपनिषदः अध्यायविभागेन सारश्च प्रदर्शितः ।।

**5. माण्डूक्यरहस्यविवृतिः (पु. 618) I** **250 /-**

श्रीसच्चिदानन्देन्द्रसरस्वतीभिरनुगृहीतायाम् अन्वर्थाभिधानायामस्यां व्याख्यायां माण्डूक्योपनिषदि गर्भीकृतानि नैकानि रहस्यानि श्रीगौडपादसंमतवेदान्तप्रक्रियानुसारेण तथा विवृतानि यथा मोक्षमाणानां जिज्ञासूनामस्याः श्रवणमननाभ्यां छिद्येरन् सर्वसंशयाः भिद्येत च हृदयग्रन्थिरात्मसत्यानुबोधेन । श्रीशङ्करभगवत्पादभाष्य वाक्यार्थश्च प्रतिपदं प्रस्थानत्रय-भाष्यान्तरवाक्यान्तरसंगानेन मतान्तरदोषाविष्करणपूर्वकं तथा व्याकृतो यथा विशुद्ध-संप्रदायध्वना गतिर्निर्विघ्ना भवेत् पाठकानाम् । विशिष्य च अलातशान्तिप्रकरणे प्राचीनग्रन्थतत्त्वशोधकोत्थापितमतान्तरसंक्रान्तिशङ्कानिरसनपूर्वकं श्रीगौडपादसंमता वेदान्तप्रक्रिया प्रदर्शिता, पूर्वतनप्रकरण त्रय प्रकियया एकवाक्यतां गमिता च । आङ्ग्लभाषामय्या गैर्वाणवाणीमय्या च भूमिकया श्रीगौडपादसंमतप्रक्रियाया असाधारणं स्वरूपं माहायानिकप्रक्रिया-वैलक्षण्यस्फुटीकरणपूर्वकहृदयंगमं कृतम् ।।

**6. तैत्तिरीयोपनिषत्** (सभाष्यः) **शीक्षावल्ली (पु. 100) II**

टिप्पण्यादि सर्वपरिकरोपेतं मुण्डकभाष्यवत् ।।

**7. तैत्तिरीयोपनिषत् :** (आनन्दवल्ली भृगुवल्ली च) **(पु. 444) II**

(6–7) **150/-**

'आनन्दवल्ली भृगुवल्ली' चेति वल्लीद्वयार्थव्याख्यानरूपम् । सर्वासामप्युपनिषद्भाष्याणां संपादकाः श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनो प्रकृतवल्लीद्वयविषये न केवलमत्र प्रतिपाद्य-विषयगौरवम् किं तर्हि प्रसन्नगम्भीरेस्यापि भाष्यस्य क्वचिदतिसंक्षिप्तैर्वाक्यैर्ग्रन्थ्युपस्थापकस्य सप्रपञ्चं परिशीलकस्य व्याख्यान्तरस्याभावमपि आलक्ष्य भाष्याक्षरानुक्रमेणैव नातिसंक्षिप्तां नातिविस्तृतां च भाष्यार्थविमर्शिनीं नाम जिज्ञासुजनसर्वसंशयनिवारिणीं व्याख्यां समन्वग्रहिषुः । यस्याम् अर्वाचीनमतान्तरप्रविष्टवेदान्तिभिरुत्थाप्यमानशङ्कानां निरसनपूर्वकं भाष्यविरुद्धव्याख्यान्तरपङ्ककलङ्कप्रक्षालनेन विशुद्धशाङ्करप्रेकियायाः श्रैष्ठ्यम् सम्यगा-

विष्कृतम् । पुस्तकपर्यन्ते च अनुवाकसूची, उपनिषत्खण्डसूची, अर्थनिर्देशपूर्वकं भाष्यस्थ-मुख्यशब्दानां सूची विमर्शिनीगतमुख्यविषयसूची चेत्येता वर्णानुक्रमसूच्यो निवेशिताः । आङ्ग्लगैर्वाणभाषात्मिकयोर्भूमिकयोः, भाष्यगतमुख्यविषयाः सप्रपञ्चं परिशीलिता यथैवान्योपनिषद्भाष्यपीठिकासु इति सर्वाङ्गसुन्दरमिदं परिष्करणं भाष्यस्येति पाठकाः स्वयं विजानीयुः ।।

**8. सुगमा (पु. 134) I 20/-**

अध्यासभाष्यव्याख्या । श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिर्विनिर्मिता । प्रचलित व्याख्यानानां भिन्नभिन्नप्रस्थानावलम्बनत्वात् शुद्धं शाङ्करदर्शनं कीदृशम्, कथं च तत् अविवादम्, अविरुद्धं च स्यादिति संशयानानां मनःसमाधानाय प्रस्थानत्रयभाष्यैककण्ठ्यम् आदर्शयन्ती सार्वत्रिकानुभवानुसारिवेदान्तप्रक्रिया-प्रख्यापनी इयं व्याख्या ।।

**9. सूत्रभाष्यार्थतत्त्वविवेचनी (भाग १) (पु. 138) I 25/-**

जिज्ञासाधिकरणभाष्यस्य नूतनेयं व्याख्या श्रीसच्चिदानन्देन्द्र सरस्वतीसंयमिभिः प्रणीता। सार्वत्रिकानुभवानुसारि शाङ्करं प्रस्थानं स्वासाधारणधर्मविशिष्टं व्याख्यान-रातप्रस्थानान्तरकलङ्करहितं दरीकृतभाष्यान्तरदुराक्रमं च परिशुद्धरूपेणाविष्कृतमत्र ।।

**10. सूत्रभाष्यार्थतत्त्वविवेचनी (भाग २) (पु. 164) I 30/-**

जन्माद्यधिकरणभाष्यव्याख्या सच्चिदानन्देन्द्रसरस्वतीविरचिता । यथैव जिज्ञासाधि-करणव्याख्यायां ब्रह्मज्ञानसतत्त्वनिर्धारणं कृतम्, एवमेवात्र जगज्जन्मादिकारणसतत्वनिर्धारणं कृतम् सर्ववेदान्तादृताम् अध्यारोपापवादप्रक्रियामनुसृत्य । परिशिष्टे च जिज्ञासाधिकरण भाष्यव्याख्यायामिव सूत्रार्थसंबद्धाः केचन विषयाः भगवत्पादसंमतां वेदान्तप्रक्रियां निर्दिधारयिषूणाम् उपकाराय विचारिताः ।।

**11. सूत्रभाष्यार्थतत्तवविवेचनी (भाग 3) (पु. 339) I 40/-**

शास्त्रयोनित्वाधिकरण - समन्वयाधिकरणभाष्ययोर्व्याख्या । पूर्ववदेव शुद्ध-शाङ्करप्रक्रियाप्रकाशिनी । परिशिष्टचिन्तायां शास्त्रप्रामण्यसतत्वविमर्शः, श्रवणादीनां स्वरूपकृत्यादिगता चिन्ता इत्याद्याः विषयाः संकलिताः ।

**12. शुद्धशाङ्करप्रक्रियाभास्करः (1-2) : (पु. 43) I** **10/-**

वेदान्तसिद्धान्तनिर्णयः, शाङ्करसंप्रदायनिर्णयश्च - इति किरणद्वयात्मकः प्रथमो भागः ।

**13. शुद्धशाङ्करप्रक्रियाभास्करः (3-4-5) : (पु. 53) I** **15/-**

अस्मिन् द्वितीये भागे शाङ्करवेदान्तमर्यादा, शाङ्करवेदान्त प्रक्रियास्वरूपम्, अध्यारोपापवादविशेषाश्च - इत्येते विषयाः प्रतिपादिताः ।

**14. शुद्धशाङ्करप्रक्रियाभास्करः (6-7) : (पु. 54) I** **15/-**

अस्मिन् तृतीये भागे - शाङ्करप्रस्थानस्य प्रस्थानान्तरेभ्यो वैलक्षण्यं स्फुटितम्, शाङ्कराद्वैतस्य बौद्धमतसाम्यशङ्का च परिहृता ।

**15. गीताशास्त्रार्थविवेकः (पु. 216) I** **50/-**

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिरनुगृहीतोऽयं ग्रन्थः । अल्पकायेनाप्यनेन प्रकरणेन सुचिन्तितेन, श्रीशङ्करभगवत्पाद भाष्यादृत एव वेदान्तार्थो गीताचार्यानुगृहीत इति, स एव चानुसृतः परमपुरुषार्थदायी इति च जिज्ञासवो निःसंशयं विजानीयुः । अत्र प्रप्रथमं साङ्ख्य-योग-कर्म-ध्यान-ज्ञानादिपदार्थानां विवेकः कृतः । तदनु च कर्मयोग-ध्यानयोग-भक्तियोग-ज्ञानयोगानां परस्परसंबन्धो निरूपितः । परिशिष्टे च भागे साङ्ख्ययोगदर्शनाभ्यां गीतादर्शनस्य सालक्षण्यवैलक्षण्ये विवेचिते येन स्पष्टं विज्ञायेत सर्ववेदान्तसिद्धान्त एव परिशुद्धः स्वीकृतोऽत्र शास्त्रे इति ।।

**16. ब्रह्मविद्यारहस्यविवृतिः (पु. 150) I** **20/-**

सगुणनिर्गुणब्रह्मविद्याविवेकेन जिज्ञासूनां निरायासप्रवेशः ब्रह्मणि यथा लभ्येत तथा श्रीचरणैः छान्दोग्योपनिषदोऽष्टमोऽध्यायः अत्र व्याख्यातः ।

**17. नैष्कर्म्यसिद्धिः** ('क्लेशापहारिणी' व्याख्या सहिता) **(604) II** **200/-**

व्याख्यानकर्तारः श्रीसुरेश्वराचार्यैः प्रमाणीकृतोपदेशसाहस्रीतः वार्तिकद्वयतश्च श्लोकान् समुद्धृत्य वार्तिकप्रस्थानविशुद्धसंप्रदायमाविरकार्षुः । सत्वरं जिज्ञासुभिरवलोक-नीया व्याख्येयम् ।

**18. वेदांतप्रक्रियाप्रत्यभिज्ञा (पु. 822) I**

श्रीसच्चिदानन्देन्द्रसरस्वतीभिर्विनिर्मितोऽयं स्वतन्त्रो निबन्धः । तत्रास्मिन् प्रथमे सम्पुटे सर्वत्र वेदान्तेषु अध्यारोपापवादन्यायाश्रया एकैव प्रक्रिया प्राधान्येन परिगृहीतास्ति

वेदान्ताभियुक्तैरित्येतद्दर्शितमत्र । अस्याः प्रक्रियाया अनादरादेव हेतोः सर्वेऽपि वावदूकाः वेदान्तोपदिष्टमात्मैकत्वमनुभवारूढमापादयितुं नाशक्नुवन्नित्येतच्च निदर्शितम् अतिप्राचीन-कालादारभ्य सर्वज्ञात्ममुनिसमयपर्यन्तवृत्तवेदान्त विचारेतिहाससङ्क्षेपोपस्थापनेन ।।

विस्तृतांग्लभाषामयभूमिकया संस्कृतभाषामयभूमिकया च समलङ्कृतः, प्रधान-विषयानुक्रमणिकासहितश्च ।

**19. वेदान्तबालबोधिनी (पु. 60) II** **20/-**

भगवत्पादविरचित प्रातःस्मरणस्तोत्रस्य प्रश्नोत्तररूपं व्याख्यानम् । भाष्यकारोक्तीनां सरणिमेवानुसृत्य वेदान्तसिद्धान्तोऽत्र जिज्ञासूनां हृदयंगमितः ।

**_0. वेदान्तडिण्डिमः (पु. 76) II** **20/-**

सुप्रसिद्धमिदं प्रकरणं भावबोधिन्याखया व्याख्यया सहितम् । व्याख्यायां ललितया शैल्या श्रुतिप्रमाणवचनोदाहरणपूर्वकं श्लोकार्थो विवृतः । युक्त्या समुपबृंहितश्च ।

**21. विशुद्धवेदान्तसारः (पु. 104) I** **15/-**

अत्र जिज्ञासुजनचित्तभूमिकाविशेषानुसारेण अनुभवप्रधानदृष्ट्या इन्द्रियप्रधानदृष्ट्या चेति वेदान्तोपदेशस्त्रेधा विभज्य प्रदर्शितः ।

**22. विशुद्धवेदान्तपरिभाषा (पु. 146) I** **20/-**

ब्रह्म, जगत्, जीव इति पदार्थत्रयस्य सतत्त्वम्, जगद्ब्रह्मणोः जीवब्रह्मणोश्च संबन्धश्च साम्प्रदायिकपरिभाषाजातमवलम्ब्य अत्र निरूपितः ।

**23. शाङ्करं वेदान्तमीमांसाभाष्यम्** (स्वयंव्याख्यातम्) **(पु. 124) I** **20/-**

**24. वेदान्तविद्वद्गोष्ठी (पु. 164) I** **25/-**

शाङ्करभाष्यतद्व्यख्यानप्रस्थानयोर्वैलक्षण्यमधिकृत्य एकादश विद्वत्प्रकाणाडा-नामभिप्रायाः अत्र दत्ताः । विद्वदभिप्रायसंग्राहिका आग्ल भूमिकाविभूषितश्च।

**25. पञ्चपादिकाप्रस्थानम् (पु. 205)** (भाष्याशयवर्णने प्रस्थानभेदः) **I** **30/-**

अत्र पञ्चपादिकाप्रस्थान भाष्यप्रस्थानेन तुलितमस्ति ; येनावलोकितेनेदं निश्चीयेत यत् सर्वथापि प्रस्थानान्तरमेवावलम्बित पञ्चपादिकाकारैः, भाष्याक्षराणि तत्र तत्रान्यथायोजनेन स्वाभ्युपगत प्रमेयपराणीव वाक्यानि नीतानि चेति ।

**26. मूलाविद्यानिरास** (श्रीशङ्करहृदयम्) **(पु. 303) II** **150/-**

श्रीसच्चिदानन्देन्द्रसरस्वतीभिः पूर्वाश्रमे विनिर्मितं प्रकरणमिदं पूज्यपादानां श्रीशङ्करभगवत्पादानां वेदान्तप्रक्रियारहस्यभेदकानां गभीराशयं विवृणोति । सर्वत्र चात्र प्रमाणवाक्यान्युदाहृतानि परःशतम् श्रीमद्भाष्यकृतां तत्साक्षादन्तेवासिनां श्रीसुरेश्वराचार्याणां सुप्रसिद्धमाण्डूक्यकारिकाकृतां श्रीगौडपादाचार्याणां च । अनुशाङ्करवेदान्तिभिः संप्रदाय-विरोधेन नूत्नतया अभ्यूहितस्य औपनिषदप्रक्रिया मलिनीकरणमूलस्य मूलाविद्यावादस्य समूलोत्पाटनरूपोऽयं निबन्धः सम्यग्दर्शनलालसजनग्राहिशुष्कतर्कपिशाचोच्चाटने महामन्त्ररूपो विजयते ।।

**27. पारमहंस्यमीमांसा (पु. 160) I** **25/-**

संन्यासाश्रमः कथं शास्त्रेण विहितः, संन्यासस्य प्रकाराः, यतीनां नित्यानि अनुष्ठेयानि, संन्यासिना मुख्यो ध्येयः, प्रणवचिन्तनस्य प्रकाराः - इत्यादयो विषयाः - शाङ्करभाष्यं प्रमाणीकृत्य श्रुतिस्मृतिसङ्गतिपूर्वकं निरूपिता अस्मिन् प्रबन्धे । पारमहंस्यस्य वैशिष्ट्यं सम्यक् दर्शितमत्र ।।

**28. भक्तिचन्द्रिका** – (नारदभक्तिसूत्राणं व्याख्या) **(पु. 222) I** **50/-**

नारद प्रणीतानां भक्तिसूत्राणां व्याख्यारूपोऽयं ग्रन्थः ।। शाङ्करसूत्र भाष्यशैली-मनुकरोति इयं नूत्ना व्याख्या । भक्तिविषये संभावितानां सम्भाव्यमानानां सर्वेषां प्रश्नानाम् आक्षेपाणां च परिहारोऽत्र दर्शितः । भावुकैः रसिकैः अवश्यं अवलोकनीयोऽयं ग्रन्थः । कन्नडमूलग्रन्थ रचयितारः - श्री स्वामिनः, संस्कृतानुवादकः - विद्वान् वेङ्कटेशशर्मा, होसहळ्ळी ।

**29. भामती** (रचयिता श्री विठ्ठल शास्त्रिगलु) **(पु. 144) I** **10/-**

"भामतीसमालोचनम्" भामत्याः श्री शाङ्करभाष्यस्य च अनुगुणाननुगुण-प्रदर्शकोऽयं ग्रन्थः ।

**सर्वेषामपि पुस्तकानां प्रापणव्ययस्तु पृथगेव प्रापणस्थानम् :**

**1) अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्, हासन - 573 211,**
**दू: 08175-273820**

**2) बेंगलोर, दू: 080-26765548**

# संस्कृतग्रन्ताः

| | | |
|---|---|---|
| 1. | ईशावास्योपनिषत् (सभाष्यः) | 20/- |
| 4a. | ऐतरेयोपनिषत् (सभाष्यः) | 60 /- |
| 3. | काठकोपनिषत् (सभाष्यः) | 25/- |
| 2. | केनोपनिषत् (सभाष्यः) | 40/- |
| 15. | गीताशास्त्रार्थविवेकः | 50/- |
| 6. | तैत्तिर्रियोपनिषत् (सभाष्यः) शीक्षावल्ली | 150/- |
| 7. | तैत्तिरीयभाष्यार्थविमर्शिनी (आनदवल्ली-भृगुवल्ली) | |
| 17. | नैष्कर्म्यसिद्धिः (क्लेशापहारिणी) | 200/- |
| | पञ्चपादिकाप्रस्थानम् (भाष्याशयवर्णने . प्रस्थानभेदः) | 30/- |
| . | पारमहंस्यमीमांसा | 25/- |
| 16. | ब्रह्मविद्यारहस्यविवृतिः | 20/- |
| 28. | भक्तिचन्द्रिका (श्री सच्चिदानन्द स्वामिनः विरचित 'नारदभक्ति सूत्र' – कन्नड ग्रन्थानुवादः) | 50/- |
| 29. | भामति (श्री विठ्ठल शास्त्रिगलु) | 10/- |
| 5. | माण्डूक्यरहस्यविवृत्तिः (Xerox Copy) | 250/- |
| 4. | मुण्डकोपनिषत् (सभाष्यः) | 20/- |
| 26. | मूलविद्यानिरास (शाङ्करहृदयम्) | 150/- |
| 22. | विशुद्धवेदान्तपरिभाषा | 20/- |
| 21. | विशुद्धवेदान्तसारः | 15/- |
| 19. | वेदान्त बालबोधिनी | 20/- |
| 20. | वेदान्तडिण्डिमः | 20/- |
| 18. | वेदांतप्रक्रियाप्रत्यभिज्ञा (Under Print) | |
| 24. | वेदान्तविद्वद्गोष्ठी | 25/- |
| 12. | शुद्धशाङ्करप्रक्रियाभास्करः (1-2) | 10/- |
| 13. | शुद्धशाङ्करप्रक्रियाभास्करः (3-4-5) | 15/- |
| 14. | शुद्धशाङ्करप्रक्रियाभास्करः (6-7) | 15/- |
| 23. | शाङ्करवेदान्तमीमांसाभाष्यम् | 20/- |
| 8. | सुगमा | 20/- |
| 9. | सूत्रभाष्यार्थतत्त्वविवेचनी (प्रथमो भागः) जिज्ञासाधिकरणम् | 25/- |
| 10. | सूत्रभाष्यार्थतत्त्वविवेचनी (द्वितीयो भागः) जन्माद्याधिकरणम् | 30/- |
| 11. | सूत्रभाष्यार्थतत्त्वविवेचनी (तृतीयो भागः) शास्त्रयोनि – समन्वयाधिकरणम् | 40/- |

# संस्थापकानां संस्मरणम्

श्री श्रीसच्चिदानन्देन्द्रसरस्वतीस्वामिनः आ उदयाचलात् अस्ताचलपर्यन्तम् अभिनवशङ्कराचार्या इति सुप्रसिद्धम् । शाङ्करवेदान्तार्थस्य अस्मिन् विंशतितमशताब्दे प्रमाणीभूताः अधिवक्तारश्चेत्यत्र निर्मत्सरतया तद्ग्रन्थावलोकिनां नास्ति विप्रतिपत्तिः । भाष्याणां तत्कृतकन्नडानुवादग्रन्थाः, तेषां टिप्पणयः, विषयविभागेन तत्तद्भाष्य-भागस्य युक्तशिरोनामानि, विमर्शात्मकपीठिकाः, भाष्यसारश्चेत्येवमादयः विशेषाः संस्कृतभाषानभिज्ञानाम् जिज्ञासूनां वररूपेण विराजन्ते । संस्कृताभिज्ञानानां च विदुषां कृते जिज्ञासुजनमनश्चकोरचन्द्रिकायमाणाः सुगमासूत्रभाष्यार्थतत्त्वविवेचन्यौ, माण्डूक्यरहस्यविवृतिः, नैष्कर्म्यसिद्धेः क्लेशापहारिणीव्याख्या इत्यादीनि मेरुकृति-रूपव्याख्यानानि, स्वतन्त्राश्च वेदान्तप्रक्रियाप्रत्यभिज्ञा, शङ्करहृदयम् अथवा मूलाविद्यानिरासः, गीताशास्त्रार्थविवेकः इत्येवमादयो ग्रन्थाः विरचिताः । तेषां च पठनचिन्तनाभ्यां करतलन्यस्तामलकवत् सर्वात्मभूतं परमार्थतत्त्वं जिज्ञासूनां हृदयङ्गमं भवतीति न पृथग्वक्तव्यम् । एते महान्तः 5-1-1880 तमे वर्षे अवतीर्णाः, 10-6-1948 तमे च संन्यासदीक्षामाधिगम्य, 5-8-1975 तमे ब्रह्मीभूताः । आ सुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया इत्यस्य अभियुक्तवचनस्य प्रत्यक्षोदाहरणमासन् । अध्यात्मप्रकाशकार्यालय इत्येषा संस्था तैस्संस्थापिता । तयैतेषां शतद्वयाधिकाः ग्रन्थाः कन्नडाङ्ग्लसंस्कृतभाषाभिः प्रकटिता वेदान्तप्रपञ्चे अध्यात्मामरज्योति-रुद्दीपयन्ति । साक्षात् विद्याभिमानिनी सरस्वती एव तद्रूपेण अवतीर्णा यतोऽतः तान्पुरुषसरस्वतीति मन्यन्ते शिष्टाः । तेषां ग्रन्थाः देशविदेशेषु च प्रख्याताः । तत्कृतलोकोपकारम् आचन्द्रार्कं विस्मर्तुं नार्हन्ति जनाः । इदानीमपि होळेनरसीपुरे तैस्स्थापितेयं संस्था नैरन्तर्येण तत्प्रदर्शिततदुपदिष्टमार्गानुसारेण च अध्यात्मविद्या-पठनपाठनप्रचारान् तद्ग्रन्थानां च मुद्रणं कुर्वती अन्ताराष्ट्रियकेन्द्रत्वेन विराजते । निर्मत्सरास्सन्तः वाचकमहोदयाः सकृदत्रागम्य अनुभवन्तु तेषां विभूतिमाहात्म्याति-शयमिति सर्वं शिवम् ।

ब्रह्मनिष्ठाय विद्महे संयमीन्द्राय धीमहि ।
तन्नः सच्चिदानन्दः प्रचोदयात् ।।

## संस्थापकानां संस्मरणम्



श्री श्रीसच्चिदानन्देन्द्र सरस्वतीस्वामिनः आ उदयाचलात् अस्ताचलपर्यन्तम् अभिनव शङ्कराचार्या इति सुप्रसिद्धम् । शाङ्करवेदान्तार्थस्य अस्मिन् विंशतितमशताब्दे प्रमाणीभूताः अधिवक्तारश्चेत्यत्र निर्मत्सरतया तद्ग्रन्थावलोकिनां नास्ति विप्रतिपत्तिः। भाष्याणां तत्कृत कन्नडानुवादग्रन्थाः, तेषां टिप्पणयः, विषयविभागेन तत्तद्भाष्यभागस्य युक्त शिरोनामानि, विमर्शात्मकपीठिकाः, भाष्यसारश्चेत्येवमादयः विशेषाः संस्कृतभाषा अनभिज्ञानाम् जिज्ञासूनां वररूपेण विराजन्ते। संस्कृताभिज्ञानानां च विदुषां कृते जिज्ञासुजनमनश्च-कोरचन्द्रिकायमाणाः सुगमासूत्रभाष्यत्त्वविवेचन्यौ, माण्डूक्यरहस्यविवृतिः, नैष्कर्म्यसिद्धेः क्लेशापहारिणीव्याख्या-इत्यादीनि मेरुकृतिरूपव्याख्यानानि, स्वतन्त्राश्च वेदान्तप्रक्रियालात्यभिज्ञा, शङ्करहृदयम् अथवा मूलविद्यानिरासः, गीताशास्त्रार्थविवेकः इत्येवमादयो ग्रन्थाः विरचिताः। तेषां च पठनचिन्तनाभ्यां करतलन्यस्तामलकवत् सर्वात्मभूतं परमार्थतत्त्वं जिज्ञासूनां हृदयङ्गम भवतीति न पृथग्वक्तव्यम् । एते महान्तः ५-१-१८८०तमे वर्षेअवतीर्णाः, १०-६-१९४८तमे च संन्यासदीक्षामाधिगम्य, ५-८-१९७५ तमे ब्रह्मीभूताः । आ सुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया इत्यस्य अभियुक्तवचनस्य प्रत्यक्षोदाहरणमासन्। अध्यात्मप्रकाशकार्यालय इत्येषां संस्था तैस्संस्थापिता। तयैतेषां परश्शतद्वयादिकाः ग्रन्थाः कन्नडाङ्ग्लसंस्कृतभाषाभिः प्रकटिता वेदान्तप्रपञ्चे अध्यात्मामरज्योतिमुद्दीपयन्ति । साक्षात् विद्याभिमानिनी सरस्वती एव तद्रूपेण अवतीर्णा यतोऽतः तान्पुरुषसरस्वतीति मन्यन्ते शिष्टाः । तेषां ग्रन्थाः देशविदेशेषु च प्रख्याताः । तत्कृतलोकोपकारम् आ चन्द्रार्कं विस्मर्तुं नार्हन्ति जनाः। इदानीमपि होळेनरसीपुरे तैस्स्थापितेयं संस्था नैरन्तर्येण तत्प्रदर्शित-तदुपदिष्टमार्गानुसारेण च अध्यात्मविद्यापठनपाठनप्रचारान् तद्ग्रन्थानां च मुद्रणं कुर्वती अन्तराष्ट्रीयकेन्द्रत्वेन विराजते। निर्मत्सरास्सन्तः वाचकमहोदयाः सकृदत्रागम्य अनुभवन्तु तेषां विभूतिमाहात्म्यातिशयमिति सर्वं शिवम् ।

ब्रह्मनिष्ठाय विद्महे संयमीन्द्राय धीमहि ।
तन्नः सच्चिदानन्दः प्रचोदयात् ॥

www.adhyatmaprakasha.org